CC-0. Gurukul Kangri University Haridwar Collection. Digitized by eGangotri Foundation USA

190 7 I
146

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1907 I
146

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५२,६५६

२१५
५ II (२)

५२६५६

२१४
७ II (२)

२१४
७ II (२)

२१४
८

LIBRARY
VISHWA VIDYALAYA GURUKULA KANGRI.

सन्दर्भ ग्रन्थ
REFRENCE BOOK

यह पुस्तक वितरित न की जाय
NOT TO BE ISSUED

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Z

ओ३म्

सामवेदभाष्यम्

उत्तरार्धम्

६२६४६
२१४
८

कण्ववंशोद्भवेन

तुलसीराम स्वामिना प्रणीतम्

संस्कृतभाषया देशभाषया च

सरलीकृतम्

यच्च तेनव

CHECKED 1973

स्थे "स्वामि मेशीन यन्त्रालये" मुद्रयित्वा प्रकाशितम्

(मुद्रणाद्यधिकाराः स्वायत्तीकृताः)

THE

SAMA VEDA BHASHYAM

A

COMMENTARY ON SAMA VEDA SANHITA

IN SANSKRIT AND HINDI

By

TULSI RAM SWAMI Editor VED PRAKASH

MEERUT.

मूल्यम् ५)

फाल्गुने १९६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

सामवेदसंहितायाम्

तृतीय उत्तरार्चिकः

—*—

इह खलूत्तरार्चिके प्रायश्छन्दआर्चिकाम्नाता अपि बह्वयऋचः समाम्नाता दृश्यन्ते। तत्र कारणम्—छन्दआर्चिके सामोद्भवो यथा स्यात्तथा कृत्वा एकैकशो हि समाम्नाताः। अत्र तु स्तोमनिष्पत्तये सूक्तानि द्व्यृचतृचरूपाणि समाम्नायन्ते। स्तोमशब्देन उत्पत्तिषु सोमयागेषु प्रयुज्यमानास्त्रिवृत्पञ्चदशादयोऽभिधीयन्ते। येषां स्वरूपं ताण्ड्यमहाब्राह्मणस्य द्वितीयतृतीययोरध्याययोर्निरूपितमस्ति। यद्धि पूर्वमस्माभिर्द्वितीयाऽध्यायस्य पञ्चमदशतेर्दशम्यामृचि (१६४) उदाहृतं ब्राह्मणवचनेभ्यः॥ "पञ्चदशान्याज्यानि, सप्तदशानि पृष्ठानि" इत्यादितन्त्रान्तरोक्तेषु आज्येषु पृष्ठेषु च तेते स्तोमा उपयुक्ताः सन्ति। एवं स्तोमनिष्पादकानि तृचादिसूक्तानि उत्तरार्चिकग्रन्थे समाम्नातानि॥

भाषार्थः—इस उत्तरार्चिक में बहुत सी छन्दआर्चिक की ऋचायें पुनर्वार आई हुई भी देखी जाती हैं, इस का कारण यह भी है कि छन्दआर्चिक में गानग्रन्थ के साम सिद्ध होने के लिये एक २ ऋचा आई थी, परन्तु यहां उत्तरार्चिक में स्तोमों की सिद्धि के लिये दो ऋचाओं के द्व्यृच वा प्रगाथ और तीन ऋचाओं के तृच आदि सूक्तों के प्रकार से कहने की आवश्यकता थी, जिन स्तोमों का विस्तारपूर्वक वर्णन ताण्ड्यमहाब्राह्मण के दूसरे तीसरे अध्यायों में है और जिस में से लेकर थोड़ा सा वर्णन हम पूर्व छन्दआर्चिक अध्याय २ दशति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पांच ५ ऋचा १०वीं (१६४) पृष्ठ २७७ में लिख आये हैं। "पन्द्रह आज्य और सत्रह पृष्ठ होते हैं" इत्यादि अन्य ग्रन्थों में कहे आज्यों और पृष्ठों में वे वे स्तोम काम में आते हैं। इस प्रकार के स्तोमों की सिद्धि के लिये यह उत्तरार्चिक का क्रम है॥

अथ प्रथमप्रपाठके प्रथमार्धम्

अथ प्रथमाध्याये प्रथमसूक्तस्य तृचस्य—असितः काश्यपो देवलो वा ऋषिः। सोमो देवता। गायत्री छन्दः॥

तत्र प्रथमा।

१ २ ३ १२ ३१ २
उपास्मै गायता नरः पवमानायेन्दवे।
३ २ ३ १ २र
अभि देवाँ इयक्षते॥ १॥ (६५१)

पदपाठः—उप अ०। अस्मै ४। गायत क्रि०। नरः सं०। पवमानाय, इन्दवे ४। अभि अ०। देवान् २। इयक्षते ४॥

अन्वितपदार्थः— (नरः) हे मनुष्याः! (अस्मै) (पवमानाय) शोधकाय पावनाय (इन्दवे) परमेश्वराय (देवान्) (अभि) लक्षीकृत्य (इयक्षते) यष्टुमिच्छते आत्मप्रसादं दातुमिच्छते (उप गायत) उपगानं कुरुत। अनेन स्तोमगानमपि ध्वन्यते॥

अथवा—(इन्दवे) सोमायौषधये। शेषं पूर्ववत्॥ ऋग्वेदे ९।११।१ऽपि॥ १॥ (६५१)

भाषार्थः— (नरः) हे मनुष्यो! (अस्मै) इस (पवमानाय) पावन शुद्धिकारक (इन्दवे) परमैश्वर्यवान् (देवान्) देवतों को (अभि इयक्षते) लक्ष्य करके अपना ज्ञानप्रदानरूप यज्ञ [illegible] हुवे परमात्मा के लिये (उप गायत) उपगान करो। इस क्रिया से स्तोमगान की भी ध्वनि ध्वनित है॥

अथवा—(इन्दवे) सोम ओषधि के लिये। शेष पूर्ववत् जानो॥ ऋ० ९। ११। १ में भी॥ १॥ (६५१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया ।

३ २ ३ १ २ ३ १ २२

अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः ।

३२ ३ १ २ ३२

देवं देवाय देवयु ॥ २ ॥ (६५२)

पदपाठः—अभि अ० । ते १ । मधुना ३ । पयः २ । अथर्वाणः १ । अशिश्रयुः क्रि० । देवम् २ । देवाय ४ । देवयु २ ॥

अन्वितपदार्थः—(ते) (अथर्वाणः) ज्ञानिनः स्थिरात्मान ऋषयः (देवाय) परमेश्वरप्राप्तये (देवम्) दिव्यगुणम् अतएव (देवयु) देवं कामयमानम् (पयः) प्राणम् तद्रूपमन्नम् (मधुना) आत्मज्ञानानन्दरसेन (अभि अशिश्रयुः) संस्कुर्वन्ति ॥

अथवा—(ते अथर्वाणः) ऋत्विजः (देवाय) वायुप्रभृतिदेवसमूहाय (देवम्) दिव्यम् (देवयु) (पयः) सोमरसम् (मधुना) माक्षिकादिना (अभि अशिश्रयुः) ॥

अयमात्मा सर्वेषां भूतानां मधु (शत० १४ । ५ । ५ । १४ इदं वै तन्मधु (शत० १४ । ५ । ५ । १६—१९) प्राणो वाऽन्नं पयः प्राणएवान्नाद्यन्ततः प्रतितिष्ठति (शत० १२ । ८ । १ । २०) अथर्वाण इति पदनाम निघं० ५ । ५ अथर्वाणोऽथनवन्तस्थर्वतिश्चरतिकर्मा तत्प्रतिषेधः । निरु० ११ । १८ ॥ ऋग्वेदे १ । ११ । २ऽपि ॥ २ ॥ (६५२)

भाषार्थः—(ते) वे (अथर्वाणः) स्थिरात्मा ज्ञानी लोग (देवाय) ईश्वर प्राप्ति के लिये (देवम्) दिव्यगुणयुक्त (देवयु) परमात्मदेव को चाहने वाले (पयः) प्राण रूपी अन्न को (मधुना) आत्मज्ञानानन्दरूपी मिठाई से (अभि अशिश्रयुः) संस्कृत करते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथवा—(ते अथर्वाणः) वे ऋत्विज् अध्वर्यु आदि लोग (देवाय) वायु आदि देवगण के लिये (देवम्) दिव्य (पयः) सोम रस को (मधुना) मिठाई से (अभि अशिश्रयुः) संस्कृत करते हैं ॥

शतपथ ब्राह्मण १४ । ५ । ५ । १४, १६, १७, १८,१९, ॥ १२ । ८ । १ । २०॥ निघण्टु ५ । ५ ॥ निरुक्त ११ । १८ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ११ । २ में भी ॥ २ ॥ (६५२)

अथ तृतीया ।

१ २ ३ २ ३ ३ १ २ ३ १ २ ३
स नः पवस्व शं गवे शं जनाय शमर्वते ।

१ २ ३ १ २
शꣳ राजन्नोषधीभ्यः ॥ ३ ॥ (६५३)

पदपाठः—सः १ । नः ६ । पवस्व क्रि० । शम् २। गवे ४ । शम् २ । जनाय ४ । शम् २ । अर्वते ४ । शम् २। राजन् सं० । ओषधीभ्यः ४ ॥

अन्वितपदार्थः—(राजन्) हे प्रकाशमान ! परमात्मन् ! वा सोम ! ओषधिराज ! (सः) स त्वम् (नः) अस्माकं (गवे) गवादिपशुभ्यः (शम्) सुखं (जनाय) पुत्रादिवर्गाय (शम्) सुखम् (अर्वते) अश्वाय प्राणाय (शम्) (ओषधीभ्यः) गोधूमादिभ्यः (शम्) सुखं (पवस्व) क्षारय ॥

अर्वेत्यश्वनाम निघं० १ । १४ ॥ त्रयोश्वा हौ सव्यष्ठृसारथी ते पञ्च प्राणाः । श० ५ । २ । ४ । ९ ॥ ऋग्वेदे ९ । ११ । ३ ऽपि ॥ ३ ॥ (६५३)

भाषार्थः—(राजन्) हे प्रकाशमान परमेश्वर ! वा ओषधिराज सोम ! (सः) वह तू (नः) हमारे (गवे) गौ आदि पशुओं के लिये (शम्) सुख (जनाय) पुत्रादि वर्ग के लिये (शम्) सुख (अर्वते) प्राण के लिये (शम्) सुख और (ओषधीभ्यः) गेहूं आदि ओषधियों के लिये (शम्) सुख (पवस्व) वर्षाव ॥

निघण्टु १ । १४ शतपथ ब्रा० ५ । २ । ४ । ९ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ११ । ३ में भी ॥ (६५३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीयतृचस्य-कश्यपो मारीच ऋषिः । पवमानः सोमो देवता ।
गायत्री छन्दः ॥
तत्र प्रथमा ।

१ २ ३ १ २ ३ १ २ ३ २
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।
१ २ ३ १ २र
सोमाः शुक्रागवाशिरः ॥ ४ ॥ (६५४)

पदपाठः-दविद्युतत्या,रुचा,परिष्टोभन्त्या,कृपा ३। सोमाः,शुक्राः,गवाशिरः१ ॥

अन्वितपदार्थः—(शुक्राः) शुक्लाः (गवाशिरः) गव्याशिराः दुग्धमिश्रिताः (सोमाः)। (दविद्युतत्या) देदीप्यमानया (परिष्टोभन्त्या) पुनःपुनरभ्यस्यमानया (कृपा) सामर्थ्यवत्या (रुचा) दीप्त्या अवभासन्ते इति शेषः ॥

ऋग्वेदे ९ । ६४ । २८ ऽपि ॥४॥ (६५४)

भाषार्थः-(शुक्राः) श्वेत (गवाशिरः) दूध मिले (सोमाः) सोम (दविद्युतत्या) देदीप्यमान (परिष्टोभन्त्या) बार बार अभ्यास की जाती हुई (कृपा) समर्थ (रुचा) दीप्ति से [चमकते हैं] । ऋ० ९।६४ । २८ में भी॥४॥ (६५४)

अथ द्वितीया ॥

३ २ ३ १ २ ३ १ २र ३क २र
हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत् ।
१ २ ३ १ २
सीदन्तो वनुषो यथा ॥ ५ ॥ (६५५)

पदपाठः-हिन्वानः १ । हेतृभिः ३ । हितः १ । आ अ० । वाजम् २ । वाजी १ । अक्रमीत् क्रि० । सीदन्तः १ । वनुषः १ । यथा अ० ॥

अन्वितपदार्थः—(यथा) येन प्रकारेण (हेतृभिः) प्रेरकैः (हिन्वानः) प्रेर्यमाणः (वनुषः) वीरः (हितः) (वाजी) अश्वः(आवाजम्)यावद्बलम् (अक्रमीत्) धावति । तथैव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(सीदन्तः) धावन्तः सोमा आक्राम्यन्ति इति शेषः ॥

वनुष्यतिः क्रुध्यतिकर्मा निघं० २ । १४ ॥ ऋग्वेदे ९।६४। २९ ऽपि ॥ ५ ॥ (६५५)

भाषार्थः—(यथा) जिस प्रकार (हेतृभिः) प्रेरकों से (हिन्वानः) प्रेरित किया हुवा (वनुषः) वीर (हितः) कहने में चलने वाला (वाजी) बलवान् अश्व (आवाजम्) बल वा शक्ति भर (अक्रमीत्) दौड़ता है, वैसे ही (सीदन्तः) तीव्र गति से चलते हुवे सोम दौड़ते हैं ।। निघं० २ । १४ में वनुष्यति का अर्थ क्रोध वा वीरता है ।। ऋ० ९ । ६४ । २९ में भी ॥५॥ (६५५)

अथ तृतीया ॥

३ १ २ ३ १ २ ३ २ ३ १ २

ऋधक् सोम स्वस्तये संजग्मानो दिवा कवे ॥

१ २ ३ १ २ ३ ४

पवस्व सूर्यो दृशे ॥ ६ ॥ (६५६)

पदपाठः—ऋधक् १ । सोम सं० । स्वस्तये ४ । संजग्मानः १ । दिवा ३ । कवे सं० १ । पवस्व क्रि० । सूर्यः १ । दृशे ४ ॥

अन्वितपदार्थः—(कवे) बुद्धितत्त्वोद्बोधक ! (सोम) सोम! (ऋधक्) ऋध्नुवन् (दिवा) आकाशेन (संजग्मानः) संगतश्च (सूर्यः) आदित्यो यथा (दृशे) दर्शनसाहाय्याय पवते तथा त्वम् (स्वस्तये) सुखाय (पवस्व) दिवमस्माभिर्हितोगच्छ ॥

यथा सूर्यो दृशे दिवा संगत उदेति तथैव सोमोऽपि निजसुखाय दिवा आकाशेन संगत्यै होतव्य इति भावः ॥

इवशब्द आह्रियते । दृशे दर्शनाय यथा सूर्य उदेति तथैव त्वमपि उदिहीति विवरणमतं च ॥ ऋधगिति पृथभावस्य प्रवचनं भवत्यथाप्यृध्नोत्यर्थे दृश्यते । निरु० ४।२५॥ ऋग्वेदे तु ९। ६४।३० दिवः कविरिति पाठः ॥ ६ ॥ (६५६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(कवे) बुद्धितत्त्व के बढाने जगाने वाले ! (सोम) सोम ! (ऋधक्) चढ़ता बढ़ता हुवा (दिवा) और आकाश से संगत होता हुवा (सूर्यः) जैसे सूर्य (दृशे) दृष्टि की सहायता के लिये चढ़ता है वैसे तू भी (स्वस्तये) सुख के लिये (पवस्व) हम से हवन किया हुवा आकाश को प्राप्त हो ॥

जैसे दृष्टि के लिये सूर्य आकाश में चढ़ता है वैसे सुख के लिये सोम का हवन कर आकाश में चढ़ाना चाहिये ॥

विवरणकार की संमति, निरुक्त ४।२५ का प्रमाण और ऋ०९।६४।३० का पाठान्तर संस्कृत भाष्य में देखिये ॥ ६ ॥ (६५६)

अथ तृतीयतृचस्य—वैखानसा आङ्गिरसा ऋषयः। सोमो देवता।

गायत्री छन्दः ॥

तत्र प्रथमा ।

१ २ ३ २ ३ १ २

पवमानस्य ते कवे वाजिन्त्सर्गाअसृक्षत ।

१ २ ३ १ २३ १ २

अर्वन्तो न श्रवस्यवः ॥ ७ ॥ (६५७)

पदपाठः— पवमानस्य, ते ६। कवे, वाजिन् सं० । सर्गाः १। असृक्षत क्रि०। अर्वन्तः १। न अ०। श्रवस्यवः १ ॥

अन्वितपदार्थः—(कवे) मेधाविन्(वाजिन्)योगबलयुक्त ! (पवमानस्य) योगेनात्मानं शोधयतः (ते) तव (श्रवस्यवः) यश इच्छवः (सर्गाः) प्राणायामान्तर्गता वायुविसर्गाः (असृक्षत) सृज्यन्ते (न) यथा (अर्वन्तः) अश्वाः ॥

यद्वा—(कवे) मेधातत्त्वोद्बोधक ! (वाजिन्) बलप्रद ! सोम ! (पवमानस्य) वायुशुद्धिं कुर्वतः (ते) तव (सर्गाः) धाराः (श्रवस्यवः) यजमानयशो विस्तृतं कुर्वन्त्यः (असृक्षत) सृज्यन्ते । (न) यथा(अर्वन्तः) अश्वा मन्दुरातो निर्गच्छन्ति तद्वत्॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेदे ९ । ६६ । १० अपि ॥७॥ (६५७)

भाषार्थ-:(कवे) विद्वन् ! (वाजिन्) योगबलैश्वर्ययुक्त ! पुरुष ! (पवमानस्य) योगाभ्यास से आत्मा को शोधने वाले (ते) तेरे (सर्गाः) प्राणायामान्तर्गत वायुओं के विसर्ग (अवस्यवः) तेरा यश चाहते हुवे (सृज्यन्ते) छोड़े जाते हैं (न) जैसे (अर्वन्तः) अश्व ॥

अथवा-(कवे) बुद्धितत्त्व के जगाने वाले !(वाजिन्) बलदायक ! सोम ! (पवमानस्य) वायु की शुद्धि करते हुवे (ते) तेरी (सर्गाः) धारायें (अवस्यवः) यजमान का यश चाहती हुई (असृक्षत) छोड़ी जाती हैं (न) जैसे (अर्वन्तः) अश्वशाला से अश्व छोड़े जाते हैं, तद्वत् ॥ ऋ० ९ । ६६ । १० में भी ॥ ७ ॥ (६५७)

अथ द्वितीया ।

२ ३ १२ ३ २ ३ १ २ ३ १२ ३ १ २

अच्छा कोशं मधुश्चुतमस्रग्रं वारे अव्यये ।

१ २ ३ १ २

अवावशन्त धीतयः ॥८॥ (६५८)

पदपाठः-अच्छ अ० । कोशम्, मधुश्चुतम् २ । असृग्रम् क्रि० । वारे,अव्यये ७ । अवावशन्त क्रि० । धीतयः १ ॥

अन्वितपदार्थः-(धीतयः) धीतिर्ध्यानंतद्वन्तः (अव्यये) अविमये मानससूर्यमये (वारे) नाडीसमूहे (मधुश्चुतम्) मधूररसस्यानन्दस्य च्यावयितारं (कोशं) निधिम् (असृग्रम्) उद्घाटयन्ति (अच्छ) सुष्ठु (अवावशन्त) कामयन्ते च ॥

यद्वा-(धीतयः) ऋत्विजामङ्गुलयः (अव्यये वारे) ऊर्णामये दशापवित्रे (मधुश्चुतं कोशम्) सोमकोशम् (असृग्रम्) उद्घाटयन्ति (अच्छ अवावशन्त), च ॥ ऋग्वेदे ९ । ५६ । ११ अपि ॥ ८ ॥ (६५८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(धीतयः) ध्यानी लोग (अव्यये) मानससूर्यमय (वारे) नाडीसमूह पर (मधुश्चुतम्) मधुर=आनन्द टपकाने वाले (कोशम्) घट को (असृग्रम्) उघाड़ते हैं और (अच्छ) अच्छेप्रकार (अवावशन्त) चाहते हैं॥

अथवा—(धीतयः) ऋत्विजों की अङ्गुलियें (अव्यये) ऊर्णामय (वारे) दशापवित्र पर (मधुश्चुतम्) मिठास टपकाने वाले (कोशम्) सोमघट को (असृग्रम्) उघाड़ते और (अच्छ) भले प्रकार (अवावशन्त) इच्छा करते हैं। ऋ० ९। ६६। ११ में भी ॥८॥ (६५८)

अथ तृतीया ॥

१ २ ३२३ ३ २ ३ २ ३ २ ३१२
अच्छा समुद्रमिन्दवोस्तं गावो न धेनवः।
१ २३२ ३२ ३ २
अग्मन्नृतस्य योनिमा ॥१॥ (६५९)

पदपाठः—अच्छ अ० । समुद्रम् २ । इन्दवः १ । अस्तम् २ । गावः १ । न अ० । धेनवः १ । अग्मन् क्रि० । ऋतस्य ६ । योनिम् २। आ अ० ॥

अन्वितपदार्थः—(इन्दवः) सोमाः सौम्यस्वभावा भक्ता उपासकाः (ऋतस्य) सत्यस्य वेदस्य (योनिम्) कारणम् (समुद्रम्) समुद्रवद्गभीरं परमेश्वरम् (अच्छ) सानन्दम् (आ अग्मन्) समन्ताद्गच्छन्ति । दृष्टान्तः—(न) यथा (धेनवः) दुग्धदात्र्यः (गावः) (अस्तम्) गृहम् [यतोगतास्तदेव] आगच्छन्ति तद्वत् ॥

यद्वा—(इन्दवः) सोमाः (ऋतस्य) यज्ञस्य (योनिम्) स्थानम् (समुद्रम्) अन्तरिक्षम् (अच्छ आ अग्मन्) धेनवो गावोस्तं न) ॥

अत्र हि श्रीसत्यव्रतः सामश्रम्याह—"ज्योतिष्टोमिकं बहिष्पवमानं समाप्तमिति विवरणकारः। तदिदं सूक्तत्रयगानसाध्यं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तोत्रं बहिष्पवमानमित्युच्यते । तत्रावस्थितानामृचां पवमानार्थत्वात्, बहिःसंबन्धाच्च। इति मीमांसादर्शने जैमिनिः । अध्याये ९ पादे ४ अधिकरणे ३ । न खल्विदं स्तोत्रमितरस्तोत्रवत्सदोनामकस्य मण्डपस्य मध्ये औदुम्बर्याः स्तम्बशाखायाः सन्निधौ प्रयुज्यते, किन्तु सदसो बहिः प्रसर्पद्भिः प्रयुज्यते । बहिष्पवमाननामवेदी, यत्र स्थित्वैतद्बहिष्पवमाननामनवर्क्साध्यत्रिवृन्नामस्तोमपाठपूर्वकं मार्जनं भवति; सा तु उदग्वंशानामशालान्तर्गतसदोमण्डपात्पश्चिमायाः प्राचीनवंशानामशालान्तर्गतैष्टिकवेदेरुत्तरतो विद्यते । अस्य च बहिष्पवमानस्य प्रकृतियागेऽग्निष्टोमादौ त्रिवृन्नामकः स्तोमो भवति" । इत्यादि ॥

स चास्माभिः पूर्वताण्ड्यमहाब्राह्मणस्य द्वितीयप्रपाठकस्थेन खण्डत्रयेणोदाहृत्य व्याख्यातएव (पृष्ठे २७५ द्रष्टव्यः)

समुद्र इत्यन्तरिक्षनाम निघं० १ । ३ ॥ अस्तमिति गृहनाम ३ । ४ ॥ ऋग्वेदे १ । ६६ । १२ ऽपि ॥ ९ ॥ (६५९)

भाषार्थः-(इन्दवः) शान्तस्वभाव भगवदुपासक लोग (ऋतस्य योनिम्) सत्य वेद के धाम (समुद्रम्) समुद्रतुल्य गम्भीर परमात्मा को (अच्छ) भले प्रकार सानन्द (आ अगमन्) प्राप्त होते हैं । दृष्टान्त-(न) जैसे (धेनवः गावः) दुधार गौवें (अस्तम्) घर को [जहां से गई थीं] प्राप्त होतीं हैं ॥

यद्वा(इन्दवः) सोम (ऋतस्य योनिम्) यज्ञ के स्थान (समुद्रम्) अन्तरिक्ष को (अच्छ आ अगमन्) भलेप्रकार सब ओर से प्राप्त होते हैं (धेनवः) दुधार (गावः) गौवें (न) जैसे (अस्तम्) दूध देने को घर आती हैं तद्वत् ॥

निघण्टु १ । ३ ॥ ३ । ४ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ९ । ६६ । १२ में भी ॥

इस अवसर में श्री सत्यव्रत सामश्रमी जी कहते हैं कि "विवरणकार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यहां ज्योतिष्टोमसम्बन्धी बहिष्पवमान समाप्त लिखते हैं। और मीमांसाद० ९। ४। ३ में लिखा है कि यह तीन सूक्तों के गान से साध्य स्तोत्र बहिष्पवमान कहाता है। क्योंकि उन में की ऋचायें पवमानार्थ हैं और बाहर से सम्बन्ध है। यह स्तोत्र अन्य स्तोत्रों के समान सदस् नामक मण्डप के भीतर उदुम्बर की स्तम्बशाखा के समीप नहीं पढ़ा जाता, किन्तु सदस् से बाहर चलते हुवे इसे पढ़ते हैं। बहिष्पवमान नामक वेदी वह है, जहां स्थित होकर इस बहिष्पवमान नाम ९ नव ऋचाओं से साध्य त्रिवृत् नामक स्तोम का पूर्व पाठ कर के मार्जन होता है और वह वेदी उदग्वंशा नाम शाला के अन्तर्गत सदोमण्डप के पश्चिम की ओर प्राचीनवंशा नाम शाला के अन्तर्गत ऐष्टिक वेदी से उत्तर की ओर होती है और इस बहिष्पवमान के प्रकृतियाग अग्निष्टोमादि में त्रिवृत् नामक स्तोम होता है"। इत्यादि ॥

इस त्रिवृत् की व्याख्या ताण्डयमहाब्राह्मण प्रपाठक २ के ३ खण्डों के अनुसार हम पूर्व (पृ० २७७ में) कर चुके हैं ॥ ९ ॥ (६५९)

इति प्रथमः खण्डः ॥

अथ द्वितीयखण्डे प्रथमतृचस्य भरद्वाज ऋषिः। अग्निर्देवता। गायत्री छन्दः।

२ ३ १ २ ३ १ २ ३ २ ३ १ २

अग्न आयाहि वीतये गृणानो हव्यदातये ।

१ २ २ ३ १ २

नि होता सत्सि बर्हिषि ॥ १ ॥ (६६०)

छन्दआर्चिके (१) व्याख्याता। अत्र पुनः पाठोस्ति भिन्नप्रकारकसूक्तसमन्वयादिप्रयोजनेभ्यः ॥ (६६०)

भाषार्थः— इस की व्याख्या छन्दआर्चिक (१) में कर चुके हैं। यहां पुनर्वार पाठ, भिन्नप्रकार के सूक्त में समन्वित होने आदि प्रयोजनार्थ जानिये ॥ (६६०)

अथ द्वितीया।

१ २ ३ १ २ ३ १ २

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २
बृहच्छोचा यविष्ठ्य ॥ २ ॥ (६६१)

पदपाठः— तम्, त्वा२। समिद्भिः ३। अङ्गिरः सं० । घृतेन ३ । वर्धयामसि क्रि० । बृहत् २ । शोच क्रि० । यविष्ठ्य सं० ।

अन्वितपदार्थः—(अङ्गिरः) प्रकाशमान ! (यविष्ठ्य) युवतम ! बलवत्तम ! अग्ने ! वा परमात्मन् ! (तम्)पूर्वमन्त्रोक्तं (त्वा) त्वाम् (समिद्भिः)काष्ठैः,समिन्धनसाधनैर्योगाभ्यासादिभिर्वा (घृतेन) आज्येन, स्नेहेन प्रीत्या त्वत्प्रवणया वृत्त्या वा (वर्धयामसि) प्रज्वलितमत्यन्तंकुर्याम,हृदि बहुध्यातं वा कुर्याम। त्वं च (बृहत्) महत् यथा स्यात्तथा (शोच) दीप्यस्व ॥

यजुर्वेदे ३ । ३ ऋग्वेदे ६ । १६ । ११ ऽपि ॥१॥ (६६१)

भाषार्थः—(अङ्गिरः) प्रकाशमान ! (यविष्ठ्य) अतिबलिष्ठ ! अग्ने ! वा परमात्मन् ! (तम्) उस पूर्वमन्त्रोक्त (त्वा) आप को (समिद्भिः) समिधाओं वा योगाभ्यासादि साधनों से तथा(घृतेन)घृत वा स्नेह=प्रीति=आप की ओर झुकाव से हम (वर्धयामसि) अत्यन्त प्रज्वलित, वा हृदय में अत्यन्त साक्षात् करें और आप (बृहत्) बहुत (शोच) प्रकाश कीजिये ।।

यजुः ३ । ३ ऋ० ६ । १६ । ११ में भी ॥ १ ॥ (६६१)

अथ तृतीया ।

१ २ ३ २ ३ २ ३ १ २
स नः पृथु श्रवाय्यमच्छा देव विवाससि ।
३ १ २ ३ १ २
बृहदग्ने सुवीर्यम् ॥ ३ ॥ (६६२)

पदपाठः—सः १ । नः ४ । पृथु, श्रवाय्यम् २ । अच्छ अ० । देव सं० । विवाससि क्रि० । बृहत् २ । अग्ने सं० । सुवीर्यम् २ ।।

अन्वितपदार्थः—(अग्ने) प्रकाशमान ! (देव) दिव्यगुण! (सः) पूर्वोक्तस्त्वम् (पृथु) विस्तीर्णम् (श्रवाय्यम्) श्रवणीयं प्रशस्यम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(बृहत्) महत्परिमाणकम् (सुवीर्यम्) शोभनं वीर्यम् (नः) अस्मभ्यम् (अच्छ) सुष्ठु (विवाससि) अभिगमयसि ॥

ऋग्वेदे ६ । १६ । १२ ऽपि ॥३॥ (६६२)

भाषार्थः—(अग्ने) प्रकाशमान ! (देव) दिव्यगुणयुक्त ! (सः) पूर्वोक्त आप (पृथु) विस्तृत (श्रवाय्यम्) सुनने योग्य प्रशंसनीय (बृहत्) बड़े भारी (सुवीर्यम्) शोभायुक्त वीर्य को (नः) हमें (विवाससि) प्राप्त कराते हैं।।

ऋ० ६ । १६ । १२ में भी ॥ ३ ॥ (६६२)

अथ द्वितीयतृचस्य—विश्वामित्रो जमदग्निर्वा ऋषिः ।
मित्रावरुणौ देवते । गायत्री छन्दः ।

१ २ ३ १ २

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।

२ ३ १ २

मध्वा रजाꣳसि सुक्रतू ॥ ४ ॥ (६६३)

व्याख्याता (२२०)

भाषार्थ इस का (२२०) पर कर चुके हैं, वहीं मित्र वरुण का निरुक्त भी लिख आये हैं ॥ ४ ॥ (६६३)

अथ द्वितीया ।

३ १ २ ३ १ २ ३ १ २

उरुशꣳसा नमोवृधा मह्ना दक्षस्य राजथः ।

१ २

द्राघिष्ठाभिः शुचिव्रता ॥ ५ ॥ (६६४)

पदपाठः—उरुशंसा, नमोवृधा १ । मह्ना ३ । दक्षस्य ६ । राजथः क्रि० । द्राघिष्ठाभिः ३ । शुचिव्रता १ ॥

अन्वितपदार्थः—(उरुशंसा) उरुशंसौ बहुशंसनीयौ (नमोवृधा) नमोवृधौ नमसा हव्यलक्षणेनान्नेन वर्धमानौ (शुचिव्रता) शुचिव्रतौ पवित्रकर्माणौ मध्यस्थानौ मित्रावरुणौ वर्षकौ देवौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(दक्षस्य) बलस्य (महा) महत्त्वेन (द्राघिष्ठाभिः) दीर्घतमाभिर्दा-मिनीभिः (राजथः) राजेते ॥

नम इत्यन्ननाम निघं० २।७॥ दक्षइति बलनाम २।९॥ व्रतमिति कर्मनाम २।१॥ उरु इति बहुनाम ३।१॥ ऋग्वेदे ३।६२।१७ऽपि ॥५॥ (६६४)

भाषार्थः—(उरुशंसा) बहुत वर्णनीय गुण कर्म स्वभाव वाले (नमोवृधा) हव्यरूपी अन्न से बढ़ने वाले (शुचिव्रता) शुद्धिकारक मित्र और वरुण नामक मध्यस्थान वृष्टिकारक देव (दक्षस्य महा) बल की बड़ाई से (द्राघिष्ठाभिः) अत्यन्त लम्बी बिजुलियों के साथ (राजथः) विराजते हैं ॥

निघं० २।७॥ २।९॥ २।१॥ ३।१ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ३।६२।१७ऽपि॥ ५॥ (६६४)

अथ तृतीया।

३ २ ३ १ २ ३ १ २ ३ १ २

गृणाना जमदग्निना योनावृतस्य सीदतम्।

३ १ २ २

पातꣳ सोममृतावृधा ॥६॥ (६६५)

पदपाठः—गृणाना १। जमदग्निना ३। योनौ ७। ऋतस्य ६। सीदतम् पातम् क्रि०। सोमम् २। ऋतावृधा १॥

अन्वितपदार्थः—मित्रावरुणौ! वृष्टिदेवौ! युवाम् (गृणाना) गृणानौ प्रशस्यमानौ सन्तौ (ऋतस्य) उदकस्य (योनौ) गगनमण्डले (सीदतम्) स्थितौ भवतम् तथा (जमदग्निना) कुण्डे जाज्वल्यमानेनाग्निना हूयमानम् (सोमम्) सोमाद्योषधिरसम् (पातम्) पिबतम् तेन च (ऋतावृधा) वृष्टेर्जलस्य वर्धकौ स्यातम्॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अयं भावः—मित्रावरुणसंज्ञकौ वायुविशेषौ सूर्यकिरणविशेषौ वा तद्वर्णनयुक्तवेदमन्त्रैर्वर्ण्यमानौ आकाशमध्ये स्थितौ प्रज्वलिताग्नौ हूयमानेन सोमेन वर्धमानौ वृष्टिजलस्य वर्धकौ भवतः ॥

ऋतमित्युदकनाम निघं० १ । १२ ॥ ऋग्वेदे ३ । ६२ । १८ अपि ॥ ६ ॥ (६६५)

भाषार्थः—मित्र और वरुण संज्ञक आकाशगत देव=वायुविशेष वा अवस्थाविशेषापन्न सूर्यकिरण (वृणाना) वेदमन्त्रों से वर्णित किये जाते हुवे (ऋतस्य) जल के (योनौ) स्थान=गगनमण्डल में (सीदतम्) स्थित हों तथा (जमदग्निना) जाज्वल्यमान दहकते अग्नि से हूयमान (सोमम्) सोमादि ओषधिरस को (पातम्) पीवें । उस से (ऋतावधा) वृष्टिजल के बढ़ाने वाले हों ॥

ऋ० ३ । ६२ । १८ में भी ॥ ६ ॥ (६६५)

अथ तृतीयतृचस्य—हरिमिढ ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

१ २ ३ २उ ३ २ ३ २ ३ १ २ ३ २
आयाहि सुषुमा हित इन्द्र सोमं पिबा इमम् ।
२उ ३ १ २ ३ २ ३
एदं बर्हिः सदो मम ॥७॥ (६६६) व्याख्याता (१९१)

इस की व्याख्या (१९१) बड़ी संख्या में देखिये ॥७॥(६६६)

अथ द्वितीया ॥

१ २ ३ २ ३ २ ३ १ २ ३ १ २
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना ।
२ ३ १ ३
उप ब्रह्माणि नः शृणु ॥ ८ ॥ (६६७)

पदपाठः—आ अ० । त्वा २ । ब्रह्मयुजा, हरी १ । वहताम् क्रि० । इन्द्र सं० । केशिना १ । उप अ० । ब्रह्माणि २ । नः ६ । शृणु क्रि० ॥

अन्वितपदार्थः—(इन्द्र)परमेश्वर! (केशिना)केशिनौ वृत्तिरूप-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

केशवन्तौ(ब्रह्मयुजा) ब्रह्मणि युक्तौ (हरी) आत्मा मनश्चेति द्वौ (त्वा)त्वाम् (आवहताम्) प्राप्नुताम् (नः) अस्माकम् (ब्रह्माणि) वैदिकस्तोत्राणि (उप शृणु) अङ्गीकुरु ॥

यद्वा–(इन्द्र) विद्युत् ! (केशिना) रश्मिवन्तौ (ब्रह्मयुजा) ब्रह्मणा परमात्मना योजितौ (हरी) हारकौ धारणाकर्षणाख्यावश्वौ (त्वा) त्वाम् (आवहताम्)प्राप्नुताम् (नः) अस्मकाम् (ब्रह्माणि) बृहन्ति हवींषि (उपशृणु) स्वीकुरु ॥

हरी इन्द्रस्य निघं० १ । १५ ॥ केशी–केशा रश्मयस्तैस्तद्वान्। निरु० १२ । २५ ॥ ऋग्वेदे ८।१७ । २ अपि॥८॥(६६७)

भाषार्थः–(इन्द्र) परमेश्वर ! (केशिना) वृत्तिरूप केशों वाले (ब्रह्मयुजा) ब्रह्म में योग करने वाले (हरी) आत्मा और मन दोनों (त्वा) आप को (आवहताम्) प्राप्त हों (नः) हमारे (ब्रह्माणि) वेदोक्त स्तोत्रों को (उप शृणु) स्वीकार कीजिये ॥

यद्वा—(इन्द्र) विद्युत् ! (केशिना) किरणरूपी केशों वाले (ब्रह्मयुजा) ब्रह्म परमात्मा के जोड़े हुए (हरी) धारण और आकर्षण अश्व (त्वा) तुझे (आवहताम्) प्राप्त हों (नः) हमारे (ब्रह्माणि) बड़े हविषों को (उप शृणु) ग्रहण कर ॥

निघण्टु १ । १५॥ निरुक्त १२ । २५ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । १७ । २ में भी ॥८॥ (६६७)

अथ तृतीया ॥

३ १ २ ३ २ ३ १ २ ३ २ ३ ३ १ २

ब्रह्माणस्त्वा युजा वयꣳ सोमपामिन्द्र सोमिनः ।

३ १ २

सुतावन्तो हवामहे ॥ ९ ॥ (६६८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—ब्रह्माणः १ । त्वा २ । युजा ३ । वयम् १ । सोमपाम् २ । इन्द्र सं० । सोमिनः १ । सुतावन्तः १ । हवामहे क्रि० ॥

अन्वितपदार्थः—(इन्द्र) परमेश्वर ! (सोमिनः) सौम्य-भावाः (सुतावन्तः) कृतहृदयशुद्धयः (ब्रह्माणः) वेदविदः (वयम्) योगिनः (युजा) योगेन (सोमपाम्) सौम्यभावस्य ग्राहकम् (त्वा) त्वाम् (हवामहे) आह्वयामहे॥

यद्वा—(इन्द्र) विद्युत् ! (सोमिनः) सोमवन्तः (सुतावन्तः) अभिषुतवन्तः (ब्रह्माणः) ब्रह्माद्या ऋत्विजः (वयम्) (युजा)सम्बन्धेन(सोमपाम्)सोमस्य पातारं(त्वा)त्वां(हवामहे)वर्णयामः॥ ऋग्वेदे तु ८ । १७ । ३ वयं युजेति क्रमभेदः ॥ ९ ॥ (६६८)

भाषार्थः—(इन्द्र) परमेश्वर ! (सोमिनः) सौम्य भाव वाले (सुतावन्तः) हृदय शुद्ध कर चुकने वाले (ब्रह्माणः) वेदवेत्ता (वयम्) हम योगी लोग (युजा) योग से (सोमपां त्वा) सौम्यभाव वालों के ग्राहक आप को (हवामहे) पुकारते हैं ।

यद्वा—(इन्द्र) विद्युत् ! (सोमिनः) सोमरसवाले (सुतावन्तः) अभिषव कर चुकने वाले (ब्रह्माणः) ब्रह्मा आदि (वयम्) हम ऋत्विज् लोग (युजा)सम्बन्ध से (सोमपाम्) सोमरस शोषने वाले (त्वा) तुझ को (हवामहे) वर्णित करते हैं॥

ऋ० ८।१७।३ में "वयं युजा" ऐसा उलट कर पाठ है ॥ ९ ॥ (६६८)

अथ चतुर्थतृचस्य—विश्वामित्रोगाथिन ऋषिः।इन्द्राग्नी देवते।गायत्रीछन्दः॥

१ २ ३ १ २ ३ २ ३ २उ १ २

इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् ।

३ १ २ ३ २ ३ २

अस्य पातं धियेषिता ॥ १० ॥ (६६९)

पदपाठः—इन्द्राग्नी १ । आगतम् क्रि० । सुतम् २ । गीर्भिः ३ । नभः ७ । वरेण्यम् २ । अस्य ६=२ । पातम् क्रि० । धिया ३ । इषिता १ ॥

अन्वितपदार्थः—(इन्द्राग्नी) इन्द्रश्चाग्निश्च (नभः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नभसि वर्त्तमानौ (धिया) कर्मणा यज्ञेन (इषिता) इषितौ प्रेरितौ (आगतम्) प्राप्नुताम् । तथा (गीर्भिः) वेदवाग्भिः सह (सुतम्) अभिषुतम् (वरेण्यम्) उत्तमम् (अस्य) इमं सोमं (पातम्) पिबताम् ॥

ऋग्वेदे ३ । १२ । १ यजुर्वेदे ७ । ३१ अपि ॥ १० ॥(६६९)

भाषार्थः—(इन्द्राग्नी) इन्द्र और अग्नि दोनों भौतिक देव (नभः) आकाश में वर्त्तमान (धिया) यज्ञ कर्म से (इषिता) प्रेरित (आगतम्) प्राप्त हों और (गीर्भिः) वेदमन्त्रों से (सुतम्) अभिषुत किये हुए (वरेण्यम्) उत्तम (अस्य) इस सोम का (पातम्) पान करें ॥

ऋ० ३ । १२ । १ यजुः ७ । ३१ में भी ॥ १० ॥ (६६९)

अथ द्वितीया ।

१ २ ३ १ २२ ३ १ २ १ ३ १ २

इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।

३ १ २ ३ २ ३ २

अया पातामिमꣳ सुतम् ॥ ११ ॥ (६७०)

पदपाठः—इन्द्राग्नी १ । जरितुः ६ । सचा अ० । यज्ञः १ । जिगाति क्रि० । चेतनः १ । अया ३ । पातम् क्रि० । इमम्, सुतम् २ ॥

अन्वितपदार्थः—(यज्ञः) विष्णुः परमात्मा (चेतनः) विश्वस्य चेतयिता (जिगाति) उपदिशति । यत्—(इन्द्राग्नी) पूर्वमन्त्रोक्तौ (जरितुः) उद्गातुः प्राणस्य (सचा) सहायकौ स्तः । (अया) अनया वेदवाचा सह (इमम्) प्रत्यक्षं (सुतम्) अभिषुतं सोमम् (पातम्) पिबताम् ॥

प्राणो वै यज्ञस्योद्गाता । श० १४ । ६ । १ । ८ ऋग्वेदे ३ । १२ । २ अपि ॥ ११ ॥ (६७०)

भाषार्थः—(यज्ञः) विष्णुपरमात्मा (चेतनः) सब का चेताने वाला (जिगाति) उपदेश करता है कि (इन्द्राग्नी) पूर्वमन्त्र में कहे इन्द्र और

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्नि (जरितुः) स्तुति के (सचा) सहायक हैं । (अया) इस वेदवाणी के साथ (इमम्) इस (सुतम्) अभिषुत किये सोम को (पातम्) शोषण करें=पीवें ॥

शतपथ १४ । ६ । १ । ८ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ३ । १२ । २ में भी ॥ ११ ॥ (६७०)

अथ तृतीया ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।

१ २ ३ १ २

ता सोमस्येह तृम्पताम् ॥ १२ ॥ (६७१)

पदपाठः—इन्द्रम्, अग्निम् २ । कविच्छदा २ । यज्ञस्य ६ । जूत्या ३=४ । वृणे क्रि० । ता १ । सोमस्य ६ । इह अ० । तृम्पताम् क्रि० ॥

अन्वितपदार्थः—(यज्ञस्य) होमादेः (जूत्या) जूत्यै सेवनाय (कविच्छदा) मनीषिणामुपच्छन्दकौ (इन्द्रम्, अग्निम्) चेति द्वौ (वृणे) स्वीकरोमि (ता) तौ इन्द्राग्नी (इह) यज्ञे (सोमस्य) सोमेन (तृम्पताम्) तृप्यताम् ॥

इदमैन्द्राग्नमाज्यम् । "प्रातःसवनं समाप्तम्" इति विवरणकारः " तान्येनानि प्रातःसवने गायत्रसाम्ना गीयमानानि चत्वार्यार्यस्तोत्राणीत्युच्यन्ते । " इति मीमांसादर्शने जै० ९ । ४ । ३ " यदाजिमीयुस्तदाज्यानामाज्यत्वम् " इति चैतन्निर्वचनम् ताण्ड्ये ७ । २ एष्वाज्यस्तोत्रेषु पञ्चदशनामकः स्तोमो भवति; तद्विधायकं ताण्ड्यमहाब्राह्मणम्, 'तिसृभ्यो हिं करोति, इत्यादिकं (२ । ४ । ५—६) द्रष्टव्यम् । अयं स्तोमो हितीयपृष्ठस्य इत्यप्युच्यते ॥ ऋग्वेदे ३ । १३ । ३अपि ॥ १२ ॥ (६७१)

भाषार्थः—(यज्ञस्य) यज्ञ के (जूत्या) सेवन के लिये (कविच्छदा) बुद्धिमानों की अनुकूलता करने वाले (इन्द्रम्, अग्निम्) इन्द्र और अग्नि इन दोनों का (वृणे) वरण=स्वीकार करता हूं । (ता) वे दोनों (इह) इस यज्ञ में (सोमस्य) सोम के पान से (तृम्पताम्) तृप्त हों ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यह ऐन्द्राग्न आज्य है और "यह प्रातः सवन समाप्त हुवा" ऐसा विवरणकार का मत है ॥ "ये प्रातःसवन में गायत्र साम से गाये हुवे चार आर्यस्तोत्र कहाते हैं" मीमां० जै० ९ । ४ । ३ "जो कि आजि को प्राप्त होते हैं यह आज्यों का आज्यत्व है" यह आज्य का निर्वचन ताण्डयमहाब्राह्मण ७।२ में देखिये ॥ इन आज्यस्तोत्रों में पञ्चदशनामक स्तोम बनता है जिस का बताने वाला ताण्डयब्राह्मण २ । ४ । ५–६ में देखिये ॥ यह स्तोम द्वितीय पृष्ठय भी कहाता है ॥ ऋ० ३ । १२ । ३ में भी ॥ १२ ॥ (६७१)

इति प्रथमाऽध्यायस्य द्वितीयः खण्डः ॥२॥

—○:※:○—

तृतीयखण्डस्य प्रथमर्चे–प्रथमा ॥

३ १ २ ३ १ २र ३ १ २र

उच्चा ते जातमन्धसो दिवि सद्भूम्याददे ।

३१र ३ २३ १ २

उग्रꣳशर्म महि श्रवः ॥१॥ (६७२)

व्याख्याता (४६७) इस की व्याख्या (४६७) ऋचा के तुल्य है ॥ (६७२)

२ ३ १ २३ १ २ ३ १२ ३ १ २

स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।

३ १ २र

वरिवोवित्परिस्रव ॥ २ ॥ (६७३)

व्याख्याता (५९२) इस की व्याख्या (५९२) पर देखिये ॥ (६७३)

३ १ २र ३२उ ३ २ ३ १ २

एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।

१ २

सिषासन्तो वनामहे ॥ ३ ॥ (६७४)

व्याख्याता (५९३) अत्र सूक्ते आमहीयवादीनि सौमित्रान्तानि चतुर्विंशतिसामानि समाम्नातानि ॥

इस का व्याख्यान भी (५९३) में आ गया । इस सूक्त में "आमहीयव" से लेकर "सौमित्र" तक २४ साम निकले हैं ॥ (६७४)

अथ प्रगाथे द्वितीयसूक्ते प्रथमा ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ १२ ३ १ २र १ २ ३ १ २र ३
पुनानः सोम धारयापोवसानो अर्षसि । आ रत्नधा योनिमृ-
१ २ ३ १ २ ३ १ २ ३ १ २
तस्य सीदस्युत्सो देवो हिरण्ययः ॥ ४ ॥ (६७५)

व्याख्याता (५११) "प्रकर्षेण ग्रथनं यत्र स प्रगाथः । प्रकर्षो नाम आम्नातादृक्पाठादाधिक्यम्" इति मीमां० ९ । ३। ६ अधि० १ वर्णके माधवव्याख्यायाम् ॥ (६७५)

भाषार्थः—इस की व्याख्या (५११) ऋचा पर देखिये ॥ प्रगाथ का अर्थ मीमां० ९ । ३ । ६ अधि० १ वर्णचिह्न पर माधवाचार्य की व्याख्यानुसार संस्कृत भाष्य में ऊपर देखिये ॥ ४ ॥ (६७५)

अथ द्वितीयायाः—असहीयुराङ्गिरस ऋषिः । सोमो देवता । बृहती छन्दः ॥

३ १ २र ३ १ २र ३ २ ३ २ ३ २ ३ १ २
दुहानऊधर्दिव्यं मधु प्रियं प्रत्नꣳ सधस्थमासदत् ।
३ १ २ ३ १ २ ३क २र ३ १ २ ३ १ २ ३ २
आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः॥५॥(६७६)

पदपाठः—दुहानः १ । ऊधः, दिव्यम्, मधु, प्रियम्, प्रत्नम्, सधस्थम्२। आसदत् क्रि० । आपृच्छ्यम्, धरुणम् २ । वाजी १ । अर्षसि क्रि० । नृभिः ३। धौतः, विचक्षणः १ ॥

अन्वितपदार्थः—(विचक्षणः) चतुरो बुद्धिमान् (धौतः) विशोधितात्मा (वाजी) योगबलयुक्तः (ऊधः) आनन्द-प्रस्रवणं परमात्मानं [ततः सकाशादिति भावः] (दिव्यम्) अलौकिकम् (प्रियम्) प्रसादकम् (प्रत्नम्) सनातनम् (सधस्थम्) सर्वदा वस्तुतःसहवर्ति (मधु) आनन्दम् (दुहानः) सन् (आसदत्) प्राप्नोति । ततः (आपृच्छ्यम्) प्रष्टव्यम् (धरुणम्) धारकं परमात्मानम् (नृभिः) नेतृभिर्योग-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिक्षकैः सह स शिष्यः (अर्षसि) अर्षति प्राप्नोति ॥

यद्वा—(विचक्षणः) (धौतः) स्नानादिना शुद्धदेहः (वाजी) हव्यान्नयुक्तो यजमानः (ऊधः) सोमलताखण्डरूपमूधः [तत्सकाशात्] (दिव्यम्) उत्तमम् (प्रियम् प्रत्नम्) (सधस्थम्) लतासहवर्त्तिनम् (आपृच्छ्यम्) प्रष्टव्यम् (धरुणम्) धारणकर्त्तारम् (मधु) मधुरं रसम् (दुहानः) सन् (आसदत्) लभते (नृभिः) ऋत्विग्भिः (अर्षसि) जुहोति च ॥

ऋग्वेदे तु ९ । १०७ । ५ धूत इत्यन्तरम् । गवां वक्षः=ऊधइत्युच्यते,ततो दुग्धं यथा प्रस्रुतं भवति तथैव परमात्मत आनन्दस्रावः, सोमतश्च रसस्रावः संजायतेऽतएव सोप्यत्रोधस्त्वेन व्यवहृतो बोध्यः ॥ रौरवादीनि कण्वबृहदन्तानि द्विचत्वारिंशत्सामान्यत्रोद्ध्रियन्ते ॥५॥ (६७६)

भाषार्थः—(विचक्षणः) चतुर बुद्धिमान् (धौतः) शुद्धान्तःकरण (वाजी) योगबलयुक्त पुरुष, (ऊधः) आनन्द के स्रोत परमात्मा से (दिव्यम्) अलौकिक (प्रियम्) प्यारे (प्रत्नम्) सनातन (सधस्थम्) वास्तव में सदा साथ रहने वाले (मधु) माधुर्य रस को (दुहानः) दुहता हुवा (आसदत्) पाता है । फिर (आपृच्छ्यम्) बूझने योग्य (धरुणम्) धारक परमात्मा को (नृभिः)योग सिखाने वाले नेताओं के साथ वह शिष्य (अर्षसि)प्राप्त होता है॥

यद्वा—(विचक्षणः) चतुर (धौतः) स्नानादि से शुद्ध शरीर वाला (वाजी) हव्य अन्न युक्त यजमान, (ऊधः) सोमलता से (दिव्यम्) उत्तम (प्रियम्) प्यारे (प्रत्नम्) पुराने पके हुवे (सधस्थम्) लता के साथ रहने वाले (आपृच्छ्यम्) उस के जानने वालों से बूझने योग्य (धरुणम्) स्थिरता करने वाले (मधु) मधुर रस को (दुहानः) निचोड़ता हुवा (आसदत्) पाता और (नृभिः) ऋत्विजों सहित (अर्षसि) हवन करता है ॥

रौरव से लेकर कण्वबृहत् पर्यन्त ४२ साम इस सूक्त में से निकले हैं ॥ ऋ० ९।१०७।५ में(धूतः) पाठ है॥ गौवों के बाख को ऊधः कहते हैं क्योंकि उस में

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

से दूध दुहा जाता है। इसी प्रकार यहां परमात्मा को आनन्द के स्रोत होने से तथा सोमलता को रस का स्रोत होने से ऊधः कहा है ॥ ५ ॥ (६७६)

अथ तृतीयतृचस्य—अमहीयुराङ्गिरस ऋषिः । सोमो देवता ।
त्रिष्टुप्छन्दः ॥

१ २र३ २३ २ ३ १ २३ १ २ ३ २ ३-१र २र २
प्रतु द्रव परिकोशं निषीद नृभिः पुनानो अभि वाजमर्ष। अश्वं
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
न त्वा वाजिनं मर्जयन्तोऽच्छा बर्हीरशनाभिर्नयन्ति॥६॥(६७७)

व्याख्याता (५२३) इस की व्याख्या (५२३) में देखिये ॥ ६ ॥ (६७७)

अथ द्वितीया ।

३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १
स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः। पिता देवा-
२ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
नां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥७॥ (६७८)

पदपाठः—स्वायुधः १ । पवते क्रि० । देवः, इन्दुः, अशस्तिहा १ । वृजना ५। रक्षमाणः, पिता १। देवानाम् ६ । जनिता, सुदक्षः, विष्टम्भः १ । दिवः ६ । धरुणः १ । पृथिव्याः ६ ॥

अन्वितपदार्थः—(स्वायुधः) शोभना आयुधा वज्र-स्रुव स्रुक्-शम्याकप्रभृतयो यज्ञायुधा यस्य सःसुशासनो वा(देवः)द्योतनः(अशस्तिहा) अकल्याणानां नाशकः (वृजना) वृजनेभ्य उपद्रवेभ्यः (रक्षमाणः) रक्षां कुर्वाणः (देवानाम्) इन्द्रियाणां (जनिता) उत्पादकः (पिता) रक्षकश्च (सुदक्षः) शोभनबलदायकः पुष्टिप्रदः (दिवः) अन्तरिक्षस्य तत्रस्थानां पदार्थानां (विष्टम्भः)विशेषेण स्तम्भयिता(पृथिव्याः) पृथिवीस्थजनानां (धरुणः) धारकः(इन्दुः) सोमः ईश्वरो वा (पवते) अग्नावाहुतो गच्छति पुनाति वा ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः"। इति मनुना ३।७६ऽप्युक्तम् ऋग्वेदे तु ९।८७।२ वृजनमित्यन्तरम् ॥ ७ ॥ (६७८)

भाषार्थः—(स्वायुधः) वज्रस्रुवस्रुक्शम्याकादि अच्छे यज्ञायुधों वाला, वा सुशासन (देवः) प्रकाशमान (अशस्तिहा) दुःखविनाशक (वृजना) उपद्रवों से (रक्षमाणः) बचाता हुवा (देवानाम्) इन्द्रियों का (जनिता) उत्पादक और (पिता) रक्षक (सुदक्षः)उत्तम बलयुक्त पुष्टिदायक (दिवः) अन्तरिक्षलोकस्थ पदार्थों का (विष्टम्भः) थामने वाला (पृथिव्याः) पृथिवीस्थ पदार्थों वा जनों का (धरुणः) धरन=धारण करने वाला (इन्दुः) सोम वा ईश्वर (पवते) अग्नि में होमा हुवा जाता वा पवित्र करता है ॥

मनु ३।७६ का प्रमाण और ऋ० ९।८७।२ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ७ ॥ (६७८)

अथ तृतीया।

२ ३ १ २ ३१२ २२ ३१२ २२३२ ३ १ २ १ २२ ३
ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन। स चिद्विवेद

१ २ ३ १ २ ३ २ २ ३ २ ३ १ २
निहितं यदासामपीच्यांऽ३गुह्यं नाम गोनाम् ॥ ८ ॥ (६७९)

पदपाठः—ऋषिः, विप्रः, पुरएता १। जनानाम् ६। ऋभुः, धीरः, उशना १। काव्येन ३। सः १। चित् १। विवेद क्रि०। निहितम्, यत् १। आसाम् ६। अपीच्यम्, गुह्यम्, नाम १। गोनाम् ६॥

अन्वितपदार्थः—(ऋषिः) वेदोपदेष्टा (विप्रः) मेधावी (जनानां पुरएता) प्राणिनां मार्गोपदेशकत्वेनाग्रेसरः (ऋभुः) सर्वेश्वरः (धीरः) दृढोऽचलः सर्वधारकः (उशना) सर्वस्य कल्याणेप्सुः(चित्)चेतनः(सः)परमात्मा (काव्येन) वेदेन (विवेद) वेदयति ज्ञापयति (यत्) (आसां गोनाम्) सूर्यगभस्तीनां मध्ये

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अपीच्यम्) अन्तर्हितं (गुह्यम्) अज्ञैर्ज्ञातुमनर्हं (नाम) प्रसिद्धं सोमाख्यंवस्तु (निहितम्) निधीयमानं वर्त्तते इति ॥

विप्र इति मेधाविनाम निघं० ३ । १५ ॥ अपीच्यमिति निर्णीतान्तर्हितनाम ३।२५॥ अपीच्यमपगतमपचितमपहितमन्तर्हितं वा निरु० ४ । २५ ॥ गौरिति रश्मिनाम निघं० १ । ४ ॥ गोः पदान्ते (७ । १ । ५७) इति नुडागमः ॥ ऋषिरित्यत्र-इगुपधात् कित् (उणा० ४।१२०) इति इन् किच्च ॥ सुसूधाञ्गृधिभ्यः क्रन् (उणा० २ । २४) इति क्रनि धीरः ॥ वशेः कनसिः (उणा० ४ । २३१) इत्युशनाः विसर्गलोप आर्षः ॥ इतिमाध्यन्दिनपवमानं तृतीयम् । "उक्तो माध्यन्दिनः पवमानः" इति विवरणमतेन श्रीसत्यव्रतः ॥ ऋग्वेदे ९ । ८७।३ ऽपि ॥८॥ (६७१)

भाषार्थः—(ऋषिः) वेदों का उपदेशक (विप्रः) मेधावी (जनानां पुरएता) मार्ग दिखाने से प्राणियों का अगुवा (ऋभुः) सर्वेश्वर (धीरः) सब का धारक दृढ अचल (उशना) सर्वहितेच्छु (चित्) चेतनस्वरूप (सः) वह परमात्मा (काव्येन) वेदद्वारा (विवेद) जतलाता है (यत्) कि (आसाम्) इन (गोनाम्) किरणों में (अपीच्यम्) निर्णय किया हुवा और छिपा हुवा (गुह्यम्) अज्ञानियों से अज्ञात (नाम) प्रसिद्ध सोमनामक वस्तु (निहितम्) निधि होकर वर्त्तमान है ॥

निघण्टु ३। १५ ॥ ३ । २५ ॥ १ । ४ निरुक्त ४ । २५ उणादि ४ । १२० ॥ २ । २४ ॥ ४ । २३९ अष्टाध्यायी ७ । १ । ५७ के प्रमाण संस्कृत भाष्य में देखिये यह तीसरा माध्यंदिन पवमान है ॥ "माध्यंदिन पवमान कहा गया" यह विवरणकार के मत से श्रीसत्यव्रत जी का कथन है ॥ ऋ० ९ । ८७ । ३ में भी ॥ ८ ॥ (६७९)

इति उत्तरार्चिके प्रथमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

—○:※:○—

अथ चतुर्थखण्डे प्रथमप्रपाठस्य—वसिष्ठ ऋषिः । इन्द्रो देवता । बृहती छन्दः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३१ २ ३१ २ ३१२ १२ ११र
अभि त्वा शूर नोनुमो दुग्धा इव धेनवः । ईशानमस्य ज-
१र ३२३१२ ३१
गतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥ (६८०)

व्याख्याता (२३३) इस की व्याख्या (२३३) में की गई ॥ १ ॥ (६८०)

अथ द्वितीया ।

१र २र ३ २३ १ २र ३ २ ३ १ २र
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
३१ २ ३१२३१२
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥२॥(६८१)

पदपाठः– न अ०। त्वावान्, अन्यः,दिव्यः १। न । पार्थिवः १।न । जातः १ । न । जनिष्यते क्रि० । अश्वायन्तः १। मघवन्,इन्द्र सं० । वाजिनः, गव्यन्तः १ । त्वा २ । हवामहे क्रि० ॥

अन्वितपदार्थः–(मघवन्) मखवन् ! (इन्द्र) परमेश्वर ! (त्वावान्) त्वत्सदृशः (अन्यः) द्वितीयः (दिव्यः) द्युलोके भवः (न) नास्ति (पार्थिवः) पृथिवीलोके भवोऽपि (न) नास्ति (न) नैव (जातः) पूर्वं जातः (न) नच (जनिष्यते) उत्पत्स्यते (अश्वायन्तः) अश्वान् प्राणानिच्छन्तः (वाजिनः) बलमन्नं वेच्छन्तः (गव्यन्तः) गाइन्द्रियाणीच्छन्तो वयम् (त्वा) त्वाम् (हवामहे) स्तुमः प्रार्थयामश्च ॥ रथन्तरं पृष्ठमिति विवरण-मतेन श्रीसत्यव्रतः ॥ ऋग्वेदे ७।३२। २३ ऽपि ॥२॥ (६८१)

भाषार्थः–(मघवन्) यज्ञवाले ! (इन्द्र) परमेश्वर ! (त्वावान्) आप के तुल्य (अन्यः) और कोई (दिव्यः) द्युलोकस्थ (न) नहीं है (न) और न (पार्थिवः) पृथिवीलोकस्थ है (न) न तो (जातः) पूर्व उत्पन्न हुवा और (न) न (जनिष्यते) आगे उत्पन्न होगा (अश्वायन्तः) प्राण चाहते हुवे(वाजिनः)अन्न वा बल चाहते हुवे और (गव्यन्तः) इन्द्रियां चाहते हुवे हम (त्वा) आप को(हवामहे)स्तुति प्रार्थना करके पुकारते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री सत्यव्रत जी विवरणकार के मत से कहते हैं कि यह "रथन्तर पृष्ठ" कहा गया ॥ ऋ० ७ । ३२ । २३ में भी ॥ २ ॥ (६८१)

अथ द्वितीयस्य तृचसूक्तस्य—वासदेव ऋषिः। सर्वा देवताः । गायत्री छन्दः ॥

१ २ ३ १र २र ३ २ ३ १ २ ३ १ २

कया नश्चित्र आभुवदूती सदावृधः सखा ।

२ ३ १ २ १ २

कया शचिष्ठया वृता ॥ ३ ॥ (६८२)

व्याख्याता (१६९) इस का व्याख्यान (१६९) में हो चुका है ॥ ३ ॥६८२॥

अथ द्वितीया ।

१ २ ३ १र २र ३ १ २ ३ १ २

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः ।

३ १ २ ३ २ ३ १ २

दृढा चिदारुजे वसु ॥ ४ ॥ (६८३)

पदपाठः—कः १ । त्वा २ । सत्यः १ । मदानाम् ६ । मंहिष्ठः १ । मत्सत् क्रि० । अन्धसः ६ । दृढा २ । चित् अ० । आरुजे क्रि० । वसु २ ॥

अन्वितपदार्थः—परमात्मा राजानमाह—हे राजन्निन्द्र ! (दृढा चित्) दृढमपि (वसु) शत्रुदुर्गादिकम् (आरुजे) भङ्क्तुम् (मदानां) हर्षकराणां पदार्थानां मध्ये (मंहिष्ठः) माननीयः श्रेष्ठः (सत्यः) सत्यभूतः (कः) कतमो मदो हृष्टिप्रदः पदार्थः (त्वा) त्वाम् (मत्सत्) हर्षयेत् इति प्रश्नः (अन्धसः) अन्नस्य [निघं० २ । ७] मद इत्युत्तरम् ॥

अयंभावः—पूर्वमन्त्रप्रार्थिताः प्राणादयोऽन्नेनैव प्राप्तव्याः। राज्ञा राजपुरुषैश्च नैव मद्यादि मादकं वस्तु सेवनीयं किन्तु हृष्टिपुष्टि-प्राप्तये मदानां हर्षकारकाणां पदार्थानां मध्ये श्रेष्ठः सत्योऽन्नस्यैव मदः सेवनीयोऽनेनैव बलिष्ठैर्भूत्वा शत्रुगणानां दृढमपि दुर्गादिकं नाशयितुं शक्यते ॥ ऋग्वेदे ४।३१।२ऽपि ॥४॥ (६८३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—परमात्मा राजा को उपदेश करता है कि—हे राजन्! इन्द्र! (दृढ़ा) दृढ़ (चित्) भी (वसु) शत्रु के वास करने की जगह दुर्गादि के (आरुजे) तोड़ने को (मदानाम्) हृष्टिकारक पदार्थों में (संहिष्ठः) उत्तम (सत्यः) सच्चा हृष्टिकारक (कः) क्या पदार्थ (त्वा) तुझ को (मत्सत्) हृष्ट करे? उत्तर—(अन्धसः) अन्न का [निघं० २। ७॥

अर्थात् राजा वा राजपुरुषों को शत्रु के दुर्गादि तोड़ने के योग्य हृष्टि पुष्टि की प्राप्ति के लिये केवल अन्न का ही सच्चा मद=हर्ष ग्रहण करना चाहिये, कोई अन्य मद्यादि वस्तु नहीं॥ पूर्व मन्त्र में जो परमात्मा से प्राण और इन्द्रियों का बल पुरुषार्थ मांगा गया था उस का यह उत्तर परमात्मा की ओर से है कि अन्न से ही यह सब कुछ प्राप्त करो॥ ऋ० ४। ३१। २ में भी॥ ४॥ (६८३)

अथ तृतीया।

३ २उ ३ २ ३ ३ ३ २

अभी षु णः सखीनामविता जरितॄणाम्।

३ १ २ ३ १ २

शतं भवास्यूतये ॥५॥ (६८४)

पदपाठः—अभि, सु अ०। नः ६। सखीनाम् ६। अविता १। जरितॄणाम् ६। शतम् २। भवासि क्रि०। ऊतये ४॥

अन्वितपदार्थः—(नः) वचनव्यत्ययः। मम परमेश्वरस्य प्रजाजनानां (जरितॄणाम्) वयोहानिंगतानां दुर्बलानां (सखीनां) तव सख्यं कुर्वतां (शतम्) बहु (सु) सुष्ठु (अभि) सर्वतः (ऊतये) रक्षायै (अविता) रक्षकः (भवासि) भवेः॥

मैत्रावरुणं पृष्ठम्। इति विवरणमतेन श्री सत्यव्रतः। ऋग्वेदे तु ४। ३१। ३ ऊतिभिरिति पाठः॥५॥ (६८४)

भाषार्थः—(नः) मेरी सृष्टि में स्थित (जरितॄणाम्) बूढ़े निर्बल और (सखीनाम्) तुझ से शत्रुभाव न करके मित्रभाव रखने वालों को (शतम्) बहुत (सु) अच्छे (अभि) सर्वतः (ऊतये) रक्षा के लिये हे राजन्! तू (अविता) रक्षक (भवासि) हो॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विवरण के मत से श्री सत्यव्रत कहते हैं कि यह "मैत्रावरुण पृष्ठ" कहाता है ॥ ऋ० ४ । ३१ । ३ में—ऊतिभिः पाठ है ॥ ५ ॥ (६८४)

अथ प्रगाथस्य तृतीयसूक्तस्य—नोधाः काक्षीवतऋषिः। इन्द्रो देवता। बृहती छन्दः

१ २ ३ १ २ ३ २ ३ १ २ ३१र २र ३ २ ३ १र २र

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः। अभि वत्सं न स्वसरेषु

३१२ १ २ ३ २ २

धेनव इन्द्रं गीर्भिर्नवामहे ॥ ६ ॥ (६८५) व्याख्याता (२३६)

इस की व्याख्या (२३६) में आचुकी ॥ ६ ॥ (६८५)

अथ द्वितीया ।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३

द्युक्षꣳ सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् । क्षुमन्तं

१ २ ३ १ २ ३ १ २ ३ १ २र

वाजꣳ शतिनꣳ सहस्रिणं मक्षू गोमन्तमीमहे ॥ ७ ॥ (६८६)

पदपाठः—द्युक्षम्, सुदानुम् २ । तविषीभिः ३ । आवृतम्, गिरिम् २ । न अ० । पुरुभोजसम्, क्षुमन्तम्, वाजम्, शतिनम्, सहस्रिणम् २ । मक्षु अ० । गोमन्तम् २ । ईमहे क्रि० ॥

अन्वितपदार्थः—हे परमात्मन्निन्द्र! त्वाम् ![त्वत्तः] वयम् (द्युक्षम्) प्रकाशवन्तम् (ईमहे) याचामहे । तथा (सुदानुम्) शोभनदानवन्तम् (तविषीभिः) सेनाभिः (आवृतम्) संवृतम् (गिरिं न) मेघमिव (पुरुभोजसम्) बहुपालकं (क्षुमन्तम्) अन्नवन्तं (शतिनं वाजं) बहुबलवन्तं (सहस्रिणं गोमन्तं) बहुगवादिपशुमन्तं तत्पालकं राजानं (मक्षु) शीघ्रं याचामहे ॥

दाभाभ्यां नुः (उणा० ३ । ३२) इति दानुः ॥ तविषीति बलनाम निघं २। ९ ॥ गिरिरिति मेघनाम १।१० ॥ क्षु इत्यन्ननाम २ । ७ ॥ ईमहे इति याञ्ञाकर्मा निघं ३ । १९ ॥ ऋग्वेदे ८।८८।२ ऽपि ॥ ७ ॥ (६८६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः— हे इन्द्र ! परमेश्वर ! (द्युक्षम्) प्रकाश वाले (सुदानुम्) सुन्दर दानी (तविषीभिः) सेनाओं से (आवृतम्) युक्त भरपूर (गिरिं न) मेघ के समान (पुरुभोजसम्) बहुत पालन करने वाले (क्षुमन्तम्) अन्नवाले (शतिनं वाजम्) बहुबलयुक्त (सहस्रिणं गोमन्तम्) बहुत गौ आदि पशुयुक्त और उनके पालक राजा को (मक्षु) शीघ्र (ईमहे) हम आपसे मांगते हैं ॥

निघण्टु २।९।।१।१०।।२।७॥३।१९ उणादि ३।३२ के प्रमाण संस्कृत भाष्य में देखिये ॥ऋ० ८।८८।२ में भी ॥ ७ ॥ (६८६)

अथ चतुर्थसूक्ते प्रथमार्धे—प्रथमा ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

तरोभिर्वो विदद्वसुमिन्द्रꣳ सबाधऊतये । बृहद्गायन्तः सुतसोमे

३२ ३ २उ ३ २ ३ १ २

अध्वरे हुवे भरं न कारिणम् ॥ ८ ॥ (६८७) व्याख्याता (२३७)

इस की व्याख्या (२३७) में हो चुकी है ॥८॥(६८७)

अथ तृतीयायाः—कलिः प्रागाथ ऋषिः । इन्द्रो देवता । निवृत्यङ्किश्छन्दः ॥

२उ ३ १र २र ३ २ ३ २उ ३ १ २ ३ १र २र २ ३ १ २

न यं दुध्रावरन्ते न स्थिरासुरो मदेषु शिप्रमन्धसः । य आदृत्या

३ १ २ ३ १र २र ३ २ ३र २र

शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ ९ ॥ (६८८)

पदपाठः— न अ० । यम् २। दुध्राः १। वरन्ते क्रि० । न । स्थिराः, सुरः १। मदेषु ७। शिप्रम् २। अन्धसः ६। यः१। आदृत्य क्रि०। शशमानाय, सुन्वते, जरित्रे ४। उक्थ्यम् २॥

अन्वितपदार्थः—(यम्) (उक्थ्यम्) स्तुत्यम् (शिप्रम्) सुगन्धदुर्गन्धज्ञापिकां नासिकामिवेष्टानिष्टज्ञापकम् परमात्मानिन्द्रं (न स्थिराः) चञ्चलचित्ताः (दुध्राः) दुर्धराः (मुरः) मरणधर्मका मनुष्याः (मदेषु) कामधनादिमदेषु तत्कृतगर्वेषु सत्सु (न वरन्ते) नाद्रियन्ते न स्वीकुर्वन्ति (यः) यः परमेश्वरः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(आदृत्य) आदरपूर्वकम् (सुन्वते) यागार्थसोमाभिषवं कुर्वते (शशमानाय) शस्त्राख्यैरप्रगीतमन्त्रैः स्तुतिं कुर्वते (जरित्रे) प्रगीतमन्त्रैःस्तोत्रैः स्तुतिं कुर्वते च (अन्धसः) अन्नादिभोग्यपदार्थजातस्य (दाता) दातास्ति । तं हुवे इति पूर्वेण संबन्धः ॥

शिप्रे हनू नासिके वा । निरु० ६ । १७ ॥ जरितेति स्तोतृनाम निघं० ३ । १६ ॥ मदेषु शिप्रमिति संहितापाठः । मदेषु ७ शिप्रम् २ इति च पदपाठकारः । तथापि सायणाचार्येण तदनुयायिभिरन्यैश्चर्ग्वेदे ८ । ५५ । २ मदे सुशिप्रमिति दृष्ट्वा तथैवात्रापि व्याख्यातम् ॥९॥ (६८८)

भाषार्थः—(यम्) जिस (उक्थ्यम्) स्तुतियोग्य (शिप्रम्) जैसे नासिका सुगन्ध दुर्गन्ध का ज्ञान कराती है तद्वत् इष्ट अनिष्ट का बोध कराने वाले इन्द्र परमात्मा को (न स्थिराः) चञ्चल चित्त वाले (दुध्राः) दुर्धर (सुरः) मनुष्य (न) नहीं (वरन्ते) स्वीकार करते और (यः) जो परमात्मा (आदृत्य) आदर पूर्वक (सुन्वते) यज्ञार्थ सोम का अभिषव करने वाले (शशमानाय) गान रहित शस्त्र मन्त्रों से स्तुति करने वाले और (जरित्रे) गानयुक्त स्तोत्रों से स्तुति करने वाले के लिये (अन्धसः) अन्नादि का (दाता) देने वाला है [उस को पुकारता हूं] यह पूर्व मन्त्र से संबन्ध जानिये ॥

निरुक्त ६ । १७ और निघण्टु ३ । १६ के प्रमाण संस्कृत भाष्य में देखिये॥ संहिता में " मदेषु, शिप्रम् " ऐसा पाठ है और पदपाठकार ने भी इसी प्रकार पदच्छेद किया है,परन्तु सायणाचार्य और उनका विना सोचे अनुकरण करने वालों ने ऋग्वेद ८ । ५५ । २ में "मदे, सुशिप्रम्" पाठ था, उसी के अनुसार यहां भी मूल से विरुद्ध की व्याख्या कर दी है ॥९॥ (६८८)

इति प्रथमाध्याये चतुर्थः खण्डः ॥४॥

उक्तो माध्यंदिनः पवमानः ॥

—*—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ पञ्चमखण्डे प्रथममृक्के तृचे-प्रथमा ॥

१ २ ३ १ २ ३ १ २ ३ १ २ ३

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया।

१ २३ १ २ ३ २

इन्द्राय पातवे सुतः ॥ १ ॥ (६८९)

व्याख्याता (४६८) इस की व्याख्या (४६८) में देखिये ॥१॥ (६८९)

अथ द्वितीयायाः-मधुच्छन्दा ऋषिः। पवमानः सोमो देवता। गायत्री छन्दः॥

३ २ ३ १ २ ३२उ ३ १ २

रक्षोहा विश्वचर्षणिरभि योनिमयोहते।

१ २ ३२ ३ १ २

द्रोणे सधस्थमासदत् ॥ २ ॥ (६९०)

पदपाठः-रक्षोहा, विश्वचर्षणिः १। अभि अ०। योनिम् २। अयोहते, द्रोणे ७। सधस्थम् २। आसदत् क्रि०॥

अन्वितपदार्थः-(रक्षोहा) वायुप्रभृतिगतदुर्विकाररक्षसां हन्ता नाशकः (विश्वचर्षणिः) विश्वस्मिन् चार्षयिता प्रसृतः सोमः (अयोहते) अयसा हिरण्येन हते तन्निर्मिते (द्रोणे) द्रोणाख्ये कलशे (सधस्थं) सधे द्यावापृथिव्यौ तत्रस्थं यज्ञरूपं (योनिम्) गृहम् (अभि आसदत्) अभितस्तिष्ठति॥

पिता कुट्स्य चर्षणिरित्यस्य व्याख्याने "पिता कृतस्य कर्मणश्चायितेति" निरु० ५।२४॥ अय इति हिरण्यनाम निघं० १।२॥ सधे इति द्यावापृथिव्योर्नाम ३।३० ऋग्वेदे तु ९।१।२ अयोहतम्, द्रुणा इति पाठौ ॥ २ ॥ (६९०)

भाषार्थः-(रक्षोहा) वायु आदि के दुर्विकार रूप राक्षसों का नाशक (विश्वचर्षणिः) विश्व में फैलने वाला सोम (अयोहते) सुवर्णमय (द्रोणे) द्रोण कलश में (सधस्थम्) यज्ञरूप (योनिम्) घर को (अभि) व्याप कर (आसदत्) स्थित होता है॥

निरुक्त ५। २४। निघण्टु १। २॥ ३। ३० के प्रमाण और ऋ० ९।१।२ के पाठभेद संस्कृत भाष्य में देखिये ॥२॥ (६९०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयायाः—ऋष्यादिकं पूर्ववत् ॥

३ १ २ ३ १ २ ३ १ २

वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः ।

२ ३ १ २ ३ १ २

पर्षि राधो मघोनाम् ॥ ३ ॥ [१५] (६९१)

पदपाठः—वरिवोधातमः १ । भुवः क्रि० । मंहिष्ठः, वृत्रहन्तमः १ । पर्षि क्रि० । राधः २ । मघोनाम् ६ ॥

अन्वितपदार्थः—सोम ! (वरिवोधातमः) वरिष्ठः पेयतमः (मंहिष्ठः) सत्कार्यः (वृत्रहन्तमः) दुष्टशत्रुहननक्षमताप्रदः (भुवः) भवसि तथा (मघोनाम्) मखवताम् (राधः) धनाद्यैश्वर्यं (पर्षि) पूरयसि ॥

ये मनुष्याः सोमेन यजन्ते, तेषां स पेयतमो मंहिष्ठो वृत्रहन्तमः सोमो धनैश्वर्यादिकं पूरयतीति भावः ॥

वरिवोधातमः इति—धेट्पाने इत्यस्य प्रयोगात्तमपि सिद्धम्॥ ऋग्वेदे तु ९ । १ । ३ भव इति पाठः ॥ ३ ॥ (६९१)

भाषार्थः—सोम ! (वरिवोधातमः) श्रेष्ठ पेय पदार्थों में उत्तम कक्षा का (मंहिष्ठः) सत्कार=आदर के योग्य (वृत्रहन्तमः) दुष्ट शत्रुनिवारण के लिये अत्यन्त सामर्थ्यदायक (भुवः) है और (मघोनाम्) यज्ञ करने वालों के (राधः) धन आदि ऐश्वर्य को (पर्षि) पूरित करता है ॥ ऋ० ९ । १ । ३ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥ (६९१)

अथ प्रगाथरूपे द्वितीयसूक्ते प्रथमा ॥

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमोमदः ।

१ २ ३ १ २ ३ १ २

महि द्युक्षतमो मदः ॥१॥ (६९२) व्याख्याता (५७८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इस की व्याख्या (५७८) में कर आये हैं ॥ (६९२)

अथ द्वितीयायाः—गौरिवीतिर्ऋषिः । सोमो देवता ।

निचृद्बृहती छन्दः ॥

१ २ ३ १ २३ १ २३ २३ २ ३ २ ३ १ २

यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः ।

२ ३ १ २ ३ऋ२र ३ २र ३ २ ३ १ २

स सुप्रकेतो अभ्यक्रमीदिषोच्छा वाजं नैतशः॥२॥[१६](६९३)

पदपाठः—यस्य, ते ६ । पीत्वा अ० । वृषभः १ । वृषायते क्रि० । अस्य ६ । पीत्वा । स्वर्विदः ६ । सः, सुप्रकेतः १ । अभ्यक्रमीत् क्रि० । इषः २ । अच्छ अ० । वाजम् २ । न अ० । एतशः १ ॥

अन्वितपदार्थः—(वृषभः) वीर्यवान् पुरुषः, इन्द्रो वा वृष्टिकृत् (यस्य ते) तव सोमस्य (पीत्वा) पानं कृत्वा (वृषायते) वृषइवाचरति बहु सिञ्चति । (स्वर्विदः) स्वः सुखस्य लम्भयितुः (अस्य) सोमस्य (पीत्वा) पानं कृत्वा (सुप्रकेतः) शोभनप्रज्ञः, शोभनप्रकाशो वा (सः)पुरुषः, इन्द्रो वा (इषः) अन्नानि, सस्यानि वा (अभ्यक्रमीत्) अभितः क्रामति सुष्ठु सर्वतोऽन्नानि पाचयति (न) यथा (एतशः) अश्वः (वाजम्) बलम् (अच्छ) अभिगच्छति, तद्वत् बलिष्ठो जायते इत्यर्थः ॥

सोमपानेन पुंसः पुस्त्वं वर्धते, सुष्ठु सन्तानोत्पादाय कल्पते पुमान्, न च बुद्धिवैकल्यं मद्येनेव भवति । सुखप्रापकस्य सोमस्य पानेनाऽन्नपाचनादिशक्तिर्बलं च जायते इति पुरुषपक्षे भावः । वृष्टिकृतो भौतिकस्य विद्युतः पक्षे च—सोमहोमेन तस्य वर्षकत्वं वर्धते।तेन स सुप्रकाशवान् बलवान् स्वकार्यक्षमो जायते इतिभावः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एतश इत्यश्ववनाम निघं० १।१४ ॥ ऋग्वेदे तु ९।१०८।२ पीता स्वर्विदः इति पाठः ॥ २ ॥ (६९३)

भाषार्थः—(वृषभः) वीर्यवान् पुरुष, वा इन्द्र [वर्षा करने वाला विद्युत्] (यस्य ते) जिस तुझ सोम का (पीत्वा) पान करके (वृषायते) वृष के तुल्य पौरुष करता वा सिञ्चन करता है (अस्य स्वर्विदः) इस सुखदायक का (पीत्वा) पान करके (सुप्रकेतः) सुन्दर बुद्धियुक्त, वा प्रकाशयुक्त (सः) वह पुरुष, वा इन्द्र (इषः) अन्नों, वा खेतियों को (अभ्यऽक्रमीत्) सब ओर से प्राप्त होता वा पकाता है। (न) जैसे (एतशः) अश्व (वाजम्) बल को (अच्छ) प्राप्त होता अर्थात् बलिष्ठ हो जाता है ॥

सोमपान से पुरुष का पुरुषत्व बढ़ता है, उस से वह सन्तानोत्पत्ति में भले प्रकार समर्थ होता है। परन्तु मद्यपानके समान बुद्धि भ्रष्ट नहीं होती किन्तु सुधरती है। इस में मादकता (नशा) नहीं है। इस सुखदायक पदार्थ के सेवन से अन्न पचाने का सामर्थ्य बढ़ कर बल बढ़ता है। यह पुरुष पक्ष का भाव है। दूसरे इन्द्रपक्ष में—होमयज्ञ से तृप्त हुवा इन्द्र भलेप्रकार बलिष्ठ होता और वृष्टि आदि पुष्कल करता है। यह भाव है ॥

निघण्टु १।१४ का प्रमाण और ऋ० ९।१०८।२ का पाठान्तर संस्कृत भाष्य में देखिये ॥२॥ (६९३)

अथ वृचात्मके तृतीयसूक्ते प्रथमा ॥

२ ३ १ २ ३ २ ३ १ २ र ३ १ २

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।

३ २ ३ २ ३ १ २ ३ १ २

श्रुष्टे जातास इन्दवः स्वर्विदः ॥१॥ (६९४)

व्याख्याता (५६६) इस की व्याख्या (५६६) में होचुकी है (६९४)

अथ द्वितीयायाः—अग्निश्चाक्षुष ऋषिः। पवमानः सोमो देवता। उष्णिक्छन्दः ॥

३ १ २ र ३ १ २ र ३ २

अयं भराय सानसिरिन्द्राय पवते सुतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १ २ ३ १ २ ३ २
सोमो जैत्रस्य चेतति यथा विदे ॥२॥ (६९५)

पदपाठः—अयम् १ । भराय ४ । सानसिः १ । इन्द्राय ४ । पवते क्रि० । सुतः, सोमः १ । जैत्रस्य ६ । चेतति क्रि० । यथा अ० । विदे ४ ॥

अन्वितपदार्थः—(सानसिः) संभजनीयः (सुतः) अभिषुतः (अयं सोमः) (भराय) संग्रामाय, मेघजयाय वा (इन्द्राय) राज्ञे, विद्युते वा (पवते) प्राप्नोति (यथा) येन प्रकारेण (विदे) विदुषे चेतनाय चेतनां कुर्वन्ति तथा (जैत्रस्य) जयशीलस्येन्द्रस्य (चेतति) चेतनामुत्तेजनां संपादयति ॥ ऋग्वेदे १ । १०६ । २ ऽपि ॥ २ ॥ (६९५)

भाषार्थः—(सानसिः) सेवनीय (सुतः) अभिषुत किया हुवा (अयं सोमः) यह सोम (भराय) संग्राम वा मेघविजय के लिये (इन्द्राय) राजा वा विद्युत् के लिये (पवते) प्राप्त होता है (यथा) जिस प्रकार (विदे) चेतन ज्ञानी के लिये चेतना करते हैं तद्वत् (जैत्रस्य) जयशील इन्द्र को (चेतति) उत्तेजित करता है ॥ ऋ० ९ । १०६ । २ में भी ॥ २ ॥ (६९५)

अथ तृतीयायाः—ऋषिर्देवता चोक्ते । निचृदुष्णिक्छन्दः ॥

३ २उ ३ २३ २ ३ २ ३ २
अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम् ।
१ २ ३ १ २ ३ १ २ ३ २
वज्रं च वृषणं भरत्समप्सुजित् ॥ ३ ॥ [१७](६९६)

पदपाठः—अस्य ६ । इत् अ० । इन्द्रः १ । मदेषु ७ । आ अ० । ग्राभम् २ । गृभ्णाति क्रि० । सानसिम् २ । वज्रम् २ । च अ० । वृषणम् २ । भरत् क्रि० । सम् अ० । अप्सुजित् १ ॥

अन्वितपदार्थः—(इन्द्रः) विद्युत् वा राजा (अस्य) सोमस्य (इत्) एव (मदेषु) हर्षेषु सत्सु (सानसिम्) संभजनीयम् (ग्राभम्) ग्राहम् (आ गृभ्णाति) सर्वतो गृह्णाति । (अप्सु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जित्) अन्तरिक्षे वा कर्मणि युद्धकर्मणि जयशीलःपूर्वोक्त इन्द्रः (वृषणम्) वृष्टिकरं, वा शत्रुषु प्रहारवर्षकं (वज्रम्) धनुराकारं चिन्हम्, वा शस्त्रास्त्रसमुदायम् (च) (संभरत्) संबिभर्त्ति ॥

अप्सु—इति आप इत्यन्तरिक्षनामसु (निघं० १ । ३) कर्मनामसु च २ । १ पठितस्य अपः इति पदस्य सप्तम्यां रूपम् ॥ ऋग्वेदे तु ९।१०६ । ३ गृभ्णीत इति पाठः ॥३॥ (६९६)

भाषार्थः—(इन्द्रः) विजुली वा राजा (अस्य) इस सोम के (इत् ही (मदेषु) हर्षों के होने पर (सानसिम्) सेवनीय (गाभम्) दाव को (आ गृभ्णाति) सर्वतः ग्रहण करता है । (च) और (अप्सुजित्) अन्तरिक्ष में, वा युद्धकर्म में जीतनेवाला पूर्वोक्त इन्द्र=विजुली वा राजा (वृषणम्) वृष्टिकारक, वा शत्रुओं पर प्रहारों की वर्षा करनेवाले (वज्रम्) आकाश में दीखनेवाले धनुष् चिन्ह को, वा शस्त्रास्त्रसमूह को (संभरत्) अच्छे प्रकार धारण करता है ॥

निघण्टु १ । ३ ॥ २ । १ के प्रमाण और ऋ० ९ । १०६ । ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥ (६९६)

अथ चतुर्थसूक्ते प्रथमा ॥

३ १ २ ३ १ २ ३ १ २ ३ १ २
पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
२ ३ १ २ ३ १ २ ३क २र
अप श्वानꣳश्नथिष्टन सखायो दीर्घजिह्वम् ॥१॥ (६९७)

व्याख्याता (५४५) इस की व्याख्या (५४५) में देखिये (६९७)

अथ द्वितीयायाः—अन्धीगुः श्यावाश्विर्ऋषिः । सोमः पवमानो देवता । निचृद्गायत्री छन्दः ॥

१ २र ३ १ २ ३ १ २ ३ २
यो धारया पावकया परिप्रस्यन्दते सुतः ।
२ ३ २ ३ २र
इन्दुरश्वो न कृत्व्यः ॥ २ ॥ (६९८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—यः १ । धारया, पावकया ३ । परिप्रस्यन्दते क्रि० । सुतः, इन्दुः, अश्वः १ । न अ० । कृत्व्यः १ ॥

अन्वितपदार्थः—पूर्वोक्तं सोमं विशिनष्टि—(यः) (सुतः) अभिषुतः (इन्दुः) सोमः (कृत्व्यः) सुशिक्षितः (अश्वो न) अश्व इव वा विद्युदिव (पावकया) शोधिकया (धारया) (परि प्रस्यन्दते) सर्वतोवर्षति वेगेन प्रगच्छति ॥ ऋग्वेदे ९ । १०१ । २ ऽपि ॥ २ ॥ (६९८)

भाषार्थः—पूर्वोक्त सोम का विशेष वर्णन करते हैं कि—(यः) जो (सुतः) अभिषुत किया हुवा (इन्दुः) सोम (कृत्व्यः) सुशिक्षित (अश्वो न) अश्व वा विद्युत् के समान (पावकया) पवित्र करने वाली (धारया) धारा से (परि प्रस्यन्दते) सब ओर फैलता वा वेग से जाता है ॥ ऋ० ९ । १०१ । २ में भी ॥ २ ॥ (६९८)

अथ तृतीयायाः— देवता ऋषिश्च पूर्वोक्तौ । विराड्गायत्री छन्दः ॥

२ ३१२३२उ ३ १ २ ३ १ २ ३ २

तं दुरोषमभी नरः सोमं विश्वाच्या धिया ।

३ १ २ ३ १ २

यज्ञाय सन्त्वद्रयः ॥ ३ ॥ [१८] (६९९)

पदपाठः—तम्, दुरोषम् २ । अभि अ० । नरः १ । सोमम् २ । विश्वाच्या, धिया ३ । यज्ञाय ४ । सन्तु क्रि० । अद्रयः १ ॥

अन्वितपदार्थः—(तम्) पूर्वोक्तविशेषणविशिष्टं (यज्ञाय) (दुरोषम्) दुर्दहम् (सोमम्) (नरः) यज्ञनेतार ऋत्विजः (विश्वाच्या धिया) विश्वव्यापकेन कर्मणा होमेन (अभि) सर्वतः प्रसारयन्तु इति शेषः । (अद्रयः) मेघाः (सन्तु) भवन्तु यथेति शेषः ॥

आर्द्रस्य सोमरसस्य घृताद्यपेक्षया दुर्दहत्वादुरोषमिति विशे-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्णप्रयोगः ॥ ऋग्वेदे तु १ । १०१ । ३ "यज्ञं हिन्वन्त्यद्रिभिः" इति तृतीयपादेऽन्तरम् ॥ ३ ॥ (६९९)

भाषार्थः—(तम्) पूर्वोक्तविशेषणों वाले (यज्ञाय दुरोषम्) यज्ञ के लिये कठिनाई से फुंकने वाले (सोमम्) सोमरस को (नरः) यज्ञ के नेता ऋत्विज् लोग (विश्वाच्या) विश्वव्यापिनी (धिया) क्रिया [होम] से (अभि) सब ओर [फैलावें] (अद्रयः सन्तु) जिस से मेघ होवें ॥

घृतादि की अपेक्षा गीला सोमरस कठिनाई से फुंकता है, इसलिये उस का "दुरोषम्" विशेषण प्रयुक्त किया गया है ॥ ऋ० ९ । १०१ । ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥ (६९९)

अथ पञ्चमसूक्ते प्रथमा ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ २उ ३ २ ३ १ २
अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
१ २र ३ २ ३ २उ ३ २ ३ १ २ ३ २
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमहविचक्षणः ॥१॥ (७००)

व्याख्याता (५५४) इस की व्याख्या (५५४) में आगई ॥

अथ द्वितीयायाः—आन्धीगवऋषिः । सोमो देवता । पादनिचृज्जगती छन्दः ॥

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २र ३ २ ३ १ २र
ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
१ २ ३ २ ३ १ २ ३ २ १ २ ३ २ ३ १ २ ३ २ ३ २
दधाति पुत्रः पित्रोरपीच्यं ३ नाम तृतीयमधिरोचनं दिवः ॥२॥ (७०१)

पदपाठः—ऋतस्य ६ । जिह्वा ३ । पवते क्रि० । मधु, प्रियम् २ । वक्ता, पतिः १ । धियः, अस्याः ६ । अदाभ्यः १ । दधाति क्रि० । पुत्रः १ । पित्रोः ६ । अपीच्यम्, नाम, तृतीयम्, अधिरोचनम् २ । दिवः ६ ॥

अन्वितपदार्थः—अधुना सोमं सुपुत्रमिव यज्ञस्करत्वेन वर्णयति—(ऋतस्य) यज्ञस्य (जिह्वा) जिह्वयाग्निज्वालया (वक्ता) चटचटाशब्दस्य कर्त्ता, (अस्याः धियः पतिः) अस्य यज्ञकर्मणः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पालयिता, (अदाभ्यः) अनाशनीयः सोमः (प्रियम्)प्रियकरं (मधु) रसम् (पवते) प्रापयति [एतेन] (दिवः) द्युलोकस्य (अधिरोचनम्) आधिक्येन रुचिकरं (नाम) ख्यानं (दधाति) धारयति। यथा (पुत्रः) सुतः (पित्रोः) मातापित्रोः(तृतीयम्) तृतीयंनाम (अपीच्यम्) अन्तर्हितं दधाति ॥

यथा मातुरेकं नाम, पितुरपरं द्वितीयं नाम, पुत्रस्यऽचाप्यं तृतीयं नाम, ख्यातेः पूर्वमन्तर्हितमन्यैरविज्ञातं भवति, पुनर्यदा पुत्रः स्वगुणान्ख्यापयत् प्रकाशते तदा प्रसिद्धो भवति। तथैव पृथिव्यन्तरिक्षयोः पुत्रइवाऽयंसोमोऽपि सोमयागात्पूर्वमविज्ञातगुणप्रकर्षोपि होमानन्तरं पृथिव्यन्तरिक्षयोः प्रकाशमानः स्वं तृतीयं नाम ख्यातिं प्राप्तः प्रकाशते। यज्ञस्य जिह्वयाग्निज्वालयाऽऽर्द्रत्वेन चटचटाशब्दं बाललालितभाषणमिव श्रोतृणामाल्हादकं कुर्वन् विराजते ॥

ऋग्वेदे तु ९। ७५। २ रोचने इत्यन्तरम् ॥ २ ॥ (७०१)

भाषार्थः—इस मन्त्र में सोम को सुपुत्र के समान यशस्कर होने से वर्णन किया गया है कि—(ऋतस्य) सत्यभूत यज्ञ की (जिह्वा) जिह्वा=अग्नि की लपट से (वक्वा) चटाचट शब्द करने वाला, (अस्याः धियः पतिः) इस यज्ञकर्म का पालक (अदाभ्यः) नष्ट न करने योग्य सोम (प्रियम्) प्यारे (मधु) रस को (पवते) प्राप्त कराता है [इस से] (दिवः) द्युलोक के (अधिरोचनम्) अधिकता से प्रकाश (नाम) ख्याति=यश को (दधाति) धारण करता है। जैसे—(पुत्रः) बेटा (पित्रोः) माता पिता के बीच तृतीयम्) तीसरे (अपीच्यम्) छिपेहुवे नाम को धारण करता है ॥

जिस प्रकार माता का एक नाम, पिता का दूसरा, और पुत्र का तीसरा जो कि विख्यात होने से पूर्व अन्यसाधारणों को ज्ञात नहीं है, होता है।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

फिर जब पुत्र अपने गुणों को जतलाता हुआ प्रकाश करता है, तब प्रसिद्ध होता है। इसी प्रकार अन्तरिक्ष लोक और पृथिवी लोक का पुत्रतुल्य यह सोम भी सोमयाग से पूर्व ऐसा होता है, जिस के गुणों की महिमा लोगों को प्रकट नहीं होती, परन्तु सोमयाग में होम किया जाता है, तब अन्तरिक्ष और पृथिवी के मध्य में प्रकाशमान अपने तीसरे नाम को प्राप्त हुवा प्रकाशित होता है। यह अग्नि की लपट से गीला होने के कारण चटचटाता है, तो श्रोताओं को ऐसा प्रिय प्रतीत होता है, जैसा बालक का ललित भाषण सुखदायक होता है ॥

ऋ० ९ । ७५ । २ में रोचनं= रोचने पाठ है ॥ २ ॥ (७०१)

अथ तृतीयायाः—ऋषिर्देवता चोक्त एव । निचृज्जगती छन्दः ॥

१ २ ३र ३ १ २ ३ १ २ ३ २३ ३ १ २ ३ १ २

अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये ।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ १ २

अभी ऋतस्य दोहना अनूषताऽधि त्रिपृष्ठ उषसो विराजसि

॥ ३ ॥ [११] (७०२)

पदपाठः—अव अ० । द्युतानः १ । कलशान् २ । अचिक्रदत् क्रि० । नृभिः ३ । येमाणः १ । कोशे ७ । आ अ० । हिरण्यये ७ । अभि अ० । ऋतस्य ६ । दोहनाः १ । अनूषत क्रि० । अधि अ० । त्रिपृष्ठे ७ । उषसः २ । विराजसि क्रि० ॥

अन्वितपदार्थः—पुनः सोमं विशिनष्टि (द्युतानः) प्रकाशमानः (नृभिः) नेतृभिर्ऋत्विग्भिः (कलशान्) द्रोणकलशान् (अव येमानः) ततो निस्सार्यमाणः (हिरण्यये) सुवर्णमये (कोशे) स्रुवादौ (आ) समन्ततो विराजमानः (त्रिपृष्ठे अधि) त्रिषु सवनेषु अधिकृतः सोमः (उषसः) सूर्यकिरणान् (विराजसि) विराजयति (अचिक्रदत्) शब्दायते [तं सोमम्] (दोहनाः) ऋत्विजः (अनूषत) स्तुवन्ति प्रशंसन्ति ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

"ग्रावाणो वत्सा ऋत्विजो दुहन्ति" इति तैत्तिरीयकब्राह्मणे ऋत्विजां दोग्धृत्वं, ग्रावणां च वत्सत्वमभिहितं भवति ॥

येमान इति यम धातोश्छान्दसे लिटि कर्मणि कानचि रूपम्॥ ऋग्वेदे तु ९ । ७५ । ३ येमानः । अभीमृतस्य । विजराति इति पाठान्तराणि ॥ ३ ॥ (७०२)

भाषार्थः—फिर सोम का वर्णन है कि—(द्युतानः) प्रकाशमान, (नृभिः) ऋत्विजों द्वारा (कलशान्) कलशों में से (अव येमानः) लौटा जाता हुवा=निकाला जाता हुवा, (हिरण्यये कोशे) सुवर्णमय कोश स्रुवादि में (आ) चारों ओर से विराजमान, (त्रिपृष्ठे अधि) प्रातःसवनादि तीनों सवनों में अधिकृत सोम, (उषसः) सूर्यकिरणों को (विराजसि) विराजित करता है (अचिक्रदत्) और शब्द करता है [उस सोम की] (दोहनाः) दुहने वाले ऋत्विज् (अनूषत) प्रशंसा करते हैं ॥

"सोमकण्डन के पत्थर मानो बछड़े हैं और कण्डन करने वाले ऋत्विज् मानो दुहने वाले हैं" यह तैत्तिरीयक ब्राह्मण में ऋत्विजों को दोग्धा बताया गया है [सायण] अन्य व्याकरण के प्रमाण और ऋ० ९ । ७५ । ३ के पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥ (७०२)

अथ षष्ठे खण्डे प्रगाथस्य प्रथमसूक्तस्य —अग्निर्वैश्वानरऋषिः ।

अग्निर्देवता । बृहतीछन्दः ॥

तत्र प्रथमा ।

३ १ २ ३ १ २ ३ १ २ ३ १ २

यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे ।

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २र

प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥१॥(७०३)

व्याख्याता (३५) इस की व्याख्या ३५ वीं में देखिये ॥ १ ॥ (७०३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया।

३ १ २र ३ २ ३ १ २र ३ १ २र ३ १ २
ऊर्जो नपातꣳ स हिना यमस्मयुर्दाशेम हव्यदातये ।
२ ३ १ २ ३ १ २र ३२ ३२ ३ २ ३ १ २
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम्॥२॥[२०](७०४)

पदपाठः—ऊर्जः ६ । नपातम् २ । सः १ । हिना अ० । यम् २ । अस्मयुः १ । दाशेम क्रि० । हव्यदातये ४ । भुवत् क्रि० । वाजेषु ७ । अविता १ । भुवत् क्रि० । वृधे ४ । उत अ० । त्राता १ । तनूनाम् ६ ॥

अन्वितपदार्थः—(सः) प्रसिद्धोऽग्निः परमेश्वरोवा (अस्मयुः) जाठराग्न्यादिभेदेनास्मान् कामयमानः भक्त्या तुष्टो वा (यम्) अग्निम् (ऊर्जो नपातम्) बलस्य न पातयितारम् [प्रशंसिषम इति पूर्वतोऽनुषङ्गात् प्रशंसामः](हव्यदातये) हव्यानां दानाय कर्मफलदानाय वा(दाशेम) दद्मः [हविरिति,आत्मानमिति वा शेषः] स च सम्यग्घुतो ध्यातोवा सन् (वाजेषु) अन्नेषु भुक्तेषु पच्यमानेषु (अविता) अस्माकं रक्षकः (भुवत्) भवेत् (वृधे) शरीरादिवर्धनाय (भुवत्) भवेत् (तनूनाम्) देहानां (त्राता) रक्षकः (उत) च भवेत् ॥

(भावार्थः) ये मनुष्याः अग्नेःसम्यगुपयोगं जानन्ति होमादिनोपयुञ्जते च, परमेश्वरं वोपासते तेषां न बलक्षतिर्जायते, अन्नपरिपाकः शरीरादिवृद्धिः रक्षा च भवतीति जानीत ॥ ऋग्वेदे ६ । ४८ । २ ऽपि ॥ २ ॥ [२०] (७०४)

भाषार्थः—(सः) वह प्रसिद्ध अग्नि, वा परमेश्वर (अस्मयुः) जाठराग्न्यादि भेद से वा भक्ति देखकर तुष्ट हो,हमको चाहने वाला (यम्) जिस (ऊर्जो-नपातम्) बल के न गिराने वाले का [हम (प्रशंसिषम्=प्रशंसामः) वर्णन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करते हैं, यह पूर्व मन्त्र से अनुवृत्ति है] और (हव्यदातये) वायु आदि देव निमित्त हव्य पहुंचाने वा कर्मफल पहुंचाने के लिये (दाशेम) हविष्य वा आत्मा का अर्पण करते हैं। वह अच्छे प्रकार हवन किया हुवा अग्नि वा ध्यान किया हुवा परमात्मा (वाजेषु) अन्न जो भोजन किये गये उन के पच्यमान होते हुवे (अविता) रक्षक (भुवत्) हो, (वृधे) शरीरादि की वृद्धि के लिये (भुवत्) हो, (उत) और(तनूनाम्)देहों का (त्राता) रक्षक हो।।

(भावार्थ) जो मनुष्य अग्नि का भलेप्रकार से उपयोग करना जानते हैं और होमादि में काम में लाते हैं वा परमेश्वर की उपासना करते उन का बल क्षीण नहीं होता, उन के अन्न का पचना, शरीरादि की वृ और रक्षा होती है ।। ऋ० ६ । ४८ । २ में भी ।।२।। [२०] (७०४)

अथ द्वितीयसूक्तस्य–साकामश्व ऋषिः । अग्निर्देवता । गायत्री छन्दः ।।

तत्र प्रथमा ।

२ ३ १ २ र ३ १ २ ३ १ २ ३ १ २

एह्यूषु ब्रवाणि तेग्न इत्थेतरा गिरः ।

३ १ २ ३ १ २

एभिर्वर्धास इन्दुभिः ॥ १ ॥ (७०५)

व्याख्याता (७) इसकी व्याख्या संख्या (७) पर की जा चुकी है।।१॥(७०५)

अथ द्वितीया ।

२ ३क २र ३ २ ३ १ २ ३ १ २

यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।

२ ३ १ २

तत्र योनिं कृणवसे ॥ २ ॥ (७०६)

पदपाठः–यत्र, क्व, च अ० । ते ६ । मनः १ । दक्षम् २ । दधसे क्रि० । उत्तरम् २ । तत्र अ० । योनिम् २ । कृणवसे क्रि० ॥

अन्वितपदार्थः–हे अग्ने ! [इति पूर्वतोनुवृत्तिः] परमात्मन् ! (ते) तव (मनः) इच्छा [जीवात्मकर्मानुकूलफलप्रदानरुचिः]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(यत्र क्व च) यस्मिन्कस्मिन्देशे लोके वा भवति (तत्र) तस्मिन्नेव देशे लोके वा (योनिम्) मनुष्याद्यन्यतमाम् (कृणवसे) जीवेभ्यः करोषि नियतां कृत्वा ददासि(उत्तरम्)उत्तमम् (दक्षम्) बलं च (दधसे) धारयसि ॥

प्राणिनःकर्मानुसारतः परमेश्वरतन्त्राः सन्तः स्वानुष्ठितकर्मफलभोगाय तां तां योनिं प्रपद्यन्ते इति भावः ॥ यद्यपि परमात्मा सर्वेन्द्रियविवर्जितत्वादमनस्कः । तथापि सर्वेन्द्रियगुणाभासमित्यादिश्वेताश्वतरोपनिषद्वचनैरचिन्त्यं सामर्थ्यमेव मनआदिसाध्यकर्मसाधकं तत्रास्तीति न दोषः ॥ ऋग्वेदे तु ६।१६।१७ तत्रा सदः कृणवसे इति पाठः ॥२॥ (७०६)

अथ तृतीया।

१ २र ३१२ ३ १ २र३
नहि ते पूर्त्तमक्षिपद्भुवन्नेमानां पते ।
२ ३ १ २
अथा दुवो वनवसे ॥ ३ ॥ [२१] (७०७)

पदपाठः—नहि अ० । ते ६ । पूर्त्तम् १ । अक्षिपत् १ । भुवत् क्रि० । नेमानाम् ६ । पते सं० । अथ अ० । दुवः २ । वनवसे क्रि० ॥

अन्वितपदार्थः—अग्ने इत्यनुवर्त्त्य—हे ज्ञानप्रकाशक ! (ते) तव (पूर्त्तम्) पूर्णं पूरकं च तेजः (अक्षिपत्) अक्ष्युपलक्षितसर्वज्ञानेन्द्रियपातकं (नहि) (भुवत्) भवेत् किन्तु ज्ञानोन्नायकं स्यात् (नेमानां पते) अल्पज्ञानामस्मदादीनां पा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लक ! (अथ) अस्मै प्रयोजनाय (दुवः) अस्मत्कृतं नमनादि-परिचरणं (वनवसे) संभजस्व स्वीकुरु ॥

दुव इति दुवस्यतेः परिचरणकर्मणः निघं० ३ । ५॥ ऋग्वेदे ६ । १६ । १८ ऽपि ॥ ३ ॥ [२१] (७०७)

भाषार्थः—पूर्वमन्त्र से [अग्ने] हे ज्ञानप्रकाशक ! (ते) आप का (पूर्तम्) पूर्ण और पूरक तेज (अक्षिपत्) हमारी आंख आदि ज्ञानेन्द्रियों का पतन कराने वाला (नहि) न (भुवत्) होवे, किन्तु ज्ञान का वर्धक होवे (नेनानाम् पते) हे हम अल्पज्ञों के पालक वा स्वामिन् ! (अथ) इस प्रयोजन के लिये (दुवः) हमारी की हुई भक्ति को (वनवसे) स्वीकार कीजिये॥

(दुवः) यह परिचर्या भक्ति सेवा का नाम है । निघं० ३ । ५ ॥ ऋ० ६ । १६ । १८ में भी ॥ ३ ॥ [२१] (७०७)

अथ प्रगाथस्य—तृतीयसूक्तस्य सौभरिर्ऋषिः । इन्द्रो देवता । ककुप्छन्दः ॥

तत्र प्रथमा ।

३ २ ३ १ २ ३ १ उ ३ १ २ ३ १ २

वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।

१ २ ३ १ २

वज्रिंश्चित्रं हवामहे ॥ १ ॥ (७०८)

व्याख्याता (४०८) इस की व्याख्या (४०८) पर हो चुकी (७०८)

अथ द्वितीया ।

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ २

उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।

१ २ र ३ १ ३ ३ २ ३ १ २ ३ २

त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् २[२२](७०९)

पदपाठः—उप अ० । त्वा २ । कर्मन् ७ । ऊतये ४ । सः १ । नः ६ । युवा, उग्रः १ । चक्राम क्रि० । यः १ । धृषत् क्रि० । त्वाम् २ । इत्, हि अ० । अवितारम् २ । ववृमहे क्रि० । सखायः १ । इन्द्र सं० । सानसिम् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(इन्द्र) हे राजन् ! (कर्मन्) कर्मणि व्यवहारे (त्वा) त्वाम् (उप) उपगच्छामः (यः) (धृषत्) अस्मदुपर्यन्यायेन वर्त्तमानान्धृष्णोति दण्डप्रणयनादिना (सः) भवान् (उग्रः) अविषह्यः (युवा) संहननाङ्गः (नः) अस्माकम् (ऊतये) रक्षायै (चक्राम) पर्यटनं करोति अतः (सखायः) परस्परं बन्धुभूता वयम् (सानसिम्) संभजनीयम् (अवितारम्)रक्षकम् (त्वाम् इत् हि) त्वामेव (ववृमहे) राज्यायेति शेषः॥

यो हि प्रजायै सुखप्रदो, व्यवहारप्रवर्त्तको, युवोग्रः, संभजनीयो, रक्षकश्च स्यात् तमेव प्रजा राजानं विदध्युः ॥

धृषदित्यत्र—ञि धृषा प्रागल्भ्ये इत्यस्माद्धातोः बहुलं छन्दसीति (२।४।७३) शः प्रत्ययः॥ चक्रामेत्यत्र व्यत्ययोबहुलमिति ३।१।८५ परस्मैपदम् ॥ ऋग्वेदे ८।२१।२ ऽपि॥२॥ (७०१)

भाषार्थः—(इन्द्र) हे राजन् ! हम (कर्मन्) व्यवहार [मुक़द्दमें] में (त्वा) आप के (उप) शरण में आते हैं । (यः) जो आप (धृषत्) हम पर अन्याय करने वालों का दण्डादि से दमन करते हैं (सः) वह आप (उग्रः) असह्य तेजस्वी (युवा) वीर पुरुष दृढाङ्ग (नः) हमारी (ऊतये) रक्षा के लिये (चक्राम) दौरा करते हैं । अतः (सखायः) हम एक दूसरे के मित्र बनते हुवे (सानसिम्, अवितारम्, त्वाम्, इत् हि) संभजनीय, रक्षक, आप का, ही (ववृमहे) [राज्य के लिये] वरण करते हैं ॥

प्रजावर्ग को चाहिये कि राजगद्दी के लिये ऐसे पुरुष का वरण करें जो कि व्यवहारों को सुने, देखे, दृढाङ्ग और दृढव्यवसाय हो, जिस की उग्रता शत्रुओं को असह्य हो, जो राजभक्तों का सेवनीय और सब का रक्षक हो ॥

अष्टाध्यायी २।४।७३ ॥ ३।१।८५ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ८।२१।२ में भी ॥ २ ॥ (७०९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृचस्य चतुर्थसूक्तस्य-नृमेध ऋषिः । इन्द्रो देवता । ककुप्छन्दः ॥

तत्र प्रथमा ।

२ ३फ २र ३ १ २ ३ १ २३१२ ३ १ २
अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।

३ २३ १ २ ३ २ २
उदेव ग्मन्त उदभिः ॥१॥ (७१०) व्याख्याता (४०६)

अथ द्वितीया ।

१ २र ३ २ २ १ ३ ३ १ २
वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि ।

३ १ २ ३ १ २
वावृध्वाꣳसं चिदद्रिवो दिवे दिवे ॥२॥ [७११]

पदपाठः-याः २ । न अ० । त्वा २ । यव्याभिः ३ । वर्धन्ति क्रि० । शूर सं० । ब्रह्माणि १ । वावृध्वाꣳसम् २ । चित् अ० । अद्रिवः सं० । दिवे, दिवे अ० ।

अन्वितपदार्थः-(अद्रिवः) हे वज्रादिधर ! राजन् ! (शूर) वीर ! (न) यथा (यव्याभिः) नदीभिः कुल्याभिर्वा [निघं० १ । १३] (वाः) जलम् (वर्धन्ति) वर्धयन्ति (चित्)तथैव (ब्रह्माणि) वेदोक्तकर्माणि वेदा वा (वावृध्वांसम् त्वा)वृद्धिमिच्छन्तं त्वाम् (दिवे दिवे) प्रतिदिनम् वर्धयन्तीति शेषः । अतस्त्वया वेदोक्तकर्मानुष्ठानं कार्यमित्यर्थः ॥ ऋग्वेदे ८ । ९८ । ८ऽपि ॥२॥

भाषार्थः-(अद्रिवः) हे वज्रादिधारी ! (शूर) वीर ! राजन् ! (न) जैसे (यव्याभिः) नदियों से [निघं० १ । १३] वा नहरों से (वाः) जल को (वर्धन्ति) बढ़ाते हैं (चित्) इसी प्रकार (ब्रह्माणि) वेदोक्त कर्म वा वेद (वावृध्वांसम्) वृद्धि चाहते हुवे (त्वा) आप को (दिवे दिवे) प्रतिदिन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बढ़ाते हैं। इस लिये आप को वेदोक्त कर्मानुष्ठान करना चाहिये। यह भाव है ॥ ऋ० ८। ९८। ८ में भी ॥ २ ॥ (७११)

अथ तृतीया।

३ २ ३ १ २ ३ १ ३ १ २ ३ १ २ ३ १ २ ३ १ २

युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा।

३ १ २ ३ १ २

इन्द्रवाहा स्वर्विदा ॥ ३ ॥ [२३] (७१२)

इति प्रथमोर्धप्रपाठकः ॥

पदपाठः—युञ्जन्ति क्रि०। हरी २। इषिरस्य ६। गाथया ३। उरौ ७। रथे ७। उरुयुगे ७। वचोयुजा, इन्द्रवाहा, स्वर्विदा २॥

अन्वितपदार्थः—(इषिरस्य) कुत्रचिद्गन्तुमनसो राज्ञः (उरुयुगे) महायुगे (उरौ रथे) महति याने (वचोयुजा) वचसैव युज्यमानौ (स्वर्विदा) स्वःसुखस्य लम्भकौ (इन्द्रवाहा) राज्ञोवाहनौ (हरी) अश्वौ (गाथया) राजप्रशंसया सह (युञ्जन्ति) सारथ्यादयो योजयन्ति ॥

ऋग्वेदे तु ८। ९८। ९ युञ्जन्ति हरी इषिरस्य गाथयोरौ रथे उरुयुगे। इन्द्रवाहा वचोयुजा। इति पाठः ॥

इतिश्रीमत्कण्ववंशावतंस पण्डित हजारीलालस्वामि—सूनुना हस्तिनापुरपार्श्ववर्त्ति—परीक्षितगढ़निवासिना तुलसीरामस्वामिना

कृते सामवेदभाष्योत्तरार्चिके

प्रथमोऽध्यायः ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावार्थः—(इषिरस्य) कहीं जाना चाहते हुवे राजा के (उरुयुगे, उरौ, रथे) बड़े जुवे वाले, बड़े, रथ में (वचोयुजा, स्वर्विदा, इन्द्रवाहा) वचन से ही जुतजाने वाले, सुखदायक, राजवाहन (हरी) घोड़ों को (गाथया) राजा की प्रशंसा के साथ (युञ्जन्ति) सारथि आदि जोतते हैं ॥

ऋ० ८ । ९८ । ९ का पाठभेद संस्कृत भाष्य में देखिये ॥

यह श्रीमत्कण्व वंशावतंस पं० स्वामी हज़ारीलाल के पुत्र
परीक्षितगढ़ (ज़िला—मेरठ) निवासी तुलसीराम
स्वामिकृत सामवेदभाष्य उत्तरार्चिक में
प्रथमाऽध्याय समाप्त हुवा ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ द्वितीयाध्यायः

तत्र प्रथमे खण्डे, प्रथमे तृचेसूक्ते, प्रथमायाः—श्रुतकक्ष ऋषिः। इन्द्रो देवता। अनुष्टुप् छन्दः॥

२ ३ २ ३ १ २३१ २३१र २र

पान्तमावो अन्धसइन्द्रमभि प्रगायत।

३ १ २ ३१२३ १ २ ३ २

विश्वासाहꣳ शतक्रतुं मꣳहिष्ठं चर्षणीनाम् ॥१॥ (७१३)

व्याख्याता (१५५)

अथ द्वितीयायाः—ऋषिर्देवता च पूर्ववत्। गायत्री छन्दः॥

३ १ २ ३१ २ ३ २ १ २

पुरुहूतं पुरुष्टुतं गाथान्यं ऽ ३ ऽ सनश्रुतम्।

२ ३ १ २

इन्द्र इति ब्रवीतन ॥ २ ॥ (७१४)

पदपाठः—पुरुहूतम्, पुरुष्टुतम्, गाथान्यम्, सनश्रुतम् २। इद्रः १। इति अ०। ब्रवीतन क्रि०॥

अन्वितपदार्थः—हे ऋत्विजः! यूयम् (पुरुहूतम्) यज्ञेषु बहुभिर्बहुशश्चाहूतम् (पुरुष्टुतम्) बहुस्तुतम् वेदेषु इन्द्रस्यैव सर्वातिरेकेण वर्ण्यमानत्वात् (गाथान्यम्) गेयं स्तुत्यम् (सनश्रुतम्) सनातनत्वेन प्रसिद्धं देवं परमात्मानम् (इन्द्र इति) इन्द्रनाम्ना प्रसिद्धं (ब्रवीतन) ब्रूत॥

ब्रूञ् व्यक्तायां वाचि, इत्यस्य लोटि, तप्तनप्तनथनाश्च ७। १। ४५ इति तनबादेशः॥ ऋग्वेदे ८। ९२। २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—हे ऋत्विजो ! तुम (पुरुहूतम्) बहुतों से वा बहुत पुकारे हुवे (पुरुष्टुतम्) बहुत स्तुत किये हुवे (गाथान्यम्) गान कीर्त्तन करने योग्य (सनश्रुतम्) सदा से सनातन भाव से प्रसिद्ध परमात्मदेव को (इन्द्रइति) इन्द्र नाम से विख्यात (ब्रवीतन) कहो ॥ ऋ० ८ । ९२ । २ में भी ॥२॥

अथ तृतीयायाः—ऋष्यादय उक्ताः ॥

२ ३ १ २ ३ १ २ ३ १र २र ३ २
इन्द्र इन्नो महोनां दाता वाजानां नृतुः ।
३ १ २ ३ १ २
महाँ अभिज्ञ्वायमत् ॥ ३ ॥ [१] (७१५)

पदपाठः—इन्द्रः १ । इत् अ०। नः ४ । महोनाम् ६ । दाता १ । वाजानाम् ६ । नृतुः १ । महान् १ । अभिज्ञु २ । आयमत् क्रि० ॥

अन्वितपदार्थः—(इन्द्रः इत्) परमात्मैव (नः) अस्मभ्यम् (महोनां वाजानाम्) महतां बलानां (दाता) अस्ति । (नृतुः) सर्वस्य कर्मानुसारं नर्त्तयिता (महान्) अनन्तः (अभिज्ञु) अभिगतजानुकं यथा स्यात्तथा (आयमत्) कर्ममयैः पाशैर्बध्नाति जगत् ॥ ऋग्वेदे ८ । ९२ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(इन्द्रः इत्) परमात्मा ही (नः) हमारे लिये (महोनां वाजानाम्) बड़े बलों का (दाता) देने वाला है, (नृतुः) वही हमारा कर्मानुकूल नचाने वाला है (महान्) वही अनन्त (अभिज्ञु) घुटनों के बल (आयमत्) हम को कर्ममय बन्धनों से बांधता है ॥ ऋ० ८ । ९२ ३ में भी ॥३॥

अथ द्वितीयस्य तृचसूक्तस्य—वशिष्ठ ऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २
प्र व इन्द्राय मादनꣳ हर्यश्वाय गायत ।
१ २ ३ १ २
सखायः सोमपाव्ने ॥१॥ (७१६) व्याख्याता (१५६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

२र ३ २ ३ १ २ ३ २ ३ २र ३ १ २
शꣳसेदुक्थꣳ सुदानव उत द्युक्षं यथा नरः ।
३ २ ३ १ २
चकृमा सत्यराधसे ॥ २ ॥ (७१७)

पदपाठः—शंस क्रि० । इत् अ० । उक्थम् । २ । सुदानवे ४ । उत अ० । द्युक्षम् २ । यथा अ० । नरः १ । चकृम क्रि० । सत्यराधसे ४ ॥

अन्वितपदार्थः—(यथा) येन प्रकारेण (नरः) कर्मकाण्डनायका वयम् (सुदानवे) सुष्ठुदानिने (सत्यराधसे) सत्यं धनं यस्य तस्मै परमात्मनइन्द्राय (द्युक्षम्) दीप्तेःसाधनभूतम् (उक्थम्) स्त्रोत्रं (चकृम) कुर्मः (उत) तथैव (शंस) त्वमपि उच्चारय (इत्) पादपूरणः ॥

मनुष्यैर्ज्ञानप्रकाशाय परमेश्वरस्तुत्युपासनाप्रार्थनाःपरस्परोपदेशेन प्रचारणीया इति भावः ॥ अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाःकमीमिहिति । निरु० १। १॥ऋग्वेदे ७।३१ । २ ऽपि ॥२॥

भाषार्थः—(यथा) जिस प्रकार (नरः) हम कर्मकाण्ड के नायक लोग (सत्यराधसे, सुदानवे) सत्य जिस का धन है,जो शोभन दानी है उस इन्द्र= परमात्मा के लिये(द्युक्षम्)प्रकाश का साधनभूत (उक्थम्)स्तोत्र (चकृम) करते हैं (उत) ऐसे ही (शंस) तू भी उच्चारण कर (इत्) पादपूरणार्थ है ॥

अर्थात् मनुष्योंको परस्परोपदेश से परमेश्वर की स्तुति उपासना प्रार्थना का प्रचार करना चाहिये, जिस से ज्ञानप्रकाश बढ़े॥ निरु० १।९ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ७ । ३१ । २ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

१ २ ३२उ ३ १ २
त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो ।
१ २ ३१२
त्वं हिरण्ययुर्वसो ॥३॥ [२] (७१८)

पदपाठः—त्वम्१। नः ४। वाजयुः, त्वम्, गव्युः १। शतक्रतो सं० । त्वम्, हिरण्ययुः १। वसो सं० ॥

अन्वितपदार्थः—स्तोत्रमाह—(इन्द्र) हे परमेश्वर ! (त्वं) (नः) अस्मभ्यं (वाजयुः) अन्नकामः (शतक्रतो) हे अनन्तप्रज्ञ ! (त्वम्) (गव्युः) अस्मभ्यं गोकामः (वसो) हेवासयितः ! (त्वम्) (हिरण्ययुः) लक्ष्म्यादिकामो भवेति शेषः ॥

छन्दसि परेच्छायामपि दृश्यते इति (३।१।८)वार्त्तिकम् ततो हि परार्थार्थो न दोषाय ॥ ऋग्वेदे ७।३१।३ ऽपि ॥३॥

भाषार्थः—अब स्तोत्र कहा जाता है कि—(इन्द्र) हे परमेश्वर ! (त्वम्) आप (नः) हमारे लिये (वाजयुः) अन्न की इच्छा वाले और (शतक्रतो) हे अनन्तज्ञान ! (त्वम्) आप (गव्युः) गौ आदि पशु की इच्छा वाले तथा (वसो) हे वास देने वाले ! (त्वम्) आप (हिरण्ययुः) सुवर्णादि धन चाहने वाले हूजिये ।।

अर्थात् आप हमारे लिये ऐसी इच्छा करें कि हमारे पास अन्न पशु लक्ष्मी आदि सब सुखसामग्री विद्यमान हो ।। व्याकरण का प्रमाण संस्कृत भाष्य में देखिये ।। ऋ० ७।३१।३ में भी ।। ३ ।।

अथ तृतीयस्य तृचसूक्तस्य—मेध्यातिथिप्रियमेधावृषी।इन्द्रो देवता।गायत्री छन्दः॥

तत्र प्रथमा—

३१२ ३१२३ १ २ ३ २ ३ १ २
वयमु त्वा तदिदर्था इन्द्र त्वा यन्तः सखायः ।
१ २ ३ २ ३ १ २
कण्वा उक्थेभिर्जरन्ते ॥१॥ (७१९) व्याख्याता (१५७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २३१र २र ३ १२३२ ३ १ २

न घेमन्यदापपन वज्रिन्नपसो नविष्टौ ।

२उ ३र १ २

तवेदु स्तोमैश्चिकेत ॥ २ ॥ (७२०)

पदपाठः–न, घ, ईम् अ० । अन्यत् २ । आपपन क्रि० । वज्रिन् सं० । अपसः ६ । नविष्टौ ७ । तव ६ । इत्, उ अ० । स्तोमैः ३ । चिकेत क्रि० ॥

अन्वितपदार्थः—(वज्रिन्) हे नियन्तः ! परमेश्वर ! दुष्टनिबर्हण ! अहम् (अपसः) कर्मकाण्डस्य (नविष्टौ) नूतन-यागे [आरम्भे] (अन्यत्) त्वत्तोन्यम् (न घ ईम्) नैव (आपपन) अभिष्टौमि (उ) यतः (तव इत्) तवैव (स्तो-मैः) स्तोत्रैः (चिकेत) ज्ञानं प्राप्नोमि ॥

ज्ञानलाभाय परमात्मानं विहायान्यो नैव स्तोतव्योस्ति ॥ अप इति कर्मनाम निघं० २। १॥ आपपनेति " पनतेः स्तु-ति कर्मणः (भ्वा०आ०) उत्तमे णलि रूपम्" इति सायणः । पनायते इत्यर्चतिकर्मा निघं० ३।१४॥ऋग्वेदे ८।२। १७ऽपि॥२॥

भाषार्थः–(वज्रिन्) हे दुष्टनिबर्हण ! नियन्तः ! परमेश्वर ! मैं (अपसः) कर्मकाण्ड के (नविष्टौ) नवीन यज्ञ [आरम्भ] में (अन्यत्) आप को छोड़ अन्य की (न घ ईम्) नहीं ही (आपपन) स्तुति करता हूं (उ) क्योंकि (तव इत्) आप के ही (स्तोमैः) स्तोत्रों से (चिकेत) ज्ञान पाता हूं ॥

ज्ञानलाभ के लिये मनुष्यों को परमात्मा का परित्याग करके अन्य की स्तुति नहीं करनी चाहिये ॥ व्याकरण और निघटु ३। १४ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८। २। १७ में भी ॥ २ ॥

अथ तृतीया–

३ १ २ ३२ ३ २ ३ १र २र

इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २३१२

यन्ति प्रमादमतन्द्राः ॥ ३ ॥ [३] (७२१)

पदपाठः—इच्छन्ति क्रि० । देवाः १ । सुन्वन्तम् २ । न अ० । स्वप्नाय ४ । स्पृहयन्ति, यन्ति क्रि० । प्रमादम् २ । अतन्द्राः १ ।

अन्वितपदार्थः—हे परमात्मन्निन्द्र! (देवाः) विद्वांसः (सुन्वन्तम्) आत्मानं साक्षात्कारयन्तं त्वाम् (इच्छन्ति) वाञ्छन्ति (स्वप्नाय) निद्रायै (न) नैव (स्पृहयन्ति) कामयन्ते, किन्तु (अतन्द्राः) अनलसाः सन्तः (प्रमादम्) प्रकृष्टमानन्दम् (यन्ति) प्राप्नुवन्ति ॥

ये विद्वांसः परमात्मसाक्षात्कारमिच्छन्ति प्रयतन्ते च तेऽल्पनिद्राः सन्तः सततमानन्दमाप्नुवन्ति ॥

स्पृहेरीप्सितः १। ४ । १६ इति कर्मणः संप्रदानता । स्पृह ईप्सायां चुरादिरदन्तः ॥ ऋग्वेदे ८ । २ । १८ ऽपि ॥ ३ ॥

भाषार्थः—हे इन्द्र ! परमेश्वर ! (देवाः) विद्वान् लोग (सुन्वन्तम्) अपने साक्षात् कराते हुवे आप की (इच्छन्ति) इच्छा करते हैं, और (स्वप्नाय) निद्रा के लिये (न स्पृहयन्ति) नहीं इच्छा करते । किन्तु (अतन्द्राः) निरालस होकर (प्रमादम्) अत्यन्तानन्द को (यन्ति) प्राप्त होते हैं ॥

अर्थात् परमात्मा का साक्षात्कार चाहने और यत्न करने वालों के निद्रा आलस्यादि तमोगुण दूर होजाते हैं, निरन्तर आनन्द प्राप्त होता है ॥

अष्टाध्यायी १ । ४ । १६ आदि प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । २ । १८ में भी ॥ ३ ॥

अथ चतुर्थर्चसूक्तस्य—अतकक्षऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ २ ३ १ २

इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः ।

३ १ २ ३ १ २

अर्कमर्चन्तु कारवः ॥ १ ॥ (७२२) व्याख्याता (१५८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

२ ३ २ ३ २३ २ ३ १२ ३२ ३ १२
यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
१ २ ३२ २
इन्द्रं सुते हवामहे ॥ २ ॥ (७२३)

पदपाठः—यस्मिन् १। विश्वाः २। अधि अ०। श्रियः २। रणन्ति क्रि०। सप्त, संसदः १। इन्द्रम् २। सुते ७। हवामहे क्रि०॥

अन्वितपदार्थः—(सप्त) सप्तसंख्याकाः (संसदः) योगभूमिषु निषण्णाः पुरुषाः (यस्मिन्) परमेश्वरे (विश्वाः) समस्ताः (श्रियः) योगलक्ष्मीः (अधि रणन्ति) आधिक्येन वर्णयन्ति स्तुवन्ति (सुते) मनसि शोधिते सति (इन्द्रम्) तं परमेश्वरम् (हवामहे) आह्वयामहे ॥

यद्वा—(सप्त संसदः) त्रय उद्गातारः, होता, मैत्रावरुणः, ब्राह्मणाच्छंसी, अच्छावाकश्चेति सप्तर्त्विजः (यस्मिन्) सोमे (विश्वाः श्रियः) समस्ताः सौभाग्यलक्ष्मीः (अधि रणन्ति) (सुते) तस्मिन् सोमेभिषुते सति (इन्द्रम्) वृष्टिकरं भौतिकं देवम् (हवामहे) ॥ ऋग्वेदे ८ । १२ । २०ऽपि ॥ २ ॥

भाषार्थः—(सप्त) सात ७ (संसदः) योगभूमियों में आसन जमाने वाले पुरुष (यस्मिन्) जिस परमेश्वर में (विश्वाः) सब (श्रियः) योगलक्ष्मियों को (अधि रणन्ति) अधिकता से वर्णित करते हैं (सुते) मन शुद्ध होने पर (इन्द्रम्) उस परमेश्वर को (हवामहे) हम पुकारते हैं ॥

अथवा—(सप्त संसदः) सात ऋत्विज्= ३ उद्गाता, ४ होता, ५ मैत्रावरुण, ६ ब्राह्मणाच्छंसी, ७ अच्छावाक (यस्मिन्) जिस सोम में (विश्वाः) सब (श्रियः) सौभाग्यलक्ष्मियों को (अधि रणन्ति) अधिकता से बताते हैं (सुते) उस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोम के सम्पन्न अभिषुत होजाने पर (इन्द्रम्) वृष्टिकारक भौतिक देवविशेष को (हवामहे) हम प्रशंसित करते हैं ॥ ऋ० ८ । ९२ । २० में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३ १ २

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।

१ २र ३ १ २

तामिद्वर्धन्तु नो गिरः ॥ ३ ॥ [४] (७२४)

पदपाठः—त्रिकद्रुकेषु ७ । चेतनम् २ । देवासः १ । यज्ञम् २ । अत्नत क्रि० । तम् २ । इत् अ० । वर्धन्तु क्रि० । नः ६ । गिरः १ ॥

अन्वितपदार्थः—(देवासः) विद्वांसः (त्रिकद्रुकेषु) एतत्संज्ञेषु यज्ञाहस्सु (चेतनं यज्ञम्) ज्ञानसाधनं यज्ञम् (अत्नत) तन्वन्ति (तम् इत्) तमेव (नः) अस्माकं (गिरः) वाचः (वर्धन्तु) वर्धयन्तु ॥

आभिप्लविकानि त्रीण्यहानि त्रिकद्रुकाणि, यथा—गवामयनादिकं सत्रमेकषष्ट्युत्तरशतत्रयदिनसाध्यं भवति । तत्र प्रायणीयोऽतिरात्रनाम प्रथममहः, चतुर्विंशनाम द्वितीयम्, उक्थनाम तृतीयम्, ज्योतिर्गौश्चतुर्थम्, आयुर्गौः पञ्चमम्, आयुर्ज्योतिः षष्ठमहः । एतानि षडहानि आभिप्लविकान्युच्यन्ते, तेषु चतुर्थपञ्चमषष्ठानि त्रिकद्रुकाणि वेद्यानि ॥

अत्नतइत्यत्र—तनुविस्तारे इत्यस्मात्, बहुलं छन्दसि २ । ४ । ७३ इति विकरणलुकि, तनिपत्योश्छन्दसि ६ । ४ । ९९ इत्युपधालोपः ॥ ऋग्वेदे ८ । ९२ । १ ऽपि ॥ ३ ॥

भाषार्थः—(देवासः) विद्वान् लोग (त्रिकद्रुकेषु) त्रिकद्रुकनामक यज्ञ के ३ दिनों में (चेतनं यज्ञम्) ज्ञानसाधन यज्ञ का (अत्नत) विस्तार करते हैं (तम् इत्) उसी यज्ञ को (नः) हमारी (गिरः) वाणी (वर्धन्तु) बढ़ावें ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आभिप्लविक ३ दिन त्रिकद्रुक होते हैं। जैसा कि गवामयनादि सत्र(यज्ञ) ३६१ दिन में सिद्ध होता है उस में १-प्रायणीयोऽतिरात्र,२-चतुर्विंश,३-उक्थ, ४-ज्योतिर्गौ, ५-आयुर्गौ,६-आयुर्ज्योति; ये छः ६ दिन आभिप्लविक कहाते हैं, इन में ४ । ५ । ६ येअन्त के तीन ३ त्रिकद्रुक हैं । अष्टाध्यायी २ । ४ । ७३ और ६ । ४ । ९९ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ०८ । ९२ । २१ में भी ॥३॥

इति द्वितीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीयखण्डे प्रथमतृचस्य-हरिमिठ ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अयं त इन्द्र सोमो निपूतो अधिबर्हिषि ।
१ २ ३ २ ३ १ २
एहीमस्य द्रवा पिब ॥ १ ॥ (७२५) व्याख्याता (१५९)

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ २
शाचिगो शाचिपूजनायꣳ रणाय ते सुतः ।
१ २ ३ १ २
आखण्डल प्रहूयसे ॥ २ ॥ (७२६)

पदपाठः-शाचिगो, शाचिपूजन सं० । अयम् १ । रणाय ४ । ते ६ । सुतः १ । आखण्डल सं० । प्रहूयसे क्रि० ॥

अन्वितपदार्थः-(शाचिगो) शाचयः शक्ता गावः किरणायस्य तत्संबोधने हे शक्तकिरण ! (शाचिपूजन) शाचीनां शक्तानां किरणानां सत्कर्तः ! (आखण्डल) मेघावयवानामाखण्डयितरिन्द्र ! सूर्य ! (अयम्) एष सोमः (ते) तव (रणाय) मेघैः सह संग्रामाय विजयाय च (सुतः) निष्पादितः (प्रहूयसे) प्रकर्षेणाहूयसे वर्ण्यसे इति यावत् ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सूर्यस्य किरणाः शाचयः शक्ताः सूर्यश्च तेषां समर्थकः। अतएव वृष्टये सोमं संपाद्य होमः कार्य इत्यर्थः॥ऋग्वेदे ८।१७।१२ऽपि॥२॥

भाषार्थः—(शाचिगो) समर्थ किरणयुक्त (शाचिपूजन) किरणों के समर्थक (आखण्डल) मेघ के अवयवों को खण्ड २ करने वाले सूर्य ! (अयम्) यह सोम (ते) तेरे (रणाय) मेघों के साथ संग्राम और विजय के लिये (सुतः) खींचकर रक्खा है (प्रहूयसे) और आवाहन वा वर्णन किया जाता है॥

अर्थात् सूर्य की किरणें समर्थ हैं और सूर्य उन का समर्थक है। इस लिये सूर्य और मेघ के युद्ध में सूर्य के विजय अर्थात् वृष्टि के लिये सोम से यज्ञ करना चाहिये॥ ऋ० ८। १७। १२ में भी॥ २॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २

यस्ते शृङ्गवृषोणपात्प्रणपात्कुण्डपाय्यः।

२र ३ १र २र

न्यस्मिन्दध्र आ मनः॥ ३॥ [५] (७२७)

पदपाठः—यः १। ते ६। शृङ्गवृषोणपात् सं०। प्रणपात्, कुण्डपाय्यः १। नि अ०। अस्मिन् ७। दध्रे क्रि०। आ अ०। मनः २॥

अन्वितपदार्थः—(शृङ्गवृषोणपात्) शृणन्ति हिंसन्ति इति शृङ्गाणि रश्मयस्तैर्वर्षतीति शृङ्गवृडादित्यः तस्य न पातयितः ! स्वकीये स्थानेऽवस्थापयितः ! [इति सायणाचार्योऽपि] इन्द्र ! (यः) (प्रणपात्) प्रकर्षेण न पातयिता रक्षिता (ते) त्वत्सम्बन्धी (कुण्डपाय्यः) क्रतुविशेषोस्ति (अस्मिन्) कुण्डपाय्ये क्रतौ (मनः) स्वान्तं (नि आ दध्रे) नितरामादधिरे धरन्ति ऋत्विगादय इति शेषः॥

सुबामन्त्रितेपराङ्गवत्स्वरे २। १। २ इति षष्ठ्यन्तस्य शृङ्ग-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वृट्शब्दस्य पराङ्गवद्भावेनामन्त्रितानुप्रवेशात्समुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥ क्रतौ कुण्डपाय्यसंचाय्यौ ३ । १। १३० इति निपातितः।कुण्डैः पीयते सोमोस्मिन्सयज्ञविशेषः॥ दधातेर्लिटि-ङरयोरे ६।४।७६ इति रेभावे दध्रे ॥ ऋग्वेदे ८।१७।१३ ऽपि ॥३॥

भाषार्थः—(शृङ्गवृषोणपात्) रश्मियों से वर्षाने वाले इद्र=सूर्य्य का पतन न कराने वाले ! अर्थात् अपने स्थान पर स्थित रखने वाले इन्द्र ! (यः) ो प्रणपात्) अतिशय करके न गिराने वाला=रक्षा करने वाला (ते) तेरा (कुण्डपाय्यः) कुण्डपाय्य यज्ञविशेष है (अस्मिन्) इस यज्ञ में [ऋत्विगादि लोग] (मनः) चित्त को (नि आ दध्रे) निरंतर धारण करते हैं॥

अष्टाध्यायी २ । १ । २ ॥ ३ । १ । १३० ॥ ६ । ४ । ७६ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । १७ । १३ में भी ॥ ३॥

अथ द्वितीयतृचस्य—कुसीदः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१र २र ३ १ २ ३ २ ३ १र २र
आतू न इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय ।
३ २र २र
महाहस्ती दक्षिणेन ॥१॥ (७२८) व्याख्याता (१६७)

अथ द्वितीया—

३ १र २र ३ २ ३ १ २ ३ २ २
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
३ १र २र
तुविमात्रमवोभिः ॥ २ ॥ (७२९)

पदपाठः— विद्म क्रि० । हि अ० । त्वा २। तुविकूर्मिम्, तुविदेष्णम्, तुवीमघम्, तुविमात्रम् २ । अवोभिः ३ ॥

अन्वितपदार्थः—हेराजन्निन्द्र ! (अवोभिः) त्वत्कृतैरस्मद्रक्षणैः (त्वा) त्वाम् (तुविकूर्मिम्) बहुकर्माणम् (तुविदे-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्णम्) बहुदातारम् (तुवीमघम्) बहुधनम् (तुविमात्रम्) बहुपरिमाणं च (विद्म,हि) जानीमः खलु ॥

तुवि इति बहुनाम निघं० ३।१॥ मघमिति धननाम निघं० २। १० ॥ ऋग्वेदे ८। ८१। २ऽपि ॥ २ ॥

भाषार्थः—हे राजन्निन्द्र ! (अवोभिः) आप की की हुई हमारी रक्षाओं से (त्वा) आप को (तुविकूर्मिम्) बहुकर्मयुक्त पुरुषार्थी (तुविदेष्णं) बहुदानी (तुवीमघम्) बहुत धनी और (तुविमात्रम्) बहुत बड़े परिमाण वाला हम (विद्म) जानते हैं (हि) निश्चय ॥

निघण्टु ३। १ ॥ २। १० के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८। ८१। २ में भी ॥ २ ॥

अथ तृतीया—

१ २र ३ २र २र ३ १ २

न हि त्वा शूर देवा न मर्त्तासो दित्सन्तम् ।

३ २उ ३ १ २

भीमं न गां वारयन्ते ॥ ३ ॥ [६] (७३०)

पदपाठः—न, हि अ० । त्वा २ । शूर सं० देवाः १ । न अ० । मर्त्तासः १। दित्सन्तम्, भीमम् २ । न अ० । गाम् २ । वारयन्ते क्रि० ॥

अन्वितपदार्थः—(शूर) हे वीर ! राजन् ! (दित्सन्तम्) शत्रुशिरांसि खण्डयितुमिच्छन्तम् (गाम्) वृषभम् (न) इव (भीमम्) भयानकं (त्वा) त्वाम् (देवाः) (न हि) नैव (मर्त्तासः) मनुष्याश्च (न) नो (वारयन्ते) निवारयन्ति॥

दैव्यो मानुष्यश्च बाधास्त्वां न बाधन्ते इति भावः ॥ ऋग्वेदे ८। ८१। ३ऽपि ॥ ३ ॥

भाषार्थः—(शूर) हे पराक्रमी राजन् ! (दित्सन्तम्) शत्रुओं के शिर काटना चाहते हुवे (गाम्) बैल के (न) तुल्य बली (त्वा) आप को (देवाः) देवता (न, हि) नहीं (मर्त्तासः) और मनुष्य (न) नहीं (वारयन्ते) रोकते॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थात् दैवी और मानुषी कोई बाधा विघ्न नहीं कर सकतीं। विज्ञान बल से दैवी और बाहुबल से मानुषी रुकावटों को आप हटा सकते हैं॥ ऋ० ८। ८१। ३ में भी॥ ३॥

अथ तृतीयतृचस्य—त्रिशोक ऋषिः। इन्द्रोदेवता। गायत्री छन्दः॥

तत्र प्रथमा—

३ १ २ ३ २ ३ १ २ ३ १ २

अभि त्वा वृषभा सुते सुतꣳ सृजामि पीतये।

३ १ २ ३ १ २

तृम्पा व्यश्नुही मदम्॥१॥ (७३१) व्याख्याता (१६१)

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २

मा त्वा मूरा अविष्यवो मोपहस्वान आदभन्।

१ २ ३ १ २

माकीं ब्रह्मद्विषं वनः॥२॥ (७३२)

पदपाठः—मा अ०। त्वा २। मूराः, अविष्यवः १। मा अ०। उपहस्वानः १। आदभन् क्रि०। माकीम् अ०। ब्रह्मद्विषम् २। वनः क्रि०॥

अन्वितपदार्थः—(अविष्यवः) भोजनभट्टाः [निघं० २।८] (मूराः) मूढा मूर्खाः (उपहस्वानः) यज्ञादिकर्मणामुपहासकारिणः (त्वा) त्वाम् (मा दभन्) न हिंसन्तु। त्वञ्च (ब्रह्मद्विषम्) ब्रह्मणोवेदस्य द्वेष्टारम् अतएव यज्ञद्वेष्टारमित्यायातम् (माकीम् वनः) मा सेविष्ठाः॥

परमात्मकृपया इन्द्रयागादिकर्मानुष्ठानविरोधिनः स्वार्थैकपरा वेदानभिज्ञा जनाः, यज्ञविध्वंसेनेन्द्रस्य वृष्टिकर्त्तुर्देवस्य विघातका न भवेयुः। पूर्वोक्तान् वेदविरोधिनः प्रति वृष्टिकर्तुरानुकूल्यं च न भवत्विति भावः॥ ऋग्वेदे ८। ४५। २३ऽपि॥२॥

भाषार्थः—(अविष्यवः) भोजनभट्ट लोग [निघं० २। ८] जो कि (उपह-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वानः) उपहास करने वाले और (मूराः) मूढ हैं (त्वा) तुझ को (मा दभन्) न हिंसित करें और तू भी (ब्रह्मद्विषम्) वेद के द्वेष करने वाले को (माकीम्) मत (वनः) भज ॥

अर्थात् इन्द्रयागादि कर्मानुष्ठान के विरोधी, स्वार्थी, मूढ़ लोग यज्ञ के नाश से वृष्टिकारक इन्द्र के विघातक न हों और इन्द्र से उन्हें आनुकूल्य भी न हो। यह परमात्मा का अनुग्रह प्रार्थित है॥ ऋ० ८।४५। २३ में भी ॥२॥

अथ तृतीया—

३ २ ३ १ २ ३ १ २ ३ १ २

इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।

१ २ ३ १ २ २ २

सरो गौरो यथा पिब ॥ ३ ॥ [७] (७३३)

पदपाठः—इह अ० । त्वा २ । गोपरीणसम् २ । महे ४ । मन्दन्तु क्रि० । राधसे ४ । सरः २ । गौरः १ । यथा अ० । पिब क्रि० ॥

अन्वितपदार्थः—(गोपरीणसम्) गोभिः किरणैः संमिश्रम् (त्वा) त्वामिन्द्रम् (इह) यज्ञे (महे राधसे) महते धनाय [वृष्टिद्वारा] (मन्दन्तु) मादयन्तु सोमेन मनुष्या इति शेषः । त्वं च (पिब) शोषय । दृष्टान्तः—(यथा) येन प्रकारेण (गौरः) गौरमृगः (सरः) उदकं सोमलतारसं पिबति तथेत्यर्थः॥

गौरिति रश्मिनाम निघं० १ । ४ ॥ राध इति धननाम निघं० २ । १० ॥ ऋग्वेदे ८ । ४५ । २४ ऽपि ॥ ३ ॥

भाषार्थः—(गोपरीणसम्) किरणों में मिले हुवे (त्वा) तुझ इन्द्र को (इह) इस यज्ञ में (महे) बड़े (राधसे) अन्नादि धन के लिये [वृष्टि द्वारा] (मन्दन्तु) मनुष्य सोम से हृष्ट अर्थात् वृष्टि आदि स्वकार्य करने में अनुकूल करें। और तू (पिब) उस सोम को शोष। दृष्टान्त—(यथा) जैसे (गौरः) गौर मृग (सरः) सोमरसरूप जल को पीता है तद्वत् ॥

निघण्टु १ । ४ ॥ २ । १० के प्रकाण संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थर्चस्य—काण्वः प्रियमेध ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

तत्र प्रथमा—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ २उ ३ २ ३ १ २ ३ १ २
इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
१ २ ३ १ ३
अनाभयिन् ररिमा ते ॥१॥ (७३४) व्याख्याता (१२४)

अथ द्वितीया—

१ २ ३ २ ३ २उ ३ २ ३ २ ३ १ २
नृभिर्धौतः सुतो अश्नैरव्यावारैः परिपूतः ।
२ ३ २ ३ २ ३ १ २
अश्वो न निक्तो नदीषु ॥ २ ॥ (७३५)

अथ तृतीया—

२ ३ २३ २ ३ १ २ ३ १ २ ३ १ २
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः ।
१ २ ३ १ २ ३ १ २
इन्द्र त्वास्मिन्सधमादे ॥ ३ ॥ [८] (७३६)

पदपाठः—(द्वयोरेकत्रान्वयः) नृभिः ३ । धौतः, सुतः १ । अश्नैः, अव्यावारैः ३ । परिपूतः, अश्वः १ । न अ० । निक्तः १ । नदीषु ७ ॥ तम् २। ते ४ । यवम् २ । यथा अ० । गोभिः ३=४ । स्वादुम् २। अकर्म क्रि० । श्रीणन्तः १ । इन्द्र सं० । त्वा २ । अस्मिन्, सधमादे ७ ॥

अन्वितपदार्थः—(नृभिः) कर्मनेतृभिर्ऋत्विग्भिः (धौतः) शोधितः संस्कृतः अनन्तरम् (अश्नैः) अश्मभिर्ग्रावभिः(सुतः) अभिषुतः ततः (अव्यावारैः) अविर्मेषस्तदीयैर्बालैर्दशापवित्रस्थैः (परिपूतः) सर्वथा शोधितः सोमोस्ति (न) यथा (नदीषु) (निक्तः) स्नातः (अश्वः) ॥ (तम्) तथाभूतं सोमं (ते) तुभ्यम् (श्रीणन्तः) दुग्धादिभिःसंमिश्र्य पचन्तो वयम् (स्वादुम्) रसनीयम् (अकर्म) कुर्मः । दृष्टान्तः—(यथा) (गोभिः) गोभ्यः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(यवम्) यवादिसंपादितमाहारं सुसंस्कृतं कुर्वन्ति तद्वत्। (इन्द्र) राजन्! यजमान! (अस्मिन्) अत्र (सधमादे) यज्ञे (त्वा) त्वाम् पाययाम इति शेषः॥

गृहीतसोमा घटविशेषा ग्रहाः। ते च प्रातःसवने उपांशुप्रभृतयः, माध्यन्दिने मरुत्वतीयादयः, तृतीयसवनआदित्यादयः। अपि चैतदतिरिक्ताःषोडश्यादयो ग्रहाः सन्ति बहवो हि षोडश्यादि यागविशेषनियुक्ताः। तत्सर्वातिरिक्तएकोऽदाभ्यसंज्ञो ग्रहः। स च यस्मिन्नौदुम्बरे पात्रे सोमो गृहीतस्तस्मिन्होतृचमसस्था निग्राभ्यासंज्ञा अप आनीय तस्मिंस्तिस्रः सोमलताः प्रक्षिप्याग्नये त्वेत्यादिभिस्त्रिभिर्मन्त्रैः (यजुषि ८। ४७) क्रमेण गृह्यते। उक्तं च कात्यायनेन (१२। ५। १३–१५) "अदाभ्यं गृह्णात्यासिच्य निग्राभ्याः पात्रे तस्मिंस्तूष्णीं त्रीनंशूनवधायाऽग्नयेत्वा गायत्रच्छन्दसमिति" अकर्मेत्यत्र—मन्त्रेघसह्वरणश्वेत्यादिना (२। ४। ८०) च्लेर्लुक्॥ ऋग्वेदे तु ८। २। २—३ अव्योवारैरित्यन्तरम्॥ २—३॥

भाषार्थः—(नृभिः) कर्म के नेता ऋत्विजों से (धौतः) धोया हुवा, फिर (अश्नैः) अश्मा=पत्थरों से (सुतः) छेत कर निचोड़ा हुवा और (अव्यावारैः) ऊर्णामय दशापवित्रों से (परिपूतः) सर्वथा स्वच्छ किया हुवा सोम है (न) जैसा (नदीषु) नदियों में (निक्तः) स्नान कराया हुवा (अश्वः) घोड़ा॥ (तम्) उस सोम को (ते) आप के लिये (श्रीणन्तः) दुग्धादि में मिला कर पकाते हुवे हम लोग (स्वादुम्) स्वाद (अकर्म) बनाते हैं। दृष्टान्त—(यथा) जैसे (गोभिः) गौवों के लिये (यवम्) यवादि से सिद्ध किया दलिया आदि रातिब स्वादु बनाते हैं तद्वत् (इन्द्र) हे राजन्! यजमान! (अस्मिन्) इस (सधमादे) यज्ञ में (त्वा) आप को 'हम सोम पिलाते हैं' यह शेषार्थ है॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जिन घटों में सोम ग्रहण किया गया हो वे घट "ग्रह" कहाते हैं। और वे (ग्रह) प्रातःसवन में "उपांशु" आदि, माध्यन्दिन सवन में "मरुत्वतीयादि" तृतीयसवन वा सायंसवन में "आदित्यादि" संज्ञक होते हैं। इन के अतिरिक्त षोडशी आदि यज्ञों में बहुत से "षोडशी" संज्ञकादि (ग्रह) घट होते हैं। इन सब के अतिरिक्त एक "अदाभ्य" नामक ग्रह होता है। और यह वह ग्रह है कि जिस गूलड़ की लकड़ी के पात्र में सोम रक्खा हो, उस में होता के चमसे वाले "निग्राभ्या" नामक जल लेकर उसमें तीन सोमलता-खण्ड डाल कर "अग्नये त्वा०" (यजुः ८।४७) इत्यादि तीन मन्त्रों से क्रम से ग्रहण किया जाता है। ऐसा ही कात्यायन ने १२। ५। १३-१५ में कहा है कि "अदाभ्यं गृह्णाति०" इत्यादि॥

अष्टाध्यायी २। ४। ८० का प्रमाण संस्कृतभाष्य में देखिये॥ ऋ० ८। २। २-३ में (अव्योवारैः) पाठान्तर है॥ २-३॥

अथ तृतीयखण्डे प्रथमतृचसूक्तस्य-विश्वामित्रऋषिः। इन्द्रोदेवता। गायत्री छन्दः॥

तत्र प्रथमा-

३१२ २२ ३१ २
इदꣳ ह्यन्वोजसा सुतꣳराधानां पते।
२३ २ १३
पिबा त्वा ऽ३स्य गिर्वणः॥१॥ (७३७) व्याख्याता (१६५)

अथ द्वितीया-

२३ १३ २ १२ २२३२२ २२ ३क२२
यस्ते अनु स्वधामसत्सुते नियच्छ तन्वम्।
१ २
स त्वा ममत्तु सोम्य॥ २॥ (७३८)

पदपाठः-यः १। ते ४। अनु अ०। स्वधाम् २। असत् क्रि०। सुते ७। नियच्छ क्रि०। तन्वम् २। सः १। त्वा २। ममत्तु क्रि०। सोम्य सं०॥

अन्वितपदार्थः-(सोम्य) हे सोमपानार्ह राजन्! इन्द्र! (सुते) सोमेऽभिषुते सति (यः) सोमः (ते) तुभ्यम् (स्वधाम् अनु) अन्नेन सह (असत्) स्यात् (सः) सोमः (त्वा) त्वाम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(ममत्तु) मादयतु हर्षयतु। त्वं च (तन्वम्) देहम् (नियच्छ) नियमेन धारय व्यायामादिनोन्नमय ॥

मनुष्यैः सोमः संपाद्य राज्ञेऽर्पणीयस्तेन च यथानियमं संसेव्य शारीरकोन्नतिर्विधेयेति भावः ॥

सोम्य इत्यत्र—सोममर्हति यः ४ । ४ । १३७ इति यः॥ छन्दस्युभयथा ६ । ४ । ८६ इति तन्वमित्यत्र यणादेशः॥ असदित्यत्र यद्वृत्तान्नित्यमिति ८ । १ । ६६ नानुदात्तत्वम्। धातोरिति ६। १। १६२ आगमस्यानुदात्तत्वे धातुस्वरः ॥ ऋग्वेदे तु ३ । ५१ । ११ सोम्यमित्यन्तरम् ॥२॥

भाषार्थः—(सोम्य) हे सोमपानयोग्य राजन्! इन्द्र! (सुते) अभिषुत होने पर (यः) जो सोम (ते) आप के लिये (स्वधाम् अनु) भोजन के साथ (असत्) होवे (सः) वह सोम (त्वा) आप को (ममत्तु) हृष्ट करे और आप (तन्वम्) शरीर को (नियच्छ) नियम से रखिये ॥

मनुष्यों को सोमरस खींचकर राजा के अर्पण करना चाहिये और राजा को उस का सेवन करके व्यायामादि से शारीरिक उन्नति करनी चाहिये॥

अष्टाध्यायी ८ । १। ६६ ॥ ४ । ४ । १३७ ॥ ६ । ४ । ८६ और ६ । १ । १६२ के प्रमाण और ऋ० ३ । ५१ । ११ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ २उ ३ १ २ ३ १ २

प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः।

२ ३ १ २ ३ २

प्र बाहू शूर राधसा ॥ ३ ॥ [१] (७३९)

पदपाठः—प्र अ० । ते ६ । अश्नोतु क्रि० । कुक्ष्योः ७ । प्र । इन्द्र सं० । ब्रह्मणा ३ । शिरः २ । प्र । बाहू २ । शूर सं० । राधसा ३ ॥

अन्वितपदार्थः—(शूर) विक्रान्त! (इन्द्र) राजन्!

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(ते) तव (कुक्ष्योः) उभयोः कुक्षिप्रदेशयोर्मध्ये स सोमः(प्र, अश्नोतु) व्याप्नोतु (ब्रह्मणा) भोजनेनान्नेन सह (शिरः) मूर्धानम् (प्र) प्राश्नोतु (राधसा) धनैश्वर्यादिना (बाहू) भुजौ (प्र) प्राश्नोतु ॥

ब्रह्मेति अन्ननाम निघं० २ । ७ राधइति धननाम निघं० २ । १० ॥ अश्नोतित्यत्र व्यत्ययेन ३ । १। ८५ परस्मैपदम् ऋग्वेदे तु ३ । ५१ । १२ राधसे इत्यन्तरम् ॥ ३ ॥

भाषार्थः—(शूर) वीर ! (इन्द्र) राजन् ! (ते) आप की (कुक्ष्योः) दोनों कोखों में (प्र,अश्नोतु) उक्त सोमरस व्याप जावे (ब्रह्मणा) भोजन के रस के साथ (शिरः) शिर को (प्र) व्याप जावे और (राधसा) धनैश्वर्य के साथ (बाहू) दोनों भुजों को (प्र) व्याप जावे ॥

निघं० २: ७॥ २ । १० अष्टाध्यायी ३ । १ । ८५ के प्रमाण और ऋ०३ । ५१ । १२ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ द्वितीयतृचसूक्तस्य—मधुच्छन्दा ऋषिः । इन्द्रो देवता ।गायत्री छन्दः ॥

तत्र प्रथमा—

२उ ३ १ २ ३१२ ३१र २र
आ त्वे ता निषीदतेन्द्रमभिप्रगायत ।
१ २ ३ १ २
सखायः स्तोमवाहसः ॥१॥ (७४०) व्याख्याता (१६४)

अथ द्वितीया—

३ १२ ३१र २र३ १ २
पुरूतमं पुरूणामीशानं वार्याणाम् ।
२३ २३ १ २ ३२
इन्द्रं सोमे सचा सुते ॥ २ ॥ (७४१)

पदपाठः—पुरूतमम् २ । पुरूणाम् ६ । ईशानम् २ । वार्याणाम् ६ । इन्द्रम् २ । सोमे ७ । सचा अ० । सुते ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—सखाय इत्यनुवर्त्तते। हे सखायः ! (सोमे सुते) सति [आदौ] (पुरूतमम्) पुरून् बहूञ्छत्रूंस्तामयति ग्लापयति तम् (पुरूणाम्) बहूनां (वार्याणाम्) धनादिवरणीयानाम् (ईशानम्) स्वामिनम् (इन्द्रम्) परमेश्वरम् (सचा) संभूय अभिप्रगायतेति पूर्वेण संबन्धः ॥

पुरूतममिति, तमुग्लानौ (दि०प०) इतिधातोर्ण्यन्तादृषचाद्यचि रूपम् ॥ ऋग्वेदे १ । ५ । २ऽपि ॥ २ ॥

भाषार्थः—हे मित्रो ! [यह पूर्वमन्त्र से लेकर] (पुरूतमम्) बहुत शत्रुओं के नाशक (पुरूणाम्) बहुत (वार्याणाम्) धनादि वरणीय पदार्थों के (ईशानम्) स्वामी (इन्द्रम्) परमात्मा को (सोमे सुते) सोम अभिषुत होने पर (सचा) मिलकर [अभिप्रगायत] गाओ ॥ ऋ० १।५।२ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २३ १ २३ २ ३ १र २र
स घा नो योग आभुवत्स राये स पुरन्ध्या ।
२ ३ १ २ ३ १र २र
गमद्वाजेभिरासनः ॥ ३ ॥ [१०] (७४२)

पदपाठः—सः १ । घ अ०। नः ६ । योगे ७ । आभुवत् क्रि० । सः। राये४। सः । पुरन्ध्या ३ । गमत् क्रि० । वाजेभिः ३ । आ अ० । सः । नः २ ॥

अन्वितपदार्थः—हे सखायः ! (सः घ) सएवेश्वरः (नः) अस्माकं (योगे) योगसाधने (आभुवत्) साक्षाद्भवेत् (सः) (राये) धनायानुकूलो भवेत् (सः पुरुन्ध्या) बहुबुद्ध्या [निरु० ६ । १३] तद्दानेनानुकूलो भवेत् (सः) परमेश्वरः (नः) अस्मान् (वाजेभिः) बलैरन्नैर्वा (आगमत्) प्राप्नुयात् ॥

ऋग्वेदे तु १ । ५ । ३ पुरन्ध्यामिति पाठः ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावार्थः—हे मित्रो ! (सः घ) वही ईश्वर (नः) हमारे (योगे) योग-साधन में (आभुवत्) साक्षात् हो, (सः) वही (राये) धन के लिये अनुकूल हो, (सः) वही (पुरन्ध्या) बुद्धि से अनुकूल हो (सः) वही (नः) हम को (वाजेभिः) बलों वा अन्नों से (आगमत्) प्राप्त हो ॥ ऋ० १ । ५ । ३ में पुरन्ध्याम् पाठ है ॥ ३ ॥

अथ तृतीयतृचसूक्तस्य—शुनश्शेप ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २

योगे योगे तवस्तरं वाजे वाजे हवामहे ।

१ २ ३ १ २ ३ १ २

सखाय इन्द्रमूतये ॥ १ ॥ (७४३) व्याख्याता (१६३)

अथ द्वितीया—

१ २ ३ १र २र ३ १ २ ३ १र २र

अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।

२ ३ १ २ ३ २ ३ २

यं ते पूर्व पिता हुवे ॥ २ ॥ (७४४)

पदपाठः—अनु अ० । प्रत्नस्य, ओकसः ६ । हुवे क्रि० । तुविप्रतिम्, नरम्, यम् २ । ते २ । पूर्वम् २ । पिता १ । हुवे ॥

अन्वितपदार्थः—(प्रत्नस्य) पुरातनस्य सनातनस्य (ओकसः) पदस्य मोक्षस्य (अनु नरम्) अनुनेतारम् (तुविप्रतिम्) बहुकालं प्रतिगमयितारम् (ते) त्वाम् (हुवे) स्तौमि (यम्) यं त्वां (पूर्वम्) इतः पूर्वम् (पिता) गुरुर्मम (हुवे) अस्तावीत् ॥

शिष्यप्रशिष्यैर्गुरुपरंपरयेश्वरस्तुतिप्रार्थनोपासनाः कार्या इति भावः ॥ ऋग्वेदे १ । ३० । ९ ऽपि ॥ २ ॥

भावार्थः—(प्रत्नस्य) सनातन (ओकसः) मोक्षपद के (अनु) आनुकूल्य से (नरम्) लेजाने वाले (तुविप्रतिम्) बहुत समय के प्रति पहुं-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चाने वाले (ते) आप को (हुवे) मैं स्तुत करता हूं (यम्) जिस आप को (पूर्वम्) इस से पूर्व (पिता) मेरे गुरु ने (हुवे) स्तुत किया है ॥

शिष्य प्रशिष्यों को गुरुपरम्परा से परमात्मा की स्तुति प्रार्थना उपासना करनी चाहिये । यह भाव है ॥ ऋ० १ । ३० । ९ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३२३ १२ ३१ २३१ २
आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ॥
१२३१२३ १२
वाजेभिरुप नो हवम् ॥ ३ ॥ [११] (७४५)

पदपाठः—आ, घ अ० । गमत् क्रि० । यदि अ० । श्रवत् क्रि० । सहस्रिणीभिः, ऊतिभिः, वाजेभिः ३ । उप अ० । नः ६ । हवम् २ ॥

अन्वितपदार्थः—प्रकरणात्परमेश्वरः (यदि) (नः) अस्माकं (हवम्) स्तुतिमाव्हानं वा (श्रवत्) शृणुयात्स्वीकुर्यात् (घ) तदैव (सहस्रिणीभिः) बह्वीभिः (ऊतिभिः) रक्षाभिः (वाजेभिः) बलैश्च (उप आ गमत्) प्राप्नुयात् ॥ऋग्वेदे १।३०।८ऽपि॥३॥

भाषार्थः—प्रकरण से परमेश्वर (यदि) जो (नः) हमारे (हवम्) स्तोत्र वा पुकार को (श्रवत्) सुनले स्वीकार करले (घ) तो उसी समय (सहस्रिणीभिः) बहुत सी (ऊतिभिः) रक्षाओं और (वाजेभिः) बलों के साथ (उप आ गमत्) हम को प्राप्त होवे ॥ ऋ० १ । ३० । ८ में भी ॥ ३ ॥

अथ चतुर्थंतृचसूक्तस्य—नारद ऋषिः । इन्द्रो देवता । उष्णिक्छन्दः ॥

तत्र प्रथमा—

१ २ ३ २३२ २३ १२ ३क३र
इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थम् ।
३ २ ३२३ १२ ३२
विदे वृधस्य दक्षस्य महां हि षः ॥ १ ॥ (७४६)

व्याख्याता (३८१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

१ २३१ २ ३ २ ३ १२३ २

स प्रथमे व्योमनि देवानां सदने वृधः ।

३ २ ३१२ ३ १२२ ३

सुपारः सुश्रवस्तमः समप्सुजित् ॥ २ ॥ (७४७)

पदपाठः—सः १ । प्रथमे, व्योमनि ७ । देवानाम् ६ । सदने ७ । वृधः, सुपारः, सुश्रवस्तमः, समप्सुजित् १ ।।

अन्वितपदार्थः—(सः) परमेश्वरः (देवानाम्) सूर्यादीनां (सदने) स्थाने (प्रथमे) विस्तीर्णे (व्योमनि) आकाशे (वृधः) महत्त्वेन स्थितः (सुपारः) सुष्ठु पारयति पूरयति भक्तकार्याणि यःसः(सुश्रवस्तमः) अतिप्रशस्तयशाः(समप्सुजित्)सम्यक् कर्मसु [निघं० २। १] जेता कर्मानुकूलफलप्रदः अस्तीति शेषः॥ ऋग्वेदे ८। १३। २ऽपि ॥ २ ॥

भाषार्थः—(सः) वह परमेश्वर (देवानाम्) सूर्यादि के (सदने) स्थान (प्रथमे) विस्तृत (व्योमनि) आकाश में (वृधः) महिमा से स्थित (सुपारः) भक्तों के कार्य भले प्रकार पूरे करने वाला (सुश्रवस्तमः) अत्युत्तम यश वाला (समप्सुजित्) कर्मों में [निघं० २ । १] भले प्रकार जीतने वाला= कर्मानुकूल फलदायी है ॥ ऋ० ८ । १३ ।२ में भी ॥ २ ॥

अथ तृतीया-

१२ ३ १ २ ३ २ ३ १२ ३ १२

तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।

१२ ३१ २२ ३ १ २ ३२

भवा नः सुम्ने अन्तमः सखा वृधे ॥३॥ [१२] (७४८)

पदपाठः—तम् २ । उ अ० । हुवे क्रि० । वाजसातये ४। इन्द्रम् २ । भराय ४ । शुष्मिणम् २ । भव क्रि० । नः ६ । सुम्ने ७ । अन्तमः, सखा १ । वृधे ४ ॥

अन्वितपदार्थः—(वाजसातये) वाजानां बलानां सातिर्लाभो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्मिंस्तस्मै (भराय) कामादिशत्रुभिः संग्रामाय (तम् उ) तमेव (शुष्मिणम्) बलिनम् (इन्द्रम्) परमेश्वरम् (हुवे) आह्वयामि । हे परमेश्वर ! त्वम् (नः) अस्माकं (वृधे) वर्धनाय (सुम्ने) सुखनिमित्ते (अन्तमः) अन्तिकतमः (सखा) सुहृच्च (भव) एधि ॥

वाजसातौ इति भरे इति च संग्रामनाम निघं० २।१७॥ सुम्नमिति सुखनाम निघं० ३ ।६ ॥ अन्तमानामिति अन्तिक-नाम निघं० २।१६ "तमे तादेश्चेति अन्तिकशब्दस्य तादिलोपः" ऋग्वेदे तु ८ । १३ । ३ तमुह्वे इति पाठः ॥ ३ ॥

भाषार्थः—(वाजसातये) बलों का जिस में लाभ है ऐसे (भराय) कामादि शत्रुओं से संग्राम के लिये (तम् उ) उस ही (शुष्मिणम्) महाबली (इन्द्रम्) परमेश्वर को (हुवे) पुकारता हूं कि हे परमेश्वर ! आप (नः) हमारी (वृधे) वृद्धि (सुम्ने) और सुख के निमित्त (अन्तमः) समीपवर्त्ती (सखा) मित्र (भव) हूजिये ॥

निघं० २ । १७ ॥ ३ । ६ ॥ २ । १ के प्रमाण और ऋ० ८ । १३ । ३ का पाठ भेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थेखण्डे प्रगाथस्य प्रथमसूक्तस्य—वामदेव ऋषिः । अग्निर्देवता । बृहती छन्दः ॥तत्र प्रथमा—

३१ २ ३ १ २र ३ १ २र ३१२ ३ १ २र ३ १

एना वो अग्निं नमसोर्जो नपातमाहुवे। प्रियं चेतिष्ठमरतिꣳ

२ ३ १ २र ३२३१२

स्वध्वरं विश्वस्य दूतममृतम् ॥१॥ (७४१) व्याख्याता(४५)

अथ द्वितीया—

१ २ ३२ ३१२ ३ १ २ ३क २र ३१२

स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः। सुब्रह्मा

३२ ३१३ १२ ३२ब ३ १ २

यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥२॥ [१३] (७५०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—सः १। योजते क्रि०। अरुषा, विश्वभोजसा ३। सः। दुद्रवत् क्रि०। स्वाहुतः, सुब्रह्मा, यज्ञः, सुशमी १। वसूनाम् ६। देवम्, राधः २। जनानाम् ६॥

अन्वितपदार्थः—(सः) अग्निः (जनानाम्) यजमानादीनां (वसूनाम्) धनानां (देवम्) उत्तमं (राधः) धनम् (योजते) योजयति। (सः) (स्वाहुतः) सुष्ठु आहुतः (सुब्रह्मा) शोभनो ब्रह्मा यत्र सः (सुशमी) शोभनशम्यादिकाष्ठवान् (यज्ञः) होमः (विश्वभोजसा) विश्वरक्षकेण (अरुषा) तेजसा (दुद्रवत्) दूरं गच्छति॥ ऋग्वेदे ७। १६। २ऽपि॥ २॥

भाषार्थः—(सः) वह पूर्वमन्त्रोक्त अग्नि (जनानाम्) यजमानादि जनों के (वसूनाम्) धनों में (देवम्) उत्तम (राधः) धन को(योजते) युक्त करता है। (सः) वह (स्वाहुतः) अच्छे प्रकार आहुति दिया हुवा (सुब्रह्मा) उत्तम ब्रह्मावाला (सुशमी) शोभन शमी आदि काष्ठ वाला (यज्ञः) होम (विश्वभोजसा) संसार के रक्षक (अरुषा) तेज से (दुद्रवत्) दूर तक जाता है॥

ऋ० ७। १६। २ में भी॥ २॥

अथ प्रगाथस्य द्वितीयसूक्तस्य—वसिष्ठ ऋषिः। उषा देवता। बृहती छन्दः॥

तत्र प्रथमा—

१ २ ३ २ १ २ ३ २ ३ २ १ २

प्रत्यु अदर्श्यायत्यू ऽ ३ ऽ इच्छन्ती दुहिता दिवः। अपो

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २

मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी॥१॥(७५१)

व्याख्याता (३०३)

अथ द्वितीया—

२ ३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ २

उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्तत्रमर्चिवत्।

१ २ २ ३ २ ३ १ २ ३ २ ३ १ २

तवेदुषो व्युषि सूर्यस्य च संभक्तेन गमेमहि॥२॥[१४](७५२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—उत् अ० । उस्रियाः २ । सृजते क्रि० । सूर्यः १ । सचा अ० । उद्यन् १ । नक्षत्रम् १ । अर्चिवत् १ । तव ६ । इत् अ० । उषः सं० । व्युषि ७ । सूर्यस्य ६ । च अ० । सम् अ० । भक्तेन ३ । गमेमहि क्रि० ॥

अन्वितपदार्थः—(सूर्यः) प्रसिद्धः (उद्यन्) उदयं गच्छन् (नक्षत्रम्) नक्षत्रसंज्ञः (अर्चिवत्) अर्चिष्मान् अस्तीति शेषः । स च (सचा) युगपदेव (उस्रियाः) किरणान् (उत् सृजते) उद्गमयति । तथा च—(उषः) प्रभातबेले ! (तव सूर्यस्य च) (व्युषि) प्रकाशे (इत्) एव वयं (भक्तेन) अन्नेन (संगमेमहि) संगच्छेमहि ॥

मनुष्यैः सर्वदा प्रकाशे एव भोजनं कर्त्तव्यं नान्धकारे इति भावः ॥ "सौरेण तेजसा हि नक्तं चन्द्रप्रभृतीनि नक्षत्राणि भासन्ते" इति सायणः ॥ ऋग्वेदे तु ७ । ८१ । २ सचाँ इति पाठः ॥२॥

भाषार्थः—(सूर्यः) सूर्यलोक (उद्यन्) सदा उदित (नक्षत्रम्) नक्षत्र और (अर्चिवत्) किरणों वाला है । और वह (सचा) एक साथ ही (उस्रियाः) किरणों को (उत् सृजते) ऊपर को छोड़ता है । तथा च—(उषः) प्रभात बेला ! हम (तव) तेरे (च) और (सूर्यस्य) सूर्य के (व्युषि) प्रकाश में (इत्) ही (भक्तेन) अन्न से (संगमेमहि) समागम करें ॥

मनुष्यों को सदा सूर्यादि के प्रकाश में ही भोजन करना चाहिये, अन्धकार में नहीं । यह तात्पर्य है ॥ सायणाचार्य ने इस के भाष्य में लिखा है कि " सूर्य के तेज से ही रात्रि में चन्द्रादि नक्षत्र चमकते हैं " इस से पाया जाता है कि सायण तक हमारे देशवासी इस बात को वेदादि शास्त्रानुसार जानते, मानते रहे ॥ ऋ० ७ । ८१ । २ में सचाँ पाठ है ॥ २ ॥

अथ प्रगाथस्य तृतीयसूक्तस्य—वसिष्ठ ऋषिः । अश्विनौ देवते । बृहती छन्दः ॥

तत्र प्रथमा—

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना । अयं वामह्वेऽवसे

३ १ २ ३ १र २र
शचीवसू विशं विशं हि गच्छथः ॥१॥(७५३)व्याख्याता(३०४)

अथ द्वितीया—

३२ ३१ २ ३ १ २ ३ १ २ ३ १ २ ३ २उ ३
युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते । अर्वाग्रथं
१ २ ३ १ २ ३ १ २ ३ १ २र
समनसा नियच्छतं पिबतं सोम्यं मधु ॥२॥[१५](७५४)

पदपाठः— युवम् १ । चित्रम् २ । ददथुः क्रि० । भोजनम् २ । नरा सं० । चोदेथाम् क्रि० । सूनृतावते ४ । अर्वाक् अ० । रथम् २ । समनसा सं० । नियच्छतम्, पिबतम् क्रि० । सोम्यम्, मधु २ ॥

अन्वितपदार्थः— (नरा) सर्वस्य जगतो नेतारौ ! सूर्याचन्द्रमसौ ! (समनसा) समानमनस्कौ ! (युवम्) युवाम् (सूनृतावते) वेदोक्तवाग्वते याज्ञिकाय (चित्रम्) अद्भुतम् (भोजनम्) (ददथुः) दत्थः (चोदेथाम्) प्रेरयथ कर्मणि लोकम् (अर्वाक्) लोकाभिमुखम् (रथम्) स्वीयं रमणीयं स्वरूपम् (नियच्छतम्) नियमेन प्रापयथः तौ युवां (सोम्यम्) सोमसम्बन्धि (मधु) रसम् (पिबतं) गृह्णीयातम् ॥

सूर्याचन्द्रमसौ हि शीतोष्णाध्यां जगतो निर्वाहकौ । मनुष्यादीनां मनांसि यथाऽन्तःसारभूतानि तथैव सूर्याचन्द्रमसोरपि अन्तःसारस्य मनः संज्ञाऽवगन्तव्या। सूर्याचन्द्रमसौ हि नानौषधिवनस्पत्यादिरूपं भोजनं मनुष्यादिभ्यो दत्तः । लोकस्य कर्मणि प्रवर्त्तकौ च प्रकाशकरत्वात् । तौ च सोमाद्योषधिहारा यजनेन तद्रसग्राहकौ सन्तौ प्रजाया महान्तमुपकारं साधुतः ॥ ऋग्वेदे ७ । ७४ । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावार्थः—(नरा) सब जगत् के नेता ! (सनसा) सनातन मन वाले सूर्य और चन्द्रमा ! (युवम्) तुम दोनों (सूनृतावते) वैदिकवाणीवाले यज्ञानुष्ठानसंपन्न पुरुष के लिये (चित्रम्) अनेक प्रकार का (भोजनम्) भोजन (ददथुः) देते हो, (चोदेथाम्) कर्म में प्रवृत्त करते हो, (अर्वाक्) जगत् के सामने (रथम्) अपने रमणीय स्वरूप को (नियच्छतम्) नियमपूर्वक लाते हो। सो तुम दोनो (सोम्यम्) सोम का (मधु) रस (पिबतम्) शोषण करो ॥

सूर्यचन्द्रमा शीतोष्ण से जगत् को निर्वाहक हैं। ओषधि वनस्पत्यादि रूप भोजन सब के लिये देते हैं। प्रकाश से जगत् को व्यापार में प्रवृत्त करते हैं और सोमादि ओषधियों के रस को पीकर जगत् का उपकार करते हैं। जिस प्रकार मनुष्यादि के भीतरी बलसाधन का नाम मन है, इसी प्रकार सूर्य चन्द्र के आन्तरिक बलसाधन को यहां मन जानिये। ऋ० ७।७४। २ में भी ॥२॥

अथ पञ्चमे खण्डे प्रथमस्य तृचसूक्तस्य—अवत्सार ऋषिः। सोमो देवता। गायत्री छन्दः ॥ तत्र प्रथमा—

३ २ ३ २३ ३ १ २ ३१ २ ३ १ २

अस्य प्रत्नामनु द्युतꣳ शुक्रं दुदुह्रे अह्रयः।

१ २ ३१र २र

पयः सहस्रसामृषिम् ॥ १ ॥ (७५५)

पदपाठः—अस्य ६। प्रत्नाम् २। अनु अ०। द्युतम् २। शुक्रम् २। दुदुह्रे क्रि०। अह्रयः १। पयः, सहस्रसाम्, ऋषिम् २।

अन्वितपदार्थः—(अस्य) सोमस्य (प्रत्नाम्) पुरातनीं (द्युतम्) दीप्तिम् (अनु) लक्षीकृत्य (अह्रेयः) कवय ऋत्विजः (शुक्रम्) उज्ज्वलम् (सहस्रसाम्) बहुभिर्भजनीयम् (ऋषिम्) बुद्धिवर्धकम् (पयः) दुग्धम् (दुदुह्रे) दुहन्ति ॥

सहस्रसामिति—जनसनखनक्रमगमो विट् ३। २। ६७ इति विट् प्रत्यये, विड्वनोरनुनासिकस्यात् ६। ४। ४१ इत्याकारे, वेरपृक्तस्य ६। १। ६७ इतिवेर्लोपे रूपम् ॥ ऋग्वेदे ९। ५४। १ ऽपि तथा यजुर्वेदे ३। १६ ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(अस्य) इस सोम की (प्रत्नाम्) पुरातन (द्युतम्) चमक को (अनु) पहचान कर (अहयः) विद्वान् ऋत्विज् (शुक्रम्) श्वेत (सहस्रसाम्) बहुतों के सेवनीय (ऋषिम्) बुद्धिवर्धक (पयः) दुग्ध को (दुदुह्रे) दुहते हैं ॥

अष्टाध्यायी ३ । २ । ६७ ॥ ६ । ४ । ५१ ॥ ६ । १ । ६७ के प्रमाण संस्कृत भाष्य में देखिये ॥ यजुः ३ । १६ ऋ० ९ । ५४ । १ में भी ॥ १ ॥

अथ द्वितीया—

३१ २१र ३२३१र २र

अयꣳ सूर्यइवोपदृगयꣳ सराꣳसि धावति ।

३ २३२र३ १र २र

सप्त प्रवत आदिवम् ॥ २ ॥ (७५६)

पदपाठः—अयम् १ । सूर्यइव अ० । उपदृक् १ । अयम् १ । सरांसि २ । धावति क्रि० । सप्त, प्रवतः २ । आ अ० । दिवम् २ ॥

अन्वितपदार्थः—(अयम्) सोमः (सूर्यइव) सूर्यसमः (उपदृक्) चक्षुःसहायकः (अयम्) सोमः (सरांसि) त्रिंशदुक्थपात्राणि अथवा त्रिंशदहानि मासस्य तान्येव सरांस्यत्रोच्यन्ते तानि तथा (सप्त) सप्तसंख्याकाः (प्रवतः) नदीरिव भूरादीन् सप्त (आदिवम्) द्युलोकपर्यन्तम् (धावति) गच्छति ॥

तत्रैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधानेन पिबन्ति तान्यत्र सरांस्युच्यन्ते । त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्तास्तद्या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्ति । तथापि निगमो भवति—यमक्षितिमक्षितयः पिबन्तीति । तं पूर्वपक्ष आप्याययन्ति । तथापि निगमो भवति—यथा देवा अंशुमाप्याययन्तीति । निरु० ५ । ११ ॥ ऋ० १ । ५४ । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(अयम्) यह सोम (सूर्यइव) सूर्य सा (उपदृक्) नेत्रसहायक है। (अयम्) यह सोम (सरांसि) ३० उक्थ पात्रों अथवा महीने के ३० दिनों को तथा (सप्त) सात ७ (प्रवतः) नदियों रूप भूरादिकों को (आदिवम्) द्युलोकपर्यन्त (धावति) जाता है ॥

निरुक्तकार यास्क ५।११ में कहते हैं कि—"याज्ञिक लोग तो सरांसि पद से ३० उक्थपात्रों का अर्थ बतलाते हैं जोकि माध्यन्दिन सवन में एक देवता वाले होते हैं और जिन को उस समय में एक प्रतिधान से पीते हैं। तथा नैरुक्तों की यह सम्मति है कि ३० अपरपक्ष के अहोरात्र और ३० पूर्वपक्ष के अहोरात्र हैं। जोकि चन्द्रमा से आने वाले जल हैं, उन को किरणें अपरपक्ष में पीती हैं। तथा हि—(यमक्षि०) यह वेद में कहा है। उस को पूर्वपक्ष में आप्यायित करती हैं, जैसाकि—(यथा देवाः) वेद में कहा है" ॥ ऋ० ९। ५४। २ में भी ॥ २ ॥

अथ तृतीया—

३ १र २र ३ १र २र३१ २

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।

१ २ ३१र २र

सोमो देवो न सूर्यः ॥३॥ [१६] (७५७)

पदपाठः—अयम् १। विश्वानि २। तिष्ठति क्रि०। पुनानः १। भुवना २। उपरि अ०। सोमः, देवः १। न अ०। सूर्यः १ ॥

अन्वितपदार्थः—(अयम्) सोमः (विश्वानि) सर्वाणि (भुवना) भुवनानि (पुनानः) पवित्रयन् (उपरि) आकाशे (तिष्ठति। दृष्टान्तः—(न) यथा (देवः) प्रकाशमानः (सूर्यः) आदित्यः सर्वाणि भुवनानि किरणैः शोधयन् तिष्ठति तद्वत् ॥ ऋग्वेदे ९। ५४। ३ ऽपि ॥ ३ ॥

भाषार्थः—(अयम्) यह सोम (विश्वानि) सब (भुवना) भुवनों को (पुनानः) शुद्ध करता हुवा (उपरि) आकाश में (तिष्ठति) स्थित होता है (न) जैसे (देवः) प्रकाशमान (सूर्यः) सूर्य सब भुवनों को किरणों से शोधता हुवा स्थित है ॥ ऋ० ९। ५४। ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीयतृचसूक्तस्य—असितः काश्यपोऽमहीयुर्वा ऋषिः ।
सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३२ ३२३ १ २ ३२ ३१ २ ३२
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
१२ ३१२
हरिः पवित्रे अर्षति ॥ १ ॥ (७५८)

पदपाठः—एषः १ । प्रत्नेन ३ । जन्मना ३ । देवः १ । देवेभ्यः ४ । सुतः १ । हरिः १ । पवित्रे ७ । अर्षति क्रि० ॥

अन्वितपदार्थः—(हरिः) हरितवर्णः (एषः) सोमः (प्रत्नेन) पुरातनेन (जन्मना) जननेन (सुतः) अभिषुतः (देवः) द्योतमानः (पवित्रे) दशापवित्रेऽधिकृतः (देवेभ्यः) वाय्वादिभ्यः (अर्षति) गच्छति ॥ ऋग्वेदे ९ ।३ । ९ ऽपि ॥१॥

भाषार्थः—(हरिः) हरित वर्ण (एषः) यह सोम (प्रत्नेन) प्राचीन (जन्मना) जन्म से (सुतः) अभिषुत किया हुवा (देवः) द्योतमान (पवित्रे) दशापवित्र पर रक्खा हुवा (देवेभ्यः) वायु आदि देवों के लिये (अर्षति) प्राप्त होता है ॥ ऋ० ९ । ३ । ९ में भी ॥ १ ॥

अथ द्वितीया—

३२ ३२३ १ २ ३२ ३२ ३ १ २
एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ।
३ १र २र
कविर्विप्रेण वावृधे ॥ २ ॥ (७५९)

पदपाठः—एषः १ । प्रत्नेन ३ । मन्मना ३ । देवः १ । देवेभ्यः ४ । परि अ० । कविः १ । विप्रेण ३ । वावृधे क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(एषः) सोमः (प्रत्नेन) प्राचीनेन (मन्मना) ज्ञानसाधनेन (देवः) द्योतमानः (कविः) बुद्धि-तत्त्वोद्बोधकः (विप्रेण) विदुषा ऋत्विजा (देवेभ्यः) वाय्वादिभ्यः (परि वावृधे) परितो वर्धते ॥ ऋग्वेदे तु ९ । ४२ । २ धारया पवते सुतः इति तृतीयः पादः ॥ २ ॥

भाषार्थः—(एषः) यह सोम (प्रत्नेन) पुराणे (मन्मना) ज्ञानसाधन से (देवः) प्रकाशमान (कविः) बुद्धि तत्त्व का उभारने वाला (विप्रेण) विद्वान् ऋत्विज् से (देवेभ्यः) वायु आदि के लिये (परि वावृधे) सब ओर बढ़ता है।। ऋ० । ९ ।४२। २ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २॥

अथ तृतीया—

३ २ ३ १ र २ र ३ ३ ३ १ २
दुहानः प्रत्नमित्पयः पवित्रे परिषिच्यसे ।
१ २ ३ १ २
क्रन्दन्देवाँ अजीजनः ॥ ३ ॥ [१७] (७६०)

पदपाठः—दुहानः १ । प्रत्नम् २ । इत् अ० । पयः २ । पवित्रे ७ । परि-षिच्यसे क्रि० । क्रन्दन् १ । देवान् २ । अजीजनः क्रि० ॥

अन्वितपदार्थः—(प्रत्नम् इत्) प्राचीनमेव (पयः) रसं (दुहानः) सन् (पवित्रे) दशापवित्रे (परिषिच्यसे) परितो धार्यसे। (क्रन्दन्) अग्नौ हुतश्चिटचिटाशब्दं कुर्वन् (देवान्) वाय्वादीन् (अजीजनः) जनयसि ॥ ऋग्वेदे तु ९ । ४२ ।३ प्रथम पुरुषप्रयोगः ॥ ३ ॥

भाषार्थः—(प्रत्नम्) पुराणे (इत्) ही (पयः) रस को (दुहानः) पूर्ण करता हुवा सोम (पवित्रे) दशापवित्र पर (परिषिच्यसे) सर्वतः सेचन किया जाता है । (क्रन्दन्) अग्नि में पड़ने से चटचट करता हुवा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(देवान्) वायु आदि देवों को(अजीजनः) जनता है ॥ ऋ० ९ । ४२ । ३ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ तृतीयतृचसूक्तस्य—ऋष्यादयः पूर्ववत् ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
उपशिक्षापतस्थुषो भियसमाधेहि शत्रवे ।
१ २ ३ २ १ २
पवमान विदा रयिम् ॥ १ ॥ (७६१)

पदपाठः—उपशिक्ष क्रि० । अपतस्थुषः २ । भियसम् २ । आधेहि क्रि० । शत्रवे ४ । पवमान सं० । विदाः क्रि० । रयिम् २ ॥

अन्वितपदार्थः—(पवमान) सोम ! (अपतस्थुषः) विरोधे स्थितान्शत्रून् (उपशिक्ष) दण्डेन शिक्षय (शत्रवे) (भियसम्) भयम् (आधेहि) (रयिम्) धनम् (विदाः) विजयेन लम्भय ॥

सोमसेविनां वीराणां शत्रुनाशो राज्यश्रीलाभश्च संजायते इति भावः ॥ ऋग्वेदे ९ । १९ । ६ ऽपि ॥ १ ॥

भाषार्थः—(पवमान) सोम ! (अपतस्थुषः) विरोध में खड़े होने वालों को (उपशिक्ष) दण्ड से शिक्षा दे (शत्रवे) शत्रु के लिये (भियसम्) भय (आधेहि) रख (रयिम्) और राज्यलक्ष्मी का (विदाः) लाभ करा ॥

सोम सेवन करने वाले वीरों के शत्रुओं का नाश और राज्यलक्ष्मी की प्राप्ति होती है ॥ ऋ० ९ । १९ । ६ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३
उपोषुजातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
१ २ ३ १ २
इन्दुं देवा अयासिषुः ॥२॥ (७६२) व्याख्याता (४८७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

१ २ ३ १२ ३१ २ ३ २ ३१

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ

२र

इयक्षते ॥३॥ [१८] (७६३) व्याख्याता (६५१)

अथ षष्ठे खण्डे प्रथमर्चसूक्तस्य—श्यावाश्व ऋषिः । सोमो देवता ।

गायत्री छन्दः ॥ तत्र प्रथमा—

१ २र ३ २ ३ १ २ ३ १ २

प्र सोमासो विपश्चितोऽपोनयन्त ऊर्मयः ।

१ २ ३ १ १

वनानि महिषा इव ॥ १ ॥ (७६४) व्याख्याता (४७८)

अथ द्वितीया—

३ १ २र ३ १ ३ ३ २ ३ २ ३ १ ३

अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।

२ ३ १ २

वाजं गोमन्तमक्षरन् ॥ २ ॥ (७६५)

पदपाठः—अभि अ० । द्रोणानि २ । बभ्रवः, शुक्राः १ । ऋतस्य ६ । धारया ३ । वाजम्, गोमन्तम् २ । अक्षरन् क्रि० ॥

अन्वितपदार्थः—(बभ्रवः) पीतवर्णाः (शुक्राः) दीप्ताः सोमाः (ऋतस्य) यज्ञस्य (धारया) परिणतया वृष्ट्या (गोमन्तम्) इन्द्रियवन्तम् (वाजम्) बलमन्नं वा (द्रोणानि) द्रोणोपलक्षितबहुपरिमाणयुक्तम् (अभि अक्षरन्) अभितो वर्षयन्ति ॥ ऋग्वेदे १ । ३३ । २ ऽपि ॥ २ ॥

भाषार्थः—(बभ्रवः) पीतवर्ण पके हुवे (शुक्राः) चमकीले सोम (ऋतस्य) यज्ञ की (धारया) परिणामरूप वर्षा से (गोमन्तम्) इन्द्रिययुक्त (वाजम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बल वा अन्न को (द्रोणानि) घौनों अर्थात् मणों वा बहुत (अभिअक्षरन्) सर्वतः वर्षाते हैं ।। ऋ० ९ । ३३ । २ में भी ।। २ ।।

अथ तृतीया—

२ १ २र ३ २ ३ १ २ ३ १ २

सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

१ २ ३ १ २

सोमा अर्षन्तु विष्णवे ॥३॥ [१९] (७६६)

पदपाठः—सुताः १ । इन्द्राय, वायवे, वरुणाय, मरुद्भ्यः ४ । सोमाः १ । अर्षन्तु क्रि० । विष्णवे ४ ॥

अन्वितपदार्थः—(सुताः) अभिषुताः (सोमाः) प्रसिद्धाश्चतुर्विंशतिप्रकाराकाः (इन्द्राय) वृष्टिकर्त्रे देवाय (वायवे) मारुताय (वरुणाय) जलाय (मरुद्भ्यः) ऋत्विग्भ्यः [निघं० ३ । १८] (विष्णवे) सूत्रात्मने वायवे च (अर्षन्तु) गच्छन्तु ऋग्वेदे तु ९ । ३३ । ३ अर्षन्तीति पाठः ॥ ३ ॥

भाषार्थः—(सुताः) खींचे हुवे (सोमाः) प्रसिद्ध २४ प्रकार के सोम (इन्द्राय) इन्द्र (वायवे) वायु (वरुणाय) जल (मरुद्भ्यः) ऋत्विजों [निघं० ३ । १८] और (विष्णवे) व्यापक सूत्रात्मा वायु के लिये (अर्षन्तु) यज्ञद्वारा जावें ।। ऋ० ९ । ३३ । ३ में अर्षन्ति पाठ है ।। ३ ।।

अथ प्रगाथात्मकद्वितीयसूक्तस्य—भरद्वाजादयः सप्त ऋषयः ।
सोमो देवता । बृहती छन्दः ।। तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १र २र ३ १र

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा । अंशोः पयसा मदिरो

२र ३ २ ३ १ २ ३ १ २

न जागृविरच्छा कोशं मधुश्चुतम् ॥१॥ (७६७) व्याख्याता (५१४)

अथ द्वितीया—

१ २ ३ १र २र ३ १ २ ३ २ ३ १र २र १ २

आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः । तमीं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ २ ३ १ २ ३ १र २र

हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥२॥ [२०] (७६८)

पदपाठः—आ० अ० । हर्यतः, अर्जुनः १। अत्के ७ । अव्यत क्रि० । प्रियः, सूनुः १ । न अ० । मर्ज्यः १ । तम् २ । ईम् अ० । हिन्वन्ति क्रि० । अपसः १ । यथा अ० । रथम् २ । नदीषु ७ । आ अ० । गभस्त्योः ६ ॥

अन्वितपदार्थः—(हर्यतः) स्पृहणीयः (अर्जुनः) श्वेतवर्णः (प्रियः) प्रीतिकृत् (मर्ज्यः) मार्जनीयः (सूनुः न) पुत्रइव सोमः (अत्के) निक्के प्रक्षालिते सति (आ अव्यत) आ वृणोति(तम् ईम्) तमेनं सोमम् (नदीषु) नदमानासु वसतीवरीषु (गभस्त्योः) बाह्वोः अङ्गुलयः (आहिन्वन्ति) प्रेरयन्ति । तत्र दृष्टान्तः—(अपसः) कर्मवन्तो वेगवन्तः शूराः (यथा) येन प्रकारेण (रथम्) रथं संग्रामेषु प्रेरयन्ति तद्वत् ॥

इत्थमेव पदार्थः सायणेनाऽपि सम्मानितः ॥ अत्के सोमे प्रक्षालिते इति विवरणकारः ॥ हर्यत इति हर्यतेःकान्तिकर्मणः निघं० २ । ६ ॥ गभस्ती इति बाह्वोर्नाम निघं० २ । ४ ॥अप इति कर्मनाम निघं० २ । १ आऽव्यत=आवृणोति इति सायणोऽपि ॥ ऋग्वेदे तु ९ । १०७ । १३ अर्जुने इति पाठः॥ २ ॥

भाषार्थः—(हर्यतः) इच्छा करने योग्य (अर्जुनः) श्वेत रङ्ग का (प्रियः) प्यारा (मर्ज्यः) शोधने योग्य (सूनुः न) पुत्र सा सोम (अत्के) पखालने पर (आ अव्यत) लिथड़ जाता है (तम् ईम्) उस इस सोम को (नदीषु) नाद करते हुए वसतीवरी नामक जलों में (गभस्त्योः) दोनों भुजाओं की अङ्गुलियें (आहिन्वन्ति) चलाती हैं । इस में दृष्टान्त—(यथा) जैसे (अपसः) शूरवीर लोग (रथम्) रथ को संग्रामों में चलाते हैं तद्वत् ॥

सायण, विवरणकार, निघं० २ । ४, २ । ६ के प्रमाण और ऋ० ९ । १०७ । १३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयतृचसूक्तस्य—प्रयावाश्व ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २र ३ २ ३ १ २ ३ १ ३
प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
३ २ ३ १ २
सुता विदथे अक्रमुः ॥१॥ (७६१) व्याख्याता (४७७)

अथ द्वितीया—

१ २ ३ १ २र ३ १ २ ३ २
आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् ।
२ ३ १ २र
अत्यो न गोभिरज्यते ॥ २ ॥ (७७०)

पदपाठः—आत्, ईम् अ० । हंसः १ । यथा अ० । गणम् २ । विश्वस्य ६ । अवीवशत् क्रि० । मतिम् २ । अत्यः १ । न अ० । गोभिः ३ । अज्यते क्रि० ॥

अन्वितपदार्थः—(आत्) अपि च (ईम्) अयं सोमः (यथा हंसः) येन प्रकारेण आदित्यः (गणम्) लोकसमूहम् वशं नयति तद्वत् (विश्वस्य) सर्वस्य जगतः (मतिम्) बुद्धिम् (अवीवशत्) वशं नयति । (अत्यः) अश्वः (न)इव (गोभिः) रश्मिभिः प्रग्रहैः (अज्यते) वशं नीयते तद्वदयं सोमोऽपि अङ्गुलिभिः प्रग्रहभूतैः स्वायत्तीक्रियते ॥

हंसः आदित्यः इति विवरणकारः । भानुर्हंसः सहस्त्रांशुरित्यमरः १।३। ३१॥ अत्य इत्यश्वनाम निघं० १।१४॥ गाव इति रश्मिनाम निघं० १ । ५ ॥ ऋग्वेदे ९ । ३२ । ३ ऽपि॥२॥

भाषार्थः—(आत्) और (ईम्) यह सोम (यथा) जैसे (हंसः) सूर्य (गणम्) लोकसमूह को वश में करता है वैसे (विश्वस्य) सब की (मतिम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बुद्धि को (अवीवशत्) वश में करता है । (अत्यः न) अश्व के समान (गोभिः) लगामों के तुल्य अङ्गुलियों से (अज्यते) वश में किया जाता है ।।

विवरणकार, अमर १ । ३ । ३१, निघं० १ । १४, १ । ५ के प्रमाण संस्कृत भाष्य में देखिये ।। ऋ० ९ । ३२ । ३ में भी ।। २ ।।

तत्र तृतीया–

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २

आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।

२ २ १ २ ३ १ २

इन्दुमिन्द्राय पीतये ॥ ३ ॥ [२१] (७७१)

पदपाठः–आत्, ईम् अ० । त्रितस्य ६ । योषणः १ । हरिम् २ । हिन्वन्तिक्रि० । अद्रिभिः ३ । इन्दुम् २ । इन्द्राय४=६ । पीतये ४ ।।

अन्वितपदार्थः—(आत्) अपि च (ईम्) इमं (हरिम्) हरितवर्णम् (इन्दुम्) सोमम् (त्रितस्य) विद्याशिक्षाब्रह्मचर्यान्वितस्यर्त्विजः (योषणः) मिश्रणकर्त्र्योऽङ्गुलयः (इन्द्राय) इन्द्रस्य विद्युतः (पीतये) पानाय शोषणाय (अद्रिभिः) ग्रावभिः (हिन्वन्ति) अभिषुण्वन्ति ॥

त्रित इति–त्रीन्विद्याशिक्षाब्रह्मचर्याख्यान्विषयांस्तनोति स त्रितः, त्र्युपपदात्तनोतेरौणादिको डः । त्रितस्तीर्णतमोमेधया निरु० ४ । ६ ॥ योषणोऽङ्गुलय इति सायणः ॥ ऋग्वेदे ९ । ३३ । २ ऽपि ॥ ३ ॥

भाषार्थः–(आत्) और (ईम्) इस (हरिम्) हरे (इन्दुम्) सोमको (त्रितस्य) १ विद्या २ शिक्षा ३ ब्रह्मचर्य युक्त ऋत्विज् की (योषणः) मिलाने वाली अङ्गुलियें (इन्द्राय) वृष्टिकारक विद्युद्विशेष के (पीतये) पीने= शोषण के लिये (अद्रिभिः) पत्थरों से (हिन्वन्ति) अभिषुत करती हैं ।।

त्रित शब्द पर व्याकरण, निरुक्त ४ । ६ इत्यादि प्रमाण संस्कृत भाष्य में देखिये ।। ऋ० ९ । ३२ । २ में भी ।। ३ ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थर्चसूक्तस्य प्रथमायाः—श्यावाश्व ऋषिः । सोमो देवता । उष्णिक्छन्दः ॥

३ १ २ ३१२ २२ १२ ३ १ २
अया पवस्व देवयूरेभन्पर्येषि विश्वतः ।
२ ३ १ २
मधोर्धारा असृक्षत ॥ १ ॥ (७७२)

पदपाठः—अया ३ । पवस्व क्रि० । देवयुः १ । रेभन् १ । पर्येषि क्रि० । विश्वतः अ० । मधोः ६ । धाराः २ । असृक्षत क्रि० ॥

अन्वितपदार्थः—(देवयुः) वाय्वादिदेवान्कामयमानः सोमः (अया) अनया हूयमानया धारया (पवस्व) पवतेक्षरति । ततः (रेभन्) चटचटाशब्दं कुर्वन् (विश्वतः) सर्वतः (पर्येषि) परिगच्छति । ततः (मधोः) रसस्य (धाराः) (असृक्षत) सृजति ॥

एतदादितिसृणामृचां पदकारनये,विवरणकारमते,मूले,गानग्रन्थे चैकमेव सूक्तं,परं सायणाचार्येणैकर्चानि त्रीणि सूक्तानि लिखितानि दृश्यन्ते । ऋग्वेदे तु १ । १०६ । १४ अया पवस्व देवयुर्मधोर्धारा असृक्षत । रेभन्पवित्रं पर्येषि विश्वतः इति पाठः ॥१॥

भाषार्थः—(देवयुः) देव=वायु आदि को चाहने वाला सोम (अया) इस हवन की जाती हुई धारा से (पवस्व) टपकता है । फिर (रेभन्) शब्द करता हुआ (विश्वतः) सब ओर को (पर्येषि) फैलता है । अनन्तर (मधोः) रस की (धाराः) धारों को (असृक्षत) छोड़ता है ॥

यहां से लेकर अध्यायान्त ३ ऋचाओं का—पदकार, विवरणकार, मूल और गानग्रन्थ के मतों से १ ही सूक्त देखा जाता है, परन्तु सायणाचार्य ने तीनों ऋचाओं के पृथक् २ एक २ ऋचा का एक २ सूक्त करके ३ सूक्त लिखे हैं। ऋ० ९ । १०६ । १४ का पाठान्तर संस्कृत भाष्य में देखिये ॥१॥

अथ द्वितीयायाः—प्रजापतिर्ऋषिः । छन्दोदेवते उक्ते ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३ १उ ३२३ १२ ३ १ २
पवते हर्यतो हरिरति ह्वराꣳसि रꣳह्या ।
३क २र ३ १ २ ३२३१२
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः॥२॥(७७३) व्याख्याता(५७६)

अथ तृतीयायाः—अम्बरीष ऋषिः । सोमो देवता । अनुष्टुप्छन्दः ॥

१ २ ३ १र २र ३ २ ३ १२३ १र २र
प्र सुन्वायान्धसो मर्तो नवष्ट तद्वचः ।
३ १ २ ३१२ ३२ ३१र २र
अप श्वानमराधसꣳ हतामखं न भृगवः॥३॥[२२](७७४)

इति द्वितीयोर्धप्रपाठकः प्रथमश्च प्रपाठकः समाप्तः ॥१॥

व्याख्याता (५५३)

त्रिवृत्स्तौमिकं प्रथममहः समाप्तमिति विवरणकारः ॥

इति

श्रीमत्कण्ववंशावतंस पण्डित हज़ारीलालस्वामिसूनुना

हस्तिनापुरपार्श्ववर्त्ति—परीक्षितगढ़ निवासिना

तुलसीरामस्वामिना

कृते सामवेदभाष्ये उत्तरार्चिके द्वितीयोऽध्यायः ॥

भाषार्थः—इस की व्याख्या (५५३) में की गई ॥

द्वितीयार्धप्रपाठक और प्रथम प्रपाठक समाप्त हुवा ॥ १ ॥

विवरणकार कहते हैं कि त्रिवृत् स्तौमिक नामक प्रथम दिन समाप्त हुवा ।

यह

कण्ववंशावतंस श्रीयुत पं० स्वामी हज़ारीलाल के पुत्र परीक्षितगढ़

(ज़िला—मेरठ)-निवासी तुलसीराम स्वामिकृत

सामवेदभाष्य उत्तरार्चिक में

द्वितीयाध्याय समाप्त हुवा ॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयाऽध्यायः ॥

तत्र—

पञ्चर्चात्मके प्रथमखण्डे प्रथमर्चसूक्तस्य—शमदग्निर्ऋषिः ।
पवमानः सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ १र २र ३ १ २३ १ २
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।
३ १ २र १ २
अभि विश्वानि काव्या ॥ १ ॥ (७७५)

पदपाठः—पवस्व क्रि० । वाचः २ । अग्रियः १ । सोम सं० । चित्राभिः, ऊतिभिः ३ । अभि अ० । विश्वानि २ । काव्या २ ॥

अन्वितपदार्थः—(सोम) हे शान्तस्वरूप ! परमात्मन् ! (अग्रियः) सर्वेभ्यो मुख्यस्त्वं (विश्वानि) सर्वाणि (काव्या) काव्यरूपाणि स्तोत्राणि (वाचः) प्रार्थनाश्च (चित्राभिः) अनेकविधाभिः (ऊतिभिः) रक्षाभिः (अभिपवस्व) सर्वतः पवित्रीकुरु ॥

इदानीं द्वितीयमहरारभ्यते, द्वितीयश्च प्रपाठकः । पञ्चदशस्तौमिकं द्वितीयमहः इति विव० ॥ ऋग्वेदे ९।६२।२५ऽपि ॥१॥

भाषार्थः—(सोम) हे शान्तस्वरूप ! परमात्मन् ! (अग्रियः) सब में मुख्य आप (विश्वानि) सब (काव्या) स्तोत्रों और (वाचः) प्रार्थनाओं को (चित्राभिः) अनेक प्रकार की (ऊतिभिः) रक्षाओं से (अभि) सर्वतः (पवस्व) पवित्र कीजिये ॥

विवरणकार लिखते हैं कि—अब द्वितीय दिन का आरम्भ होता है और दूसरे ही प्रपाठक का । पञ्चदश स्तोम का दूसरा दिन होता है ॥ ऋ० ९ । ६२ । २५ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २ ३ १ २ ३ २ २।१र २र ३ १ २
त्वꣳसमुद्रिया अपोऽग्रियो वाच ईरयन् ।
१ २
पवस्व विश्वचर्षणे ॥ २ ॥ (७७६)

पदपाठः–त्वम् १ । समुद्रियाः,अपः २ । अग्रियः १ । वाचः २।ईरयन् १। पवस्व क्रि० । विश्वचर्षणे सं० ॥

अन्वितपदार्थः–(विश्वचर्षणे) हे सर्वद्रष्टः ! (अग्रियः) मुख्यः (त्वम्) (समुद्रियाः) आन्तरिक्ष्याः (अपः) (ईरयन्) प्रेरयन्नास्से (वाचः) वेदवाणीश्च प्रेरयन्नसि स त्वं (पवस्व) अस्मान्पवित्रीकुरु ॥ ऋग्वेदे तु ९।६२ । २६ विश्वचर्षणे=विश्वमेजय इत्यन्तरम् ॥ २ ॥

भाषार्थः–(विश्वचर्षणे) हे सर्वसाक्षिन् ! (अग्रियः) मुख्य (त्वम्) आप (समुद्रियाः) आकाशस्थ मेघ के (अपः) जलों और (वाचः) वेदवाणियों को (ईरयन्) प्रेरित करते हैं । वह आप (पवस्व) हमें पवित्र कीजिये ॥ ऋ० ९ । ६२ । २६ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

२ ३ १र २र ३ १ २
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
१ २ ३ १ २
तुभ्यं धावन्ति धेनवः ॥३॥ [१] (७७७)

पदपाठः–तुभ्यम् ४=६ । इमा, भुवना १ । कवे सं० । महिम्ने ४ । सोम सं० । तस्थिरे क्रि० । तुभ्यम् ४ । धावन्ति क्रि०।धेनवः १ ॥

अन्वितपदार्थः–(कवे) ज्ञानिन् ! (तुभ्यम्) तव(महिम्ने) महत्त्वाय (इमा) इमानि (भुवना) भुवनानि (तस्थिरे)

University Haridwar Collection. Digitized by S3 Foundation USA

उपतिष्ठन्ति (सोम) हे शान्तात्मन् ! (तुभ्यम्) त्वदर्थम् (धेनवः) वेदवाचः (धावन्ति) गच्छन्ति ॥ वाचमेव तद्देवा धेनुमकुर्वत इति शतपथे ९ । १ । २।१७॥
ऋग्वेदे तु ९ । ६२ । २७ अर्षन्ति धेनव इत्यन्तरम् ॥ ३ ॥

भाषार्थः—(कवे) हे ज्ञानिन् ! (तुभ्यम्) आप की (महिम्ने) महिमा के लिये (इमा) ये (भुवना) भुवन (तस्थिरे) उपस्थित हैं । (तुभ्यम्) आप के लिये (धेनवः) वेदवाणियें (धावन्ति) दौड़ती हैं ॥

शतपथ ९ । १ । २ । १७ का प्रमाण और ऋ० ९ । ६२ । २७ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ द्वितीयतृचसूक्तस्य—अमहीयुर्ऋषिः । छन्दोदेवते उक्ते ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
पवस्वेन्दो वृषा सुतः कृधी नो यशसोजने ।
२ ३ २ ३ १ २
विश्वा अप द्विषो जहि ॥ १॥ (७७८) व्याख्याता (१७९)

अथ द्वितीया—

१ २ २ २ ३ १ २ ३ १ २ ३ २
यस्य ते सख्ये वयं सासह्याम पृतन्यतः ।
१ २ ३ १ २ ३ २
तवेन्दो द्युम्न उत्तमे ॥ २ ॥ (७७९)

पदपाठः—यस्य, ते ६ । सख्ये ७। वयम् १। सासह्याम क्रि०।पृतन्यतः २। तव ६ । इन्दो सं० । द्युम्ने, उत्तमे ७ ॥

अन्वितपदार्थः—(इन्दो) हे परमेश्वर ! (यस्य) पूर्वोक्तस्य (ते) तव (सख्ये) सौहार्दे वर्त्तमानाः (वयम्) त्वत्सेवकाः (तव) त्वदीये (उत्तमे) प्रशस्ते (द्युम्ने) यशसि (पृतन्यतः) शत्रून् (सासह्याम) अभिभवेम तथाभूतस्त्वं कृपां विधेहि ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्युम्नं द्योततेर्यशो वाऽन्नं वा निरु० ५।५॥ पृतना इति संग्रामनाम निघं० २।१७॥ऋग्वेदे तु ९।६१।२९ यस्य= अस्येति पाठः,सायणेन चात्राऽपि मूल–पद–गानग्रन्थविरुद्धः स एव व्याख्यातः॥ ऋग्वेदपाठे द्वितीयतृतीयपादौ च व्यत्यस्तौ दृश्येते॥२॥

भाषार्थः–(इन्दो) हे परमेश्वर ! (यस्य) जिस (ते) आप के (सख्ये) मित्रभाव में रहने वाले (वयम्) हम(तव) आप के (उत्तमे)श्रेष्ठ (द्युम्ने) यश में (पृतन्यतः)शत्रुओं को(सासह्याम)तिरस्कृत करें वह आप ऐसी कृपा कीजिये ॥

निरुक्त ५ ।५॥ निघण्टु २ । १७ के प्रमाण और ऋ० ९ । ६१ । २९ का पाठभेद और सायणाचार्य के व्याख्यान का मूल, पद, गान से विरुद्ध होना संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

१ २ ३ १र २र ३ २ ३ २ ३ १ २
या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।
३ २ ३ २
रक्षा समस्य नो निदः ॥ ३ ॥ [२] (७८०)

पदपाठः–या १ । ते ६ । भीमानि, आयुधा, तिग्मानि १ । सन्ति क्रि० । धूर्वणे ४ । रक्ष क्रि० । समस्य ६ । नः २ । निदः क्रि० ॥

अन्वितपदार्थः–हे परमेश्वर ! (या) यानि (ते) त्वदीयानि अलौकिकानि (तिग्मानि) तीक्ष्णानि (भीमानि) भयानकानि (आयुधा) आयुधानि (धूर्वणे) दुष्टनाशार्थं (सन्ति) भवन्ति तैः (समस्य) सर्वदुष्टगणस्य (निदः) नितरां नाशं कुरु (नः) अस्मान्भवद्भक्तांश्च (रक्ष) पालय ॥

ऋग्वेदे ९ । ६१ । ३० ऽपि ॥ ३ ॥

भाषार्थः–हे परमेश्वर ! (या) जो (ते) तेरे (तिग्मानि) तीक्ष्ण (भीमानि) भयानक (आयुधा) विद्युदादि शस्त्रास्त्र (धूर्वणे) दुष्ट नाशार्थ (सन्ति) हैं, उन से (समस्य) सब दुष्ट गण का (निदः) नितरां

Haridwar Collection. Digitized by S3 Foundation USA

विदारण कीजिये और (नः) आप के भक्त हम लोगों की (रक्ष) रक्षा कीजिये ॥ ऋ० ९ । ६१ । ३० में भी ॥ ३ ॥

अथ तृतीयतृचसूक्तस्य-कश्यप ऋषिः । छन्दोदेवते चक्रे ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ १ २

वृषा सोम द्युमाँ असि वृषा देव वृषा व्रतः ।

२ ३ २ ३

वृषा धर्माणि दधिषे ॥ १ ॥ (७८१) व्याख्याता (५०४)

अथ द्वितीया-

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३ २

वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ।

१र २र३ १र २र

स त्वं वृषन्वृषेदसि ॥ २ ॥ (७८२)

पदपाठः-वृष्णः, ते ६ । वृष्ण्यम्, शवः, वृषा, वनम्, वृषा, सुतः, सः, त्वम् १ । वृषन् सं० । वृषा १ । इत् अ० । असि क्रि० ॥

अन्वितपदार्थः-(वृष्णः) वीर्यकरस्य (ते) तव (शवः) बलं (वृष्ण्यम्) वीर्यकरमस्ति (वनं) सेवनं तव (वृषा) वीर्यकरमस्ति [लिङ्व्यत्ययः] (सुतः) अभिषुतस्तव रसोपि (वृषा) वीर्यकरोस्ति । (वृषन्) वीर्यकर ! (सत्वं) (वृषा) वर्षकः (इत्) एव (असि) भवसि ॥

यद्वा-(वृष्णः) बलिनां बलिष्ठस्य (ते) तव परमेश्वरस्य (शवः) बलम् (वृष्ण्यम्) धर्मार्थकाममोक्षवर्षकम् (वनं) त्वत्सेवनं (वृषा) धर्मादिवर्षकं (सुतः) हृत्कमले साक्षात्कारस्तव (वृषा), (सत्वं वृषन् वृषा इत् असि) पूर्ववत् ॥

ऋग्वेदे तु ९ । ६४ । २ सुतः=मदः । सत्वं=सत्यमिति पाठान्तरम् ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः— (वृष्णः) वीर्यकारक (ते) तेरा (शवः) बल (वृष्णयम्) वीर्यकारक है। (वनम्) तेरा सेवन (वृषा) वीर्यकारक है। (सुतः) तेरा अभिषुत किया हुवा रस भी (वृषा) वीर्यकारक है। (सः) वह (त्वम्) तू (वृषा) वीर्यकारक (इत्) ही (असि) है॥

यद्वा—(वृष्णः) अतिबलिष्ठ (ते) आप का (शवः) बल (वृष्णयम्) धर्मार्थ काम मोक्ष का वर्षाने वाला है (वनम्) आपका सेवन (वृषा) धर्मादि वर्षक है। (सुतः) आप का साक्षात्कार भी (वृषा) धर्मादिपूरक है (सः त्वम्) वह आप (वृषा इत्) धर्मादिवृष्टिकारक ही (असि) हैं॥

ऋ० ९। ६४। २ का पाठान्तर संस्कृत भाष्य में देखिये॥ २॥ का

अथ तृतीया—

२ ३ १ २ ३ २ ३ १र २र ३ १र २र

अश्वो न चक्रदो वृषा संगा इन्दो समर्वतः।

१ २ ३ १र २र

वि नो राये दुरो वृधि॥ ३॥ [३] (७८३)

पदपाठः—अश्वः १। न अ०। चक्रदः क्रि०। वृषा १। सम् अ०। गाः २। इन्दो सं०। सम्। अर्वतः २॥ वि अ०। नः ६। राये ४। दुरः २। वृधि क्रि०॥

अन्वितपदार्थः—(इन्दो) सोम ! त्वम् (अश्वः) विद्युत् (न) इव (चक्रदः) शब्दं करोषि। अपि च—(गाः) गवादिपशून् (सम्) संगमयसि (अर्वतः) अश्वांश्च (सम्) संगमयसि (नः) अस्माकं (दुरः) द्वाराणि (राये) ऐश्वर्याय (विवृधि) विवृतानिकुरु॥

सोमयाजिनः खलु गवाश्वादिसर्वधनधान्यादिसमृद्धियुक्ता भवन्ति इति भावः॥ ऋग्वेदे ९। ६४। ३ऽपि॥ ३॥

भाषार्थः—(इन्दो) सोम ! तू (अश्वः) विद्युत् के (न) समान (चक्रदः) शब्द करता और (गाः) गौआदि पशुओं को (सम्) मिलाता तथा (अर्वतः) अश्वादिकों को (सम्) संगत कराता है (नः) हमारे (दुरः) द्वारों को (राये) ऐश्वर्य के लिये (विवृधि) खोल॥

अर्थात् सोमयाजियों को गौ अश्व धन धान्यादि ऐश्वर्य प्राप्त होताहै॥ ऋ० ९। ६४। ३ में भी॥ ३॥

University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थतृचसूक्तस्य–भृगुर्वारुणिर्जमदग्निर्वा ऋषिः । छन्दोदेवते सूक्ते ।।

तत्र प्रथमा–

२३ १ २ ३ १२ ३१ २
वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
१२ ३१२
पवमान स्वर्दृशम् ॥१॥ (७८४) व्याख्याता (४८०)

अथ द्वितीया–

२३१ २ २ १२ ३१२ ३१२
यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः ।
१२ ३२ ३१२
द्रोणे सधस्थमश्नुषे ॥ २ ॥ (७८५)

पदपाठः–यद् अ० । अद्भिः ३ । परिषिच्यसे क्रि० । मर्मृज्यमानः १ । आयुभिः ३ । द्रोणे ७ । सधस्थम् २ । अश्नुषे क्रि० ॥

अन्वितपदार्थः–(यद्) यदा (आयुभिः) मनुष्यैः [निघं० २ । ३] (मर्मृज्यमानः) अतिशयेन शोध्यमानः सोमः (अद्भिः) वसतीवर्याख्याभिः (परिषिच्यसे) सर्वतः सिच्यते तदा (द्रोणे) द्रोणकलशे (सधस्थम्) यज्ञम् (अश्नुषे) अश्नुते प्राप्नोति ॥

ऋग्वेदे तु ९ । ६५ । ६ मृज्यमानो गभस्त्योः । द्रुणा इति पाठभेदः ॥ २ ॥

भाषार्थः–(यद्) जब (आयुभिः) मनुष्यों से [निघं० २ । ३] (मर्मृज्यमानः) अतिशयता से शोधा जाता हुवा सोम (अद्भिः) वसतीवरी संज्ञक जलों से (परिषिच्यसे) सर्वतः छिड़का जाता है, तब (द्रोणे) द्रोणकलश में (सधस्थम्) यज्ञ को (अश्नुषे) प्राप्त होता है ॥

ऋ० ९ । ६५ । ६ का पाठभेद संस्कृत भाष्य में देखिये ॥२॥

अथ तृतीया–

१ २ ३२ ३ १ २
आपवस्व सुवीर्यं मन्दमानः स्वायुध ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ १ २

इहोष्विन्दवागहि ॥३॥ [४] (७८६)

पदपाठः—आपवस्व क्रि० । सुवीर्यम् २ । मन्दमानः १ । स्वायुध सं० १ । इह, उ, सु, अ० । इन्दो सं० । आगहि क्रि० ॥

अन्वितपदार्थः—(स्वायुध) स्फ्य—कपालादीनि यज्ञपात्राणि आयुधानि तानि सन्तिशोभनानि यस्य तादृश ! (इन्दो) सोम ! (इह) अस्मिन् यज्ञे [(उ सु) पादपूरणौ] (आगहि) प्राप्नुहि (मन्दमानः) मादयन् हर्षयन् (सुवीर्यम्) शोभनं वीर्यम् (आपवस्व) सर्वतः प्रापय ॥

मदस्य=हर्षस्य प्रापकेण यज्ञं प्राप्तेन स्वायुधेन सोमेन सुवीर्यं प्राप्यत इति भावः ॥ ऋ० ९ । ६५ । ५ ऽपि ॥ ३ ॥

भाषार्थः—(स्वायुध) सुन्दर यज्ञपात्ररूप आयुधोंवाले (इन्दो) सोम ! (इह) इस यज्ञ में [(सु उ) पाद पूरणार्थ हैं] (आगहि) प्राप्त हो और (मन्दमानः) हर्ष प्राप्त कराता हुवा (सुवीर्यम्) सुन्दर वीर्य को (आपवस्व) सर्वतः प्राप्त कराव ॥ ऋ० ९ । ६५ । ५ में भी ॥ ३ ॥

अथ पञ्चमतृचसूक्तस्य—अमहीयुर्ऋषिः । छन्दोदेवते उक्ते ॥

तत्र प्रथमा—

१ २ ३ २ ३ १ २ ३ २

पवमानस्य ते वयं पवित्रमभ्युन्दतः ।

३ १ २ २

सखित्वमावृणीमहे ॥१॥ (७८७)

पदपाठः—पवमानस्य ६ । ते ६ । वयम् १ । पवित्रम् २ । अभ्युन्दतः ६ । सखित्वम् २ । आवृणीमहे क्रि० ॥

अन्वितपदार्थः—परमेश्वर ! (पवित्रम्) प्राणम् (अभ्युन्दतः) शुद्धं कुर्वतः (पवमानस्य) पवित्रतासंपादकस्य (ते) तव (सखित्वम्) मित्रभावम् (वयम्) भवद्भक्ताः (आवृणीमहे) ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अयं वै पवित्रं योऽयं पवते सोऽयमेकइवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः । श० १ । १ । ३ । २ अनेन प्राणस्य पवित्र-संज्ञा सूचिता ॥ ऋग्वेदे ९ । ६१ । ४ ऽपि ॥ १ ॥

भाषार्थः—हे परमेश्वर ! (पवित्रम्) प्राण को (अभ्युन्दतः) शुद्ध करते हुवे (पवमानस्य) शुद्धिसंपादक (ते) आप के (सख्यित्वम्) मित्रभाव का (वयम्) हम (आवृणीमहे) वरण करते हैं ॥

शतपथ १ । १ । ३ । २ का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ९ । ६१ । ४ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १२ ३१ २ ३ १२ ३ १ २

ये ते पवित्रमूर्मयोभिक्षरन्ति धारया ।

१ २

तेभिर्नः सोम मृडय ॥ २ ॥ (७८८)

पदपाठः—ये १ । ते ६ । पवित्रम् २ । ऊर्मयः १ । अभिक्षरन्ति क्रि० । धारया ३ । तेभिः ३ । नः २ । सोम सं० । मृडय क्रि० ॥

अन्वितपदार्थः—(सोम) अमृतस्वरूप ! परमात्मन् ! (ये) (ते) तव (ऊर्मयः) अमृततरङ्गाः (धारया) प्रवाहेण (पवित्रम्) प्राणम्(अभिक्षरन्ति) अभिषिञ्चन्ति (तेभिः) तैः (नः) अस्मान् (मृडय) सुखय ॥ ऋग्वेदे ९ । ६१ । ५ ऽपि ॥२॥

भाषार्थः—(सोम) हे अमृतस्वरूप ! परमात्मन् ! (ये) जो (ते) आप की (ऊर्मयः) अमृत की लहरें (धारया) प्रवाह से (पवित्रम्) प्राण का (अभिक्षरन्ति) अभिषेक करती हैं (तेभिः) उन से (नः) हम को (मृडय) आनन्दित कीजिये ॥ ऋ० ९ । ६१ । ५ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १र २र ३ २ ३ १२३ १ २

स नः पुनान आभर रयिं वीरवतीमिषम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३१२
ईशानः सोम विश्वतः ॥३॥ [५] (७८९)

पदपाठः—सः १ । नः ४ । पुनानः १। आभर क्रि० । रयिम्, वीरवतीम्, इषम् २ । ईशानः १ । सोम सं० । विश्वतः अ० ॥

अन्वितपदार्थः—(सोम) अमृतस्वरूप ! परमात्मन् ! (विश्वतः) सर्वस्य (ईशानः) स्वामी (पुनानः) पवित्रयन् (सः) पूर्वोक्तस्त्वम् (नः) अस्मभ्यं (वीरवतीम्) पुत्राद्युपेतम् (रयिं) धनम् (इषम्) अन्नं च (आभर) प्रापय ॥ ऋग्वेदे ९-६१ । ६ऽपि ॥ ३ ॥

भाषार्थः—(सोम) हे अमृतस्वरूप ! परमात्मन् ! (विश्वतः) सब के (ईशानः) स्वामी (पुनानः) पवित्र करते हुवे (सः) वह आप (नः) हमारे लिये (वीरवतीम्) पुत्रादिसहित (रयिम्) धन और (इषम्) अन्न (आभर) प्राप्त कीजिये ॥ ऋ० ९ । ६१ । ६ में भी ॥ ३ ॥

उक्तं बहिष्पवमानम्

(इति विवरणकारः)

अथ द्वितीयखण्डे प्रथमर्चसूक्तस्य—मेधातिथिः काण्व ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ २ ३१ ३ १ २ ३ १ २
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
३ २ ३१ २ ३ १ २
अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥ (७१०) व्याख्याता (३)

अथ द्वितीया—

३ १ २ ३ १ २ ३ १ २ ३ १ २
अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।
३ १ २ ३ २
हव्यवाहं पुरुप्रियम् ॥ २ ॥ (७९१)

University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अग्निम्, अग्निम् २। हवीमभिः ३। सदा ३०। हवन्त क्रि०। विश्पतिम्, हव्यवाहम्, पुरुप्रियम् २॥

अन्वितपदार्थः—(विश्पतिं) प्रजानां पालकं (हव्यवाहं) हव्यस्य वायवादिभ्यो वाहकं हव्यस्य भोक्तव्यस्य कर्मणो वा फलप्रदातारं (पुरुप्रियं) बहूनां प्रीतिकरम् (अग्निम्, अग्निम्) भौतिकं परमेश्वरं वा (हवीमभिः) होमसाधनैराह्वानसाधनैर्वा स्तोत्रैर्मन्त्रैः (सदा) सर्वदा (हवन्त) जुह्वति आह्वयन्ते वा॥

अग्निमग्निम्—नित्यवीप्सयोः ८।१।४ इति हिर्भावः, तस्य परमाम्रेडितम् ८।१।२ इति परस्याम्रेडितसंज्ञायाम्, अनुदात्तं च ८।१।३ इत्यनुदात्तत्वम्॥ हवीमभिः—ह्वेञ् स्पर्धायां शब्दे च (भ्वा० उभ०) अन्येभ्योऽपि दृश्यन्ते ३।२।७५ इति कर्त्तरि मनिन्प्रत्ययः, तस्य छान्दसईडागमः, बहुलं छन्दसि ६।१।३४ इति संप्रसारणम्, गुणावादेशौ, ञ्नित्यादिर्नित्यम् ६।१।१९७ इत्याद्युदात्तत्वम्॥ सदा—सर्वैकान्यकिंयत्तदः काले दा ५।३।१५ इति सर्वशब्दाद्दाप्रत्ययः, सर्वस्य सोऽन्यतरस्याम् ५।३।६ इति सः, व्यत्ययो बहुलम् ३।१।८५ इत्याद्युदात्तत्वम्॥ विश्पतिम्—पत्यावैश्वर्ये ६।२।१८ इति पूर्वपदप्रकृतिस्वरे प्राप्ते, परादिश्छन्दसि बहुलम् ६।२।१९९ इत्युत्तरपदाद्युदात्तत्वम्॥ हव्यवाहम्—वहश्च ३।२।६४ इति ण्विः॥ ऋग्वेदे १।१२।२ ऽपि॥ २॥

भाषार्थः—(विश्पतिम्) प्रजापालक (हव्यवाहम्) हव्य वा भोग्य फल

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पहुंचाने वाले (पुरुप्रियम्) बहुतों के प्यारे (अग्निम् अग्निम्) अग्नि वा परमेश्वर को (हवीमभिः) होमसाधनों वा पुकारने के मन्त्रों से (सदा) सर्वदा (हवन्त) होम करते वा पुकारते हैं ॥

अष्टाध्यायी ८ । १ । ४, ८ । १ । २, ८ । १ । ३, ३ । २ । ७५, ६ । ४ । ३४, ६ । १ । १९७, ५ । ३ । १५, ५ । ३ । ६, ३ । १ । ८५, ६ । २ । १८, ६ । २ । १९९ और ३ । २ । ६४ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । १२ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ १ २ ३ २ ३ १ २

अग्ने देवाँ इहावह जज्ञानो वृक्तबर्हिषे ।

२ ३ १ २ ३ १ २

असि होता न ईड्यः ॥३॥ [६] (७९२)

पदपाठः—अग्ने सं० । देवान् २ । इह अ० । आवह क्रि० । जज्ञानः १ । वृक्तबर्हिषे ४ । असि क्रि० । होता १ । नः ६ । ईड्यः १ ॥

अन्वितपदार्थः— (अग्ने) वा परमात्मन् ! (देवान्) वाय्वादीन् अथवा शीलसन्तोषादीन् (इह) यज्ञे वा ध्यानयज्ञे (आवह) प्रापय । (वृक्तबर्हिषे) निर्मितासनाय क्रियायज्ञ-यजमानाय, योगसाधकाय वा (जज्ञानः) अरण्योरुत्पन्नः, हृत्-कमले साक्षाद्भूतो वा (नः) अस्माकं (होता) होमसाधको ऽथवा कर्मफलप्रदः (ईड्यः) प्रशंसनीयः (असि) भवसि ॥ आग्नेयमाज्यमुक्तमिति विवरणकारः ऋग्वेदे १।१२।३ऽपि॥३॥

भाषार्थः—(अग्ने) हे अग्नि ! वा परमेश्वर ! (देवान्) वायु आदि देवों वा शीलसन्तोषादि उत्तम दिव्यगुणों को (इह) इस यज्ञ में वा ध्यानयोग-यज्ञ में (आवह) प्राप्त करा । (वृक्तबर्हिषे) यज्ञार्थ आसन रचने वाले यज-मान वा योगी के लिये (जज्ञानः) अरणियों में प्रकट वा हृदयकमल में

University Haridwar Collection. Digitized by S3 Foundation USA

साक्षात् हुवा (नः) हमारा (होता) होम का सिद्ध करनेवाला वा कर्म-फलदाता (ईड्यः) प्रशंसनीय (असि) है ॥

विवरणकार कहते हैं कि "आग्नेय आज्य कहा गया" ॥ ऋ० १ । १२ । ३ में भी ॥ ३ ॥

अथ द्वितीयतृचसूक्तस्य-मेधातिथिः काण्व ऋषिः । मित्रावरुणौ देवते । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ १ २ ३ १ २ ३ १ २

मित्रं वयं हवामहे वरुणं सोमपीतये ।

२ ३ २ ३ १ २

या जाता पूतदक्षसा ॥ १ ॥ (७९३)

पदपाठः—मित्रम् २। वयम् १। हवामहे क्रि०। वरुणम् २ । सोमपीतये ४ । या, जाता, पूतदक्षसा १ ॥

अन्वितपदार्थः—(वयम्) याज्ञिकाः (सोमपीतये) सोम-पानाय (मित्रं) प्राणं (वरुणं) अपानं च (हवामहे) आह्व-यामः (या) यौ मित्रावरुणौ (पूतदक्षसा) पवित्रबलौ (जाता) जातौ यज्ञेनेति शेषः ॥

यथा मनुष्यदेहे तद्रक्षार्थौ प्राणापानौ भवतस्तथाऽत्र ब्रह्माण्डे-ऽपि प्राणाऽपानौ विद्येते । सोमादिहोमेन तयोः सदवस्थायां प्राबल्ये च शोभनो निर्वाहः प्राणिनां भवति॥प्राणो वै मित्रोऽपानो वरुणः । शतपथे १२ । ४ । ४ । १२॥ वरुणो मित्रश्चेति पद-नाम्नी निघं० ५।४ । निरुक्ते दशमाध्याये मध्यस्थानवायुविशे-षेषुदेवगणेषु-"वरुणो वृणोतीति सतः १।३ मित्रःप्रमीतेरित्यादि १०।२१॥ऋग्वेदे तु १।२३।४ जज्ञाना पूतदक्षसेति पाठः ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(वयम्) हम याज्ञिक लोग (सोमपीतये) सोमपान के लिये (मित्रम्) प्राण और (वरुणम्) अपान को (हवामहे) पुकारते हैं। (या) जो दोनों (पूतदक्षसा) पवित्र बलयुक्त (जाता) हुवे हैं यज्ञ से यह शेष है॥

जैसे मनुष्य के देह में देहरक्षार्थ प्राण अपान हैं, वैसे इस ब्रह्माण्ड में भी प्राण अपान हैं। सोमादि के होम से इन की अवस्था सुधरने और प्रबल होने पर प्राणियों का उत्तम निर्वाह होता है॥ शतपथ १२। ४। ४। १२ निरुक्त १०। ३, १०। २१। निघण्टु ५। ४ के प्रमाण और ऋ० १। १३। ४ का पाठभेद संस्कृत भाष्य में देखिये॥ १॥

अथ द्वितीया—

३२३ १२ ३१२३ २३ १ २३ १ २

ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती।

२ ३१र २र

ता मित्रावरुणा हुवे॥ २॥ (७९४)

पदपाठः—ऋतेन ३। यौ, ऋतावृधौ १। ऋतस्य ६। ज्योतिषः ६। पती १। ता, मित्रावरुणा २। हुवे क्रि०॥

अन्वितपदार्थः—(यौ) (ऋतेन) यज्ञेन (ऋतावृधौ) यज्ञस्य वर्धकौ (ऋतस्य) सत्यस्य (ज्योतिषः) प्रकाशस्य (पती) पालकौ स्तः (ता) तौ (मित्रावरुणा) मित्रावरुणौ (हुवे) आह्वयामि॥ ऋग्वेदे १। १३। ५ऽपि॥ २॥

भाषार्थः—(यौ) जो (ऋतेन) यज्ञ से (ऋतावृधौ) यज्ञ के बढ़ाने वाले (ऋतस्य) सच्ची (ज्योतिषः) ज्योति के (पती) पालक हैं (ता) उन (मित्रावरुणा) प्राण और अपान को (हुवे) पुकारता=चाहता हूं॥ ऋ० १। १३। ५ में भी॥ २॥

अथ तृतीया—

१२ ३१२ ३१र २र ३१२

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः।

१२ ३१२

करतां नः सुराधसः॥ ३॥ [७] (७९५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—वरुणः १ । प्र अ० । अविता १ । भुवत् क्रि० । मित्रः १ । विश्वाभिः, ऊतिभिः ३ । करताम् क्रि० । नः २ । सुराधसः २ ॥

अन्वितपदार्थः—(वरुणः) अपानः (अविता) रक्षकः (प्र, भुवत्) प्रभवतु । (मित्रः) प्राणः(विश्वाभिः) सर्वाभिः (ऊतिभिः) रक्षाभिः रक्षकः प्रभवतु । तौ मित्रावरुणौ (नः) अस्मान् (सुराधसः) प्रभूतधनयुक्तान् (करताम्) कुरुताम् ॥

करताम्—डुकृञ् करणे (उभ०) व्यत्ययो बहुलमिति ३ । १ । ८५ शप्, तिप्तस्झि० ३ । ४ । ७८ इति लोटस्तस्, तस्थस्थमिपां तान्तन्तामः३ । ४ । १०१ इति तसस्ताम्, सार्वधातुकार्धधातुकयोः ७ । ३ । ८४ इति गुणः ॥ ऋग्वेदे १ । २३ । ६ऽपि ॥ ३ ॥

भाषार्थः—(वरुणः) अपान (अविता) रक्षक (प्र, भुवत्) समर्थ होवे । (मित्रः) प्राण (विश्वाभिः) सब (ऊतिभिः) रक्षाओं से समर्थ होवे । वे दोनों (नः) हम को (सुराधसः) बहुत धनयुक्त (करताम्) करें ॥

अष्टाध्यायी ३ । १ । ८५, ३ । ४ । ७८, ३ । ४ । १०१, ७ । ३ ८४ के प्रमाण संस्कृत भाष्य में देखिये । ऋ० १ । २३ । ६ में भी ॥ ३ ॥

अथ चतुर्ऋचस्य तृतीयसूक्तस्य—मधुच्छन्दा वैश्वामित्र ऋषिः ।
इन्द्रो देवता। गायत्री छन्दः ।
तत्र प्रथमा—

२ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
२ ३ १ २
इन्द्रं वाणीरनूषत ॥ १ ॥ (७९६) व्याख्याता (१९८)

अथ द्वितीया—

२ ३ २उ ३ २ ३ १ २ ३ १ २ ३ १ २
इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २३ ११
इन्द्रो वज्री हिरण्ययः ॥ २ ॥ (७९७)

पदपाठः—इन्द्रः १ । इत् अ० । हर्योः ६ । सचा अ० । संमिश्लः १ । आ अ० । वचोयुजा ६ । इन्द्रः, वज्री, हिरण्ययः १ ॥

अन्वितपदार्थः—(इन्द्रः इत्) परमेश्वर एव (वचोयुजा) वेदवचसा युक्तयोः (हर्योः)हारकयोः शुभाऽशुभकर्मणोर्मध्ये (सचा) सह (आ, संमिश्लः) संमिश्रितः सर्वत्र ओतःप्रोतश्च विभुत्वात् (इन्द्रः) परमेश्वरः (हिरण्ययः) ज्योतिःस्वरूपः (वज्री) दुष्टेषु दण्डस्य नेता अस्तीति शेषः ॥ ऋग्वेदे १ । ७ । २ऽपि ॥ २ ॥

भाषार्थः—(इन्द्रः इत्) परमेश्वर ही (वचोयुजा) वेदवचन से बंधे हुवे (हर्योः) लेचलनेवाले शुभ और अशुभ कर्मों के मध्य (सचा) साथ २ (आ, संमिश्लः) सब जगह व्यापक है और (इन्द्रः) परमेश्वर (हिरण्ययः) ज्योतिःस्वरूप तथा (वज्री) दुष्टों को दण्ड देने वाला है ॥ ऋ० १।७।२में भी ॥२॥

अथ तृतीया—

२ ३ १ २ ३ १ २
इन्द्र वाजेषु नोव सहस्त्रप्रधनेषु च ।
३ १ ३ १-२ ३ १ २
उग्र उग्राभिरूतिभिः ॥ ३ ॥ (७९८)

पदपाठः—इन्द्र सं० । वाजेषु ७ । नः २ । अव क्रि० । सहस्त्रप्रधनेषु ७ । च अ० । उग्र सं० । उग्राभिः, ऊतिभिः ३ ॥

अन्वितपदार्थः—(उग्र) हे अनाधृष्य ! इन्द्र ! परमेश्वर ! (उग्राभिः) अनाधृष्याभिः (ऊतिभिः) रक्षाभिः (वाजेषु) संग्रामेषु (सहस्त्रप्रधनेषु) असंख्यमहाधनेषु महायुद्धेषु (च) (नः) अस्मान् (अव) रक्ष ॥ ऋग्वेदे १ । ७ । ४ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(उग्र) हे सर्वोपरिवर्त्तमान ! इन्द्र ! परमेश्वर ! (उग्राभिः) सर्वोपरि वर्त्तमान (ऊतिभिः) रक्षाओं से (वाजेषु) संग्रामों में (च) और (सहस्रप्रधनेषु) असंख्य महाधन वाले महायुद्धों में (नः) हमारी (अव) रक्षाकीजिये ॥ ऋ० १ । ७ । ४ में भी ॥ ३ ॥

अथ चतुर्थी—

१ २ ३ २ ३ १ २ ३ १र २र ३ २
इन्द्रो दीर्घाय चक्षस आ सूर्यꣳरोहयद्दिवि ।
२ ३ ३ १ ३
वि गोभिरद्रिमैरयत् ॥ ४ ॥ [८] (७९१)

पदपाठः—इन्द्रः १ । दीर्घाय, चक्षसे ४ । आ अ० । सूर्यम् २ । रोहयत् क्रि० । दिवि ७ । वि अ० । गोभिः ३ । अद्रिम् २ । ऐरयत् क्रि० ॥

अन्वितपदार्थः—(इन्द्रः) परमेश्वरः (दीर्घाय) बृहते (चक्षसे) दर्शनाय (दिवि) द्युलोके (सूर्यम् आरोहयत्) । सच सूर्यः (गोभिः) किरणैः (अद्रिम्) मेघम् (वि, ऐरयत्) विशेषेण प्रेरयति ॥ ऋग्वेदे १ । ७ । ३ ऽपि ॥ ४ ॥

भाषार्थः—(इन्द्रः) परमेश्वर ने (दीर्घाय) बड़ी (चक्षसे) आंख के लिये (दिवि) द्युलोक में (सूर्यम्) सूर्य को (आ रोहयत्) चढ़ाया है । वह सूर्य (गोभिः) किरणों से (अद्रिम्) मेघ को (वि, ऐरयत्) इधर उधर फैलाता है ॥ ऋ० १ । ७ । ३ में भी ॥ ४ ॥

इत्यैन्द्रमाज्यम्

(इति विवरणकारः)

अथ चतुर्थतृचसूक्तस्य वसिष्ठ ऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १र २र ३ १ २ ३ १र २र
इन्द्रे अग्ना नमो बृहत्सुवृक्तिमीरयामहे ।
३ १र २र ३ १ २
धिया धेना अवस्यवः ॥ १ ॥ (८००)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—इन्द्रे ७ । अग्ना ७ । नमः २ । बृहत् २ । सुवृक्तिम् २ । आ-ईरयामहे क्रि० । धिया ३ । धेनाः २ । अवस्यवः १ ॥

अन्वितपदार्थः—(इन्द्रे) सूर्य्ये विद्युति वा (अग्ना) अग्नौ च निमित्ते (बृहत्) प्रभूतम् (नमः) अन्नम् हव्यमिति यावत् (आ-ईरयामहे) प्रेरयामो जुहुम इत्यर्थः । अथ च (अवस्यवः) आत्मनोरक्षणमिच्छन्तो वयं (धिया) यज्ञकर्मणा सह (धेनाः) स्तुतिरूपा वाचः आ-ईरयामहे उच्चारयामः । तथा (सुवृक्तिम्) शोभनं वरणम् आ-ईरयामहे=कुर्म इत्यर्थः ॥

अग्ना—सुपां सुलुगिति ७ । १ । ३९ विभक्तेर्डादेशः ॥ नम इत्यन्ननाम निघं० २ । ७ ॥ धीरिति कर्मनाम निघं० २ । १ ॥ धेनेति वाङ्नाम निघं० १ । ११ ॥ ऋग्वेदे ७ । ९४ । ४ऽपि ॥ १ ॥

भाषार्थः—(इन्द्रे) सूर्य वा विद्युत् और (अग्ना) अग्नि के निमित्त (बृहत्) बहुत (नमः) हव्य का (आ-ईरयामहे) हम होम करते हैं । और (अवस्यवः) अपनी रक्षा चाहते हुवे हम (धिया) यज्ञ कर्म के साथ (धेनाः) वेदवाणियों को उच्चारित करते हैं । तथा (सुवृक्तिम्) [ऋत्विज् आदिकों का] भले प्रकार वरण करते हैं ॥

अष्टाध्यायी ७ । १ । ३९ निघण्टु २ । ७, २ । १, १ । ११ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ ७ । ९४ । ४ में भी ॥ १ ॥

अथ द्वितीया—

१र २र ३ १२ ३१र २र ३१२
ता हि शश्वन्त ईडतइत्था विप्रासऊतये ।
३२३ ३२
सबाधो वाजसातये ॥ २ ॥ (८०१)

पदपाठः—ता २ । हि अ० । शश्वन्तः १ । ईडते क्रि० । इत्था अ० । विप्रासः १ । ऊतये ४ । सबाधः १ । वाजसातये ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(ता) तौ इन्द्राग्नी (वाजसातये) अन्नस्य लाभाय (ऊतये) रक्षायै च (विप्रासः) विद्वांसः (शश्वन्तः) बहवः (सबाधः) ऋत्विजः (हि) यस्मात् (इत्था) इत्थम् (ईडते) प्रशंसन्ति वर्णयन्तीति यावत् तस्माद्वयमपि हवामहे इत्युत्तरेण सम्बन्धः ॥

शश्वदिति बहुनाम निघं० ३ । १, विप्रइति मेधाविनाम निघं० ३ । १५, सबाध इति ऋत्विङ्नाम निघं० ३ । १८, वाज इत्यन्ननाम निघं० २।७॥ ऋग्वेदे ७ । ९४ । ५ ऽपि॥२॥

भाषार्थः—(ता) उन दोनों इन्द्र और अग्नि की (वाजसातये) अन्नलाभ के लिये और (ऊतये) रक्षा के लिये (विप्रासः) बुद्धिमान् (शश्वन्तः) बहुत से (सबाधः) ऋत्विज् लोग (इत्था) ऐसे (हि) जिस कारण (ईडते) प्रशंसा करते हैं। इस कारण हम भी प्रशंसा करते हैं। यह अगले मन्त्र से अन्वय है ॥

निघण्टु ३।१,३।१५, ३ । १८, २ । ७ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ७ । ९४ । ५ में भी ॥ २ ॥

अथ तृतीया—

१ २ २१ २३ २ ३ १ २
ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे ।
३१२ ३ १२
मेधसाता सनिष्यवः ॥ ३ ॥ [१] (८०२)

पदपाठः—ता २ । वाम् २ । गीर्भिः ३ । विपन्यवः, प्रयस्वन्तः १ । हवामहे क्रि० । मेधसाता ४ । सनिष्यवः १ ॥

अन्वितपदार्थः—(ता) तौ (वाम्) युवाम् इन्द्राग्नी (मेधसाता) यज्ञस्य सेवनाय (सनिष्यवः) संभागमात्मन इच्छन्तः (प्रयस्वन्तः) हविष्मन्तः (विपन्यवः) मेधाविनो वयम् (गीर्भिः) वेदवाग्भिः (हवामहे) प्रशंसामः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विपन्यवः इति मेधाविनाम निघं० ३ । १५, प्रयइत्यन्ननाम निघं० २ । ७, मेध इति यज्ञनाम निघं० ३ । १७॥ ऋग्वेदे ७ । १४ । ६ ऽपि ॥ ३ ॥

भाषार्थः—(ता) उन (वाम्) तुम दोनों इन्द्र और अग्नि की (मेधसाता) यज्ञसेवनार्थ (सनिष्यवः) सेवन को चाहते हुवे (प्रयस्वन्तः) हव्य अन्न वाले (विपन्यवः) बुद्धिमान् हम (गीर्भिः) वेदवाणियों से (हवामहे) प्रशंसा करते हैं ॥

निघण्टु ३ । १५, २ । ७, ३ । १७ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ७ । ९४ । ६ में भी ॥ ३ ॥

उक्तं प्रातःसवनम्

(इति विवरणकारः)

इदानीं माध्यन्दिनं सवनमभिधीयते

(इति च विवरणकारः)

अथ तृतीयखण्डे प्रथमतृचसूक्तस्य-भृगुर्वारुणिर्जमदग्निर्वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

१२ ३ १२ ३१२ ३२
वृषा पवस्व धारया मरुत्वते च मत्सरः ।
२३ १२३ १ २
विश्वा दधान ओजसा ॥१॥ (८०३) व्याख्याता (४६९)

अथ द्वितीया—

१ २ ३१२३ २ १२ ३१२
तं त्वा धर्त्तारमोण्योऽ३ऽष्पवमान स्वर्दृशम् ।
३१र २र ३ १ २
हिन्वे वाजेषु वाजिनम् ॥ २ ॥ (८०४)

पदपाठः—तम्, त्वा, धर्त्तारम् २ । ओण्योः ६ । पवमान सं० । स्वर्दृशम् २ । हिन्वे क्रि० । वाजेषु ७ । वाजिनम् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(पवमान) शुद्धिसंपादक ! सोम ! (तम्) पूर्वमन्त्रोक्तम् (ओण्योः) द्यावापृथिव्योः (धर्त्तारम्) स्वप्रभावेन धारकं (स्वर्दृशम्) स्वः=सूर्य्यमिव दृष्टेः सहायकं (वाजिनम्) बलवन्तं बलप्रदं च (त्वा) त्वाम् (वाजेषु) बलेषु निमित्तभूतेषु (हिन्वे) प्रीणयामि ॥

ओण्याविति द्यावापृथिव्योर्नाम निघं० ३ । ३०, स्वरिति दिव आदित्यस्य च साधारणं नाम निघं० १ । ४, हिन्वतिः प्रीणनार्थो भौवादिकः ॥ ऋग्वेदे ९ । ६५ । ११ऽपि ॥२॥

भाषार्थः—(पवमान) पवित्रतासंपादक ! सोम ! (तम्) पूर्व मन्त्र में वर्णित (ओण्योः धर्त्तारम्) द्युलोक और पृथिवी लोक को अपने प्रभाव से धारण करने वाले (स्वर्दृशम्) सूर्य्य के समान दृष्टि के सहायक (वाजिनम्) बलयुक्त और बलदायक (त्वा) तुझ को (वाजेषु) बलों के निमित्त (हिन्वे) प्रसन्न=आत्मानुकूल करता हूं ॥

निघण्टु ३ । ३०, १ । ४ इत्यादि का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ६५ । ११ में भी ॥ २ ॥

अथ तृतीया—

३ २ ३ २ ३ २उ ३ १ २ ३ १ २
अया चित्तो विपानया हरिः पवस्व धारया ।
२ ३ १ २
युजं वाजेषु चोदय ॥ ३ ॥ [१०] (८०५)

पदपाठः—अया ३ । चित्तः १ । विपा ३ । अनया ३ । हरिः १ । पवस्व क्रि० । धारया ३ । युजम् २ । वाजेषु १ । चोदय क्रि० ॥

अन्वितपदार्थः—पूर्वमन्त्रानुवृत्तेः पवमान ! सोम ! त्वम् (अया) गतिमत्या (अनया) हूयमानया (धारया) (विपा) मेधाविना ऋत्विजा हुतः (हरिः) हरितवर्णः सन् (चित्तः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्गतः (पवस्व) क्षर । तथा–(युजम्) सहयोगिनं सखायमिन्द्रम् (वाजेषु) मेघयुद्धेषु (चोदय) प्रवर्त्तय ॥

अय गतौ (भ्वा० आ०) नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३ । १ । १३४ इति पचाद्यच्, सुपां सुलुगिति ७ । १ । ३९ तृतीयाया आकारः॥चित्तः–चिती संज्ञाने इत्यस्मान्निष्ठान्तः । धातूनामनेकार्थत्वान्निर्गतः ॥ विपइति मेधाविनाम निघं० ३ । १५, वाजे इति संग्रामनाम निघं० २।१७॥ऋग्वेदे ९।६५।१२ऽपि॥३॥

भाषार्थः–पूर्व मन्त्र से अनुवृत्ति लेकर–हे पवमान ! सोम ! तू (अया) जाने वाली (अनया) इस (धारया) धारा से (विपा) विद्वान् ऋत्विज् द्वारा हवन किया हुवा (हरिः) हरितवर्ण (चित्तः) निकला हुवा (पवस्व) फैल । और (युजम्) सहयोगी इन्द्र को (वाजेषु) मेघयुद्धों में (चोदय) प्रवृत्त कर ॥

अर्थात् जब विद्वान् ऋत्विज् चलती धार से सोम का हवन करते हैं तब वह हरितवर्ण धूम्ररूप में परिणत होता हुवा मेघों तक पहुंचता और वर्षा का हेतु होता है ॥

अष्टाध्यायी ३ । १ । १३४, ७ । १ । ३९ और निघण्टु ३ । १५, २ । १७ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ६५ । १२ में भी ॥ ३ ॥

अथ द्वितीयतृचसूक्तस्य–उपमन्युर्वासिष्ठऋषिः । पवमानः सोमो देवता । त्रिष्टुप्छन्दः ॥ तत्र प्रथमा–

२३ १ २ ३ १ २ ३ ३१२ ३ २ ३ २
वृषा शोणो अभि कनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
१ २ ३१र २र ३ १ २३१२ ३ २ ३ २
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ।१।(८०६)

पदपाठः–वृषा १ । शोणः १ । अभि अ० । कनिक्रदत् क्रि० । गाः २ । नदयन् १ । एषि क्रि० । पृथिवीम् २ । उत अ० । द्याम् २ । इन्द्रस्य ६ । इव अ० । वग्नुः १ । आशृण्वे क्रि० । आजौ ७ । प्रचोदयन् १ । अर्षसि क्रि० । वाचम् २ । आ अ० । इमाम् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(इव) यथा (वृषा) वृषभः (गाः) धेनूः (अभि) अभिलक्ष्य (कनिक्रदत्) शब्दायते तथैव सोम ! त्वमपि (पृथिवीम् उत द्याम्) द्यावाभूमी (नदयन्) शब्देन पूरयन् (एषि) गच्छस्याकाशम् । तदा च (इन्द्रस्य) विद्युतः (वग्नुः) शब्दः (आजौ) मेघसूर्ययोःसंग्रामे (आशृण्वे) आश्रूयते । एवं (शोणः) पीतवर्णस्त्वम् (इमाम्) श्रूयमाणां (वाचम्) चटचटाशब्दरूपाम् वाणीम् (प्रचोदयन्) उत्पादयन् (आ) समन्ततः (अर्षसि) गच्छसि ॥

दाधर्त्तिदर्धर्त्तिबोभूत्वित्यादिना ७ । ४ । ६५ कनिक्रददिति निपातितः ॥ वग्नुरिति वाङ्नाम निघं० १ । ११ ॥ आजाविति संग्रामनाम निघं० २ । १७ ॥ ऋग्वेदे तु ९ । ९७ । १३ प्रचोदयन्= प्रचेतयन्निति पाठःसएवचाऽत्रापिसायणाचार्येणभ्रान्त्याव्याख्यातः १

भाषार्थः—(इव) जैसे (वृषा) सांड वा बैल (गाः) गौओं को (अभि) देखकर (कनिक्रदत्) शब्द करता है ऐसे ही सोम ! तू भी (पृथिवीम् उत द्याम्) पृथिवी और द्युलोक को (नदयन्) शब्द से पूरित करता हुआ (एषि) आकाश को जाता है । तब (इन्द्रस्य) विद्युत् का (वग्नुः) शब्द (आजौ) मेघ और सूर्य के संग्राम में (आशृण्वे) सब ओर सुना जाता है । इस प्रकार (शोणः) पीतवर्ण सोम ! तू (इमाम्) इस चट चटा शब्दरूपिणी (वाचम्) वाणी को (प्रचोदयन्) बोलता हुआ (आ) सब ओर (अर्षसि) जाता है॥

अष्टाध्यायी ७ । ४ । ६५ ॥ निघण्टु १ । ११, २ । १७ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ९७ । १३ में प्रचोदयन् के स्थान में प्रचेतयन् पाठ है और सायणाचार्य ने भ्रान्ति से उसी की व्याख्या यहां भी करदी है॥१॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

३ २ ३ १ २ ३ १ २ ३१२ ३ १ २ ३ ३ २
रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमꣳशुम् ।
१ २ ३ १ २ ३ १ २र ३ १ २
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः २(८०७)

पदपाठः—रसाय्यः १ । पयसा ३ । पिन्वमानः, ईरयन् १ । एषि क्रि० । मधुमन्तम्, अंशुम् २ । पवमान सं० । संतनिम् २ । एषि क्रि० । कृण्वन् १ । इन्द्राय ४ । सोम सं० । परिषिच्यमानः १ ॥

अन्वितपदार्थः—(पवमान) शोध्यमान ! (सोम) (रसाय्यः) रसालुः (पयसा) प्राणेन (पिन्वमानः) वृद्धिंगतः (इन्द्राय) सूर्याय (ईरयन्) ऊर्ध्वं गच्छन् त्वम् (मधुमन्तम्) माधुर्योपेतम् (अंशुम्) किरणगतं जलकणम् (एषि) प्राप्नोषि (परिषिच्यमानः) सर्वतो वर्षन् (सन्तनिम्) विस्तारम् (कृण्वन्) कुर्वन् (एषि) गच्छसि ॥

पयसा=प्राणेन । प्राणः पयः । श० ६ । ४ । २ । १५॥ रसाय्य इत्यत्र रसेरौणादिक आय्यप्रत्ययः (३ । ९६ उणा०) सन्तनिमित्यत्र संपूर्वात् (तनुविस्तारे) धातोरिप्रत्ययः ॥ ऋग्वेदे ९ । ९७ । १४ ऽपि ॥ २ ॥

भाषार्थः—(पवमान) शोधे जाते हुवे (सोम) सोम ! तू (रसाय्यः) रसालु और (पयसा पिन्वमानः) प्राण से वृद्धि को प्राप्त होता हुवा (इन्द्राय) सूर्य के लिये(ईरयन्)ऊपर उठता हुवा (मधुमन्तम्)मधुरतायुक्त(अंशुम्)किरणगत जलकण को (एषि) प्राप्त होता है (परिषिच्यमानः) सब ओर वर्षता और (सन्तनिम्) विस्तार (कृण्वन्) करता हुवा (एषि) जाता है ॥

शतपथ ६ । ५ । २ । १५ उणादि ३ । ९६ इत्यादि प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ९७ । १४ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

३ १ २ ३ १र २र ३ १ २ ३ १ २ ३ २ २ ३ २ ३
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् । परि वर्ण
१ २ ३ १ २ ३ १ २ ३ १ २ ३ २
भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः॥३॥[११](८०८)

पदपाठः–एवा अ० । पवस्व क्रि० । मदिरः १ । मदाय४ । उदग्राभस्य ६ । नमयन् १ । वधस्नुम् २ । परि अ० । वर्णम् २ । भरमाणः १ । रुशन्तम् २ । गव्युः १ । नः ६ । अर्ष क्रि० । परि अ० । सोम सं० । सिक्तः १ ॥

अन्वितपदार्थः–(सोम) ओषधिराज ! (एवा) एवम् (मदिरः) हर्षप्रदः (रुशन्तम्) आरोचमानं श्वेतं (वर्णम्) (परि) सर्वतः (भरमाणः) धारयन् (सिक्तः) अग्नावाहुतः (गव्युः) गाः किरणानिच्छुः (उदग्राभस्य) मेघस्य (वधस्नुम्) वधेन जातं प्रस्रवन्तं सानुम् (नमयन्) प्रह्वीकुर्वन् (नः) अस्माकं (मदाय) हर्षाय (परि अर्ष) सर्वतः प्रसृतो भव ॥ ऋग्वेदे तु ९।९७।१५ वधस्नैरित्यन्तरम् ॥ २ ॥

भाषार्थः–(सोम) ओषधिराज ! (एवा) इस प्रकार (मदिरः) हर्षदायक, (रुशन्तं, वर्णं, परि, भरमाणः) प्रकाशित श्वेत, रङ्ग को, सर्वतः, धारण करता हुवा (सिक्तः) सींचा=अग्नि में तपकाया हुवा (गव्युः) सूर्यकिरणों को लाने चाहता हुवा (उदग्राभस्य, वधस्नुं, नमयन्) मेघ के, तपकते सानु को, नमाता हुवा (नः) हमारे (मदाय) हर्ष के लिये (परि–अर्ष) सब ओर फैल ॥ ऋ० ९ । ९७ । १५ में–वधस्नैः पाठ है ॥ २ ॥

अथ चतुर्थखण्डे प्रथमस्य प्रगाथस्य सूक्तस्य शंयुर्बार्हस्पत्य ऋषिः ।
इन्द्रो देवता । बृहती छन्दः ॥ तत्र प्रथमा–

१र २र ३ १ २र ३ १ २ २ ३ १ २ ३
त्वामिद्धि हवामहे सातौ वाजस्य कारवः । त्वां वृत्रेष्विन्द्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २३ २उ ३ १ २
सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥ १॥ (८०९) व्याख्याता (२३४)

अथ द्वितीया-

१र २र ३ २ ३ १ २ ३ १ २
स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः।
१ २र३ २र ३१ २ ३२उ ३ २ ३ १ २
गामश्वं रथ्यमिन्द्र सङ्किर सत्रा वाजं न जिग्युषे॥२॥ [१२] (८१०)

पदपाठः—सः १। त्वम् १। नः ४। चित्र, वज्रहस्त सं०। धृष्णुया १। महः १। स्तवानः १। अद्रिवः सं०। गाम्, अश्वम्, रथ्यम् २। इन्द्र सं०। संकिर क्रि०। सत्रा अ०। वाजम् २। न अ०। जिग्युषे ४॥

अन्वितपदार्थः—(चित्र) आश्चर्यस्वरूप ! (वज्रहस्त) वज्रं हस्ते सुखमये स्वरूपे यस्य तत्संबुद्धौ (अद्रिवः) मेघानां स्वामिन् ! (इन्द्र) परमेश्वर ! (सः) पूर्वमन्त्रोक्तः (त्वम्) (धृष्णुया) धृष्णुः शत्रूणां धर्षयिता (महः) महान् (स्तवानः) सन् (नः) अस्मभ्यम् (गाम्, अश्वम्) गवाश्वादिकम् (रथ्यम्) रथेसाधुं वाहकम् (सत्रा) सदा (संकिर) प्रयच्छ (न) यथा (जिग्युषे) जितवते वीराय (वाजम्) अन्नाद्युपहारं भोगार्थं प्रयच्छन्ति तद्वत्॥

धृष्णुयेत्यत्र—सुपां सुलुगित्यादिना ७।१।३९ प्रथमैकवचनस्य याऽऽदेशः॥ वज्रहस्त इत्यत्र—हसिमृग्रिणवामिदमिलूपूधूर्विभ्य-स्तन्॥ (उणा० ३। ८६) इत्यनेन हस हसने इति धातोस्तन् ऋग्वेदे ६।४६।२ऽपि॥ २॥

भाषार्थः—(चित्र) हे आश्चर्यमय ! (वज्रहस्त) अपने सुखस्वरूप में दुष्टदमनार्थ दण्डधारण करने वाले ! (अद्रिवः) मेघों के स्वामी ! (इन्द्र) परमेश्वर ! (सः) पूर्ववर्णित (त्वम्) आप (धृष्णुया) शत्रुओं को दबाने वाले (महः) महान् (स्तवानः) स्तुति किये जाते हुवे (नः) हमारे लिये

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(गाम् अश्वम्) गौ बैल घोड़े आदि पशु (रथ्यम्) वाहनयोग्य (सत्रा) सदा (संकिर) दीजिये । (न) जैसे (जिग्युषे) जीतने वाले वीर को (वाजम्) अन्नादि उपहार भोगार्थ देते हैं तद्वत् ।।

अष्टाध्यायी ७ । १ । ३९ उणादि ३ । ८६ के प्रमाण संस्कृत भाष्य में देखिये ।। ऋ० ६ । ४६ । २ में भी ।। २ ॥

अथ प्रगाथस्य द्वितीयसूक्तस्य –प्रस्कण्वः काण्व ऋषिः ।
इन्द्रो देवता । बृहती छन्दः । तत्र प्रथमा–

३ १र २र ३ १ २ ३ १ २ ३ १ २ ३ २ १ २ ३ १ २ ३ १ २

अभि प्र वः सुराधसमिन्द्रमर्च यथाविदे । यो जरितृभ्यो मघवा

३ १ २ ३ १ २ ३ १ २

पुरूवसुः सहस्रेणेव शिक्षति ॥१॥ (८११) व्याख्याता (२३५)

अथ द्वितीया–

३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २ ३

शतानीकेव प्रजिगाति धृष्णुया हन्ति वृत्राणि दाशुषे । गिरेरिव

१र २र ३ १ २ ३ १ २

प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः॥२ ॥ [१३] (८१२)

पदपाठः– शतानीकेव अ० । प्रजिगाति क्रि० । धृष्णुया १ । हन्ति क्रि० । वृत्राणि २ । दाशुषे ४ । गिरेरिव अ० । प्र अ० । रसाः १ । अस्य ६ । पिन्विरे क्रि० । दत्राणि १ । पुरुभोजसः ६ ।।

अन्वितपदार्थः—(धृष्णुया) धर्षणशीलः पुरुषः (शतानीकेव) बहूनि शत्रुसैन्यानीव, इन्द्रः (वृत्राणि) पापानि (प्रजिगाति) जयति (हन्ति) नाशयति च । तथा (पुरुभोजसः)असंख्यधनस्य (अस्य) इन्द्रस्य परमेश्वरस्य (दत्राणि) दानानि (दाशुषे) दानशीलाय यजमानाय (प्र पिन्विरे) प्रवहन्ति । दृष्टान्तः–(गिरेरिव रसाः) यथा पर्वतस्य जलप्रवाहास्तद्वत् ॥ ऋग्वेदे ८ । ४९ । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(धृष्णुया) तेजस्वी वीर (शतानीकेव) बहुत सी शत्रुसेनाओं को जीतता और नष्ट करता है वैसे ही परमेश्वर (वृत्राणि) पापों को (प्रजिगाति) जीतता और (हन्ति) नष्ट करता है। तथा (पुरुभोजसः) असंख्य धन वाले (अस्य) इस परमेश्वर के (दत्राणि) दान (दाशुषे) दान यज्ञादि करने वाले यजमान के लिये (प्रपिन्विरे) प्रवाह से बहते हैं। दृष्टान्त—(गिरेरिव रसाः) जैसे पर्वत के जल बहते हैं तद्वत् ॥ ऋ०८।४९।२ में भी ॥२॥

अथ तृतीयप्रगाथस्य—नृमेधा ऋषिः। इन्द्रो देवता। बृहती छन्दः ॥

तत्र प्रथमा—

२ ३१२ २२ ३ १ २ १२३ १ २

त्वामिदाह्योनरो पीप्यन्वाज्रिन्भूर्णयः। सइन्द्र स्तोमवाहस

३ २ ३ २ ३ १ २३१ २

इह श्रुध्युप स्वसरमागहि ॥१॥ (८१३) व्याख्याता(३०२)

अथ द्वितीया—

१ २ ३१२ ३ १ २ ३१२ २३१

मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वयाभूषन्तिवेधसः। तव श्र-

२ ३१ २ २१२

वांस्युपमान्युक्थ्य सुतेष्विन्द्रगिर्वणः ॥२॥ [१४] (८१४)

पदपाठः—मत्स्व क्रि० । सुशिप्रिन्, हरिवः सं० । तम् २ । ईमहे क्रि० । त्वया ३ । भूषन्ति क्रि० । वेधसः १ । तव ६ । श्रवांसि, उपमानि १ । उक्थ्य सं० । सुतेषु ७ । इन्द्र, गिर्वणः सं० ॥

अन्वितपदार्थः—(सुशिप्रिन्) शोभनव्याप्तिमन्! (हरिवः) कर्मवन्! (उक्थ्य) स्तुत्य! (गिर्वणः) गीर्भिर्वननीय! (इन्द्र) परमेश्वर! (तम्) त्वाम् (ईमहे) याचामहे प्रार्थयामहे (त्वया) त्वत्साहाय्येन (वेधसः) मेधाविनउपासकाः (भूषन्ति) शोभिताभवन्ति (तव) (श्रवांसि) यशांसि (उपमानि) उपमानानि सन्ति नतूपमेयानि कैश्चित्। स त्वम् (सुतेषु) पुत्रतुल्येषूपासकेषु (मत्स्व) प्रसन्नो भव ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुशिप्रिन् इत्यत्र—स्फायितञ्चिवञ्चिशकिशिपीत्यादिना (उणा० २। १३) स्पृल्गतौ इत्यस्माद्धातोः रक्। बाहुलकात्सृशब्दस्य शिभावः (पा० ३। १। ८५)॥ ऋग्वेदे तु ८। ९९।२ सुशिप्र। तदीमहे। त्वे आ भूषन्ति। उक्थ्या इत्यन्तरम्॥२॥

भाषार्थः—(सुशिप्रिन्) हे उत्तम व्याप्ति वाले! (हरिवः) कर्मों की धरोहर रखने वाले! (उक्थ्य) स्तुत्य! (गिर्वणः) वाणियों से भजनीय! (इन्द्र) परमेश्वर! (तम्) पूर्वोक्त गुणगरिष्ठ आप से (ईमहे) हम मांगते हैं प्रार्थना करते हैं कि (त्वया) आप की सहायता से (वेधसः) बोधयुक्त उपासक लोग (भूषन्ति) शोभमान होते हैं। (तव) आपके (अवांसि) यश (उपमानि) उपमान हैं न कि किसी से उपमेय। वह आप (सुतेषु) पुत्रतुल्य भक्तों पर (मत्स्व) प्रसन्न हूजिये॥

उणादि २। १३ इत्यादि के प्रमाण और ऋ० ८। ९९। २ के पाठभेद संस्कृतभाष्य में देखिये॥ २॥

पञ्चमखण्डे प्रथमर्चसूक्तस्य-असहीयुर्ऋषिः। पवमानः सोमो देवता। गायत्री छन्दः॥ तत्र प्रथमा—

२ ३ २ ३ १ २ ३ १ २ ३ १ २
यस्ते मदो वरेण्यस्तेनापवस्वान्धसा।
३ १ २ ३ २
देवावीरघशꣳसहा॥१॥ (८१५) व्याख्याता (४७०)

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवे दिवे।
१ २ ३ १ २
गोषातिरश्वसा असि॥ २॥ (८१६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(धृष्णुया) तेजस्वी वीर (शतानीकेव) बहुत सी शत्रुसेनाओं को जीतता और नष्ट करता है वैसे ही परमेश्वर (वृत्राणि) पापों को (प्रजिगाति) जीतता और (हन्ति) नष्ट करता है। तथा (पुरुभोजसः) असंख्य धन वाले (अस्य) इस परमेश्वर के (दत्राणि) दान (दाशुषे) दान यज्ञादि करने वाले यजमान के लिये (प्रपिन्विरे) प्रवाह से बहते हैं। दृष्टान्त-(गिरेरिव रसाः) जैसे पर्वत के जल बहते हैं तद्वत् ॥ ऋ०८।४९।२ में भी ॥२॥

अथ तृतीयप्रगाथस्य-नृमेधा ऋषिः। इन्द्रो देवता। बृहती छन्दः ॥

तत्र प्रथमा-

२ ३१२ २२ ३ १ २ १२३ १ २

त्वामिदाह्योनरो पीप्यन्वाज्रिन्भूर्णयः। सइन्द्र स्तोमवाहस

३२३२३ १२३१२

इह श्रुध्युप स्वसरमागहि ॥१॥ (८१३) व्याख्याता(३०२)

अथ द्वितीया-

१ २ ३१२ ३१२ ३१२ २३१

मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वयाभूषन्तिवेधसः। तव श्र-

२ ३१२ २१२

वांस्युपमान्युक्थ्य सुतेष्विन्द्रगिर्वणः ॥२॥ [१४] (८१४)

पदपाठः-मत्स्व क्रि०। सुशिप्रिन्, हरिवः सं०। तम् २। ईमहे क्रि०। त्वया ३। भूषन्ति क्रि०। वेधसः १। तव ६। श्रवांसि, उपमानि १। उक्थ्य सं०। सुतेषु ७। इन्द्र, गिर्वणः सं०॥

अन्वितपदार्थः-(सुशिप्रिन्) शोभनव्याप्तिमन्! (हरिवः) कर्मवन्! (उक्थ्य) स्तुत्य! (गिर्वणः) गीर्भिर्वननीय! (इन्द्र) परमेश्वर! (तम्) त्वाम् (ईमहे) याचामहे प्रार्थयामहे (त्वया) त्वत्साहाय्येन (वेधसः) मेधाविनउपासकाः (भूषन्ति) शोभिताभवन्ति (तव) (श्रवांसि) यशांसि (उपमानि) उपमानानि सन्ति नतूपमेयानि कैश्चित्। स त्वम् (सुतेषु) पुत्रतुल्येषूपासकेषु (मत्स्व) प्रसन्नो भव॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुशिप्रिन् इत्यत्र—स्फायितञ्चिवञ्चिशकिशिपीत्यादिना (उणा० २ । १३) स्पृ लगतौ इत्यस्माद्धातोः रक् । बाहुलकात्सृशब्दस्य शिभावः (पा० ३ । १ । ८५) ॥ ऋग्वेदे तु ८ । ९९ । २ सुशिप्र । तदीमहे । त्वे आ भूषन्ति । उक्थ्या इत्यन्तरम् ॥ २ ॥

भाषार्थः—(सुशिप्रिन्) हे उत्तम व्याप्ति वाले ! (हरिवः) कर्मों की धरोहर रखने वाले ! (उक्थ्य) स्तुत्य ! (गिर्वणः) वाणियों से भजनीय ! (इन्द्र) परमेश्वर ! (तम्) पूर्वोक्त गुणगरिष्ठ आप से (ईमहे) हम मांगते हैं प्रार्थना करते हैं कि (त्वया) आप की सहायता से (वेधसः) बोधयुक्त उपासक लोग (भूषन्ति) शोभमान होते हैं । (तव) आपके (अवांसि) यश (उपमानि) उपमान हैं न कि किसी से उपमेय । वह आप (सुतेषु) पुत्रतुल्य भक्तों पर (मत्स्व) प्रसन्न हूजिये ॥

उणादि २ । १३ इत्यादि के प्रमाण और ऋ० ८ । ९९ । २ के पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

पञ्चमखण्डे प्रथमर्चसूक्तस्य-असहीयुर्ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

२ ३ २ ३ १ २ ३ १ २ ३ १ २
यस्ते मदो वरेण्यस्तेनापवस्वान्धसा ।
३ १ २ ३ २
देवावीरघशꣳसहा ॥ १ ॥ (८१५) व्याख्याता (४७०)

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवे दिवे ।
१ २ ३ १ २
गोषातिरश्वसा असि ॥ २ ॥ (८१६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—जघ्निः १। वृत्रम्, अमित्रियम् २। सस्निः १। वाजम् २। दिवे दिवे अ०। गोषातिः १। अश्वसाः १। असि क्रि०॥

अन्वितपदार्थः—सोमः (अमित्रियं वृत्रं जघ्निः) अमित्र कर्मकरस्य शत्रोर्नाशको घातको वा (दिवे दिवे) प्रतिदिनं (वाजं सस्निः) बलस्य दाता (गोषातिः) इन्द्रियदायकः (अश्वसाः) प्राणप्रदः (असि) भवति॥

ऋग्वेदे तु ९। ६१। २० गोषा उ अश्वसा इत्यन्तरम्॥२॥

भाषार्थः—सोम (अमित्रियं वृत्रं जघ्निः) अमित्रकर्मकारक त्रुश का घातक, (वाजं सस्निः) बल का दायक, (गोषातिः) इन्द्रियों का दाता और (अश्वसाः) प्राणप्रद (असि) है॥ ऋ० ९। ६१। २० में "गोषा उ अश्वसाः" ऐसा पाठ है॥ २॥

अथ तृतीया—

१ २ ३ १ २ ३ २ ३ २ ३ १ २
संमिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः।
१ २ ३ २उ ३ २
सीदञ्छ्येनो न योनिमा॥३॥ [१५] (८१७)

पदपाठः—संमिश्लः १। अरुषः १। भुवः क्रि०। सूपस्थाभिः ३। न अ०। धेनुभिः ३। सीदन् १। श्येनः १। न अ०। योनिम् २। आ अ०॥

अन्वितपदार्थः—सोमः (सूपस्थाभिः) शोभनोपस्थानाभिः (धेनुभिः) गोभिः (न) इव वाग्भिः सह (संमिश्लः) मिश्रितः (योनिम्) वेदिम् (आसीदन्) हूयमानः सन् (श्येनः न) श्येन इव (अरुषः) गतिमान् (भुवः) भवति॥

वाचमेव तद्देवा धेनुमकुर्वत तथैवैतद्यजमानो वाचमेव धेनुं कुरुते० शतपथे ९। १। २। १७॥ ऋहनिभ्यामूषन् (उणा० ४। ७३) इति गत्यर्थाद्दृच्छतेरूषनि वर्णव्यत्ययेनोकारस्य ह्रस्वत्वे अरुषः॥ ऋग्वेदे तु ९। ६१। २१ भुवः=भवेति पाठः॥ ३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—सोम (सूपस्थाभिः) सुन्दर उपस्थान वाली (धेनुभिः) गौओं के (न) समान वेदवाणियों के साथ (संसृष्टः) मिला हुवा (योनिम्) वेदी में (आसीदन्) होम होते हुवे स्थित हुवा (श्येनः) श्येन पक्षी (न) सा (अरुषः) तीव्रगामी (भुवः) होता है ॥

शतपथ ९ । १ । २ । १७ उणादि ४ । ७३ निघण्टु १ । ११ इत्यादि प्रमाण और ऋ० ९ । ६१ । २१ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ द्वितीयतृचस्य—नहुषो मानव ऋषिः । पवमानः सोमो देवता । अनुष्टुप्छन्दः ॥ तत्र प्रथमा—

३ २ ३ २ ३ २उ ३ १ २ ३ १ २ २ ३ १ २ ३
अयं पूषा रयिर्भगः सोमः पुनानो अर्षति । पतिर्विश्वस्य
१ २३क २र ३ १ २ ३ २
भूमनो व्यख्यद्रोदसी उभे॥ १॥(८१८)व्याख्याता(५४६)

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
समुप्रिया अनूषत गावो मदाय घृष्वयः ।
१ २ ३१र २र ३ १ २
सोमासः कृण्वते पथः पवमानास इन्दवः ॥२॥ (८१९)

पदपाठः—सम्, उ अ० । प्रियाः १ । अनूषत क्रि० । गावः १ । मदाय ४ । घृष्वयः, सोमासः १ । कृण्वते क्रि० । पथः २ । पवमानासः, इन्दवः १ ॥

अन्वितपदार्थः—(उ) प्रसिद्धौ (प्रियाः) प्रीतिकर्यः (घृष्वयः) अत्यन्तदीप्ताः (गावः) वाचः (मदाय) हर्षाय (सम् अनूषत) सोमं सम्यग्वर्णयन्ति प्रशंसन्ति (पवमानासः) शुद्धिं संपादयन्तः (इन्दवः) दीप्ताः (सोमासः) सोमाः (पथः) मार्गान् (कृण्वते) आकाशगमनाय कुर्वन्ति॥ऋग्वेदे ९ । १०१ । ८ऽपि ॥२॥

भाषार्थः—(उ) प्रसिद्ध है कि (प्रियाः) प्रीतिकरी (घृष्वयः) अत्यन्त दीप्त (गावः) वाणियें (मदाय) हर्ष के लिये (सम् अनूषत) सोम का भले

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकार वर्णन करती हैं और (पवमानासः) शुद्धि करते हुवे (द्युन्दवः) दीप्तिमान् (सोमासः) सोम (पथः) मार्गों को (कृण्वते) आकाश गमनार्थ करते हैं ॥ ऋ० ९ । १०१ । ८ में भी ॥ २ ॥

अथ तृतीया—

१ २र ३१र २र ३ १ २ ३ १ २

य ओजिष्ठस्तमाभर पवमान श्रवाय्यम् ।

१ २र ३ २ ३ २ ३२उ ३ १ २

यः पञ्च चर्षणीरभि रयिं येन वनामहे ॥३॥[१६](८२०)

पदपाठः—यः, ओजिष्ठः १ । तम् २ । आभर क्रि० । पवमान सं० । श्रवाय्यम् २ । यः १ । पञ्च, चर्षणीः २ । अभि अ० । रयिम् २ । येन ३ । वनामहे क्रि० ॥

अन्वितपदार्थः—(पवमान) सोम ! वा शुद्धस्वरूप परमात्मन् ! (यः) (ओजिष्ठः) ओजस्वितमः त्वद्रसः, भवदीयानन्दो वास्ति (यः) (पञ्च चर्षणीः) यजमानपञ्चमांश्चतुरोहोत्रादीनृत्विजः, यद्वा पञ्च जनान्पञ्च ज्ञानेन्द्रियाणि (अभि) व्याप्य वर्त्तते (येन) (रयिम्) धनाद्यैश्वर्यं (वनामहे) संभजामहे (तम्) (श्रवाय्यम्) श्रवणीयं प्रशस्यम् (आभर) आहर प्रापयाऽस्मानिति शेषः ॥ ऋग्वेदे ९ । १०१ । ९ऽपि ॥३॥

भावार्थः—(पवमान) सोम ! वा शुद्धस्वरूप परमात्मन् ! (यः) जो (ओजिष्ठः) अति बलवान् तेरा रस वा आप के आनन्द का रस है और (यः) जो (पञ्च) पांच (चर्षणीः) १ यजमान और ४ होता आदि ऋत्विज् इन ५ मनुष्यों को वा पाञ्चज्ञानेन्द्रियों को (अभि) व्याप कर वर्त्तमान है और (येन) जिस से (रयिम्) धनादि ऐश्वर्य को (वनामहे) हम संभजन करते हैं (तम्) उस (श्रवाय्यम्) श्रवण करने योग्य प्रशंसनीय रस वा आनन्द रस को (आभर) हमें प्राप्त करा, वा कराइये ॥ ऋ० ९ । १०१ । ९ में भी ॥ ३ ॥

अथ तृतीयतृचस्य—आद्ययोर्द्वयोः सिकतानिवारी, तृतीयायाः पृष्णयोऽजा ऋषयः । पवमानः सोमो देवता । जगती छन्दः ॥

तत्र प्रथमा—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २ ३ २ उ ३ १ ,२ ३ १ २र
वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां
३ २ ३ १र २र ३ १ ३ ३ १ २ ३ १ २
दिवः । प्राणा सिन्धूनां कलशां अचिक्रददिन्द्रस्य हार्द्यावि-
३ १ २ ३ १ २
शन्मनीषिभिः ॥ १ ॥ (८२१) व्याख्याता (५५९)

अथ द्वितीया–

३ १ २ ३ २ ३१र २र ३ २उ ३ १ २
मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशां असिष्यदत् ।
३ २ ३ १ २ ३ १ ३ २ ३ २ १ २ ३ २ ३ १ २ ३ १ २
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायुꣳ सख्याय वर्धयन्॥

॥ २ ॥ (८२२)

पदपाठः—मनीषिभिः ३ । पवते क्रि० । पूर्व्यः, कविः १ । नृभिः ३ । यतः १ । परि अ० । कोशान् २ । असिष्यदत् क्रि० । त्रितस्य ६ । नाम २ । जनयन् १ । मधु २ । क्षरन् १ । इन्द्रस्य ६ । वायुम् २ । सख्याय ४ । वर्धयन् १ ॥

अन्वितपदार्थः—अयं सोमः (मनीषिभिः) मेधाविभिर्ऋत्विग्भिः (पवते) पूयते । ततः (पूर्व्यः) पुराणःपक्वः (कविः) बुद्धितत्त्ववान् (नृभिः यतः) नेतृभिः पुरुषैर्यत्नेन प्रयुक्तः सन् (कोशान्) द्रोणकलशान् (परि) वर्जयित्वा ततो निःसृत्येति यावत् (त्रितस्य) त्रिषु लोकेषु विस्तृतस्य [इति सायणोऽपि] (इन्द्रस्य) विद्युत्तत्त्वस्य (नाम) नामकमुदकम् (जनयन्) उत्पादयन् (मधु) मधुरं रसं (क्षरन्) वर्षयन् (सख्याय) सखित्वाय (वायुम्) प्रसिद्धम् (वर्धयन्)प्रवृद्धं कुर्वन् (असिष्यदत्) स्यन्दते ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेदे तु ९। ८६। २० असिष्यदत्=अचिक्रदत्। वायुं=वायोः। वर्धयन्=कर्त्तवे इति पाठाः ॥ २ ॥

भाषार्थः—यह सोम (मनीषिभिः) विद्वानों द्वारा (पवते) शुद्ध किया जाता है। फिर (पूर्व्यः) पुराना (कविः) बुद्धि तत्त्ववाला (नृभिः यतः) कर्मकर्त्ता पुरुषों से यत्नपूर्वक प्रयोग में लाया जाता हुवा (कोशान्) द्रोणकलशों को (परि) छोड़ कर=उन से निकल कर (त्रितस्य) तीनों लोकों में फैले हुवे [यहां सायणाचार्य ने भी यही अर्थ किया है, त्रित नामक ऋषि अर्थ नहीं किया] (इन्द्रस्य) वायुविशेष के (नाम) निधाने वाले जल को (जनयन्) उत्पन्न करता हुवा (मधु) मधुर रस को (क्षरन्) वर्षाता हुवा (सख्याय) स्नेह वा मित्रता के लिये (वायुम्) इन्द्रनामक वायु विशेष को (वर्धयन्) बढ़ाता हुवा (असिष्यदत्) वर्षता है ॥ ऋ० ९। ८६। २० के पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

३१ २३ २ ३१२ ३२१ २२ ३२

अयं पुनान उषसो अरोचयदयं सिन्धुभ्यो अभवदु लोककृत्।

३२उ ३१२ ३२ ३२३ १२ ३१२ ३ १२ ३२

अयं त्रिःसप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः

॥ ३ ॥ [१७] (८२३)

पदपाठः—अयम्, पुनानः १। उषसः २। अरोचयत् क्रि०। अयम् १। सिन्धुभ्यः ५। अभवत् क्रि०। उ अ०। लोककृत्, अयम् १। त्रिःसप्त २। दुदुहानः १। आशिरम् २। सोमः १। हृदे ४। पवते क्रि०। चारु २। मत्सरः १॥

अन्वितपदार्थः—(अयम्) सोमः (पुनानः) पवित्रयन्सन् (उषसः) प्रभातान् (अरोचयत्) दीपयति (उ) च (अयम्) सोमः (सिन्धुभ्यः) नदीभ्यः (लोककृत्) लोकानां कर्त्ता [वर्षकत्वात्] (अभवत्) भवति (अयम्) एषः (सोमः)(त्रिःसप्त)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकविंशतिसंख्याकानि=एकं मनो दश प्राणान् दशेन्द्रियाणि(आशिरम्)'रसं (दुदुहानः) अतिशयेन प्रपूरयन् (हृदे) हृदयाय (चारु) शोभनं यथा स्यात्तथा (मत्सरः) हर्षकरः (पवते) पवनवद्याति ॥

सोमयागेन सुवृष्ट्यादिना शोभनाः प्रभाता जायन्ते। नदीप्रवाहवृद्ध्या लोकस्य ऋद्धिर्भवति। सोमसेवनेन प्राणादीनां बलं वर्धते। एष सोमो वायुं व्याप्य चित्तप्रसादकरस्तद्वद्याति ॥ ऋग्वेदे तु १।८६।२१ विरोचयत् इति पाठः ॥ ३ ॥

भाषार्थः—(अयम्) यह सोम (पुनानः) पवित्र करता हुवा (उषसः) प्रभातसमयों को (अरोचयत्) प्रकाशित करता है (उ) और (अयम्) यह सोम (सिन्धुभ्यः) नदियों से (लोककृत्) लोकों का कर्त्ता (अभवत्) है (अयम्) यह (सोमः) सोम (त्रिःसप्त) एक मन, १० इन्द्रियें, १० प्राण=सब एक्कीसों को (आशिरम्) रस से (प्रपूरयन्) भरता हुवा (हृदे) हृदय के लिये (चारु) उत्तम (मत्सरः) हर्षकारक (पवते) पवन के समान वहता है ॥

अर्थात् सोमयाग से सुवृष्टि आदि होकर सुन्दर प्रभात समय होते हैं, नदियों के प्रवाह बढ़ कर लोक की ऋद्धि होती है, सोमसेवन से प्राणादि का बल बढ़ता है। यह सोम वायु को व्याप कर चित्त को हर्षदायक होता हुवा वायु के समान वहता है॥ ऋ० ९।८६। २१ में विरोचयत् पाठ है ॥३॥

अथ षष्ठे खण्डे प्रथमतृचस्य आङ्गिरसः श्रुतकक्षोवा ऋषिः। इन्द्रो देवता। गायत्री छन्दः ॥ तत्र प्रथमा—

३१ २र ३२३१ २र३२३ २

एवा ह्यसि वीरयुरेवा शूर उतस्थिरः।

३२ ३ २३ १२

एवा ते राध्यं मनः ॥ १ ॥ (८२४) व्याख्याता(२३२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

३ २ ३ १ २ ३ १ २ ३ १ २

एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः ।

१ २ ३ १ २

अधा चिदिन्द्र नः सचा ॥ २ ॥ (८२५)

पदपाठः—एव अ० । रातिः १ । तुवीमघ सं० । विश्वेभिः ३ । धायि क्रि० । धातृभिः ३ । अध, चित् अ० । इन्द्र सं० २ । नः ६ । सचा अ० ॥

अन्वितपदार्थः—(तुवीमघ) हे बहुधन ! (इन्द्र) राजन् ! (विश्वेभिः) सर्वैः (धातृभिः) कर्मधारकैराजपुरुषैस्तव (रातिः) वेतनादिदानं (धायि) धार्यते । (अध) अथ च हे राजन् ! त्वं (नः) अस्माकं प्रजाजनानाम् (चित्) अपि (सचा) धनादिदानेन (एव) निश्चयेन व्यापारसहायो भव ॥

ऋग्वेदे तु ८ । ९२ । २९ इन्द्रमेसचा इतिपाठः ॥ धायि इति दधातेर्लुङि कर्मणि रूपम् ॥ २ ॥

भाषार्थः—(तुवीमघ) हे बहुत कोष धन वाले ! (इन्द्र) राजन् ! (विश्वेभिः) सब (धातृभिः) कर्मधारक राजपुरुषों से [आप का] (रातिः) [वेतनादि] देना (धायि) धारण किया जाता है (अध) और आप (नः) हम प्रजाजनों के (चित्) भी (सचा) धनादि देने से (एव) ही व्यापारसहायक हूजिये ॥ ऋ० ८ । ९२ । २९ में—इन्द्र मे सचा—पाठ है ॥ २ ॥

अथ तृतीया—

२ उ ३ १ २ ३ १ २ २

मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते ।

१ २ ३ २ ३ १ २

मत्स्वा सुतस्य गोमतः ॥ ३ ॥ (८२६)

पदपाठः—मा, उ, सु अ० । ब्रह्मेव अ० । तन्द्रयुः १ । भुवः क्रि० । वाजानांपते सं० । मत्स्व क्रि० । सुतस्य, गोमतः ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(वाजानांपते) बलानांपते! राजन्! त्वं (गोमतः) इन्द्रियोत्तेजकस्य (सुतस्य) सोमस्य पानेन (सु) (मत्स्व) माद्य हृष्टो-भव (मा उ) न च (तन्द्रयुः) आलस्यवान् (भुवः) भव। तत्र दृष्टान्तः-(ब्रह्मेव) यथा ब्रह्मा चतुर्वेदविद् ब्राह्मणःसदाऽतन्द्रोजागरूकोऽनल-सोभवति तद्वत् ॥

अयंभावः—ब्राह्मणा हि धनाद्यर्जनरत्यभावेन प्रायोनिर्धना अत-एवालस्यजनकधनसम्पत्त्याद्यभावेनाऽतन्द्रा भवन्त्येव। परं क्षत्रि-येण राज्ञा धनादिभोगसाधनबाहुल्यवतापि न तज्जनितालस्यादि-प्रमादः कार्य इति ॥ ऋग्वेदे ८।९२।३०ऽपि ॥३॥

भाषार्थः—(वाजानांपते) हे सेना वा बलों के रक्षक! राजन्! तू (गोमतः) इन्द्रियों की शक्ति के उत्तेजक (सुतस्य) अभिषुत सोम के पान से (सु मत्स्व) अच्छे प्रकार हृष्ट हो (उ) और (तन्द्रयुः) धनादि सम्पत्ति के प्रमाद से आ-लस्ययुक्त (मा) मत (भुवः) हो। दृष्टान्त—(ब्रह्मेव) जैसे ब्राह्मण लोग प्रायः धनादि भोगसाधनों में रति न होने से उन का सञ्चय नहीं करते और इसी से प्रमाद नहीं करते तद्वत् ॥ ऋ० ८। ९२। ३० में भी ॥ ३ ॥ [१८]

अथ द्वितीयतृचस्य—जेता माधुच्छन्दस ऋषिः। इन्द्रो देवता। अनुष्टुप्छन्दः॥

तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां

१ २ ३ १ २ ३ १ २

वाजानां सत्पतिं पतिम् ॥१॥ (८२७) (व्याख्याता ३४३)

अथ द्वितीया—

३ १ २ २ ३ २ १ २

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।

२ ३ १ २ ३ १ २ ३ १ २

त्वामभि प्रनोनुमो जेतारमपराजितम् ॥२॥ (८२८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—सख्ये ४। ते ६। इन्द्र सं०। वाजिनः १। मा अ०। भेम क्रि०। शवसस्पते सं०। त्वाम् २। अभि प्रनोनुमः क्रि०। जेतारम्, अपराजितम् २॥

अन्वितपदार्थः—(इन्द्र) हे परमेश्वर ! वा हे राजन् ! वयं (ते) तव (सख्ये) सखित्वे आनुकूल्ये वर्त्तमानाः (वाजिनः) अन्नवन्तो बलवन्तश्च सन्तः (मा भेम) कुतश्चिद्भयं न प्राप्नुयाम। (शवसस्पते) हे बलपते ! (जेतारम्) सर्वोत्कृष्टत्वेन वर्त्तमानम् (अपराजितम्) न कस्माच्चिदऽपि पराभवं प्राप्नुवन्तम्(त्वाम्) (अभि प्र नोनुमः) सर्वतः प्रकर्षेण प्रशंसामः॥

नोनुम इत्यत्र णु स्तुतौ इत्यस्माद्धातोर्यङि—णोनः ६।१।६५ इति नत्वम्, यङोऽचि च २।४।७४ इति यङोलुक्, प्रत्ययलोपे प्रत्ययलक्षणम् १।१।६२ इति प्रत्ययलक्षणेन—सन्यङोः ६। १। ९ इति धातोर्द्वित्वम्, गुणोयङ्लुकोः ७। ४। ८२ इति अभ्यासस्य गुणः, सनाद्यन्ताधातवः ३।१। ३२ इति धातुसंज्ञायां, तिप्तस्झी-त्यादिना ३। ४। ७८ लटोमस्, अदादिवद्भावात् अदिप्रभृतिभ्यः शपः २। ४। ७२ इति शपोलुक्॥ ऋग्वेदे तु १। ११। २ प्रणोनुम इत्यन्तरेण णपाठः॥ २॥

भाषार्थः—(इन्द्र) हे परमेश्वर ! वा हे राजन् !(ते) तेरी (सख्ये) मित्रता=अनुकूलता में हम (वाजिनः) अन्न और बल वाले होते हुवे (मा भेम) किसी से न डरें।(शवसस्पते) हे बलपते ! (जेतारम्) जीतने वाले (अपराजितम्) किसी से भी न हारने वाले (त्वाम्) तुझ को (अभि प्र नोनुमः) सर्वतः अत्यन्त स्तुत करते हैं॥

अष्टाध्यायी ६। १। ६५, २। ४। ७४, १। १। ६२, ६। १। ९, ७। ४। ८२, ३। १। ३२, ३। ४। ७८, २। ४। ७२ के प्रमाण और ऋ० १। ११। २ का पाठभेद संस्कृत भाष्य में देखिये॥ २॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ १र २र ३ २ ३ १ २र ३ १ २ ३ १र २र ३
पूर्वीरिन्द्रस्य रातयो न विदस्यन्त्यूतयः । यदा वाजस्य
१ २ ३ २ ३ १ २ ३ २
गोमतः स्तोतृभ्यो मंहते मघम् ॥ ३ ॥ [१९](८२९)

पदपाठः—पूर्वीः १ । इन्द्रस्य ६ । रातयः १ । न अ० । विदस्यन्ति क्रि० । ऊतयः १ । यदा अ० । वाजस्य,गोमतः ६ । स्तोतृभ्यः ४ । मंहते क्रि० । मघम् २ ॥

अन्वितपदार्थः—(यदा) यस्मिन्काले (गोमतः) गोदक्षिणा-युक्तस्य (वाजस्य) विविधतण्डुलादिधान्यस्य (मघम्) धनं (स्तोतृभ्यः) ऋत्विग्भ्यः (मंहते) ददाति श्रद्धया तदा (इन्द्रस्य) परमेश्वरस्य (पूर्वीः) पूर्व्यः सनातन्यः (ऊतयः) रक्षाः (रातयः) अतुलदानक्रियाश्च (न) नैव (विदस्यन्ति) तस्य यजमानस्य श्रद्धालोरुपरि उपक्षिता भवन्ति ॥

अयं भावः—यो यजमानः श्रद्धापूर्वकं यज्ञं सदक्षिणं संपादयति परमात्मा कृपया तदधिकं धनधान्यादि तस्य वर्धयति तद्रक्षां च करोति भृशम् ॥

ऋग्वेदे तु १ । ११ । ३ यदा=यदीति पाठः ॥ मघमिति-धननाम निघं० २ । १० ॥ मंहते इति दानकर्मा निघं० ३ । २० ॥ पूर्वीरिति—वा छन्दसि ६ । १ । १०६ इति पूर्वसवर्णदीर्घः ॥३॥

भाषार्थः—(यदा) जब (गोमतः) गौ के सहित (वाजस्य) अन्न का (मघम्) धन (स्तोतृभ्यः) ऋत्विजों को (मंहते) कोई यजमान श्रद्धा से दान करता है तब (इन्द्रस्य) परमात्मा की (ऊतयः) रक्षायें और (रातयः) दानक्रियायें जो (पूर्वीः) सनातन हैं (न विदस्यन्ति) उस यजमान पर क्षीण नहीं होतीं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थात् श्रद्धा और विधि से यज्ञ करते हुवे गौ आदि धन धान्य की दक्षिणा देने वाले यजमान को परमात्मा कृपया अनेक प्रकार के धन धान्यादि दान से उपस्कृत करता है और उस की रक्षा करता है ॥

ऋ० १ । ११ । ३ का पाठान्तर और निघण्टु २ । १०, ३ । १० अष्टाध्यायी ६ । १ । १७६ के प्रमाण संस्कृत भाष्य में देखिये ॥ ३ ॥

इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥

इति श्रीमत्कण्ववंशावतंस पण्डित हजारीलाल स्वामिसूनुना, हस्तिनापुरपार्श्ववर्त्तिपरीक्षितगढ़निवासिना तुलसीरामस्वामिना कृते सामवेदभाष्ये उत्तरार्चिके तृतीयाध्यायस्य षष्ठः खण्डः समाप्तः ॥

तृतीयोऽध्यायश्च समाप्तः ॥ ३ ॥



CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ चतुर्थोऽध्यायः

तत्र

प्रथमखण्डे-एते असृग्रमिति प्रथम तृचस्य-जमदग्निर्ऋषिः । पवमानः सोमोदेवता । गायत्री छन्दः ॥ तत्र प्रथमा-

३१ २ ३ १ २ ३२ ३ १ २ ३ १ २
एते असृग्रमिन्दवस्तिरः पवित्रमाशवः ।
१ २ ३ १ २२
विश्वान्यभि सौभगा ॥ १ ॥ (८३०)

पदपाठः-एते १ । असृग्रम् क्रि० । इन्दवः १ । तिरः अ० । पवित्रम् २ । आशवः १ । विश्वानि २ । अभि अ० । सौभगा २ ॥

अन्वितपदार्थः-(तिरः पवित्रम्) तिर्यग्गच्छन्तं दशापवित्रं प्रति (आशवः) शीघ्रगामिनः (एते) प्रत्यक्षाः (इन्दवः) सोमाः (विश्वानि) सर्वाणि (सौभगा) सौभगानि ऐश्वर्याणि(अभि) अभिलक्ष्य (असृग्रम्) सृज्यन्ते अग्नाविति शेषः ॥

इदानीं तृतीयमहरारभ्यते इति विवरणकारः । ऋग्वेदे ९ । ६२ । १ ऽपि ॥ १ ॥

भाषार्थः-(तिरः पवित्रम्) तिरछे दशापवित्र के प्रति (आशवः) शीघ्र जानने वाले (एते) ये (इन्दवः) सोम (विश्वा) सब (सौभगा) सौभाग्यों को (अभि) लक्ष्य में रख कर (असृग्रम्) [अग्नि में] छोड़े जाते हैं ॥

विवरणकार कहते हैं कि "अब तृतीय दिन का आरम्भ किया जाता है।" ऋ० ९ । ६२ । १ में भी ॥ १ ॥

अथ द्वितीया-

३ १ २ ३ २ ३२ ३ २ ३ १ २ ३ १ २
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १२
त्मना कृण्वन्तो अर्वतः ॥ २ ॥ (८३१)

पदपाठः—विघ्नन्तः १ । दुरिता २ । पुरु २ । सुगा २ । तोकाय ४ । वाजिनः १ । त्मना ३ । कृण्वन्तः १ । अर्वतः २ ॥

अन्वितपदार्थः—प्रकरणात्सोमाः (दुरिता) दुरितानि दुःखानि (विघ्नन्तः) नाशयन्तः (वाजिनः) बलवन्तो बलप्रदाश्च (तोकाय) सन्तानाय (पुरु) पुरून्बहून् (सुगा) सुगमान् (अर्वतः) अश्वान्प्राणान् [शतपथ ५।२।४।९](त्मना) आत्मना सह (कृण्वन्तः) कुर्वन्तः सन्तीति हेतोः सोमाः सेवनीया इति भावः ॥ ऋग्वेदे तु ९।६२।२ त्मना=तना, अर्वतः = अर्वते इति पाठः ॥२॥

भाषार्थः—[प्रकरण से] सोम (दुरिता) दुःखों को (विघ्नन्तः) नष्ट करते हुवे (वाजिनः) बलयुक्त और बलदायक हैं तथा (तोकाय) सन्तान के लिये (पुरु) बहुत (सुगा) सुगम (अर्वतः) प्राणों के [शतपथ ५ । २ । ४ । ९] (त्मना) आत्मा के सहित (कृण्वन्तः) करने वाले हैं इस लिये सोम सेवनीय हैं ॥

ऋ० ९ । ६२ । २ के पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

३ २ ३ १ २ ३ २३क २र ३ २
कृण्वन्तो वरिवो गवेभ्यर्षन्ति सुष्टुतिम् ।
१ २ ३ १ २ ३ १ २
इडामस्मभ्यꣳ संयतम् ॥३॥[१](८३२)

पदपाठः—कृण्वन्तः १ । वरिवः २ । गवे ४ । अभ्यर्षन्ति क्रि० । सुष्टुतिम् २ । इडाम् २ । अस्मभ्यम् ४ । संयतम् २ ॥

अन्वितपदार्थः—(गवे) इन्द्रियसमूहाय (इडाम्) अन्नं तद्रसं (संयतं कृण्वन्तः) संबद्धं कुर्वन्तस्तथा (अस्मभ्यम्) सोमसेविभ्यो नः (वरिवः) धनैश्वर्यं कुर्वन्तः सोमाः(सुष्टुतिम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शोभनां प्रशंसाम् (अभ्यर्षन्ति) अभितः प्राप्नुवन्ति ॥ ऋग्वेदे ९ । ६२ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(गवे) इन्द्रियों के लिये (इडाम्) अन्न के रस को (संयतं कृण्वन्तः) संबद्ध करते हुवे और (अस्मभ्यम्) हम सोमसेवियों के लिये (वरिवः) धनैश्वर्य करते हुवे सोम (सुष्टुतिम्) शोभन प्रशंसा को (अभ्यर्षन्ति) सर्वतः प्राप्त होते हैं ॥ ऋ० ९ । ६२ । ३ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य—भृगुर्वारुणिर्जमदग्निर्वा ऋषिः ।
पवमानः सोमो देवता । गायत्री छन्दः॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १र २र
राजा मेधाभिरीयते पवमानो मनावधि ।

३ १ २ ३ १ २
अन्तरिक्षेण यातवे ॥ १ ॥ (८३३)

पदपाठः—राजा १ । मेधाभिः ३ । ईयते क्रि० । पवमानः १। मनौ ७ । अधि अ० । अन्तरिक्षेण ३ । यातवे ४ ॥

अन्वितपदार्थः—(पवमानः) शुद्धिं कुर्वन् (राजा) सोमः [सोमं राजानम् इत्यादिषु दृष्टत्वात् इति सायणोऽपि] (अन्तरिक्षेण) आकाशमार्गेण (यातवे) यातुं (मनौ अधि) मनुर्यज्ञस्तस्मिन् (मेधाभिः) बुद्धितत्त्वैः सह (ईयते) प्राप्यते ॥ ऋग्वेदे ९ । ६५ । १६ ऽपि ॥ १ ॥

भाषार्थः—(पवमानः) शुद्धि करता हुवा (राजा) सोम [सायणाचार्य ने भी "सोमं राजानम्" इत्यादि देखने से यही अर्थ किया है] (अन्तरिक्षेण) आकाशमार्ग से (यातवे) जाने के लिये (मनौ अधि) यज्ञ में (मेधाभिः) बुद्धितत्त्वों के सहित (ईयते) प्राप्त होता है ॥ ऋ० ९। ६५ । १६ में भी ॥१॥

अथ द्वितीया—

१ २ ३ २३ १ २ ३१ २र
आ नः सोम सहो जुवो रूपं न वर्चसे भर ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३१२

सुष्वाणो देववीतये ॥ २ ॥ (८३४)

पदपाठः—आ अ० । नः ४ । सोम सं० । सहः, जुवः, रूपम् २ । न अ० । वर्चसे ४ । भर क्रि० । सुष्वाणः १ । देववीतये ४ ॥

अन्वितपदार्थः—(सोम) सोमः (देववीतये) देवेभ्यो दानाय होमाय (सुष्वाणः) अभिषूयमाणःसन् (नः) अस्मभ्यं (वर्चसे) तेजसे (सहः) शत्रुभिभवनसमर्थं (जुवः) बलं (रूपं) सौन्दर्यं (न) च (आभर) आभरति आहरति प्रयच्छति ॥ ऋग्वेदे ९ । ६५ । १८ ऽपि ॥ २ ॥

भाषार्थः—(सोम) सोम (देववीतये) देवतों को देने=होम के लिये (सुष्वाणः) अभिषुत किया हुवा (नः) हमारे लिये (वर्चसे) तेज के निमित्त (सहः) शत्रुदमनयोग्य (जुवः) बल (न) और (रूपम्) सौन्दर्य (आभर) देता है ॥ ऋ० ९ । ६५ । १८ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ २ ३ २ ३१ २

आ न इन्दो शातग्विनं गवां पोषं स्वश्व्यम् ।

२३ १२ ३१२

वहा भगत्तिमूतये ॥ ३ ॥ [२] (८३५)

पदपाठः—आ अ० । नः ४ । इन्दो सं० । शातग्विनम् २ । गवाम् ६ । पोषम्, स्वश्व्यम् २ । वह क्रि० । भगत्तिम् २ । ऊतये ४ ॥

अन्वितपदार्थः—(इन्दो) इन्दुःसोमः (नः) अस्मभ्यं (शातग्विनं) बहुत्वविशिष्टेन्द्रियशक्तिमतीम् अतएव (गवाम्) इन्द्रियाणां (पोषं) पुष्टिं (स्वश्व्यं) शोभनानामश्वानां प्राणानां भावं (भगत्तिं) भगस्यैश्वर्यस्य दानम् (ऊतये) रक्षायै (आ—वह) आवहति प्रापयति ॥ ऋग्वेदे ९।६५।१७ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(इन्दो) सोम (नः) हमारे लिये (शातग्विनम् इन्द्रियों की शक्ति वाली [इसी से] (गवाम्) इन्द्रियों की (पो (स्वश्व्यम्) उत्तम अश्वों के भाव और (भगत्तिम्) ऐश्वर्य का दा रक्षा के लिये (आ—वह) प्राप्त कराता है ॥ ऋ० ९ । ६५ । १७ में

तन्त्वा नृम्णानीति पञ्चर्चस्य तृतीयसूक्तस्य—कविर्भार्गवऋषि छन्दोदेवते उक्ते ॥ तत्र प्रथमा—

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २
तं त्वा नृम्णानि बिभ्रतꣳ सधस्थेषु महोदिवः ।
१ २ ३ १ २
चारुꣳ सुकृत्ययेमहे ॥ १ ॥ (८३६)

पदपाठः—तम्, त्वा २ । नृम्णानि २ । बिभ्रतम् २ । सधस्थेषु दिवः ६। चारुम् २ । सुकृत्यया ३ । ईमहे क्रि० ॥

अन्वितपदार्थः—हे सोम!शान्तस्वरूप!परमात्मन्!(म महतआकाशस्य (सधस्थेषु) सहस्थानेषु सर्वलोकेषु तत व्यापकं (नृम्णानि) धनानि बलानि वा (बिभ्रतम्) (चारुं) शोभनमानन्दस्वरूपं (तं) वैदिकाऽनेकसूक्तस्तु त्वां (सुकृत्यया) सुकर्मणा (ईमहे) प्राप्नुमः ॥

नृम्णमिति धनबलयोर्नाम निघं० २।९, १०॥ऋग्वेदे ऽपि ॥ १ ॥

भाषार्थः—हे शान्तस्वरूप ! सोम ! परमात्मन् ! (महोदिवः) अनन के (सधस्थेषु) साथ वाले सब लोकों में और उस से भी बाहर व्या म्णानि) धनों वा बलों को (बिभ्रतम्) धारते हुवे (चारुम्) आ (तम्) उस अनेक वैदिक स्तोत्रों से स्तुत त्वा) आप को (सुकृत्य से (ईमहे) हम पाते हैं ॥

निघण्टु २। ९, १० के प्रमाण संस्कृतभाष्य में देखिये॥ ऋ० ९।४८।१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundati

अथ द्वितीया—

१ २ ३क २र३ १ २ ३ १ २
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतंमदम् ।
३ २ २र ३ १ २
शतं पुरो रुरुक्षणिम् ॥ २ ॥ (८३७)

पदपाठः—संवृक्तधृष्णुम्, उक्थ्यम्,महामहिव्रतम्,मदम् २। शतम् २। पुरः २। रुरुक्षणिम् २ ॥

अन्वितपदार्थः—हे सोम ! परमात्मन् ! (संवृक्तधृष्णुम्) संवृक्ताधृष्णवोदुष्टा अनेन तम् (उक्थ्यं) स्तुत्यं (महामहिव्रतं) महनीयानन्तकर्माणं (मदम्) आनन्दस्वरूपं (शतं पुरः) असंख्यानि प्राणिशरीराणि (रुरुक्षणिं) मृत्युना नाशयन्तम् [त्वा ईमहे] इति पूर्वेण सम्बन्धः॥

महामहिव्रतमित्यत्र महदर्थकशब्दद्वयश्रुतेरतिमहत्त्वंगम्यते॥ ऋग्वेदे ९।४८।२पि ॥२॥

भाषार्थः—हे सोम! परमात्मन्! (संवृक्तधृष्णुम्)शत्रुविनाशक(उक्थ्यम्)स्तुतियोग्य(महामहिव्रतम्)प्रशंसनीय अनन्त कर्मोंके कर्त्ता,(मदम्) आनन्दस्वरूप, (शतम्) असंख्य (पुरः) प्राणिदेहों के (रुरुक्षणिम्) मृत्यु द्वारा विनाशक (आप को हम पाते हैं) यह पूर्व मन्त्र से अनुवृत्ति है।।

महामहिव्रतम्—यहां महान् अर्थ के लिये दो शब्दों के प्रयोग से अत्यन्त महान् अर्थ लिया जाता है ॥ ऋ ० ९।४८।२ में भी।।२।।

अथ तृतीया —

१ २ ३ २ ३क २र ३ १ २ ३ २
अतस्त्वा रयिरभ्ययद्राजानं सुक्रतो दिवः ।
३ १ २ ३ १ २
सुपर्णो अव्यथी भरत् ॥ ३ ॥ (८३८)

पदपाठः—अतः५ । त्वा २ । रयिः १ । अभ्ययत् क्रि०।राजानम् २।सुक्रतो सं० । दिवः ६ । सुपर्णः, अव्यथी १ । भरत् क्रि० ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—सोम ! शान्तस्वरूप ! परमात्मन् ! (सुक्रतो) हे प्रशस्तकर्मन् ! यतो भवान् (सुपर्णः) शोभनपालनः (अव्यथी) निरञ्जनो निर्दुःखः (भरत्) त्रिलोकीं पुष्णाति (अतः) अस्मात्कारणात् (रयिः) ऐश्वर्यकामः पुरुषः (दिवः राजानं त्वा) आकाशगतसर्वलोकलोकान्तराणां राजानं त्वाम् (अभ्ययत्) अभितः शरणमागच्छति ॥ ऋग्वेदे तु ९।४८।३ रयिमभि राजानम् इति अव्यथिरिति च पाठभेदः ॥ ३ ॥

भाषार्थः—(सुक्रतो) हे उत्तम कर्मों के अधिष्ठाता ! सोम ! शान्तस्वरूप ! परमात्मन् ! क्योंकि (सुपर्णः) सुन्दर पालनादि गुणों वाले (अव्यथी) दुःखरहित निरञ्जन आप (भरत्) त्रिलोकी का पोषण करते हैं (अतः) इस से (रयिः) ऐश्वर्य और उसका चाहने वाला पुरुष (दिवः) आकाशगत लोक लोकान्तरों के (राजानम्) राजा (त्वा) आप को(अभ्ययत्) सब ओर से शरण लेता है ॥ ऋ० ९ । ४८ । ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ चतुर्थी—

१ २ ३ १ २ ३१ २२ ३ १ २

अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।

३ १ २२

अभिष्टिकृद्विचर्षणिः ॥ ४ ॥ (८३१)

पदपाठः—अध अ० । हिन्वानः १ । इन्द्रियम् २ । ज्यायः, महित्वम् २ । आनशे क्रि० । अभिष्टिकृत्, विचर्षणिः १ ॥

अन्वितपदार्थः—(अध) अथ च (अभिष्टिकृत्) अभीष्टफलदः (विचर्षणिः) विविधानां चर्षणीनां मनुष्याणां स्वामी, यद्वा—विशेषेण द्रष्टा साक्षी परमात्मा (इन्द्रियम्) इन्द्रेण परमात्मना स्वेन जुष्टं जगत् (हिन्वानः) प्रेरयन् (ज्यायः) प्रशस्तं (महित्वं) महत्त्वम् (आनशे) प्राप्तो वर्त्तते ॥

इन्द्रियम्—इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रजुष्टमिन्द्रदत्तमि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तिवा ५। २। ९३ इति निपातनात् ॥ आनशे इति अशूङ् व्याप्तौ इत्यस्य रूपम् ॥ ऋग्वेदे ९। ४८। ५ ऽपि ॥ ४ ॥

भाषार्थः—(अध) और (अभिष्टिकृत्) अभीष्टफलदाता (विचर्षणिः) विविध मनुष्यों का स्वामी, वा विशेष द्रष्टा जगत् का साक्षी परमात्मा (इन्द्रियम्) अपने आपे से व्याप्त जगत् को (ह्विन्वानः) प्रेरित करता हुवा (ज्यायः) बड़े उत्तम (महित्वम्) महत्त्व को (आनशे) प्राप्त है ॥

अष्टाध्यायी ५। २। ९३ इत्यादि प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९। ४८। ५ में भी ॥ ४ ॥

अथ पञ्चमी—

१२ २ ३ १ २ ३ २२ ३ १ २

विश्वस्माइत्स्वर्दृशे साधारणꣳरजस्तुरम् ।

३ २ ३ २ ३ १ २

गोपामृतस्य विर्भरत् ॥ ५ ॥ (८४०)

पदपाठः—विश्वस्मै ४। इत् अ०। स्वर्दृशे ४। साधारणम्, रजस्तुरम्, गोपाम् २। ऋतस्य ६। विः १। भरत् क्रि० ॥

अन्वितपदार्थः—(रजस्तुरम्) रजसां लोकानां प्रेरयितारम् (ऋतस्य) यज्ञस्य (गोपाम्) गोपयितारम् (विश्वस्मै) सर्वस्मै (स्वर्दृशे) आनन्ददर्शनाय (साधारणम् इत्) सामान्येनैव वर्त्तमानं परमेश्वरं सौम्यं (विः) पक्षी जीवात्मा (भरत्) धारयेत् ध्यायेदित्यर्थः ॥

लोका रजांस्युच्यन्ते। निरु० ४। १९ परमात्मना धूलिगताणुवद्धारितत्वात् ॥ ऋग्वेदे ९। ४८। ४ ऽपि ॥ ५ ॥

भाषार्थः—(रजस्तुरम्) सूर्यादि लोकों के घुमाने वाले, (ऋतस्य) यज्ञ के (गोपाम्) रक्षक, (विश्वस्मै) सर्व (स्वर्दृशे) आनन्द दिखाने के लिये (साधारणम्) साधारण (इत्) ही वर्त्तमान सोम शान्तस्वरूप परमात्मा का (विः) पक्षी जीवात्मा (भरत्) ध्यान करे ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निरुक्त ४।१९ का प्रमाण संस्कृत भाष्य में देखिये ॥ लोकों को रज इस लिये कहा जाता है कि धूलिकण के समान परमात्मा ने धार रक्खे हैं ॥ ऋ० ९ । ४८ । ४ में भी ॥ ५ ॥

अथ वृषात्मकस्य चतुर्थसूक्तस्य—कश्यप ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २

इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो

३ १ २र

रुचाभिगा इहि ॥१॥ (८४१) व्याख्याता (५०५)

अथ द्वितीया—

३ १ २र ३ २ ३ १ २

पुनानोवरिवस्कृध्यूर्जं जनाय गिर्वणः ।

१२ ३ २ ३ १ २

हरे सृजान आशिरम् ॥ २ ॥ (८४२)

पदपाठः—पुनानः १ । वरिवः २ । कृधि क्रि० । ऊर्जम् २ । जनाय ४ । गिर्वणः, हरे सं० । सृजानः १ । आशिरम् २ ॥

अन्वितपदार्थः—(गिर्वणः) गीर्भिः प्रशस्य ! सोम ! परमात्मन् ! वा ओषधे ! (हरे) धारक ! वा हरितवर्णपरिणत !(आशिरम्) प्राणं (सृजानः) ददमानः (पुनानः) पवित्रतां कुर्वन् (जनाय) ध्यानयज्ञानुष्ठात्रे, वा देवयज्ञानुष्ठात्रे यजमानाय (वरिवः) धनं सुखं वा (ऊर्जं) बलं च (कृधि) कुरु ॥

चिन्त्यमानः परमात्मा, हूयमानःसोमश्च यजमानस्य धनधान्यबलपौरुषादि वर्धयति ॥

पयः प्राणः (शतपथे १२ । ३ । ५ । २०) इति ॥ वरिव इति धननाम निघं० २ । १० ॥ ऋग्वेदे १ । ६४ । १४ ऽपि ॥ २ ॥

भाषार्थः—(गिर्वणः) वाणियों से प्रशंसनीय ! सोम ! परमात्मन् ! वा ओषधि ! (हरे) जगद्धर्ता ! वा हरित वर्णहुवा सोम (पुनानः) शुद्धि करता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हुवा और (आशिरम्) प्राण को (सृजानः) देता हुवा (जनाय) ध्यानयज्ञ वा देवयज्ञ के यजमान के लिये (वरिवः) धन वा सुख और (ऊर्जम्) बल संपादन (कृधि) कीजिये वा करता है ॥

ध्यान स्मरण किया परमात्मा वा हवन किया हुवा सोम यजमान के धन धान्य बल पौरुषादि को बढ़ाता है ॥

शतपथ १२ । ३ । ५ । २० निघण्टु २ । १० के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ६४ । १४ में भी ॥ २ ॥

अथ तृतीया–

३ २ ३१२ ३१२ ३२

पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।

३ २ ३१ २३२

द्युतानो वाजिभिर्हितः ॥३॥ [४] (८४३)

पदपाठः–पुनानः १ । देववीतये ४। इन्द्रस्य ६। याहि क्रि० । निष्कृतम्२। द्युतानः १ । वाजिभिः ३ । हितः १ ॥

अन्वितपदार्थः–हे सोम ! शान्तस्वरूप ! परमात्मन् ! (पुनानः) पवित्रीकुर्वन् (द्युतानः) प्रकाशमानः (वाजिभिः) प्राणैः प्राणायामैः सह (हितः) धारितो ध्यातः (देववीतये) देवेषु विद्वत्सु भवद्भक्तेषु वीतये गतये (इन्द्रस्य) इन्द्रियाधिष्ठातुर्जीवस्य (निष्कृतं)संस्कृतं शुद्धमन्तःकरणं स्थानं (याहि) सर्वगत्वेन वर्त्तमानोऽपि साक्षाद्भावेन प्राप्तो भव ॥

ओषधिपक्षे–सोम ! (पुनानः) पवित्रयन् (द्युतानः)प्रकाशमानः (वाजिभिः) हविष्मद्भिर्होत्रादिभिः (हितः) धारितः (देववीतये) वाय्वादिषु गतये (इन्द्रस्य) विद्युतः (निष्कृतं) स्थानं (याहि) प्राप्नुहि होमहारेति शेषः ॥

वाजिभिरश्वैःप्राणैरिति (शतपथस्य ५ । २ । ४ । ९) तात्पर्यम्॥ ऋग्वेदे तु ९।६४।१५ वाजिभिर्यतः इति पाठः ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावार्थः—हे सोम ! शान्तस्वरूप ! निरुपद्रव ! परमात्मन् ! (पुनानः) अपवित्रों को पवित्र करने वाले, (द्युतानः) अन्धियारे को उजियाला करने वाले, (वाजिभिः) प्रायाणामों के साथ (हितः) ध्यान=धारण किये हुवे आप (देववीतये) विद्वान् भक्त जनों को प्राप्त होने के लिये (इन्द्रस्य) इन्द्रियों के अधिष्ठाता जीव के (निष्कृतम्) शुद्ध किये हुवे अन्तःकरण स्थान में (याहि) सर्वग होने से वर्त्तमान भी साक्षात् अनुभूत हूजिये ॥

ओषधि के पक्ष में—सोम ! (पुनानः) पवित्रता और (द्युतानः) प्रकाश करता हुवा (वाजिभिः) हविष् वाले होता आदि से (हितः) धारण किया वा (देववीतये) वायु आदि देवों के प्राप्त होने के लिये (इन्द्रस्य) विजली के (निष्कृतम्) स्थान अन्तरिक्ष को (याहि) प्राप्त हो [होमद्वारा]॥

शतपथ ५ । २ । ४ । ९ का प्रमाण और ऋ० ९ । ६४ । १५ का पाठभेद संस्कृत में देखिये ॥ ३ ॥

बहिष्पवमानमुक्तम्, अथ सप्तदशस्तौमिकं भेदमाह—इदानीमाज्यानि । तत्राग्नेयमाज्यमिति विवरणकारः

अथ द्वितीयखण्डे प्रथममृचस्य—मेधातिथिः काण्वऋषिः । अग्निर्देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

३ २ ३ १ २र ३ २ ३ १ २ ३ १ २

अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा ।

३ २ ३क २र

हव्यवाड् जुह्वास्यः ॥ १ ॥ (८४१)

पदपाठः—अग्निना ३ । अग्निः १ । समिध्यते क्रि० । कविः, गृहपतिः, युवा, हव्यवाट्, जुह्वास्यः १ ॥

अन्वितपदार्थः—(कविः) मेधातत्त्वोद्बोधकः (गृहपतिः) यज्ञानुष्ठानगृहस्य पालकः (युवा) नित्यतरुणः (हव्यवाट्) हविषां वोढा (जुह्वास्यः) जुहूमुखः (अग्निः) आहवनीयाख्यः (अग्निना) निर्मन्थनप्रणीतेनाग्निना सह (समिध्यते) सम्यक् प्रदीप्यते ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अध्यात्मपक्षे–(कविः) ज्ञानी (गृहपतिः) गृहस्य देहस्य स्वामी (युवा) अमरोऽजरश्च [स्वरूपेण] (हव्यवाट्) कर्मफलस्य भोक्ता (जुह्वास्यः) वागास्यः (अग्निः) चेतनो जीवः(अग्निना)अनन्तज्ञानेनपरमात्मना(समिध्यते)प्राप्ततेजस्कोजायते॥

वागेव जुहूः । श० ११ । ५ । ६ । ३॥ हव्यवाडित्यत्र–वहश्च ३ । २ । ६४ इति हव्ये ण्विः । णित्वात्–अचोञ्णितीति ७ । २ । ११५ वृद्धिः । अन्तःपादत्वात्–हव्येऽनन्तःपादमिति ३ । २ । ६२ न ञ्युट् । गतिकारकोपपदात्कृदिति ६ । २ । १३९ पूर्वपदप्रकृतिस्वरत्वम् ॥ जुह्वास्यः–हूयतेऽनयेति जुहूः,हुवःश्लुवच्चेति (उणा० २ । ६१) क्विप्–अन्येभ्योऽपि दृश्यते ३ । २ । १७८ इत्यत्र–दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम् क्वचिद्दीर्घः क्वचित्संप्रसारणं क्वचिद्धे क्वचिद्ध्रस्वश्च, तथा च–क्विब्वचिप्रच्छ्यायतस्तुकटप्रुश्रीणांदीर्घोऽसंप्रसारणं चेति वार्त्तिकेन दीर्घः, श्लुवद्भावात्–श्लौ ६ । १ । १० इति धातोर्द्वे, कुहोश्चुरिति ७ । ४ । ६२ चुत्वम् अभ्यासे चर्च ८ । ४ । ५४ इति जश्त्वम्, जुहूरास्यं यस्येति, बहुव्रीहौ प्रकृत्या पूर्वपदम् ६ । २ । १,पूर्वत्रासिद्धम् ८ । २ । १ इति पूर्वपदप्रकृतिस्वर एव शिष्यते । यणादेशे (६ । १ । ६७) उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ८ । २ । ४ इति आकारस्य स्वरितः ॥ ऋग्वेदे १ । १२ । ६ ऽपि ॥ १ ॥

भाषार्थः–विवरणकार कहते हैं कि–बर्हिष्पवमान कहा गया,अब सप्तदश स्तोम के भेद कहते हैं कि यहां से आज्यों का वर्णन है,जिस में यह आग्नेय आज्य का आरम्भ है ॥ (कविः) मेधातत्त्वबोधक (गृहपतिः) यज्ञानुष्ठानसंपन्न घर का रक्षक (युवा) कभी वृद्ध न होने वाला (हव्यवाट्) हव्य पहुंचाने वाला (जुह्वास्यः) यज्ञपात्र जुहू जिस का मुख है (अग्निः) सो आवहवनीय अग्नि (अग्निना) अरणिमंथन से उत्पन्न हुवे अग्नि द्वारा (समिध्यते) भले प्रकार सुलगाया जाता है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अध्यात्मपक्ष में–(कविः) ज्ञानी (गृहपतिः) गृहरूप देह का स्वामी (युवा) वास्तविक स्वरूप से अजर अमर (हव्यवाट्) कर्म फल का भोक्ता (जुह्वास्यः) वाणीरूप मुख वाला (अग्निः) चेतन जीवात्मा (अग्निना) अनन्त ज्ञान वाले परमात्मा से (समिध्यते) भले प्रकार तेज प्राप्त करता है ॥

शतपथ ११ । ५ । ६ । ३ अष्टाध्यायी ३ । २ । ६४, ७ । २ । ११५, ३ । २ । ६४, ६ । २ । १३९, ३ । २ । १७८, ६ । १ । १०, ७ । ४ । ६२, ८ । ४ । ५४, ६ । २ । १, ८ । २ । १, ६ । १ । ६७, ८ । २ । ४ उणादि २ । ६१ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । १२ । ६ में भी ॥ १ ॥

अथ द्वितीया–

१ २१ ३१ २ ३ १२ ३१ २

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ।

१ २ ३१ २

तस्य स्म प्राविता भव ॥ २ ॥ (८४५)

पदपाठः– यः १ । त्वाम् २ । अग्ने सं० । हविष्पतिः १ । दूतम् २ । देव सं० । सपर्यति क्रि० । तस्य ६ । स्म अ० । प्राविता १ । भव क्रि० ॥

अन्वितपदार्थः–(देव) दिव्यगुण ! (अग्ने) (हविष्पतिः) हविष्मान् (यः) यजमानः (दूतं) देवानां हविःप्रापकं (त्वा) त्वां (सपर्यति) जुहोति (तस्य) यज्ञकर्त्तुः[(स्म) पादपूरणे] (प्राविता) प्रकर्षेण रक्षकः (भव) एधि ॥

ईश्वरपक्षे–(देव) (अग्ने) ज्ञानस्वरूप ! (हविष्पतिः) सुकर्मभागी (यः) उपासकः (दूतं) कर्मफलप्रापकं (त्वा) (सपर्यति) अर्चति उपास्ते (तस्य स्म प्राविता भव) ॥ ऋग्वेदे १ । १२ । ८ ऽपि ॥ २ ॥

भाषार्थः–(देव) दिव्यगुणयुक्त ! (अग्ने) अग्ने ! (हविष्पतिः) सामग्री वाला (यः) जो यज्ञकर्त्ता (दूतम्) हव्य पहुंचाने वाले (त्वा) तेरा (सपर्यति) होम करता है, (तस्य) उस का [(स्म) पादपूरणार्थ है] (प्राविता) अत्यन्त रक्षक (भव) हो ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ईश्वरपक्ष में-(देव) हे देव ! (अग्ने) हे ज्ञानस्वरूप ! (हविष्मतिः) सुकर्म वासना रूप कर्मफल का भागी (यः) जो उपासक भक्त (दूतम्) कर्मफल पहुंचाने वाले (त्वा) आप की (सपर्यति) पूजा=उपासना करता है (तस्य स्म प्राविता भव) उस के रक्षक हूजिये ॥ ऋ०१ । १२ । ८ में भी ॥ २ ॥

अथ तृतीया-

२ ३ २ ३१२ ३१ २ ३१ २

यो अग्निं देववीतये हविष्माँ आविवासति ।

१ २

तस्मै पावक मृडय ॥ ३ ॥ [५] (८४६)

पदपाठः-यः १ । अग्निम् २ । देववीतये ४ । हविष्मान् १ । आविवासति क्रि० । तस्मै ४ । पावक सं० । मृडय क्रि० ॥

अन्वितपदार्थः-(यः हविष्मान्) (देववीतये) देवेषु हव्यस्य गतये (अग्निं) प्रसिद्धम् (आविवासति) जुहोति (पावक) अग्ने ! (तस्मै) यजमानाय (मृडय) सुखं कुरु ॥

ईश्वरपक्षे-(यः) (हविष्मान्) सुकर्मणामनुष्ठातोपासकः (देववीतये) दिव्यगतये (अग्निं) त्वां ज्ञानस्वरूपं परमात्मानम् (आविवासति) परिचरति (तस्मै) भवद्भक्ताय (पावक) पवित्र ! (मृडय) सुखमानन्दं प्रयच्छ ॥ विवासतिः परिचरणकर्मा निघं० ३ । ५ ॥ ऋग्वेदे १ । १२ । ९ ऽपि ॥ ३ ॥

भाषार्थः-(यः) जो (हविष्मान्) हव्य सामग्री वाला (देववीतये) देव-यजन के लिये (अग्निम्) अग्नि को (आविवासति) होमता है (तस्मै) उस के लिये (पावक) शोधक ! अग्ने ! (मृडय) सुख कर ॥

ईश्वरपक्ष में (यः) जो (हविष्मान्) सुकर्मानुष्ठानी उपासक (देववीतये) दिव्य गति के लिये (अग्निम्) ज्ञानस्वरूप परमात्मा की (आविवासति) उपासना=पूजन करता है [निघं० ३ । ५] (तस्मै) उस के लिये (पावक) हे अपवित्रों को पवित्र करने वाले ! (मृडय) आनन्द दीजिये ॥ ऋ० १ । १२ । ९ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ मैत्रावरुणमाज्यम्

(इति विवरणकारः)

अथ द्वितीयतृचस्य–मधुच्छन्दा वैश्वामित्र ऋषिः । मित्रावरुणौ देवते । गायत्री छन्दः ॥ तत्र प्रथमा–

३ १ २ ३१२३ १२ ३ १ २
मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।
१२ ३२३ १ २
धियं घृताचीं साधन्ता ॥ १ ॥ (८४७)

पदपाठः–मित्रम् २ । हुवे क्रि० । पूतदक्षम्, वरुणम् २ । च अ० । रिशादसन् २ । धियम्, घृताचीम् २ । साधन्ता २ ।।

अन्वितपदार्थः–अहं यजमानः (पूतदक्षं) पवित्रबलं (मित्रं) प्राणं, (रिशादसम्) रिशानां हिंसकानां मारकाणामणूनामदसं भक्षकं (वरुणम्) अपानं (च) (हुवे) उद्दिश्य जुहोमि । किं भूतौ प्राणापानौ (घृताचीं धियं) घृतमुदकमञ्च्यते भूमिं प्राप्यते यया धिया[येन कर्मणा] तां (साधन्ता) साध्नुवन्तौ ॥

यथा मनुष्यादिप्राणिशरीरेषु प्राणाऽपानौ वर्त्तेते तथैवाऽन्तरिक्षेऽपि निरुक्तोक्तान्तरिक्षस्थानदेवतासु परिगणितौ प्राणाऽपानौ मित्रवरुणपदवाच्यौ व्याप्तौ भवतस्ततएव च मनुष्यादिप्राणिनां देहगौ प्राणाऽपानौ आप्यायितौ भवतस्तौ च मित्रावरुणावत्र होमेन यज्ञकर्मणा तर्पणीयाविति प्रतिपाद्यते । मित्रशब्दः प्राणाऽपरपर्यायःशतपथे६।३।६।५प्राणो वै मित्र इति, वरुणशब्दोऽपानाऽपरपर्यायश्च शतपथे१ २।४।४।१ २।अपानो वरुण इति । निरुक्तदशमाऽध्याये चारम्भ एव–अथातो मध्यस्थाना देवताःइत्युपक्रम्य, वरुणोवृणोतीति सतः । तस्यैषा भवति–नीचीनवारं वरुणःकवन्धं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रससर्ज रोदसी अन्तरिक्षम्। तेन विश्वस्य भुवनस्य राजाय॑वं न वृष्टिर्व्युनत्ति भूम। ऋ० ५। ८५। ३। नीचीनद्वारं वरुणः कवन्धं मेघम्। कवनमुदकं भवति तदस्मिन्धीयत उदकमपि कवन्धमुच्यते वन्धिरनिभृतत्वे कमनिभृतं च। प्रसृजतिद्यावापृथिव्यौचान्तरिक्षं च। महत्त्वेन तेन सर्वस्य भुवनस्य राजा यवमिव वृष्टिर्व्युनत्ति भूमिम् इत्यादि। तथा तत्रैव दशमाध्याये २१ खण्डे मित्रः प्रमीतेस्त्रायते संमिन्वानो द्रवतीति वा मेदयतेर्वा। तस्यैषा भवति २१—मित्रोजनान्यातयतिब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाभिचष्टे मित्रायं हव्यं घृतवज्जुहोत। ऋ० ३। ५९। १ मित्रो जनानाऽऽयातयति ब्रुवाणःशब्दं कुर्वन् मित्र एव धारयति पृथिवीं च दिवं च। मित्रः कृष्टीरनिमिषन्निवपश्यतीति कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति विकृष्टदेहा वा। मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातम्। जुहोतिर्दानकर्मा। निरु० १०। २२॥ इत्थं निरुक्तकृता भगवता यास्केनापि मित्रावरुणयोःकर्माणि निर्दिष्टानि अन्तरिक्षस्थानदेवतात्वं च॥

यजुर्वेदे ३३। ५७ तथा ऋग्वेदे १। २। ७ ऽपि॥ साधन्तावित्यत्र—साध संसिद्धावित्यस्माद्धातोः (स्वा० प०) अन्तर्भावितण्यर्थाल्लटः श्नुं बाधित्वा—व्यत्ययोबहुलमिति ३। १। ८५ शप्, अदुपदेशत्वाच्छतृप्रत्ययस्य लसार्वधातुकानुदात्तत्वम्, द्वितीयाद्विवचनस्य शपश्च—अनुदात्तौ सुप्पित्तौ ३। १। ४ इत्यनुदात्तत्वे, धातोः ६। १। १६२ इति अन्तोदात्तः स्वरः। सुपां सुलुगित्यादिना ७। १। ३९ विभक्तेराकारादेशः॥ १॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—मैं यज्ञकर्त्ता यजमान (पूतदक्षम्) पवित्र बल वाले (मित्रम्) प्राणवायु (च) और (रिशादसम्) हिंसक दुःखदायक वायु आदि के अणुओं के नाश करनेवाले (वरुणम्) अपानवायु को (हुवे) उद्देश करके होम करता हूं। जो कि प्राण और अपान (घृताचीं,धियम्) जल बर्षाने वाले, कर्म को (साधन्ता) साधनेवाले हैं ॥

जिस प्रकार मनुष्यादिप्राणियों के शरीर में प्राण अपान वायु हैं इसी प्रकार अन्तरिक्ष में भी प्राण और अपान व्याप्त हैं,जोकि निरुक्त के अनुसार अन्तरिक्षस्थान देवतों में गिने गये हैं।उन का दूसरा नाम यहां मित्र और वरुण है। वे ही अन्तरिक्ष में फैले हुवे मित्रावरुण=प्राणाऽपान मनुष्यादिदेहस्थ प्राणाऽपान का आप्यायन करते हैं, उन के उत्तम शुद्ध तृप्त बनाने के लिये इस मन्त्र में होम करने का विधान सिद्धानुवाद से वर्णित है। शतपथ ६। ३। ६। ५ में मित्र=प्राण और श० १२। ४। ४। १२ में वरुण=अपान का नाम है। निरुक्त अ० १० खण्ड १ और ३ में मध्यस्थान देवतों के शीर्षक (हैडिङ्ग) में वरुण का व्याख्यान है और ऋ० ५। ८५। ३ (देखो मूलमन्त्र पृ० ९९३ पं० २२ में) का प्रमाण देकर निरुक्तकार ने वरुण=अपान वायु के काम बताये हैं कि वह मेघ को बर्षाता है, नीचा करता है, वह द्युलोक, पृथिवीलोक और अन्तरिक्ष लोक को तर करता है, इस से वह सब भुवन का राजा कहाता है, वह जैसे वृष्टि खेती को तर करती है, वैसे पृथिवी को गीला और तर करता है। फिर उसी अ० १० खण्ड २१। २२ में मित्र=प्राण वायु का व्याख्यान करते हुवे ऋ० ३। ५९। १ का प्रमाण देकर (देखो मन्त्र पृ० ९९४ पं० ८) मित्र=प्राण के काम बताये हैं कि वह शब्द करता है, प्राणियों को जीवित रखता=मृत्यु से बचाता है, इस लिये प्राण पृथिवी और द्युलोक के प्राणिवर्ग का धारक है, प्राण प्रतिक्षण मनुष्यादि प्राणियों पर अपना प्रभाव रखता है,जिस से मनुष्यादि कर्म करने में समर्थ होते हैं। उस प्राण के लिये घृत मिले चरु से होम करो इत्यादि ॥

अष्टाध्यायी ३। १। ८५, ३। १। ४, ६। १। १६२, ७। १। ३९ इत्यादि के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १।२।७ और यजुः ३३।५७ में भी॥१॥

अथ द्वितीया—

३१२

ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २
क्रतुं बृहन्तमाशाथे ॥ २ ॥ (८४८)

पदपाठः—ऋतेन ३ । मित्रावरुणौ, ऋतावृधौ १ । ऋतस्पृशा १ । क्रतुम्, बृहन्तम् २ । आशाथे क्रि० ॥

अन्वितपदार्थः—(ऋतावृधौ) यज्ञेन वृद्धिशीलौ (ऋतस्पृशा) अतएव यज्ञस्पर्शशीलौ (मित्रावरुणौ) प्राणाऽपानौ (ऋतेन) अनुष्ठितेन यज्ञेन (बृहन्तं क्रतुम्) महत् कर्म (आशाथे) अश्नुतः ॥

ऋतमित्युदकनाम निरु० २।२५ (निघं० १।१२) सत्यं वा यज्ञं वा । निरु० ४ । १९ ॥ ऋग्वेदे १ । २ । ८ ऽपि ॥ २ ॥

भाषार्थः—(ऋतावृधौ) यज्ञ से बढ़ने और (ऋतस्पृशौ) यज्ञ को स्पर्श करने के स्वभाव वाले (मित्रावरुणौ) प्राण और अपान (ऋतेन) अनुष्ठित किये यज्ञ से (बृहन्तं क्रतुम्) बड़े कर्म को (आशाथे) व्यापते हैं ॥ निरुक्त २ । २५, ४ । १९ और निघण्टु १ । १२ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । २ । ८ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २र ३ १ २ ३ १ २
कवी नो मित्रावरुणा तुविजाता उरुक्षया ।

१ २ ३ १ २
दक्षं दधाते अपसम् ॥ ३ ॥ [६] (८४९)

पदपाठः—कवी १ । नः । ६ मित्रावरुणा, तुविजाता, उरुक्षया १ । दक्षम् २ । दधाते क्रि० । अपसम् २ ॥

अन्वितपदार्थः— (कवी) बुद्धिवर्धकौ (तुविजाता) बहुजातौ (उरुक्षया)बहुनिवासौ (मित्रावरुणा) प्राणाऽपानौ (नः) अस्माकं (दक्षं) बलम् (अपसम्) कर्म पुरुषार्थं च (दधाते) ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मित्रावरुणौइत्यत्र–देवताद्वन्द्वे च ६ । ३ । २६ इति पूर्वपदस्याऽऽनङ् । मित्रशब्दः–फिषोऽन्तउदात्तः (१ ।१) इतिफिट्सूत्रेणान्तोदात्तः ॥ वरुणशब्दः–ञ्नित्यादिर्नित्यम् (६।१।१९७) इत्याद्युदात्तः ॥ तुविजातौ–तुविइति बहुनाम निघं० ३ । १ तुवीनां बहूनामुपकारकतया जातौ । उरुक्षयौ–उरुइतिबहुनाम निघं० ३।१ क्षि निवासगत्योः (तु० प०) क्षियन्त्यस्मिन्निति क्षयोनिवास इत्यधिकरणेऽच् तस्य च, चितः६।१।१६३इतिअन्तोदात्तत्वे प्राप्ते,क्षयोनिवासे ६।१।२०१ इत्याद्युदात्तत्वं विहितम्,समासे तु–समासस्य ६ । १ । २२३ इत्यन्तोदात्तत्वंबाधित्वा, गतिकारकोपपदात्कृदिति ६ । २ । १३९ प्राप्तमुत्तरपदाद्युदात्तत्त्वं यद्यपि थाऽथघञ्क्ताऽजबित्रकाणाम् ६ । २ । १४४ इत्यन्तोदात्तत्वेन बाध्यते, तथापि–परादिश्छन्दसि बहुलम् ६ । २ । १९९ इत्युत्तरपदाद्युदात्तत्वं ज्ञेयम् । दक्षम् इति–दक्षतेरुत्साहकर्मणो ञित्त्वादाद्युदात्तः (६ । १ । १९७) ॥ दक्ष इति बलनाम निघं० २ । ९अप इति कर्मनाम निघं०२।१॥ ऋग्वेदे १।२।९ऽपि ॥ ३ ॥

भाषार्थः—(क्षयौ) बुद्धिवर्धक (तुविजाता) बहुतों के उपकारक होकर उत्पन्न (उरुक्षया) बहुत निवास वाले (मित्रावरुणा) प्राण और अपान (नः) हमारे (दक्षम्) बल और (अपसम्) कर्म का (दधाते) धारण करते हैं ॥

अष्टाध्यायी ६ ।३ । २६, ६।१। १९७, ६ । १ । १६३, ६ । १ । २०१, ६ । १ । २२३, ६। २ । १४४, ६। २। १९९ फिट्सूत्र १ । १ निघण्टु ३ । १, २ । १, २ । ९ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ १ । २ । ९ में भी ॥ ३॥

अथैन्द्रमाज्यम्

(इति विवरणकारः)

अथ तृतीयतृचस्य–मधुच्छन्दाः वैश्वामित्र ऋषिः । मरुद्गण इन्द्रश्च देवता। गायत्री छन्द : ॥ तत्र प्रथमा–

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ १ ३ २र ३ १ २र
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा।
३ १ २ ३ १ २
मन्दू समानवर्चसा ॥ १ ॥ (८५०)

पदपाठः—इन्द्रेण ३। सं, हि अ०। दृक्षसे क्रि०। संजग्मानः १। अबिभ्युषा ३। मन्दू, समानवर्चसा १॥

अन्वितपदार्थः— हे जीवात्मन्! त्वं (हि) निश्चयेन (अबिभ्युषा) निर्भयेनाद्वितीयेन (इन्द्रेण) परमात्मना (संजग्मानः) संगतः मोक्षंप्राप्तः (संदृक्षसे) यदा ज्ञायसे तदा परमेश्वरः त्वं च (मन्दू) आनन्दितौ (समानवर्चसा) चेतनत्वसामान्येन समानतेजस्कौ [न तु सर्वांशेषु] भवतः ॥

भौतिकपक्षे—मरुद्गणः (हि) (अबिभ्युषा) अधृष्येण (इन्द्रेण) विद्युत्तत्वेन (संजग्मानः) संगतः (संदृक्षसे) संप्रकाशतेयदा तदा (मन्दू) मरुद्गण इन्द्रश्च प्रकाशमानौ (समानवर्चसा) समतेजस्कौ भातः॥ आकाशगतमेघेषु या सौदामिनी पुनः पुनः प्रकाशते सा मरुतां संघर्षेण प्रकाशतेइति ह्यत्रोपदिष्टं बोध्यम्॥ऋग्वेदे१।६।७ऽपीयमृग्वर्त्तते तत्रत्या च भगवता यास्केनैवं व्याख्याता निरुक्ते ४। १२ "इन्द्रेणहिसंदृश्यसे संगच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात्समानवर्चसेत्येतेन व्याख्यातम्" इति ॥ १ ॥

भाषार्थः—हे जीवात्मन्! तू (अबिभ्युषा) भयरहित निर्भय (इन्द्रेण) परमात्मा से (हि) ही (संजग्मानः) मिला हुवा [मुक्त हुवा] (संदृक्षसे) जब जाना जाता है तब (मन्दू) तुम परमात्मा और जीवात्मा दोनों आनन्दयुक्त (समानवर्चसा) समान तेज वाले होते हो। यह समानता चेतनत्वधर्म को लेकर कही गई है, सर्वांश में नहीं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भौतिकपक्ष में—मरुद्गण (हि) निश्चय करो कि (अभिभ्युषा) अधृष्य (इन्द्रेण) बिजुली से (संजग्मानः) सङ्गत हुवा अब (संदृक्षे) चमकता है तब (मन्दू) मरुद्गण और बिजुली दोनों खिले हुवे (समानवर्चसा) समतेज जान पड़ते हैं॥

इस से यह उपदेश किया गया है कि यह जो आकाश में बिजुली (मेघों में) चमकती है सो वायुवों (मरुतों) की रगड़ से चमकती है॥ यह ऋचा ऋ० १। ६। ७ में भी आई है सो निरुक्त ४। १२ में यास्कमुनि ने इसप्रकार व्याख्यात किई है कि (देखो संस्कृतभाष्य पृ० ९९८ पं० १६) "अधृष्य गण बिजुली से मिलता हुवा दीखता (चमकता) है, दोनों प्रकाशमान होते हैं कि 'समानवर्चसा' को तृतीया का १ वचन मान कर यह व्याख्या समझो कि उन तेज वाले, (मन्दू=मन्दुना) प्रकाशयुक्त विद्युत्तत्त्व से मरुद्गण प्रकाशित होता है"॥ १॥

अथ द्वितीया—

१ २र ३ २उ ३ १ २३ १ २ ३ २
आदह स्वधामनु पुनर्गर्भत्वमेरिरे।
१ २ ३ १ २ ३ १ २
दधाना नाम यज्ञियम् ॥२॥(८५१)

पदपाठः—आत्, अह अ० । स्वधाम् २। अनु, पुनः अ०। गर्भत्वम्२। एरिरे क्रि०। दधानाः १। नाम, यज्ञियम् २॥

अन्वितपदार्थः—जीवात्मन्! इन्द्र! (स्वधाम्) पृथिवीं द्यां च (अनु) अनुलक्ष्य (आत् अह) मोक्षानन्दाऽनुभवानन्तरमाश्चर्यं यथा स्यात्तथा (यज्ञियम्) यज्ञसंबन्धि (नाम) नामकं बलं (दधानाः) धारयन्तः प्राणादयो मरुतः (पुनः) पुनरावृत्त्या (गर्भत्वम्) गर्भभावम् (एरिरे) प्रेरयन्ति॥

भौतिकपक्षे—(यज्ञियम्) यज्ञसंपन्नं (नाम) नामकमुदकं (दधानाः) धारयमाणाः मरुतः (स्वधां) जलमन्नं वा (अनु) अनुलक्ष्य (आत् अह) वर्षर्तोरनन्तरं साश्चर्यं (पुनः) पुनः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुनः प्रतिसंवत्सरं (गर्भत्वम्) गर्भभावमिन्द्रस्य विद्यतः (एरिरे) प्रेरयन्ति ॥

स्वधे इति द्यावापृथिव्योर्नाम निघं० ३ । ३० ॥ अहइति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते । निरु० १ । ५ ॥ निपातौ—निपाता आद्युदात्ता इति शान्तनवेन फिट्सूत्रेण ४ । १२ आद्युदात्तौ, अनुपुनःशब्दौ च तथा ॥ स्वं दधातीति स्वधा, स्वधेति जलनाम निघं० १ । १२ अन्ननाम च तत्रैव २ । ७ (नः) ऋग्वेदे १ । ६ । ४ ऽपि ॥ २ ॥

भाषार्थः—जीवात्मन् ! इन्द्र ! (स्वधाम्) पृथिवी और द्युलोक को लक्ष्य करके (आत् अह) मोक्षानन्द के अनुभव के अनन्तर आश्चर्य के साथ (यञ्चियम्) यज्ञसंबन्धी (नाम) नमाने वाले बल को (दधानाः) धारण करते हुवे मरुद्गण वायु तुझ को (पुनः) फिर (गर्भत्वम्) गर्भभाव को (एरिरे) प्राप्त करते हैं ॥

भौतिक पक्ष में—(यञ्चियम्) यज्ञ से संपन्न (नाम) नमाने वाले जल को (दधानाः) धारण करते हुवे मरुद्गण (स्वधाम्) जल वा अन्न को (अनु) लक्ष्य करके (आत् अह) वर्षा ऋतु के पश्चात् आश्चर्य के साथ (पुनः) पुनः पुनः प्रतिवर्ष (गर्भत्वम्) इन्द्र और बिजली के गर्भभाव को (एरिरे) प्राप्त करते हैं॥

निघण्टु ३ । ३०,१ । १२ फिट्सूत्र ४ । १२ निरुक्त १ । ५ के प्रमाण संस्कृत भाष्य में देखिये । ऋ० १ । ६ । ४ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ २ ३ १ २ ३ १ २

वीळ्ठु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।

१ २ ३ २ ३ १ २

अविन्द उस्रिया अनु ॥ ३ ॥ [७] (८५२)

पदपाठः—वीळ्ठु २ । चित् अ० । आरुजत्नुभिः ३ । गुहा ७ । चित् अ० । इन्द्र सं० । वह्निभिः ३ । अविन्दः क्रि० । उस्रियाः २ । अनु अ० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(इन्द्र) इन्द्रियाधीश ! जीवात्मन् ! एवं जन्म गृह्णन् त्वं (गुहा) गुहायां (चित्) अपि दुर्गेऽपि (वीळु) दृढं (चित्) अपि आवरणम्(आरुजत्नुभिः) अभिभञ्जद्भिः (वह्निभिः) वोढृभिः पथदर्शकैर्ज्ञानाग्निभिः (उस्रियाः) गाः पञ्च-ज्ञानेन्द्रियाणि(अनु)अनुसृत्य(अविन्दः)प्राप्तव्यं विषयं प्राप्नोषि॥

भौतिकपक्षे—(इन्द्र) विद्युत् वा सूर्य ! (गुहा चित्) गह्वरेष्वपि (वीळु चित्) दृढमपि हर्म्यादिकम् (आरुजत्नुभिः) अभिभञ्जद्भिः (वह्निभिः) अग्निभिः किरणैर्वा (उस्रियाः) गाः पृथिव्यादिलोकान् (अनु) अनुलक्ष्य (अविन्दः) प्राप्नोषि ॥

वीळु इति बलनाम निघं० २ । ९ तद्युक्तं दृढम् ॥ उस्रिया इति गोनाम निघं० २ । ११ ॥ गौरिति पृथिवीनाम निघं० १ । १ ॥ ऋग्वेदे १ । ६ । ५ ऽपि ॥ ३ ॥

भाषार्थः—(इन्द्र) इन्द्रियों के प्रवर्त्तक जीवात्मन् ! इस [पूर्वमन्त्रोक्त] रीति से जन्म ग्रहण करता हुआ तू (गुहा) छिपी जगह में (चित्) भी और (वीळु) दृढ को (चित्) भी (आरुजत्नुभिः) वेधन करने वाले (वह्निभिः) मार्गदर्शक ज्ञानाग्नियों से (उस्रियाः) पञ्चज्ञानेन्द्रियों के (अनु) अनुसार होकर (अविन्दः) प्राप्तव्य विषय को प्राप्त होता है ।।

भौतिक पक्ष में—(इन्द्र) बिजुली वा सूर्य (गुहा चित्) गह्वरस्थानोंमें भी (वीळु चित्) दृढ महल आदि को भी (आरुजत्नुभिः) भङ्ग कर डालने वाले (वह्निभिः) अग्नियों वा किरणों से (उस्रियाः) पृथिव्यादि लोकों को (अनु अविन्दः) प्राप्त होता है ।।

निघण्टु २ । ९, २ । ११, १ । १ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । ६ । ५ में भी ॥ ३ ॥

अथ चतुर्थर्चस्य—भरद्वाज ऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥

तत्र प्रथमा—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २३ १२ ३२ ३१ २२३ २३२
ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् ।
३ १ २२
इन्द्राग्नी न मर्धतः ॥ १ ॥ (८५३)

पदपाठः—ता २ । हुवे क्रि० । ययोः ६ । इदम् १ । पप्ने क्रि० । विश्वम्१ । पुरा अ० । कृतम् १ । इन्द्राग्नी १ । न अ० । मर्धतः क्रि० ॥

अन्वितपदार्थः—अथैन्द्राग्नमाज्यम्—(ययोः) इन्द्राग्न्योः सूर्याग्न्योः (पुरा) सृष्ट्यारम्भकाले (कृतम्) साहाय्येन संपन्नम् (इदं विश्वम्) चराऽचरं (पप्ने) प्रशस्यते (ता) तौ इन्द्राग्नी उद्दिश्य (हुवे) जुहोमि । यतः (इन्द्राग्नी) तावुभौ (न मर्धतः) न हिंस्ताम् दुःखदौ न भवेताम् ॥

पप्ने इति पन्यतेरूपम् ॥ ऋ० ६।६०।४ऽपि ॥ १ ॥

भाषार्थः—अब इन्द्राग्नि के उद्देश का आज्य कहते हैं—(ययोः) जिन दोनों की (पुरा) सृष्टि के आरम्भ काल में (कृतम्) सहायता से बना (इदं विश्वम्) यह चराऽचर जगत् (पप्ने) प्रशंसित किया जाता है (ता) उन इन्द्र और अग्नि को (हुवे) उद्देश करके होम करता हूं, जिस से (इन्द्राग्नी) वे सूर्य और अग्नि (न मर्धतः) दुःखदायक न हों ॥

ऋ० ६ । ६० । ४ में भी ॥ १ ॥

अथ द्वितीया—

३१ २३२३ १२ ३ १ २
उग्रा विघनिता मृध इन्द्राग्नी हवामहे ।
१ २ ३१२
ता नो मृडात ईदृशे ॥ २ ॥ (८५४)

पदपाठः—उग्रा, विघनिता २ । मृधः २ । इन्द्राग्नी २ । हवामहे क्रि० । ता १ । नः २ । मृडातः क्रि० । ईदृशे १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—वयम् (उग्रा) उग्रौ उद्दीर्णबलौ (मृधः विघनिता) रोगादिशत्रून् हतवन्तौ (इन्द्राग्नी) सूर्यमग्निं च (हवामहे) उद्दिश्य होमं करवाम । (ईदृशे) एवं भूते यज्ञेऽनुष्ठिते सति (ता) तौ (नः) अस्मान् (मृडातः) सुखयताम् ॥ ऋग्वेदे ६ । ६० । ५ ऽपि ॥ २ ॥

भाषार्थः—(उग्रा) बलिष्ठ (मृधः विघनिता) रोगादि शत्रुओं को नष्ट करने वाले (इन्द्राग्नी) सूर्य और अग्नि को (हवामहे) उद्दिष्ट करके हम होम करें । (ईदृशे) ऐसा यज्ञ करने पर (ता) वे दोनों (नः) हम को (मृडातः) सुखदायक हों ॥ ऋ० ६ । ६० । ५ में भी ॥ २ ॥

अथ तृतीया—

२ २ २१ २२ ३१ २२
हथो वृत्राण्यार्या हथो दासानि सत्पती ।
३२उ ३ २३ १ २
हथो विश्वा अप द्विषः ॥३॥ [८] (८५५)

पदपाठः—हथः क्रि० । वृत्राणि २ । आर्या ६ । हथः । दासानि २ । सत्पती १ । हथः । विश्वाः २ । अप अ० । द्विषः २ ॥

अन्वितपदार्थः—(सत्पती) सतां यज्ञानुष्ठातॄणां रक्षकौ सूर्याग्नी (आर्या) आर्याणां धर्मात्मनां (वृत्राणि) अवरोधकानि द्रव्याणि (हथः) नाशयताम् (दासानि) तेषामुपक्षयकराणि (हथः) । (विश्वाः) समस्ताः (द्विषः) हानिकरीः प्रजाः (अप हथः) दूरास्ताः कुरुताम् ॥

अग्न्यादिदेवानुकूल्येन रोगादिनिवृत्त्या सुखमस्माकं भवेदिति तात्पर्यम् ॥ ऋग्वेदे तु ६ । ६० । ६ हथः = हतइति भेदः॥३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(सत्पती) यज्ञानुष्ठानी सत्पुरुषों के रक्षक सूर्य और अग्नि (आर्या) आर्यों के (वृत्राणि) रोकने वाले द्रव्यों का (हथः) नाश करें। (दासानि) इन के उपक्षयकारक पदार्थों का (हथः) निवारण करें और उन की (विश्वाः द्विषः) सब हानिकारिणी प्रजाओं को (अप हथः) दूर करें ॥

अग्न्यादि दिव्य पदार्थों की अनुकूलता से रोगादि की निवृत्तिद्वारा हम को सुख हो, यह भाव है ॥

ऋ० ६ । ६० । ६ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

उक्तं प्रातःसवनम् ॥

(इति विवरणकारः)

इदानीं माध्यंदिनं सवनमुच्यते इति विवरणकारः ॥

विवरणकार कहते हैं कि " अब माध्यन्दिन सवन का आरम्भ किया जाता है" ॥

अथ तृतीयखण्डे प्रथमर्चस्य विश्वामित्र ऋषिः ।
सोमो देवता । बृहती छन्दः ॥ तत्र प्रथमा—

३ १ २२ ३ २ ३ १ २ ३ २ ३ १२ ३ १ २२
अभि सोमास आयवः पवन्ते मद्यं मदम् । समुद्रस्याधि-
३ १२ ३ १ २ ३ १ २ ३ १ २
विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥१॥ (८५६)

व्याख्याता (५१८)

अथ द्वितीया—

१ २ ३ १ २२ ३ २ ३ १ २ ३ २ ३ २ ३ २ १ २
तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् । अर्षा
३ २ ३ १२ ३ १ २ ३ १ २ ३ २ ३ २ ३२
मित्रस्य वरुणस्य धर्मणा प्रहिन्वान ऋतं बृहत्॥२॥ (८५७)

पदपाठः—तरत् क्रि० । समुद्रम् २ । पवमानः १ । ऊर्मिणा ३ । राजा, देवः १ । ऋतम्, बृहत् २ । अर्ष क्रि० । मित्रस्य, वरुणस्य ६ । धर्मणा ३ । प्र अ० । हिन्वानः १ । ऋतम्, बृहत् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(राजा) प्रकाशमानः (देवः) दिव्यस्वरूपः सोमः शान्तात्मा पुरुषः (पवमानः) स्वयं पवित्रोऽन्येषां पावकः (ऊर्मिणा) तरङ्गेण वेगेन सह वर्त्तमानं (बृहत्) महत् (ऋतम्) सत्यसंकल्पं (समुद्रम्) मनः (तरत्) तरति मनोनिग्रहं करोति। अथ च (मित्रस्य) प्राणस्य (वरुणस्य) अपानस्य च (धर्मणा) धारणेन प्राणायामेन (हिन्वानः) उन्नतिं कुर्वन् (बृहत्) महत् (ऋतम्) सत्यं ब्रह्म (प्राऽर्ष) प्रार्षति प्राप्नोति ॥

मनो वै समुद्रो मनसो वै समुद्राद्वाचाभ्रया देवास्त्रयीं विद्यां निरखनन्। श० ७। ४। २। ५२ ॥ ऋग्वेदे तु ९।१०७। १५ अर्षा = अर्षदिति पाठः ॥ २ ॥

भाषार्थः—(राजा) प्रकाशमान (देवः) दिव्यस्वरूप (पवमानः) स्वयं पवित्र और दूसरों को पवित्रशिक्षा देने वाला पुरुष (ऊर्मिणा) तरङ्गसहित (बृहत्) बड़े (ऋतम्) सत्यसंकल्प (समुद्रम्) मन को (तरत्) पार हो जाता है=मन का निग्रह करलेता है और (मित्रस्य) प्राण और(वरुणस्य) अपान के (धर्मणा) धारण=प्राणायाम द्वारा (हिन्वानः) उन्नति करता हुवा (बृहत्) बड़े (ऋतम्) सत्य ब्रह्म को (प्राऽर्ष) प्राप्त होजाता है ॥

शतपथ ७। ४। २। ५२ का प्रमाण, जिस का अर्थ यह है कि "मन ही समुद्र है, मनरूपी समुद्र में से विद्वानों ने वाणीरूप फावड़े से त्रयीविद्या को खोदा" और ऋ० ९। १०७। १५ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथाऽध्यास्यारूपा तृतीया—

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ र ३ १ २ ३ २ र

नृभिर्येमाणो हर्यतो विचक्षणो राजा देवःसमुद्रयः॥३॥[९](८५८)

पदपाठः—नृभिः ३। येमानः, हर्यतः, विचक्षणः, राजा, देवः, समुद्रयः १॥

अन्वितपदार्थः—(नृभिः) नेतृभिर्योगशिक्षकैः (येमानः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिक्ष्यमाणः (हर्यतः) स्पृहणीयः (विचक्षणः) तीव्रबुद्धिः (राजा) प्रकाशमानः (देवः) दिव्यस्वरूपः (समुद्र्यः) समुद्राय मनसे हितो "जायते" इति शेषः ॥ ऋग्वेदे ९।१०७।१६ऽपि ॥ ३ ॥

भाषार्थः--(नृभिः) योगशिक्षकों से (येमानः) शिक्षा पाया हुवा पुरुष (हर्यतः) मनभावना (विचक्षणः) तीव्रबुद्धि (राजा) प्रकाशमान (देवः) दिव्यस्वरूप (समुद्र्यः) मन को हित "होजाता है" ॥ ऋ० ९। १०७। १६ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-पराशरऋषिः। सोमो देवता। त्रिष्टुप्छन्दः ॥

तत्र प्रथमा-

३ १ २र ३ १ २र ३१ २ ३ १ २र

तिस्रो वाच ईरयति प्रवह्निर्ऋतस्य धीतिं ब्रह्मणो

३ २ १ २ ३ १२ ३१२ ३ १ २

मनीषाम् । गावो यन्ति गोपतिं पृच्छमानाः सोमं

३ १ २ ३ २

यन्ति मतयोवावशानाः१(८५९)व्याख्याता(५२५)

अथ द्वितीया-

१ ३ १२३१२ ३२उ ३ १ २ ३ १ २

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः

३ १ २ १ २ ३१ २ ३१२३ १ २

पृच्छमानाः । सोमः सुत ऋच्यते पूयमानः सोमे

३ २ ३ २ ३ १२

अर्कास्त्रिष्टुभः संनवन्ते ॥ २ ॥ (८६०)

पदपाठः-सोमम् २। गावः, धेनवः, वावशानाः १। सोमम्। विप्राः १ मतिभिः ३। पृच्छमानाः १। सोमः, सुतः १। ऋच्यते क्रि०। पूयमानः १। सोमे ७। अर्काः १। त्रिष्टुभः १। संनवन्ते क्रि०॥

अन्वितपदार्थः-(धेनवः) प्रीणयित्र्यः (गावः) वेदवाचः (सोमं) परमेश्वरं (वावशानाः) कामयन्त्य इव प्राप्नुवन्ति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेदैकवेद्यत्वात् । (विप्राः) विद्वांसः (मतिभिः) स्वस्वबुद्धि-साहाय्येन (सोमं) (पृच्छमानाः) अन्वेषमाणाः सन्ति । (सुतः) हृदये ध्यातः (पूयमानः) शुद्धिं कुर्वन् (सोमः) परमात्मा (ऋच्यते) ऋग्भिः स्तूयते परन्तु (अर्काः) मन्त्राः (त्रिष्टुभः) त्रिष्टुबादिछन्दोविशिष्टाः (सोमे) परमात्मनि (संनवन्ते) प्रह्वीभूता भवन्ति,न पूर्णतया वर्णयन्ति वाचोऽविषयत्वात् ॥ ऋग्वेदे तु९।९७।३५ ऋच्यते पूयमानः=पूयते अज्यमान इत्यन्तरम्॥२॥

भाषार्थः–(धेनवः) प्रसन्न करने वाली (गावः) वेदवाणियें (सोमम्) परमात्मा को (वावशानाः)चाहती हुई सी प्राप्त होती हैं क्योंकि वह केवल वेद से ही जानने योग्य है । (विप्राः) विद्वान् लोग (मतिभिः) अपनी २ बुद्धियों से (सोमम्) परमात्मा को (पृच्छमानाः) खोजते हैं । (सुतः) ध्यान किया हुआ (पूयमानः) हृदय को शुद्ध करता हुवा (सोमः) परमात्मा (ऋच्यते) ऋचाओं से स्तुत किया जाता है परन्तु (त्रिष्टुभः) त्रिष्टुप् आदि छन्दों वाले (अर्काः) मन्त्र (सोमे) परमात्मा के विषय में (संनवन्ते) झुक जाते हैं क्योंकि वाणी का विषय न होने से वे उसे संपूर्ण वर्णित नहीं कर सकते । ऋ० ९ । ९७ । ३५ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ २

एवा नः सोम परिषिच्यमान आपवस्व पूयमानः स्वस्ति । इ-

३ १ २ ३ १ २ २ ३ २ ३ १ २ ३ २ ३ १ २

न्द्रमाविश बृहता मदेन वर्धया वाचं जनया पुरन्धिम्।३।[१०]८६१

पदपाठः–एव अ० । नः २ । सोम सं० । परिषिच्यमानः १ । आपवस्व क्रि० । पूयमानः १ । स्वस्ति अ० । इन्द्रम् २। आविश क्रि०। बृहता,मदेन ३ । वर्धय क्रि० । वाचम् २ । जनय क्रि० । पुरन्धिम् २ ॥

अन्वितपदार्थः–(सोम)परमात्मन् ! त्वम् (परिषिच्यमानः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

[कर्तृकर्मव्यत्ययः] परितोऽमृतसेकं कुर्वाणः (पूयमानः) पवित्रतां संपादयन् (नः) अस्मानुपासकान् (आपवस्व) पावय यथाऽस्माकं (स्वस्ति एव) शुभमेव स्यात् । (इन्द्रम्) अस्मदात्मानम् (आविश) सदैवानुप्रविष्टोऽसि [लकारव्यत्ययः] (बृहता) महता (मदेन) आनन्देन (वाचं) भवदीयां स्तुतिं (वर्धय) (पुरन्धिं) बहुधि प्रज्ञानं (जनय) ॥ ऋग्वेदे तु १ । ९७ । ३६ मदेन = रवेणेति पाठः ॥३॥

भाषार्थः– (सोम) हे परमात्मन् ! आप (परिषिच्यमानः) सब ओर अमृत वर्षाते हुवे (पूयमानः) पवित्रता संपादन करते हुवे (नः) इस उपासकों को (आपवस्व) पवित्र कीजिये [जिस से हमारा] (स्वस्ति एव) कल्याण ही [हो] (इन्द्रम्) हमारे आत्मा को (आविश) आप व्याप रहे हैं इस लिये (बृहता) महान् (मदेन) आनन्द से (वाचम्) अपनी स्तुति को (वर्धय) बढ़ाइये और (पुरन्धिम्) बहुत बुद्धियुक्त विज्ञान को (जनय) हमारे लिये उत्पन्न कीजिये ॥ ऋ० ९ । ९७ । ३६ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ चतुर्थखण्डे प्रगाथस्य प्रथमसूक्तस्य–पुरुहन्मा ऋषिः । इन्द्रोदेवता । बृहती छन्दः ॥ तत्र प्रथमा–

१ २र ३ २र ३ १ २र ३ २ १ २ ३ २ ३

यद्याव इन्द्र ते शतꣳशतं भूमीरुतस्युः । न त्वा वज्रिन्त्सहस्रꣳ

२ ३ २ ३ २ ३ १ २ ३ १ २

सूर्या अनु न जातमष्ट रोदसी ॥१॥(८६२)व्याख्याता(२७८)

" उक्तो माध्यंदिन इदानींपृष्ठान्युच्यन्ते " इति विवरणकारः

भाषार्थः–इस की टिप्पणी में विवरणकार कहते हैं कि " माध्यंदिन सवन कहा गया, अब पृष्ठ कहे जाते हैं :— " इस प्रथम मन्त्र की व्याख्या छन्द आर्चिक २७८ संख्या पर कर आये हैं । छः दिन का १ पृष्ठ होता है । यथा–१ रथन्तर, २ बृहत, ३ विरूप, ४ वैराज, ५ शाक्कर और ६ रैवत । इसी प्रकार क्रम से इन छः पृष्ठ दिनोंके ६ पृष्ठधर्म हैं । जैसे–१ रथघोष, २दुन्दुभ्याहनन, ३ उपवाजन, ४ उरोगिमन्थन, ५ आर्भवघोष और ६ गवांघोष ॥१॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ १ २र ३ १ २ ३ १ २

आपप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।

३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २

अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः॥२॥

[११] (८६३)

पदपाठः—आपप्राथ क्रि० । महिना ३ । वृष्ण्या २ । वृषन् सं० । विश्वा२। शविष्ठ सं० । शवसा ३ । अस्मान् २ । अव क्रि०। मघवन् सं० । गोमति ७ । व्रजे ७। वज्रिन् सं० । चित्राभिः, ऊतिभिः ३ ॥

अन्वितपदार्थः—(वृषन्) हे अभिमतफलवर्षक ! (शविष्ठ) बलवत्तम ! (मघवन्) इन्द्र ! परमात्मन् ! (महिना) महत्त्वेन (शवसा) बलेन च त्वं (विश्वा) सर्वाणि (वृष्ण्या) वीर्यवत्तमानि द्रव्याणि (आपप्राथ) व्याप्तवानसि । स त्वं (गोमति) इन्द्रियवति (व्रजे) गोष्ठे देहे (चित्राभिः) आश्चर्ययुक्ताभिः (ऊतिभिः) रक्षाभिः (अस्मान् अव) ॥ ऋग्वेदे ८।७०। ६ ऽपि ॥ २ ॥

भाषार्थः—(वृषन्) यथेष्ट कामनाओं के वर्षानेवाले ! (शविष्ठ) बलिष्ठ! (मघवन्) इन्द्र ! परमात्मन् ! आप (महिना) बड़प्पन और (शवसा) बल से (विश्वा) सब (वृष्ण्या) वीर्यवानों को (आ पप्राथ) व्याप्त कर रहे हैं । सो आप (गोमति) इन्द्रियों से युक्त (व्रजे) खरूपरूप देह में (चित्राभिः) विचित्र (ऊतिभिः) रक्षाओं से (अस्मान्) हम को (अव) रक्षित कीजिये ॥ ऋ० ८ । ७० । ६ में भी ॥ २ ॥

अथ द्वितीयतृचस्य—मेधातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तथ प्रथमा—

३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः । पवित्रस्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३१२ ३ १२ ३१२
प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥१॥ (८६४)

व्याख्याता (२६१)

अथ द्वितीया–

१२ ३२३ ३ १२ ३२ ३१२ ३२३१
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः । कदा सुतं
२३२३ ३ १२३१२३ २३१ २
तृषाण ओक आगमइन्द्र स्वर्दीव वꣳसगः ॥२॥ (८६५)

पदपाठः–स्वरन्ति क्रि० । त्वा २ । सुते ७ । नरः १ । वसो सं०।निःअ० एके १ । उक्थिनः १ ।कदा अ० । सुतम् २ । तृषाणः १ । ओकः २ । आगमः क्रि० । इन्द्र सं० । स्वर्दी १ । इव अ० । वंसगः १ ॥

अन्वितपदार्थः–(वसो)अधनानां धन !(इन्द्र)परमैश्वर्यवन् ! जगदीश्वर! (एके नरः) (उक्थिनः) स्तोतारः (सुते) अन्नादिलाभे निमित्ते (निः) नितराम् (त्वा) त्वाम् (स्वरन्ति) आह्वयन्ते। दृष्टान्तः–(इव) यथा (सुतम्) स्वच्छं जलं प्रति (तृषाणः) तृष्णां कुर्वन् [इवरति] यत्–(वंसगः) वननीयगमनः (स्वर्दी) शोभनजलदाता (कदा) कस्मिन्काले (ओकः) स्थानम् (आगमः) अगच्छेदिति ॥ ऋग्वेदे ८ । ३३ । २ ऽपि ॥२॥

भाषार्थः–(वसो) हे निर्धनों के धन ! (इन्द्र) परमेश्वर ! (एके नरः) कितने ही मनुष्य (उक्थिनः) स्तोता (सुते) अन्नादिलाभनिमित्त (निः) निरन्तर (त्वा) आप को (स्वरन्ति) पुकारते हैं । दृष्टान्तः–(इव) जैसे (सुतम्) स्वच्छ जल का (तृषाणः) प्यासा [पुकारता है कि] (वंसगः) सुशील (स्वर्दी) उत्तमजलदाता (कदा) कब (ओकः) स्थान पर (आगमः)आवे ॥ ऋ० ८ । ३३ । २ में भी ॥ २ ॥

अथ तृतीया–

१ २ ३ २ ३ २र २र ३१ २ ३१ २
कण्वेभिर्धृष्णवाधृषद्वाजं दर्षि सहस्रिणम् । पिशङ्गरूपं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १र २र

मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥३॥ [१२] (८६६)

पदपाठः—कण्वेभिः ३=४ । धृष्णो सं० । आधृषत् १ । वाजम् २ । दर्षि क्रि० । सहस्रिणम्, पिशङ्गरूपम् २ । मघवन्, विचर्षणे सं० । मक्षु अ० । गोमन्तम् २ । ईमहे क्रि० ॥

अन्वितपदार्थः—(मघवन्) हे इन्द्र ! परमात्मन् ! (धृष्णो] सर्वाभिभावुक ! (आधृषत्) सर्वतोऽभयः सन् त्वं (पिशङ्गरूपं) पक्वं (सहस्रिणं) बहुपरिमाणं (गोमन्तं) गवादिपशुसहितं (वाजं) धान्यं (कण्वेभिः) कण्वेभ्यो मेधाविभ्यः (मक्षु) शीघ्रं (दर्षि) ददासि । अतएव (विचर्षणे) साक्षिन् ! [वयं त्वाम्] (ईमहे) याचामहे ॥

कण्व इति मेधाविनाम निघं० ३ । १५ ॥ मक्षिति क्षिप्रनाम निघं० २ । १५ ॥ ईमहे इति याच्ञाकर्मा निघं० ३ । १९ ॥ ऋग्वेदे ८ । ३३ । ३ ऽपि ॥ ३ ॥

भावार्थः—(मघवन्) हे इन्द्र ! परमात्मन् ! (धृष्णो) सर्वोपरि विराजमान ! (आधृषत्) सर्वतः अभय आप (पिशङ्गरूपम्) पक्का, (सहस्रिणम्) बहुत, (गोमन्तम्) गौ बैल आदिसहित (वाजम्) धान्य (कण्वेभिः) बुद्धिमानों के लिये (मक्षु) शीघ्र (दर्षि) देते हैं । (विचर्षणे) हे साक्षिन् ! [अतएव आप से] (ईमहे) हम मांगते हैं ॥

निघण्टु ३ । १५, ३ । १९, २ । १५ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । ३३ । ३ में भी ॥ ३ ॥

अथ प्रगाथस्य तृतीय सूक्तस्य—वसिष्ठऋषिः । इन्द्रो देवता ।

बृहती छन्दः ॥ तत्र प्रथमा—

३ २ ३ १ २ ३ २ ३ १ २ ३ २ २ ३ १ २

तरणिस्त्सिषासति वाजं पुरन्ध्या युजा । आ व इन्द्रं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३१ २ ३१३१ २र३ १२
पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ १ ॥ (८६७)

व्याख्याता (२३८)

अथ द्वितीया–

१२३१२ ३१३ ३१ र२र ३१२ ३२३
न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तं रयिर्नशत् । सुशक्ति-
१२३ २३ १२ ३१र २र ३२
रिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥२॥ (८६८)

पदपाठः–न अ० । दुष्टुतिः १ । द्रविणोदेषु ७ । शस्यते क्रि० । न । स्रेधन्तम् २ । रयिः १ । नशत् क्रि० । सुशक्तिः १ । इत् अ० । मघवन् सं० । तुभ्यम्, मावते ४=६ । देष्णम्, यत् १ । पार्ये, दिवि ७ ।।

अन्वितपदार्थः—(मघवन्) धनवन्निन्द्र! परमेश्वर! (द्रविणोदेषु) धनादिदातृषु (दुष्टुतिः) कल्पिता स्तुतिः (न शस्यते)। (स्रेधन्तं) हिंसादिपराऽपकारंकुर्वाणं (रयिः) धनादि (न) (नशत्) प्राप्नोति [निघं० २। १८] (देष्णं) दानं (यत्) यत्किञ्च (पार्ये) पारणीयेऽनवरोधके (दिवि) अनन्ताकाशेऽस्ति तत् (मावते) लक्ष्मीवतः (तुभ्यं) तव (इत्) एव (सुशक्तिः) शोभना शक्तिर्नान्यस्य ॥ ऋग्वेदे तु ७। ३२। २१ नदुष्टुतीमर्त्यो विन्दतेवसु–इति प्रथमे पादेऽन्तरम् ॥ २ ॥

भाषार्थः–(मघवन्) हे धनपते! (द्रविणोदेषु) धनादिदाताओं के विषय में (दुष्टुतिः) कल्पित [दिखावटी व अभावटी] स्तुति (न) नहीं (शस्यते) कही जाती है। (स्रेधन्तम्) हिंसादि परायां अपकार करते हुवे को (रयिः) धनादि ऐश्वर्य (न) नहीं (नशत्) प्राप्त होता है [निघं० २। १८] (देष्णम्) दान (यत्) जो कुछ (पार्ये) विना रोक वाले (दिवि) इस अनन्त आकाश में है सो (मावते) धनपति (तुभ्यम्) आप

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

की (इत्) ही (सुशक्तिः) उत्तम शक्ति है । अन्य कोई क्या देगा । ऋ० ७। ३२ । २१ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

उक्तं माध्यंदिनं सवनम् ॥

इदानीं तृतीयं सवनमारभ्यते इति विष० ।

अथ पञ्चमे खण्डे प्रथमतृचस्य–त्रित आप्त्योवाऋषिः।सोमो देवता । गायत्रीछन्दः

तत्र प्रथमा–

३२उ ३ १२३ १ २ ३१२

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः।

१र ३ १ २

हरिरेति कनिक्रदत्॥१॥(८६९) व्याख्याता (४७१)

अथ द्वितीया

३१र २र ३२३१२ ३२२

अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः ।

३१२ ३१ २र

मर्जयन्तीर्दिवः शिशुम् ॥२॥ (८७०)

पदपाठः–अभि अ० । ब्रह्मीः १ । अनूषत क्रि० । यह्वीः १ । ऋतस्य ६ । मातरः १ । मर्जयन्तीः १ । दिवः ६ । शिशुम् २ ॥

अन्वितपदार्थः–(ब्रह्मीः) ब्राह्मयो ब्रह्मणा प्रकाशिताः (यह्वीः) यह्व्योमहत्यः (ऋतस्य) यज्ञस्य (मातरः) मानकर्त्र्यः (मर्जयन्तीः) पावयित्र्योवेदवाचः (दिवः) द्युलोकस्य (शिशुं) " शंसनीयं सोममिति " विवरणकारः । (अभ्यनूषत) अभितः प्रशंसन्ति ॥

यह्व इति महतोनाम निघं० ३ । ३ ॥ तृतीयस्यामितो दिवि सोम आसीदित्यादि श्रुतेः द्युशिशुत्वं तस्येति सायणोऽपि॥ ऋग्वेदे तु ९।३३।५ऽपि ॥ २ ॥

भाषार्थः–(ब्रह्मीः) परमात्मा की प्रकाशित, (यह्वीः) महती, (ऋतस्य) यज्ञ की (मातरः) माता के समान मान करने वाली, (मर्जयन्तीः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पवित्र करने वाली वेदवाणियें (दिवः) द्युलोक के (शिशुम्) प्रशंसनीय पुत्र के समान सोम की (अभि) सर्वतः (अनूषत) प्रशंसा करती हैं ॥

सायणाचार्य, विवरणकार, निघण्टु के प्रमाण और ऋ० ९ । ३३ । ५ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

३ १ ३ २ ३ १ २ ३ १ २

रायः समुद्राँश्चतुरोस्मभ्यꣳसोम विश्वतः ।

१ २ ३ १ २

आपवस्व सहस्रिणः ॥३॥ [११] (८७१)

पदपाठः—रायः ६ । समुद्रान्, चतुरः २ । अस्मभ्यम् ४ । सोम सं० । विश्वतः अ० । आपवस्व क्रि० । सहस्रिणः ६ ॥

अन्वितपदार्थः—(सोम) परमात्मन् ! वा सोम ! (सहस्रिणः) बहुसंख्याकस्य (रायः) धनस्य मणिमुक्तादेः (चतुरः) चतुर्दिग्वर्त्तीन् (समुद्रान्) उदधीन् (अस्मभ्यम्) (विश्वतः) सर्वतः (आपवस्व) प्रापय ॥ ऋग्वेदे ९ । ३३ । ६ ऽपि ॥३॥

भाषार्थः—(सोम) परमात्मन् ! वा सोम ! (सहस्रिणः) बहुत संख्या वाले (रायः) मणिमुक्तादि रत्न धन के भरे (चतुरः) ४ चारों दिशास्थ (समुद्रान्) समुद्रों को (अस्मभ्यम्) हमारे लिये (विश्वतः) सब ओर से (आपवस्व) प्राप्त कराइये ॥ ऋ० ९ । ३३ । ६ में भी ॥३॥

अथ द्वितीयतृचस्य—ययातिर्नाहुषऋषिः । पवमानः सोमो देवता । अनुष्टुप्छन्दः ॥ तत्र प्रथमा—

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः। पवित्रवन्तो अक्षर-

३ १ २ ३ १ २

न्देवान्गच्छन्तु वोमदाः ॥ १ ॥ (८७२) व्याख्याता (५४७)

अथ द्वितीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २

इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् । वाचस्पति-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ १ २ ३ १ २
मंखस्यते विश्वस्येशान ओजसः ॥ २ ॥ (८७३)

पदपाठः—इन्दुः १ । इन्द्राय ४ । पवते क्रि० । इति अ० । देवासः १ । अब्रुवन् क्रि० । वाचस्पतिः १ । मखस्यते क्रि० । विश्वस्य ६ । ईशानः १ । ओजसः ६ ॥

अन्वितपदार्थः—(इन्दुः) सोमः (वाचस्पतिः) वाचः सौष्ठवकरत्वात्पतिः, (विश्वस्य) सर्वस्य (ओजसः) बलस्य (ईशानः) उत्पादने समर्थः, (मखस्यते) यज्ञमिच्छति, (इन्द्राय) वृष्टिकृते वायवे विद्युते वा (पवते) गच्छति । (इति) इत्यादिप्रकारेण (देवासः) तद्गुणविद्वांसः (अब्रुवन्) ब्रूयुरुपदिशेयुरिति परमात्मन आज्ञा वेद्या ॥ ऋग्वेदे तु १ । १०१ । ५ ओजसेति पाठः ॥ २ ॥

भाषार्थः—(इन्दुः) सोम (वाचस्पतिः) वाणी का पालक, (विश्वस्य) सब (ओजसः) बल पराक्रम के (ईशानः) उत्पादन में समर्थ, (मखस्यते) यज्ञ चाहता और (इन्द्राय) वृष्टिकारक वायु वा विद्युत् के लिये (पवते) जाता है । (देवासः) सोमगुण जानने वाले विद्वान् (इति) इत्यादि प्रकार (अब्रुवन्) उपदेश करें । यह ईश्वराज्ञा है ॥ ऋ० ९ । १०१ । ५ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २ ३ २
सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
२ ३ १ २ ३ १ २र ३ १ २
सोमस्पतीरयीणाꣳसखेन्द्रस्य दिवे दिवे ॥ ३ ॥ [१५] (८७४)

पदपाठः—सहस्रधारः १ । पवते क्रि० । समुद्रः, वाचमीङ्खयः, सोमः, पतिः १ । रयीणाम् ६ । सखा १ । इन्द्रस्य ६ । दिवे, दिवे अ० ॥

अन्वितपदार्थः—(सहस्रधारः) बहुधारः, (समुद्रः) रसाढ्यः, (वाचमीङ्खयः) वाचः संस्कर्त्ता [ईङ्खतेर्यन्तात् सुप्यु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पपदे खश् प्रत्ययः] (रयीणाम्) हविर्धनवतां यजमानानामिति सायणोऽपि (पतिः) पोषकः, (दिवे, दिवे) प्रतिदिनम् (इन्द्रस्य) वायोर्विद्युतोवा (सखा) पोषकत्वाद्धितकरः (सोमः पवते) सोम आकाशं गच्छति ॥ ऋग्वेदे ९। १०१। ६ऽपि ॥ ३ ॥

भाषार्थः—(सहस्रधारः) अनेक धारों वाला, (समुद्रः) रस भरा, (वाचमीङ्खयः) वाणी का संस्कारकर्त्ता (रयीणाम्) हव्य धन वाले यजमानों का (पतिः) पोषक, (दिवे, दिवे) प्रतिदिन (इन्द्रस्य) वायु वा विद्युत् का (सखा) पोषक होने से हितकारी (सोमः) सोम (पवते) आकाश को जाता है ॥

सायणादि की पुष्टियें संस्कृत भाष्य में देखिये ॥ ऋ० ९।१०१।६ में भी ॥३॥

अथ तृतीयतृचस्य—पवित्र ऋषिः। पवमानः सोमो देवता। जगती छन्दः ॥

तत्र प्रथमा—

३१२ ३ १२ ३१ २र ३ १२ ३१२

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।

१२ ३२उ ३१ २ ३२ ३१ २र३ १ २र

अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तः सं तदाशत ॥१॥

(८७५) व्याख्याता (५६५)

अथ द्वितीया—

१२३ २३ १२ ३२३ १ ३ २ ३ २क २र

तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवोव्यस्थिरन् ।

१२ ३१२३ १ २ ३२३१ २र ३ १२

अवन्त्यस्य पवितारमाशवो दिवःपृष्ठमधिरोहन्ति तेजसा २(८७६)

पदपाठः—तपोः ६। पवित्रम्, विततम् १। दिवस्पदे ७। अर्चन्तः १। अस्य ६। तन्तवः १। व्यस्थिरन्, अवन्ति क्रि०। अस्य। पवितारम् २। आशवः १। दिवः ६। पृष्ठम् २। अधिरोहन्ति क्रि०। तेजसा ३ ॥

अन्वितपदार्थः—(तपोः) तेजस्विनः सोमस्य (पवित्रं) शुद्धिकरमङ्गं (दिवस्पदे) द्युपृष्ठे (विततं) विस्तृतं भवति (अस्य)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोमस्य (तन्तवः) वायुगताःकिरणाः (अर्चन्तः) प्रकाशमानाः (व्यस्थिरन्) विविधास्तिष्ठन्ति (अस्य) सोमस्य (आशवः) आशुगामिनो रसाः (पवितारं) पावयितारं यजमानम् (अवन्ति) रक्षन्ति ["होमद्वारा पश्चाद्धुताः" इति सायणः] (दिवः)द्युलोकस्य (पृष्ठम्) उन्नतदेशं (तेजसा) सह (अधिरोहन्ति) ॥

ऋग्वेदे तु ९।८३। २ अर्चन्तः = शोचन्तः; रोहन्ति = तिष्ठन्ति इत्यन्तरम् ॥ २ ॥

भाषार्थः—(तपोः) तेजस्वी सोम का (पवित्रम्) पवित्रअङ्ग (दिवस्पदे) द्युलोक के उन्नतस्थान में (विततम्) फैला है (अस्य) इस सोम के (तन्तवः) वायुगत तार (अर्चन्तः) चमकते हुवे (व्यस्थिरन्) अनेकधा स्थित होते हैं (अस्य) इस सोम के (आशवः) शीघ्रगामी रस (पवितारम्) यजमान की (अवन्ति) रक्षा करते हैं [सायणाचार्य कहते हैं कि—"होमद्वारा, फिर होम किये हुवे"] (दिवः) द्युलोक की (पृष्ठम्) पीठ पर (तेजसा) तेज के साथ (अधिरोहन्ति) चढ़ जाते हैं ॥

ऋ० ९। ८३। २ का अन्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २

अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु

३ २ ३ १ २ ३ १ २ ३ १ २

वाजयुः । मायाविनो ममिरे अस्य मायया नृचक्षसः

३ २ ३ २ ३ १ २

पितरो गर्भमादधुः ॥ १ ॥ [१६] (८७७)

पदपाठः—अरूरुचत् क्रि० । उषसः २ । पृश्निः १ । अग्रियः १ । उक्षाः १। मिमेति क्रि० । भुवनेषु ७ । वाजयुः १ । मायाविनः १ । ममिरे क्रि०। अस्य ६। मायया ३ । नृचक्षसः, पितरः १ । गर्भम् २ । आदधुः क्रि० ॥

अन्वितपदार्थः—(अस्य) सोमस्य (मायया) प्रज्ञातत्त्वेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(मायाविनः) बुद्धितत्त्वयुक्ताः पुरुषाः पदार्था वा (ममिरे) निर्मिता भवन्ति, तथा (अग्रियः) मुख्यः (पृश्निः) आदित्यः सूर्यः (उक्षाः) वृष्टिसमर्थः (भुवनेषु वाजयुः) लोकेष्वन्नमुत्पिपादयिषुः (मिमेति) मिनोति जलं प्रक्षिपति तथा (उषसः) प्रभातान् (अरूरुचत्) रोचयति (नृचक्षसः) नृणां दर्शनसहायकाः (पितरः) पालकाः सोमरश्मयः(गर्भम्)सोमगर्भम्(आदधुः)॥

"पृश्निरादित्यो भवति प्राश्नुतएनं वर्ण इति नैरुक्ताः"। निरु० २।१४मायेति प्रज्ञानाम निघं० ३। ९॥"अत्र सूर्यात्मकः सोमः स्तूयते। सूर्यरश्म्यनुगमाधीनवर्धनाच्चन्द्रस्य ० ० ० ० ० पितरो जगद्रक्षकारश्मयो गर्भमादधुः" इति सायणाचार्यः ॥

ऋग्वेदे तु ९।८३।३ मिमेति भुवनेषु = बिभर्त्ति भुवनानि इत्यन्तरम् ॥ ३ ॥

भाषार्थः—(अस्य) इस सोम के (मायया) बुद्धितत्त्व से (मायाविनः) बुद्धिमान् लोग वा बुद्धितत्त्वयुक्त पदार्थ (ममिरे) बने हैं, तथा (अग्रियः) मुख्य आदित्य सूर्य (उक्षाः) वृष्टि करने में समर्थ (भुवनेषु) लोकों में (वाजयुः) अन्नोत्पत्ति के लिये (मिमेति) जल बर्षाता है तथा (उषसः) प्रभातों को (अरूरुचत्) प्रकाशित करता है। (नृचक्षसः) मनुष्यों को दिखाने वाली (पितरः) चन्द्रकिरणें जो कि पालन करती हैं (गर्भम्) सोमगर्भ का (आदधुः) आधान करती हैं॥

निरुक्त २। १४ का प्रमाण, जिस का अर्थ यह है कि—" सूर्य पृश्नि है क्योंकि इस में रंगतें व्यापरही हैं" तथा निघण्टु ३। ९ का प्रमाण, जिस का अर्थ यह है कि—"माया बुद्धितत्त्व का नाम है" और सायणाचार्य का प्रमाण जिस का यह तात्पर्य है कि"इस ऋचा में सूर्यकिरणगत सोम का वर्णन है, क्योंकि सूर्य की किरणों से चन्द्रमा की किरण बढ़ती हैं और चन्द्रमा की किरणें जगत् का पालन करने से पितर कहाती हैं और सोमलता का गर्भाधान करती हैं अर्थात् वैद्यकशास्त्रानुसार चन्द्रकिरणों से सोमलता की उत्पत्ति होती है" और ऋ० ९।८३। ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति चतुर्थाऽध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

" यज्ञायज्ञीयमग्निष्टोमसाम " इति

"इदानीमुक्थानि भवन्ति" इति च विवरणकारः ॥

भाषार्थः—यह चतुर्थ अध्याय का ५ वां खण्ड हुवा और विवरणकार का मत है कि—"यह यज्ञायज्ञीय अग्निष्टोम यज्ञ का साम हुवा, अब (आगे) उक्थ=स्तोत्र हैं ॥"

अथ षष्ठखण्डे प्रथमस्य प्रगाथस्य—सौभरिःकाण्वऋषिः । अग्निर्देवता । ककुप्सतोबृहती च क्रमेण छन्दसी ॥ तत्र प्रथमा—

१ २र ३ १ २ ३ २ ३ १ २

प्रमꣳहिष्ठाय गायत ऋताञ्ने बृहते शुक्रशोचिषे ।

३ १ २ ३ १ २

उपस्तुतासो अग्नये ॥ १ ॥ (८७८) व्याख्याता (१०७)

अथ द्वितीया—

१ २ ३ १ २ ३र ३ २ ३ १ २ ३ १ २

आवꣳसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।

३ १ २ ३ १ २र ३ २ ३ २ ३ १ २

कुविन्नो अस्य सुमतिर्भवीयस्यच्छ वाजेभिरागमत् ॥ २ ॥

पदपाठः—आवंसते क्रि० । मघवा १ । वीरवत्, यशः २ । समिद्धः, द्युम्नी, आहुतः १ । कुवित् अ० । नः २ । सुमतिः, भवीयसी १ । अच्छ अ० । वाजेभिः ३ । आगमत् क्रि० ॥

अन्वितपदार्थः—(मघवा) मखवान् (द्युम्नी) यशस्वी (समिद्धः) प्रदीप्तः (आहुतः) आभिमुख्येन हुतोऽग्निः (वीरवत्) वीरैर्युक्तं (यशः) अन्नम् (आवंसते) प्रयच्छति (अस्य) अग्नेः (भवीयसी) अतिशयेन भवितुं योग्या (सुमतिः) शो-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भना मतिर्बुद्धितत्वम् (वाजेभिः) अन्नैःसह (नः) अस्मान् (अच्छ) प्रति (कुवित्) बहु (आगमत्) प्राप्नोतु ॥

सम्यगाहुतेनाग्निना मनुष्याः पुत्रादिप्रजां शोभनां मतिं बहु धनं धान्यं च प्राप्नुवन्तीति भावः ॥

यशइत्यन्नाम निघं० २ । ७ ॥ द्युम्नं द्योततेर्यशोवान्नं वा। निरु० ५ । ५ ॥ कुविदिति बहुनाम निघं० ३ । १ ॥ ऋग्वेदे तु ८। १०३ । ९ भवीयसी = नवीयसीति पाठः ॥२॥

भाषार्थः- (मघवा) यज्ञ वाला (द्युम्नी) यश वाला (समिद्धः) प्रदीप्त (आहुतः) सामने से होम किया हुवा अग्नि (वीरवत्) वीर पुत्रादियुक्त (यशः) अन्न (आवंसते) देता है (अस्य) इस अग्नि का (सुमतिः) शोभन बुद्धितत्व (वाजेभिः) अन्नों सहित (नः) हम (अच्छ) को (कुवित्) बहुत (आगमत्) प्राप्त हो ॥

भले प्रकार अग्नि में होम करने से मनुष्य—पुत्रादि सन्तान, उत्तम बुद्धि, बहुत धन धान्यादि को प्राप्त होते हैं ॥

निघण्टु २ । ७, ३ । १ निरुक्त ५ । ५ के प्रमाण और ऋ० ८ । १०३ । ९ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ द्वितीयर्चस्य—गोषूक्त्यश्वसूक्तिनौ काण्वायनावृषी । इन्द्रोदेवता । उष्णिक्छन्दः ॥ तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २ ३ २

तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।

३ १ २ ३ १ २

उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ १ ॥ (८८०)

व्याख्याता (३८३)

अथ द्वितीया—

२ ३ १ २ ३ २ ३ १ २ ३ १ २

येन ज्योतींष्यायवे मनवे च विवेदिथ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ २ ३ २ ३ १ २

मन्दानो अस्य बर्हिषो विराजसि ॥ २ ॥ (८८१)

पदपाठः—येन ३ । ज्योतींषि २ । आयवे, मनवे ४ । च अ० । विवेदिथ क्रि० । मन्दानः १ । अस्य, बर्हिषः ६ । विराजसि क्रि० ॥

अन्वितपदार्थः—हे इन्द्र ! परमेश्वर ! (येन) यस्मात् कारणात् (अस्य) उपासकस्य (बर्हिषः) योगयज्ञस्य मध्ये(विराजसि) विराजसेऽतःकारणात् (मन्दानः) आनन्दस्वरूपस्त्वं (मनवे) मनसेऽन्तःकरणाय (आयवे) प्राणाय [शत० ४ । २ । ३ । १] (च) (ज्योतींषि) प्रकाशान् (विवेदिथ) प्रापयसि ॥

ऋग्वेदे ८ । १५ । ५ ऽपि ॥ अहह ! गतानुगतिकता ! यत् शर्मणयदेशमुद्रितपुस्तकानुकरणेनाऽन्येन वा केनचित्कारणेन ऐसियाटिकसमित्या प्रकाशिते सायणभाष्यगानयुक्तपुस्तके भ्रान्त्या "मनवे मनवे" इति द्विर्मुद्रितम्, तद्दृष्ट्वाऽजमीढनगरस्थवैदिकयन्त्रालयमूलपुस्तकेऽपि तदेव दृश्यते, अर्गलपुरस्थेन भार्गवेन तु व्याख्याऽपि द्विरुक्तस्यैव मण्डिता, नैव विचारितं यच्छन्दोऽपि नैव तादृशं यदत्राक्षरत्रयवृद्धिः संभाव्येत, नापि सायणभाष्ये, न च पदपाठपुस्तके, नाऽपि ऋग्वेदे, न गानग्रन्थे, नोत जीवानन्दमुद्रापितपुस्तके द्विरुक्तं तदस्ति ॥ २ ॥

भाषार्थः—हे परमेश्वर ! इन्द्र ! (येन) जिस कारण (अस्य) इस उपासक के (बर्हिषः) योगयज्ञ के मध्य में (विराजसि) आप विराजते हैं इस कारण (मन्दानः) आनन्दस्वरूप आप (मनवे) मन=अन्तःकरण (च) और (आयवे) प्राण [शतपथ ४ । २ । ३ । १] के लिये (ज्योतींषि) ज्योतियों को (विवेदिथ) प्राप्त कराते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋ० ८। १५। ५ में भी ऐसा ही पाठ है। परन्तु आश्चर्य है कि बिलायती जर्मन के छपे पुस्तक की नक़ल से वा अन्य किसी कारण से ऐसियाटिक सुसाइटी के सायणभाष्य और गानयुक्त पुस्तक में "मनवे मनवे" ऐसा दो वार पाठ भ्रान्ति से छप गया। उसी की देखादेखी अजमेर के वैदिक यन्त्रालय के मूल पुस्तक में भी वैसा ही छप गया और आगरे के भार्गव जी ने तो दूसरे "मनवे" पद का अर्थ भी कर डाला !! यह विचार नहीं किया कि न तो उष्णिक् छन्द में ये ३ अक्षर बढ़ सकते हैं, न सायणभाष्य में द्विरुक्ति की व्याख्या है, न पदपाठ पुस्तक में, न ऋग्वेद ८। १५। ५ में, न गान ग्रन्थों में इस का पुनर्गान है, जीवानन्द के छपाये पुस्तक में भी इसका दो वार पाठ नहीं है ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ १ २र ३ १ २

तदद्या चित्त उक्थिनोऽनुष्टुबन्ति पूर्वथा ।

१ २ ३ १ २ ३ १ २

वृषपत्नीरयोजया दिवे दिवे ॥ ३ ॥ [१८] (८८२)

पदपाठः—तद् २। अद्य, चित् अ०। ते ६। उक्थिनः १। अनुष्टुबन्ति क्रि०। पूर्वथा अ०। वृषपत्नीः २। अपः २। जय क्रि०। दिवे, दिवे अ०॥

अन्वितपदार्थः—हे इन्द्र! परमात्मन्! वा वृष्टिकर्त्तः! यत्त्वं (वृषपत्नीः) वृषा वर्षन्तः पर्जन्याः पतयो यासां ताः (अपः) (जय) स्वायत्ताः करोषि (तद्) (ते) त्वदीयं यशः (उक्थिनः) वैदिकस्तोत्रवन्तो मनुष्याः (दिवे दिवे) प्रतिदिनम् (अद्य चित्) अद्यापि (पूर्वथा) पूर्वकालवत् (अनुष्टुबन्ति) क्रमेण प्रशंसन्ति ॥ ऋग्वेदे ८। १५। ६ऽपि ॥ ३ ॥

भाषार्थः—हे इन्द्र! परमेश्वर! वा वृष्टिकर्त्तः! जो कि आप (वृषपत्नीः) मेघों के स्त्री रूप (अपः) जलों को (जय) स्वाधीन करते हैं (तद्) सो (ते) आप के यश को (उक्थिनः) वैदिक स्तोत्रों वाले मनुष्य (दिवे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दिवे) प्रतिदिन (अद्य चित्) अब भी (पूर्वथा) पूर्व के समान (अनुष्टुबन्ति) प्रशंसा करते हैं ॥ ऋ० ८ । १५ । ६ में भी ॥ ३ ॥

अथ तैरश्चं तृतीयमुक्थमिति विवरणकारः ॥

अथ तृतीयतृचस्य-तिरश्चीर्ऋषिः । इन्द्रोदेवता । अनुष्टुप्छन्दः ॥

तत्र प्रथमा-

३ १ २र ३ २३ ३ १ २ ३ १ २ ३ १ २ ३
श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति । सुवीर्यस्य
१ २ ३ १ ३ ३ १ २
गोमतोरायस्पूर्धि महाँ असि॥१॥(८८३)व्याख्याता(३४६)

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ १ २र
यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत् ।
३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥२॥(८८४)

पदपाठः-यः १ । ते ४ । इन्द्र सं० । नवीयसीं, गिरं, मन्द्राम् २ । अजीजनत् क्रि० । चिकित्वन्मनसं, धियं, प्रत्नाम् २। ऋतस्य ६ । पिप्युषीम् २ ॥

अन्वितपदार्थः—(इन्द्र) परमेश्वर! (यः) उपासकः स्तोता (ते) त्वदर्थं (नवीयसीं) स्तुतिरूपतरां [णु स्तुतौ] (मन्द्राम्) आनन्ददाम् (गिरम्) वाचम् (अजीजनत्) उच्चारणेनोत्पादयति, (चिकित्वन्मनसं) प्रज्ञानयुक्तंमनोयस्यां तादृशीं (प्रत्नां) सनातनीम् (ऋतस्य) यज्ञस्य (पिप्युषीम्) पोषयित्रीं (धियं) वेदस्थां प्रज्ञां [तस्मै ददासीति शेषः]

नवीयसीं नवतरां मृदुपदवर्णस्वरोदाहरणयुक्तामिति, प्रत्नामग्यजुःसामलक्षणामिति च तथा-ऋतस्य पिप्युषीम्=ऋतो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञोऽथवा ऋतः प्रजापतिः अथवा ऋतं सत्यं परं ब्रह्म तस्य पिप्युषीं पोषणसमर्थामिति च विवरणकारः ॥

ऋग्वेदे तु ८।९५।५ इन्द्र यस्ते न वीयसीमिति पाठव्यत्ययः॥२॥

भाषार्थः—(इन्द्र) हे परमेश्वर ! (यः) जो स्तोता उपासक (ते) आपके लिये (नवीयसीम्) अत्यन्त स्तुतिरूपिणी (मन्द्राम्) आनन्ददायिनी (गिरम्) वाणी को (अजीजनत्) उच्चारण द्वारा उत्पन्न करता है, (चिकित्विन्मनसम्) प्रज्ञानयुक्त मन वाली (प्रत्नाम्) सनातनी (ऋतस्य) यज्ञ की (पिप्युषीम्) पोषण करने वाली (धियम्) वेदस्थ बुद्धि को [उस के लिये आप देते हैं] ॥

विवरणकार कहते हैं कि " नवीयसी=उत्तम मधुर वा कोमल पद वर्ण स्वर उदाहरणों से युक्त " । और यह कि—" प्रत्ना=ऋग्यजुःसामरूपा " । तथा यह कि—" ऋतस्यपिप्युषीम्=ऋत नाम यज्ञ, अन्न, प्रजापति वा परब्रह्मज्ञान के पोषण करने में समर्था को" ॥ ऋ० ८। ९५। ५ में का पाठव्यत्यय संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ २र ३ १ २ ३ १ २ ३ २

तमु ष्टवाम यं गिर इन्द्रमुक्थ्यानि वावृधुः ।

३ १ २ ३ २ ३ १ २

पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥३॥ [१९](८८५)

इति द्वितीयोऽर्धः प्रपाठकः द्वितीयश्च प्रपाठकः समाप्तः ॥२॥

पदपाठः—तम् २ । उ अ० । स्तवाम क्रि० । यम् २ । गिरः १ । इन्द्रम् २ । उक्थ्यानि २ । वावृधुः क्रि० । पुरूणि २ । अस्य ६ । पौंस्या २ । सिषासन्तः १ । वनामहे क्रि० ॥

अन्वितपदार्थः—वयम् (तम् उ) तमेव (स्तवाम) (यम्) (इन्द्रं) परमात्मानं (गिरः) वेदवाचः (वावृधुः) वर्धयन्ति ज्ञानापेक्षया नतु वस्तुतः तस्यवृद्धिह्रासानर्हत्वात् अथच (उक्थ्यानि) स्तुत्यानि (पुरूणि) बहूनि अनन्तानि (अस्य) परमात्मनः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(पौंस्या) पौंस्यानि वीर्याणि अखिलब्रह्माण्डमण्डलधारणादीनि (सिषासन्तः) वर्णयितुमिच्छन्तोवयं (वनामहे) संभजामहे ॥ ऋग्वेदे ९ । ९५ । ६ ऽपि ॥ ३ ॥

इति श्रीमत्कण्ववंशावतंस पण्डित हज़ारीलाल स्वामिसूनुना
हस्तिनापुर पार्श्ववर्त्ति–परीक्षितगढ निवासिना
तुलसीरामस्वामिना
कृते सामवेदभाष्ये उत्तरार्चिके चतुर्थोध्यायः ॥ ४ ॥
तृतीयमहः समाप्तमिति विवरणकारः ॥

भाषार्थः–हम (तम् उ) उसी की (स्तवाम) स्तुति करें (यम्) जिस (इन्द्रम्) परमात्मा [के ज्ञान] को (गिरः) वेदवाणियें (वावृधुः) बढ़ाती हैं । और (अस्य) इस परमात्मा के (उक्थ्यानि) स्तुतियोग्य (पुरूणि) बहुत=अनन्त (पौंस्या) अखिलब्रह्माण्डमण्डलधारणादि पुरुषार्थों को (सिषासन्तः) वर्णन करना चाहते हुवे हम (वनामहे) भजते हैं ॥ ऋ० ९ । ९५ । ६ में भी ॥ ३ ॥

यह
श्रीमान् कण्ववंशावतंस पं० हज़ारीलाल स्वामी के पुत्र
परीक्षितगढ़ ज़िला मेरठ निवासी
तुलसीरामस्वामिकृत
सामवेदभाष्य उत्तरार्चिक का चतुर्थाध्याय संपूर्ण हुवा ॥ ४ ॥

—०:*×*:०—

—:*:*:—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ पञ्चमाध्यायः

अथ तृतीयः प्रपाठकः

अथ चतुर्थमहरारभ्यते,द्वितीयस्त्रिरात्रः।प्रसृतच्छन्दाः प्रथमस्त्रि-रात्रः।अथोत्तरस्य छन्दांसि व्यूहन्ति जगत्यः प्रतिपदःजगतीस्थाने त्रिष्टुभः।त्रिष्टुभांगायत्र्यः।तत्रैषा चतुर्थस्य प्रतिपदिति विवरणकारः॥

तत्र

प्रथमे खण्डे प्रतआश्विनीरिति प्रथमतृचस्य–आकृष्टाभाषा ऋषिः। पव-मानः सोमो देवता। जगतीछन्दः॥ तत्र प्रथमा–

२३१२ ३१२३ १२३ १२३ १२

प्रतआश्विनीः पवमानधेनवोदिव्या असृग्रन् पयसा धरीमणि।

१२ २२३ १२ ३१२ ३१२ ३१२

प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः

॥ १ ॥ (८८६)

पदपाठः–प्र अ०। ते ६। आश्विनीः १। पवमान सं०। धेनवः १। दिव्याः १। असृग्रन् क्रि०। पयसा ३। धरीमणि ७। प्र अ०। अन्तरिक्षात् ५। स्था-विरीः २। ते १। असृक्षत क्रि०। ये १। त्वा २। मृजन्ति क्रि०। ऋषिषाण सं०। वेधसः १॥

अन्वितपदार्थः–(पवमान) शुद्धिकर्त्तः! (ऋषिषाण) ऋषिसेवित! चन्द्रकिरणगतसोम! (ते) तव (आश्विनीः) व्याप्ताः (धेनवः) प्रीणयित्र्यः (दिव्याः) आन्तरिक्ष्या रश्मयः (पयसा) जलेन युक्ताः (धरीमणि) धारके मेघमण्डले (प्रा-सृग्रन्न) प्रसृता भवन्ति। अतएव (ये) (वेधसः) विद्वांस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋत्विजः (त्वा) त्वां लतारूपं सोमं (मृजन्ति) यज्ञेऽभिषुण्वन्ति (ते) (स्थाविरीः) स्थविरा धाराः (अन्तरिक्षात्) सकाशात् (प्राऽसृक्षत) वर्षयन्ति ॥

ये याज्ञिकाः सोमेन यजन्ते ते चन्द्रकिरणगतसोमरसव्याप्तमेघमण्डलाद्वृष्टिं कारयितुं शक्ता भवन्तीति भावः॥ऋग्वेदे तु ९। ८६। ४ धेनवः=धीजुवः। प्रातर्ऋषयःस्थाविरीरसृक्षत इति भदेन पाठः ॥ १ ॥

भाषार्थः—(पवमान) शुद्धिकारक! (ऋषिषाण) ऋषिसेवित! चन्द्रकिरणस्थ सोम!(ते) तेरी (आश्विनीः) व्याप्त(धेनवः) प्रसन्नता करने वाली (दिव्याः) अन्तरिक्षस्थ किरणें (पयसा) जल से युक्त (धरीमणि) धारक मेघमण्डल में (प्राऽसृग्रन्) प्रसृत होजाती हैं। इसी लिये (ये) जो (वेधसः) विद्वान् ऋत्विज् (त्वा) तुझ लतारूप सोम को (मृजन्ति) [यज्ञमें] अभिषुत करते हैं (ते) वे (स्थाविरीः) स्थूल जलधारों को (अन्तरिक्षात्) अन्तरिक्ष से (प्र—असृक्षत) वर्षा लेते हैं ।।

जो याज्ञिक लोग सोम से यजन करते हैं वे चन्द्रकिरणस्थ सोमरस से व्याप्त मेघमण्डल से वर्षा कराने में समर्थ होते हैं। यह तात्पर्य है ॥ ऋ० ९। ८६। ४ का पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया—

३ २३ १२ ३१२ ३१२ २१र २र ३१२

उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परियन्ति केतवः।

१२ ३२३ १२३२३ २३ १र २र ३१२

यदी पवित्रे अधिमृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥

॥ २ ॥ (८८७)

पदपाठः—उभयतः अ० । पवमानस्य ६।रश्मयः १ । ध्रुवस्य,सतः६ । परियन्ति क्रि० । केतवः १ । यदि अ० । पवित्रे ७ । अधिमृज्यते क्रि० । हरिः१ । सत्ता १ । नि अ० । योनौ ७ । कलशेषु ७ । सीदति क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(यदि) यदा (हरिः) सोमः (पवित्रे) दशापवित्रे (अधिमृज्यते) अभिषूयते । यदाच (सत्ता) सोमसत्ता (योनौ) स्थाने (कलशेषु) द्रोणकलशेषु (निषीदति) तिष्ठति तदा (पवमानस्य) सोमस्य (ध्रुवस्य) निश्चलस्य (सतः) भवतः (केतवः) ज्ञापकाः (रश्मयः) किरणाः (उभयतः) इतश्चामुतश्च (परियन्ति) सर्वतोगच्छन्ति ॥ ऋग्वेदे तु ९ । ८६ । ६ योना इति भेदेन पाठः ॥ २ ॥

भाषार्थः—(यदि) जब (हरिः) सोम (पवित्रे) दशापवित्र पर (अधिमृज्यते) अभिषुत किया जाता है और (सत्ता) उस की सत्ता (योनौ) स्थान (कलशेषु) द्रोणकलशों में (निषीदति) स्थिर होती है तब (ध्रुवस्य) स्थिर (सतः) हुवे (पवमानस्य) सोम की (केतवः) ज्ञापक (रश्मयः) किरणें (उभयतः) इधर उधर (परियन्ति) सब ओर फैलती हैं ॥

ऋ० ९ । ८६ । ६ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २

विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परियन्ति केतवः।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २

व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि ॥

॥ ३ ॥ [१] (८८८)

पदपाठः—विश्वा २ । धामानि २ । विश्वचक्षः सं० । ऋभ्वसः १ । प्रभोः, ते, सतः ६ । परियन्ति क्रि० । केतवः १ । व्यानशी १ । पवसे क्रि० । सोम सं० । धर्मणा ३ । पतिः १ । विश्वस्य, भुवनस्य ६ । राजसि क्रि० ॥

अन्वितपदार्थः—(विश्वचक्षः) चक्षुर्हितकरत्वात्सर्वस्य दर्शयितः ! सोम ! (प्रभोः) प्रभावशालिनः(सतः) (ते) तव (ऋभ्वसः) महान्तः (केतवः) किरणाः (विश्वा) सर्वाणि (धामानि) स्थानानि (परियन्ति)सर्वतःप्राप्नुवन्ति(व्यानशी)व्यापनशीलस्त्वं(धर्मणा)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वधर्मेण स्वीयप्रभावेण (पवसे) पावयसि । एवं (विश्वस्य भुवनस्य) (पतिः) पालकस्त्वं (राजसि) राजसे ॥

ईश्वरपक्षे–(विश्वचक्षः) हे सर्वसाक्षिन् ! (प्रभोःसतःते) (ऋभ्वसः) (केतवः) किरणा इव व्याप्तयः (विश्वा धामानि परियन्ति । व्यानशी धर्मणा पवसे। विश्वस्य भुवनस्य राजसि) ॥ ऋभ्वाइति महन्नाम इति सायणः ॥

ऋग्वेदे तु ९।८६।५ प्रभोस्ते।व्यानशिः । धर्मभिःइतिपाठाः॥३॥

भाषार्थः–(विश्वचक्षः) सब की आंखों को हितकारी होने से दिखाने वाले ! सोम ! वा सर्वसाक्षिन्नीश्वर ! (प्रभोः) प्रभावशाली (सतः) हुवे वा समर्थ और नित्य (ते) तेरी (ऋभ्वसः) बड़ी (केतवः) किरणें=लहरें वा व्याप्तियें (विश्वा) सब (धामानि) स्थानों को (परियन्ति) सर्वतः प्राप्त होजाती वा होती हैं (व्यानशी) व्याप्ति वाला तू (धर्मणा) अपने प्रभाव वा स्वभाव से (पवसे) पवित्र करता है। इस प्रकार तू (विश्वस्य) सब (भुवनस्य) जगत् का (राजसि) राजा है ॥

सायणभाष्य और ऋ० ९।८६।५ के पाठान्तर संस्कृत भाष्य में देखिये॥३॥

अथ द्वितीयतृचस्य–अमहीयुर्ऋषिः । पवमानः सोमोदेवता । गायत्री छन्दः ॥ तत्र प्रथमा–

१२ ३२३१र २र ३२
पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
१ २ ३२ ३२
ज्योतिर्वैश्वानरं बृहत् ॥१॥ (८८९) व्याख्याता (४८४)

अथ तृतीया–

१२ ३२३२३१३ ३२
पवमान रसस्तव मदोराजन्नदुच्छुनः ।
२उ २
वि वारमव्यमर्षति ॥ २ ॥ (८९०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—पवमान सं० । रसः १ । तव ६ । मदः १। राजन् सं० । अदुच्छुनः १ । वि अ० । वारम्, अव्यम् २ । अर्षति क्रि० ॥

अन्वितपदार्थः—(पवमान) हे परमात्मन् ! वा सोम ! (राजन्) ! (तव) त्वदीयः (अदुच्छनः) अदुष्टः (मदः)हर्ष-प्रदः (रसः) आनन्दो रसोवा (अव्यं वारं) सूर्यादिसम्बन्धिनं मण्डलम्, अथवाऽविभवं दशापवित्रम् (अर्षति) प्राप्नोति ॥ ऋग्वेदे तु ९ । ६१ । १७ पवमानस्य ते रस इत्यन्तरम् ॥२॥

भाषार्थः—(पवमान) हे परमात्मन् ! वा सोम ! (राजन्) प्रकाशक ! (तव) तेरा (अदुच्छुनः) दोषरहित (मदः) हृष्टिकारक (रसः) आनन्द वा रस (अव्यं वारम्) सूर्यादि के मण्डल वा ऊन के दशापवित्र को (अर्षति) प्राप्त होता है ॥ ऋ० ९ । ६१ । १७ का पाठान्तर संस्कृत भाष्य में देखिये ॥२॥

अथ तृतीया—

१ २ ३ २ ३ २ ३ १ २ ३ २
पवमानस्य ते रसो दक्षो विराजति द्युमान् ।
२ ३ २ ३ २ २ ३ २
ज्योतिर्विश्वं स्वर्दृशे ॥ ३ ॥ [२] (८९१)

पदपाठः—पवमानस्य, ते ६ । रसः, दक्षः १ । विराजति क्रि० । द्युमान् १। ज्योतिः, विश्वम् २ । स्वः अ० । दृशे ४ ॥

अन्वितपदार्थः—(पवमानस्य) परमात्मनः,सोमस्य वा(ते) तव (द्युमान्) तेजोयुक्तः (दक्षः) बली (रसः) आनन्दो रसो वा (विश्वं) सर्वं (ज्योतिः) प्रकाशं (स्वः) सुखंच (दृशे) दर्शयितुं (विराजति) ॥

ऋग्वेदे तु ९ । ६१ । १८ पवमानरसस्तवेति पूर्वमन्त्रवत्पाठः ॥३॥

भाषार्थः—(पवमानस्य) पवित्र परमात्मा, वा सोम (ते) आप का, वा तेरा (द्युमान्) तेजोयुक्त (दक्षः) बलवान् (रसः) आनन्द वा रस (विश्वम्) सब (ज्योतिः) ज्योति और (स्वः) सुख को (दृशे) दिखाने के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिये (विराजति) विराज रहा है ॥ ऋ० ९ । ६१ । १८ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ षड्ऋचस्य तृतीयसूक्तस्य-मेध्यातिथिर्ऋषिः । पवमानः सोमोदेवता । गायत्री छन्दः ॥ तत्र प्रथमा-

२उ ३ १ २र ३ २ ३ २ ३ १ २

प्र यद् गावो न भूर्णयस्त्वेषा अयासो अक्रतुः ।

१ २ ३ २उ ३ १ २

घ्नन्तः कृष्णामप त्वचम् ॥१॥ (८९२) व्याख्याता(४११)

अथ द्वितीया-

३ १ २ ३२ ३१२ ३क २र

सुवितस्य वनामहेऽतिसेतुं दुराय्यम् ।

३ २ ३ १ २ ३ २

साह्याम दस्युमव्रतम् ॥ २ ॥ (८९३)

पदपाठः-सुवितस्य ६। वनामहे क्रि०। अतिसेतुं, दुराय्यम् २। साह्याम क्रि०। दस्युम्, अव्रतम् २॥

अन्वितपदार्थः-(सुवितस्य) अभिषुतस्य सोमस्य (वनामहे) प्रशंसां कुर्मः । येन (अतिसेतुम्) उल्लङ्घितमर्यादं (दुराय्यं) दुर्वारम् (अव्रतम्) अकर्मण्यम् (दस्युम्) शत्रुम् (साह्याम) अभिभवेम ॥ ऋग्वेदे तु ९ । ४१ । २ मनामहे । दुराव्यम् । साह्वांसः । इति पाठाः ॥ २ ॥

भाषार्थः-(सुवितस्य) अभिषुत सोम की (वनामहे) हम प्रशंसा करते हैं जिस से हम (अतिसेतुम्) मर्यादा के तोड़ने वाले (दुराय्यम्) जिसका रोकना कठिन हो उस (अव्रतम्) कर्म के त्यागी वा विरोधी (दस्युम्) शत्रु को (अभिभवेम) तिरस्कृत करें ॥ ऋ० ९ । ४१ । २ के पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया-

३ २ ३१२ ३ १र २र ३ १ २

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २ ३ २
चरन्ति विद्युतो दिवि ॥ ३ ॥ (८९४)

पदपाठः—श्रवे क्रि० । वृष्टेः ६ । इव अ० । स्वनः १ । पवमानस्य, शुष्मिणः ६ । चरन्ति क्रि० । विद्युतः १ । दिवि ७ ॥

अन्वितपदार्थः—(शुष्मिणः) बलवतः(पवमानस्य) सोमस्य (स्वनः) शब्दः (वृष्टेः) वर्षणस्य स्वनः (इव) (श्रवे) श्रूयते । (दिवि) अन्तरिक्षे (विद्युतः) सौदामिन्यः (चरन्ति) ॥ ऋग्वेदे ९ । ४१ । ३ऽपि ॥ ३ ॥

भाषार्थः—(शुष्मिणः) बलवान् (पवमानस्य) सोमका (स्वनः)शब्द (वृष्टेः) वर्षा के शब्द (इव) सा (श्रवे)सुनाई दिया करता है । (विद्युतः) बिजुलियें (दिवि) आकाश में (चरन्ति) घूमती चमकती हैं ॥ ऋ० ९ । ४१ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

१ २ ३ २ २ ३ १ २ ३ १ २
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।
१ २ ३ १ २
अश्ववत्सोम वीरवत् ॥ ४ ॥ (८९५)

पदपाठः—आपवस्व क्रि० । महीम्, इषम् २ । गोमत् २ । इन्दो सं० । हिरण्यवत्, अश्ववत् २ । सोम सं० । वीरवत् २ ॥

अन्वितपदार्थः—(इन्दो) आर्द्र ! वा करुणामृतवारिधे ! (सोम) ओषधे ! वा परमात्मन् ! कृपया (गोमत्) गोयुक्तम् (अश्ववत्) अश्वयुक्तं (हिरण्यवत्) धनयुक्तं (वीरवत्) पुत्रादियुक्तं (महीम् इषम्) महत् अन्नम् (आपवस्व) ॥ ऋग्वेदे तु ९ । ४१ ।४ अश्वावद्गोजवत्सुतः इति तृतीयपादपाठः ॥ ४ ॥

भाषार्थः—(इन्दो) गीले ! वा करुणामृतवारिधे ! (सोम) ओषधे ! वा परमात्मन् ! कृपया (गोमत्) गौवों से युक्त (अश्ववत्) अश्वयुक्त (हि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रयिवत्) सुवर्णादि धनयुक्त (वीरवत्) और पुत्रादिसहित (महीम् इषम्) बहुत अन्न को (आपवस्व) प्राप्त कराइये ॥

ऋ० ९ । ४१ । ४ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ४ ॥

अथ पञ्चमी–

१ २ ३ २ ३ १ २र
पवस्व विश्वचर्षण आ मही रोदसी पृण ।
३२ब ३ २ ३ १ २
उषाः सूर्यो न रश्मिभिः ॥ ५ ॥ (८९६)

पदपाठः–पवस्व क्रि० । विश्वचर्षणे सं० । आ अ० । मही, रोदसी २ । पृण क्रि० । उषाः २ । सूर्यः १ । न अ० । रश्मिभिः ३ ॥

अन्वितपदार्थः–(विश्वचर्षणे) सर्वस्य चक्षुर्हितकर ! वा सर्वद्रष्टः ! परमेश्वर ! (न) यथा (सूर्यः) आदित्यः (रश्मिभिः) किरणैः (उषाः) प्रभातान् पृणति तथा (मही) महत्यौ (रोदसी) रोदस्यौ (आ पृण) आ पूरय ॥ ऋग्वेदे तु ९ । ४१ । ५ सपवस्वेत्यन्तरम् ॥ ५ ॥

भाषार्थः–(विश्वचर्षणे) सब की आंखों के हितकारक ! वा सर्वद्रष्टा ! परमेश्वर ! (न) जैसे (सूर्यः) सूर्य (रश्मिभिः) किरणों से (उषाः) प्रभातों को भर देता है वैसे ही (मही) बड़े (रोदसी) द्युलोक और पृथिवी लोक को (आ पृण) भर दीजिये [रसप्रभाव वा कृपा से] ऋ० ९ । ४१ । ५ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ५ ॥

अथ षष्ठी–

१ २ ३२ ३ १ २ ३ १ २
परि नः शर्मयन्त्या धारया सोम विश्वतः ।
१ २ ३१ २ ३ १ २
सरा रसेव विष्टपम् ॥ ६ ॥ [३] (८९७)

पदपाठः–परि अ० । नः ४ । शर्मयन्त्या, धारया ३ । सोम सं० । विश्वतः अ० । सर क्रि० । रसेव अ० । विष्टपम् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(सोम) ओषधिराज ! वा परमात्मन् ! (नः) अस्मभ्यं (शर्मयन्त्या) सुखदाऽया (धारया) (विश्वतः) सर्वतः (परिसर) प्राप्नुहि । दृष्टान्तः—(रसेव) नदीव (विष्टपम्) निम्नप्रदेशम् ॥ ऋग्वेदे ९ । ४१ । ६ ऽपि ॥ ६ ॥

भाषार्थः—(सोम) ओषधिराज ! वा हे परमात्मन् ! (नः) हमारे लिये (शर्मयन्त्या) सुखदायिनी (धारया) धारा से (विश्वतः) सब ओर (परि सर) प्राप्त हूजिये । दृष्टान्त—(रसेव) जैसे नदी (विष्टपम्) नीचे प्रदेश को ॥ ऋ० ९ । ४१ । ६ में भी ॥ ६ ॥

अथ द्वितीयखण्डे षड्ऋचस्य प्रथमसूक्तस्य—बृहन्मतिर्ऋषिः । पवमानः सोमोदेवता । गायत्री छन्दः ॥ तत्र प्रथमा—

३ १ २ ३ १ २ ३ २ ३ १ २

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।

१ २ ३ २ ३ ३ १ २

यत्र देवा इति ब्रवन् ॥ १ ॥ (८९८)

पदपाठः—आशुः १ । अर्ष क्रि० । बृहन्मते सं० । परि अ० । प्रियेण, धाम्ना ३ । यत्र अ० । देवाः १ । इति अ० । ब्रवन् १ ॥

अन्वितपदार्थः—(बृहन्मते) बुद्धिवर्धक ! सोम ! (प्रियेण) हितकरेण (धाम्ना) स्वरूपेण (आशुः) शीघ्रगः (यत्र) (देवाः) वाय्वादयः (इति) एवं (ब्रवन्) ब्रुवन्निव (पर्यऽर्ष) परितोगच्छ ॥

सोमस्य जडत्वेऽपि ब्रुवन्नितिव्यपदेश आलङ्कारिको वेद्यः ॥ ऋग्वेदे ९ । ३९ । १ ऽपि ॥ १ ॥

भाषार्थः—(बृहन्मते) बुद्धिवर्धक ! सोम ! (प्रियेण) प्यारे (धाम्ना) स्वरूप से (आशुः) शीघ्रगामी (यत्र) जहां (देवाः) वायुआदि देव हैं (इति) ऐसे (ब्रवन्) बोलता हुवा सा (परि अर्ष) सब ओर फैल ॥

सोम के जड होने पर भी बोलने का व्यपदेश अलङ्कार की रीति पर जानिये ॥ ऋ० ९ । ३९ । १ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

३ १र २र ३ १ २ ३ २३ १ २
परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।
३ २ ३ १ २र
वृष्टिं दिवः परिस्रव ॥ २ ॥ (८९१)

पदपाठः—परिष्कृण्वन् १ । अनिष्कृतम् २ । जनाय ४ । यातयन् १ । इषः २ । वृष्टिम् २ । दिवः ५ । परिस्रव क्रि० ॥

अन्वितपदार्थः—प्रकरणात्सोम ! (अनिष्कृतम्) अपरिपूतं (परिष्कृण्वन्) पूतंकुर्वन् (जनाय) लोकाय (इषः) अन्नानि (यातयन्) प्राप्तव्यानिकुर्वन् (दिवः) अन्तरिक्षात् (वृष्टिं) वर्षणं (परिस्रव) च्यावय ॥ ऋग्वेदे ९ । ३९ । २ ऽपि ॥ २ ॥

भाषार्थः—[प्रकरण से] " सोम " ! (अनिष्कृतम्) अपवित्र को (परिष्कृण्वन्) पवित्र करता हुवा और (जनाय) लोगों के लिये (इषः) अन्नों को (यातयन्) प्राप्तव्य करता हुवा (दिवः) आकाश से (वृष्टिम्) वर्षा को (परिस्रव) चुवा ॥ ऋ० ९ । ३९ । २ में भी ॥ २ ॥

अथ तृतीया—

३ २उ ३ १र २र ३ १ २ ३ २३ २
अयꣳस य ो दिवस्परि रघुयामा पवित्र आ ।
१ २ ३ १ २र
सिन्धोरूर्मा व्यक्षरत् ॥ ३ ॥ (९००)

पदपाठः—अयम्, सः, यः १ । दिवः ६ । परि अ० । रघुयामा १ । पवित्रे ७ । आ अ० । सिन्धोः ६ । ऊर्मा ७ । व्यक्षरत् क्रि० ॥

अन्वितपदार्थः—(सः अयं) सोमः (यः) (पवित्रे) दशापवित्रे (आ) आसिच्यमानः (सिन्धोः) समुद्रस्यान्तरिक्षस्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(ऊर्मा) ऊर्मौ वायौ (दिवः परि) द्युलोके (रघुयामा) लघुगमनः सन् (व्यऽक्षरत्) विविधं क्षरति ॥ ऋग्वेदे ९।३९।४ ऽपि ॥३॥

भाषार्थः—(सः) वह (अयम्) यह सोम है (यः) जो (पवित्रे) दशापवित्र पर (आ) आसिञ्चन किया जाता और (सिन्धोः) समुद्र=अन्तरिक्ष की (ऊर्मा) लहर= वायु में (दिवः परि) द्युलोक में (रघुयामा) हलकीचाल वाला होकर (व्यक्षरत्) विविध प्रकार से पहुंचता है ॥ ऋ० ९ । ३९ । ४ में भी ॥ ३ ॥

अथ चतुर्थी—

३ १ २ ३ २ ३ २उ ३ १ २ ३ १ २
सुत एति पवित्र आ त्विषिं दधानओजसा ।
३ १ २ ३ १ २
विचक्षाणो विरोचयन् ॥ ४ ॥ (९०१)

पदपाठः—सुतः १।एति क्रि० । पवित्रे ७ । आ अ० । त्विषिम् २ । दधानः १ । ओजसा ३ । विचक्षाणः, विरोचयन् १ ॥

अन्वितपदार्थः—(पवित्रे) दशापवित्रे (सुतः) अभिषुतः (विचक्षाणः) चटचटाशब्दं कुर्वन् (विरोचयन्) प्रकाशमानः (त्विषिम्) दीप्तिम् (आ दधानः) लोकेष्वादधत् (ओजसा) बलेन (एति) दिवमितिशेषः ॥ ऋग्वेदे ९ । ३१।३ऽपि ॥४॥

भाषार्थः—(पवित्रे) दशापवित्र पर (सुतः) अभिषुत सोम (विचक्षाणः) शब्द करता हुवा और (विरोचयन्) प्रकाश करता हुवा तथा (त्विषिम्) तेज का (आदधानः) लोकों में आधान करता हुवा (ओजसा) बल से (एति) द्युलोक को जाता है ॥ ऋ० ९ । ३९ । ३ में भी ॥ ४ ॥

अथ पञ्चमी—

३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
आविवासन्परावतो अथो अर्वावतः सुतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २
इन्द्राय सिच्यते मधु ॥ ५ ॥ (१०२)

पदपाठः—आविवासन् १। परावतः २। अथो अ०। अर्वावतः २। सुतः १। इन्द्राय ४। सिच्यते क्रि०। मधु २॥

अन्वितपदार्थः—(सुतः) अभिषुतः सोमः (परावतः) दूरस्थान् (अथो) (अर्वावतः) समीपस्थान् वाय्वादीन् (मधु) माधुर्यम् (आविवासन्) प्रापयन् (इन्द्राय) वृष्टिकृते (सिच्यते) हूयते ॥ ऋग्वेदे ९ । ३९ । ५ ऽपि ॥ ५ ॥

भाषार्थः—(सुतः) अभिषुत किया सोम (परावतः) दूरस्थ (अथो) और (अर्वावतः) समीपस्थ वायु आदि को (मधु) मिठास (आविवासन्) प्राप्त कराता हुवा (इन्द्राय) वृष्टिकारक विद्युत् वा वायु के लिये (सिच्यते) होमा जाता है ॥ ऋ० ९ । ३९ । ५ में भी ॥ ५ ॥

अथ षष्ठी—

३ १ २ ३ १ २ ३ १ २
समीचीना अनूषत हरिꣳ हिन्वन्त्यद्रिभिः ।
१ ३ १ २ ३ १ २
इन्दुमिन्द्राय पीतये ॥ ६ ॥ [४] (१०३)

पदपाठः—समीचीनाः १। अनूषत क्रि०। हरिम् २। हिन्वन्ति क्रि०। अद्रिभिः ३। इन्दुम् २। इन्द्राय ४। पीतये ४॥

अन्वितपदार्थः—(समीचीनाः) ऋत्विजः (हरिम्) हरितम् (इन्दुम्) आर्द्रं सोमम् (अद्रिभिः) ग्रावभिः (हिन्वन्ति) अभिषुण्वन्ति (इन्द्राय) वृष्टिकृते वा राज्ञे सोमयाजिने यजमानाय (पीतये) पानार्थम् (अनूषत) प्रशंसन्ति ॥ ऋग्वेदे तु ९ । ३९ । ६ योनावृतस्य सीदतेतितृतीयः पादोऽन्तरेण ॥६॥

भाषार्थः—(समीचीनाः) भद्र पुरुष ऋत्विज् लोग (हरिम्) हरे (इन्दुम्) गीले सोम को (अद्रिभिः) पत्थरों से (हिन्वन्ति) अभिषुत करते हैं। और

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(इन्द्राय) इन्द्र वा सोमयाजी यजमान राजा के लिये (पीतये) पानार्थ (अनूषत) प्रशंसा करते हैं ॥ ऋ० ९ । ३९ । ६ का पाठान्तर संस्कृतभाष्य में देखिये ॥६॥

अथ द्वितीयस्य तृचसूक्तस्य—भृगुर्वारुणिर्जमदग्निर्ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

३ २ ३ २३१२३ १ २ ३२३१२

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।

३१ २र ३१२

महामिन्दुं महीयुवः ॥ १ ॥ (९०४)

पदपाठः—हिन्वन्ति क्रि० । सूरम् २ । उस्रयः, स्वसारः, जामयः १ । पतिम्, महाम्, इन्दुम् २ । महीयुवः १ ॥

अन्वितपदार्थः—यथा (उस्रयः) सूर्यरश्मयः (स्वसारः) परस्परं भगिन्यः (जामयः) स्त्रीभूताः (पतिम्) पालकं (सूरम्) सूर्यम् (हिन्वन्ति) सेवन्ते तथैव (महीयुवः) पृथिवीसंसृष्टाः सोमरश्मयोऽपि (महाम्) प्रशंसनीयम् (इन्दुम्) सोमं हिन्वन्ति ॥

यद्वा—(उस्रयः) कर्मार्थं निवसन्त्यः सर्वत्र गन्त्र्यः (जामयः) स्त्रियः (स्वसारः) एकस्मात्पाणेरुत्पन्नत्वात्परस्परं भगिन्योऽङ्गुलयः (महीयुवः) सोमाऽभिषवं कामयमानाः सत्यः (सूरं) सुवीर्यं [सोमे पीते वीर्यं भवत्यतः] (पतिम्) सर्वस्य वीर्यकरत्वात्पालनसमर्थं (महाम्) महनीयं प्रशस्यम् (इन्दुम्) ग्रहेषु घटेषु स्यन्दमानं सोमं (हिन्वन्ति) प्रेरयन्ति ॥

स्वसार इत्यङ्गुलिनाम निघं० २।५॥ हिन्वन्तीति हिवेः प्रीणनार्थस्य (भ्वा० प०) धातोरूपम् ॥ ऋग्वेदे ९ ।६५। १ ऽपि ॥१॥

भाषार्थः—जैसे (उस्रयः) सूर्यकिरणें (स्वसारः) आपस में भगिनियें (जामयः) स्त्रीरूपिणियें (पतिम्) पालक (सूरम्) सूर्य को (हिन्वन्ति) मानो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रीति से सेवन करती हैं वैसे ही (महीयुवः) पृथिवी से छुई हुई सोमकिरणें (महाम्) प्रशंसनीय (इन्दुम्) सोम का सेवन करती हैं ॥

यद्वा—(जामयः) स्त्रीरूपिणी (स्वसारः) एक हाथ से उत्पन्न होने से परस्पर भगिनी अङ्गुलियें (उस्रयः) कर्म के लिये रहने वाली (महीयुवः) सोम-के अभिषव करने को चाहती हुई (सूरम्) सुन्दर वीर्य वाले। क्योंकि सोम-पान से वीर्य बढ़ता है। (पतिम्) पतिरूपपालक (महाम्) प्रशंसनीय (इन्दुम्) ग्रह नामक सोम के घटों में टपकते सोम को (हिन्वन्ति) प्रेरित करती हैं ॥

निघण्टु २।५ इत्यादि प्रमाण संस्कृतभाष्य में देखिये॥ ऋ०९।६५ १ में भी ॥ १ ॥

अथ द्वितीया—

१२ ३१ २३ ३१ ३१ २ ३२
पवमान रुचा रुचा देव देवेभ्यः सुतः ।
२ ३ २३१ २
विश्वा वसून्याविश ॥ २ ॥ (१०५)

पदपाठः—पवमान सं० । रुचा, रुचा ३ । देव सं० । देवेभ्यः ४ । सुतः १ । विश्वा २ । वसूनि २ । आविश क्रि० ॥

अन्वितपदार्थः—(देव) दिव्यगुणसंपन्न ! (पवमान) शुद्धिं कुर्वाण ! सोम ! वा परमात्मन् ! (रुचा, रुचा) पूर्णेन तेजसा सह (देवेभ्यः) वाय्वादिभ्योविद्वद्भ्योवा (सुतः) अभिषुतो ध्यातो वा (विश्वा) सर्वाणि (वसूनि) धनानि (आविश) प्रविष्टो-ऽसि अतो हि सर्ववसुलाभोस्ति शक्यो भवितुं सोमयागेन पर-मात्मध्यानेन वा॥ ऋग्वेदेतु ९।६५।२ देवेभ्यस्परि इति पाठः ॥२॥

भाषार्थः—(देव) दिव्यगुणसपन्न ! (पवमान) पवित्राकारक ! सोम ! वा परमात्मन् ! (रुचा, रुचा) पूर्ण तेज के साथ (देवेभ्यः) वायु-आदि वा विद्वानों के लिये (सुतः) अभिषुत किया हुआ वा ध्यान किया हुवा (विश्वा) सब (वसूनि) धनों में (आविश) आवेश किये हुवे है। इस लिये सोमयाग से वा परमात्मा के ध्यान से सब पदार्थों की प्राप्ति हो सकती है॥ ऋ० ९। ६५। २ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

१ २ ३ २ २ ३ ३ २ ३ १ २

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।

३ १ २ ३ १ २

इषे पवस्व संयतम् ॥३॥ [५] (१०६)

पदपाठः—आ अ० । पवमान सं० । सुष्टुतिं, वृष्टिम् २ । देवेभ्यः ४=६ । दुवः ४ । इषे ४ । पवस्व क्रि० । संयतम् २ ॥

अन्वितपदार्थः—(पवमान) सोम ! वा परमात्मन् ! (देवेभ्यः) देवानां (दुवः) दुवसे परिचरणाय देवयजनाय (इषे) अन्नोत्पादाय (संयतम्) नियमानुसारम् (सुष्टुतिं) प्रशस्यां (वृष्टिम्) (आपवस्व) क्षारय ॥ ऋग्वेदे ९ । ६५ । ३ ऽपि ॥३॥

भाषार्थः—(पवमान) सोम ! वा परमात्मन् ! (देवेभ्यः) देवों की (दुवः) परिचर्या=देवयजन के लिये (इषे) अन्नोत्पत्त्यर्थ (संयतम्) ठीक समय और नियम से (सुष्टुतिं, वृष्टिम्) प्रशंसनीय वर्षा को (आपवस्व) वर्षाइये ॥ ऋ० ९ । ६५ । ३ में भी ॥ ३ ॥

उक्तंबर्हिष्पवमानमेकविंशतिस्तौमिकम्,

इदानीमाज्यानि वक्तव्यानि, इति विवरणकारः ॥

अथ तृतीयखण्डे प्रथमतृचस्य—सुतंभर आत्रेय ऋषिः । अग्निर्देवता । जगतीछन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।

३ १ २ ३ १ २ ३ १ २ ३ १ २ २ ३ २ ३ १ २

घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥

॥ १ ॥ (१०७)

पदपाठः—जनस्य ६ । गोपाः १ । अजनिष्ट क्रि० । जागृविः, अग्निः, सुदक्षः १ । सुविताय ४ । नव्यसे ४ । घृतप्रतीकः १ । बृहता, दिविस्पृशा ३ । द्युमत् २ । विभाति क्रि० । भरतेभ्यः ४ । शुचिः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(जनस्य) लोकस्य (गोपाः) रक्षकः (जागृविः) अनिद्रः (सुदक्षः) सुबलः (अग्निः) (नव्यसे) नवतराय (सुविताय) लोकानां कल्याणाय (अजनिष्ट) वेद्यां प्रादुर्भवति । अनन्तरम् (घृतप्रतीकः) घृतमुखः (शुचिः) शुद्धिकरः (दिविस्पृशा) अन्तरिक्षगेण (बृहता) महता तेजसा (भरतेभ्यः) ऋत्विगादिभ्यस्तद्धितार्थं (विभाति) प्रकाशते ॥

भरता इत्यृत्विङ्नाम निघं० ३ । १८ सायणाचार्येण न जाने कस्मात् विभातीति विरुपसर्गो न व्याख्यातः ॥ ऋग्वेदे ५ । ११ । १ ऽपि ॥ यजुर्वेदे चा १५ । २७ ऽपि ॥ १ ॥

भाषार्थः—(जनस्य) लोक का (गोपाः) रक्षक (जागृविः) जागने और जगाने वाला (सुदक्षः) सुन्दर बलवान् (अग्निः) अग्नि (नव्यसे) अतिनवीन (सुविताय) सुख वा कल्याण के लिये (अजनिष्ट) [वेदी में] उत्पन्न होता और (घृतप्रतीकः) घृतमुख (शुचिः) शुद्धिकारक वह (दिविस्पृशा) अन्तरिक्षगामी (बृहता) बड़े तेज से (भरतेभ्यः) ऋत्विज् आदि के हितार्थ (विभाति) प्रकाश करता है ॥

निघण्टु ३ । १८ का प्रमाण संस्कृत भाष्य में देखिये॥ न जाने सायणाचार्य ने क्यों " विभाति " के " वि " उपसर्ग का अर्थ नहीं किया ॥ ऋ० ५ । ११ । १ और यजुः १५ । २७ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १ २ ३ १ २ ३ १ र २ र ३ १ २ र

त्वामग्ने अङ्गिरसो गुहाहितमन्वविन्दाञ्छिश्रियाणं वने वने।

१ २ ३ १ २ ३ १ २ ३ १ र २ र ३ १ २ ३ १ २

स जायसे मथ्यमानः सहोमहस्त्वामाहुःसहसस्पुत्रमङ्गिरः ॥

॥ २ ॥ (१०८)

पदपाठः—त्वाम् २ । अग्ने सं० । अङ्गिरसः १ । गुहा १ । हितम् २ । अन्व-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विन्दन् क्रि० । शिश्रियाणम् २ । वने,वने ७ । सः १ । जायसे क्रि० । मथ्यमानः १ । सहः,महत् ३ । त्वाम् २ । आहुः क्रि० । सहसः ६ । पुत्रम् २ । अङ्गिरः सं० ॥

अन्वितपदार्थः- (अग्ने) (अङ्गिरः) अङ्गारवन् ! (अङ्गिरसः) ज्ञानिनः (त्वाम्) (गुहा) गुहायां (हितम्) निगूढं (वने, वने) वनस्पत्यादिषु (शिश्रियाणं) निवसन्तम् (अन्वविन्दन्) अन्वेषणेन प्राप्नुवन्ति (सः) स त्वं (महत्) महता (सहः) सहसा बलेन (मथ्यमानः) आलोड्यमानः (जायसे) प्रकटीभवसि । अतएव (त्वाम्) (सहसः पुत्रम्) बलस्यआत्मजम् (आहुः) कथयन्ति ॥

यद्वा—(अग्ने) प्रकाशस्वरूप ! (अङ्गिरः) सर्ववेत्तः ! (अङ्गिरसः) ज्ञानिनउपासकायोगिनः (त्वां) (गुहाहितम्) बुद्धौस्थितं (वने वने) शून्यस्थानेष्वपि सर्वत्र (शिश्रियाणं) व्यापकत्वेन निवसन्तम् (अन्वविन्दन्) योगेन पश्यन्ति । (सः) स त्वं (महत् सहः) महता योगबलेन (मथ्यमानः) ध्यायमानः सन् (जायसे) साक्षाद्भवसि । अतएव (त्वां सहसःपुत्रम् आहुः) ॥

ऋग्वेदे ५ । ११ । ६ ऽपि । यजुर्वेदे १५ । २८ च ॥२॥

भाषार्थः- (अग्ने) अग्ने ! (अङ्गिरः) अङ्गारवाले ! (अङ्गिरसः) ज्ञानी लोग (त्वाम्) तुझ को (गुहा) गुहा में (हितम्) छिपे स्थित (वने वने) वन वन में (शिश्रियाणम्) रहते हुवे को (अन्वविन्दन्) खोज कर पाते हैं (सः) वह तू (महत्) बड़े (सहः) बल से (मथ्यमानः) रगड़ा हुवा (जायसे) प्रकट होता है । इस लिये (त्वाम्) तुझ को (सहसः) बल का (पुत्रम्) पुत्र (आहुः) कहते हैं ॥

यद्वा-(अग्ने) प्रकाशस्वरूप ! (अङ्गिरः) सर्वज्ञ ! परमात्मन् ! (अङ्गिरसः) ज्ञानी उपासक योगी (त्वाम्) आप को (गुहा) बुद्धि में (हितम्) अन्तर्यामिता से स्थित (वने वने) वन वन में अर्थात् शून्यस्थानों में भी सर्वत्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(शिश्रियाणम्) व्यापकता से रहते हुवे को (अन्वविन्दन्) योग से देखते हैं। (सः) वह आप (महत्) बड़े (सहः) बल=परमपुरुषार्थ से (मथ्यमानः) ध्यान रूप रगड़ा लगाये हुवे (जायसे) साक्षात् होते हैं। इस लिये (त्वाम्) आप को (सहसः) परमपुरुषार्थ का (पुत्रम्) उत्पादित पुत्रसमान (आहुः) कहते हैं ॥ ऋ० ५। ११। ६ और यजुः १५। २८ में भी ॥ २ ॥

अथ तृतीया—

३१२ ३१२३२ ३१२ ३१र २ ३१र २र

यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते।

१२ ३२ ३२३ २३२३ २३१र २र ३१२र ३१२

इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः॥

॥ ३ ॥ [६] (१०१)

पदपाठः—यज्ञस्य ६। केतुम्, प्रथमम्, पुरोहितम्, अग्निम् २। नरः १। त्रिषधस्थे ७। समिन्धते क्रि०। इन्द्रेण ३। देवैः ३। सरथम् २। सः १। बर्हिषि ७। सीदन् १। नि अ०। होता १। यजथाय ४। सुक्रतुः १॥

अन्वितपदार्थः—(नरः) उपासका याज्ञिका वा (त्रिषधस्थे) नाडीत्रयसहस्थाने, त्रिषवणे कर्मयज्ञे वा (यज्ञस्य) योगस्य क्रतोर्वा (केतुं) ध्वजरूपं (प्रथमं) मुख्यं (पुरोहितम्) अग्रेसरम् (इन्द्रेण) जीवात्मना (देवैः) इन्द्रियैश्च (सरथम्) देहरूपे रथे सहासीनम्, अथवा इन्द्रेण विद्युता, देवैर्वायवादिभिश्च सरथम् (अग्निं) प्रकाशकं परमात्मानं भौतिकं वा (समिन्धते) प्रकाशमानं कुर्वन्ति, प्रदीपयन्ति वा। (सः) सोग्निः (सुक्रतुः) यज्ञसौष्ठवकरः (होता) कर्मणां हविषां वा नेता (यजथाय) यजनाय (बर्हिषि) ज्ञानयज्ञे कर्मयज्ञे वा (निषीदन्) साक्षाद्भवति, प्रज्वलति वा॥ ऋग्वेदे तु ५। ११। २ समीधिरे इति पाठभेदः॥ ३ ॥

भावार्थः—(नरः) उपासक वा याज्ञिक लोग (त्रिषधस्थे) [इडा पि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इला सुषुम्णा] तीन नाड़ियों के सहस्थान वा प्रातः सायं माध्यंदिन ३ सवन वाले यज्ञ में (यज्ञस्य) ज्ञानयज्ञ वा कर्मयज्ञ की (केतुम्) ध्वजारूप, (प्रथमम्) मुख्य, (पुरोहितम्) अग्रसर, (इन्द्रेण) जीवात्मा वा बिजुली और (देवैः) इन्द्रियों वा वायु आदि के साथ (सरथम्) समानस्थानी, (अग्निम्) प्रकाशक परमेश्वर वा अग्नि को (समिन्धते) प्रकाशमान साक्षात् करते वा सुलगाते हैं। (सः) वह अग्नि (सुक्रतुः) यज्ञ का सुधारने वाला (होता) कर्मों का वा हवियों का नायक (यजथाय) यजन के लिये (बर्हिषि) योगयज्ञ वा कर्मयज्ञ में (निषीदन्) साक्षात् वा स्थित प्रज्वलित होता है।

ऋ० ५ । ११ । २ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ द्वितीयतृचस्य—गृत्समद ऋषिः । मित्रावरुणौ देवते । गायत्री छन्दः ॥ तत्र प्रथमा—

३१ २ ३१२ २२

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।

२७ ३१ २३ १२

ममेदिह श्रुतꣳहवम् ॥ १ ॥ (९१०)

पदपाठः—अयम् १। वाम् ४। मित्रावरुणा सं० । सुतः, सोमः १ । ऋतावृधा १ । मम ६ । इत्, इह अ० । श्रुतम् क्रि० । हवम् २ ॥

अन्वितपदार्थः—(ऋतावृधा) यज्ञेन वर्धमानौ (मित्रावरुणा) प्राणापानौ ! (वाम्) युवाभ्याम् (अयं सोमः) (सुतः) अभिषुतोऽस्ति । (इत्) अतएव (इह) लोके (मम) मदीयं (हवम्) आह्वानं (श्रुतं) शृणुतम् ॥ ऋग्वेदे २ । ४१ । ४ ऽपि॥

मित्रावरुणयोर्व्याख्यानं (७९३) पूर्वं द्रष्टव्यम् ॥ १ ॥

भाषार्थः—(ऋतावृधा) यज्ञ से बढ़ने वाले (मित्रावरुणा) प्राण और अपान ! (वाम्) तुम दोनों के लिये (अयम्) यह सोम (सुतः) अभिषुत किया है (इत्) अतएव (इह) इस लोक में (मम) मेरे (हवम्) बुलावे को (श्रुतम्) सुनो ॥ ऋ० २ । ४१ । ४ में भी ॥

मित्र और वरुण का व्याख्यान ७९३ मन्त्र पर कर आये हैं। वहीं प्राण अपान के जड़ होने पर भी पुकार सुनने आदि का समाधान है ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २ ३ १ २ ३ १ २ २ ३ २
राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
३ १ २
सहस्रस्थूण आशाते ॥ २ ॥ (९११)

पदपाठः–राजानौ १ । अनभिद्रुहा १ । ध्रुवे, सदसि, उत्तमे, सहस्रस्थूणे ७ । आशाते क्रि० ॥

अन्वितपदार्थः–(अनभिद्रुहा) द्रोहरहितौ (राजानौ) प्रकाशमानौ प्राणाऽपानौ (उत्तमे) स्वच्छे (ध्रुवे) स्थिरे (सहस्रस्थूणे) सहस्रदलकमले (सदसि) स्थाने (आशाते) व्याप्नुतः ॥ ऋग्वेदे तु २ । ४१ । ५ आसाते इति दन्त्यपाठः॥२॥

भाषार्थः–(अनभिद्रुहा) द्रोह न करने वाले (राजाना) प्रकाशमान प्राण और अपान (उत्तमे) उत्तम (ध्रुवे) स्थिर (सहस्रस्थूणे) सहस्रदल कमल (सदसि) स्थान में (आशाते) व्याप्त हैं ॥ ऋ० २ । ४१ । ५ का पाठ भेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
१ २ ३ १ २
सचेते अनवह्वरम् ॥ ३ ॥ [७] (९१२)

पदपाठः—ता, सम्राजा, घृतासुती, आदित्या १ । दानुनः ६ । पती १। सचेते क्रि० । अनवह्वरम् ॥ २ ॥

अन्वितपदार्थः—(ता) तौ (सम्राजा) सम्यक्प्रकाशमानौ (घृतासुती) घृतमन्नं ययोस्तौ (आदित्या) अदितेः प्रकृतेः पुत्रौ (दानुनः) याज्ञिकस्य (पती) पालकौ प्राणाऽपानौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अनवह्वरम्) अध्वरं यज्ञं (सचेते) समवेतौ भवतः ॥ ऋग्वेदे २ । ४१ । ६ ऽपि ॥३॥

भाषार्थः—(ता) वे दोनों (सम्राजा) भले प्रकार प्रकाशमान (घृताहुती) जिन का अन्न घृत है (आदित्या) गो प्रकृति के पुत्र हैं (दानुनः) याज्ञिक की (पती) रक्षा करने वाले वे प्राण और अपान (अनवह्वरम्) अध्वर यज्ञ को (सचेते) सम्यक् प्राप्त होते हैं॥ऋ० २ । ४१ । ६ में भी ॥३॥

अथैन्द्रमाज्यम्

इतिविवरणकारः

अथ तृतीयतृचस्य—गोतमोराहूगणऋषिः । इन्द्रोदेवता ।

गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ २ ३ १ २ ३ १र २र

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।

३ १ २ ३ १र २र

जघान नवतीर्नव ॥ १ ॥ (९१३) व्याख्याता (१७९)

अथ द्वितीया—

३ १ २र ३ २ञ ३ १ २ ३ १ २

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् ।

१ २ ३ १ २

तद्विदच्छर्यणावति ॥ २ ॥ (९१४)

पठपाठः—इच्छन् १ । अश्वस्य ६ । यत् १ । शिरः १ । पर्वतेषु ७ । अपश्रितम् २ । तत् २ । विदत् क्रि० । शर्यणावति ॥ ७ ॥

अन्वितपदार्थः—पूर्वमन्त्रादिन्द्रइत्यनुवर्त्तते । इन्द्रः सूर्यः परमैश्वर्यवान् राजा वा (अश्वस्य) आशुगामिनो मेघस्य शत्रोर्वा (यत् शिरः) शीर्णमुत्तमाङ्गम् (पर्वतेषु) पर्ववत्सुअन्यमेघेषु पर्वतेषु तदाकारेषु दुर्गेषु वा (अपश्रितम्) अपगतं (तत्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(इच्छन्) (शर्यणावति) आकाशे, शरवर्षणवति संग्रामे वा (विदत्) विन्दति विन्देद्वा ॥ ऋग्वेदे १ । ८४ । १४ ऽपि॥२॥

भाषार्थः—पूर्वमन्त्र से इन्द्र शब्द की अनुवृत्ति है। इन्द्र=सूर्य वा परमैश्वर्य्यवान् राजा (अश्वस्य) शीघ्रगामी मेघ वा शत्रु का (यत्) जो (शिरः) कटाशिर (पर्वतेषु) पर्व वाले अन्य मेघों वा पर्वताकार दुर्गों में (अपश्रितम्) गिर गया (तत्) उस को (इच्छन्) चाहता हुवा (शर्यणावति) आकाश वा बाणों की वर्षा वाले संग्राम में (विदत्) पाता है वा पावे ॥ ऋ० १ । ८४ । १४ में भी ॥२॥

अथ तृतीया—

२उ ३ १ २ ३ २ ३ १ २ ३क २र
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
३ २ ३ १ २ ३ २
इत्था चन्द्रमसोगृहे ॥ ३ ॥ [८] (९१५)

व्याख्याता (१४७)

अथ चतुर्थतृचस्य—वसिष्ठऋषिः । इन्द्राग्नी देवते । गायत्रीछन्दः ॥

तत्र प्रथमा—

३ १ २ ३ १ २र ३ २ ३ १ २
इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
३ २ ३ १ २
अभ्राद्वृष्टिरिवाजनि ॥ १ ॥ (९१६)

पदपाठः—इयम् १ । वाम् ६। अस्य, मन्मनः ६=५ । इन्द्राग्नी सं० । पूर्व्यस्तुतिः १ । अभ्रात् ५ । वृष्टिः १ । इव अ० । अजनि क्रि० ॥

अन्वितपदार्थः—(इन्द्राग्नी) हे अध्यापकाध्येतारौ ! (अस्य) अस्मात् (मन्मनः) मन्त्रात् (इयम्) उपदिश्यमाना (वाम्) युवयोः (पूर्व्यस्तुतिः) सनातनी प्रशस्तिः (इव) यथा (अभ्रात्) मेघात् (वृष्टिः) वर्षणंजायते तद्वत् (अजनि) जातास्ति ॥

इन्द्रशब्देन सूर्यस्य, अग्निशब्देन प्रसिद्धस्य च ग्रहणं स्पष्टं,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्तुल्यत्वेनाऽत्राध्यापकाध्येतारौ गृहीतावस्माभिः। यथा हि सूर्यादग्निः प्रादुर्भवति ज्वलति, तथैवाध्यापकात् अध्येताऽपि ज्ञानेन प्रकाशमानो जायते। इत्थं तयोःप्रशंसाऽनेन मन्त्रेण क्रियते ॥ ऋग्वेदे ७। १४। १ ऽपि ॥ १ ॥

भाषार्थः—(इन्द्राग्नी) हे अध्यापक और अध्येताओ! (अस्य) इस (मन्मनः) मन्त्र से (इयम्) यह (युवयोः) तुम्हारी (पूर्व्यस्तुतिः) सनातनी प्रशंसा (अगनि) प्रकट होती है। (इव) जैसे (अभ्रात्) बादल से (वृष्टिः) वर्षा प्रकट होती है, तद्वत् ॥

इन्द्र शब्द से सूर्य और अग्नि शब्द से प्रसिद्ध आग का ग्रहण तो स्पष्ट ही है, परन्तु हम ने यहां इन्द्र शब्द से अध्यापक और अग्नि शब्द से अध्येता ग्रहण किया है। क्योंकि जैसे सूर्य के प्रकाश से अग्नि प्रकाशित होता है वैसे ही अध्यापक के अध्यापन से अध्येता ज्ञानद्वारा प्रकाशित होता है। उनदोनों की प्रशंसा इस मन्त्र से की गई है ॥ ऋ० ७। ९४। १ में भी ॥१॥

अथ द्वितीया—

३ १ २३ २उ३ १ २ ३ १२३ १२
शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः।
३ १ २ ३ १ २
ईशाना पिप्यतं धियः ॥२॥ (९१७)

पदपाठः—शृणुतम् क्रि० । जरितुः ६ । हवम्२ । इन्द्राग्नी सं० । वनतम् क्रि० । ईशाना १ । पिप्यतम् क्रि० । धियः २ ॥

अन्वितपदार्थः—(इन्द्राग्नी) हे अध्यापकाध्येतारौ! युवां (जरितुः) प्रशंसाकर्त्तुर्मन्त्रस्य (हवम्) आह्वानं (शृणुतम्) (गिरः) वाणीः (वनतम्) संभक्ताः कुरुतम् (ईशाना) ईशानौ (धियः) बुद्धीः (पिप्यतम्) आप्यायिताः कुरुध्वम् ॥ ऋग्वेदे ७। ७४। २ में भी ॥ २ ॥

भाषार्थः—(इन्द्राग्नी) हे अध्यापक और अध्येताओ! (जरितुः) प्रशंसा करने वाले मन्त्र के (हवम्) आह्वान=पुकार को (शृणुतम्) सुनो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

और (गिरः) वाणियों को (वनतम्) विभागशः उच्चारित करो (ईशाना) समर्थ तुम (धियः) बुद्धियों को (पिप्यतम्) आप्यायित करो ॥ ऋ० ७ । ९४ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २३१२ ३१२ ३१ २र
मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
१ ३ ३२
मा नो रीरधतं निदे ॥ ३ ॥ [९] (९१८)

पदपाठः—मा अ० । पापत्वाय ४ । नः २ । नरा सं० । इन्द्राग्नी सं० । मा । अभिशस्तये ४ । मा । नः । रीरधतम् क्रि० । निदे ४ ॥

अन्वितपदार्थः—(नरा) हे नरौ (इन्द्राग्नी) अध्यापकाध्येतारौ ! युवां (नः) अस्मान् (पापत्वाय) पापभावाय (मा) न (रीरधतम्) प्रेरयतम् (अभिशस्तये) निन्दायै (मा) न प्रेरयतम् (नः) अस्मान् (निदे) नितरां दीयते नाश्यते यत्र तस्मै (मा) न प्रेरयतम् ॥ ऋग्वेदे ७ । ७४ । ३ ऽपि ॥३॥

भाषार्थः—(नरा) हे २ नर (इन्द्राग्नी) अध्यापक और अध्येताओ ! तुम दोनों (नः) हम को (पापत्वाय) पाप होने के लिये (मा) मत (रीरधतम्) प्रेरित करें (अभिशस्तये) निन्दा के लिये (मा) मत प्रेरित करें और (नः) हम को (निदे) निरे नाश वाले काम के लिये (मा) मत प्रेरित करें ॥ ऋ० ७ । ७४ । ३ में भी ॥ ३ ॥

अथ माध्यंदिनं सवनमिति विवरणकारः

अथ चतुर्थखण्डे प्रथमतृचस्य—दृढच्युत ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

१२ ३१२ ३१२ ३१२
पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
३१ २ ३ २३ १२
मरुद्भ्यो वायवे मदः ॥ १ ॥ (९१९) व्याख्याता (४७४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

२ ३१ २ ३ १२ ३२३ ३ १२ ३ २
सं देवैः शोभते वृषा कविर्योनावधि प्रियः ।
१२ ३ १ ३
पवमानो अदाभ्यः ॥ २ ॥ (९२०)

पदपाठः–सम् अ० । देवैः ३ । शोभते क्रि० । वृषा १ । कविः १ । योनौ ७। अधि अ० । प्रियः, पवमानः, अदाभ्यः १ ॥

अन्वितपदार्थः–(योनौ अधि) स्वस्थाने आकाशे वर्त्तमानः (प्रियः) हितकरः (वृषा) वर्षकः (कविः) बुद्धितत्वोद्बोधकः (अदाभ्यः) अनाद्रियः (पवमानः) सोमः (देवैः) इन्द्रवाय्वादिभिःसह (सं शोभते) । दिवीति शेषः ॥ ऋग्वेदे तु ९।२५।३ वृत्रहा देववीतमः इति तृतीयपादपाठः॥ २ ॥

भाषार्थः–(योनौ अधि) अपने स्थान आकाश में स्थित(प्रियः) हितकारी (वृषा) वृष्टिकर्त्ता (कविः) बुद्धि तत्व का उद्बोधक (अदाभ्यः) नाश न करने योग्य (पवमानः) सोम (देवैः) इन्द्र वायु आदि देवों के साथ (संशोभते) सम्यक् शोभित होता है । ऋ० ९ । २५ । ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

१२ ३२ ३२ २३ ३ १२
पवमान धिया हितोऽ३ऽभि योनिं कनिक्रदत् ।
१२ ३१ २२
धर्मणा वायुमारुहः ॥ ३ ॥ [१०] (९२१)

पदपाठः–पवमान सं० । धिया ३ । हितः १ । अभि अ० । योनिम् २ । कनिक्रदत् १ । धर्मणा ३ । वायुम् २ । आरुहः क्रि० ॥

अन्वितपदार्थः–(पवमान) सोम ! (धिया) कर्मणा (हितः) प्रियकरः (योनिम् अभि) स्वस्थानमभिलक्ष्य (क-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निक्रदत्) शब्दं कुर्वन् (धर्मणा) स्वधर्मेण (वायुम्) वायु-मण्डलम् (आरुहः) आरोहसि ॥

यज्ञकर्मणा हितकरः सोमः शब्दायमानः स्वभावानुकूलं वायुमण्डलमारोहति इति भावः॥ ऋग्वेदे तु ९।२५।२ आरुहः = आविशेति पाठः ॥ ३ ॥

भाषार्थः—(पवमान) सोम ! (धिया) कर्म से (हितः) हित कर हो (योनिम्) अपने स्थान को (अभि) लक्ष्य करके (क्रनिक्रदत्) शब्द करता हुवा (धर्मणा) अपने स्वभाव से (वायुम्) वायुमण्डल पर (आरुहः) चढ़ ॥

अर्थात् यज्ञकर्म से हितकारी सोम शब्द करता हुवा स्वभावानुसार वायुमण्डल पर चढ़ जाता है ॥

ऋ० ९ । २५ । २ का पाठान्तर संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ प्रगाथस्य द्वितीयसूक्तस्य—मैत्रावरुणो वसिष्ठ ऋषिः । सोमो देवता । बृहती छन्दः ॥ तत्र प्रथमा—

२ ३ १ २ ३ २ २ ३ १ २ ३ १ २ ३
तवाहꣳ सोम रारण सख्य इन्दो दिवे दिवे । पुरूणि बभ्रो
१ २ ३ १२ २२३ ३३ ३ १ २
निचरन्ति मामव परिधींरतिताँ इहि ॥ १ ॥ (१२२)

व्याख्याता (५१६)

अथ द्वितीया—

२ ३ १ २२ ३ १ २ ३ १२ ३ १ २३ १ २
तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्रऊधनि ।
३ १ २२ ३ २ ३ १ २ ३ १ २ ३ १ २
घृणा तपन्तमति सूर्यं परः शकुनाइव पप्तिम॥२॥[११](९२३)

पदपाठः—तव ६ । अहम् १—१=३ । नक्तम्, उत अ० । सोम सं० । ते ६ । दिवा अ० । दुहानः १—१=३ । बभ्रो सं० । ऊधनि ७ । घृणा ३ । तपन्तम् २ । अतिसूर्यम् २ । परः १=२ । शकुनाः १ । इव अ० । पप्तिम क्रि० ॥

अन्वितपदार्थः—(सोम) शान्त ! परमात्मन् ! (बभ्रो) धारक ! विश्वंभर ! विष्णो ! (ऊधनि) गोरूधि (दुहानः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दुहानाः [गोदोहकाले प्रभाते] (दिवा) दिवसे (नक्तम्) रात्रौ (उत) च (अहम्) वयम् (तव ते) तवैवोपासनां कुर्याम तथा (घृणा) दीप्त्या (सूर्यम्) आदित्यम् (अति,तपन्तम्) उल्लङ्घय भासमानं (परः) परं त्वां वयं (पप्तिम) प्राप्नुयाम (इव) यथा (शकुनाः) पक्षिणः सूर्यं नभोवा यथाऽऽत्मशक्ति पतन्ति तद्वत् ॥

अयंभावः—वयं प्रातरुत्थाय दिवानिशं परमात्मन एवोपासनं कुर्याम, नान्यस्य, यद्यपि अनन्तस्याऽचिन्त्यस्याऽप्रमेयस्य तस्य सर्वात्मना प्राप्तिर्दुष्करा, तथापि यथा पक्षिणआकाशे स्वपक्षबलानुसारं पतन्ति तद्वयमपि निजाऽल्पशक्त्यनुसारं परमात्मभजनं कुर्याम । स हि सूर्यादीनामपि प्रकाशकोऽनन्ततेजस्वी स्वभक्तानस्मान् कृपया कृतार्थयिष्यतीति । सायणाचार्येणाऽत्र "दुहानः" इत्यस्य स्थाने "सख्याय" इत्युद्धृत्य व्याख्यातं,न चात्र तादृशः पाठः क्वापि पुस्तके दृश्यतेऽनुमीयते यत् ऋग्वेदे ९।१०७।२० वर्त्तमानस्य तादृक्पाठस्यैवेदं व्याख्यानं,न तु सामवेदस्थस्य । अन्यत्रापि प्रायःसायणाचार्यभाष्ये छिद्रमिदं दृष्टचरम् ॥ २ ॥

भाषार्थः-(सोम) हे शान्तिदायक ! (बभ्रो) हे विश्वम्भर ! विष्णो! (ऊधनि) गौवों के थन में (दुहानः) दोहन करते हुवे अर्थात् प्रातःकाल और (दिवा) दिन में (उत) तथा (नक्तम्) रात्री में (अहम्) हम लोग (तव, ते) तेरी ही तेरी [उपासना करें] और (घृणा) दीप्ति से (सूर्यम्) सूर्य को (अति) उल्लङ्घित करके (तपन्तम्) प्रकाशमान (परः) सब से परे [आप] को (पप्तिम) होवें (इव) जैसे (शकुनाः) पक्षिगण [सूर्य वा आकाश की ओर अपनी शक्ति के अनुसार उड़ते हैं, तद्वत्] ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तात्पर्य यह है कि-हम प्रातःकाल उठकर, दिन में और रात्रि में परमात्मा के अतिरिक्त अन्य की उस के स्थान में उपासना न करें। यद्यपि वह अनन्त, अचिन्त्य और अप्रमेय से हमें सर्वात्मरूप से प्राप्त नहीं हो सकता तथापि जैसे पक्षी सूर्य वा आकाश की ओर वहां तक उड़ते हैं, जहां तक उन के पंखों का बल है, वैसे ही हम को अपनी अल्पशक्ति भी समस्त रूप से परमात्मा के भजन में लगा देनी चाहिये। वह अनन्त तेजस्वी सूर्यादि का भी प्रकाशक है इस लिये हम को जो उस के भक्त हैं, कृतार्थ करेगा॥

सायणाचार्य ने इस मन्त्र के "दुह्वानः" पद के स्थान में "सख्याय" पद की व्याख्या की है और जहां तक देखने को मिले किसी पुस्तक के मूल में यहां तक कि सायणभाष्य युक्त पुस्तकों भी मूल में "सख्याय" पाठान्तर नहीं पाया जाता। अनुमान होता है कि ऋ० ९।१०७।२० में जो "सख्याय" पद है उसी की व्याख्या यहां सायणभाष्य में है नकि सामवेदस्थ पाठ की। हम ने अन्यत्र भी बहुधा सामवेद के सायणभाष्य में यह छिद्र देखा है॥ २॥
अथ तृतीय तृचस्य-बृहन्मतिर्ऋषिः। पवमानः सोमो देवता। गायत्री छन्दः॥

तत्र प्रथमा-

३ १ २ ३२३ ३ २ ३ १ २
पुनानो अक्रमीदभि विश्वामृधो विचर्षणिः।
३२ ३ १२ ३ १ २
शुभन्ति विप्रं धीतिभिः॥१॥ (९२१) व्याख्याता (१८८)

अथ द्वितीया-

१ २र ३ १ २३२३२ ३ १ २ ३२
आ योनिमरुणो रुहद्गमदिन्द्रो वृषा सुतम्।
३ १ २र
ध्रुवे सदसि सीदतु॥२॥ (१२५)

पदपाठः-आ अ०। योनिम् २। अरुणः १। रुहत्, गमत् क्रि०। इन्द्रः १। वृषा १। सुतम् २। ध्रुवे, सदसि ७। सीदतु क्रि०॥

अन्वितपदार्थः-(अरुणः) रक्तवर्णः सोमः (योनिम्) स्थानम् (आरुहत्) आरोहत् (ध्रुवे) स्थिरे (सदसि) स्थाने आका-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शमण्डले (सीदतु) तिष्ठतु । एवम् (सुतम्) सोमम् (इन्द्रः) वृष्टिकर्त्ता वायुविशेषो विद्युद्विशेषो वा (गमत्) प्राप्नुयात् ॥

ऋग्वेदे तु ९।४०।२ इन्द्रं वृषा सुतः इति पाठः । सीदति इति च तत्रत्यः पाठः । सायणभाष्येऽत्रापि ऋग्वेदस्थस्य सीदतीत्यस्यैव पाठस्य व्याख्यानं दृश्यते, नतु सामवेदीयस्य सीदतु इत्यस्य ॥ २ ॥

भाषार्थः—(अरुणः) रक्तवर्ण सोम (योनिम्) अपने स्थान को (आरुहत) चढ़े और (ध्रुवे) स्थिर (सदसि) स्थान आकाश में (सीदतु) स्थिर होवे । इस प्रकार (इन्द्रः) वृष्टिकारक वायुविशेष वा विद्युत्विशेष (सुतम्) सोम को (गमत्) प्राप्त हो ॥

ऋ० ९।४०।२ का पाठान्तर संस्कृत भाष्य में देखिये । यहां भी सायण भाष्य में ऋग्वेद के "सीदति" पाठ की व्याख्या है । सामवेद के "सीदतु" की नहीं ॥ २ ॥

अथ तृतीया—

१ २ ३२ ३१२ ३ १ २ ३ १ २
नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः ।
१ २ ३ १ २
आपवस्व सहस्रिणम् ॥ ३ ॥ [३२] (१२६)

पदपाठः—नु अ० । नः ६ । रयिम् २ । महाम् २ । इन्दो सं० । अस्मभ्यम् ४ । सोम सं० । विश्वतः अ० । आपवस्व क्रि० । सहस्रिणम् २ ॥

अन्वितपदार्थः—(इन्दो) आर्द्र ! (सोम) पवमान ! (नु क्षिप्रं (नः) अस्मदीयं (महां) महान्तं (सहस्रिणं) बहु (रयिं धनं धान्यादिकं च (विश्वतः) सर्वतः (अस्मभ्यम्) (आपवस्व ॥ उक्तोमाध्यन्दिनः पवमान इति विवरणकारः ॥ अनुष्ठितः सोमयागोमनुष्याणां धनधान्यादिवृद्धिं यतीत्यर्थः ॥ ऋग्वेदे ९ । ४० । ३ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(छन्दो) गीता (स्तो
डे (सहस्रिणम्) बहुल (रयिम्) धन
ओर से (अस्मभ्यम्) हमारे लिये (आपस्व)
र कहते हैं कि माध्यंदिन पवमान कहा गया ॥
ीत् अनुष्ठान किया हुआ सोमयाग मनुष्यों के धन धान्यादि की
रता है ॥ ऋ० ९ । ४० । ३ मैं भी ॥ ३ ॥
अथ पञ्चमे खण्डे प्रथम तृचस्य—वसिष्ठऋषिः । छन्दोदेवता ।
विराट् छन्दः ॥ तत्र प्रथमा—

२ ३ १ २ ३ १ ३ १ २ ३ १ २
पिबा सोम मिन्द्रमन्दतु त्वायं ते सुषाव हर्यश्वाद्रिः ।
३ २ ३ २ ३ १ २ ३ १ ३
सोतुर्बाहुभ्याꣳ सुयतोनार्वा ॥ १ ॥ (९२७)
व्याख्याता (३९८)
अथ द्वितीया

२ ३ २३ २ ३ २ ३ २ ३ १ २ ३ १ २
यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हꣳसि ।
१२ २२
स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥ (९२८)
पदपाठः—यः १। ते ६। मदः,युज्यः,चारुः १। अस्ति क्रि०। येन ३। वृत्राणि
२। हर्यश्व सं०। हꣳसि क्रि०। सः १। त्वाम् २। इन्द्र,प्रभूवसो सं०। ममत्तु क्रि० ॥
अन्वितपदार्थः—(हर्यश्व) हरणकिरण ! वा शीघ्रगाश्वादि-
सेनावन् ! (इन्द्र) सूर्य वा राजन् ! (प्रभूवसो) प्रभावशालिन्वसो !
वा प्रभूतधन ! (यः) सोमः (ते) तव (युज्यः) प्रयोजनीयः (चारुः)
शोभनः (मदः) हर्षकरः (अस्ति) वर्त्तते, (येन) सोमेन गृहीतेन
सता (वृत्राणि) मेघान्, वा शत्रून् (हंसि) नाशयसि (सः) सोम
(त्वाम्) सूर्यं, राजानं वा (ममत्तु) हर्षयुक्तं करोतु ॥

सूर्यपक्षे सुप्रभावहर्षो विज्ञेयः॥ ऋग्वेदे ७ । २२ । २ ऽपि ॥२॥

भाषार्थः-(हर्यश्व) हरणकिरण ! वा शीघ्रगाऽश्वादि सेना वाले ! (इन्द्र) सूर्य, ! वा राजन् ! (प्रभूवसो) प्रभावशालिन् ! वसो, ! वा बहुत धनयुक्त ! (यः) जो सोम (ते) तेरा (युज्यः) प्रयोजनीय (चारुः) शोभन (मदः) हर्षकारक (अस्ति) है (येन) जिस से तुम (वृत्राणि) मेघों वा शत्रुओं का (हंसि) नाश करते हो (सः) वह सोम (त्वाम्) तुम को (ममत्तु) हर्ष दे ॥

सूर्य के पक्ष में उस का सुप्रभाव ही हर्ष है ॥ ऋ० ७ । २२ । २ में भी॥२॥

अथ तृतीया-

२ ३ १ २ ३ २ ३ २उ ३ १ २ ३ १ २ ३ ३

बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम्।

३ १र २र ३ १ २

इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥ [१३] (९२९)

पदपाठः-बोध क्रि० । सु अ० । मे ६ । मघवन् सं० । वाचम् २ । आ अ० । इमाम्, याम् २ । ते ४ । वसिष्ठः १ । अर्चति क्रि० । प्रशस्तिम् २ । इमा २ । ब्रह्म २ । सधमादे ७ । जुषस्व क्रि० ॥

अन्वितपदार्थः-(मघवन्) धनवन् ! वा मखवन् ! इन्द्र ! राजन् ! वा सूर्य ! (याम्) वाचम् (ते) तव (प्रशस्तिम्) प्रशंसारूपाम् (वसिष्ठः) अतिशयेनवसुः विद्वान् (अर्चति) वहति (इमाम्) तामिमां (वाचम्) (मे) मयोच्चारिताम् (सु आ बोध) सुष्ठु आभिमुख्येनाऽवगच्छ (इमा) इमानि (ब्रह्म) वेदवचनानि (सधमादे) यज्ञे (जुषस्व) सेवस्व ॥

यज्ञे स्वनुष्ठिते राजा यजमानो वेदवचनैः प्रशंसितः तदनुकूलाचरणं कुर्यादित्येव वेदवचनानां सेवनम्। सूर्यपक्षेऽपि वेदानुकूलसूर्योपकारप्राप्तिस्तत्सेवनं बोध्यम्॥ ऋग्वेदे ७। २२ । ३ऽपि ॥३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावार्थः—(मघवन्) धनवन् ! वा यज्ञवाले ! इन्द्र ! राजन् ! वा सूर्य्य ! (यास्) जिस (ते) तुम्हारी (प्रशस्तिम्) प्रशंसारूप (वाचम्) वाणी को (वसिष्ठः) उत्तम विद्वान् (अर्चति) प्राप्त करता है (इमाम्) उस वाणी को (मे) मेरी उच्चारित को (सु आ बोध) भले प्रकार संमुख होकर ग्रहण करो (इमा) इन (ब्रह्म) वेदवचनों का (सधमादे) यज्ञ में (जुषस्व) सेवन करो ॥

स्वनुष्ठित यज्ञ में यजमान राजा वेदवचनों से प्रशंसित किया हुवा तदनुकूलाचरण करे, यही वेदवचनों का सेवन है । सूर्य के पक्ष में भी वेदानुकूल सूर्योपकार की प्राप्ति ही उस का सेवन जानिये ॥ ऋ० ७ । २२ । ३ में भी ॥३॥

अथ द्वितीयतृचस्य—रेभः काश्यप ऋषिः । इन्द्रो देवता ।
अतिजगती छन्दः ॥ तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
विश्वाः पृतना अभिभूतरन्नरः सजूस्ततक्षुरिन्द्रजजनुश्च राजसे।
२ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २
ऋत्वेवरेस्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ १ ॥

(९३०) व्याख्याता (३७०)

अथ द्वितीया—

३ १ २ ३ १ २ ३ १ २ २ ३ २ ३ १ २
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे । सुदीतयो
३ २ २ ३ १ २ ३ २ ३ १ २ २
वो अद्रुहोपि कर्णे तरस्विनः समृक्वभिः ॥२॥ (९३१)

पदपाठः—नेमिम् २ । नमन्ति क्रि० । चक्षसा ३ । मेषम् २ । विप्राः १ । अभिस्वरे ७ । सुदीतयः १ । वः ६ । अद्रुहः १ । अपि अ० । कर्णे ७ । तरस्विनः १ । सम् अ० । ऋक्वभिः ३ ॥

अन्वितपदार्थः—(तरस्विनः) कर्मसु स्तोत्रादिषु त्वरायुक्ताः (सुदीतयः) शोभनदीप्तयः (अद्रुहः) कस्याप्यद्रोग्धारः (विप्राः) मेधाविनऋत्विजो ब्राह्मणाः (अभिस्वरे) अभितः स्वरयुक्ते वेदध्वनियुक्ते " यज्ञे " इति विवरणकारः (ऋक्वभिः) मन्त्रैः (चक्षसा) उपदेशेन (वः) युष्माकं (नेमिम्) मर्यादावर्त्तिनम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(मेषं) कामानां वर्षकं प्रकरणादिन्द्रं राजानं यजमानं (कर्णे) श्रोत्रसमीपे (अपि) दूरस्थाश्चापि (संनमन्ति) सम्यक्तया नमयन्ति भक्तिश्रद्धादिवर्धकवाक्यजपादिभिः प्रह्वीभूतं कुर्वन्ति॥ ऋग्वेदे तु ८ । ९७ । १२ अभिस्वरा इति पाठः ॥ २ ॥

भाषार्थः—(तरखितः) स्तोत्रादि कर्मों में फुर्तीले (सुदीतयः) सुन्दर दीप्ति वाले (अदुहः) किसी से द्रोह न करने वाले (विप्राः) बुद्धिमान् ऋत्विज् ब्राह्मण लोग (अभिस्वरे) यज्ञ में (ऋक्वभिः) मन्त्रों से (चक्षसा) उपदेश से (वः) तुम्हारे (नेमिम्) मर्यादावर्त्ती (मेषम्) कामपूरक [प्रकरण से—इन्द्र=राजा यजमान को] (कर्णे) कान के समीप (अपि) और दूरस्थित भी (संनमन्ति) अच्छे प्रकार भक्ति श्रद्धादि वर्धक वाक्यजप आदि से नम्र करते हैं ॥ ऋ० ८ । ९७ । १२ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २३१ २ ३ २ ३ १ २ ३१२

समु रेभासो अस्वरन्निन्द्रꣳसोमस्य पीतये ।

२र ३१२३१२३ १ २ ३ २ ३ १ २

स्वः पतिर्यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥३॥[१४](९३२)

साम्वेदपाठः-सम्, उ अ० । रेभासः १ । अस्वरन् क्रि० । इन्द्रम् २ । सोमस्य ६ । पीतये ४ । स्वःपतिः १ । यद्, ईं अ० । वृधे ४ । धृतव्रतः १ । हि अ० । ओजसा ३ । सम् अ० । ऊतिभिः ३ ॥

अन्वितपदार्थः—पूर्वमन्त्रादभिस्वरे=यज्ञेइत्यनुवर्त्तते (रेभासः) स्तोतारऋत्विजः [निघं० ३। १६] (सोमस्य पीतये इन्द्रम्) (सम्, उ, अस्वरन्) समाकारयन्ति (यत्) यस्मात् (स्वःपतिः) इन्द्रो राजा (वृधे) वृद्ध्यै [(ईं) पादपूरणः] (धृतव्रतः) धृतनियमः सन् (हि) निश्चयेन (ओजसा) बलेन (ऊतिभिः) तदुद्भवाभीरक्षाभिश्च (सम्) संगच्छेत ॥

ऋग्वेदे तु ८।९७। ११ समु=समीम्,स्वःपतिः=स्वर्पतिम्, यदी=यदीम् इति पाठभेदाः ॥ ३ ॥

भावार्थः—पूर्व मन्त्र से "अभिस्वरे"='यज्ञ में' की अनुवृत्ति है। यज्ञ में (रेभासः) स्तोता ऋत्विज् लोग [निघं० ३। १६] (सोमस्य पीतये) सोम के पीने को (इन्द्रम्) इन्द्र राजा को (सम् च अस्वरन्) बुलाते हैं (यत्) जिस से कि (स्वःपतिः) इन्द्र=राजा (वृधे) वृद्धि के लिये (वृत्रव्रतः) व्रत को धारण करने वाला (हि) निश्चय (ओजसा) बल और (ऋतिभिः) बनोत्पन्न रक्षाओं से (सम्) संगत होजावे (ई) पादपूरणार्थ है ॥ ऋ० ८। ९७। ११ के पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ प्रगाथस्य तृतीयसूक्तस्य—पुरुहन्मा ऋषिः। इन्द्रोदेवता।

प्रागाथं छन्दः॥ तत्र प्रथमा—

१ २२ ३ २उ ३ १ २ ३ १ २

यो राजा चर्षणीनां याता रथेभिरध्रिगुः।

१ २ ३ १ २२ ३२ ३ १ २ ३ २ ३ २

विश्वासां तरुता पृतानानां ज्येष्ठं यो वृत्रहा गृणे॥ १॥(९३३)

व्याख्याता (२७३)

अथ द्वितीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

इन्द्रं तꣳ शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्त्तरि।

१ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २२

हस्तेन वज्रः प्रतिधायि दर्शतो महान्देवो न सूर्यः॥

॥ २ ॥ [१५] (१३४)

पदपाठः—इन्द्रम्, तम् २। शुम्भ क्रि०। पुरुहन्मन् सं०। अवसे ४। यस्य ६। द्विता १। विधर्त्तरि ७। हस्तेन ३। वज्रः १। प्रतिधायि क्रि०। दर्शतः, महान्, देवः १। न अ०। सूर्यः १॥

अन्वितपदार्थः—(पुरुहन्मन्) हे बहुज्ञानिन्! (तम्)(इन्द्रम्) राजानम्(अवसे) रक्षणाय (शुम्भ)प्रसादय(यस्य)इन्द्रस्य(हस्तेन) कर्त्रा (वज्रः)शस्त्रास्त्रसमूहः (प्रतिधायि) धियते [अतइन्द्रउग्रः] यश्च (दर्शतः) दर्शनीयोऽपि वर्त्ततेऽतोऽभिगम्यः। एवं राजा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(महान्देवः सूर्यः) (न) इव (विधर्त्तरि) विधारके ब्रह्माण्डे (हिता) हिप्रकारकोस्ति ॥

यथा सूर्यः प्रखररश्मित्वादधृष्यः प्रकाशादुपयोगित्वाच्चाभिगम्योऽस्ति तथैव राजापि दुष्टदमनायोग्रोधर्मात्मरक्षणाय शान्तश्च स्यात् । एवंविधःस विद्वद्भिः सत्कर्त्तव्यः॥ ऋग्वेदे तु ८ । ७० । २ हस्तेन=हस्ताय । महान्देवः=महोदिवे इति पाठौ॥२॥

भाषार्थः—(पुरुहन्मन्) हे बहुज्ञानिन् ! (तम्) उस (इन्द्रम्) इन्द्र=राजा को(अवसे)रक्षा के लिये(शुम्न)प्रसन्नकर (यस्य) जिस के (हस्तेन) हाथ ने (वज्रः) शस्त्रास्त्रसमूह (प्रतिधायि) धारण किया है [इस से उग्र है] और जो (दर्शतः) दर्शनीय भी है [इस से अभिगम्य है] इस प्रकार राजा (महान्) बड़े (देवः) देव (सूर्यः) सूर्य के (न) समान (विधर्त्तरि) ब्रह्माण्ड में (हिता) दो प्रकार से वर्त्तमान है ॥

जैसे सूर्य तीक्ष्ण किरणों वाला होने से अधृष्य है और प्रकाशादि का उपयोगी होने से दर्शनीय और अभिगम्य है । इसी प्रकार राजा भी दुष्टों के दमनार्थ उग्र और धर्मात्माओं की रक्षार्थ शान्त दर्शनीय अभिगम्य होवे। उक्त गुणविशिष्ट राजा का विद्वानों को सत्कार करना चाहिये ॥

ऋ० ८ । ७० । २ के पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ षष्ठे खण्डे प्रथमर्चश्चस्य—असितःकाश्यपो देवलोवा ऋषिः । पवमानःसोमोदेवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

१ २ ३ २ ३ २ ३ १ २ र ३ क २ र ३ २

परि प्रिया दिवः कविर्वयाꣳसि नप्त्योर्हितः ।

३ १ २ ३ १ २

स्वानैर्याति कविक्रतुः ॥ १ ॥(१३५)व्याख्याता (४७६)

अथ द्वितीया—

२ ३ २ ३ २ ३ १ २ ३ २ ३ १ २

स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।

३ २ ३ १ २ ३ १ २

महान्मही ऋतावृधा ॥ २ ॥ (१३६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—सः, सूनुः १ । मातरा २ । शुचिः, जातः १ । जाते २ । अरोचयत् क्रि० । महान् १ । मही २ । ऋतावृधा २ ॥

अन्वितपदार्थः—(जातः) उत्पन्नः (शुचिः) पवित्रः (महान्) हविरुत्तमः (सः) सोमः (सूनुः) पुत्रः (मही) महत्यौ (ऋतावृधा) यज्ञस्य वर्धयित्र्यौ (जाते) विश्वस्य जनयित्र्यौ (मातरा) सोमस्य मातरौ द्यावापृथिव्यौ (अरोचयत्) रोचयति दीपयति॥ ऋग्वेदे ९ । ९ । ३ ऽपि ॥ २ ॥

भाषार्थः—(जातः) उत्पन्न हुआ (शुचिः) शुद्ध (महान्) बड़ा उत्तम हव्य (सः) वह सोम (सूनुः) पुत्र—(मही) बड़ी (ऋतावृधा) यज्ञ को बढ़ाने वाली (जाते) सब की उत्पादिका (मातरौ) अपनी [सोम की] माता द्युलोक और पृथिवी को (अरोचयत्) प्रकाशित करता है ॥ ऋ० ९ । ९ । ३ में भी ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
प्र प्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
३क २र ३ १ २
वीत्यर्ष पनिष्टये ॥ ३ ॥ [१६] (९३७)

पदपाठः—प्र अ० । प्रक्षयाय, पन्यसे, जनाय ४ । जुष्टः १ । अद्रुहः ६=४ । वीति ४ । अर्ष क्रि० । पनिष्टये ४ ॥

अन्वितपदार्थः—प्रकरणात्सोमः(प्रक्षयाय)उच्चस्थानाय(पन्यसे) व्यवहर्त्रे (पनिष्टये) स्तोत्रे (अद्रुहः) अद्रोग्ध्रे (जनाय) (वीति) भक्षणाय (प्राऽर्ष) प्राप्नोति ॥ ऋग्वेदे तु ९ । ९ । २ "अद्रुहे" इति चनिष्टया इति च पाठौ ॥ ३ ॥

भाषार्थः—प्रकरण से सोम (प्रक्षयाय) उच्चस्थानी (पन्यसे) व्यवहार करने वाले (पनिष्टये) स्तोता (अद्रुहः) द्रोहरहित (जनाय) पुरुष के लिये (वीति) भक्षणार्थ (प्राऽर्ष) मिलता है ॥ ऋ० ९ । ९ । २ के पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ प्रगाथस्य द्वितीय सूक्तस्य—शक्तिरुरुश्च क्रमेण द्वयोर्ऋषी । पवमानः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोमोदेवता । ककुप्, सतोबृहती च क्रमेण छन्दसी ॥ तत्र प्रथमा-

२ ऽ १ २ ३१२३ १२ ३१२ ३
त्वं ह्याऽङ्ग दैव्य पवमान जनिमानि द्युमत्तमः । अमृत-
१ २ ३ १२
त्वाय घोषयन् ॥ १ ॥ (९३८) व्याख्याता (५८३)

अथ द्वितीया-

२ ३ १२ ३ १ २ ३२ऽ ३ १२ ३२ ३१२
ये ना नवग्वा दध्यङ्ङपोर्णुते येन विप्रास आपिरे । देवानां
३ २ ३१२ ३ १२३ २३२३ १ २
सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत॥२॥[१७] (९३९)

पदपाठः—येन, नवग्वा ३ । दध्यङ् १ । अपोर्णुते क्रि० । येन । विप्रासः १ । आपिरे क्रि० । देवानाम् ६ । सुम्ने ७ । अमृतस्य, चारुणः ६ । येन । श्रवांसि २ । आशत क्रि० ॥

अन्वितपदार्थः—(येन) (नवग्वा) अभिनववाक्कृत्वसम्पादकेन सोमेन (दध्यङ्) वाक् [श० ६ । ४ । २ । ३] (अपोर्णुते) प्रसरति, (येन) सोमेन (विप्रासः) विद्वांसः (आपिरे) बलमाप्नुवन्ति, अथ च (येन) सोमेन (देवानां) विदुषां (सुम्ने) आनन्दे (चारुणः) शोभनस्य (अमृतस्य) (श्रवांसि) यशांसि (आशत) अश्नुवते ॥

ऋग्वेदे तु १ । १०८ । ४ नवग्व इति, आनशुः इति च पाठः ॥ २ ॥

भाषार्थः—(येन) जिस (नवग्वा) उत्तम वाक्कृत्व वाले सोम से (दध्यङ्) वाणी [श० ६ । ४ । २ । ३] (अपोर्णुते) फैलती है, (येन) जिस से (विप्रासः) विद्वान् लोग (आपिरे) सुख को वा बल को प्राप्त होते हैं और (येन) जिस सोम से (देवानाम्) विद्वानों के (सुम्ने) आनन्द में (चारुणः) सुन्दर (अमृतस्य) अमृत के (श्रवांसि) यशों को (आशत) पाते हैं ॥ ऋ० ९ । १०८ । ४ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयतृचस्य—अग्निर्ऋषिः । पवमानः सोमो देवता ।
उष्णिक् छन्दः ॥ तत्र प्रथमा—

१ २ ३ २ ३ २र ३ २ ३ १ २
सोमः पुनान ऊर्मिणाव्यं वारं विधावति ।
१ २ ३ १ २र ३ १ २
अग्रे वाचः पवमानः कनिक्रदत् ॥ १ ॥ (९४०)

व्याख्याता (५७२)

अथ द्वितीया—

३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम् ।
३ १ २ ३ २ ३ २ ३ १ २
अभि त्रिपृष्ठं मतयः समस्वरन् ॥ २ ॥ (९४१)

पदपाठः—धीभिः ३ । मृजन्ति क्रि० । वाजिनम् २ । वने ७ । क्रीडन्तम्, अत्यविम् २ । अभि अ० । त्रिपृष्ठम् २ । मतयः १ । समऽस्वरन् क्रि० ॥

अन्वितपदार्थः—(वाजिनं) बलवन्तं (वने) वननीये वसतीवर्याख्ये उदके (क्रीडन्तं) संक्रीडमानम् (अत्यविम्) अविभवमूर्णामयं दशापवित्रमतिक्रान्तं सोममृत्विजः (धीभिः) धीतिभिरङ्गुलिभिः (मृजन्ति) शोधयन्ति । किञ्च (त्रिपृष्ठं) त्रीणि द्रोणकलशाऽऽधवनीय-पूतभृदाख्यानि यज्ञपात्राणि स्पृशति तं सोमं (मतयः) मन्त्रवाचः (अभिसमऽस्वरन्) अभितः संस्तुवन्ति ॥ ऋग्वेदे तु ९।१०६।११ मृजन्ति=हिन्वन्तीत्यन्तरम् ॥ २ ॥

भाषार्थः—(वाजिनम्) बलदायक और बलयुक्त, (वने क्रीडन्तम्) वसतीवरी नामक जल में क्रीडा करते हुवे, (अत्यविम्) ऊर्णामय दशा-पवित्र को उल्लङ्घित करने वाले [सोम को ऋत्विज् लोग] (धीभिः) अङ्गुलियों से (मृजन्ति) स्वच्छ [अमनियां] करते हैं । किञ्च—(त्रिपृष्ठम्) तीन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

[१ द्रोणकलश,२ आधवनीय,३ पूतभृत्] पात्रों को छूने वाले सोम को(मतयः) मन्त्रवाणियें (अभि समश्वरन्) सब ओर से प्रशंसित करती हैं ॥ ऋ० ९। १०६। ११ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

१ २ ३ १ २ ३ २ ३ २३ ३ १ २ ३ २

असर्जि कलशां अभि मीढ्वान्त्सप्तिर्न वाजयुः ।

३ १ २र ३ १ २

पुनानो वाचं जनयन्नसिष्यदत् ॥३॥ [१८](९४२)

पदपाठः–असर्जि क्रि० । कलशान् २ । अभि अ० । मीढ्वान्,सप्तिः १ । न अ० । वाजयुः, पुनानः १ । वाचम् २ । जनयन् १ । असिष्यदत् क्रि० ॥

अन्वितपदार्थः–(सप्तिः न) अश्व इव (वाजयुः) बलिष्ठः (मीढ्वान्) सेचनसमर्थः (पुनानः) पवमानः सोमः (कलशान् अभि) कलशेषु (असर्जि) सृज्यते, ततः (वाचं) वागिन्द्रियं (जनयन्) (असिष्यदत्) स्यन्दते ॥ ऋग्वेदे तु ९। १०६। १२ मीढ्वान् = मील्हे इति पाठः ॥ ३ ॥

भाषार्थः–(सप्तिः न) घोड़े के समान (वाजयुः) बलिष्ठ और (मीढ्वान्) सेचनसमर्थ (पुनानः) पवमान सोम (कलशान् अभि) द्रोणकलशों में (असर्जि) छोड़ा जाता है, तब (वाचम्) वाणी को (जनयन्) उत्पन्न करता हुवा (असिष्यदत्) टपकता है ॥ ऋ० ९। १०६। १२ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ चतुर्थ्यृचस्य–प्रतर्दनो दैवोदासिर्ऋषिः । पवमानः सोमो देवता । त्रिष्टुप्छन्दः ॥ तत्र प्रथमा–

१ २ ३ १ २३ १ २ ३ २ ३ १ २ ३ १

सोमः पवते जनिता मतीनां जनिता दिवो जनिता

२ ३ २ ३ १ २र ३ १र २र ३ १ २

पृथिव्याः । जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य

३ १ २र

जनितोत विष्णोः ॥१॥ (९४३) व्याख्याता(५२७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३
मृगाणाम् । श्येनोगृध्राणां स्वधितिर्वनानां सोमः प-
२ ३ १ २ ३ १ २
वित्रमत्येति रेभन् ॥ २ ॥ (९४१)

पदपाठः–ब्रह्मा १ । देवानाम् ६ । पदवीः १ । कवीनाम् ६ । ऋषिः १ । विप्राणाम् ६ । महिषः १ । मृगाणाम् ६ । श्येनः १ । गृध्राणाम् ६ । स्वधितिः १ । वनानाम् ६ । सोमः १ । पवित्रम् २ । अत्येति क्रि० । रेभन् १ ॥

अन्वितपदार्थः–(सोमः) ओषधिराजः (देवानाम्) ऋत्विजां (ब्रह्मा) ब्रह्मेव मुख्यो राजा वा भवति, तथा (कवीनां) क्रान्त-प्रज्ञानां (पदवीः) पदानि साधुत्वेन योजयति सः [वी गत्यादिषु अदा० प०] तथा (विप्राणां) मेधाविनाम् (ऋषिः) दर्शकोबु-द्धिवर्धको भवति, तथा (मृगाणां) वन्यपशूनां (महिषः) म-हत्त्वकरो वर्धको भवति, तथा (गृध्राणां) पक्षिविशेषाणां तदु-पलक्षितानानामन्यपक्षिणां चापि (श्येनः) गतिकरो भवति । एवं-प्रभावः सोमः (रेभन्) शब्दं कुर्वन् (पवित्रम्) ऊर्णास्तुकनि-र्मितं दशापवित्रम् (अत्येति) अतिगच्छति ॥

निरुक्तपरिशिष्टकारस्तु इत्थं व्याचष्टे–"ब्रह्मा देवानामित्येष हि ब्रह्मा भवति, देवानां देवनकर्मणामादित्यरश्मीनां, पदवीः कवीना-मित्येष हि पदं वेत्ति कवीनां कवीयमानानामादित्यरश्मीनामृषिर्वि-प्राणामित्येष हि ऋषिणो भवति, विप्राणां व्यापनकर्मणामादित्य-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रश्मीनां, महिषो मृगाणामित्येषहि महान्भवति मृगाणां मार्गणकर्मणामादित्यरश्मीनां, श्येनो गृध्राणामिति श्येन आदित्यो भवति श्यायतेर्गतिकर्मणोगृध्रआदित्यो भवति गृध्यतेः स्थानकर्मणो यत एतस्मिंस्तिष्ठति, स्वधितिर्वनानामित्येषहि स्वयं कर्माएयादित्यो धत्ते, वनानां वननकर्मणामादित्यरश्मीनां सोमः पवित्रमत्येति रेभन्नित्येष हि पवित्रं रश्मीनामत्येति स्तूयमानएष एवैतत्सर्वमक्षरमित्यधिदैवतम् । अथाध्यात्मम्—ब्रह्मा देवानामित्ययमपि ब्रह्मा भवति देवानां देवनकर्मणामिन्द्रियाणां,पदवीः कवीनामित्ययमपि पदं वेत्ति कवीनां कवीयमानानामिन्द्रियाणामृषिर्विप्राणामित्ययमपि ऋषिणो भवति विप्राणां व्यापनकर्मणामिन्द्रियाणां महिषोमृगाणामित्ययमपि महान्भवति मृगाणां मार्गणकर्मणामिन्द्रियाणां श्येनोगृध्राणामिति श्येन आत्मा भवति श्यायतेर्ज्ञानकर्मणो गृध्राणीन्द्रियाणि गृध्यतेर्ज्ञानकर्मणो यत एतस्मिंस्तिष्ठति, स्वधितिर्वनानामित्ययमपि स्वयंकर्माएयात्मनि धत्ते, वनानां वननकर्मणामिन्द्रियाणां सोमः पवित्रमत्येति रेभन्नित्ययमपि पवित्रमिन्द्रियाण्यत्येति स्तूयमानोऽयमेवैतत्सर्वमनुभवत्यात्मगतिमाचष्टे" । इति नि० प० २ । १३ ॥ ऋग्वेदे ९ । ९६ । ६ ऽपि ॥ २ ॥

भाषार्थः—(सोमः) ओषधिराज सोम (देवानाम्) विद्वान् ऋत्विजों में (ब्रह्मा) ब्रह्मासा मुख्य वा राजा है,तथा (कवीनाम्) कवियों का (पदवीः) ठीक २ पद जुड़वाने वाला है, और (विप्राणाम्) बुद्धिमानों का (ऋषिः) दर्शक वा बुद्धिवर्धक है, तथा (मृगाणाम्) वन्यपशुओं का (महिषः) बढ़ाने वाला है, अपच (गृध्राणाम्) गिद्धों और गृध्रोपलक्षित अन्य पक्षियों का

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(श्येनः) गतिसंपादक है। इस प्रकार के प्रभाव वाला सोम (रेभन्) शब्द करता हुआ (पवित्रम्) ऊर्णामय दशापवित्र को (अत्येति) लांघता है॥

निरुक्त के परिशिष्टकार इस ऋचा को इस प्रकार व्याख्यात करते हैं:- (भावार्थ-)" यह सोम दिव्य सूर्यकिरणों का ब्रह्मा है, यही कवि=कविवत् आचरण करते हुये सूर्यकिरणों का पदयोजक है, यही व्यापक सूर्यकिरणोंका ऋषि=ज्ञापक है,यही ढूंढने वाले सूर्यकिरणों का बढ़ाने वाला है,यही मानो सूर्य है, यही ठहराने वाले सूर्यकिरणों का सूर्य है, यही संविभाग करने वाले सूर्यकिरणों का कर्म में प्रेरक है।यही सोम किरणों में पवित्रता फैलाने वाला है। यह सोम की स्तुति=प्रशंसा है । यह भौतिक दैवत पक्ष का अर्थ है॥

अब अध्यात्मपक्ष का अर्थ कहते हैं कि यह आत्मा सोम है, जो दिव्य-कर्मा, इन्द्रियों का ब्रह्मा है, वह कवि इन्द्रियों का पदरचनासहायक है, वह व्यापक इन्द्रियों का बोधसहायक है,वह ढूंढने वाले इन्द्रियों का बढ़ाने वाला है,वह बोधक इन्द्रियों का आत्मा है, वह विभाजक इन्द्रियों का कर्म कराने वाला है, वह इन्द्रियों का पावन, इन्द्रियों को लांघ कर चला जाता है। वह सब का अनुभव करता है । इस प्रकार आत्मिक गति कहते हैं"॥ नि० प० २। १३॥ ऋ० ९। ९६। ६ में भी॥ २॥

अथ तृतीया-

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३ ३ २

प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरस्स्तोमान्पवमानो मनीषाः।

३ २ २१ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २

अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन्॥३॥

[१९] (१४५)

पदपाठः-प्रावीविपत् क्रि०। वाचः ६। ऊर्मिम् २। न अ०। सिन्धुः १। गिरः, स्तोमान् २। पवमानः १। मनीषाः २। अन्तः अ०। पश्यन् क्रि०। वृजना, इमा, अवराणि २। आ-तिष्ठति क्रि०। वृषभः १। गोषु ७। जानन् १॥

अन्वितपदार्थः-(पवमानः) सोमः (मनीषाः) धारणावतीर्बुद्धीः, (गिरः) निगरणशक्तीः (स्तोमान्) वक्तृत्वशक्तीः, (वाचः) वाणीः (प्रावीविपत्) प्रेरयति । दृष्टान्तः-(सिन्धुः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नदी (न) यथा (ऊर्मिम्) तरङ्गं प्रेरयति तद्वत् । तथा (अन्तः) अन्तरात्मनि (पश्यन्) दर्शयन् दृष्टिसाहाय्यं कुर्वन् (अ—राणि) अवार्याणि (इमा) इमानि (वृजना) बलानि (आ—तिष्ठति) आसादयति (वृषभः) वर्षकः सोमः (गोषु) ज्ञानेन्द्रियेषु (जानन्) बोधशक्तिमुत्पादयन् आस्ते, इति शेषः ॥

ऋग्वेदे तु ९ । ९६ । ७ स्तोम इति पाठः ॥ ३ ॥

भाषार्थः-(पवमानः)सोम(मनीषाः)धारणावती बुद्धियों को,(गिरः)भोजन शक्तियों को,(स्तोमान्)प्रकृत्य शक्तियों को (वाचः)और वाणियों को(प्रावीविपत्) प्रेरता है। दृष्टान्त-(न) जैसे(सिन्धुः)नदी (ऊर्मिम्) लहरी को प्रेरती है,तद्वत्। तथा (अन्तः) भीतर (पश्यन्) दृष्टि की सहायता करता हुवा (अवराणि) दूसरों से न हटाने योग्य (इमा) इन (वृजना) बलों को (आतिष्ठति) प्राप्त कराता है (वृषभः) वृष्टिकर्त्ता सोम (गोषु) ज्ञानेन्द्रियों में (जानन्)बोधशक्तिप्रदान करता हुवा वर्त्तमान है ॥ ऋ० ९ । ९६ । ७ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

इति सामवेदभाष्ये उत्तरार्चिके पञ्चमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

" इति—यज्ञायज्ञीयमग्निष्टोमीयं साम" अथच—" इदानीमुक्थानि । तत्र—सौरभं ब्रह्मसाम वसिष्ठस्य प्रियतमच्छावाकसाम " इति च विवरणकारः ॥

अथ तृचत्रयात्मके सप्तमे खण्डे प्रथम तृचस्य—प्रयोगो ऽग्निर्वा ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

३ १र २ ३ १ २ ३ १ २ ३ १ २

अग्निं वोवृधन्तमध्वराणां पुरूतमम् ।

२ ३ २ ३ १ २

अच्छा नप्त्रे सहस्वते ॥ १ ॥ (९४६) व्याख्याता (२१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

३ १र २र ३ २ ३ १ २ ३ २३ १ २
अयं यथा न आभुवत्त्वष्टा रूपवे तक्ष्या ।
३ २उ ३ १ २
अस्य क्रत्वा यशस्वतः ॥ २ ॥ (९४७)

पदपाठः–अयम् १ । यथा अ० । नः ४ । आभुवत् क्रि० । त्वष्टा १ । रूपा २ । इव अ० । तक्ष्या २ । अस्य ६ । क्रत्वा ३ । यशस्वतः ६ ॥

अन्वितपदार्थः–पूर्वमन्त्रादग्नेरनुवृत्तिः (अस्य) (यशस्वतः) यशस्विनोऽग्नेः (क्रत्वा) क्रतुना यज्ञेन (अयम्) अग्निः (नः) अस्मभ्यम् (तक्ष्या) तक्ष्याणि विकर्त्तव्यानि (रूपा) रूपाणि (इव यथा त्वष्टा) (आभुवत्) आभवेत्तथा वयं प्रयतेमहि इति शेषः ॥

अस्माभिस्तथानुष्ठेयं यथायमग्निश्छेदनभेदनकर्मणा दुर्गन्धनाशं कुर्यात् । दृष्टान्तः–यथा वर्धकिस्तक्ष्याणि काष्ठानि तक्ष्णोति तद्वत् ॥ ऋग्वेदे ८ । १०२ । ८ऽपि ॥ २ ॥

भावार्थः–पूर्व मन्त्र से "अग्नि" की अनुवृत्ति है (अस्य) इस (यशस्वतः) यशस्वी अग्नि के (क्रत्वा) यजन से (अयम्) यह अग्नि (नः) हमारे लिये (तक्ष्या) फाड़ने योग्य (रूपा) काष्ठादि रूपों को (इव) जैसे (त्वष्टा) बढ़ई (यथा) जैसे (आभुवत्) होवे, वैसा हम यत्न करें ॥

हमको अग्नि द्वारा ऐसा यत्न करना चाहिये कि यह अग्नि काष्ठोंको बढ़ई के समान दुर्गन्ध का छेदन भेदन करके उपकारक हो ॥ ऋ०८।१०२।८ में भी ॥२॥

अथ तृतीया–

१ १ २र ३ २उ ३ २ ३ १ २
अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२३ ३१२

आवाजैरुपनोगमत् ॥ ३ ॥ [२०] (९४८)

पदपाठः—अयम् १ । विश्वाः २ । अभि अ० । श्रियः २ । अग्निः १ । देवेषु ७ । पत्यते क्रि० । आ । वाजैः ३ । उप अ० । नः २ । गमत् क्रि० ॥

अन्वितपदार्थः—(अयम्) कृतयजनः (अग्निः) पावकः (देवेषु) वाय्वादिषु (विश्वाः) समस्ताः (श्रियः) संपदः (अभिपत्यते) अभितः संपादयति, सोऽयम् (वाजैः) अन्नैः यज्ञेन सस्यवृद्ध्या (नः) अस्मान् (उपाऽऽगमत्) उपागच्छेत् ॥ ऋग्वेदे ८ । १०२ । ९ ऽपि ॥ ३ ॥

भाषार्थः—(अयम्) यह यजन किया हुवा (अग्निः) अग्नि (देवेषु) वायु आदि देवों में (विश्वाः) सब (श्रियः) संपदाओं को (अभि निपत्यते) सब ओर से पहुंचाता है वह अग्नि (वाजैः) खेती की वृद्धि द्वारा अन्नों से (नः) हम को (उपागमत्) प्राप्त हो ॥ ऋ० ८ । १०२ । ९ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य—गोतमो राहूगण ऋषिः । इन्द्रो देवता। अनुष्टुप्छन्दः ॥

तत्र प्रथमा—

३१२ ३१२३ २३१२ ३१२ ३१२३ २१३

इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम्। शुक्रस्य त्वाऽभ्यक्षरन् धारा ऋतस्य सादने ॥१॥ (९४९) व्याख्याता (३४४)

अथ द्वितीया—

२३ २३१२३ २३ १२ ३ १२

नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।

२३१२ ३२३ २३ १२ १२

नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥२॥ (९५०)

पदपाठः—नकिः अ० । त्वत् ५ । रथीतरः १ । हरी २ । यत् अ० । इन्द्र सं० । यच्छसे क्रि० । नकिः । त्वा २ । अनु अ० । मज्मना ३ । नकिः । स्वश्वः १ । आनशे क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(इन्द्र) हे राजन् ! (यत्) यस्मात्कारणात् त्वं (हरी) शीघ्रगावश्वौ (यच्छसे) प्राप्नोषि तस्मात् (त्वत्) त्वत्तोऽपरः (रथीतरः) उत्तमोरथी (नकिः) नैव स्यात् । अथ च (त्वा अनु) त्वादृशः (मज्मना) बलेन (नकिः) नैव स्यात् (स्वश्वः) शोभनाश्ववान् त्वत्तोऽन्यः (नकिः) नैव (आनशे) प्राप्नुयात् ॥

राज्ञाऽद्वितीयभावेन भवितव्यं यतो न तादृशोऽपरोरथी, स्वश्वो, बली च स्यात् ॥

मज्मनेति बलनाम निघं० २।९॥ युष्मत्तत्ततक्षुष्वन्तः पादम् (८।३।१०३)इति नकिष्ट्वदित्यत्र षत्वम् । ऋग्वेदे १।८४।६ऽपि॥३॥

भाषार्थः—(इन्द्र) हे राजन् ! (यत्) जोकि तुम (हरी) दोनों शीघ्रगामी अश्वों को (यच्छसे) प्राप्त होते हो इस से (त्वत्) तुम से बढ़कर (रथीतरः) उत्तम रथी (नकिः) कोई न हो और (त्वा अनु) तुमसा (मज्मना) बल से भी (नकिः) कोई न हो, तथा (स्वश्वः) उत्तम घोड़ों वाला तुम से बढ़कर (नकिः) कोई न (आनशे) मिले ॥

अर्थात् राजा को सर्वोत्तम अश्वादि रत्न अपने पास रखने चाहियें ॥ निघं० २ । ९ अष्टाध्यायी ८ । ३ । १०३ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १ । ८४ । ६ में भी ॥ ३ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३
इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन । सुता अमत्सु-
१ २ ३ १ २ ३ १ २
रिन्दवो ज्येष्ठं नमस्यता सहः ॥३॥ [२१] (१५१)

पदपाठः—इन्द्राय ४ । नूनम् अ० । अर्चत क्रि० । उक्थानि २ । च अ० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रवीतन क्रि० । सुताः १ । अमत्सुः क्रि० । इन्दवः १ । ज्येष्ठम् २ । नमस्यत क्रि० । सहः २ ॥

अन्वितपदार्थः—हे प्रजाजनाः ! (इन्द्राय) राज्ञे (नूनम्) अवश्यम् (अर्चत) सत्कारं कुरुत (उक्थानि) प्रशस्तीः (च) (ब्रवीतन) ब्रूत (सुताः) अभिषुताः (इन्दवः) सोमास्तमिन्द्रम् (अमत्सुः) हृष्टं पुष्टं कुर्युः (सहः) बलवन्तं (ज्येष्ठम्) प्रशस्यं तं (नमस्यत) नमस्कुरुत ॥ ऋग्वेदे १ । ८४ । ५ऽऽपि ॥३॥

भाषार्थः—हे प्रजाजनो ! (इन्द्राय) राजा के लिये (नूनम्) अवश्य (अर्चत) सत्कार करो (उक्थानि) उस की स्तुतियें (ब्रवीतन) उच्चारण करो (सुताः) अभिषुत (इन्दवः) सोम (अमत्सुः) उसे हृष्ट करें (सहः) बलवान् (ज्येष्ठम्) बड़े राजा को (नमस्यत) नमस्कार करो ॥ ऋ० १ । ८४ । ५ मैं भी ॥ ३ ॥

अथाग्रिमतृचविचारः । अथ तावत्तु नाऽस्याऽऽर्षेयं ज्ञायते, नापि छन्दोनुक्रमणी, नापि देवतोल्लेखो देवतानुक्रमण्यां दृश्यते। वस्तुतो ह्यस्य तृचस्य द्वाविंशसूक्तस्य अनुक्रमणीषु संख्यैव नास्ति। यथा च सामवेदे प्रायो हि ऋग्वेदस्था मन्त्रा दृश्यन्ते न तथास्य तृचस्यैकाप्यृक् ऋग्वेदसंहितायां दृश्यते । परं यज्ञसम्बन्धेऽस्य विनियोगो यादृशो विवरणकारमनुसृत्य श्रीसत्यव्रतेन सामश्रमिणा प्रकाशितः सोयम्—

"इदानीं चतुर्थेऽहनि षोडशी भवति । तस्य षोडशिनो महान् विचारः । इन्द्रश्च वृक्षश्च समभवतामित्यारभ्य महान्विचारो निदानकृतेत्युक्तः । चतुस्त्रिंशदक्षराणि स्तुता भवन्ति । तमुपसृत्य प्रवहादीनि उपसर्गाक्षराणि निरुप्यन्ते । तथा सति आदित्रयाणां पादानां त्रीणि त्रीणि उपसर्गाक्षराणि पादान्तेषु भवन्ति । इति विवरणकारः । एवं च—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथमर्चि–प्रवह, हरिह, मतिर्न–इति नव;
द्वितीयर्चि–नव्यं न, दिवो न, स्व३र्न–इति नव;
तृतीयर्चि–मित्रो न, यतिर्न, भृगुर्न–इति नव।
किञ्च प्रथमर्चि चतुर्थपादादौ च–मधो३श्चकानः इति सप्त, तदित्थं संकलनया चतुस्त्रिंशदुपसर्गाक्षराणि संपद्यन्ते। अत्र च–स्व३र्न, मनो३: इत्युभयत्र त्रिमात्रस्य द्व्यक्षरत्वेन ग्रहणं बहुविचारेण संपादितम्" इति॥

भा०–"अब चतुर्थ दिन में षोडशी (याग) होता है। उस षोडशी का बड़ा विचार है। (इन्द्रश्च) यहां से आरम्भ करके निदानकृत् ने बड़ा विचार किया है। ३४ अक्षर 'स्तुत' कहाते हैं। तदनुसार 'प्रवह' इत्यादि उपसर्गाक्षर निरूपित किये हैं। इस प्रकार प्रत्येक ऋचा के पहले ३ तीन पादों में पादान्त के उपसर्गाक्षर होते हैं। यह विवरणकार का मत है। तथा च–

१–ऋचा में–प्र व ह, ह रि ह, म ति र्न–ये ९। २ में–न व्यं न, दि वो न, स्व३ र्न–ये ९। और ३ में–मि त्रो न, य ति र्न, भृ गु र्न–ये ९ तथा प्रथम ऋचा के चतुर्थ पाद के आरम्भ में–म धो ३ श्च का न–ये ७ सब मिलकर ३४ उपसर्गाऽक्षर हुवे। इस में–स्व३र्न, मधो ३:– इन दोनों में ३ मात्रा के प्लुत को दो अक्षर गिन कर बड़े विचार (क्लिष्ट कल्पना) से ३४ की गिनती पूरी होती है॥"

अथ तृतीयतृचे प्रथमा–

१ २ ३१ ३ २३१२ ३१२ १२ ३१ २
इन्द्र जुषस्व प्रवहायाहि शूर हरिह। पिबा सुतस्य
३ १२ २र ३ २३ २१२
मतिर्न मधोश्चकानश्चारुर्मदाय॥ १॥ (९५२)

पदपाठः–इन्द्र सं०। जुषस्व, प्रवह, आयाहि क्रि०। हरिह, शूर सं०। पिब क्रि०। सुतस्य ६। मतिः १। न अ०। मधोः ६। चकानः, चारुः १। मदाय ४॥

अन्वितपदार्थः–(इन्द्र) हे राजन्! (हरिह) हरीणां चौ-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रादिदस्यूनां हन्तः ! (शूर) वीर ! (सुतस्य) अभिषुतस्य (मधोः) मधुनः सोमस्य (मदाय) हर्षाय (चकानः) तृप्तिकामस्त्वम् (चारुः) शोभनः सन् (जुषस्व) सेवनं कुरु (पिब) पानं कुरु । (आयाहि) प्राप्नुहि (प्रवह) शत्रुषु यानं कुरु । दृष्टान्तः–(मतिर्न)यथा सोमपानेन मतिर्बुद्धिरायाति चारुर्भवति च तद्वत्॥१॥

भाषार्थः–(इन्द्र) हे राजन् ! (अरिह) हे दस्युनाशन ! (शूर) हे वीर ! (सुतस्य) अभिषव किये हुवे (मधोः) सोम का (मदाय) हर्ष के लिये (चकानः) तृप्ति चाहते हुवे (चारुः) शोभन आप (जुषस्व) सेवन करें (पिब) उस का पान करें (आयाहि) प्राप्त हों और (प्रवह) शत्रुओं पर चढ़ाई करें । दृष्टान्तः–(न) जैसे (मतिः) बुद्धि सोमपान से प्राप्त होती और शोभन होती है तद्वत् ॥ १ ॥

अथ द्वितीया–

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३ २
इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न ।
३ २ ३ २ ३ २ १ २ ३ १ २ ३ १ २
अस्य सुतस्य स्वाऽ३ऽर्नोप त्वा मदाः सुवाचो अस्थुः॥२॥(१५३)

पदपाठः–इन्द्र सं० । जठरम्, नव्यम् २ । न अ० । पृणस्व क्रि० । मधोः, दिवः ६ । न । अस्य, सुतस्य ६ । स्वः, न, उप अ० । त्वा २ । मदाः, सुवाचः १ । अस्थुः क्रि० ॥

अन्वितपदार्थः–(इन्द्र) हे राजन् ! (दिवः) स्वर्गस्य (न) इव (सुतस्य) अभिषुतस्य (अस्य मधोः) सोमस्य (सुवाचः) (मदाः) हर्षाः (त्वा) त्वाम् (उपाऽस्थुः) उपतिष्ठन्तु तेन च (स्वर्न) देवस्येव स्वस्य (जठरम्) उदरं (नव्यं न) अपूर्वमिव (पृणस्व) पूरयस्व ॥ २ ॥

भाषार्थः–(इन्द्र) हे राजन् ! (दिवः) स्वर्ग के (न) तुल्य (सुतस्य) अभिषव किये हुवे (अस्य) इस (मधोः) सोम के (सुवाचः) सुन्दर वाणी-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युक्त (मदाः) हर्ष (त्वा) तुम को (उपाऽस्थुः) उपस्थित हों और तुम उस से (स्वर्ण) देवतुल्य अपने (जठरम्) उदर को (नव्यं न) अपूर्वसा (पृणस्व) भरो । अर्थात् अनोखी तृप्ति करो ॥ २ ॥

अथ तृतीया–

१ २ ३ २ ३ २उ ३ १ २ ३ २उ ३ २
इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न ।
१ १ २ ३ २उ ३ १ २ ३ २उ ३ २ ३ १ २
बिभेद बलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥३॥[२२](९५४)

पदपाठः–इन्द्रः, तुराषाट्, मित्रः १ । न अ० । जघान क्रि० । वृत्रम् २ । यतिः १ । न । बिभेद क्रि० । बलम् २ । भृगुः १ । न । ससाहे क्रि० । शत्रून् २ । मदे ७ । सोमस्य ६ ॥

अन्वितपदार्थः–(मित्रः न) मित्रमिव हितकरः (यतिः न) संन्यासीव निष्पक्षः (भृगुः न) सूर्यकिरण इव तेजस्वी (तुराषाट्) त्वरया शत्रूणामभिभावुकः (इन्द्रः) राजा (सोमस्य मदे) सोमपानजनिते हर्षे जाते सति (वृत्रम्) आवरकं दस्युं (जघान) हन्ति (बलम्) परसैन्यं (बिभेद) भिनत्ति (शत्रून्) (ससाहे) अभिभवति ॥ ३ ॥

इति तृतीयप्रपाठके प्रथमोऽर्धप्रपाठकः

इति पञ्चमाऽध्याये सप्तमः खण्डः ॥ ७ ॥

इति श्रीमत्कण्ववंशाऽवतंस पं० हजारीजालस्वामिसूनुना, हस्तिनापुर पार्श्ववर्त्ति, परीक्षितगढ़निवासिना तुलसीरामस्वामिना कृते सामवेदभाष्ये उत्तरार्चिके पञ्चमोऽध्यायः ॥ ५ ॥

चतुर्थमहः परिसमाप्तमिति विवरणकारः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(मित्रः न) मित्र के समान सर्वहितकारी, (यतिः न) संन्यासी सा निष्पक्ष, (भृगुः न) सूर्यकिरण सा तेजस्वी (तुराषाट्) शीघ्र शत्रुओं का तिरस्कर्त्ता (इन्द्रः) राजा (सोमस्य) सोम के (मदे) हर्ष में (वृत्रम्) मार्गावरोधी डाकु को (जघान) मारता और (बलम्) शत्रुसेना को (विभेद) छिन्न भिन्न करता तथा (शत्रून्) शत्रुओं को (ससाहे) तिरस्कृत करता है ॥ ३ ॥

यह ऋषववंशावतंस श्रीयुत पं० हज़ारीलाल स्वामी के पुत्र
परीक्षितगढ़ (ज़िला—मेरठ) निवासी
तुलसीराम स्वामिकृत
उत्तरार्धिक सामवेदभाष्य में पांचवां अध्याय समाप्त हुवा ॥ ५ ॥
"चतुर्थ दिन समाप्त हुवा"
यह लिखनेवाले का मत है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ षष्ठोऽध्यायः

अथ तृतीयप्रपाठके द्वितीयोऽर्धप्रपाठकः

" इदानीं पञ्चममहरुच्यते " इति विवरणकारः

तत्र प्रथमखण्डे प्रथमतृचस्य-त्रय ऋषिगणः । पवमानः सोमो देवता । जगती छन्दः ॥ तत्र प्रथमा-

३ १ २ ३ १ २ ३ १ २३ १ २ ३ १२३१ २ २
गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधाइन्दो भुवनेष्वर्पितः । त्वꣳ
३ १ २ ३ २३ ३ २३१२३१र २र
सुवीरोआसि सोम विश्ववित्तं त्वा नर उपगिरेम आसते ॥१॥(९५५)

पदपाठः-गोवित् १ । पवस्व क्रि० । वसुवित्, हिरण्यवित्, रेतोधाः १ । इन्दो सं० । भुवनेषु ७ । अर्पितः, त्वम्, सुवीरः १ । असि क्रि० । सोम सं० । विश्ववित् १ । तम्, त्वा २ । नरः १ । उप अ० । गिरा ३ । इमे १ । आसते क्रि० ॥

अन्वितपदार्थः-(इन्दो) परमैश्वर्यवन् ! (सोम) शान्ताऽमृतस्वरूप ! परमात्मन् ! (त्वं) (वसुवित्) धनस्य लम्भकः, (हिरण्यवित्) तेजस्वी तेजःप्रदाता च, (रेतोधाः) बलस्य वीर्यस्य च धारकः, (भुवनेषु अर्पितः) सर्वव्यापकः, (सुवीरः) शोभनो वीरः (विश्ववित्) सर्वज्ञः (असि) भवसि (तं त्वा) त्वाम् (इमे नरः गिरा उपाऽऽसते) स त्वं (पवस्व) अस्मान्पावय ॥

ऋग्वेदे तु ९ । ८६ । ३९ नरः=विप्राः इति पाठः ॥१॥

भाषार्थः-(इन्दो) परमैश्वर्यवन् ! (सोम) शान्ताऽमृतस्वरूप ! परमात्मन् ! (त्वम्) आप (वसुवित्) धनवान् और धनदाता, (हिरण्यवित्) तेजस्वी और तेजोदाता, (रेतोधाः) बल वीर्य के धाता, (भुवनेषु)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लोक लोकान्तरों में (अर्पितः) ओतप्रोत व्यापक, (क्षुधीरः) अत्यन्त बली और (विश्ववित्) सर्वज्ञ (असि) हैं (तम्) उस (त्वा) आप को (इमे) ये (नरः) मनुष्य (गिरा) वाणी द्वारा स्तुति से (उपाऽऽसते) उपासना करते हैं (पवस्व) हमें पवित्र कीजिये ॥ ऋ० ९ । ८६ । ३९ का पाठभेद संस्कृत भाष्य में देखिये ॥ १ ॥

अथ द्वितीया–

२ ३१२ ३ २३ १२ २१र २र १ २

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ताविधावसि । स नः

३१२३ १२ ३१ २ ३ १२ ३१२

पवस्व वसुमद्धिरण्यवद्वयꣳ स्याम भुवनेषु जीवसे ॥२॥ (९५६)

पदपाठः–त्वम्, नृचक्षाः १ । असि क्रि० । सोम सं० । विश्वतः अ० । पवमान, वृषभ सं० । ताः २ । विधावसि क्रि० । सः १ । नः ४ । पवस्व क्रि० । वसुमत्, हिरण्यवत् २ । वयम् १ । स्याम क्रि० । भुवनेषु ७ । जीवसे अ० ॥

अन्वितपदार्थः–(सोम) शान्ताऽमृतस्वरूप ! (पवमान) शोधक ! (वृषभ) कामानां वर्षक ! (त्वं) (विश्वतः) सर्वतः (नृचक्षाः) नृणां साक्षी (असि) भवसि (ताः) प्रजाः (विधावसि) सर्वगत्वात्सर्वत्र प्राप्नोषि (सः) स त्वम् (नः) अस्मभ्यं (वसुमत्) धनधान्ययुक्तं (हिरण्यवत्) तेजोयुक्तमैश्वर्यं (पवस्व) वर्षय । येन (वयम्) (भुवनेषु) लोकेषु (जीवसे) जीवितुं (स्याम) प्रभवेम ॥ ऋग्वेदे १ । ८६ । ३८ ऽपि ॥२॥

भाषार्थः–(सोम) हे शान्ताऽमृतस्वरूप ! (पवमान) पवित्रकारक ! (वृषभ) सब कामनाओं के पूरक ! (त्वम्) आप (विश्वतः) सब ओर से (नृचक्षाः) मनुष्यों के साक्षी (असि) हैं (ताः) उन प्रजाओं को (विधावसि) सर्वग होने से सर्वत्र प्राप्त हैं (सः) वह आप (नः) हमारे लिये (वसुमत्) धन धान्ययुक्त (हिरण्यवत्) तेजोयुक्त ऐश्वर्य की (पवस्व) वर्षा कीजिये जिस से (वयम्) हम (भुवनेषु) संसार में (जीवसे) जीवन के लिये (स्याम) समर्थ हों ॥ ऋ० ९ । ८६ । ३८ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ २ ३१२ २१ ३ १ २ ३ १ २ ३१२ ३१ २१
ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
१ २ ३ १२ ३२३३ १२३१ २ ३१२
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥
॥ ३ ॥ [१] (९५७)

पदपाठः—ईशानः १ । इमा, भुवनानि २ । ईयसे क्रि० । युजानः १ । इन्दो सं० । हरितः, सुपर्ण्यः २ । ताः १ । ते ६ । क्षरन्तु क्रि० । मधुमत्, घृतम्, पयः २ । तव ६ । व्रते ७ । सोम सं० । तिष्ठन्तु क्रि० । कृष्टयः १ ॥

अन्वितपदार्थः—(इन्दो) परमेश्वर ! (सोम) शान्ताऽमृतस्वरूप ! त्वम् (ईशानः) वशे कुर्वाणःसन् (इमा) इमानि (भुवनानि) (ईयसे) संगच्छसे (हरितः) हरितादिविविधवर्णाः (सुपर्ण्यः) सुपतनाः सूर्यचन्द्रादिदीधितीः (युजानः) युक्ताः कुर्वाणोऽसि । (ते) तव स्वामिनः (ताः) स्वभूता दीधितयः (मधुमत्) मधुररसोपेतं (घृतम्) घृतवत्पुष्टिजनकं (पयः) जलं (क्षरन्तु) वर्षन्तु (कृष्टयः) मनुष्याः (तव व्रते) त्वदीयनियमे (तिष्ठन्तु) ॥ ऋग्वेदे तु १।८६।३६ ईयसे = वीयसे इति पाठः ॥८॥

भाषार्थः—(इन्दो) परमेश्वर ! (सोम) शान्ताऽमृतस्वरूप ! आप (ईशानः) वश में करते हुवे (इमा) इन (भुवनानि) भुवनों को (ईयसे) सम्यक् प्राप्त हैं (हरितः) हरितादि विविध रङ्ग वाली (सुपर्ण्यः) सुन्दर पतन वाली सूर्य चन्द्रादि किरणों को (युजानः) युक्त करते हुवे हैं । (ते) आप [स्वामी] की (ताः) स्वभूत [निलक्षियत] वे किरणें (मधुमत्) मधुर रस युक्त (घृतम्) घृतवत् पुष्टिकारक (पयः) जल को (क्षरन्तु) वर्षावें और (कृष्टयः) मनुष्य (तव) आप के (व्रते) नियम में (तिष्ठन्तु) ठहरें ॥ ऋ० ९ । ८६ । ३६ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ द्वितीय सूक्तस्य—काश्यपऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३ २ ३ १२
पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।
१२ ३ २३ १२
सूर्यस्येव न रश्मयः ॥ १ ॥ (९५८)

पदपाठः—पवमानस्य ६ । विश्ववित् सं० । प्र अ० । ते ६ । सर्गाः १ । असृक्षत क्रि० । सूर्यस्येव, न अ० । रश्मयः १ ॥

अन्वितपदार्थः—(विश्ववित्) हे सर्वज्ञेश्वर ! (पवमानस्य) पवित्रतां कुर्वाणस्य (ते) तव (सर्गाः) वैदिकर्ग्रूपिण्यो धाराः (प्राऽसृक्षत) प्रादुर्भवन्ति । दृष्टान्तः—(न) यथा (सूर्यस्येव रश्मयः) प्रादुर्भवन्ति तद्वत् ॥

यथा सूर्यस्य रश्मयः प्रादुर्भूतास्तमो निवार्य मनुष्यादिप्राणिवर्गस्य चक्षुःसाहाय्यं कुर्वन्ति तथैव परमेश्वरस्येमे वेदा अपि प्रादुर्भूता मनुष्याणां बुद्धेः साहाय्यं संपादयन्तीत्यर्थः ॥ ऋग्वेदे ९ । ६४ । ७ ऽपि ॥ १ ॥

भावार्थः—(विश्ववित्) हे सर्वज्ञेश्वर ! (पवमानस्य) पवित्र करते हुवे (ते) आप की (सर्गाः) वैदिक ऋचा रूपिणी धारायें (प्राऽसृक्षत) ऐसे छूटती हैं (न) जैसे (सूर्यस्येव रश्मयः) सूर्य की किरणें ॥

जैसे सूर्यकिरणें उदय होकर मनुष्यादि प्राणियों की आंखों को सहायता देती हैं, वैसे ही परमात्मा से वेद प्रकट होकर मनुष्यों की बुद्धियों को सन्मार्ग में प्रवृत्त करते हैं ॥ ऋ० ९ । ६४ । ७ में भी ॥ १ ॥

अथ द्वितीया—

३२ ३ २ ३२उ ३ १ २ ३१ २
केतुं कृण्वन्दिवस्परि विश्वा रूपाऽभ्यर्षसि ।
३ १ २
समुद्रःसोम पिन्वसे ॥ २ ॥ (९५९)

पदपाठः—केतुम् २ । कृण्वन् १ । दिवः ६ । परि अ० । विश्वा, रूपा २ । अभ्यर्षसि क्रि० । समुद्रः १ । सोम सं० । पिन्वसे क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(सोम) शान्ताऽमृतस्वरूप ! परमात्मन् ! (समुद्रः) वारिधिवद्गभीरस्त्वं (केतुं) प्रज्ञानं (कृण्वन्) वेदोपदेशद्वारा कुर्वन् (दिवस्परि) अनन्ताकाशे (विश्वा) सर्वाणि (रूपा) रूपाणि (अभ्यर्षसि) पावयसि (पिन्वसे) पोषयसि च ॥

ऋग्वेदे ९ । ६४ । ८ ऽपि ॥ २ ॥

भाषार्थः—(सोम) हे शान्ताऽमृतस्वरूप ! परमात्मन् ! (समुद्रः) आप समुद्रवत् गम्भीर हैं, और (दिवस्परि) इस अनन्त आकाश में (विश्वा) सब (रूपा) रूपों को (अभ्यर्षसि) पवित्र करते हैं और (केतुम्) प्रज्ञान (कृण्वन्) करते हुवे (पिन्वसे) पोषण करते हैं ॥ ऋ० ९ । ६४ । ८ में भी ॥ २ ॥

अथ तृतीया—

३ १र २र ३ १२ ३ १ २
जज्ञानो वाचमिष्यसि पवमान विधर्मणि ।
१ २ ३ १र २र
क्रन्दन्देवो न सूर्यः ॥ ३ ॥ [२] (९६०)

पदपाठः—जज्ञानः १ । वाचम् २ । इष्यसि क्रि० । पवमान सं० । विधर्मणि ७ । क्रन्दन्, देवः १ । न अ० । सूर्यः १ ॥

अन्वितपदार्थः—(पवमान) हे पवित्रस्वरूप ! परमात्मन् ! (जज्ञानः) उदितः (देवः) द्योतमानः (सूर्यः) आदित्यः (न) इव (विधर्मणि) विधारके अन्तःकरणे (क्रन्दन्) वैदिकान्शब्दानुत्पादयन् (वाचं) वाणीम् (इष्यसि) प्रेरयसि ॥

परमात्मा सृष्ट्यारम्भे ऋषीणामन्तःकरणे वेदान्प्रकाश्य तदीयां वाचं प्रेरयति यथा प्रति प्रातःकालमुदितः सूर्यो दृशं प्रेरयति तद्वत् ॥ ऋग्वेदे तु ९ । ६४ । ९ क्रन्दन् = अक्रान्, जज्ञानः = हिन्वानः इति पाठभेदौ ॥ ३ ॥

भाषार्थः—(पवमान) हे पवित्रस्वरूप ! परमात्मन् ! (जज्ञानः सूर्यः देवः न) उदित सूर्य देव की नाईं (विधर्मणि) अन्तःकरण में (क्रन्दन्) वैदिक शब्दों को उत्पन्न करते हुवे आप (वाचम्) वाणी को (इष्यसि) प्रेरित करते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जैसे प्रातःकाल होते ही उदित सूर्य प्रकाश फैलाता है, इसी प्रकार परमात्मा सृष्ट्यारम्भ होते ही ऋषियों के पवित्र अन्तःकरण में वेदोपदेश करके उन की वाणी को प्रेरित करता है ॥ ऋ० ९ । ६४ । ९ के पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

प्रसोमास इति सप्तर्चस्य तृतीयसूक्तस्य–असितः काश्यपो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः । तत्र प्रथमा–

१२ २२ ३ १२ ३ १२

प्र सोमासो अधन्विषुः पवमानास इन्दवः ।

३ २ ३ १ २

श्रीणाना अप्सु वृञ्जते ॥ १ ॥ (९६१)

पदपाठः–प्र अ० । सोमासः १ । अधन्विषुः क्रि० । पवमानासः, इन्दवः, श्रीणानाः १ । अप्सु ७ । वृञ्जते क्रि० ॥

अन्वितपदार्थः–(पवमानासः) पवित्रस्वरूपाः (इन्दवः) दीप्ताः (सोमासः) सोमाः (प्राऽधन्विषुः) प्रधन्वन्ति प्रगच्छन्ति दिवम् निघं० २ । १४ तथा (श्रीणानाः) सूर्यकिरणैः पच्यमानाः (अप्सु) मेघावयवस्थेषु जलेषु (वृञ्जते) गच्छन्ति ॥ ऋग्वेदे तु ९ । २४ । १ मृञ्जतइत्यन्तरम् ॥ १ ॥

भाषार्थः–(पवमानासः) पवित्र (इन्दवः) प्रकाशमान (सोमासः) सोम (प्राऽधन्विषुः) आकाश को जाते तथा (श्रीणानाः) सूर्यकिरणों से पकते हुवे (अप्सु) मेघस्थित जलों में (वृञ्जते) चले जाते हैं ॥

ऋ० ९ । २४ । १ का पाठान्तर संस्कृत भाष्य में देखिये ॥ १ ॥

अथ द्वितीया–

३ १२ २२ ३ २ ३ २ ३ १ २ ३ २

अभि गावो अधन्विषुरापो न प्रवता यतीः ।

३ १२ २२

पुनाना इन्द्रमाशत ॥ २ ॥ (९६२)

पदपाठः–अभि अ० । गावः १ । अधन्विषुः क्रि० । आपः १ । न अ० । प्रवता ३ । यतीः, पुनानाः १ । इन्द्रम् २ । आशत क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(गावः) किरणपरिणताः (इन्दवः) सोमाः (अभि अधन्विषुः) सर्वतः प्रसरन्ति (पुनानाः) पूतीकुर्वाणाः (इन्द्रम्) सूर्यं मेघराजं वा (आशत) व्याप्नुवन्ति (प्रवता) प्रवणवतादेशेन (यतीः) गच्छन्त्यः (आपः) (न) इव ॥ ऋग्वेदे ९ । २४ । २ ऽपि ॥ २ ॥

भाषार्थः—(गावः) किरणों में परिणत (इन्दवः) आर्द्र सोम (अभि अधन्विषुः) सब ओर फैलते हैं और (पुनानाः) पवित्र करते हुवे (इन्द्रम्) सूर्य वा मेघराज को (आशत) व्याप जाते हैं। (न) जैसे (प्रवता) नीचान के देश से (यतीः) जाते हुवे (आपः) जल ॥ ऋ० ९ । २४ । २ में भी ॥२॥

अथ तृतीया—

१ २ ३ १र २र३ १ २
प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
१ २३१र २र
नृभिर्यतो विनीयसे ॥ ३ ॥ (९६३)

पदपाठः—प्र अ० । पवमान सं० । धन्वसि क्रि० । सोम सं० । इन्द्राय ४ । मादनः १ । नृभिः ३ । यतः १ । विनीयसे क्रि० ॥

अन्वितपदार्थः—(पवमान) शोध्यमान ! (सोम) ओषधिराज ! (नृभिः) नेतृभिर्ऋत्विग्भिः (यतः) नियतीकृतः (विनीयसे) यदाग्नौ नीयसे तदा (मादनः) हृष्टिकरः सन् (इन्द्राय) मेघराजाय सूर्याय वा (प्रधन्वसि) प्रगच्छसि ॥ ऋग्वेदे तु ९ । २४ । ३ मादनः=पातवे इति पाठः ॥३॥

भाषार्थः—(पवमान) शोध्यमान! (सोम) सोम ! (नृभिः) कर्मकाण्ड के नायकों से (यतः) नियत किया हुआ जब (विनीयसे) अग्नि में होमा जाता है तब (मादनः) हृष्टिकारक हुवा (इन्द्राय) मेघराज वा सूर्य के लिये (प्रधन्वसि) उच्चता से जाता है ॥ ऋ० ९ । २४ । ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥३॥

अथ चतुर्थी—

२ ३ १र २र ३ २ ३ १ २ ३ १ २
इन्दो यदद्रिभिः सुतः पवित्रं पर्यिषायसे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १ २ ३ १ २
अरमिन्द्रस्य धाम्ने ॥ ४ ॥ (९६४)

पदपाठः-इन्दो सं० । यत् अ० । अद्रिभिः ३ । सुतः १ । पवित्रम् २ । परि अ० । दीयसे क्रि० । अरम् अ० । इन्द्रस्य ६ । धाम्ने ४ ॥

अन्वितपदार्थः—(इन्दो) सोम ! (यत्) यदा (अद्रिभिः) मेघैः (सुतः) आत्मन्यभिषुतः (पवित्रं) पावनं यथा स्यात्तथा (परि) सर्वतः (दीयसे) अर्प्यसे तदा (इन्द्रस्य) वृष्टिकर्त्तुः (धाम्ने) पदाय (अरम्) अलं पर्याप्तोऽसि ॥

ऋग्वेदे तु ९ । २४ । ४ परिधावसि इति पाठः ॥ ४ ॥

भाषार्थः-(इन्दो) सोम ! (यत्) जब (अद्रिभिः) मेघों से (सुतः) आपे में अभिषुत किया हुआ (पवित्रम्) पवित्रतापूर्वक (परि) सब ओर (दीयसे) अर्पित होता है तब (इन्द्रस्य) वृष्टिकर्त्ता के (धाम्ने) धारणार्थ (अरम्) पर्याप्त होता है ॥ ऋ० ९ । २४ । ४ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ४ ॥

अथ पञ्चमी—

१ २ ३ १ २ ३ १२ ३ १ २
त्वꣳ सोम नृमादनः पवस्व चर्षणीधृतिः ।
२ ३ १ २ ३ १ २
सस्निर्यो अनुमाद्यः ॥ ५ ॥ (९६५)

पदपाठः-त्वम् १। सोम सं० । नृमादनः १ । पवस्व क्रि० । चर्षणीधृतिः, सस्निः, यः, अनुमाद्यः १ ॥

अन्वितपदार्थः— (यः)(सस्निः) शुद्धः (अनुमाद्यः) प्रशस्यः (चर्षणीधृतिः) मनुष्यैर्धृतः (नृमादनः) नृणां हृष्टिकरोऽसि (सोम) (त्वम्)स त्वम् (पवस्व) पवित्रतां संपादय ॥ ऋग्वेदे तु ९ । २४ । ५ चर्षणीमहे इत्यन्तरम् ॥५॥

भाषार्थः-(यः) जो (सस्निः) शुद्ध (अनुमाद्यः) प्रशंसनीय (चर्षणीधृतिः) मनुष्यों से धारण किया हुआ (नृमादनः) नरों का हृष्टिकारक होता है (सोम) सोम ! (त्वम्) सो तू (पवस्व) पवित्रता कर ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋ० ९ । २४ । ५ का पाठभेद संस्कृत भाष्य में देखिये ॥ ५ ॥

अथ षष्ठी–

१ २ ३ १ २ ३ १ २ ३ १ २
पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः ।
१ २ ३ १ २ २ २
शुचिः पावको अद्भुतः ॥ ६ ॥ (१६६)

पदपाठः–पवस्व क्रि० । वृत्रहन्तमः १ । उक्थेभिः ३ । अनुमाद्यः, शुचिः, पावकः, अद्भुतः १ ॥

अन्वितपदार्थः–(वृत्रहन्तमः) अतिशयेन वृत्राणां मेघानामुच्छिद्य वर्षकः (उक्थेभिः) वैदिकस्तोत्रैः (अनुमाद्यः) प्रशंसनीयः (शुचिः) स्वयं शुद्धः (पावकः) अन्येषां शोधकः (अद्भुतः) आश्चर्यबलः सोमः (पवस्व) पवित्रतां संपादयतु ॥ ऋग्वेदे ९ । २४ । ६ ऽपि ॥६॥

भाषार्थः–(वृत्रहन्तमः) मेघों का अतिशय वर्षाने वाला (उक्थेभिः) वेदमन्त्रों से (अनुमाद्यः) प्रशंसनीय (शुचिः) स्वयं शुद्ध तथा (पावकः) अन्यों का शोधक (अद्भुतः) आश्चर्यकारक बलयुक्त सोम (पवस्व) पवित्रता करे ॥ ऋ० ९ । २४ । ६ में भी ॥ ६ ॥

अथ सप्तमी–

१ २ ३ १ २ ३ १ २ ३ १ २ २
शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।
३ १ २ ३ २
देवावीरघशंसहा ॥ ७ ॥ [३] (१६७)

पदपाठः–शुचिः, पावकः १ । उच्यते क्रि० । सोमः, सुतः, सः, मधुमान्, देवावीः, अघशंसहा १ ॥

अन्वितपदार्थः–(सः) पूर्वोक्तः (शुचिः) शुद्धः (पावकः) शोधकः(सोमः) ओषधिराजः (मधुमान्) माधुर्यापेतः (सुतः) अभिषुतः (देवावीः) देवानां वाय्वादीनां तर्पयिता (अघशंसहा)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दुष्टरोगादिशत्रुहन्ता (उच्यते) कथ्यते ॥ ऋग्वेदे तु ९ । २४ । ७ सुतस्य मधवः इति पाठः ॥७॥

भाषार्थः—(सः) वह (शुचिः) स्वयं शुद्ध तथा (पावकः) अन्यों का शोधक (सोमः) सोम (मधुमान्) मधुरता युक्त (सुतः) अभिषुत किया हुआ (देवावीः) वायुआदि देवों की तृप्ति का कर्त्ता (अघशंसहा) दुष्टरोगादि शत्रुविनाशक (उच्यते) कहाता है ॥ ऋ० ९ । २४ । ७ का पाठ संस्कृत भाष्य में देखिये ॥

अथ द्वितीयखण्डे सप्तर्चस्य प्रथमसूक्तस्य—ऋष्यादयः पूर्ववत् ॥

तत्र प्रथमा—

२ ३ २ ३ १ २ ३ २ ३ १ २

प्र कविर्देववीतयेऽव्या वारेभिरव्यत ।

३ १ २र ३ १र २र

साह्वान्विश्वा अभिस्पृधः ॥१॥ (९६८)

पदपाठः—प्र अ० । कविः १ । देववीतये ४ । अव्या, वारेभिः ३ । अव्यत क्रि० । साह्वान् १ । विश्वाः २ । अभि अ० । स्पृधः २ ॥

अन्वितपदार्थः—(देववीतये) देवानां पानाय (कविः) मेधोद्बोधकः सोमः (अव्या) अविभवैरूर्णामयैः (वारेभिः) दशापवित्रैः (प्राऽव्यत) प्राप्यते । स हि (विश्वाः) सर्वाः (स्पृधः) शत्रुसेनाः (अभि) आभिमुख्येन (साह्वान्) साढा ॥ ऋग्वेदे तु ९ । २० । १ अव्योवारेभिर्षति इति पाठः ॥१॥

भाषार्थः—(देववीतये) देवों के पानार्थ (कविः) बुद्धितत्त्वयुक्त सोम (अव्या) ऊनी (वारेभिः) दशापवित्रों से (प्राऽव्यत) प्राप्त होता और (विश्वाः) सब (स्पृधः) शत्रुसेनाओं को (अभि) सामना करके (साह्वान्) दबाने वाला है ॥ ऋ० ९ । २० । १ का पाठभेद संस्कृत भाष्य में देखिये ॥१॥

अथ द्वितीया—

१र २र ३ २ ३ २उ ३ १ २ ३ १ २

स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३१२
पवमानः सहस्रिणम् ॥ २ ॥ (९६१)

पदपाठः–सः १ । हि,स्म अ० । जरितृभ्यः ४ । आ अ० । वाजम्, गोमन्तम् २ । इन्वति क्रि० । पवमानः १ । सहस्रिणम् २ ॥

अन्वितपदार्थः–(सः हि स्म) स खलु (पवमानः) सोमः (जरितृभ्यः) स्तोत्रादिभ्य ऋत्विग्भ्यो यजमानेभ्यश्च (गोमन्तम्) गवादिपशुयुक्तं (सहस्रिणम्) बहु (वाजम्) धनं धान्यं च (आ–इन्वति) सर्वतः प्रयच्छति ॥ ऋग्वेदे तु ९।२०।२ऽपि ॥२॥

भाषार्थः–(सः हि स्म) वही (पवमानः) सोम (जरितृभ्यः) स्तोता आदि ऋत्विजों और यजमानों के लिये (गोमन्तम्) गौ आदि पशुयुक्त (सहस्रिणम्) बहुत सा (वाजम्) धन धान्य (आ इन्वति) देता है ॥ ऋ०९ । २० । २ में भी ॥ २ ॥

अथ तृतीया–

२३ १२३ १२ ३२३१२ ३२
परि विश्वानि चेतसा मृज्यसे पवसे मती ।
१२ ३१२
स नः सोम श्रवो विदः ॥ ३ ॥ (९७०)

पदपाठः–परि अ० । विश्वानि २ । चेतसा ३ । मृज्यसे,पवसे क्रि० । मती ३ । सः १ । नः ४ । सोम सं० । श्रवः २ । विदः क्रि० ॥

अन्वितपदार्थः–(सोम)ओषधिराज ! त्वमस्माभिः (मत्या) बुद्ध्या (चेतसा) चित्तेन (मृज्यसे) शोध्यसे (सः) स त्वं (नः) अस्मभ्यं (श्रवः) अन्नं (विदः) लम्भयसि (पवसे) पावयसि च ॥ ऋग्वेदे तु९। २०।३ मृशसे इति पाठभेदः ॥ ३ ॥

भाषार्थः–(सोम) सोम ! तू हम से (मती) बुद्धि और (चेतसा) चित्त लगा कर (मृज्यसे) शोधा जाता है (सः) वह तू (नः) हमारे लिये (श्रवः) अन्न (विदः) प्राप्त कराता और (पवसे) पवित्रता करता है ॥

जो लोग जी से सोमयाग शुद्धिपूर्वक करते हैं,उन को शुद्धि होती और अन्नादि का लाभ होता है । शुद्धि बड़ी वस्तु है जिस के विना मनुष्यों के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राण भी वचने कठिन होते हैं ॥ ऋ० ९ । २० । ३ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थी–

३क २र ३ ११र २र ३१२ ३२ ३२
अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवꣳ रयिम् ।
१२ ३२ ३ १२
इषꣳ स्तोतृभ्य आभर ॥ ४ ॥ (९७१)

पदपाठः–अभ्यर्ष क्रि० । बृहत्, यशः २ । मघवद्भ्यः ४ । ध्रुवम्, रयिम्, इषम् २ । स्तोतृभ्यः ४ । आभर क्रि० ॥

अन्वितपदार्थः–सोम ! इत्यनुवर्त्तते । (मघवद्भ्यः) मखवद्भ्यः (स्तोतृभ्यः) यज्ञानुष्ठातृभ्यः (बृहत्) महत् (यशः), (ध्रुवम्) स्थिरं (रयिम्) धनञ्च (अभ्यर्ष) अभितः प्रापय (इषम्) अन्नं च (आभर) ॥ ऋग्वेदे ९।२०।४ऽपि ॥ ४ ॥

भाषार्थः–सोम ! (मघवद्भ्यः) यज्ञकर्त्ता (स्तोतृभ्यः) स्तोता आदि ऋत्विजों के लिये (बृहत्) बड़ा (यशः) यश और (ध्रुवम्) स्थिर (रयिम्) धन (अभ्यर्ष) प्राप्त करा और (इषम्) अन्न (आभर) दे ॥ ऋ०९।२०।४ में भी ॥४॥

अथ पञ्चमी–

१ २र ३१र २र २१२
त्वं राजेव सुव्रतो गिरः सोमाविवेशिथ ।
३ १ २
पुनानो वह्ने अद्भुत ॥ ५ ॥ (९७२)

पदपाठः–त्वम् १ । राजेव अ० । सुव्रतः १ । गिरः २ । सोम सं० । आविवेशिथ क्रि० । पुनानः १ । वह्ने, अद्भुत सं० ॥

अन्वितपदार्थः–(वह्ने) यज्ञस्य वोढः ! (अद्भुत) आश्चर्यकर ! (सोम) ओषधिराज ! (त्वम्) (राजेव) नृप इव (सुव्रतः) शोभनकर्मा (पुनानः) शुद्धिं कुर्वाणः (गिरः) वाचः (आविवेशिथ) प्रविशसि, प्रशंसानुकूलो जायसे ॥ ऋग्वेदे ९।२०।५ऽपि ॥ ५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(वह्ने) यज्ञ के पहुंचाने वाले ! (अद्भुत) आश्चर्यरूप! (सोम) सोम ! (त्वम्) तू (राजेव) राजा के समान (सुव्रतः) सुन्दर कर्म वाला (पुनानः) शुद्धिकारक (गिरः) वाणियों को (आविवेशिथ) प्रवेश करता अर्थात् प्रशंसा के अनुकूल सम्पन्न हो जाता है ॥ ऋ० ९ । २० । ५ में भी ॥५॥

अथ षष्ठी—

१र २र३ २ ३१ २ ३ १ २ ३ १ २
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
१ २ ३ १ २
सोमश्चमूषु सीदति ॥ ६ ॥ (१७३)

पदपाठः—सः, वह्निः १ । अप्सु ७ । दुष्टरः, मृज्यमानः १ । गभस्त्योः ७ । सोमः १ । चमूषु ७ । सीदति क्रि० ॥

अन्वितपदार्थः—(सः) सोमः (वह्निः) यज्ञस्य वोढाऽस्ति (गभस्त्योः) हस्तयोः (मृज्यमानः) शोध्यमानः (अप्सु) वसतीवरीषु (दुष्टरः) दुस्तरः (चमूषु) चमसाख्येषु पात्रेषु (सीदति) तिष्ठति ॥ ऋग्वेदे ९ । २० । ६ऽपि ॥ ६ ॥

भाषार्थः—(सः) वह सोम (वह्निः) यज्ञ का नेता है (गभस्त्योः) बाहु=हाथों में (मृज्यमानः) शोधाजाता हुवा (अप्सु) वसतीवरीनामक जलों में (दुष्टरः) दुस्तर (चमूषु) चमसों में (सीदति) रक्खा जाता है ॥ ऋ० ९ । २० । ६ । में भी ॥ ६ ॥ अथ सप्तमी—

३ २ ३ १र २र ३ २ ३ १ २
क्रीडुर्मखो न मꣳहयुः पवित्रꣳसोम गच्छसि ।
१ २ ३ २ ३ १ २
दधत्स्तोत्रे सुवीर्यम् ॥ ७ ॥ [४](१७४)

पदपाठः—क्रीडुः, मखः १ । न अ० । मंहयुः १ । पवित्रम् २ । सोम सं० । गच्छसि क्रि० । दधत् १ । स्तोत्रे ४ । सुवीर्यम् २ ॥

अन्वितपदार्थः—(सोम) ! (मखो न) यज्ञइव (मंहयुः) प्रशंसनीयः (क्रीडुः) क्रीडनकृत् तत्कारकश्च (स्तोत्रे) स्तोत्रादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञानुष्ठातृभ्यः (सुवीर्यम्) (दधत्) धारयन् (पवित्रम्) दशापवित्रं (गच्छसि) ॥ ऋग्वेदे ९ । २० ।७ ऽपि ॥ आसां सप्तानामप्यृचां परमेश्वरार्थोऽप्यूहनीयः ॥ ७ ॥

भाषार्थः—(सोम) सोम ! (मखः) यज्ञ के (न) समान (मंहयुः) प्रशंसनीय (क्रीडुः) क्रीड़ा करने कराने वाला (स्तोत्रे) स्तोता आदि यज्ञानुष्ठानियों के लिये (सुवीर्यम्) सुन्दरबल (दधत) धारण कराता हुवा (पवित्रम्) दशापवित्र पर (गच्छसि) जाता है ॥ ऋ० ९ । २० । ७ में भी ॥ इन सातों ऋचाओं का परमेश्वरविषयक अर्थ भी विचार लेना चाहिये ॥७॥

अथ चतुर्ऋचस्य द्वितीय सूक्तस्य—अवत्सार ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २
यवं यवं नो अन्धसा पुष्टं पुष्टं परिस्रव ।
१ २ ३ १ २
विश्वा च सोम सौभगा ॥ १ ॥ (१७५)

पदपाठः—यवं, यवम् २ । नः ४ । अन्धसा ३ । पुष्टं,पुष्टम् २।परिस्रव क्रि० । विश्वा २ । च अ० । सोम सं० । सौभगा २ ॥

अन्वितपदार्थः—(सोम)! (नः) अस्मभ्यम् (पुष्टं पुष्टं यवं यवं) पुष्कलं रसम् । आबाधे च (८ । १ । १०) इति द्विर्भावः (अन्धसा) अन्नेन सह (विश्वा सौभगा) सर्वाणि सौभगानि (च) (परिस्रव) वर्षय ॥ ऋग्वेदे ९ । ५५ । १ ऽपि ॥ १ ॥

भाषार्थः—(सोम) सोम ! (नः) हमारे लिये (पुष्टं पुष्टं यवं यवम्) पुष्कल रस (अन्धसा) अन्न के सहित (च) और (विश्वा) सब (सौभगा) सौभाग्य (परिस्रव) वर्षाव ॥ अष्टाध्यायी ८ । १ । १० का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ५५ । १ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ २
इन्दो यथा तव स्तवो यथा ते जातमन्धसः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १ २ ३ १ २
नि बर्हिषि प्रिये सदः ॥ २ ॥ (९७६)

पदपाठः—इन्दो सं० । यथा अ० । तव ६ । स्तवः १ । यथा । ते ६ । जातम् १ । अन्धसः ६ । नि अ० । बर्हिषि, प्रिये ७ । सदः क्रि० ॥

अन्वितपदार्थः—(इन्दो) सोम ! (अन्धसः) देवान्नस्य(तव) (यथा) येन प्रकारेण (स्तवः) प्रशस्तिरस्ति (ते) त्वदीयं (यथा) (जातम्) जन्माऽस्ति तथैव (प्रिये) प्रीणयितरि (बर्हिषि) यज्ञे (नि सदः) निषीद अर्थात् वेदेषु यथारूपस्य सोमस्य प्रशंसा विहिता तथा कृत्वा यज्ञे प्रयोक्तव्यः॥ऋग्वेदे ९। ५५ । २ऽपि॥२॥

भाषार्थः—(इन्दो) सोम ! (अन्धसः) देवताओं के अन्न (तव) तेरी (यथा) जैसी (स्तवः) प्रशंसा है और (यथा) जैसा (ते) तेरा (जातम्) जन्म है वैसा ही (प्रिये) प्यारे (बर्हिषि) यज्ञ में (नि सदः) स्थित हो ॥ अर्थात् वेदों में जिस प्रकार के सोम की प्रशंसा की गई है वैसा करके यज्ञ में वर्त्तना चाहिये ॥ ऋ० ९ । ५५ । २ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २ ३ १२ २१ ३ १ २
उत नो गोविदश्ववित्पवस्व सोमान्धसा ।
३ १ २ ३ १ २
मक्षूतमेभिरहभिः ॥ ३ ॥ (९७७)

पदपाठः—उत अ० । नः ४ । गोवित्, अश्ववित् १ । पवस्व क्रि० । सोम सं० । अन्धसा ३ । मक्षूतमेभिः, अहभिः ३ ॥

अन्वितपदार्थः—(सोम) ! (उत) अपि च (नः) अस्मभ्यं (गोवित्, अश्ववित्) इन्द्रियप्रदः प्राणप्रदश्च (मक्षूतमेभिः, अहभिः) शीघ्रैर्दिनैः (अन्धसा) अन्नादिना (पवस्व) क्षर ॥

ऋग्वेदे ९ । ५५ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(सोम) सोम ! (उत) और (नः) हमारे लिये (गोवित्, अश्ववित्) इन्द्रियप्रद और प्राणप्रद (मक्षूतमेभिः अहभिः) शीघ्रतम दिनों से (अन्धसा) अन्नादि के साथ (पवस्व) वर्ष ॥ ऋ० ९ । ५५ । ३ में भी ॥३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी–

२ ३ २ ३ १२ २२३ २ १ २ ३ १ २
यो जिनाति न जीयते हन्ति शत्रूमभीत्य ।
१ २
स पवस्व सहस्रजित् ॥४॥ [५] (१७८)

पदपाठः–यः १ । जिनाति क्रि० । न अ० । जीयते, हन्ति क्रि० । शत्रुम् २ । अभीत्य क्रि० । सः १ । पवस्व क्रि० । सहस्रजित् १ ॥

अन्वितपदार्थः–(यः) (सहस्रजित्) बहूनां जेता (शत्रुम्) रोगादिकम् (अभीत्य) अभिप्राप्य (हन्ति) नाशयति (जिनाति) जयति किन्तु स्वयं (न जीयते) न पराजयते (सः) सोमः (पवस्व) पवित्रतां करोतु । ऋग्वेदे ९ । ५५ । ४ऽपि ॥ ४ ॥

भाषार्थः–(यः) जो (सहस्रजित्) बहुतों का जीतने वाला (शत्रुम्) शत्रु को (अभीत्य) घेर कर (हन्ति) मारता और (जिनाति) जीतता है किन्तु (न जीयते) हारता नहीं (सः) वह सोम (पवस्व) पवित्रता करो ॥

ऋ० ९ । ५५ । ४ में भी ॥ ४ ॥

अथ तृचस्य तृतीयसूक्तस्य–असदग्निर्ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा–

२ ३ १ २ ३ १२ २२ ३१२
यास्ते धारा मधुश्च्युतोऽस्रग्रमिन्द ऊतये ।
१ २ ३२३१ २
ताभिः पवित्रमासदः ॥ १ ॥ (१७९)

पदपाठः–याः १ । ते ६ । धाराः, मधुश्च्युतः १ । अस्रग्रम् क्रि० । इन्दो सं० । ऊतये ४ । ताभिः ३ । पवित्रम् २ । आसदः क्रि० ॥

अन्वितपदार्थः–(इन्दो) सोम ! (ऊतये) आत्मरक्षायै (ते) तव (याः) (मधुश्च्युतः) मधुररसस्य च्यावयित्र्यः (धाराः) (अस्रग्रम्) सृज्यन्ते (ताभिः) धाराभिः (पवित्रम्) दशापवित्रम् (आसदः) आसीद॥ ऋग्वेदे ९ । ६२ । ७ ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(इन्दो) सोम ! (ऊतये) अपनी रक्षा के लिये (ते) तेरी (याः) जो (मधुश्च्युतः) मधुर रस टपकाने वाली (धाराः) धारायें (असृग्रम्) छोड़ी जाती हैं (ताभिः) उन धाराओं से (पवित्रम्) दशापवित्र पर (आसदः) स्थित हो ॥ ऋ० ९ । ६२ । ७ में भी ॥ १ ॥

अथ द्वितीया—

२ ३१ २ ३ १२ ३१२ २२ ३ १ २
सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया ।
१ २ ३२ ३ २ ३ २
सीदन्नृतस्य योनिमा ॥ २ ॥ (९८०)

पदपाठः—सः १ । अर्ष क्रि० । इन्द्राय, पीतये ४ । तिरः अ० । वाराणि २ । अव्यया २ । सीदन् १ । ऋतस्य ६ । योनिम् २ । आ अ० ॥

अन्वितपदार्थः—(सः) पूर्वोक्तगुणः सोम ! (अव्यया वाराणि) ऊर्णामयदशापवित्राणि (तिरः) तिरस्कृत्य (ऋतस्य) यज्ञस्य (योनिम्) स्थानं वेदिम् (आसीदन्) सन् (इन्द्राय) इन्द्रार्थं (पीतये) पानाय (अर्ष) गच्छ ॥

ऋग्वेदे तु ९ । ६२ । ८ रोमाण्यव्यया । सीदन्योना वनेष्वा इति पाठः ॥ २ ॥

भाषार्थः—(सः) वह सोम (अव्यया) ऊर्णामय (वाराणि) दशापवित्रों को (तिरः) छोड़ कर (ऋतस्य) यज्ञ की (योनिम्) वेदी में (आसीदन्) स्थित हुवा (इन्द्राय) इन्द्र=वृष्टिकारक सूर्य वा विद्युत् के लिये (पीतये) पानार्थ (अर्ष) जावे ॥

ऋ० ९ । ६२ । ८ के पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २३ १२ ३ १ २३ १२
त्वꣳ सोम परिस्रव स्वादिष्ठो अङ्गिरोभ्यः ।
३ २ ३१र २र
वरिवोविद्घृतं पयः ॥ ३ ॥ [६] (९८१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—त्वम् १। सोम सं०। परिस्रव क्रि०। स्वादिष्ठः १। अङ्गिरोभ्यः ५। वरिवोविद् १। घृतम्, पयः २॥

अन्वितपदार्थः—(सोम) ! (त्वम् स्वादिष्ठः), (वरिवोविद्) धनधान्यादिलम्भकः (अङ्गिरोभ्यः) निघं० ५। ५ तथा निरु० ११ अ० विहितेभ्यो रविकिरणसंसृष्टेभ्यो वायुविशेषेभ्यः सकाशात् (घृतं) दीप्तं (पयः) रसं (परिस्रव) वर्षय ॥ ऋग्वेदे तु ९। ६२। ९ त्वमिन्दो इति पाठः ॥ ३ ॥

उक्तं बहिष्पवमानं त्रिणवं सौमिकं च तत्, पञ्चममहः। इदानीमाज्यानि। आग्नेयं प्रथममाज्यम् इति विवरणकारः—

भाषार्थः—(सोम) हे सोम ! (त्वम्) तू (स्वादिष्ठः) स्वादिष्ठ (वरिवोविद्) धनधान्यादि का प्रापक (अङ्गिरोभ्यः) निघं० ५। ५ और निरु० अ० ११ में कहे मध्यस्थान देवगणान्तर्गत सूर्यकिरणों से छुवे हुवे वायु विशेषों से (घृतम्) दीप्त (पयः) रस को (परिस्रव) वर्षाव ॥ ऋ० ९। ६२। ९ का पाठ भेद संस्कृतभाष्य में देखिये॥ विवरणकार कहते हैं कि बहिष्पवमान कहा गया और वह २७ वां सौमिक भी। ५ वां दिन॥ अब आज्य कहते हैं—जिन में प्रथम आग्नेय आज्य कहा जाता है—॥ ३ ॥

अथ तृतीयखण्डे प्रथमतृचस्य—अरुणोवैतहव्य ऋषिः। अग्निर्देवता। जगतीछन्दः॥ तत्र प्रथमा—

२३ १ २ ३क २र ३ २ ३ १र २ ३ १ २ २ १ ३

तव श्रियो वर्ष्यस्येव विद्युतोऽग्नेश्चिकित्र उषसामिवेतयः।

१र २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३१र २र ३ १ २

यदोषधीरभि सृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि ॥

॥ १ ॥ (१८२)

पदपाठः—तव ६। श्रियः १। वर्ष्यस्य ६। इव अ०। विद्युतः १। अग्नेः ६। चिकित्रे क्रि०। उषसाम् ६। इव। एतयः १। यत् अ०। ओषधीः २। अभि अ०। सृष्टः १। वनानि २। च, परि, स्वयम् अ०। चिनुषे क्रि०। अन्नम् २। आसनि ७॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(अग्नेः) अङ्गनादिगुणयुक्तस्य (तव) (श्रियः) रश्मिरूपाविभूतयः (चिकित्रे) प्रज्ञायन्ते। तत्र दृष्टान्तः—(वर्ष्यस्य) वर्षासु भवस्य मेघस्य (विद्युतः इव)। पुनर्दृष्टान्तः—(इव) यथा (उषसाम्) प्रभातबेलानाम् (एतयः) गमनशीलाः प्रकाशास्तद्वत्। कदेत्यत्राह—(यत्) यदा (ओषधीः) व्रीहियवाद्याः (वनानि) अरण्यानि (च) (अभि) प्रति (सृष्टः) विसृष्टो भूत्वा (स्वयम्) आत्मनैव (आसनि) आस्ये ज्वालारूपेमुखे (अन्नम्) अदनीयंस्थावरादिकं (परि चिनुषे) परितः क्षिपसि तदेत्यर्थः॥ ऋग्वेदे तु १० । ९१ । ५ चित्राश्चिकित्र उषसां न केतवः। इति द्वितीयपादः। आसनि = आस्ये इति च पाठः॥ १॥

भावार्थः—(अग्नेः) प्रकाशादि गुणयुक्त (तव) तेरी (श्रियः) किरण रूप विभूतियें (चिकित्रे) जानी जाती हैं। दृष्टान्त—(इव) जैसे (वर्ष्यस्य) वर्षा के मेघ की (विद्युतः) बिजुलियें और (इव) जैसे (उषसाम्) प्रभात बेलाओं के (एतयः) चलने वाले प्रकाश। कब ? (यत्) जब कि (ओषधीः) चावल औ आदि (च) और (वनानि) जङ्गलों के (अभि) प्रति (सृष्टः) छुट कर (स्वयम्) आप ही (आसनि) लपट रूप मुख में (अन्नम्) वृक्षादिक अन्न को (परिचिनुषे) चारों ओर से चुनता है तब॥ ऋ० १० । ९१ । ५ का पाठभेद संस्कृत भाष्य में देखिये॥ १॥

अथ द्वितीया—

१ २ ३ २उ ३ १ २ ३ २उ ३ १ २ ३ १ २ १ २

वातोपजूत इषितो वशाँ अनुतृषु यदन्नावेविषद्दितिष्ठसे। आ ते

३ २ २ ३ २ ३ १ २ ३ १ २ ३ १ २

यतन्ते रथ्योऽ३ऽयथा पृथक् शर्धाँस्यग्ने अजरस्य धक्षतः

॥ २ ॥ (९८३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-वातोपजूतः, इषितः १। वशान् २। अनु,तृषु,यत् अ०। अन्ना २। वेविषद् १। वितिष्ठसे क्रि०। आ अ०। ते ६। यतन्ते क्रि०। रथ्यः १। यथा, पृथक् अ०। शर्धांसि १। अग्ने सं०। अजरस्य, धक्षतः ६॥

अन्वितपदार्थः-(अग्ने) ! (यत्) यदा (वातोपजूतः) वायुना जुष्टः कम्पितो वा (वशान्) कान्तान्वनस्पत्यादीन् (अनु) प्रति (तृषु) क्षिप्रम् (इषितः) प्रेरितः सन् (अन्ना) अन्नानि अदनीयानि वनस्पत्यादीनि (वेविषत्) व्याप्नुवन् (विति-ष्ठसे) विविधं प्रसरसि,तदा (अजरस्य) जरारहितस्य (धक्षतः) दहतः (ते) तव (शर्धांसि) तेजांसि (यथा) (रथ्यः) रथि-नो भान्ति तद्वत् (पृथक्) अद्भुतम् (आ यतन्ते) प्रतीयन्ते ॥ ऋग्वेदे तु १०।९१।७ वातोपधूतः। अजराणि इत्यन्तरम्॥२॥

भाषार्थः-(अग्ने) अग्ने ! (यत्) जब कि (वातोपजूतः) वायु से प्रचलित हो (वशान्) प्यारे वनस्पति आदि की (अनु) ओर (तृषु) शी-घ्रता से (इषितः) प्रेरित हुआ (अन्ना) भक्षणीय वनस्पत्यादि में (वेविषत्) व्याप्त हुआ (वितिष्ठसे) इधर उधर फैलता है, तब (अजरस्य) जरारहित (धक्षतः) फूंकते हुवे के (ते) तेरे (शर्धांसि) तेज वा लपटें (यथा रथ्यः) रथी सी (पृथक्) अनोखी (आ यतन्ते) प्रतीत होती हैं ॥ ऋ० १०।९१ ७ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया-

३ २ ३१२ ३१२ ३१र २र ३१२ ३२

मेधाकारं विदथस्य प्रसाधनमग्निꣳहोतारं परिभूतरं मतिम् ।

१र २र ३१२ ३२३ ३१ २ ३ २

त्वामर्भस्य हविषः समानमित्त्वां महो वृणते नान्यन्त्वत् ॥३॥

[७] (१८४)

पदपाठः-मेधाकारम् २। विदथस्य ६। प्रसाधनम्, अग्निम्, होतारम्, परिभूतरम्, मतिम्, त्वाम् २। अर्भस्य, हविषः ६। समानम् २। इत् अ०। त्वाम् २। महः ६। वृणते क्रि०। न अ०। अन्यम् २। त्वत् ५॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(मेधाकारं) तैजसत्वाद्बुद्धिजनकं, (विदथस्य) यज्ञस्य (प्रसाधनम्) उत्कृष्टं साधनं, (होतारं) देवानामाह्वातारं, (मतिम्) मनसः प्रेरकं, (अर्भस्य) अल्पस्य (महः) महतश्च (हविषः) (समानमित्) समानमेव (परिभूतरं) दाहकं,(त्वामग्निम्) पावकं वयं वृणीमहे इति शेषः। होतार ऋत्विजो यज्ञसाधनाय (त्वत्) त्वत्तः (अन्यं न), किन्तु (त्वाम्) त्वामेव (वृणते)॥ऋग्वेदे तु १०।९१।८परिभूतमम्, इति पूर्वार्धे;तमिदर्भे हविष्या समानमित्तमिन्महे इति चोत्तरार्धेऽन्तरम् ३

भाषार्थः—(मेधाकारम्) तैजस होने से बुद्धि के उत्पादक, (मतिम्) मन के प्रेरक, (विदथस्य) यज्ञ के (प्रसाधनम्) उत्तम साधन (होतारम्) देवों को बुलाने वाले, (अर्भस्य) थोड़े और (महः) बहुत (हविषः) हव्य के (समानम्) समान (इत्) ही (परिभूतरम्) फूंकने वाले (त्वाम्) तुझ (अग्निम्) अग्नि को हम याज्ञिक वरण करते हैं, क्योंकि इस निमित्त (त्वां वृणते) लोग तुझे ही वरते हैं (त्वत्) तुझ से (अन्यम्) अन्य को (न) नहीं ॥ ऋ० १० । ९१ । ८ के पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ मैत्रावरुणमाज्यम्

अथ द्वितीय तृचस्य—उरुचक्रिरात्रेय ऋषिः । मित्रावरुणौ देवते ।
गायत्री छन्दः ॥ तत्र प्रथमा—

३ १ २ ३ १र २र ३ १ २
पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण ।
२ ३ १ २ ३ २
मित्र वꣳसि वाꣳ सुमतिम् ॥१॥ (९८५)

पदपाठः—पुरूरुणा ३=१ । चित्, हि अ० । अस्ति क्रि० । अवः १ । नूनम् अ० । वाम् ६ । वरुण, मित्र सं० । वंसि क्रि० । वाम् ६ । सुमतिम् २ ॥

अन्वितपदार्थः—(मित्र) प्राण ! (वरुण) अपान ! (वाम्) युवयोः (सुमतिम्) शोभनां मतिम् (वंसि) वनामि संभजामि (नूनम्) निश्चयेन (वाम्) युष्मत्कर्तृकम् (अवः) रक्षणम् (पुरूरुणा) अतिशयितं बहु (चित् हि अस्ति) ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राणाऽपानयोः प्रसादे सुमतीरक्षणं च लभ्यते इति भावः ॥ ऋग्वेदे ५ । ७० । १ऽपि ॥ १ ॥

भाषार्थः—(मित्र) प्राण ! (वरुण) अपान ! (वाम्) तुम्हारी दी हुई (सुमतिम्) उत्तम बुद्धि को (वंसि) मैं सेवन करूं (नूनं चित् हि) अवश्य ही अवश्य (वाम्) तुम्हारी की हुई (अवः) रक्षा (पुरूरुणा) बहुत ही बहुत (अस्ति) है ॥

अर्थात् प्राण और अपान की प्रसन्नता (अच्छेपन) में अवश्य उत्तम बुद्धि और रक्षा प्राप्त होती है ॥ ऋ० ५ । ७० । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १२ ३१ ३ १२

ता वाꣳ सम्यगद्रुह्वाणेषमश्याम धाम च ।

३१ २

वयं वां मित्रा स्याम ॥ २ ॥ (९८६)

पदपाठः—ता, वाम् ६ । सम्यक् अ० । अद्रुह्वाणा ६ । इषम् २ । अश्याम क्रि० । धाम २ । च अ० । वयम् १ । वाम् ६ । मित्रा १ । स्याम क्रि० ॥

अन्वितपदार्थः—(ता) तयोः (अद्रुह्वाणा) अद्रोग्ध्रोः (वाम्) युवयोः संबन्धि (इषम्) अन्नं (धाम) स्थानं (च) (अश्याम) प्राप्नुयाम (वयम्) (वाम्) युवयोः (मित्रा) मित्राणि (स्याम) भवेम ॥ ऋग्वेदे तु ५।७० । २ धाम च=धायसे । मित्रा=रुद्रा इति पाठौ ॥ २ ॥

भाषार्थः—(ता) उन (अद्रुह्वाणा) द्रोहरहित अनुकूल (वाम्) तुम दोनों प्राणाऽपान के प्रस्तुत (इषम्) अन्न (च) और (धाम) स्थिति को (वयम्) हम (अश्याम) प्राप्त हों और (वाम्) तुम्हारे (मित्रा) मित्र (स्याम) हों ॥ ऋ० ५ । ७० । २ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २ ३ १ २ ३ २

पातं नो मित्रा पायुभिरुत त्रायेथाꣳसुत्रात्रा ।

३ २ ३ १ २ ३ १ २

साह्याम दस्यून्तनूभिः ॥३॥ [८] (१८७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—पातम् क्रि० । नः २ । मित्रा २ । पायुभिः ३ । उत अ० । त्रायेथाम् क्रि० । सुत्रात्रा ३ । साह्याम क्रि० । दस्यून् २ । तनूभिः ३ ॥

अन्वितपदार्थः—प्राणाऽपानौ (नः) अस्मान् (मित्रा) अनुवर्त्तिनः (पायुभिः) रक्षणैः (पातम्) रक्षताम् (उत) च (सुत्रात्रा) शोभनेन पालनेन (त्रायेथाम्) त्रायेताम् (तनूभिः) देहैः (दस्यून्) दुष्टान् वयं (साह्याम) अभिभवेम ॥ ऋग्वेदे तु ५ । ७० । ३ त्रा = रुद्रा । त्रायेताम् । साह्याम = तुर्याम इति पाठाः ॥ ३ ॥

भाषार्थः—प्राण और अपान (नः) हम (मित्रा) अनुकूलवर्त्तियों को (पायुभिः) रक्षाओं से (पातम्) रक्षित करें (उत) और (सुत्रात्रा) उत्तम पालनों से (त्रायेथाम्) पालें । हम (तनूभिः) अपने बलिष्ठ शरीरों से (दस्यून्) दुष्टों को (साह्याम) दबावें ॥ ऋ० ५।७० । ३ के पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ "ऐन्द्रमाज्यम्" इति विवरणकारः ॥

तृतीय तृचस्य—कुरुस्तुतिः काण्व ऋषिः । इन्द्रो देवता । गायत्रीछन्दः ॥

तत्र प्रथमा—

३ २ ३ १ २ ३ २ ३ १र २र

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः ।

१ २ ३ २ ३ २

सोममिन्द्र चमूसुतम् ॥ १ ॥ (९८८)

पदपाठः—उत्तिष्ठन् १ । ओजसा ३ । सह, पीत्वा अ० । शिप्रे २ । अवेपयः अ० । सोमम् २ । इन्द्र सं० । चमूसुतम् २ ॥

अन्वितपदार्थः—(इन्द्र) ! वा राजन् ! त्वम् (ओजसा) बलेन (सह) (उत्तिष्ठन्) सन् (शिप्रे) हनू (अवेपयः) कम्पय किं कृत्वा (चमूसुतम्) चमसेषु सुतं सेनायां सुतमभिषुतं वा (सोमं पीत्वा) ॥ ऋग्वेदे तु ८ । ७६ । १० पीत्वीति पाठः ॥ १ ॥

भाषार्थः—विव०—कहते हैं कि आगे ऐन्द्र आज्य के मन्त्र हैं । (इन्द्र) राजन् ! वा वृष्टिकारक देव ! (चमूसुतम्) सेना वा चमसों में अभिषुत (सोमम्) सोम को (पीत्वा) पी कर (ओजसा सह) बल वीर्य के साथ (उत्तिष्ठन्) उठता हुवा (शिप्रे) ठोड़ी (अवेपयः) फड़का ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भौतिक इन्द्र के पक्ष में ठोड़ी आलंकारिक जानिये ॥ ऋ० ८ । ७६ । १० का पाठभेद संस्कृतभाष्य में देखिये ॥१॥

अथ द्वितीया—

१ २ ३ १ २ ३ १र २र

अनु त्वा रोदसी उभे स्पर्धमान मदेताम् ।

२ ३ १ २ ३ १ २

इन्द्र यद्दस्युहा भवः ॥२॥ (१९१)

पदपाठः—अनु अ० । त्वा २ । रोदसी, उभे १ । स्पर्धमान सं० । मदेताम् क्रि० । इन्द्र सं० । यत् अ० । दस्युहा १ । भवः क्रि० ।।

अन्वितपदार्थः—(स्पर्धमान) शत्रुषु स्पर्धां कुर्वाण ! (इन्द्र)! वा राजन् ! (यत्) यदा त्वं (दस्युहा) शत्रुहा (भवः) भवेः तदा (त्वामनु उभे रोदसी मदेताम्) ॥ऋग्वेदे तु ८ । ७६ । ११ स्पर्धमान मदेतां = कृष्यमाणमकृपेतामिति पाठः ॥ २ ॥

भाषार्थः—(स्पर्धमान) शत्रुओं पर स्पर्धा करते हुवे ! (इन्द्र !) वा राजन् ! (यत्) जब कि आप (दस्युहा) शत्रुनाशक (भवः) हों तब (त्वाम् अनु) आप के साथ (उभे रोदसी) पृथिवी आकाशवासी (मदेताम्) प्रसन्न हों ॥ ऋ० ८ । ७६ । ११ का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १र २र ३ १ २

वाचमष्टापदीमहं नवस्रक्तिमृतावृधम् ।

२ ३ १ २ ३क २र

इन्द्रात्परि तन्वं ममे ॥ ३ [१] (९९०)

पदपाठः—वाचम्, अष्टापदीम् २ । अहम् १ । नवस्रक्तिम्, ऋतावृधम् २। इन्द्रात् ५ । परि अ० । तन्वम् २ । ममे क्रि० ॥

अन्वितपदार्थः—(अहं) स्तोता (तन्वम्) अल्पीयसीं (वाचम्) (इन्द्रात्) राजबलात् विद्युद्बलाद्देश्वरबलात् (अष्टापदीम्) दिगुपदिक्षु प्रसृताम् वेदोपवेदेषु वा (नवस्रक्तिम्) ऊर्ध्वदिक्संख्यया नवद्वाराम्, त्रिवृत्स्तौमिकं वा (ऋतावधम्) यज्ञवर्धनीम् (परिममे) पूर्णां करोमि ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेदे तु ८ । ७६ । १२ ऋतास्पृशमिति भेदः ॥ ३ ॥

भाषार्थः—(अहम्) मैं स्तुति करने वाला (तन्वं वाचम्) थोड़ी वाणी को (इन्द्रात्) इन्द्र वा राजा से (अष्टापदीम्) ४ दिशा ४ विदिशा=८ स्थानों में फैली हुई वा ४ वेद ४ उपवेदों में मिलिक (नवस्रक्तिम्) ऊपर की दिशा में गिन कर ९ स्थानों वा द्वारों वाली वा त्रिवृत्स्तोम वाली (ऋतावृधम्) यज्ञ को बढ़ाने वाली को (परिममे) पूरी करता हूं ॥ ऋ० ८ । ७६ । १२ का पाठ भेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथैन्द्राग्नमाज्यम्—

अथ चतुर्थं तृचस्य—भरद्वाजो बार्हस्पत्य ऋषिः । इन्द्राग्नी देवते ।

गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ ३ २ १ २ ३

इन्द्राग्नी युवामिमेऽअभिस्तोमा अनूषत ।

१ २ ३ २

पिबतꣳ शंभुवा सुतम् ॥ १ ॥ (९९१)

पदपाटः—इन्द्राग्नी सं० । युवाम् २ । इमे १ । अभि अ० । स्तोमाः १ । अनूषत, पिबतम् क्रि० । शंभुवा १ । सुतम् २ ॥

अन्वितपदार्थः—(इन्द्राग्नी) सूर्याग्नी ! (युवाम्) (इमे स्तोमाः) त्रिवृत्पञ्चदशादयः (अभ्यनूषत) अभिष्टुवन्ति (शंभुवा) सुखस्य भावयितारौ इन्द्राग्नी (सुतम्) सोमं (पिबतम्) ॥

ऋग्वेदे ६ । ६० । ७ ऽपि ॥ १ ॥

भाषार्थः—(इन्द्राग्नी) सूर्य ! और अग्ने ! (युवाम्) तुम्हारी (इमे) ये (स्तोमाः) त्रिवृत् पञ्चदशादि यज्ञ स्तोत्र (अभ्यनूषत) प्रशंसा करते हैं (शंभुवा) सुख के दाता वा कर्त्ता इन्द्र और अग्नि (सुतम्) सोम को (पिबतम्) पीवें=शोषें ॥ ऋ० ६ । ६० । ७ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २

या वां सन्ति पुरुस्पृहा नियुतो दाशुषे नरा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १ २
इन्द्राग्नी ताभिरागतम् ॥ २ ॥ (९९२)

पदपाठः—याः १ । वाम् ६ । सन्ति क्रि० । पुरुस्पृहा सं० । नियुतः १ । दाशुषे ४ । नरा, इन्द्राग्नी सं० । ताभिः ३ । आगतम् क्रि० ॥

अन्वितपदार्थः—(नरा) लोकस्य नायकौ ! (पुरुस्पृहा) बहुस्पृहणीयौ ! (इन्द्राग्नी) सूर्यपावकौ ! (याः) (वाम्) युवयोः (नियुतः) दीधितयः (सन्ति), (ताभिः) दीधितिभिः (दाशुषे) यज्ञानुष्ठात्रे पुरुषाय (आगतम्) प्राप्नुतम् ॥

सूर्यमग्निं च विना लोको नूनं जाड्यमियात् अतस्तयोर्नेतृत्वं सुवचम्। सूर्यपावकयोर्दीधितयो नूनं रोगादिजनितभयाऽपहाराय बहुभिःस्पृहणीयाः प्रायोऽप्राप्याश्च भवन्ति, ताश्च याज्ञिकेभ्यः सुलभा भवेयुरित्यत्र प्रार्थ्यते ॥ ऋग्वेदे ६। ६०।८ऽपि ॥२॥

भाषार्थः—(नरा) जगत् के नायक ! (पुरुस्पृहा) बहुतों से चाहे हुवे ! (इन्द्राग्नी) सूर्य ! और अग्नि ! (याः) जो (वाम्) तुम दोनों की (नियुतः) किरणें (सन्ति) हैं (ताभिः) उनसे (दाशुषे) यजमान के लिये (आगतम्) प्राप्त होओ ॥

यदि सूर्य और अग्नि न हों तो समस्त लोक जड़वत् गिर जावे, हिलना चलना बन्द हो जावे, इस लिये इन को नायक कहा गया है। इन की किरणें जगत् के रोगादिजनित भय दूर करने से अमृत का काम देती हैं इस से सब को इन की चाहना होती है। ये कितनों को तो भले प्रकार मिलनी भी दुर्लभ हैं। सो यज्ञ करनेवालों को सुलभ हों, यह इस मन्त्र में प्रार्थना है॥ ऋ० ६। ६०। ८ में भी ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ २ ३१र २र ३ २
ताभिरागच्छतं नरोपेदꣳ सवनꣳ सुतम्।
१ २ ३ १ २
इन्द्राग्नी सोमपीतये ॥ ३ ॥ [१०] (९९३)

पदपाठः—ताभिः ३ । आगच्छतम् क्रि० । नरा सं० । उप अ० । इदम्, सवनम्, सुतम् २ । इन्द्राग्नी सं० । सोमपीतये ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(नरा) नेतारौ ! (इन्द्राग्नी) सूर्यपावकौ ! (इदं सुतं सवनं सोमपीतये ताभिः उपाऽऽगच्छतम्) ॥ ऋग्वेदे ६ । ६० । ९ऽपि ॥ ३ ॥

भाषार्थः—(नरा) जगत् के नेता ! (इन्द्राग्नी) सूर्य और अग्नि ! (इदम्) इस (सुतम्) अभिषुतसोम (सवनम्) यज्ञ में (सोमपीतये) सोमपानार्थ (ताभिः) उन किरणों से (उपाऽऽगच्छतम्) प्राप्त हो ॥ ऋ० ६ । ६० । ९ में भी ॥ ३ ॥

उक्तं प्रातः सवनम्, इदानीं माध्यन्दिनं सवनमभिधीयते । इति विवरणकारः ॥ अथ चतुर्थखण्डे प्रथमतृचस्य—भृगुर्वारुणिर्जमदग्निर्वा ऋषिः । पवमानः सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १र २र ३ १ २
अर्षा सोम द्युमत्तमोभिद्रोणानि रोरुवत् ।
२ ३ २ ३ २ ३ २
सीदन् योनौ वनेष्वा ॥१॥ (९९४) व्याख्याता (५०३) ॥

अथ द्वितीया—

३ १र २र ३ २ ३ १ २ ३ १ २
अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
१ २ ३ १ २
सोमा अर्षन्तु विष्णवे ॥ २ ॥ (९९५)

पदपाठः—अप्साः १ । इन्द्राय, वायवे, वरुणाय, मरुद्भ्यः ४ । सोमाः १ । अर्षन्तु क्रि० । विष्णवे ४ ॥

अन्वितपदार्थः—(अप्साः) अपःसंभजन्ते ते (सोमाः) सोमरसाः (इन्द्राय, वरुणाय, मरुद्भ्यः, विष्णवे) एतन्नामकेभ्यो मध्यस्थानद्युस्थानेभ्यः (वायवे) वायुभ्यः (अर्षन्तु) गच्छन्तु ॥

इन्द्रवरुणमरुद्विष्णुनामकानां वायुविशेषाणां व्याख्यानं निघण्टुनिरुक्तयोर्बाहुल्येन द्रष्टव्यम् ॥ ऋग्वेदे तु ९ । ६५ । २० सोमो अर्षतीति पाठभेदः ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(अप्सा:) जल में मिले हुवे (सोमाः) सोम—(इन्द्राय) इन्द्र, (वरुणाय) वरुण, (मरुद्भ्यः) मरुत् और (विष्णवे) विष्णु (वायवे) इन २ नामक वायुविशेषों के लिये (अर्षन्तु) प्राप्त हों ॥

इन्द्र, वरुण, मरुत्, विष्णु नामक वायुविशेषों के व्याख्यान निघण्टु और निरुक्त में बाहुल्य से वर्णित हैं, वहां देखिये ॥ ऋ० ९ । ६५ । २० का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
इषं तोकाय नो दधदस्मभ्यꣳ सोम विश्वतः ।
१ २ ३ १ २
आपवस्व सहस्रिणम् ॥ ३ ॥ [११] (९१६)

पदपाठः—इषम् २ । तोकाय ४ । नः ६ । दधत् क्रि० । अस्मभ्यम् ४ । सोम सं० । विश्वतः अ० । आपवस्व क्रि० । सहस्रिणम् २ ॥

अन्वितपदार्थः—(सोम) ! (नः) अस्माकं (तोकाय) पुत्रादि सन्तानाय (इषम्) अन्नादि (दधत्) धारयेः (अस्मभ्यं), च (विश्वतः) सर्वतः (सहस्रिणम्) बहु (आपवस्व) पावय ॥ ऋग्वेदे ९ । ६५ । २१ ऽपि ॥ ३ ॥

भाषार्थः—(सोम) सोम ! (नः) हमारे (तोकाय) सन्तान के लिये (इषम्) अन्नादि (दधत्) धारण करावे और (अस्मभ्यम्) हमारे लिये (विश्वतः) सब ओर से (सहस्रिणम्) बहुत (आपवस्व) शुद्धि कर ॥ ऋ० ९ । ६५ । २१ में भी ॥ ३ ॥

अथ प्रगाथस्य द्वितीयसूक्तस्य—सप्तर्षय ऋषयः । पवमानः सोमो देवता । बृहतीछन्दः ॥ तत्रप्रथमा—

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ १ २
सोम उष्वाणः सोतृभिरधिष्णुभिरवीनाम् । अश्वयेव
३ १ २ २ १ २ ३ १ २ ३ १ २
हरिता याति धारया मन्द्रया याति धारया ॥१॥ (९९७)

व्याख्याता (५१५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

३ २उ ३ १ २ ३ १ १ ३ १ २ ३ २उ

अनूपे गोमान्गोभिरक्षाः सोमोदुग्धाभिरक्षाः । समुद्रं न

३ १ २ २ १र २र

संवरणान्यग्मन्मन्दी मदाय तोशते ॥२॥ [१२] (९९८)

पदपाठः—अनूपे १ । गोमान् १ । गोभिः ३ । अक्षाः क्रि० । सोमः १ । दुग्धाभिः ३। अक्षाः । समुद्रम् २। न अ०। संवरणानि १ । अग्मन् क्रि० । मन्दी १ । मदाय ४ । तोशते क्रि० ॥

अन्वितपदार्थः—(गोमान्) गोभिरिन्द्रियोद्बोधनशक्तिभिस्तद्वान् (मन्दी) हृष्टिप्रदः सोमः (मदाय) हर्षाय (तोशते) अभिषूयते हन्यते । स हि (दुग्धाभिःगोभिः) कार्यश्रान्तैरिन्द्रियैः (समुद्रम्) मनः प्रति (अक्षाः) क्षरति (न) यथा (अनूपे) निम्नदेशे (संवरणानि) जलानि (अग्मन्) गच्छन्ति (अक्षाः) तद्वत् सोमः क्षरति ॥ मनो वै समुद्रः । श० ७ । ५ । २ । ५२ ऋग्वेदे ९ । १०७ । ९ ऽपि ॥ २ ॥

भाषार्थः—(गोमान्) इन्द्रियशक्तियों का उद्बोधन करनेवाला (मन्दी) हृष्टिकारक (सोमः) सोम (मदाय) हर्ष के लिये (तोशते) अभिषुत किया जाता है, वह (दुग्धाभिः गोभिः) दुही गौवों के समान थकी इन्द्रियों के साथ (समुद्रम्) मन में (अक्षाः) जाता है (न) जैसे (अनूपे) नीचान में (संवरणानि) जल (अग्मन्) जाते हैं (अक्षाः) तद्वत् जाता है ॥

शतपथ ७ । ५ । २ । ५२ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । १०७ । ९ में भी ॥ २ ॥

अथ तृतीयतृचस्य—असितः काश्यपो देवलो वा ऋषिः । पवमानः सोमो देवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

१ २ ३ २ ३ ३र ३ १र २र ३ १ २

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।

१ २ ३ १र २र

तन्नः पुनान आभर ॥ १ ॥ (९९१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—यत् १। सोम सं० । चित्रम् , उक्थ्यम्, दिव्यम्, पार्थिवम्, वसु १ । तत् २ । नः ४ । पुनानः १ । आभर क्रि० ॥

अन्वितपदार्थः—(सोम) सोम !(यत्) (चित्रम्) विविधम् (उक्थ्यं) प्रशस्यं (दिव्यं) दिवि आकाशे भवं (पार्थिवं) पृथिव्यां भवं (वसु) धनमस्ति (नः) अस्मभ्यं (तत्) (पुनानः) (आभर) आहर ॥ऋग्वेदे ९ । १९ । १ ऽपि ॥ १ ॥

भाषार्थः—(सोम) सोम ! (यत्) जो (चित्रम्) विविध (उक्थ्यम्) प्रशंसनीय (दिव्यम्) आकाश का और (पार्थिवम्) पृथिवी का (वसु) धन है, (तत्) वह (नः) हमारे लिये (पुनानः) पवित्रता करता हुवा (आभर) प्राप्त करा ॥ ऋ० ९ । १९ । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १र २र ३ २ ३ १ २ ३ १ २

वृषा पुनान आयूंषि स्तनयन्नधिबर्हिषि ।

१३ २उ ३ १ २

हरिः सन् योनिमासदः ॥ २ ॥ (१०००)

पदपाठः—वृषा, पुनानः १ । आयूंषि २ । स्तनयन् १ । अधिअ० । बर्हिषि ७ । हरिः, सन् १ । योनिम् २ । आसदः क्रि० ॥

अन्वितपदार्थः—(वृषा) वृष्टिकारकः (आयूंषि) जीवनानि (पुनानः) पवित्रीकुर्वन् (अधिबर्हिषि) यज्ञे [हुतः] (हरिः) हरितवर्णः (सन्) (स्तनयन्) शब्दायमानः सोमः (योनिम्) गगनमण्डलम् (आसदः) आसीदति ॥ ऋग्वेदे तु ९।१९ । ३ आयुष्षु, इति आसदत् इति च पाठभेदः ॥ २ ॥

भाषार्थः—(वृषा) वृष्टिकारक, (आयूंषि) जीवनों को (पुनानः) शुद्ध करता हुवा (अधिबर्हिषि) यज्ञ में (हरिः) हुत होने से हरितरङ्ग (सन्) हुवा (स्तनयन्) गर्जता हुवा सोम (योनिम्) गगनमण्डल में (आसदः) स्थित होता है ॥ ऋ० ९ । १९ । ३ का पाठभेद संस्कृत भाष्य में देखिये ॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं ६४ दशतिषु ६४० मन्त्राः ॥
महानाम्न्यार्चिके तु १० दशैव मन्त्राः ॥
उत्तरार्चिके च १२२३ मन्त्राः ॥
सर्वमन्त्रयोगः १८७३

(२)

२२ अध्यायेषु ४०२ सूक्तानि चेत्थम्—												योगः
अ०	१	२	३	४	५	६	७	८	९	१०	११	
सं०	६२	६२	५५	५६	६९	७६	८३	५९	७८	९४	३२	२२० ७२६
सू०	२३	२२	१९	१९	२२	२३	२४	१४	२०	२३	११	
अ०	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	
सं०	५६	५४	४६	३८	४४	४०	५४	५४	५१	३३	२७	१५२ ४१७
सू०	२०	२०	१६	१४	२१	१४	१९	१८	१८	१३	९	

एवं सूक्तानि १८२+२२०=४०२
एवं मन्त्राः ४९७+७२६=१२२३

एवं छन्दआर्चिके ६ षडऽध्यायाः ६४० षट्छतानि चत्वारिंशदधिकानि मन्त्राणाम् ॥

महानाम्न्यार्चिके दश १० मन्त्राः ॥

उत्तरार्चिकेऽध्यायानां २२ द्वाविंशतौ ४०२ द्व्यधिकं शतचतुष्टयं सूक्तानाम् । तत्र १२२३ एकं सहस्रं द्वे शते त्रयोविंशतिश्च मन्त्राणाम्, मिलित्वैतद्योगोऽत्र सामवेदीयर्चाम् १८७३ एकं सहस्रमष्ट शतानि त्र्यधिका सप्ततिश्च भवति ॥

एवं महानाम्न्यार्चिकातिरिक्ताः २८ अध्यायाः ॥

सायणाचार्य्येण चोत्तरार्चिके सर्वमूलग्रन्थाऽसम्मताऽध्यायानामेकविंशतिरेव विन्यस्ता । तन्नये विंशैकविंशयोरध्याययोरेकएव विंशोऽध्यायः । छन्दआर्चिकसहिताश्च २७ एव ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation

ओ३म्

यस्य निः श्वसितं वेदा यो वेदाञ्जगतेऽखिलान् ॥
ददौ तमहं वन्दे परमात्मानमव्ययम् ॥१॥
आगमप्रवणश्चाहं नापवाद्यः स्खलन्नपि ।
नहि सद्वर्त्मना गच्छन्स्खलितेष्वप्यपोद्यते ॥२॥

अथ चतुर्षु वेदेषु तृतीयः सामवेदः। तस्य छन्दआर्चिको नाम प्रथमोभागः। महानाम्न्यार्चिको नाम द्वितीयः। उत्तरार्चिको नाम तृतीयः। तत्र प्रथमे छन्दआर्चिके षडऽध्यायाः। तत्रापि प्रत्यध्यायं यावत्यो दशतयः प्रतिदशति यावन्तश्च मन्त्राः सन्ति तदिदं सर्वं निम्नाङ्कितचक्रानुसारेण बोद्धव्यम्—

(१) पूर्वार्चिके ६ अध्यायेषु ६४० मन्त्राः

१ अध्यायः		२ अध्यायः		३ अध्यायः		४ अध्यायः		५ अध्यायः		६ अध्यायः	
दशतयः	मन्त्राः	दशतयः	मन्त्राः	दशतयः	मन्त्राः	दशतयः	मन्त्राः	दशतयः	मन्त्राः	दशतयः	मन्त्राः
१	१०	१	१०	१	१०	१	८	१	१०	१	९
२	१०	२	१०	२	१०	२	१०	२	१०	२	७
३	१४	३	१०	३	१०	३	११	३	१०	३	१३
४	१०	४	१०	४	१०	४	१०	४	१४	४	१२
५	१०	५	१०	५	१०	५	८	५	१२	५	१४
६	८	६	१०	६	१०	६	१०	६	१०		
७	१०	७	१०	७	१०	७	१०	७	१२		
८	८	८	९	८	१०	८	८	८	९		
९	१०	९	१०	९	१०	९	१०	९	१२		
१०	९	१०	१०	१०	९	१०	१०	१०	१२		
११	१०	११	९	११	१०	११	१०	११	८		
१२	८	१२	१०	१२	१०	१२	१०	०	०		
योगः	१२४		१२५		१२६		१२५		१२६		५५

१२ द १२ श १२ ति १२ यो ११ गाः ५=६४

६४० मन्त्रयोगः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ १र २र ३ १ २ ३ १ २
युवꣳहि स्थः स्वःपती इन्द्रश्च सोम गोपती ।
३ १ २ ३ १ २
ईशाना पिप्यतं धियः ॥ ३ ॥ [१३] (१००१)

पदपाठः—युवम् १ । हि अ० । स्थः क्रि० । स्वःपती १ । इन्द्रः १ । च अ० । सोम सं० । गोपती १ । ईशाना १ । पिप्यतम् क्रि० । धियः २ ॥

अन्वितपदार्थः—(सोम) ओषधिराज ! त्वम् (इन्द्रश्च) सूर्यश्च (हि) निश्चयेन (स्वःपती) सुखस्य स्वामिनौ (गोपती) इन्द्रियाणां पोषकौ च (स्थः) भवथः (ईशाना) शक्तिमन्तौ (युवम्) युवाम् (धियः) कर्माणि बुद्धीर्वा (पिप्यतम्) आप्याययत ॥ ऋग्वेदे ९ । १९ । २ ऽपि ॥ ३ ॥

भाषार्थः—(सोम) सोम ! तू (च) और (इन्द्रः) सूर्य (हि) ही (स्वःपती) सुख के स्वामी और (गोपती) इन्द्रियों के पोषक (स्थः) हो (ईशाना) शक्तिमान् (युवम्) तुम दोनों (धियः) कर्मों वा बुद्धियों को (पिप्यतम्) समृद्ध करो ॥ ऋ० ९ । १९ । २ में भी ॥ ३ ॥

इति माध्यंदिनः पवमानः इति विवरणकृत् ॥

" अतोऽनन्तरं विवरणकृतैव शक्करीः प्रस्तुत्य ता एव व्याख्याताः । तथाहि—'इदानीं पृष्ठानि भवन्ति' तत्र पञ्चमेऽहनि शक्वर्यः पृष्ठं भवति ता उच्यन्ते;—छन्दो दैवतब्राह्मणानि परिभाषासिद्धानि "विदा मघवन् " सर्वज्ञः त्वं मघवन्—इत्यादि । परं चैतन्नये उत्तरग्रन्थीय एव महानाम्न्यार्चिकः न तु ग्रन्थान्तर च्छन्दआर्चिकपरिशिष्टभूतः, परमेतदतीव चित्रं मूलपुस्तकदर्शनेन तथात्वे व्याघातात् " —इति सत्यव्रतः सामश्रमी ॥

भाषार्थः—सत्यव्रत सामश्रमी जी लिखते हैं कि "इस से आगे विवरणकार ने शक्करी रख कर उन्हीं की व्याख्या की है । जैसा कि—" अब पृष्ठों

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का वर्णन है उस में पांचवें दिन शक्करियां पृष्ठ हैं सो कही जाती हैं—छन्द, देवता, ब्राह्मण परिभाषानुसारी जानो । 'विद्मा मघवन्' सर्वज्ञ इन्द्र तू इत्यादि; पर विवरणकार की सम्मति में महानाम्न्यार्चिक उत्तरार्चिक के ही अन्तर्गत है, अन्य ग्रन्थ छन्दआर्चिक का परिशिष्ट नहीं । परन्तु यह बड़ा आश्चर्य है कि यह मूल पुस्तक देखने के विपरीत है" ॥

अथ पञ्चमखण्डे प्रथमतृचस्य—गोतमो राहूगण ऋषिः । इन्द्रोदेवता ।

पङ्क्तिश्छन्दः । तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १र २र

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।

२उ ३ २ ३ २ ३ १र २र ३ १र

तमिन्महत्स्वाजिषूतिमर्भे हवामहे सवा-

२र ३ १ २

जेषु प्रनो विषत् ॥१॥ (१००२) व्याख्याता (४११)

अथ द्वितीया—

२ ३ १ २ ३ २उ ३ १ ३ २

असि हि वीर सेन्योऽसि भूरि पराददिः ।

१ २ ३ १ २ ३ १र २र

असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि

३ १र २र ३ १ २

सुन्वते भूरि ते वसु ॥ २ ॥ (१००३)

पदपाठः—असि क्रि० । हि अ० । वीर सं० । सेन्यः १ । असि । भूरि अ० । पराददिः १ । असि । दभ्रस्य ६ । चित् अ० । वृधः १ । यजमानाय ४। शिक्षसि क्रि० । सुन्वते ४ । भूरि २ । ते ४ । वसु २ ॥

अन्वितपदार्थः—(वीर) इन्द्र ! त्वम् (हि) निश्चयेन (सेन्यः) सेनार्हः (असि) भवसि (भूरि) बहुशः (पराददिः) शत्रूणामादाता (असि) (दभ्रस्य) अल्पस्य (चित्) अपि (वृधः) वर्धयिता (असि) (ते) तुभ्यं (सुन्वते) सोमाभिषवं कुर्वते (यजमानाय)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वत्सत्कारकर्त्रे पुरुषाय (भूरि) बहु (वसु)धनं(शिक्षसि)ददासि ॥ दभ्रमिति ह्रस्वनाम निघं० ३ । २ शिक्षतिर्दानकर्मा निघं० ३ । २० ॥ ऋग्वेदे १ । ८१ । २ ऽपि ॥२॥

भाषार्थः—(वीर) इन्द्र ! राजन् ! आप (सेन्यः) सेना के योग्य (असि) हैं। आप (हि) ही (भूरि) बहुत से (परादद्दिः) शत्रुओं के पकड़ने वाले (असि) हैं। (दभ्रस्य) थोड़ों को (चित्) भी (वृधः) बढ़ाने वाले (असि) हैं। (ते) आप के लिये (सुन्वते) सोमाभिषव करने वाले (यजमानाय) यजमान को (भूरि) बहुत (वसु) धन (शिक्षसि) देते हैं ॥ निघं० ३ । २, ३ । २० के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । ८१ । २ में भी ॥ २ ॥

अथ तृतीया—

२३१२ ३ १ २ ३ १ २ ३ १२ ३ १
यदुदीरत आजयो धृष्णवे धीयते धनम् । युङ्क्ष्वा
२३२३ २३ २ ३ १ २२ ३ १ २३
मदच्युता हरी कꣳ हनः कं वसौ दधोऽस्माँ इन्द्र
१ २
वसौ दधः॥३॥[१४] (१००४) व्याख्याता (४१४)

अथ रायोवाजीयमच्छावाकसामेति विवरणकारः ॥

अथ द्वितीयतृचस्य-ऋषिदेवताछन्दांसि पूर्ववत् । तत्र प्रथमा—

३ २३ १ २३१२ १ २ ३क२र १
स्वादोरित्था विसूवतो मधोः पिबन्ति गौर्यः । या
२र ३१२३ २ ३१२३ २३ २ ३१२ ३
इन्द्रेण सयावरीर्वृष्णामदन्ति शोभथा वस्वीरनु स्व-
१ २
राज्यम् ॥ १ ॥ (१००५) व्याख्याता (४०९)

अथ द्वितीया—

१ २ ३२३ १ २ ३१२
ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १र २र ३ २ ३ १ २ ३ १ २ ३
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं
२ ३१२ ३ १ २
वस्वीरनु स्वराज्यम् ॥ २ ॥ (१००६)

पदपाठः—ताः १ । अस्य ६ । पृश्नायुवः १ । सोमम् २ । श्रीणन्ति क्रि० । पृश्नयः, प्रियाः १ । इन्द्रस्य ६ । धेनवः १ । वज्रम् २ । हिन्वन्ति क्रि० । सायकम् २ । वस्वीः १ । अनु अ० । स्वराज्यम् २ ॥

अन्वितपदार्थः—(प्रियाः) लोकस्य हितकर्यः (ताः) (पृश्नायुवः) स्पर्शनकामाः (पृश्नयः) नानावर्णाः (वस्वीः) वासयित्र्यः (अस्य इन्द्रस्य) सूर्यस्य (धेनवः) दीधितयः (स्वराज्यम्) स्वप्रकाशं सूर्यम् (अनु) सहकृत्य (वज्रं सायकं हिन्वन्ति) वज्रवत्प्रसरन्ति (सोमम्) सोमाद्योषधिजातं (श्रीणन्ति) पचन्ति॥ ऋग्वेदे १ । ८४ । ११ऽपि ॥ २ ॥

भाषार्थः—(प्रियाः) संसार का हित करने वाली, (ताः) वे, (पृश्नायुवः) सब को छूना चाहने वाली, (पृश्नयः) अनेक रंगतों वाली, (वस्वीः) जगन्निवासहेतुभूता, (अस्य) इस (इन्द्रस्य) सूर्य की (धेनवः) किरणें (स्वराज्यम्) स्वप्रकाश सूर्य के (अनु) साथ २ (वज्रं सायकं हिन्वन्ति) वज्र बाण सा छोड़तीं अर्थात् वज्रवत् प्रहारयुक्त बाण के समान फैलतीं और (सोमम्) सोमादि ओषधियों को (श्रीणन्ति) पकाती हैं ।। ऋ० १ । ८४ । ११ में भी ।। २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ १
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः । व्रतान्यस्य सश्चिरे
३ १ २ ३१२ ३ २ ३१२ ३ १ २
पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥३॥[१५](१००७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठ—ताः १ । अस्य ६ । नमसा ३ । सहः २ । सपर्यन्ति । क्रि० प्रचेतसः १ । व्रतानि २ । अस्य ६ । सश्चिरे क्रि० । पुरूणि २ । पूर्वचित्तये ४ । वस्वीः १ । अनु अ० । स्वराज्यम् २ ॥

अन्वितपदार्थः—(वस्वीः) वासहेतवः (अस्य) सूर्यस्य (ताः) दीधितयः (प्रचेतसः) बुद्धितत्त्वोद्बोधनकर्यः (स्वराज्यमनु) (नमसा) उत्पादितेन अन्नेन (सहः) लोकस्य बलं (सपर्यन्ति) सत्कुर्वन्ति (अस्य) सूर्यस्य (पुरूणि) बहूनि (व्रतानि) अङ्कुरोत्पादादिकर्माणि (पूर्वचित्तये) पूर्वं जागरणाय (सश्चिरे) सेवन्ते ॥ ऋग्वेदे १ । ८४ । १२ ऽपि ॥ ३ ॥

भाषार्थः—(वस्वीः) बसाने वाली (अस्य) इस सूर्य की (ताः) वे किरणें (प्रचेतसः) बुद्धितत्त्व को जगाने वाली (स्वराज्यम्) सूर्य के (अनु) साथ २ (नमसा) उत्पादित अन्न से (सहः) लोक के बल को (सपर्यन्ति) बढ़ाने से सत्कृत करती हैं और (अस्य) इस सूर्य के (पुरूणि) बहुत से (व्रतानि) अन्नोत्पादनादि कर्मों को (पूर्वचित्तये) पूर्व जगाने के लिये (सश्चिरे) सेवित करती हैं ॥ ऋ० १ । ८४ । १२ में भी ॥ ३ ॥

उक्तं माध्यंदिनं सवनमिदानीं तृतीयं सवनमुच्यते इति विवरणकारः ॥

अथ षष्ठे खण्डे प्रथमतृचस्य—जमदग्निर्ऋषिः । पवमानः सोमोदेवता । गायत्रीछन्दः । तत्र प्रथमा—

१ २ ३ १र २र३ १र २र ३ २

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः ।

३ २उ ३ १ २

श्येनो न योनिमासदत् ॥१॥ (१००८) व्याख्याता (४७३)

अथ द्वितीया—

३ १र २र ३ १ २ ३ २ ३१र २र ३ २

शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम् ।

१ २ ३ २ ३ १ २

स्वदन्ति गावः पयोभिः ॥ २ ॥ (१००९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—शुभ्रम्, अन्धः, देववातम् २। अप्सु ७। धौतम् २। नृभिः ३। सुतम् २। स्वदन्ति क्रि०। गावः १। पयोभिः ३॥

अन्वितपदार्थः—(गावः) सूर्यकिरणाः (शुभ्रम्) उज्ज्वलम् (अन्धः) अन्नरूपम् (देववातम्) देवैर्भक्षणीयम् (अप्सु धौतम्) वसतीवरीषु शोधितम् (नृभिः सुतम्) ऋत्विग्भिरभिषुतं सोमं (पयोभिः) उदकैः सह (स्वदन्ति) आचामन्ति ॥ ऋग्वेदे ९ । ६२ । ५ ऽपि ॥ २ ॥

भाषार्थः—(गावः) सूर्यकिरणें (शुभ्रम्) उज्ज्वल (अन्धः) अन्नरूप (देववातम्) देवों के भोजन (अप्सु धौतम्) वसतीवरीनामक जलों में धोये हुवे (नृभिः सुतम्) ऋत्विजों द्वारा अभिषुत किये हुवे सोम को (पयोभिः) जलों सहित (स्वदन्ति) चूंसती हैं ॥ ऋ० ९ । ६२ । ५ में भी ॥ २ ॥

अथ तृतीया—

१ ३ २ ३ १र २र३१२ ३१ २

आदीमश्वं न हेतारमशूशुभन्नमृताय ।

२३ १२ ३१२

मधो रसꣳ सधमादे ॥ ३ ॥ [१६] (१०१०)

पदपाठः—आत्, ईम् अ०। अश्वम् २। न अ०। हेतारम् २। अशूशुभन् क्रि०। अमृताय ४। मधोः ६। रसम् २। सधमादे ७॥

अन्वितपदार्थः—ऋत्विजः (सधमादे) यज्ञे (ईम्) एतं (मधोः) सोमस्य (रसम्) (अमृताय) अमृतत्वाय (आत् अशूशुभन्) शोभयन्ति (न) यथा (हेतारम्) शीघ्रगामिनम् (अश्वम्) शोभयन्ति तद्वत् ॥ ऋग्वेदे तु ९ । ६२ । ६ हेतारः, मध्वः इति पाठभेदौ ॥ ३ ॥

भाषार्थः—ऋत्विज् लोग (सधमादे) यज्ञ में (ईम्) इस (मधोः) सोम के (रसम्) रस को (अमृताय) अमृतत्व के लिये (आत् अशूशुभन्) शोभित करते हैं (न) जैसे (हेतारम्) शीघ्रगामी (अश्वम्) अश्व को सजाते हैं तद्वत् ॥ ऋ० ९ । ६२ । ६ के पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ प्रगाथस्य द्वितीय सूक्तस्य-ऊर्ध्वसद्मा कृतयशाश्च क्रमेणर्षी। पवमानः सोमो देवता। ककुप् सतोबृहती च क्रमेणच्छन्दसी। तत्र प्रथमा-

३ २३ २ ३२३३१ २ ३१ २ ३ २ १२ २२

अभिद्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम्। वि कोशं

३१ २

मध्यमं युव ॥ १ ॥ (१०११) व्याख्याता (५७१)

अथ द्वितीया-

१ २ ३ २२ ३ २ ३ २३ ३ २ ३ १ २ ३ २

आवच्यस्व सुदक्ष चम्वोः सुतो विशां वन्हिर्न विश्पतिः। वृष्टिं

३१ २ ३ ३२३ ३ १ २ ३ १ २

दिवः पवस्व रीतिमपो जिन्वन् गविष्टये धियः॥२॥[१७] (१०१२)

पदपाठः-आवच्यस्व क्रि०। सुदक्ष सं०। चम्वोः ७। सुतः १। विशाम् ६। वन्हिः १। न अ०। विश्पतिः १। वृष्टिम् २। दिवः ५। पवस्व क्रि०। रीतिम् २। अपः २=६। जिन्वन् १। गविष्टये ४। धियः २॥

अन्वितपदार्थः-(सुदक्ष) शोभनबल ! सोम ! (चम्वोः) अधिषवणफलकयोः (सुतः) अभिषुतः (विश्पतिः) राजा (न) इव (विशाम्) प्रजानां (वन्हिः) वोढा सन् (आवच्यस्व) प्राप्नुहि [वचेर्गत्यर्थस्य व्यत्ययेन श्यनि रूपम्] (गविष्टये] गामात्मनइच्छते यजमानाय (धियः) कर्माणि (जिन्वन्) प्रेरयन् (अपः) अपां (रीतिं) वृष्टिम् (दिवः) आकाशात् (पवस्व) कुरु ॥ ऋग्वेदे तु ९ । १०८ । १० अपां जिन्व इति पाठः॥२॥

भाषार्थः-(सुदक्ष) शोभनबलवन् ! सोम ! (चम्वोः) अभिषव के फलकों में (सुतः) अभिषुत किया हुवा (विश्पतिः) राजा (न) सा (विशाम्) प्रजाओं का (वन्हिः) ले चलने वाला होकर (आवच्यस्व) प्राप्त हो और (गविष्टये) अपने लिये गौ आदि धनार्थी यजमान के लिये (धियः) कर्मों को (जिन्वन्) प्रेरित करता हुवा (अपः) जलों की (रीतिम्) वर्षा को

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(पवस्व) कर ॥ ऋ० ९ । १०८ । १० का पाठभेद संस्कृतभाष्य में देखिये ॥२॥

अथ तृतीयस्य-त्रितऋषिः पवमानः सोमो देवता । बृहतीछन्दः ॥

तत्र प्रथमा-

२ १ र २ र ३ १ २ ३ २ ३ २ ३ १ २ २ ३ १ २ ३

प्राणाशिशुर्महीनां हिन्वन्नृतस्य दीधितिम् । विश्वा परि प्रि-

१ २ ३ १ २ ३ २

या भुवदध द्विता ॥ १ ॥ (१०१३) व्याख्याता (५१७)

अथ द्वितीया-

१ २ ३ १ २ ३ २ १ २ ३ १ र २ र ३ २

उप त्रितस्य पाष्योऽ३ऽरभक्त यद् गुहा पदम् ।

३ १ २ ३ १ र २ र ३ १ २ ३ २

यज्ञस्य सप्त धामभिरध प्रियम् ॥ २ ॥ (१०१४)

पदपाठः-उप अ० । त्रितस्य ६ । पाष्योः ७ । अभक्त कि० । यत् २ । गुहा ७ । पदम् २ । यज्ञस्य ६ । सप्त, धामभिः ३ । अध अ० । प्रियम् २ ॥

अन्वितपदार्थः-(त्रितस्य) त्रीन्विद्याशिक्षाधर्मविषयान्तनोति तस्य विदुष ऋत्विजः [त्रितस्तीर्णतमो मेधयेति निरु० ४ । ६] (गुहा) गुहायां हविर्धाने वर्त्तमानयोः (पाष्योः) पाषाणवद् दृढयोरधिषवणफलकयोः (पदम्) सोमाख्यं (यत्) (उप-अभक्त) अध्वर्युस्संभजते (अध) । तम् (यज्ञस्य) सोमयागादेः (सप्त) सप्तभिः (धामभिः) धारकैर्गायत्र्यादिच्छन्दोभिः (प्रियं) प्रियकरं सोममृत्विजः स्तुवन्ति ॥

ऋग्वेदे ९ । १०२ । २ ऽपि ॥२॥

भाषार्थः-(त्रितस्य) विद्या शिक्षा धर्मविषयों को विस्तृत करने वाले विद्वान् ऋत्विज् के यहां [निरु० ४ । ६] (गुहा) हविर्धान में वर्त्तमान (पाष्योः) पाषाण के समान कठिन दो २ अधिषवण फलकों में (यत् पदम्) जिस सोम पद को (उप अभक्त) अध्वर्यु सामीप्य से सेवित करता है (अध) फिर उस (प्रियम्) प्यारे सोम को (सप्त) सात (धामभिः) धारक गायत्र्यादि छन्दों से प्रशंसित करते हैं ॥ ऋ० ९ । १०२ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ १ २ ३१२ २२ ३ २ १ २

त्रीणि त्रितस्य धारया पृष्ठेष्वैरयद्रयिम् । मिमीते

३ १ २ ३ २ ३ १ २

अस्य योजना वि सुक्रतुः ॥३॥ [१८] (१०१५)

पदपाठः—त्रीणि १ । त्रितस्य ६ । धारया ३ । पृष्ठेषु ७ । ऐरयत् क्रि० । रयिम् २ । मिमीते क्रि० । अस्य ६ । योजना २ । वि अ० । सुक्रतुः १ ॥

अन्वितपदार्थः—(त्रितस्य) विदुषः यज्ञेऽनुष्ठितया (धारया) सोमधारया (पृष्ठेषु) पृष्ठाख्येषु सामसु (त्रीणि) सवनानि भवन्ति । किञ्च—(अस्य) सोमस्य (योजना) योजनानि, यः(सुक्रतुः) शोभनयज्ञः पुमान् (वि मिमीते), सः (रयिम्) धनं धान्यं च (ऐरयत्) प्राप्नुयात् ॥

ऋग्वेदे तु ९ । १०२ । ३ ऐरयत् = एरया इति पाठः॥३॥

भावार्थः—(त्रितस्य) विद्वान् की यज्ञ में अनुष्ठित (धारया) सोमरस की धारा से (पृष्ठेषु) पृष्ठसंज्ञक सामों में (त्रीणि) तीन सवन होते हैं । (अस्य) इस सोम की(योजना)योजनाओं को जो (सुक्रतुः) शोभन कर्म वाला विद्वान् (वि मिमीते)मानपूर्वक अनुष्ठित करता है वह रयिम्)धन धान्य को(ऐरयत्) प्राप्त करेगा ॥ ऋ० ९ । १०२ । ३ का पाठान्तर संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थ तृचस्य-रेभसूनू काश्यपौ ऋषी । पवमानः सोमो देवता ।

अनुष्टुप्छन्दः । तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ १ २ ३ २

पवस्व वाजसातये पवित्रे धारया सुतः ।

१ २ ३ १ २ ३ २ ३ १ २

इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः ॥१॥ (१०१६)

पदपाठः—पवस्व क्रि० । वाजसातये ४ । पवित्रे ७ । धारया ३ । सुतः १ । इन्द्राय ४ । सोम सं० । विष्णवे ४ । देवेभ्यः ४ । मधुमत्तरः १ ॥

अन्वितपदार्थः—(सोम) ! त्वम् (पवित्रे)दशापवित्रे (धारया)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धारापूर्वकं (सुतः) अभिषुतः (मधुमत्तरः) अतिमाधुर्य्योपेतः (वाजसातये) अन्नलाभाय (इन्द्राय, विष्णवे) इत्यादि-नामकेभ्यः (देवेभ्यः) वायुविशेषेभ्यः (पवस्व) शुद्धिं संपादय संपादयति वा सोमः ॥ ऋग्वेदे तु ९ । १०० । ६ मधुमत्तमः, वाजसातमः इति पाठौ ॥ १ ॥

भाषार्थः—(सोम) सोम ! (पवित्रे) दशापवित्र पर (धारया) धारा से (सुतः) अभिषुत किया हुवा (मधुमत्तरः) अतिमाधुर्ययुक्त, (वाजसातये) अन्नोत्पत्ति लाभ के लिये (इन्द्राय) इन्द्र, (विष्णवे) विष्णु इत्यादि नामक (देवेभ्यः) वायुविशेषों के लिये (पवस्व) पवित्रता कर वा करता है ॥ ऋ० ९ । १०० । ६ के पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया—

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २

त्वाꣳरिहन्ति धीतयो हरिं पवित्रे अद्रुहः ।

३ २ ३ २३ ३ २ ३ १ २ ३ १ २

वत्सं जातं न मातरः पवमान विधर्मणि ॥२॥(१०१७)

पदपाठः—त्वाम् २ । रिहन्ति क्रि० । धीतयः १ । हरिम् २ । पवित्रे ७ । अद्रुहः ६ । वत्सं,जातम् २ । न अ० । मातरः १ । पवमान सं० । विधर्मणि ७ ॥

अन्वितपदार्थः—(पवमान) सोम ! (धीतयः) अङ्गुलयः (त्वाम्) (हरिं) सोमम् (अद्रुहः) द्रोहरहितस्य ऋत्विजः (विधर्मणि) विविधं हविषां धारके यज्ञे (न) यथा (जातं तत्सम्) तत्कालोत्पन्नं गोवत्सं (मातरः) धेनवः (रिहन्ति) लिहन्ति, तथा (पवित्रे) दशापवित्रे स्पृशन्ति प्रेम्णेति भावः ॥ ऋग्वेदे तु ९ । १०० । ७ धीतयः—मातरः, मातरः—धेनवः इति पाठौ ॥ २ ॥

भाषार्थः—(पवमान) सोम ! (न) जैसे (जातम्) जातमात्र (वत्सम्) बछड़े को (मातरः) उस की माता गौवें (रिहन्ति) चाटती हैं [ऐसे ही प्रेम से] (अद्रुहः) द्रोहरहित पुरुष के (विधर्मणि) विविध हव्यों के धा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धारक यज्ञ में (धीतयः) ऋत्विज् की अङ्गुलियें (हरिम्) हरे (त्वाम्) तुझ सोम को (पवित्रे) दशापवित्र पर स्पर्श करती हैं ॥ ऋ० ९ । १०७ । ७ के पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१र २र ३ १र २र १ २ ३ १
त्वं द्यां च महिव्रत पृथिवीं चातिजभ्रिषे । प्रतिद्रापि-
२ ३ १ २ ३ २
ममुञ्चथाः पवमान महित्वना ॥ ३ ॥ [१९] (१०१८)

पदपाठः—त्वम् १ । द्याम् २ । च अ० । महिव्रत सं० । पृथिवीम् २ । च, अति अ० । जभ्रिषे क्रि० । प्रति अ० । द्रापिम् २ । अमुञ्चथाः क्रि० । पवमान सं० । महित्वना ३ ॥

अन्वितपदार्थः—(महिव्रत) महाकर्मन् ! (पवमान) सोम ! (त्वम् द्यां च पृथिवीं च) (अति जभ्रिषे) अत्यन्तं बिभर्षि (महित्वना) महत्त्वेन (द्रापिम्) कवचम् (प्रत्यमुञ्चथाः) संवरयसि ॥ ऋग्वेदे ९ । १०० । ९ ऽपि ॥३॥

भाषार्थः—(महिव्रत) बड़े काम वाले ! (पवमान) सोम ! (त्वम्) तू (द्याम् च) द्युलोक और (पृथिवीं च) पृथिवी लोक का (अति) अत्यन्त (जभ्रिष) धारण पोषण करता है और (महित्वना) बड़प्पन से (द्रापिम्) कवच को (अति—अमुञ्चथाः) ढक सा लेता है ॥ ऋ० ९ । १०० । ९ में भी ॥३॥

अथ पञ्चमृचस्य—मन्युर्वासिष्ठऋषिः। पवमानः सोमो देवता। त्रिष्टुप्छन्दः॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २ २ ३
इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सहइन्वन्मदाय । हन्ति
२ ३ १ २ ३ १र २र ३ २ ३ २ ३ १ २ ३ १ २
रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥१॥ (१०११)

व्याख्याता (५४०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

२ ३ १२३ १ २ ३ २ ३१र २र ३ १ २

अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।

२ ३१ २ ३ १ २ ३ २ ३ २३१ २ ३ १र २र

इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय।२।(१०२०)

पदपाठः—अध अ० । धारया ३ । मध्वा ३ । पृचानः १ । तिरः अ० । रोम २ । पवते क्रि० । अद्रिदुग्धः १ । इन्दुः १ । इन्द्रस्य ६ । सख्यम् २ । जुषाणः, देवः १ । देवस्य ६ । मत्सरः १ । मदाय ४ ॥

अन्वितपदार्थः—(अध) अथानन्तरम् (अद्रिदुग्धः) ग्रावभिरभिषुतः (इन्दुः) सोमः (मध्वा) मधुरया (धारया) (पृचानः) संपृक्तः सन् (रोम) रोममयं दशापवित्रम् (तिरः) तिरस्कृत्य व्यवधायकं कृत्वा (पवते) द्रोणकलशे गच्छति । किं च— (इन्द्रस्य) वृष्टिकर्तो वायोः (सख्यं) हितं (जुषाणः) सेवमानः (देवः) द्योतमानः (मत्सरः) हृष्टिकारकः सोमः (देवस्य) तस्यैव वृष्टिकर्तुः (मदाय) हर्षार्थं (पवते) गच्छति ॥

ऋग्वेदे ९ । ९७ । ११ ऽपि ॥ २ ॥

भाषार्थः—(अध) फिर (अद्रिदुग्धः) पत्थरों से अभिषुत (इन्दुः) सोम (मध्वा) मधुर (धारया) धारा से (पृचानः) चिपकता हुआ (रोम) दशापवित्र को (तिरः) बिच में करके (पवते) द्रोणकलश में जाता और (इन्द्रस्य) वृष्टिकारक वायु का (सख्यम्) हित (जुषाणः) सेवन करता हुआ (देवः) प्रकाशमान (मत्सरः) हृष्टिकारक सोम (देवस्य) उसी वृष्टिकारक देव वायु के (मदाय) हर्षार्थ (पवते) होम द्वारा जाता है ॥ ऋ० ९ ।९७। ११ में भी ॥२॥ अथ तृतीया—

३ २ ३१ २ ३ २ ३२ ३२उ ३ १ २ ३र

अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन् ।

२ ३ १ २ ३१र २र ३ २ ३ १ २ २ २ ३ १ २

इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अभि अ०। व्रतानि २। पवते क्रि०। पुनानः, देवः १। देवान् २। स्वेन, रसेन ३। पृञ्चन् १। इन्दुः १। धर्माणि २। ऋतुथा अ०। वसानः १। दश, क्षिपः १। अव्यत क्रि०। सानौ ७। अव्ये ७॥

अन्वितपदार्थः— (धर्माणि) धारकपोषकाणि (व्रतानि) कर्माणि(ऋतुथा) यथर्तु (वसानः)धारयन्(इन्दुः)सोमः(पुनानः) शुद्धिं कुर्वन् (अभि पवते) सर्वतोगच्छति । (देवः) प्रकाशमानः सोमः (स्वेन रसेन) (देवान्) वाय्वादीन् (पृञ्चन्) संपर्चयन् संयोजयन् आस्ते । (दश) दश (क्षिपः) अङ्गुलयः (सानौ) सानौ उच्चे (अव्ये) दशापवित्रे (अव्यत) तं गमयन्ति॥ ऋग्वेदे तु ९। १७। १२ व्रतानि=प्रियाणि इत्यन्तरम् ॥ ३ ॥

भाषार्थ.-(धर्माणि) धारक पोषक (व्रतानि) कर्मों को (ऋतुथा) ऋतु के अनुसार (वसानः) धारता हुवा (इन्दुः) सोम (पुनानः) शुद्धि करता हुवा (अभिपवते) सब ओर जाता और (देवः) प्रकाशमान सोम (स्वेन) अपने (रसेन) रस से (देवान्) वायु आदि देवों को (पृञ्चन्) चिपकाता हुवा है। (दश) १० (क्षिपः) अङ्गुलियें (सानो) ऊंचे (अव्ये) ऊन के दशापवित्र पर (अव्यत) उस को पहुंचाती हैं ॥ ऋ० ९। ९७। १२ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ सप्तमे खण्डे प्रथम तृचस्य—वसुश्रुत आत्रेय ऋषिः। अग्निर्देवता। पङ्क्तिश्छन्दः॥ तत्र प्रथमा—

१ २ ३१ २ ३१२ २३ २ ३१२
आ ते अग्नइधीमहि द्युमन्तं देवाजरम्। यद्ध स्या ते पनीयसी
३ २ ३१२३ १२ २२ ३ २ ३१ २
समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आभर ॥ १ ॥(१०२२)

व्याख्याता (४१९)

अथ द्वितीया—

१ २ २ ३ ३२ ३१२ १२ ३२३
आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते। सुश्चन्द्र दस्म

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २३१२३ १ २ ३१२ ३ २ ३१२

त्रिश्पते हव्यवाट् तुभ्यं हूयत इषꣳ स्तोतृभ्य आभर॥२॥(१०२३)

पदपाठः—आ अ० । ते ६ । अग्ने सं० । ऋचा ३ । हविः १ । शुक्रस्य ६ । ज्योतिषस्पते, सुश्चन्द्र, दस्म, विश्पते, हव्यवाट् सं० । तुभ्यम् ४ । हूयते क्रि० । इषम् २ । स्तोतृभ्यः ४ । आभर क्रि० ॥

अन्वितपदार्थः—(अग्ने) पावक ! (शुक्रस्य) वीर्यवतः शुक्रस्य वा (ते) तव (ऋचा) याज्यानुवाक्यया सह (तुभ्यम् हविः आ हूयते) (ज्योतिषस्पते, हव्यवाट्), (विश्पते) प्रजानां पालक ! (सुश्चन्द्र) सुष्ठ्वाह्लादक ! (दस्म) दाहकाग्ने ! (स्तोतृभ्यः) ऋत्विगादिभ्यः (इषम्) अन्नम् (आभर) ॥ऋग्वेदे तु ५ । ६ । ५ ज्योतिषः—शोचिष इतिपाठः ॥ २ ॥

भाषार्थः—(अग्ने) अग्ने ! (शुक्रस्य) वीर्यवान् वा शुक्र (ते) तेरे (ऋचा) याज्यानुवाक्यादि मन्त्र के साथ (तुभ्यम्) तेरे लिये (हविः) पुरोडाशादि हव्य (आ हूयते) होमा जाता है सो (ज्योतिषस्पते) ज्योति के स्वामिन् ! (हव्यवाट्) हव्य पहुंचने वाले ! (विश्पते) प्रजापालक ! (सुश्चन्द्र) भले प्रकार आह्लादन करने वाले ! (दस्म) दाहक ! अग्ने ! (स्तोतृभ्यः) ऋत्विगादि के लिये (इषम्) अन्न (आभर) प्राप्त करा ॥ ऋ० ५ । ६ । ५ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१२ ३१२ ३१२ ३२३१२

ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि । उतो न उत्पुपूर्या

३१२ ३१२ ३२३१२

उक्थेषु शवसस्पत इषꣳस्तोतृभ्य आभर॥३॥[२१](१०२४)

पदपाठः—आ अ० । उभे २ । सुश्चन्द्र, विश्पते सं० । दर्वी २ । श्रीणीषे क्रि० । आसनि ७ । उतो अ० । नः २। उत्पुपूर्याः क्रि० । उक्थेषु ७ । शवसस्पते सं० । इषम् । स्तोतृभ्यः । आभर ॥

CC-0. Gurukul Kangri University, Haridwar

अन्वितपदार्थः- (सुश्चन्द्र) शोभनाह्लादक ! अग्ने ! (उभे) द्वे (दर्वी) दव्यौ हविःपूर्णे जुहूप्रभृती (आसनि) आस्ये (आश्रीणीषे) पचसि (उतो) अपिच (नः) अस्मान् (उक्थेषु) यज्ञेषु (उत्पुपूर्याः) बलैरुत्पूरय (शवसस्पते) बलपते ! (स्तोतृभ्यः इषमाभर) ॥ ऋग्वेदे तु ५।६।९। उभे सुश्चन्द्र सर्पिषः इत्यन्तरं प्रथमे पादे ॥३॥

भाषार्थः—(सुश्चन्द्र) शोभनाह्लादक ! अग्ने ! (उभे) दोनों (दर्वी) हव्यभरे जुहू आदि पात्रों को (आसनि) मुख में (आश्रीणीषे) पकाता है (उतो) और (नः) हमको (उक्थेषु) यज्ञों में (उत्पुपूर्याः) बलों से भर (शवसस्पते) बलपते ! (स्तोतृभ्यः इषमाभर) ऋत्विगादि के लिये अन्न प्राप्त करा ॥ ऋ० ५ । ६ । ९ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ द्वितीयतृचस्य-नृमेध ऋषिः। इन्द्रो देवता । उष्णिक्छन्दः । तत्र प्रथमा-

१ २ ३ १ २ २ १ २ ३ २ ३ २ ३ १ २

इन्द्राय साम गायत विप्राय बृहते बृहत् । ब्रह्मकृते

३ १ २ ३ १ २

विपश्चिते पनस्यवे ॥१॥ (१०२५) व्याख्याता (३८८)

अथ द्वितीया-

१र २र ३ १ २ ३ १र २र

त्वमिन्द्राभिभूरसि त्वꣳ सूर्यमरोचयः ।

३ १ २ ३ १ २ ३ १ २

विश्वकर्मा विश्वदेवो महाँ असि ॥ १ ॥ (१०२६)

पदपाठः- त्वम् १ । इन्द्र सं० । अभिभूः १ । असि क्रि० । त्वम् । सूर्यम् २ । अरोचयः क्रि० । विश्वकर्मा, विश्वदेवः, महान् १ । असि ॥

अन्वितपदार्थः-(इन्द्र) परमेश्वर! (त्वम्) (अभिभूः) सर्वाभिभावुकः (असि) भवसि (त्वम् सूर्यम् अरोचयः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकाशयसि । त्वं (विश्वकर्मा विश्वदेवः महान् असि) ऋग्वेदे ८ । ९८ । २ ऽपि ॥२॥

भाषार्थः—(इन्द्र) परमेश्वर ! (त्वम्) तू (अभिभूः) सब को दबासकने वाला (असि) है (त्वम्) तू ही (सूर्यम्) सूर्य को (अरोचयः) प्रकाश देता है । तू (विश्वकर्मा) जगत्स्रष्टा, (विश्वदेवः) जगत् का देव (महान्) सर्वव्यापी (असि) है ॥ ऋ० ८ । ९८ । २ में भी ॥ २ ॥

अथ तृतीया—

३ २ ३ १ २ ३ २ १२ ३ २ ३ २

विभ्राजञ्ज्योतिषा स्वाऽ३ऽरगच्छोरोचन दिवः ।

३ १ २ ३ १ २

देवास्त इन्द्र सख्याय येमिरे ॥३॥ [२२] (१०७७)

पदपाठः—विभ्राजन् १ । ज्योतिषा ३ । स्वः अ० । अगच्छः क्रि० । रोचनम् २ । दिवः ६ । देवाः १ । ते ६ । इन्द्र सं० । सख्याय ४ । येमिरे क्रि० ॥

अन्वितपदार्थः—(इन्द्र) परमेश्वर ! त्वम् (ज्योतिषा) स्वस्वरूपेण (विभ्राजन्) जगत्प्रकाशयन् (दिवः) द्युलोकस्य (रोचनम्) प्रकाशकं (स्वः) आनन्दस्वरूपम् (अगच्छः) प्राप्नोषि (देवाः) विद्वांसः (ते) तव (सख्याय) सौहार्दाय (येमिरे) प्रयतन्ते ॥ ऋग्वेदे ८ । ९८ । ३ ऽपि ॥३॥

भाषार्थः— (इन्द्र) परमेश्वर ! तू (ज्योतिषा) अपने ज्योतिःस्वरूप से (विभ्राजन्) जगत् को प्रकाश पहुंचाता हुवा (दिवः) द्युलोक के (रोचनम्) प्रकाशक (स्वः) अपने आनन्दस्वरूप को (अगच्छः) प्राप्त है (देवाः) विद्वान् लोग (ते) तेरी (सख्याय) मित्रता के लिये (येमिरे) यत्न करते हैं ॥ ऋ० ८ । ९८ । ३ में भी ॥ ३ ॥

अथ तृतीयतृचस्य—गोतमो राहूगण ऋषिः । इन्द्रो देवता ।

अनुष्टुप्छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २

असावि सोम इन्द्र ते शविष्ठ धृष्णवागहि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३२उ ३ २ ३ २ ३ १ २
आ त्वा पृणक्किन्द्रियꣳ रजःसूर्यो न रश्मिभिः॥१॥(१०२८)

व्याख्याता (३४७)

अथ द्वितीया–

१ २ ३१२ ३२ ३ १२३ १२
आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी।
३ २३ २३२३ १२ ३१२
अर्वाचीनꣳ सुतेमनो ग्रावा कृणोतु वग्नुना ॥२॥ (१०२९)

पदपाठः–आतिष्ठ क्रि० । वृत्रहन् सं० । रथम् २ । युक्ता १ । ते ४ । ब्रह्मणा ३ । हरी १ । अर्वाचीनम् २ । सु अ० । ते ६ । मनः २ । ग्रावा १ । कृणोतु क्रि० । वग्नुना ३॥

अन्वितपदार्थः–(वृत्रहन्) हे शत्रूणां हन्तः ! (ते) त्वदर्थं (ब्रह्मणा) यानसमयोचितेश्वरप्रार्थनामन्त्रेण सह (हरी) अश्वौ (युक्ता) युक्तौ योजितौ स्तः । तं युक्ताश्वं (रथम् आतिष्ठ) । (ग्रावा) सोमाभिषवपाषाणः (ते) तव (मनः) हृदयम् (वग्नुना) वाचा शब्देन निघं० १।११ (अर्वाचीनं) नूतनं (सुकृणोतु) सुकरोतु ॥ ऋग्वेदे १।८४।३ यजुर्वेदेचाऽपि ८ । ३३ ॥ २ ॥

भावार्थः–(वृत्रहन्) हे शत्रुविनाशक ! (ते) आप के लिये (ब्रह्मणा) चढ़ाई के समयोचित ईश्वरप्रार्थनाविषयक मन्त्र से (हरी) दो घोड़े (युक्ता) जोड़े हैं । उस घोड़े जुड़े (रथम्) रथ में (आतिष्ठ) बैठिये । (ग्रावा) सोमाभिषव करने का पत्थर (ते) आप के (मनः) हृदय को (वग्नुना) शब्द से [निघं० १ । ११] (अर्वाचीनम्) नवीन (सुकृणोतु) अच्छे प्रकार करे ॥ ऋ० १ । ८४ । ३ तथा यजुः ८ । ३३ में भी ॥ २ ॥

अथ तृतीया–

२ ३ १२ २२ ३१ २ १२ ३१२
इन्द्रमिद्धरी वहतोप्रतिधृष्टशवसम् । ऋषीणाꣳ सुष्टुती-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२२ ३ २ ३ १ २

रुप यज्ञं च मानुषाणाम् ॥ ३ ॥ [२३] (१०३०)

पदपाठः—इन्द्रम् २ । इत् अ० । हरी १ । वहतः क्रि० । अप्रतिधृष्टशवसम् २ । ऋषीणाम् ६ । सुष्टुतीः २ । उप अ० । यज्ञम् २ । च अ० । मानुषाणाम् ६ ॥

अन्वितपदार्थः—(अप्रतिधृष्टशवसम्) केनाप्यधर्षित बलम् (इन्द्रम्) राजानम् (इत्) एव (हरी) उक्ताश्वौ (वहतः) यानयुक्तौ प्रापयतः (ऋषीणाम्) द्रष्टॄणां (सुष्टुतीः) शोभनाः स्तुतीः (मानुषाणाम्) मनुष्याणां (यज्ञं च), (उप) इन्द्र उपाप्नोति इति शेषः ॥

ऋग्वेदे तु १ । ८४ । २ ऋषीणां च स्तुतीः इतिपाठः ॥ यजुर्वेदे ८ । ३४ ऽपि ॥ ३ ॥

भाषार्थः—(अप्रतिधृष्टशवसम्) किसी से न दबने वाले बल युक्त (इन्द्रम्) राजा को (इत्) ही (हरी) उक्त अश्व (वहतः) लेचलते हैं । (ऋषीणाम्) द्रष्टाओं की स्तुतियों (च) और (मानुषाणाम्) मनुष्यों के (यज्ञम्) यज्ञ को भी इन्द्र ही (उप) प्राप्त होता है । ऋ० १ । ८४ । २ यजुः ८ । ३४ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

इति षष्ठाध्यायस्य सप्तमः खण्डः ॥

इति तृतीयः प्रपाठकः

इति

श्रीमत्कण्ववंशावतंस पण्डित हज़ारीलाल स्वामिसूनुना हस्तिनापुर पार्श्ववर्ति परीक्षितगढ निवासिना तुलसीराम स्वामिना कृते सामवेदभाष्योत्तरार्चिके षष्ठोऽध्यायः ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ सप्तमोऽध्यायः

अथ चतुर्थः प्रपाठकः

तत्र

प्रथमखण्डे प्रथमर्चस्य सिकतानिवारी ऋषिगणः, सोमोदेवता । जगतीछन्दः । तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १
ज्योतिर्यज्ञस्य पवते मधु प्रियं, पिता देवानां जनिता विभू-
२ १ २ ३ १ २ ३ १ २ ३क २र ३ १ २ ३ १ २ ३
वसुः । दधाति रत्नꣳ स्वधयोरपीच्यं, मदिन्तमोमत्सर इन्द्रि-
१र २र
यो रसः ॥ १ ॥ (१०३१)

पदपाठः—ज्योतिः १ । यज्ञस्य ६ । पवते क्रि० । मधु, प्रियम् २ । पिता १ । देवानाम् ६ । जनिता १ । विभूवसुः १ । दधाति क्रि० । रत्नम् २ । स्वधयोः ७ । अपीच्यम् २ । मदिन्तमः, मत्सरः, इन्द्रियः, रसः १ ॥

अन्वितपदार्थः—(यज्ञस्य) ज्योतिष्टोमादेः (ज्योतिः) दीपकः (देवानां पिता) वाय्वादिदेवानां पालकः (जनिता) तेषां संस्कारजन्मापेक्षयोत्पादकः जनकत्वप्रकार उक्तो मनुना यथा—"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति । (विभूवसुः) बहुधनः (मदिन्तमः) अतिशयितहर्षप्रदः (मत्सरः) स्वयंहृष्टः (इन्द्रियः) इन्द्रेणजुष्टः (रसः) सोमरसः (प्रियं मधु) प्रीतिकरं माधुर्यं (पवते) क्षरति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथा (स्वधयोः) द्यावापृथिव्योः (अपीच्यं) गूढं (रत्नम्) सारभूतं वस्तुजातं (दधाति) यज्ञानुष्ठातृन्धारयति ॥ ऋग्वेदे ९ । ८६ । १० ऽपि ॥ १ ॥

भाषार्थः-(यज्ञस्य) यज्ञ की (ज्योतिः) ज्योति, (देवानां पिता) वायुआदि देवों का पालक, (जनिता) उन को संस्कारापेक्षया जन्म देने वाला, (विभूवसुः) बहुत धनवान्, (मदिन्तमः) अतिशय हर्षदायक, (मत्सरः) हर्षयुक्त, (इन्द्रियः) इन्द्र से सेवित (रसः) सोमरस (प्रियं मधु) प्यारे माधुर्य को (पवते) टपकाता और (स्वधयोः) द्युलोक और पृथिवी में (अपीच्यम्) गूढ़ (रत्नम्) सारवस्तु को (दधाति) याज्ञिकों को धारण कराता है ॥ सोम को उत्पादक इस लिये कहा है कि वह होम में हुत होकर मनु के लेखानुसार वृष्टि,अन्न और प्रजा को उत्पन्न करता है । मनु का श्लोक देखो ऊपर संस्कृत पृष्ठ ११२५ पं० १९॥ में ऋ० ९ । ८६ । १० में भी ॥ १ ॥

अथ द्वितीया-

३ १२३१२३क २र ३ १२३२ ३१२ ३२
अभिक्रन्दन्कलशं वाज्यर्षति, पतिर्दिवः शतधारो विचक्षणः ।
१२३२३ १२ ३१ २३ १ २३१२
हरिर्मित्रस्य सदनेषु सीदति, मर्मृजानोविभिः सिन्धुभिर्वृषा ॥
॥ २ ॥ (१०३२)

पदपाठः-अभिक्रन्दन् १ । कलशम् २ । वाजी १ । अर्षति क्रि० । पतिः १ । दिवः ६ । शतधारः, विचक्षणः, हरिः १ । मित्रस्य ६ । सदनेषु ७ । सीदति क्रि० । मर्मृजानः १ । अविभिः, सिन्धुभिः ३ । वृषा १ ॥

अन्वितपदार्थः-(वाजी) वेगवान्बलवान्वा,(विचक्षणः) दृष्टिप्रसादकरः, (हरिः) हरितः, (वृषा) वृष्टिहेतुः, (सिन्धुभिः) स्यन्दनसाधनैः (अविभिः) अविरोमोद्भवैर्दशापवित्रैः (मर्मृजानः) शोध्यमानः, (अभिक्रन्दन्) शब्दं कुर्वन् (कलशम्) द्रोणकलशम् (अर्षति)

गच्छति । तथा (शतधारः) होमेन असंख्यधारोभूत्वा (मित्रस्य) आदित्यस्य (सदनेषु) द्युलोके (सीदति) उपतिष्ठते तदा (दिवः) द्युलोकस्यापि (पतिः) पालको-जायते ॥ ऋग्वेदे ९ । ८६ । ११ ऽपि ॥ २ ॥

भाषार्थः—(वाजी) वेग वा बल वाला, (विचक्षणः) दृष्टि को प्रसन्न करने वाला, (हरिः) हरा, (वृषा) वृष्टि करने का हेतु, (सिन्धुभिः अविभिः) टपकाने के साधन दशापवित्रों से (मर्मृजानः) शोधा जाता हुवा (अभि-क्रन्दन्) शब्द करता हुवा (कलशम्) द्रोणकलश में (अर्षति) जाता और (शतधारः) फिर होम से अनेक धारों वाला होकर (मित्रस्य) सूर्य के (सदनेषु) द्युलोकों में (सीदति) उपस्थित होता है । तब (दिवः) द्युलोक का (पतिः) पालक होता है ॥ ऋ० ९ । ८६ । ११ में भी ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १र २र
अग्रे सिन्धूनां पवमानो अर्ष, स्यग्रे वाचो अग्रियो गोषु
२ ३ १ २ ३ १र २र ३ २
गच्छसि । अग्रे वाजस्य भजसे महद्धनꣳ स्वायुधः
३ १ २
सोतृभिः सोम सूयसे ॥ ३ ॥ [१] (१०३३)

पदपाठः—अग्रे ७ । सिन्धूनाम् ६ । पवमानः १ । अर्षसि क्रि० । अग्रे । वाचः ६ । अग्रियः १ । गोषु ७ । गच्छसि क्रि० । अग्रे । वाजस्य ६ । भजसे क्रि० । महत्, धनम् २ । स्वायुधः १ । सोतृभिः ३ । सोम सं० । सूयसे क्रि० ॥

अन्वितपदार्थः—सोम ! त्वं (सिन्धूनाम्) स्यन्दन स्वभावानामुदकानाम् (अग्रे) पुरस्तात् (पवमानः) पूयमानःसन् " (अर्षसि) गच्छसि वृष्ट्योदकं जनयितु-माहुतिद्वारान्तरिक्षे गच्छसीत्यर्थः ।" इत्येव सायणः तथा (वाचः) माध्यमिकाया अपि (अग्रियः) अग्रणीः सन्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गच्छसि तथा (गोषु) रश्मिषु तेषाम् (अग्रे गच्छसि)। तथा (वाजस्य) बलस्य उपयोगभूतं (महत् धनं) (भजसे) सेवयसे तथा (स्वायुधः) सुष्ठुसाधनस्त्वं (सोतृभिः) अभिषुण्वद्भिरध्वर्य्वादिभिः (सूयसे) अभिषूयसे ॥

ऋग्वेदे तु ९। ८६। १२ अर्षति, गच्छति, महाधनं, सोमसूयसे=पूयते वृषेति पाठभेदाः ॥ ३ ॥

भाषार्थः-सोम तू (सिन्धूनाम्) बादल जलों के (अग्रे) आगे (पवमानः) शोधा हुवा " (अर्षसि) जाता है अर्थात् वृष्टि से जल उत्पन्न करने आहुति द्वारा अन्तरिक्ष में जाता है ॥" यही अर्थ सायणाचार्य ने किया है। तथा (वाचः) वाणी का भी (अग्रियः) मुखिया होता हुवा और (गोषु) किरणों में उन के (अग्रे) आगे जाता है। तथा (वाजस्य) बल के उपयोगी (महत् धनम्) उत्तम धन का (भजसे) सेवन कराता है तथा (स्वायुधः) भले सिलबट्टों वाला (सोतृभिः) ऋत्विजों द्वारा (सूयसे) अभिषुत किया जाता है ॥

तात्पर्य यह है कि सोम होम से वर्षा और पान से बल, सुस्वर वाणी और धन का उपयोगी है ॥ ऋ० ९। ८६। १२ के पाठभेद संस्कृतभाष्य में देखिये ॥३॥

अथ द्वितीय तृचस्य-कश्यप ऋषिः। सोमो देवता। गायत्री छन्दः ॥ तत्र प्रथमा-

१ २ ३ २ ३ १ २ ३ १र २र ३ २

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया।

३ १ २ ३ १र २र

शुक्रासो वीरयाशवः ॥ १ ॥ (१०३४) व्याख्याता (४८२)

अथ द्वितीया—

३ १ २ ३ १ २ ३ १ २ ३ १ २

शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः।

१ २ ३ १ २ ३ १ २

पवन्ते वारे अव्यये ॥ २ ॥ (१०३५)

पदपाठः-शुम्भमानाः १। ऋतायुभिः ३। मृज्यमानाः १। गभस्त्योः ७। पवन्ते क्रि०। वारे, अव्यये ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(ऋतायुभिः) यज्ञेच्छुभिर्ऋत्विग्भिः (शुम्भमानाः) शोभितीक्रियमाणाः (गभस्त्योः) अङ्गुलिषु (मृज्यमानाः) शोध्यमानाः सोमाः (अव्यये) अव्यूर्णामये (वारे) बालविरचिते दशापवित्रे (पवन्ते) पूयन्ते ॥ऋग्वेदे ९ । ६४ । ५ ऽपि ॥ २ ॥

भाषार्थः-(ऋतायुभिः) यज्ञ चाहने वाले ऋत्विजों से (शुम्भमानाः) शोभित किये जाने वाले और (गभस्त्योः) अङ्गुलियों में (मृज्यमानाः) शोधे जाते हुवे सोम (अव्यये) ऊनी (वारे) बालों से बने दशापवित्र पर (पवन्ते) स्वच्छ किये जाते हैं ॥ ऋ० ९ । ६४ । ५ में भी ॥२॥

अथ तृतीया -

१२ २२ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा।
१ २ ३ १२ २२
पवन्तामान्तरिक्ष्या ॥ ३ ॥ [२] (१०३६)

पदपाठः-ते १ । विश्वा २ । दाशुषे ४ । वसु २ । सोमाः १ । दिव्यानि २ । पार्थिवा २ । पवन्ताम् क्रि० । आन्तरिक्ष्या २ ॥

अन्वितपदार्थः-(ते सोमाः) प्रथममन्त्रानुकूलफलदाः (दाशुषे) यजमानाय हूयमानाः सन्तः (विश्वा) सर्वाणि (दिव्यानि) दिवि भवानि (पार्थिवा) पार्थिवानि (आन्तरिक्ष्या) अन्तरिक्षस्थानि च (वसु) वसूनि धनानि गवाश्वप्रभृतीनि (पवन्ताम्) सर्वतः क्षरन्तु ॥ ऋग्वेदे ९ । ६४ । ६ ऽपि ॥ ३ ॥

भाषार्थः- (ते सोमाः) वे सोम (दाशुषे) इस सूक्त की प्रथम ऋचा के अनुकूल यज्ञानुष्ठानी के लिये (विश्वा) सब (दिव्यानि, पार्थिवा, आन्तरिक्ष्या)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तीनों लोकों के (वसु) गवाश्वादि धन (पवन्ताम्) सर्वतः वर्षावें ॥ ऋ० ९ । ६४ । ६ में भी ॥ ३ ॥

अथ तृतीयदशर्चसूक्तस्य मेधातिथिर्ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ २ ३ १ २ ३ १ २
पवस्व देववीरति पवित्रꣳ सोम रꣳह्या ।
१ २ ३ १ २ २
इन्द्रमिन्दो वृषाविश ॥ १ ॥ (१०३७)

पदपाठः—पवस्व क्रि० । देववीः १ । अति अ० । पवित्रम् २ । सोम सं० । रंह्या ३ । इन्द्रम् २ । इन्दो सं० । वृषा १ । आविश क्रि० ॥

अन्वितपदार्थः—(इन्दो) आर्द्र ! (सोम !) (देववीः) देवकामः (वृषा) वर्षकस्त्वं (रंह्या) वेगेन (पवित्रम्) यथा स्यात्तथा (अतिपवस्व) अतिक्षर किञ्च (इन्द्रम्) वृष्टिकरं वायुम् (आविश) ॥

आर्द्रः सोमोऽग्नौ हुत्वा वृष्टिकामेन यजमानेन वायौ प्रवेष्टव्यः ॥ ऋग्वेदे ९ । २ । १ ऽपि ॥ १ ॥

भावार्थः—(इन्दो) गीले ! (सोम) सोम ! (देववीः) देवों का चाहा (वृषा) वृष्टिकारक तू (रंह्या) वेगसे (पवित्रम्) पवित्रता के लिये (अति पवस्व) बर्ष और (इन्द्रम्) वृष्टिकारक वायु में (आविश) प्रवेश कर ॥

अर्थात् गीला सोम अग्नि में होम कर वृष्टि चाहने वाले यजमान को वृष्टिकारक वायु में प्रविष्ट कराना चाहिये ॥ ऋ० ९ । २ । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ २ ३ २ ३ १ २ ३ १
आवच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।
१ २ २ ३ २
आ योनिं धर्णसिः सदः ॥ २ ॥ (१०३८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-आवच्यस्व क्रि० । महि, प्सरः २ । वृषा १ । इन्दो सं० । द्युम्नवत्तमः १ । आ अ० । योनिम् २ । धर्णसिः १ । सदः क्रि० ॥

अन्वितपदार्थः-(इन्दो) सोम ! (वृषा) वृष्टिकरः (द्युम्नवत्तमः) अतएव धनधान्यवत्तमः (धर्णसिः) अतएव च विश्वस्य धारकस्त्वम् (महि) महत् (प्सरः) पानीयम् (अन्धः) अन्नं च (आवच्यस्व) अस्मान्प्रापय किञ्च (योनिं) स्वकीयं स्थानं दिवम् (आसदः) आसीद ॥

सोमो यज्ञे आहुतिं गतो द्युस्थो भूत्वा धनधान्यसमृद्धिकरो जायते इति भावः ॥ ऋग्वेदे ९ । २ । २ ऽपि ॥ २ ॥

भावार्थः-(इन्दो) सोम ! (वृषा) वृष्टिकारक इसी से (द्युम्नवत्तमः) अत्यन्त धन धान्यवान् और इसी से (धर्णसिः) विश्व का धारक तू (महि) बहुत (प्सरः) जल और (अन्धः) अन्न को (आवच्यस्व) हमें प्राप्त करा और तू (योनिम्) अपने स्थान आकाश में (आसदः) विराज ॥

भावार्थ यह है कि यज्ञ में प्रयुक्त आहुति को प्राप्त हुवा सोम आकाशस्थ होकर धनधान्यादि की समृद्धिकारक हो जाता है ॥ ऋ० ९ । २ । २ में भी ॥२॥

अथ तृतीया—

१ २ ३ २उ ३ १ २ ३१ २ ३१ २
अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।
३ १ २ ३१ २
अपो वसिष्ट सुक्रतुः ॥ ३ ॥ (१०३९)

पदपाठः-अधुक्षत क्रि० । प्रियं, मधु २ । धारा १ । सुतस्य, वेधसः ६ । अपः २ । वसिष्ट क्रि० । सुक्रतुः १ ॥

अन्वितपदार्थः-यस्य (सुतस्य) अभिषुतस्य (वेधसः) अभिलषितवृष्ट्यादिविधातुः (सोमस्य धारा प्रियं मधु) (अधुक्षत) दुग्धे । सः (सुक्रतुः) सुकर्मा सोमः (अपः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेघस्थजलानि (वसिष्ट) आच्छादितानि कुर्य्यात् ॥ ऋग्वेदे ९ । २ । ३ ऽपि ॥ ३ ॥

भाषार्थः—जिस (सुतस्य) अभिषुत, (वेधसः) वृष्ट्यादिके विधाता, (सोमस्य) सोम की (धारा) धार (प्रियं मधु) प्यारे मधुर रस को (अधुक्षत) दुहती है। वह (सुक्रतुः) सुकर्मा सोम (अपः) मेघस्थ जलों को (वसिष्ट) आच्छादित करे ॥ ऋ० ९ । २ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

३ १ २ ३१र २र ३ १ २
महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः ।
१र २र ३ १ २
यद्गोभिर्वासयिष्यसे ॥ ४ ॥ (१०४०)

पदपाठः—महान्तम् त्वा २ । महीः १ । अनु अ० । आपः १ । अर्षन्ति क्रि० । सिन्धवः १ । यत् १ । गोभिः ३ । वासयिष्यसे क्रि० ॥

अन्वितपदार्थः—सोम ! (यत्) यदा त्वम् (गोभिः) किरणैः सह (वासयिष्यसे) आच्छादयिष्यसे तदा (महान्तं) गुणैः प्रवृद्धं (त्वा अनु) त्वामनु (सिन्धवः महीः) स्पन्दन शीला महत्यः (आपः) वर्षाः (अर्षन्ति) प्राप्स्यन्ति ॥

सोमयागेन वृष्टिपर्य्याप्तता जायत इतिभावः ॥ ऋग्वेदे ९ । २ । ४ ऽपि ॥ ४ ॥

भाषार्थः—सोम ! तू (यत्) जब (गोभिः) किरणों के साथ (वासयिष्यसे) आच्छादन करेगा तब (महान्तम्) गुणों में बड़े (त्वा) तुझ को (अनु) लक्ष्य करके (सिन्धवः) बहने वाली (महीः) बड़ी (आपः) वर्षायें (अर्षन्ति) आवेंगी ॥

अर्थात् सोमयाग से पर्याप्त वर्षा होती है ॥ ऋ० ९ । २ । ४ में भी ॥ ४ ॥

अथ पञ्चमी—

३ २ ३ १ २ ३ २ ३१२ ३२
समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३१२ ३ २
सोमः पवित्रे अस्मयुः ॥ ५ ॥ (१०४१)

पदपाठः—समुद्रः १ । अप्सु ७ । मामृजे क्रि० । विष्टम्भः, धरुणः १ । दिवः ६ । सोमः १ । पवित्रे ७ । अस्मयुः १ ॥

अन्वितपदार्थः—(समुद्रः) समुद्रवन्ति रसा अस्मात्सः (विष्टम्भः) आधारः अतएव (दिवः धरुणः) दिवोधारकः (अस्मयुः) अस्मत्कामः (सोमः) ओषधिराजः (अप्सु) जलेषु (मामृजे) मर्मृज्यते पवित्रेभिषिच्यते ॥ ऋग्वेदे ९ । २ । ५ ऽपि ॥ ५ ॥

भाषार्थः—(समुद्रः) रसभरा (विष्टम्भः) आधार और इसी से (दिवः धरुणः द्युलोक का धारक (अस्मयुः) हमारा हितकामुक (सोमः) सोम (अप्सु) वसतीवरीनामक जलों में (मामृजे) दशापवित्र पर अभिषिक्त किया जाता है ॥ ऋ० ९ । २ । ५ में भी ॥ ५ ॥

अथ षष्ठी—

१ २ ३ २ ३ १ २ ३ २ ३ १र २र ३ २
अचिक्रदद्वृषाहरिर्महान्मित्रो न दर्शतः ।
१ २र
सꣳ सूर्येण दिद्युते ॥ ६ ॥ (१०४०) व्याख्याता (११७)

अथ सप्तमी—

२ ३ १ २ ३ १ २ ३ १ २
गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।
२ ३ १ २ ३ १ २
याभिर्मदाय शुम्भसे ॥ ७ ॥ (१०४३)

पदपाठः—गिरः १ । ते ६ । इन्दो सं० । ओजसा ३ । मर्मृज्यन्ते क्रि० । अपस्युवः १ । याभिः ३ । मदाय ४ । शुम्भसे क्रि० ॥

अन्वितपदार्थः—(इन्दो) सोम ! (ते) तव त्वत्कृ-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तेन (ओजसा) बलेन ताः (अपस्युवः) कर्मेच्छवः पुरुषार्थपराः (गिरः) वाचः (मर्मृज्यन्ते) शोध्यन्ते (याभिः) वाग्भिः सह (मदाय) हर्षाय (शुम्भसे) शोध्यसे ॥ सोमपानेन ओजोबलं वाक्सौष्ठवं च जायते तदर्थं मनुष्यैः सोमाभिषवोविधेय इत्यर्थः ॥ ऋग्वेदे ९ । २ । ७ ऽपि ॥ ७ ॥

भाषार्थः-(इन्दो) सोम ! (ते) तेरे किये (ओजसा) बल के साथ वे (अपस्युवः) कर्म=पुरुषार्थ चाहने वाली (गिरः) वाणियें (मर्मृज्यन्ते) शोधी जाती हैं (याभिः) जिन वाणियों सहित (मदाय) हर्ष के लि (शुम्भसे) शुद्ध किया जाता है ॥ तात्पर्य यह है कि सोमपान से ओज, बल, दृष्टि, पुष्टि और वाणी सुधरती है एतदर्थ इस का अभिषव करना चाहिये ॥ ऋ० ९ । २ । ७ में भी ॥ ७ ॥

अथाऽष्टमी-

२ ३ १ २ ३ १ २ ३ १ २
तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ।
२ ३ १ २ ३ २
तव प्रशस्तय महे ॥ ८ ॥ (१०३४)

पदपाठः-तम्, त्वा २ । मदाय ४ । घृष्वये ४ । उ अ० । लोककृत्नुम् २ । ईमहे क्रि० । तव ६ । प्रशस्तये, महे ४ ॥

अन्वितपदार्थः-वयं यजमानाः (लोककृत्नुं) लोकोदृष्टिस्तत्करं (त्वा) त्वां (तं) पूर्वोक्तगुणकरं सोमम् (उ) निश्चयेन (तव) सोमस्य (महे प्रशस्तये) महते प्रशंसनाय तथा (घृष्वये) शत्रूणां घर्षणक्षमाय (मदाय) हर्षाय (ईमहे) इच्छामः ॥ पूर्वोक्त वाग्दृष्टिसौकर्यादिलाभाय सोमरसो मनुष्यैरेष्टव्य इति भावः ॥ ऋग्वेदे तु ९ । २ । ८ प्रशस्तयो महीरिति पाठः ॥ ८ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-हम यजमान लोग (लोककृतुम्) दृष्टि के सहायक (तम्) उस पूर्वोक्त वाणी सुधारने वाले बलपराक्रमादिवर्धक (त्वा) तुझ सोम को (उ) निश्चय (तव) तुझ सोम की (महे प्रशस्तये) बड़ी प्रशंसा के लिये तथा (वृ-ङ्वये) शत्रुवों को रगड़ डालने में समर्थ (मदाय) हृष्टि पुष्टि के लिये (ईमहे) चाहते हैं॥ अर्थात् मनुष्यों को दृष्टि वाणी बल शत्रुनाश इत्यादि प्रयोजनों के लिये सोम रस की इच्छा करनी चाहिये ॥ ऋ० ९ । २ । ८ के पाठभेद संस्कृत भाष्य में देखिये ॥ ८ ॥

अथ नवमी—

३ १ २ ३ १ २ ३ १ २ ३ २ ३ २

गोषा इन्दो नृषा अस्यश्वसा वाजसा उत ।

३ २ ३ १ २ ३ २

आत्मा यज्ञस्य पूर्व्यः ॥ ९ ॥ (१०४५)

पदपाठः-गोषाः १ । इन्दो सं० । नृषाः १ । असि क्रि० । अश्वसाः,वाज-साः १ । उत अ० । आत्मा १ । यज्ञस्य ६ । पूर्व्यः १ ॥

अन्वितपदार्थः-(इन्दो) सोम ! (गोषाः) गवां वेन्द्रियाणां दाता (अश्वसाः) अश्वानां वा प्राणानां दाता (वाजसाः) अन्नस्य वा बलस्य दाता (नृषाः) वीराणां दाता (उत) तथा (यज्ञस्य) ज्योतिष्टोमादेः (पूर्व्यः) पुराणःसनातनः (आत्मा असि)॥ ऋग्वेदे ९ । २ । ९ ऽपि ॥९॥

भाषार्थः-(इन्दो) सोम ! (गोषाः) गौ वा इन्द्रियों का दाता (अश्वसाः) घोड़े वा प्राणों का दाता (वाजसाः) अन्न वा बल का दाता (नृषाः) वीर पुत्रादि का दाता (उत) और (यज्ञस्य) यज्ञ का (पूर्व्यः) सनातन (आत्मा) आत्मा [रूह] (असि) है ॥ ऋ० ९ । २ । ९ में भी ॥ ९ ॥

अथ दशमी—

३ १ २ ३ १ २ २ २ ३ १ २

अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ १ २
पर्जन्यो वृष्टिमाँ इव ॥ १० ॥ [३] (१०४६)

पदपाठः—अस्मभ्यम् ४। इन्दो सं०। इन्द्रियम् २। मधोः ६। पवस्व क्रि०। धारया ३। पर्जन्यः १। वृष्टिमान् १। इव अ०॥

अन्वितपदार्थः—(इन्दो) सोम ! (इन्द्रियम्) इन्द्रेण जुष्टमिन्द्रियस्य वीर्यस्य वा वर्धकं रसं (मधोः) मधुरस्याऽमृतस्य (धारया वृष्टिमान् पर्जन्य इव) (अस्मभ्यं) (यजमानेभ्यः (पवस्व) क्षर ॥ ऋग्वेदे ९। २। १० ऽपि ॥१०॥

भाषार्थः— (इन्दो) सोम ! (इन्द्रियम्) इन्द्र से सेवित वा वीयवर्धक रस को (मधोः) मधुराऽमृत की (धारया) धार से वृष्टिमान् पर्जन्य इव) वर्षा वाले बादल सा (अस्मभ्यम्) हम यजमानों के लिये (पवस्व) वर्षा ॥ ऋ० ९। २। १० में भी ॥ १० ॥

इति षष्ठाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ तृतीये खण्डे प्रथमस्य दशर्चसूक्तस्य—हिरण्यस्तूप ऋषिः। पवमानः सोमो देवता। १। ३। ४। १० गायत्री २। ५। ८। ९ निचृद्गायत्री ६। ७ विराड् गायत्री च छन्दः॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
सना च सोम जेषि च पवमान महिश्रवः।
१ २ ३ १ २
अथा नो वस्यसस्कृधि ॥ १ ॥ (१०४७)

पदपाठः—सन क्रि०। च अ०। सोम सं०। जेषि क्रि०। च। पवमान सं०। महिश्रवः सं०। अथ, आ अ०। नः २। वस्यसः २। कृधि क्रि०॥

अन्वितपदार्थः—(महिश्रवः) महाकीर्त्ते ! (पवमान, सोम) वा परमेश्वर ! (सन च) देहि च धनादि (जेषि च) विजयं च कुरु (अथ) तथा (नः) अस्मान् (वस्यसः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रेयसः (कृधि) कुरु ॥ सोमपक्षे दानादयनुग्रहसंगतिर्वात-पित्तादयनुग्रहोक्तिवत् ॥ सर्वमिदं दशर्चं सूक्तमृग्वेदे ९ । ४ । १–१० केवलमष्टम्यां वाजिन्=रयिमिति पाठभेदेना-यातमस्ति ॥ १ ॥

भाषार्थः-(सहिश्रवः) हे महाकीर्ते ! (पवमान) पवित्र ! (सोम) वा परमेश्वर ! (सन च) धनादि दान का अनुग्रह करो (जेषि च) और विजय करो (अथ) और (नः) हम को (श्रेयसः) श्रेष्ठ (कृधि) करो ॥ सोम के पक्ष में दानादि के अनुग्रहादि की संगति, वैद्यक के वातपित्तादि के अनुग्रह-कथन के समान जानिये ॥ यह पूरा सूक्त ऋ० ९ । ४ । १–१० में दशों ऋचाओं का आया है केवल ८ वीं में "वाजिन्=रयिम्" इतना पाठभेद है ॥ १ ॥

अथ द्वितीया–

२ ३ २ ३ २ ३ २ १ २ ३ १ २

सना ज्योतिः सना स्वाऽ३ऽर्विश्वा च सोम सौभगा ।

१ २ ३ १ २

अथा नो वस्यसस्कृधि ॥ २ ॥ (१०४८)

पदपाठः—सन क्रि० । ज्योतिः २ । सन । स्वः अ० । विश्वा २ । च अ० । सोम सं० । सौभगा २ । अथ० ॥

अन्वितपदार्थः–(सोम) वा परमेश्वर ! (ज्योतिः) प्रकाशं (सन) देहि (स्वः) सुखं (सन) देहि (विश्वा सौभगा च) सर्वसौभाग्यानि च देहि (अथ नः वस्यसः कृधि) पूर्ववत् ॥ २ ॥

भाषार्थः—(सोम) वा परमेश्वर ! (ज्योतिः) प्रकाश (सन) देओ (स्वः) सुख (सन) देओ (च) और (विश्वा) सब (सौभगा) सौभाग्य देओ । (अथ०) इत्यादि पूर्वमन्त्र के तुल्यार्थ जानिये ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३ २ ३ ३ १ २ ३ १ २

सना दक्षमुत क्रतुमप सोम मृधो जहि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३
अथानो० ॥ ३ ॥ (१०४१)

पदपाठः--सन क्रि० । दक्षम् २ । उत अ० । क्रतुम् २ । अप अ० । सोम सं० । मृधः २ । जहि क्रि० । अथानो० ॥

अन्वितपदार्थः-(सोम) वा परमेश्वर ! त्वं (दक्षं) बलं (सन) देहि (उत) अपिच (क्रतुं) कर्म देहि (मृधः) शत्रून् (अपजहि) नाशय ॥ ३ ॥

भाषार्थः(सोम) वा परमेश्वर ! (दक्षम्) बल (उत) और (क्रतुम्) कर्म=पुरुषार्थ (सन) दीजिये तथा (मृधः) शत्रुवों का (अपजहि) नाश कीजिये ॥ ३ ॥

अथ चतुर्थी—

१ २ ३ २ ३ २ ३ १ २ ३ १ २
पवीतारः पुनीतन सोममिन्द्राय पातवे ।
१ २ ३
अथानो० ॥ ४ ॥ (१०५०)

पदपाठः—पवीतारः सं० । पुनीतन क्रि० । सोमम् २ । इन्द्राय ४ । पातवे अ० । अथानो० ॥

अन्वितपदार्थः-(पवीतारः) हे सोमस्याभिषोतारः, परमेश्वरस्योपासका वा (इन्द्राय) परमेश्वराय वा (पातवे) शोषणार्थं स्वीकारार्थं वा (सोमम्) कोमलं हृदयं वा (पुनीतन) शोधयत ॥ ४ ॥

भाषार्थः-(पवीतारः) हे सोम के अभिषुत करने वालो ! वा परमेश्वर के उपासको ! तुम (इन्द्राय) वायु विशेष, वा परमेश्वर के लिये (पातवे) शोषणार्थ वा स्वीकारार्थ (सोमम्) सोम वा कोमल हृदय को (पुनीतन) शुद्ध करो ॥ ४ ॥

अथ पञ्चमी-

१ २ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २
त्वꣳ सूर्येन आभज तव क्रत्वा तवोतिभिः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३
अथानो० ॥ ५ ॥ (१०५१)

पदपाठः—त्वम् १ । सूर्य७ । नः २ । आभज क्रि० । तव ६ । क्रत्वा ३ । तव । ऊतिभिः ३ । अथानो० ॥

अन्वितपदार्थः—सोम ! वा परमेश्वर ! (त्वं) (तव क्रत्वा) स्वीयस्वाभाविकक्रियया तथा (तव ऊतिभिः) स्वकृताभीरक्षाभिश्च (नः) अस्मान् (सूर्य) कर्मण्यलोके (आभज) प्रापय ॥ ५ ॥

भाषार्थः—सोम ! वा परमेश्वर ! (त्वम्) तू (तव) तेरी (क्रत्वा) स्वाभाविकी क्रिया से तथा (तव) तेरी की हुई (ऊतिभिः) रक्षाओं से (नः) हम को (सूर्य) कर्मण्यलोक में (आभज) पहुंचादे ॥ ५ ॥

अथ षष्ठी—

२ ३ २ ३ २ ३ १ २ ३ १ २
तव क्रत्वा तवोतिभिर्ज्योक् पश्येम सूर्यम् ।
१ २ ३
अथानो० ॥ ६ ॥ (१०५२)

पदपाठः—तव । क्रत्वा । तव । ऊतिभिः । ज्योक् अ० । पश्येम क्रि० । सूर्यम् २ ॥ अथानो० ॥

अन्वितपदार्थः—सोम ! वा परमेश्वर ! (तव क्रत्वा तव ऊतिभिः), (ज्योक्) चिरं (सूर्यम्) कर्मण्यलोकं (पश्येम) ॥ ६ ॥

भाषार्थः—सोम ! वा परमेश्वर ! (तव क्रत्वा) तेरी स्वाभाविकी क्रिया से तथा (तव ऊतिभिः) तेरी की हुई रक्षाओं से हम (ज्योक्) चिरकाल तक (सूर्यम्) कर्मण्यलोक को (पश्येम) देखें ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ सप्तमी—

३क २र ३ १ २ ३१२ ३ २
अभ्यर्ष स्वायुध सोम द्विबर्हसꣳ रयिम् ।
१ २ ३
अथानो० ॥ ७ ॥ (१०५३)

पदपाठः-अभ्यर्ष क्रि०। स्वायुध, सोम सं०। द्विबर्हसम्, रयिम् २। अथानो०॥

अन्वितपदार्थः-(स्वायुध) स्वायोधन! (सोम) वा परमेश्वर ! (द्विबर्हसम्) द्वयोर्द्यावापृथिव्योः स्थानयोः परिवृढं (रयिम्) धनम् (अभ्यर्ष) अभिगमय ॥ ७ ॥

भाषार्थः-हे (स्वायुध) भले धर्मानुकूल युद्ध के साधनभूत ! (सोम) सोम ! वा परमेश्वर ! (द्विबर्हसम्) दोनों=द्युलोक और पृथिवीलोक स्थानों में बड़ा बड़ा (रयिम्) धनैश्वर्य (अभ्यर्ष) प्राप्त करा ॥ ७ ॥

अथाऽष्टमी—

३ २ ३ २ ३ १ २ ३ १ २ ३ २
अभ्यऽ३ऽर्षानपच्युतो वाजिन्त्समत्सु सासहिः ।
१ २ ३
अथानो० ॥ ८ ॥ (१०५४)

पदपाठः-अभ्यर्ष क्रि० । अनपच्युतः १ । वाजिन् सं० । समत्सु ७ । सासहिः १ । अथानो० ॥

अन्वितपदार्थः-(वाजिन्) बलवन्सोम ! (अनपच्युतः) शत्रुभिरनाहतः (सासहिः) शत्रूणामभिभविता त्वम् (अभ्यर्ष) अस्माकं त्वत्सेविनां (समत्सु) संग्रामेषु सर्वतः प्रसर ॥

अथवा-(वाजिन्) बलिष्ठतम ! परमेश्वर ! (अनपच्युतः) अक्षरोऽविनाशी (सासहिः) दुष्टदमनस्त्वम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(समत्सु) कामादिभिः संग्रामेषु (अभ्यर्ष) अस्माकमु-पासकानां हृदयेषु सर्वतः सहायको भव ॥ ८ ॥

भाषार्थः-(वाजिन्) बलदायक सोम ! (अनपच्युतः) अन्यों से न दबने वाला और (सासहिः) अन्यों को स्वयं दबाने में समर्थ तू (समत्सु) संग्रामों में (अभ्यर्ष) सर्वतः प्रभाव जमा ॥

अथवा-(वाजिन्) अनन्तबल ! परमेश्वर ! (अनपच्युतः) अक्षर अविनाशी (सासहिः) दुष्टदमन ! (समत्सु) कामादि शत्रुओं के साथ संग्रामों में हमारी (अभ्यर्ष) सहायता को प्राप्त हूजिये ॥ ८ ॥

अथ नवमी—

२ ३१२ ३ १२ ३ १ २

त्वां यज्ञैरवीवृधन्पवमान विधर्मणि ।

१ २ ३

अथानो० ॥ ९ ॥ (१०५५)

पदपाठः-त्वाम् २ । यज्ञैः ३ । अवीवृधन् क्रि० । पवमान सं० । विधर्मणि ७ । अथानो० ॥

अन्वितपदार्थः-(पवमान) पवित्रस्वरूप ! सोम ! वा परमेश्वर ! यजमाना उपासका वा (विधर्मणि) कर्मयज्ञे योगयज्ञे वा (त्वां) (यज्ञैः) आहुतिभिः स्तुतिभिर्वा (अवीवृधन्) वर्धयन्ति स्तुवन्ति वा ॥ ९ ॥

भाषार्थः-(पवमान) पावनस्वरूप ! सोम वा परमेश्वर ! (विधर्मणि) कर्मयज्ञ वा योगयज्ञ में (त्वाम्) तुझ को (यज्ञैः) आहुतियों वा स्तुतियों से (अवीवृधन्) यजमान बढ़ाते वा उपासक स्तुत करते हैं ॥ ९ ॥

अथ दशमी—

३१ २३ २३ २ ३१ २ ३ २ ३१ २

रयिं नश्चित्रमश्विनमिन्दो विश्वायुमाभर ।

१ २ ३ १ २

अथानो वस्यसस्कृधि ॥ १० ॥ [४] (१०५६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-रयिम् २ । नः ४ । चित्रम्, अश्विनम् २ । इन्दो सं० । विश्वायुम् २ । आभर क्रि० । अथानो० ॥

अन्वितपदार्थः-(इन्दो) सोम! वा परमेश्वर! त्वं (चित्रं) नानाविधम् (अश्विनम्) प्राणाय हितं (विश्वायुं) पूर्णायुष्यं (रयिं) धनं (नः) अस्मभ्यम् (आभर) आहर ॥१०॥

भाषार्थः-(इन्दो) सोम ! वा परमेश्वर ! (चित्रम्) अनेक प्रकार के (अश्विनम्) प्राण को हित और (विश्वायुम्) पूर्णायुरूप (रयिम्) धन (आभर) प्राप्त कराओ ॥ १० ॥

तरत्स मन्दीति चतुर्ऋचस्य द्वितीयसूक्तस्य उचथ्य ऋषिः । सोमो देवता । गायत्री छन्दः ॥तत्र प्रथमा—

२ ३ २ ३ १ २ ३ १ २ ३ १ २ २ २ ३ २ ३ १

तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी

२

धावति ॥ १ ॥ (१०५७) व्याख्याता (५००)

अथ द्वितीया—

३ १ २ ३ १ २ ३ १ २ ३ १ २

उत्सा वेद वसूनां मर्त्तस्य देव्यवसः ॥

२ ३ २ ३ १ २

तरत्स मन्दी धावति ॥ २ ॥ (१०५८)

पदपाठः-उत्सा १ । वेद क्रि० । वसूनाम् ६ । मर्त्तस्य ६ । देवी १ । अवसः अ० । तरत् १ । सः १ । मन्दी १ । धावति क्रि० ॥

अन्वितपदार्थः-(वसूनां) धनानाम् (उत्सा) उत्सरणशीला प्रदात्री (देवी) प्रद्योतमाना [धारा] (मर्त्तस्य) मनुष्यम् (अवसः) रक्षितुं (वेद) जानाति (सः) (मन्दी) हर्षपुष्टिकरः सोमः (तरत्) त्वरयन् (धावति) गच्छति ॥ ऋग्वेदे ९ । ९८ । २ ऽपि ॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(वसूनाम्) धनों की (उत्सा) देने वाली (देवी) प्रकाशमाना [सोमधारा] (मर्त्तस्य) मनुष्य की (अवसः) रक्षा करना (वेद) जानती है (सः) वह (मन्दी) हृष्टिपुष्टिकारक सोम (तरत्) त्वरा करता हुवा (धावति) गमन करता है ॥ ऋ० ९ । ९८ । २ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ २ ३ २३१ २

ध्वस्रयोः पुरुषन्त्योरासहस्राणि दद्महे ।

२३२ ३ १ २

तरत्स मन्दी धावति ॥ ३ ॥ (१०५९)

पदपाठः-ध्वस्रयोः, पुरुषन्त्योः ६ । आ अ० । सहस्राणि २ । ददहे क्रि० ॥

अन्वितपदार्थः- (ध्वस्रयोः) गतिमत्योः (पुरुषन्त्योः) पुरुषार्थवत्योः सोमधारयोः (सहस्राणि) असंख्यातानि सुखानि वयमृत्विजः (आददहे) प्रतिगृह्णीमः (तर०) ऋग्वेदे ९ । ९८ । ३ । ऽपि ॥ ३ ॥

भाषार्थः-(ध्वस्रयोः) चलने वाली (पुरुषन्त्योः) पुरुषार्थवती दो सोमधाराओं के (सहस्राणि) असंख्य समूहों को (आददहे) हम ऋत्विज् लोग ग्रहण करते हैं । तरत० पूर्ववत् ऋ० ॥ ९ । ९८ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

१२ २२ ३ १३ १२ ३१२ ३ १२

आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे ।

तरत्स मन्दी धावति ॥ ४ ॥ [५] (१०६०)

पदपाठः-आ अ० । ययोः ६ । त्रिंशतम् २ । तना २ । सहस्राणि २ । च अ० । ददहे क्रि० । तर० ॥

अन्वितपदार्थः-(ययोः) सोमस्योक्तयोर्धारयोः (त्रिंशतं सहस्राणि च) ३०००० एतत्संख्योपलक्षितानि बहूनि (तना) विस्तृतानि सुखानि (आ-ददहे) प्रतिगृह्णीमः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स मन्दी तरद्भावतीति पूर्ववत् ॥ ऋग्वेदे ९। ९८। ४ ऽपि॥४॥

भाषार्थः—(ययोः) जिन दो सोम की उक्त धाराओं के(त्रिंशतं सहस्राणि च) ३०००० संख्योपलक्षित (तना) विस्तृत मुखों को (आ-दद्महे) हम ग्रहण करते हैं "वह त्वरा करता सोम गमन करता है ॥ यह पूर्ववत् ॥ ऋ० ९ । ९८। ४ में भी ॥ ४ ॥

एते सोमा इति तृचस्य तृतीयसूक्तस्य-जमदग्निर्ऋषिः । सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

३१र २र ३ २र २र ३२
एते सोमा असृक्षत गृणानाः शवस महे ।
३१ २ ३ १ २
मदिन्तमस्य धारया ॥ १ ॥ (-१०६१)

पदपाठः—एते, सोमाः १ । असृक्षत क्रि० । गृणानाः १ । शवसे, महे ४ । मदिन्तमस्य ६ । धारया ३ ॥

अन्वितपदार्थः—(मदिन्तमस्य) हर्षयितृतमस्य सोमस्य (धारया) (एते सोमाः) रसाः (गृणानाः) प्रशस्यमानाः सन्तः (महे) महते (शवसे) बलाय तत्प्राप्त्यर्थम् (असृक्षत) अग्नौ सृज्यन्ते ॥ ऋग्वेदे तु ९।६२ । २२ शवसे=श्रवसे इति पाठः ॥ १ ॥

भाषार्थः—(मदिन्तमस्य) अत्यन्त हृष्टिपुष्टिकारक सोम की (धारया) धारा से (एते) ये (सोमाः) सोमरस (गृणानाः) प्रशंसित किये जाते हुवे (महे) बड़े (शवसे) बल के लिये (असृक्षत) अग्नि में छोड़े जाते हैं॥ ऋ० ९। ६२ । २२ का पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया—

३१र २र ३१२ ३ १ ३२ १ २
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि।
३१२ ३ १२
सनद्वाजः परिस्रव ॥ २ ॥ (१०६२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अभि अ० । गव्यानि २ । वीतये ४ । नृम्णा २ । पुनानः । अर्षसि क्रि० । सनद्वाजः १ । परिस्रव क्रि० ॥

अन्वितपदार्थः—(सनद्वाजः) अन्नोत्पादेनाऽन्नदः (पुनानः) शुद्धिकरः सोमः (नृम्णा) धनमिव प्रियतराणि (गव्यानि) सूर्यकिरणगतानि वाष्पजातानि (अभि-अर्षसि) अभिगच्छति (परिस्रव) क्षरति वर्षति च ॥ ऋग्वेदे ९ । ६२ । २३ ऽपि ॥ २ ॥

भाषार्थः—(सनद्वाजः) अन्नोत्पादन से अन्नदाता (पुनानः) शुद्धिकारक सोम (नृम्णा) धन के समान अतिप्रिय (गव्यानि) सूर्यकिरणगत भापों में (अभिअर्षसि) व्यापता और (परिस्रव) वर्षता है॥ ऋ० ९। ६२ । २३ में भी ॥२॥

अथ तृतीया—

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
उत नो गोमतीरिषा विश्वा अर्ष परिष्टुभः ।
३ २ १ २
गृणानो जमदग्निना ॥३॥ (१०६३)

पदपाठः—उत अ० । नः ४ । गोमतीः २ । इषः २ । विश्वाः २ । अर्ष क्रि० । परिष्टुभः २ । गृणानः १ । जमदग्निना ३ ॥

अन्वितपदार्थः—(उत) अपि च सोमः (जमदग्निना) आहिताग्निना (गृणानः) प्रशस्यमानः (नः) अस्मभ्यं याज्ञिकेभ्यः (गोमतीः) इन्द्रियवन्ति (इषः) अन्नानि (परिष्टुभः) परितः प्रशंसनीयानि (विश्वाः) सर्वाणि (अर्ष) वृष्ट्या प्रापयति ॥ ऋग्वेदे ९ । ६२ । २४ ऽपि ॥ ३ ॥

भाषार्थः—(उत) तथा च (जमदग्निना) आहिताग्नि पुरुष से (गृणानः) प्रशस्यमान सोम (नः) हम याज्ञिकों के लिये (गोमतीः, परिष्टुभः,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वाः, इषः) इन्द्रियों को बलदायक, सर्वतः प्रशंसनीय, सब, अन्नों को (अर्ष) वृष्टि द्वारा प्राप्त कराता है ॥ ऋ० ९। ६२। २४ में भी ॥ ३ ॥

इमं स्तोममिति तृतीयखण्डे प्रथमतृचस्य कुत्स ऋषिः । अग्निर्देवता । जगती छन्दः । तत्र प्रथमा—

३ २उ ३ १ २ ३ १ २ ३ १ २ ३ १ २

इमꣳ स्तोममर्हते जातवेदसे रथमिव संमहेमा

३ १ २ ३ २उ ३ १ २ ३ १र

मनीषया । भद्रा हि नः प्रमतिरस्य सꣳस-

२र ३ १र २र ३ १र २र

द्यग्ने सख्ये मा रिषामा वयं तव ॥ १ ॥ (१०६४)

व्याख्याता (६६)

अथ द्वितीया—

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३

भरामेध्मं कृणवामा हवींषि ते, चितयन्तः

१ २ ३ २ ३ १ २ ३ १

पर्वणा पर्वणा वयम् । जीवातवे प्रतराꣳ

२ ३ १ २र ३ १र २र ३ १र २र

साधयाधियो, ग्ने सख्ये मा रिषामा वयं तव ॥२॥ (१०६५)

पदपाठः—भराम क्रि० । इध्मम् २ । कृणवाम क्रि० । हवींषि २ । ते ४। चितयन्तः १ । पर्वणा पर्वणा ३=२ । वयम् १ । जीवातवे अ० । प्रतराम् अ० । साधय क्रि० । धियः २ । अग्ने स० । सख्ये ७ । मा अ० । रिषाम क्रि० वयम् । तव ६ ॥

अन्वितपदार्थः—(अग्ने)! (वयम्) याज्ञिकाः (ते) तुभ्यम् (इध्मम्) इन्धनसाधनमेकविंशतिद्रव्यात्मकं समित्समूहं (भराम) संभराम संपादयाम । तथा (हवींषि) चरुपुरोडाशादिलक्षणान्यन्नानि (कृणवाम) करवाम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(पर्वणा पर्वणा) प्रतिपर्व संवृत्ताभ्यां दर्शपूर्णमासाभ्यां (चितयन्तः) सावधानाः सन्तः (तव सख्ये) त्वदानुकूल्ये (मा रिषाम) दुःखं नाप्नुयाम । त्वं (जीवातवे) अस्माकं जीवनाय (धियः) अग्निहोत्रादिकर्माणि (प्रतरां) प्रकृष्टतरं (साधय) निष्पादय ॥ ऋग्वेदे १ । ९४ । ४ ऽपि ॥२॥

भाषार्थः-(अग्ने) यज्ञ के अग्रणी! (वयम्) हम याज्ञिक लोग (ते) तेरे लिये (इध्मम्) सुलगाने की २१ द्रव्यों की समिधाओं के समूह को भराम) बनावें तथा (हवींषि) चरु पुरोडाशादिनामक अन्नों को (कृणवाम) बनावें और (पर्वणा पर्वणा) प्रति पर्वदिन=अमावस पूर्णमासी को किये दर्श पूर्णमासों से (चितयन्तः) सावधान हुवे हम (तव) तेरी (सख्ये) अनुकूलता में (मा) न (रिषाम) दुःख पावें ॥ ऋ० १ । ९४ । ४ में भी ॥ २ ॥

अथ तृतीया-

३ १ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३
शकेम त्वा समिधꣳ साधयाधियस्त्वे देवा हविरद-
१ २ १ २ ३ १र २र ३ २ १र २र
न्त्याहुतम् । त्वमादित्याँ आवह तान्ह्युऽ३ऽश्मस्यग्ने
३ १र २र ३ १र ४र
सख्ये मा रिषामा वयं तव ॥ ३ ॥ [७] (१०६६)

पदपाठः—शकेम क्रि० । त्वा २ । समिधम् २ । साधय क्रि० । धियः २ । त्वे ७ । देवाः १ । हविः २ । अदन्ति क्रि० । आहुतम् २ । त्वम् १ । आदित्यान् २ । आवह क्रि० । तान् २ । हि अ० । ऽश्मसि क्रि० । अग्ने० ॥

अन्वितपदार्थः-(अग्ने) (त्वां) (समिधम्) प्रदीप्तं कर्तुं (शकेम) शक्नुयाम (धियः) त्वं च कर्माणि अस्मदीयानि दर्शपूर्णमासादीनि (साधय) निष्पादय । त्वया हि सर्वे निष्पद्यन्ते यस्मात् (त्वे) त्वयि अग्नौ (आहुतं हविः देवाः अदन्ति) । तस्मात्त्वं साधयेत्यर्थः । अपि च (त्वम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्ने (आदित्यान्) देवान् (आवह) अस्मदङ्गं प्रापय। यतो देवदूतोसि। (तान्) देवान् (हि) अवश्यं वयम् (उश्मसि) कामयामहे (तव सख्ये वयं मा रिषाम) ॥ ऋग्वेदे १। ९४। ३ ऽपि ॥ ३ ॥

भाषार्थ-(अग्ने) अग्ने ! (त्वाम्) तुझ को (समिधम्) प्रदीप्त करने को (शकेम) हम समर्थ हों। तू (धियः) हमारे दर्शपूर्णमासादि नित्य नैमित्तिक कर्मों को (साधय) सिद्ध कर। क्योंकि अग्नि से ही ये सब कर्म सधते हैं। (त्वे) अग्नि में (आहुतम्) होम किये (हविः) हव्य को (देवाः) वायु आदि देवता (अदन्ति) खाते हैं और त्वम्) अग्नि (आदित्यान्) देवों को (आवह) हमारे यज्ञ में बुला। क्योंकि अग्नि देवदूत है। (तान्) उन देवों को (हि) निश्चय (उश्मसि) हम चाहते हैं। आगे उक्त प्रकार जानिये ॥ ऋ० १। ९४। ३ में भी ॥ ३ ॥

अथ द्वितीय तृतीयस्य-वसिष्ठ ऋषिः। आदित्यो देवता। गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ २३ १२ ३ १ २ ३ १२
प्रति वाꣳ सूर उदिते मित्रं गृणीषे वरुणम्।
३ १२ ३ १ २
अर्यमणꣳ रिशादसम् ॥ १ ॥ (१०६७)

पदपाठः-प्रति अ०। वाम् २। सूरे, उदिते ७। मित्रम् २। गृणीषे क्रि०। वरुणम्, अर्यमणम्, रिशादसम् २ ॥

अन्वितपदार्थः-अहं यजमानः (मित्रम्) प्राणम् (वरुणम्) अपानं च (वां) युवां (प्रति) प्रत्येकं (गृणीषे) गृणे स्तौमि। यथाहाऽन्यत्राऽपि वेदः-"प्रातरग्निं प्रातरिन्द्रं हवामहे। प्रातर्मित्रावरुणा प्रातरश्विना०। ऋ० ७। ४१। १ इत्यादि। किं भूतं प्राणमपानं च (रिशादसम्) शत्रूणामभिभावसमर्थम् (अर्यमणम्) न्यायसमर्थकं च। कदा ? (सूरे उदिते) प्रातरित्यर्थः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राणाऽपानयोः संयमेन पुरुषः शत्रुपराभवं न्याय-धर्मादिकं च परिपालयितुं शक्नोति अतः प्रत्यहं प्रातः प्रात-रुत्थायाऽऽवश्यकं कृत्वाऽनेन प्राणाऽपानसंयमविचारसौ-ष्ठवं संपाद्यमिति भावः ॥ ऋग्वेदे ७ । ६६ । ७ अपि ॥ १ ॥

भाषार्थः—मैं यजमान (मित्रम्) प्राण और (वरुणम्) अपान इन (वाम्) दोनों को (प्रति) प्रत्येक को जो (रिशादसम्) शत्रुवों को दबा सकने वाले और (अर्यमणम्) न्याय के समर्थक हैं इन को (सूरे) सूर्य (उदिते) उदय होते ही प्रतिदिन प्रातः काल (गृणीषे) स्तुत करता हूं ॥

प्राण और अपान के संयम से मनुष्य शत्रुओं से नहीं दबता, उन्हें दबा सकता है, अन्याय को रोक कर न्यायधर्म का प्रचार कर सकता है। इस लिये उसको नित्य उठते ही प्रातःकाल शौचादि आवश्यक कार्य से निवृत्त होकर प्राणाऽपान के संयम का चिन्तवन करना चाहिये। जैसा कि ऋग्वेद ७। ४१। १ में भी लिखा है कि "प्रातरग्निं प्रातरिन्द्रं हवामहे। प्रातर्मित्रावरुणा प्रातरश्विना०" इत्यादि ॥ ऋ० ७। ६६। ७ में भी ॥ १ ॥

अथ द्वितीया—

३ १ २ ३ २ ३ १ ३ १ २ ३ २ ३ १ २
राया हिरण्यया मतिरियमवृकाय शवसे ।
३ १ १ २ ३ १ २
इयं विप्रा मेधसातये ॥ २ ॥ (१०६८)

पदपाठः—राया, हिरण्यया ३ । मतिः १ । इयम् १ । अवृकाय, शवसे ४ । इयम् । विप्राः सं० । मेधसातये ४ ॥

अन्वितपदार्थः—(विप्राः) हे मेधाविनः ! (इयं मतिः) एषा विचारणा(हिरण्यया) सुवर्णादिकया (राया) धनाख्यया सह (अवृकाय) अहिंस्याय (शवसे) बलाय तथा (मेधसातये) यज्ञलाभाय "भवतु" ॥ ऋग्वेदे ७ । ६६ । ८ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(विप्राः) हे बुद्धिमानो ! (इयं मतिः) यह विचारणा (हिरण्यया राया) सुवर्णादि धन सहित (अवृकाय शवसे) अहिंस्र बल और (मेधसातये) यज्ञलाभार्थ " होवे " ॥ ऋ० ७ । ६६ । ८ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३ २

त स्याम देव वरुण ते मित्र सूरिभिः सह ।

३३क २र

इषꣳ स्वश्च धीमहि ॥ २ ॥ [८] (१०६१)

पदपाठः-ते ६ । स्याम क्रि० । देव, वरुण सं० । ते । मित्र सं० । सूरिभिः ३ । सह अ० । इषम् २ । स्वः, च अ० । धीमहि क्रि० ॥

अन्वितपदार्थः-(देव ! वरुण !) अपान ! वयं (ते) तव (स्याम) भवेम (मित्र) प्राण ! (ते) तव भवेम तथा सति त्वत्संयमे जाते (सूरिभिः सह) मेधाविभिस्सह वयम् (इषम्) अन्नं (स्वश्च) सुखं च (धीमहि) धारयामहे ॥ ऋग्वेदे ७ । ६६ । ९ ऽपि ॥ ३ ॥

भाषार्थः-(देव) प्रकाशमान ! (मित्र) प्राण ! हम (ते) तेरे (स्याम) होवें (वरुण) अपान ! (ते) हम तेरे होवें। तेरे संयम होने पर हम (सूरिभिः) बुद्धिमानों (सह) सहित (इषम्) अन्न (च) और (स्वः) सुख का (धीमहि) धारण करें ॥ ऋ० ७ । ६६ । ९ में भी ॥ ३ ॥

अथ तृतीय तृचस्य-त्रिशोक ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ २उ ३ २३ २ ३ २३१ १ ३१ २र

भिन्धि विश्वा अप द्विषः परिबाधो जही मृधः ।

१२ ३१र २र

वसु स्पार्हं तदाभर ॥१॥ (१०७०) व्याख्याता (१३४)

अथ द्वितीया—

१ २ ३ १ २ ३१२ २२३२ ३ १२
यस्य ते विश्वमानुषग्भूरेर्दत्तस्य वेदति ।
१ २ ३ १२ २२
वसु स्पार्हं तदाभर ॥ २ ॥ (१०७१)

पदपाठः—यस्य, ते ६=३ । विश्वम् १ । आनुषक् अ० । भूरेः, दत्तस्य ६=२ । वेदति क्रि० । वसु, स्पार्हम्, तत् २ । आभर क्रि० ॥

अन्वितपदार्थः—(यस्य ते) येन त्वया (दत्तस्य) दत्तं (भूरेः) भूरि वसु (आनुषक्) आनुपूर्व्येण (विश्वं) जगत् (वेदति) जानाति (स्पार्हम्) स्पृहणीयं (तत् वसु) धनम् (आभर) अस्मभ्यमाहर ॥ हे परमेश्वर ! इतिशेषः ॥ ऋग्वेदे तु ८ । ४५ । ४२ विश्वमानुषः इतिपाठः ॥ २ ॥

भाषार्थः—(यस्य ते) जिस आप के (दत्तस्य) दिये हुवे (भूरेः) बहुत धन को (विश्वम्) जगत् (वेदति) जानता है (तत्) वह (स्पार्हम्) अभिलषणीय (वसु) धन (आभर) हमें दीजिये ॥ हे परमेश्वर ! यह अध्याहृत है ॥ ऋ० ८ । ४५ । ४२ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ २ ३१२ २२ ३ १२
यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।
१ २ ३ १२ २२
वसु स्पार्हं तदाभर ॥३॥ [१] (१०७२) व्याख्याता (२०७)

अथ चतुर्थतृचस्य-श्यावाश्व ऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥

तत्र प्रथमा—

३ २ ३ २उ ३ २ ३ २ ३ १ २३ १ २
यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
१ २ ३ १ २
इन्द्राग्नी तस्य बोधतम् ॥ १ ॥ (१०७३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–यज्ञस्य ६ । हि अ० । स्थः क्रि० । ऋत्विजा १ । सस्नी १ । वाजेषु, कर्मसु ७ । इन्द्राग्नी सं० । तस्य ६=२ । बोधतम् क्रि० ॥

अन्वितपदार्थः–(इन्द्राग्नी) हे इन्द्र ! हे अग्ने ! युवां (हि) निश्चयेन (यज्ञस्य) ज्योतिष्टोमादेः (ऋत्विजा) ऋत्विजौ ऋतौ काले यष्टव्यौ (स्थः) भवथः अतः (वाजेषु) बलेषु प्राप्तव्येषु (कर्मसु) यज्ञक्रियासु च (सस्नी) संस्नातौ निपुणौ सन्तौ (तस्य) तमस्मत्कर्तृकं यज्ञं (बोधतम्) जानीतम् ॥ श्लेषालङ्कारेणात्र सूर्याग्निदृष्टान्तेनाध्यापकाध्येतृवर्गावपि बोद्धव्यौ ॥ ऋग्वेदे ८ । ३८ । १ ऽपि ॥ १ ॥

भावार्थः–(इन्द्राग्नी) हे इन्द्र और अग्ने ! तुम दोनों (हि) निश्चय (यज्ञस्य) ज्योतिष्टोमादि यज्ञ के (ऋत्विजा) ऋतु ऋतु में यजनीय (स्थः) हो । अतः (वाजेषु) प्राप्तव्य बलों और (कर्मसु) यज्ञ क्रियाओं में (सस्नी) न्हाये हुवे=चतुर (तस्य) उस हमारे किये यज्ञ को (बोधतम्) जानो ॥

यहां श्लेषालङ्कार से सूर्य और अग्नि के दृष्टान्त से सूर्यतुल्य प्रकाशक गुरु और अग्नितुल्य प्रकाश्य शिष्य भी समझने योग्य हैं ॥ ऋ० ८।३८।१में भी ॥१॥

अथ द्वितीया–

३ १ २ ३ १ २ ३ १ २

तोशासा रथयावाना वृत्रहणापराजिता ।

१ २ ३ १ २

इन्द्राग्नी तस्य बोधतम् ॥ २ ॥ (१०७४)

पदपाठः–तोशासा, रथयावाना, वृत्रहणा, अपराजिता १ । इन्द्राग्नी सं० । तस्य । बोधतम् ॥

अन्वितपदार्थः–(इन्द्राग्नी) ! युवां (तोशासा) शत्रुहिंसकौ (रथयावाना) रमणीयगती (वृत्रहणा) वृत्रस्य हन्तारौ (अपराजिता) अन्यैरपराजितौ सन्तौ (तस्य बोधतम्) तं यज्ञं जानीत ॥ ऋग्वेदे ८ । ३८ । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University. Digitized by eGangotri Foundation USA

भाषार्थः-(इन्द्राग्नी) हे इन्द्र और हे अग्ने ! तुम (तोशासा) शत्रुहिंसक, (रथयावाना) रमणीयगमन वाले (वृत्रहणा) वृत्र के घातक और (अपराजिता) किसी अन्य से न हारने वाले होते हुवे (तस्य बोधतम्) उस यज्ञ को जानो ॥ ऋ० ८ । ३८ । २ में भी ॥ २ ॥

अथ तृतीया-

३१ २ ३१२ २२ ३ १ २ ३ १२
इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः ।
१ २ ३ १ २
इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥ [१०] (१०७५)

पदपाठः-इदम् २ । वाम् ४ । मदिरम्, मधु २ । अधुक्षन् क्रि० । अद्रिभिः ३ । नरः १ । इन्द्रा० ॥

अन्वितपदार्थः-(इन्द्राग्नी) ! (वाम्) युष्मभ्यम् (अद्रिभिः) ग्रावभिः (मदिरं मधु) हृष्टिपुष्टिकरं मधुरं सोमरसं (नरः) ऋत्विजः (अधुक्षन्) पूरयन्ति (तस्य बोधतम्) ॥ ऋग्वेदे ८ । ३८ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(इन्द्राग्नी) हे इन्द्र ! और अग्ने ! (वाम्) तुम्हारे लिये (अद्रिभिः) अभिषवग्रावाओं से (मदिरम्) हृष्टिपुष्टिकारक (मधु) मधुर सोमरस को (नरः) ऋत्विज् लोग (अधुक्षन्) पूर्ण करते हैं (तस्य बोधतम्) उसे जानो ॥ ऋ० ८ । ३८ । ३ में भी ॥ ३ ॥

उक्तं प्रातःसवनम्, इदानीं माध्यंदिनं सवनमुच्यते इति विवरणकारः ॥
अथ चतुर्थखण्डे प्रथमतृचस्य-कश्यप ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१ १ ३१ २३ १२ ३ २
इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
३ २ ३ १ २ ३ १२
अर्कस्य योनिमासदम् ॥१॥ (१०७६) व्याख्याता(४७२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३ १ २ ३ २३ १ २ ३ २
तन्त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम् ।
१ २ ३ १ २
सं त्वा मृजन्त्यायवः ॥ २ ॥ (१०७७)

पदपाठः-तम्, त्वा २ । विप्राः, वचोविदः १ । परिष्कृण्वन्ति क्रि० । धर्णसिम् २ । सम् अ० । त्वा २ । मृजन्ति क्रि० । आयवः १ ॥

अन्वितपदार्थः-(तं त्वा) तं त्वाम् (धर्णसिम्) धारकं सोमम् (वचोविदः) वेदज्ञाः (विप्राः) मेधाविनः (परिष्कृण्वन्ति) प्रशंसन्ति (आयवः) इतरे मनुष्याः (त्वा) त्वाम् (संमृजन्ति) संशोधयन्ति ॥ ऋग्वेदे तु ९ । ६४ । २३ धर्णसिम्=वेधसः इति पाठभेदः ॥ २ ॥

भाषार्थः-(तम्) उस (त्वा) तुझ (धर्णसिम्) धारक सोम को (वचोविदः) वेदज्ञ (विप्राः) मेधावी लोग (परिष्कृण्वन्ति) प्रशंसित करते हैं और उन से सुन कर (आयवः) अन्य मनुष्य (त्वा) तुझ को (संमृजन्ति) शोधते हैं ॥ ऋ० ९ । ६४ । २३ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया-

१ २ ३ १ २ ३ १ २ २ ३ १ २
रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
१ २ ३ १ २
पवमानस्य मरुतः ॥ ३ ॥ [११] (१०७८)

पदपाठः-रसम् २ । ते ६ । मित्रः, अर्यमा १ । पिबन्तु क्रि० । वरुणः १ । कवे सं० । पवमानस्य ६ । मरुतः १ ॥

अन्वितपदार्थः-(कवे) सोम ! बुद्धिवर्धक ! (पवमानस्य) शोधकस्य च (ते) तव (रसं) द्रवांशं (मित्रः, वरुणः, अर्यमा, मरुतः) एतन्नामानो देवाः (पिबन्तु) ॥ ऋग्वेदे ९ । ६४ । २४ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(कवे) बुद्धिवर्धक ! सोम ! (पवमानस्य) शुद्धिकारक (ते) तेरे (रसम्) रस को (मित्रः, वरुणः, अर्यमा, मरुतः) मित्र, वरुण, अर्यमा और मरुत् देव (पिबन्तु) पीवें ॥ ऋ० ९ । ६४ । २५ में भी ॥ ३ ॥

अथ द्वितीय प्रगाथस्य-वसिष्ठ ऋषिः । सोमो देवता । बृहती छन्दः ॥

तत्र प्रथमा-

३ १ २ ३ १२ २२ ३ २ ३ १ २ ३ १

मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि । रयिं पिशङ्गं बहुलं

२२३ २३ १ २ ३क २२

पुरुस्पृहं पवमानाऽभ्यर्षसि ॥१॥ (१०७९) व्याख्याता (५१७)

अथ द्वितीया-

३ २उ ३ १२ ३ २३ १ २ ३ १२ ३ १ २

पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने । देवानां उसोम

३२२ २२ ३ १ २

पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥२॥ [१२] (१०८०)

पदपाठः-पुनानः १ । वारे ७ । पवमानः १ । अव्यये ७ । वृषा १ । उ अ० । अचिक्रदत् क्रि० । वने ७ । देवानाम् ६ । सोम, पवमान सं० । निष्कृतम् २ । गोभिः ३ । अञ्जानः १ । अर्षसि क्रि० ॥

अन्वितपदार्थः-(वृषा) वृष्टिकरः (पुनानः) अभिषूयमाणः (पवमानः) सोमः (उ) वितर्कं (अव्यये) अविरोममये (वारे) ऊर्णामये दशापवित्रे तथा (वने) काष्ठमये द्रोणकलशे (अचिक्रदत्) शब्दं करोति । अथ प्रत्यक्षवादः-(सोम ! पवमान !) त्वं (गोभिः) सूर्यकिरणैः (अञ्जानः) मिश्रीयमाणः सन् (देवानां) वायुप्रभृतीनां (निष्कृतं) संस्कृतं स्थानम् (अर्षसि) गच्छसि ॥ ऋग्वेदे तु ९ । १०७ । २१ मृजानो वारे पवमानो अव्यये वृषावचक्रदो वने इति पूर्वार्धपाठे भेदः ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(वृषा) वृष्टि करने में समर्थ (पुनानः) अभिषुत किया जाता हुवा (पवमानः) सोम (उ) तर्क में (अव्यये) भेड़ के (वारे) ऊन से बने दशापवित्र और (वने) काष्ठमय द्रोण कलश में (अचिक्रदत्) शब्द करता है। अब प्रत्यक्षवाद है कि-(पवमान सोम) पवित्रतासम्पादक सोम ! तू (गोभिः) सूर्यकिरणों से (अज्यानः) मिलाया जाता हुवा (देवानां निष्कृतम्) वायु आदि देवों के संस्कृत स्थान आकाश को (अर्षसि) जाता है ॥ ऋ० ९ । १०७ । २१ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीयतृचस्य-अमहीयुर्ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३२३ २उ ३ १ २ ३२ ३ १ २
एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।
१ २ ३ १ २
समादित्येभिरख्यत ॥ १ ॥ (१०८१)

पदपाठः-एतम् २ । उ० अ० । त्यम् २ । दश, क्षिपः १ । मृजन्ति क्रि० । सिन्धुमातरम् २ । सम् अ० । आदित्येभिः ३ । अख्यत क्रि० ॥

अन्वितपदार्थः-(त्यम्) पूर्वोक्तं (सिन्धुमातरम्) समुद्रो माताऽस्य तम् (एतं) सोमं (दश, क्षिपः) दशाङ्गुलयः (मृजन्ति) शोधयन्ति । स च (उ) वितर्के (आदित्येभिः) सूर्यकिरणैः (सम्-अख्यत) संगतो भवति ॥ ऋग्वेदे ९ । ६१ । ७ ऽपि ॥ १ ॥

भाषार्थः-(त्यम्) पूर्वोक्त (सिन्धुमातरम्) समुद्र के पुत्र (एतम्) इस सोम को (दश क्षिपः) १० अङ्गुलियें (मृजन्ति) शोधती हैं और यह (आदित्येभिः) सूर्य किरणों से (सम्-अख्यत) मिल जाता है॥ ऋ०९।६१। ७ में भी ॥ १ ॥

अथ द्वितीया-

१ २र ३ २ ३ १ २ ३१ २ ३ २ ३ २
समिन्द्रेणोत वायुना सुत एति पवित्र आ ।
१ २र ३ १ २
सꣳ सूर्यस्य रश्मिभिः ॥ २ ॥ (१०८२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–सम् अ० । इन्द्रेण ३ । उत अ० । वायुना ३ । सुतः १ । एति क्रि० । पवित्रे ७ । आ अ० । सम् । सूर्यस्य ६ । रश्मिभिः ३ ॥

अन्वितपदार्थः–(पवित्रे) दशापवित्रे (सुतः) अभिषुतः सोमः (इन्द्रेण वायुना) इन्द्रनामकेन वायुविशेषेण (आ) समन्तात् (सम्–एति) संगच्छते (उत) अपि च (सूर्यस्य रश्मिभिः) सूर्यकिरणैः (सम्) समेति ॥ ऋग्वेदे ९ । ६१ । ८ ऽपि ॥ २ ॥

भाषार्थः—(पवित्रे) दशापवित्र पर (सुतः) अभिषुत सोम (इन्द्रेण वायुना) इन्द्रनामक वायुविशेष से (आ) चारों ओर (सम्–एति) मिल जाता है (उत) और (सूर्यस्य) सूर्य की (रश्मिभिः) किरणों से (सम्) मिल जाता है ॥ ऋ० ९ । ६१ । ८ में भी ॥ ८ ॥

अथ तृतीया—

३ ३ १ २ ३ १ २ ३ १ २ ३ १ २

स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।

१ २ ३ १ २ २

चारुर्मित्रे वरुणे च ॥ ३ ॥ [१३] (१०८३)

पदपाठः–सः १ । नः ४ । भगाय, वायवे, पूष्णे ४ । पवस्व क्रि० । मधुमान् १ । चारुः १ । मित्रे, वरुणे ७=४ । च अ० ॥

अन्वितपदार्थः–(सः) उक्तगुणविशिष्टः (मधुमान्) माधुर्योपेतः (चारुः) रुचिरः सोमः (भगाय, पूष्णे) (मित्रे) मित्राय (वरुणे) वरुणाय (च) (वायवे) तत्तन्नामकाय वायुविशेषाय (नः) अस्मभ्यं (पवस्व) क्षरतु ॥ ऋग्वेदे ९ । ६१ । ९ ऽपि ॥ ३ ॥

भाषार्थः–(सः) वह (मधुमान्) मधुर (चारुः) रुचिर सोम (भगाय) भग, (पूष्णे) पूषा, (मित्रे) मित्र और (वरुणे) वरुण नामक (वायवे) वायुविशेष के लिये (च) और (नः) हमारे लिये (पवस्व) बहे ॥ ऋ० ९ । ६१ । ९ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति सप्तमाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

" इदानींपृष्ठानि-रेवतीषु वारवन्तीयं पृष्ठं भवति " इति विधरणकारः ॥

अथ पञ्चमे खण्डे रेवतीर्न इति प्रथमतृचस्य-शुनःशेप ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥ तत्र प्रथमा-

३र २ ३ २ ३ १ २ ३ १ २

रेवतीर्नः सधमादइन्द्रे सन्तु तुविवाजाः ।

३ २ ३ २ ३ १ २

क्षुमन्तो याभिर्मदेम ॥१॥ (१०८४) व्याख्याता (१५३)

अथ द्वितीया-

२ ३ २ ३ १ २ ३ २ ३ १ २ ३ २

आ घ त्वावान्त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः ।

३ २उ ३ ३र २र

ऋणोरक्षन्न चक्र्योः ॥ २ ॥ (१०८५)

पदपाठः—आ, घ अ० । त्वावान् १ । त्मना ३ । युक्तः १ । स्तोतृभ्यः ४। धृष्णो सं० । ईयानः १ । ऋणोः क्रि० । अक्षम् १ । न अ० । चक्र्योः ६ ॥

अन्वितपदार्थः-(धृष्णो) हे धर्षणक्षम ! परमात्मन् ! (त्वावान्) त्वादृशः [न त्वावाँ अन्य इत्यादिश्रुत्यन्तरोपरोधात्त्वमेवेत्यर्थः] (ईयानः)अस्माभिः प्रार्थ्यमानः (त्मना) आत्मना चेतनेन स्वरूपेण (युक्तः) उपेतः (स्तोतृभ्यः) अस्मभ्यं (घ) अवश्यम् (आ-ऋणोः) सर्वतः सर्वं ददातु । दृष्टान्तः-(चक्र्योः) रथचक्रयोः (अक्षम्) रथनाभिः (न) यथा केन्द्रभूतः सर्वस्य चक्रस्योपकारको भवति तथैव त्वमप्यस्माकं याचकानां प्रार्थनानां केन्द्रभूतोसि ॥ ऋग्वेदे तु१ । ३० । १४ युक्तः=आप्रः इति पाठभेदः ॥ २ ॥

भाषार्थः-(धृष्णो) हे धर्षणक्षम ! परमात्मन् ! (त्वावान्) आप सा [न त्वावां अन्यः इत्यादि श्रुत्यन्तर के उपरोध से आप सा अन्य कोई नहीं।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अतः आप ही] (ईयानः) प्रार्थना किये हुवे (त्मना) चेतन स्वरूप से (युक्तः) युक्त (स्तोतृभ्यः) हम उपासकों के लिये (घ) अवश्य (आ ऋणोः) सर्वतः सब कुछ देवें (न) जैसे (चक्र्योः) रथ के दोनों पहियों की (अक्षम्) नाभि सब का केन्द्र होकर सब अरों प्रत्यरों का उपकार करती है। ऐसे ही आप भी सब प्रार्थियों की प्रार्थनाओं के केन्द्रभूत हैं। सब की सुनते हैं ॥ ऋ० १। ३०। १४ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१र २र ३ १र २र ३ २

आ यदुवः शतक्रतवा कामं जरितॄणाम् ।

३ ३उ ३१र २र

ऋणोरक्षं न शचीभिः ॥ ३ ॥ [१४] (१०८६)

पदपाठः— आ अ० । यत् १ । दुवः १ । शतक्रतो सं० । आ । कामम् २ । जरितॄणाम् ६=४ । ऋणोः कि० । अक्षम् १ । न अ० । शचीभिः ३ ॥

अन्वितपदार्थः—(शतक्रतो) हे अनन्तकर्मन्नीश्वर ! (यत्) (दुवः) धनं (शचीभिः) प्रज्ञाभिः सह वर्त्तमानमस्ति तत् (जरितॄणाम्) स्तोतृभ्यः (आ—ऋणोः) प्रापयतु तथा स्तोतॄणां (कामम्) इच्छाम् (आ) पूरयतु भवान् (अक्षं न) यथा रथचक्रनाभिः सर्वमक्षकार्यं केन्द्रत्वेन पूरयति तद्वत् ॥ ऋग्वेदे १ । ३० । १५ ऽपि ३ ॥

भाषार्थः—(यत्) जो (दुवः) धन है सो (शतक्रतो) हे अनन्तकर्मा जगत्कर्त्ता ! (शचीभिः) बुद्धियों सहित (जरितॄणाम्) स्तोताओं के लिये (आ—ऋणोः) प्राप्त कराइये और उन की (कामम्) इच्छा (आ) पूर्ण कीजिये ॥ ऋ० १ । ३० । १५ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ २३१२ ३११ ३ १२

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२३२ ३ २
जुहूमसि द्यवि द्यवि ॥१॥ (१०८७) व्याख्याता (१६०)

अथ द्वितीया—

१२ ३ २ ३१ २३ १२
उप नः सवना गहि सोमस्य सोमपाः पिब।
३२उ ३२ ३ १२
गोदा इद्रेवतो मदः ॥ २ ॥ (१०८८)

पदपाठः—उप अ० । नः ६ । सवना २ । आगहि क्रि० । सोमस्य ६ । सोमपाः १ । पिब क्रि० । गोदाः १ । इत् अ० । रेवतः ६ । मदः १ ॥

अन्वितपदार्थः—प्रकरणात् इन्द्रः (नः) अस्माकं (सवना) सवनानि त्रीणि प्रातःसवनादीनि (आगहि) प्राप्नोति तथा (सोमपाः) सोमपाः इन्द्रः (सोमस्य) सोमरसस्य (पिब) पानं करोति (रेवतः) तस्य रैवतो धनवत इन्द्रस्य (मदः) हर्षः (इत्) निश्चयेन (गोदाः) वृष्ट्या गवादिदाताऽस्ति ॥ ऋग्वेदे १ । ४ । २ ऽपि ॥ २ ॥

भावार्थः—प्रकरण से इन्द्र (नः) हमारे (सवना) प्रातःसवनादि तीनों सवनों को (आगहि) प्राप्त होता और (सोमपाः) सोम पीने वाला इन्द्र (सोमस्य) सोमरस का (पिब) पान करता है और (रेवतः) उस धनवान् इन्द्र का (मदः) हर्ष (गोदाः) दृष्टि से गौ आदि का दाता है ॥ ऋ० १ । ४ । २ में भी ॥ २ ॥

अथ तृतीया—

१२ ३ १२ ३ १२ ३२
अथा ते अन्तमानां विद्याम सुमतीनाम ।
२३ १२३ १२
मा नो अति ख्य आगहि ॥३॥ [१५] (१०८९)

पदपाठः—अथ अ० । ते ६ । अन्तमानाम् ६ । विद्याम क्रि० । सुमतीनाम् ६ । मा अ० । नः २ । अति अ० । ख्यः क्रि० । आगहि क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(अथ) सोमपानानन्तरं हे इन्द्र ! (ते) तव (अन्तमानां) समीपतरवर्त्तिनां (सुमतीनां) शोभनप्रज्ञानां पुरुषाणां मध्ये स्थित्वा (विद्याम) वयं तव माहात्म्यं जानीयाम। त्वं च (नः) अस्मान् (माऽतिख्यः) न प्रत्याख्याहि किन्तु (आगहि) प्राप्नुहि ॥

आलङ्कारिकीयमुक्तिर्विचार्या धीमद्भिः ॥ ऋग्वेदे १ । ४ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(अथ) फिर हे इन्द्र ! (ते) तेरे (अन्तमानाम्) समीपतरवर्त्ती (सुमतीनाम्) उत्तम बुद्धि वाले पुरुषों के मध्य में स्थित होकर (विद्याम) तेरे माहात्म्य को हम जानें। और तू (नः) हम को (मा) मत (अति-ख्यः) प्रत्याख्यात कर किन्तु (आगहि) प्राप्त हो ॥

इस की अलङ्कारोक्ति विचारणीय है ॥ ऋ० १ । ४ । ३ में भी ॥ ३ ॥

अथ तृतीय सूक्तस्य-मान्धाता ऋषिः । इन्द्रो देवता । महापङ्क्तिश्छन्दः ॥

तत्र प्रथमा-

३१र ३र ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

उभे यदिन्द्ररोदसी आपप्राथोषा इव । महान्तं त्वा महीनाꣳ

३ १ ३ ३ २ ३१र २र ३१र २र

सम्राजं चर्षणीनाम्॥देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥

॥ १ ॥ (१०९०) व्याख्याता (३७९)

अथ द्वितीया-

३ २ २३१ २३ २ ३ १ २ १२ ३ २

दीर्घꣳ ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः । पूर्वेण मघवन्पदा

३ २ ३ १र २र ३१र २र ३१र २र

वयामजो यथा यमः॥देवीजनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्

॥ २ ॥ (१०९१)

पदपाठः-दीर्घम् २ । हि अ० । अङ्कुशम् २ । यथा अ० । शक्तिम् २ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बिभर्षि क्रि० । मन्तुमः सं० । पूर्वेण ३ । मघवन् सं० । पदा ३ । वयाम् २ । अजः १ । यथा । आयमः क्रि० (गतमन्यत्) ॥

अन्वितपदार्थः-(यथा) येन प्रकारेण (दीर्घम्) आयतम् (अङ्कुशम्) हस्तिनोमदान्धस्यापि वशीकरणमङ्कुशं धारयन्ति तद्वत् (मन्तुमः) हे ज्ञानिन् (मघवन्) इन्द्रेश्वर ! त्वं (शक्तिम्) अनन्तं सामर्थ्यं (बिभर्षि) धारयसि (यथा) यथा च (अजः) छागः (पूर्वेण) अग्रेण (पदा) पादेन (वयां) शाखाम् आकृष्य धारयति तद्वत् त्वं स्वशक्त्या सर्वं जगत् (आयमः) आकृष्य धारयसि ॥ (देवी जनि०) व्याख्यातं (३७९) पूर्वम् ॥ ऋग्वेदे १० । १३४ । ६ ऽपि ॥ २ ॥

भाषार्थः-(मन्तुमः) हे ज्ञानिन् ! (मघवन्) इन्द्र ! परमेश्वर ! (यथा) जैसे (दीर्घम्) बड़े भारी मदान्ध हाथी के भी थामने वाले (अङ्कुशम्) अङ्कुश का धारण करते हैं वैसे आप (शक्तिम्) सब जगत् की थांभने वाली शक्ति को (बिभर्षि) धारते हैं और (यथा) जैसे (अजः) बकरा बकरी (पूर्वेण) अगले (पदा) पांव से (वयाम्) अनायास शाखा को खींच कर रखती है, तद्वत् अनायास ही आप उस शक्ति से जगत् को (आयमः) आकर्षणपूर्वक धारित करते हैं ॥ (देवीजनि०) इत्यादि की व्याख्या ३७९ ऋचा में कर आये हैं ॥ ऋ० १० । १३४ । ६ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १र २र ३ २ ३ १र २र
अव स्म दुर्हणायतो मर्त्तस्य तनुहि स्थिरम् । अधस्पदं तमीं
३ २ ३ १ २ ३ १ २ ३ १र २र
कृधि योऽअस्माँ अभिदासति ॥ देवीजनित्रयजी० ॥ ३ ॥

[१६] (१०१२)

पदपाठः-अव, स्म अ० । दुर्हणायतः ६ । मर्त्तस्य ६ । तनुहि क्रि० । स्थिरम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२। अधस्पदम्, तम् २। ईम् अ०। कृधि क्रि०। यः १। अस्मान् २। अभि-दासति क्रि०। देवीजनि०॥

अन्वितपदार्थः—हे परमेश्वर! (दुर्हणायतः) दुःख-प्रदं हरणं कुर्वतः (मर्त्तस्य) मनुजस्य शत्रोः (स्थिरं) दृढं बलम् (अव-तनुहि) अवनतं कुरु (स्म) तथा (तं) शत्रुम् (ईम्) एनम् (अधस्पदं) पादयोरधस्ताद्वर्त्तमानं (कृधि) कुरु (यः) शत्रुः (अस्मान्) धार्मिकान् (अभि-दासति) हिनस्ति ॥ समानमन्यदुक्तमेव ॥ ऋग्वेदे १० । १३४ । ४ ऽपि ॥ ३ ॥

भाषार्थः—हे परमेश्वर! (दुर्हणायतः) दुःखदायी हरण करने वाले (मर्त्तस्य) शत्रु मनुष्य के (स्थिरम्) स्थिर बल को (अव-तनुहि) गिराइये (स्म) और (तम् ईम्) इस पूर्वोक्त शत्रु को (अधस्पदम्) हमारे पावों के नीचे (कृधि) कीजिये (यः) जो कि (अस्मान्) हम धार्मिकों की (अभि-दासति) हिंसा करता है। शेष पूर्व मन्त्र के तुल्य है॥ ऋ० १०। १३४। ४ में भी ॥ ३ ॥

अथ षष्ठे खण्डे प्रथम तृचस्य—असितो देवलो वा ऋषिः। सोमो देवता। गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ २ ३ १ २
परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
१ २ ३ १ २
मदेषु सर्वधा असि ॥ १॥ (१०९३) व्याख्याता (४७५)

अथ द्वितीया—

२उ ३ २ ३ २उ ३ २ ३१२ २उ
त्वं विप्रस्त्वं कविर्मधु प्रजातमन्धसः ।
१ २ ३ १ २
मदेषु सर्वधा असि ॥ २ ॥ (१०९४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-त्वम्, विप्रः, त्वम्, कविः १। मधु २। प्र अ०। जातम् २। अन्धसः ५। मदेषु ७। सर्वधाः १। असि क्रि०॥

अन्वितपदार्थः-सोम ! (त्वं) (विप्रः) विविधं प्रीणयिता विप्रतुल्यो वा सर्वस्य हितकरः तथा (कविः) मेधातत्त्ववर्धकस्तद्वान् (मदेषु) त्वज्जनितेषु हर्षेषु सत्सु (सर्वधाः) सर्वस्य धारकः (असि) भवसि (त्वम्) (अन्धसः) अन्नात् (जातं) (मधु) मधुरं रसं (प्र) प्रयच्छसि॥

ये मनुष्याः सोमगुणान्विज्ञायोपयुञ्जते ते तेन विविधं रसमन्नं मेधां धृतिं चाप्नुवन्ति॥ ऋग्वेदे ९। १८। २ऽपि॥२॥

भाषार्थः—सोम! (त्वम्) तू (विप्रः) अनेक प्रकार से प्रसन्न करने वाला वा ब्राह्मण के सदृश सब का हितकारी तथा (कविः) बुद्धितत्त्व वाला होने से धारणावती बुद्धि का दाता (मदेषु) तेरे सेवन से हुवे हर्षों के होने पर (सर्वधाः) सब का धारक पालक पोषक (असि) है। सो (त्वम्) तू (अन्धसः) अन्न से (जातम्) उत्पन्न (मधु) मधुर रस को (प्र) देता है॥

जो मनुष्य सोम के गुण जान कर उपयोग में लाते हैं वे उस से विविध रस अन्न मेधा और धृति को प्राप्त करते हैं॥ ऋ० ९। १८। २ मैं भी॥ २॥

अथ तृतीया-

१र २र ३१२ ३१२ ३१२
त्वे विश्वे सजोषसो देवासः पीतिमाशत।
१२ ३१२
मदेषु सर्वधा असि॥३॥[१७] (१०९५)

पदपाठः-त्वे ७। विश्वे, सजोषसः, देवासः १। पीतिम् २। आशत क्रि०। मदेषु ७। सर्वधाः १। असि क्रि०॥

अन्वितपदार्थः-सोम ! (विश्वे) सर्वे (सजोषसः) समप्रीतयः सन्तः (देवासः) देवाः (त्वे) त्वयि (पीतिम्) पानम् (आशत) प्राप्नुवन्ति॥ ऋग्वेदे तु ९। १८। ३ त्वे=तवेति पाठभेदः॥ ३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावार्थः—सोम ! (विश्वे) सब (समोषसः) समान प्रीति वाले (देवासः) देवता (त्वे) तुझ में (पीतिम्) पान को (आशत) प्राप्त होते हैं ॥ ऋ० ९ । १८ । ३ का पाठ भेद संस्कृत में देखिये ॥ ३ ॥

अथ प्रगाथात्मकद्वितीयसूक्तस्य-ऋणव ऋषयः । सोमो देवता । गायत्री यवमध्या वा ककुप् वा छन्दः ॥ तत्र प्रथमा—

१ २ ३ १र २र ३ २ ३ १ २ ३ १र २र

स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।

२ ३ १ २ ३ २

सोमो यः सुक्षितीनाम् ॥ १ ॥ (१०९६) व्याख्याता (५८२)

अथ द्वितीया—

१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ १ १ २

यस्य न इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।

१ २र ३ १र २र ३ १ २ ३ २ ३ १ २ ३ २

आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥ २ ॥

[१८] (१०९७)

पदपाठः-यस्य, ते ६ । इन्द्रः १ । पिबात् क्रि० । यस्य । मरुतः १ । यस्य । वा अ० । अर्यमणा ३ । भगः १ । आ अ० । येन ३ । मित्रावरुणा २ । करामहे क्रि० । आ । इन्द्रम् २ । अवसे, महे ४ ॥

अन्वितपदार्थः-सोम ! (यस्य ते) रसम् (इन्द्रः) एतन्नामकोदेवोवायुविशेषः सूर्योवा (पिबात्) पिबेत् (यस्य) यस्य रसं च (मरुतः) एकोनपञ्चाशद्वायुभेदाः पिबेयुः (वा) अथवा (यस्य) तव सोमस्य रसम् (अर्यमणा) वायुविशेषेण देवेन सह (भगः) सूर्यगभस्ति-विशेषः पिबेत् (येन) सोमरसेन (मित्रावरुणा) वायु-विशेषौ (आकरामहे) आकारयामहे (इन्द्रम्) देवम् (आ) आकारयामहे, स सोमः (महे) महते (अवसे) रक्षणाय अस्त्विति शेषः ॥ ऋग्वेदे ९ । १०८ । १४ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-सोम ! (यस्य) जिस (ते) तेरे रस को (इन्द्रः) इन्द्रनामक वायुविशेष देव (पिबात्) पीवे (यस्य) जिस के रस को (मरुतः) मरुत् नामक ४९ वायु भेद पीवें, (वा) अथवा (यस्य) जिस के रस को (अर्यमणा) अर्यमा नामक वायु विशेष देव के सहित (भगः) भग नामक सूर्य किरण विशेष पीवे, (येन) जिस सोमरस से (मित्रावरुणा) मित्र और वरुण वायुओं को (आ-करामहे) हम अभिमुख करते हैं (इन्द्रम्) जिस से इन्द्र देव को (आ) अभिमुख करते हैं वह सोम (सहे) बड़ी (अवसे) रक्षा के लिये "हो" ॥ ऋ० ९। १०८। १४ में भी ॥२॥

अथ तृतीयतृचस्य-पर्वतनारदावृषी । सोमो देवता । उष्णिक्छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ २ ३ १ २

तं वः सखायोमदाय पुनानमभिगायत ।

२ ३ २ ३ १ २ ३ १ २

शिशुं न हव्यैः स्वदयन्त गूर्त्तिभिः ॥ १ ॥ (१०९८)

व्याख्याता (५६९)

अथ द्वितीया-

२ ३ १ २ ३ २ ३ १ २ ३ १ २

सं वत्सइव मातृभिरिन्दुर्हिन्वानो अज्यते ।

३ १२ २२ ३ २ ३ १ २

देवावीर्मदो मतिभिः परिष्कृतः ॥ २ ॥ (१०९९)

पदपाठः-सम् अ० । वत्सः १ । इव अ० । मातृभिः ३ । इन्दुः १ । हिन्वानः १ । अज्यते क्रि० । देवावीः, मदः १ । मतिभिः ३ । परिष्कृतः १ ॥

अन्वितपदार्थः-(हिन्वानः) अभिषूयमाणः (इन्दुः) सोमः (सम्-अज्यते) सम्यक्सिक्तोभवति तत्र दृष्टान्तः-(इव) यथा (वत्सः) (मातृभिः) गोभिः समक्तोभवति तद्वत् (देवावीः) देवानां रक्षकः (मदः) हृष्टिकरः (मतिभिः) मेधाविभिः (परिष्कृतः) परिशोधितो भवति ॥ ऋग्वेदे ९ । १०५ । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(हिन्वानः) अभिषुत किया जाता हुआ (इन्दुः) सोम (सम्-अज्यते) भले प्रकार सिक्त होता है। (इव) जैसे (वत्सः) बछड़ा (मातृभिः) माता गौओं से भले प्रकार सिक्त होता है। (देवावीः) देवों का रक्षक (मदः) हर्षकारक सोम (मतिभिः) बुद्धिमानों से (परिष्कृतः) परिशोधित होता है॥ ऋ० ९। १०५। २ में भी॥ २॥

अथ तृतीया-

३ १र २र ३ १ २ ३ १र २र ३ १ २

अयं दक्षाय साधनोयꣳ शर्धाय वीतये।

३ २ ३ २ ३ १ २ ३ २

अयं देवेभ्यो मधुमत्तरः सुतः॥ ३॥ [१९] (११००)

पदपाठः-अयम् १। दक्षाय ४। साधनः, अयम् १। शर्धाय, वीतये ४। अयम्। देवेभ्यः ४। मधुमत्तरः, सुतः १॥

अन्वितपदार्थः-(अयम्) सोमः (दक्षाय) बलाय (साधनः) साधनीभूतोस्ति (अयम्) (शर्धाय) बलवते (वीतये) भोजनाय भवति (अयं देवेभ्यः) वाय्वादिभ्यः (सुतः) (मधुमत्तरः) माधुर्योपेततरोस्ति॥ ऋग्वेदे ९। १०५। ३ऽपि॥ ३॥

भाषार्थः-(अयम्) यह सोम (दक्षाय) बल के लिये (साधनः) साधन है और (अयम्) यह (शर्धाय) बलयुक्त (वीतये) भोजन के लिये है (अयम्) यह (देवेभ्यः) वायु आदि देवों के लिये (सुतः) अभिषुत सोम (मधुमत्तरः) अतिमाधुर्ययुक्त है॥ ऋ० ९। १०५। ३ में भी॥ ३॥

अथ चतुर्थतृचस्य मनुर्ऋषिः। सोमोदेवता। अनुष्टुप्छन्दः॥ तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ १ २

सोमाः पवन्तइन्दवा ऽस्मभ्यं गातुवित्तमाः।

३ २ ३ १ २ ३ १ २ ३ र २र ३ १ २

मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः॥ १॥ (११०१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३१ २ ३२ ३१ २ ३१ २

ते पूतासोविपश्चितः सोमासोदध्याशिरः ।

१२३१ २३१२ ३१२३२३२

सूरासोन दर्शतासो जिगत्नवोध्रुवाघृते ॥२॥ (११०२)

पदपाठः-ते, पूतासः, विपश्चितः, सोमासः, दध्याशिरः, सूरासः १ । न अ० । दर्शतासः, जिगत्नवः, ध्रुवाः १ । घृते ७ ॥

अन्वितपदार्थः (पूताः) पवित्रेण परिपूताः (विपश्चितः) मेधाविनः (दध्याशिरः) दध्यामिश्रणाः (घृते) वसतीवरीनामके उदके (जिगत्नवः) गमनशीलाः (ध्रुवाः) तत्र स्थैर्येण वर्त्तमानाः (ते सोमासः) ते सोमाः (सूरासः) सूर्याः (न) इव प्रकाशमानाः (दर्शतासः) पात्रेषु सर्वैर्दर्शनीया भवन्ति॥ऋग्वेदे तु ९।१०१।१२एते पूताःइत्यन्तरम्॥२॥

भाषार्थः-(पूताः) पवित्र से शोधित (विपश्चितः) बुद्धितत्वयुक्त(दध्याशिरः) दधिमिश्रित (घृते, जिगत्नवः) वसतीवरी नामक जल में गमनशील (ध्रुवाः) वहां स्थिरता से वर्त्तमान (ते) वे (सोमासः) सोम (सूरासः) सूर्य (न) से (दर्शतासः) पात्रों में सब से देखने योग्य होते हैं ॥ ऋ० ९ । १०१ । १२ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया-

३ २ ३ १२३ १२३ १२ २२ ३ २

सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।

१२३१ २३ २३ १२ ३१२

इषमस्मभ्यमभितः समस्वरन् वसुविदः ॥३॥ [२०](११०३)

पदपाठः-सुष्वाणासः १ । वि अ० । अद्रिभिः ३ । चिताना: १ । गोः ६। अधि अ० । त्वचि ७ । इषम् २ । अस्मभ्यम् ४ । अभितः अ० । सम-ऽस्वरन् क्रि० । वसुविदः १॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(गोः) पृथिव्याः (त्वचि अधि) पृष्ठे (चितानाः) ज्ञायमानाः (अद्रिभिः) ग्रावभिः (वि) विविधं (सुष्वाणासः) अभिषूयमाणाः (वसुविदः) वसुनोलम्भकाः सोमाः (अस्मभ्यम्) सोमसेविभ्यः (अभितः) सर्वतः (इषम्) अन्नादि धनधान्यं (समऽस्वरन्) प्रयच्छन्ति ॥ ऋग्वेदे ९ । १०१ । १९ऽपि ॥३॥

भाषार्थः—(गोः) पृथिवी के (त्वचि अधि) पृष्ठ पर (चितानाः) पहचाने जाते हुवे (अद्रिभिः) पत्थरों से (वि) अनेक प्रकार (सुष्वाणासः) सुन्दर अभिषुत किये जाते हुवे सोम (अस्मभ्यम्) हम सोमसेवियों के लिये (अभितः) सर्वतः (इषम्) अन्नादि धनधान्य (समऽस्वरन्) देते हैं ॥ ऋ० ९ । १०१ । ११ में भी ॥ ३ ॥

अथ पञ्चमतृचस्य-कुत्सऋषिः । सोमो देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

३ २ ३ १ २ १र २र ३१२ ३ १२३
अया पवा पवस्वैना वसूनि मा॰ श्चत्वइन्दो सरासि
१२ ३ २ ३ २३ २३ २ ३ १ २३१२३१
प्रधन्वा ब्रध्नश्चित्यस्य वातो न जूतिं, पुरुमेधाश्चित्त-
१३१२
कवेनरं धात् ॥१॥ (११०४) व्याख्याता (५४१)

अथ द्वितीया

३१ २ ३ १२३१ २३ १ २३२ ३१२
उत न एना पवया पवस्वा, धिश्रुते श्रवाय्यस्य
३२ ३२ ३१ २ ३१र २र ३२उ ३१
तीर्थे । षष्टिꣳ सहस्रा नैगुतो वसूनि,वृक्षं न पक्वं
२ ३१ २
धूनवद्रणाय ॥ २ ॥ (११०५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—उत अ० । नः २ । एना ३ । पवया ३ । पवस्व क्रि० । अधि अ० । श्रुते ७ । श्रवाय्यस्य ६ । तीर्थे ७ । षष्टिम् २ । सहस्रा २ । नैगुतः १ । वसूनि २ । वृक्षम् २ । न अ० । पक्वम् २ । धूनवत् क्रि० । रणाय ४ ॥

अन्विनपदार्थः—सोमः (एना) एतया (पवया) पवित्रया धारया (श्रवाय्यस्य) श्रवणीयस्य स्वस्य सोमस्य (तीर्थे) स्थाने [इत्येव सायणः] (श्रुते) विख्याते (नः)अस्मान्सोमसेविनः (अधि) अधिकं (पवस्व) पवित्रीकरोति (उत) च (नैगुतः) नीचैर्गतः पुरुषः (न) यथा (पक्वं वृक्षं) पक्वफलोपेतं द्रुमं (धूनवत्) फलप्राप्तये धूनयति तद्वत् (रणाय) शत्रुविजयाय (षष्टिं सहस्रा वसूनि) षष्टिसंख्याकानि धनानि, कम्पयित्वा प्रापयति ॥ ऋग्वेदे ९ । ९७ । ५३ ऽपि ॥ २ ॥

भाषार्थः—सोम (एना) इस (पवया) पवित्र धारा से (श्रवाय्यस्य) श्रवणीय अपने (श्रुते) विख्यात (तीर्थे) स्थान में [यही सायणकृत तीर्थ शब्दार्थ है] (नः) हम सोमसेवियों को (अधि) अधिकता से (पवस्व) पवित्र करता है (उत) और (नैगुतः) नीचे खड़ा पुरुष (न) जैसे (पक्वम्) पके फलों वाले (वृक्षम्) वृक्ष को (धूनवत्) हिलाता अर्थात् फल प्राप्त करता है ऐसे ही सोम भी (षष्टिं सहस्रा वसूनि) ६० सहस्र धन मानो हिला कर (रणाय) शत्रुविजयार्थ गिराता है ॥ ऋ० ९ । ९७ । ५३ में भी ॥ २ ॥

अथ तृतीया—

२३१ २ ३ २३१२ ३१२ २२ ३१२ ३१२
महीमे अस्य वृषनाम शूषे, माꣳश्वत्वे वा पृशने वा वधत्रे ।
१ २ ३१२ ३२३२ ३ २३ २३ ३२ २३
अस्वापयन्निगुतः स्नेहयच्चा, पामित्राँ अपाचितो अचेतः ॥३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—मही, इमे १ । अस्य ६ । वृषनाम १ । शूषे १ । मांश्वत्वे १ । वा अ० । पृशने १ । वा । वधत्रे १ । अस्वापयत् क्रि० । निगुतः २ । स्नेहयत् क्रि० । च, अप अ० । अमित्रान् २ । अपाचितः २ । अचेतः क्रि० ॥

अन्वितपदार्थः—(अस्य) सोमस्य (इमे) एते (वृषनाम) वृषनामनी वर्षणं च नमनं चेति द्वे कर्मणी (मही) महती वर्त्तेते (वा) अपि च (मांश्वत्वे) अश्वतुल्ये बलिष्ठे (वा) अथ च (पृशने) दिव्ये (शूषे) सुखकरे (वधत्रे वधान्मृत्योस्त्राणकरे भवतः । एष सोमः (निगुतः) नीचैर्गतान्नम्रतामापन्नान् (अमित्रान्) शत्रून् (स्नेहयत्) स्नेहयति (अप) विरुद्धांश्च (अस्वापयत्) स्वापयति नाशयति (अपाचितः) अग्निचयनोपलक्षणं यज्ञमकुर्वतो यज्ञविमुखान्नास्तिकान् (अचेतः) चेतयति धार्मिकान्संपादयति ॥ ऋग्वेदे ९ । ९७ । ५४ ऽपि ॥ ३ ॥

भाषार्थः—(अस्य) इस सोम के (इमे) ये दो (वृषनाम) वृष्टि और नम्रतारूप दो कर्म (मही) बड़े (वा) और (मांश्वत्वे) अश्वतुल्य बलयुक्त (वा) और (पृशने) दिव्य (शूषे) सुखदायक (वधत्रे) मृत्यु से बचाने वाले हैं । यह सोम (निगुतः) शरणागत नम्र शत्रुओं को (स्नेहयत्) प्यार करता और (अप) विरोधियों को (अस्वापयत्) सुलाता मार बिछाता तथा (अपाचितः) अग्निचयनोपलक्षित यज्ञ मात्र के विरोधी नास्तिकों को (अचेतः) चेताता है अर्थात् धार्मिक बनाता है ॥ ऋ० ९ । ९७ । ५४ में भी ॥ ३ ॥

अथ सप्तमे खण्डे प्रथमर्चस्य बन्धुर्ऋषिः । अग्निर्देवता । द्विपदा त्रिष्टुप् छन्दः ॥ तत्र प्रथमा—

२ ३ २ ३ १ २ ३ २ ३ २ ३ १

अग्ने त्वं नो अन्तम उत त्राता शिवो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३क २र
भुवो वरूथ्यः ॥१॥ (११०७) व्याख्याता (४४८)

अथ द्वितीया—

१२३१र २र ३ १ २ ३१२
वसुरग्निर्वसुश्रवा अच्छा नक्षिद्युमत्तमो
३१ २
रयिं दाः ॥ २ ॥ (११०८)

पदपाठः—वसुः, अग्निः, वसुश्रवाः १। अच्छ अ०। नक्षि क्रि०। द्युमत्तमः, रायिम् २। दाः क्रि० ॥

अन्वितपदार्थः—(वसुः) सर्वस्य वासकः (अग्निः) प्रकाशकः (वसुश्रवाः) धनो यशस्वी (द्युमत्तमः) अतिशयेन प्रकाशमानस्त्वम् (अच्छ) आभिमुख्येन (नक्षि) अस्मान् प्राप्नुहि तथा (रयिम्) विद्यादिधनम् (दाः) देहि॥ ऋग्वेदे तु ५। २४। २ द्युमत्तममिति रयिविशेषणत्वेनपाठः२

भाषार्थः—(वसुः) सर्व के वास कराने वाले (अग्निः) प्रकाशक वसुश्रवाः) धनी यशस्वी और (द्युमत्तमः) अतिप्रकाशनान ! आप (अच्छ) भले प्रकार सामने (नक्षि) प्राप्त हूजिये और (रयिम्) विद्यादि धन (दाः) दीजिये ॥ ऋ० ५। २४। २ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३१२ ३१ २ ३१२ ३
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे
१ २
सखिभ्यः ॥ ३ ॥ [२२] (११०९)

पदपाठः—तम्, त्वा २। शोचिष्ठ, दीदिवः सं०। सुम्नाय ४। नूनम् अ०। ईमहे क्रि०। सखिभ्यः ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(शोचिष्ठ !) हे ज्योतिस्स्वरूप ! (दीदिव) प्रकाशमान ! (तम्) पूर्वोक्तगुणं (त्वा) त्वां (सुम्नाय) सुखाय (सखिभ्यः) मित्रेभ्यः (नूनं) निश्चयेन (ईमहे) याचामहे ॥ ऋग्वेदे ५।२४।३ऽपि ॥३॥

भाषार्थः—(शोचिष्ठ) हे ज्योतिस्स्वरूप ! (दीदिव) प्रकाशमान ! (तम्) उस पूर्वोक्त (त्वा) तुझ से (सुम्नाय) सुख की (सखिभ्यः) मित्रों के लिये (नूनम्) निश्चय (ईमहे) हम याचना करते हैं ॥ ऋ० ५। २४ । ३ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य आप्रय ऋषिः । विश्वे देवा देवताः । द्विपदा त्रिष्टुप्छन्दः । तत्र प्रथमा—

३ २उ ३ १ २ ३ १ २ ३ १ २ ३ २
इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥१॥
(१११०) व्याख्याता (४५२)

अथ द्वितीया—

३ १ २ ३क २र ३ १ २ ३ १र २र
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः
३ १ २
सह सीषधातु ॥ २ ॥ (११११)

पदपाठः—यज्ञम् २ । च अ० । नः ६ । तन्वम् २ । च । प्रजाम् २ । च । आदित्यैः ३ । इन्द्रः १ । सह अ० । सीषधातु क्रि० ॥

अन्वितपदार्थः-(नः) अस्माकं (यज्ञं) ज्योतिष्टोमादिकं (च) पुनः ब्रह्मयज्ञादिकं (तन्वं च) देहं च (प्रजां) सन्तानं (च) (इन्द्रः) परमेश्वरः (आदित्यैः) प्रकाशमानैः सूर्यादिभिर्देवैः (सह) (सीषधातु) साधयतु ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञादीनां रक्षार्थं फलोत्पादार्थं च येन परमेश्वरेण सूर्यादयो देवा निर्मिताः सन्ति तैः स नोवतु इत्यर्थः ॥ ऋग्वेदे तु १० । १५७ । २ सहचीक्लृपाति इति पाठे भेदः ॥ २ ॥

भाषार्थः—(इन्द्रः) परमेश्वर (नः) हमारे (यज्ञं च) ज्योतिष्टोमादि और ब्रह्मयज्ञादि यज्ञ (च) और (तन्वम्) देह (च) और (प्रजाम्) सन्तान को (आदित्यैः) सूर्यादि देवों के (सह) साथ (सीषधातु) साधे अर्थात् जिस परमात्मा ने सूर्यादि देवों को यज्ञादि की उत्पत्ति और सार्थकता के लिये रचा है वह उन से हमारे यज्ञादि सिद्ध करे ॥ ऋ० १० । १५१ । २ का पाठभेद संस्कृत भाष्य में देखिये ॥२॥

अथ तृतीया—

३ २उ ३ १ २ ३१२३ १ २ ३ १
आदित्यै रिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा
२
करत् ॥ ३ ॥ [२३] (१११२)

पदपाठः—आदित्यैः ३ । इन्द्रः, सगणः १ । मरुद्भिः ३ । अस्मभ्यम् ४ भेषजा २ । करत् क्रि० ॥

अन्वितपदार्थः—ननु पूर्वमन्त्रोक्तं यज्ञं नूनं सूर्यकिरणैः साधयति परन्तु देह सन्तानादिकं कथंनाम साधयेत् तत्राह (इन्द्रः) परमेश्वरः (आदित्यैः) सूर्यकिरणैः (मरुद्भिः) वायुभेदैश्च (सगणः) गणसहितः (अस्मभ्यम्) प्रार्थिभ्यः (भेषजा) भेषजान्यौषधानि (करत्) कुर्यात् ॥ सूर्यकिरणैर्वायुभेदैश्च परमात्माऽस्माकं विविधौषधादियोगेन देहं प्रजां च रक्षतीति प्रसिद्धमेव ॥ ऋग्वेदे तु १० । १५७ । ३ भेजषाकरत्=भूत्वविता तनूनाम् इत्यन्तरम् ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः - पूर्वमन्त्र में जो यह कहा गया कि परमेश्वर सूर्यकिरणादि द्वारा हमारे यज्ञों और शरीर तथा सन्तानादि को साधे। उस में यह आशङ्का करके कि सूर्यादि द्वारा यज्ञ तो अवश्य सिद्ध होता है परन्तु सन्तानादि पर सूर्यादि का प्रभाव किस प्रकार है? कहते हैं कि (इन्द्रः) परमेश्वर सर्वशक्तिमान् (आदित्यैः) सूर्यकिरणों और (मरुद्भिः) विविधवायुओं से (सगणः) गण सहित (अस्मभ्यम्) हमारे लिये (भेषजा) औषधें (करत्) करे ॥ यह तो प्रसिद्ध ही है कि सूर्य की किरणों और वायुओं से ही अनेक औषध उत्पन्न होते हैं जिन से हमारे देह सन्तान आदि उत्पन्न और रक्षित होते हैं। और अब तो सूर्यकिरणादि से ही साक्षात् अनेक रोगों के दूर करने की रीति पर चिकित्सा होने लगी है, तब कहना ही क्या शेष है ॥ ३ ॥

अथ तृतीयतृचः

१ २र
प्रवोचोप ॥ १ । २ । ३ [२४] (१११३-१११४-१११४)

एषतृचोव्याख्यातपूर्वः। एतस्मिंस्तृचे त्रीणि प्रतीकान्येवाऽत्र दृश्यन्ते, तत्र " प्रव " इत्येकं प्रतीकम्, "अर्च" इति द्वितीयम्, " उप " इति तृतीयम्; तदेतत्प्रतीकत्रयं क्रमेण व्याख्यातानाम् (४४६-४४५-४४४) ऋचामेवाऽत्र-ऊहगानतृतीयप्रपाठकाऽन्तिमस्य " उद्वंशपुत्र " नामकस्य साम्न उद्धारार्थं पुनः पठितम्। तथा हि गानयुक्त वङ्गदेशसमितिमुद्रापितपुस्तके १०० शततमे पृष्ठे "उद्वंशपुत्रम्" इति गीतिसंज्ञा दृश्यते। तत्रैव तथैव स्त्रीसत्यव्रतः सामस्त्रमी चाह। विवरणाकारसंमतं चैतदेव। परं सायणाचार्येण विलक्षणमेव व्याख्यातं यथा-" अथैकर्गात्मकं सूक्तं " प्रवोचोपे " ति, चतुरक्षरात्मिका काचिदियमृग्यूपा; यथा बहूवृचानां "भद्रं नो अपि वातयमनः" इत्येक एव पाद ऋगात्मकश्च इति" ॥ १ । २ । ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—इस ३ ऋचा के सूक्त की व्याख्या पूर्व कर आये हैं। ऐसा विदित होता है कि इस तृच में ३ ऋचाओं के ३ प्रतीक ही हैं जिन में से "प्रव" यह ४४६ पर और "अर्च" यह ४४५ पर तथा "उप" यह ४४४ पर व्याख्यात किया गया है। ये ऋचा वहां छन्दआर्चिक अध्याय ४ खण्ड १० में आचुकी हैं। यहां उन को दुबारा पढ़ने का प्रयोजन "उद्वंशपुत्र" नामक गान की उत्पत्ति करना है। जैसा कि "ऊहगान" प्रपाठक ३ का अन्तिम गान है, जो गीतियुक्त बङ्गाल ऐशियाटिक सुसाइटी के छापे पुस्तक के १०० वें पृष्ठ पर छपा है और ऐसा ही श्री सत्यव्रत सामश्रमी जी लिखते हैं और विवरणकार को भी यही सम्मत है॥ परन्तु सायणाचार्य इस से विलक्षण यह लिखते हैं कि "यह एक ऋचा का "प्रवोर्चोप" सूक्त है, यह कोई ४ अक्षर की ऋचा सी है, जैसी कि ऋग्वेदियों की "भद्रं नो अपि वातयमनः" यह एक ही पाद है और ऋचा मानी जाती है"॥ १। २। ३॥

इति सप्तमाऽध्यायस्य सप्तमः खण्डः ॥ ७ ॥

इति चतुर्थस्याऽर्धः प्रपाठकः॥

इति श्रीमत्कण्ववंशाऽवतंस पण्डित हज़ारीलाल स्वामि सूनुना, हस्तिनापुर पार्श्ववर्त्ति परीक्षितगढ़ निवासिना, तुलसीराम स्वामिना कृते सामवेदभाष्यस्योत्तरार्चिके सप्तमोऽध्यायः॥ ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथाष्टमाऽध्यायः

तत्र—

प्रकाव्यमिति प्रथमे खण्डे प्रथमस्य द्वादशर्चसूक्तस्य प्रथमायाः वृषगणोवासित ऋषिः। सोमो देवता। त्रिष्टुप्छन्दः इति छन्दआर्चिके। इह तु जीवानन्द-विद्यासागरेण कलिकातायां मुद्रापिते (१८९२ ई०) पुस्तके सूक्तमात्रस्य असित देवलावृषी। गायत्री छन्दः इति भेदोदृश्यते॥

अथ प्रथमा—

१ २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २

प्रकाव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति।

१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ र २ ३

महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति

१ २

रेभन्॥ १॥ (१११६) व्याख्याता (५२४)

अथ द्वितीया—

२ ३ २ ३ १ २ ३ २उ ३ २उ ३ १ २

प्रहꣳ सासस्तृपलावग्नुमच्छा, ऽमादस्तं वृषगणा

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १र

अयासुः। अङ्गोषिणं पवमानꣳ सखायो, दुर्मर्षं वाणं

२र ३ २

प्रवदन्ति साकम्॥ २॥ (१११७)

पदपाठः—प्र अ०। हंसासः १। तृपलाः १। वग्नुम् २। अच्छ अ०। अमात् ५। अस्तम् २। वृषगणाः १। अयासुः क्रि०। अङ्गोषिणम् २। पवमानम् २। सखायः १। दुर्मर्षम्, वाणम् २। प्रवदन्ति क्रि०। साकम् अ०॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(हंसासः) हंसा आदित्यरश्मयः [इत्येव विवरणकारः] (वृषगणाः) वृष्टिकरा गणाः सन्ति ते (अमात्) बलात् (तृपलाः) क्षिप्रप्रहारिणोहि (वग्नुम्) अभिषवशब्दम् (अच्छ) अभिलक्ष्य (अस्तं) यज्ञगृहं (प्रा-ऽयासुः) प्रगच्छन्ति । ततः (सखायः) परस्परं मैत्रीयुक्ता ऋत्विजः (अङ्गोषिणं) सर्वैरधिगन्तव्यं (दुर्मर्षं) दुःसहं (वाणं) सायकमिव शत्रुनाशनं (पवमानं) सोमं (साकं) सह (प्रवदन्ति) स्तुवन्ति तद्गुणप्रकाशकं सामगानं कुर्वन्ति ॥

सोमयागिनांगृहेषुसूर्यरश्मयस्तद्धितकराः प्रकाशन्ते याज्ञिकाश्चैतत्सर्वद्योतकंसामगानमेकीभूयकुर्वन्ति इतिभावः ॥

ऋग्वेदे तु ९ । ९७ । ८ तृपलम्, वग्नुं=मन्युम्, आङ्गूष्यम्; इति त्रयः पाठभेदाः ॥ २ ॥

भाषार्थः—(हंसासः) सूर्यकिरणें [यही विवरणकारकृत अर्थ है] (वृषगणाः) वृष्टिकारक गण हैं वे (अमात्) बल से (तृपलाः) क्षिप्र प्रहार करने वाली (वग्नुम्) अभिषव के शब्द की ओर लक्ष्य करके (अस्तम्) यज्ञगृह को (प्रा-ऽयासुः) उत्कृष्टता से प्राप्त होती हैं । फिर (सखायः) मित्रभूत ऋत्विज् लोग (अङ्गोषिणम्) सब को प्राप्त करने योग्य (दुर्मर्षम्) दुःसह (बाणम्) बाण के तुल्य (पवमानम्) सोम को (साकम्) साथ मिलकर (प्रवदन्ति) गाते हैं ॥

सोमयाग करने वाले सामगान करते हैं और उन के उन यज्ञयुक्त घरों पर हितकारी वृष्टिकारी सूर्य किरणें पड़ती हैं ॥ ऋ० ९ । ९७ । ८ के पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

१ २ १ २ ३ २उ ३ १ २
स योजत उरुगायस्य जूतिं, वृथा क्रीडन्तं
३ १ २र ३ १ २ ३ १ २ ३
मिमते न गावः। परीणसं कृणुते तिग्मशृङ्गो
२ ३ २३१२३ १ २ ३ २
दिवा हरिर्ददृशे नक्तमृज्रः ॥३॥ (१११८)

पदपाठः—सः १। योजते क्रि०। उरुगायस्य ६। जूतिम् २। वृथा अ०। क्रीडन्तम् २। मिमते क्रि०। न अ०। गावः १। परीणसम् २। कृणुते क्रि०। तिग्मशृङ्गः। दिवा अ०। हरिः १। ददृशे क्रि०। नक्तम् अ०। ऋज्रः १॥

अन्वितपदार्थः—(सः) सोमः (उरुगायस्य) बहुभिः स्तुत्यस्य स्वस्य (जूतिं) गतिं (योजते) युनक्ति प्रेरयति (वृथा) अनायासेन (क्रीडन्तम्) विहरन्तं सोमं (गावः) किरणाः (न मिमते) मातुं न शक्नुवन्ति। किञ्च (तिग्मशृङ्गः) तीक्ष्णतेजस्कः सोमः (परीणसम्) बहुविधं तेजः (कृणुते) करोति। अन्तरिक्षे वर्त्तमानो हि सोमः (दिवा) दिने (हरिः) हरितवर्णः (ददृशे) दृश्यते (नक्तम्) रात्रौ तु (ऋज्रः) विस्पष्टः प्रकाशमानो दृश्यते॥

परीणसेति बहुनाम निघं० ३। १। ७ ऋग्वेदे तु ९। ९७। ९ सरंहतेत्यारम्भः॥ ३॥

भाषार्थः—(सः) वह सोम (उरुगायस्य) बहुगीयमान अपनी (जूतिम्) गति को (योजते) प्रेरित करता है (वृथा) विना परिश्रम सहज में ही (क्रीडन्तम्) आकाश में मंडलाते हुवे सोम को (गावः) किरणें (न) नहीं (मिमते) माप सकीं। किञ्च—(तिग्मशृङ्गः) तीक्ष्ण तेजस्वी सोम (परीणसम्) बहुत [निघं० ३। १। ७] तेज (कृणुते) करता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

है और (दिवा) दिन में (हरिः) हरा (ददृशे) दीखता तथा (नक्तम्) रात्रि में (ऋज्रः) स्पष्ट प्रकाशमान प्रतीत होता है ॥ ऋ० ९ । ९७ । ९ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ चतुर्थी—

२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः ।
१ २ ३ १ २
सोमासो राये अक्रमुः ॥ ४ ॥ (१११९)

पदपाठः—प्र अ० । स्वानासः १ । रथाइव अ० । अर्वन्तः १ । न अ० । श्रवस्यवः १ । सोमासः १ । राये ४ । अक्रमुः क्रि० ॥

अन्वितपदार्थः—(स्वानासः) अभिषवसमये उपरवाख्येषु गर्त्तेषु शब्दायमानाः (सोमासः) सोमाः (रथाइव) रमणीयारथाख्ययानतुल्याः (अर्वन्तः न) अश्वाइव वेगवन्तः सन्तः (श्रवस्यवः) यजमानस्यान्नमिच्छन्तः (राये) तदर्थं धनप्राप्तये (प्राऽक्रमुः) प्रक्रमन्ते ॥

यूपस्य गर्त्ता "उपरवाः" इत्युच्यन्ते । यथा कात्यायन सूत्रम्—दक्षिणस्यानसोऽधः "प्रउगं" खनत्युपरवानश्वयादि करोत्यवटवत् इति ८ । ४ । २५ यथा यूपस्याऽवटः क्रियते तथाऽत्राप्युपरवनामकांश्चतुरोगर्त्तानभिस्वीकारमारभ्यपरिलेखनपूर्वकंकुर्यादिति च तदर्थः इति श्रीसत्यव्रतः ॥ ऋग्वेदे ९ । १० । १ ऽपि ॥ ४ ॥

भाषार्थः—(स्वानासः) अभिषव के समय " उपरव " नामक गढ़ों में शब्द करते हुवे (सोमासः) सोम (रथाइव) रथ से रमणीय और (अर्वन्तः) घोड़ों (न) से वेगवान् होते हुवे (श्रवस्यवः) यजमान के अन्न को चाहते हुवे (राये) यजमानार्थ धन के लिये (प्राऽक्रमुः) यत्न करते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यूप के गढ़े "उपरव" कहाते हैं। जैसा कि कात्यायन सूत्र ८। ४। २५ (संस्कृत भाष्य में देखिये) में कहा है कि- जैसे यूप का गढ़ा खोदा जाता है वैसे ही यहां भी उपरव नाम के ४ गढ़े अभिस्वीकार से लेकर परिलेखन पूर्वक बनावे। यह उस सूत्र का श्रीसत्यव्रतसामश्रमी जी कृत अर्थ है॥ ऋ० ९। १०। १ में भी॥ ४॥

अथ पञ्चमी—

३ २ ३ १ २ ३ १र २र
हिन्वानासो रथा इव दधन्विरे गभस्त्योः।
१ २ ३ १ २
भरासः कारिणामिव॥ ५॥ (११२०)

पदपाठः—हिन्वानासः १। रथाइव अ०। दधन्विरे क्रि०। गभस्त्योः ७। भरासः १। कारिणाम् ६। इव अ०॥

अन्वितपदार्थः—(रथा इव) रमणीयाः सोमाः (हिन्वानासः) यज्ञदेशं प्रतिगच्छन्तः (गभस्त्योः) ऋत्विजां बाह्वोः (दधन्विरे) धीयन्ते (इव) यथा (भरासः) भाराः (कारिणाम्) कर्मकराणां बाह्वोर्धीयन्ते तद्वत्॥ ऋग्वेदे ९। १०। २। ऽपि॥ ५॥

भाषार्थः-(रथा इव) रथ के तुल्य रमणीय (हिन्वानासः) यज्ञ देश के प्रति जाते हुवे सोम (गभस्त्योः) ऋत्विजों की बाहुओं में (दधन्विरे) धरे जाते हैं (इव) जैसे (भरासः) भार= बोझे (कारिणाम्) मज़दूरों की बाहुवों पर धरे जाते हैं। तद्वत्॥ ऋ० ९। १०। २ में भी॥ ५॥

अथ षष्ठी—

१ २ ३ १र २र ३ १ २ ३ १ २
राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते।
३२उ ३ २ ३ १ २
यज्ञो न सप्त धातृभिः॥ ६॥ (११२१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–राजानः १ । न अ० । प्रशस्तिभिः ३ । सोमासः १ । गोभिः ३ । अज्यते क्रि० । यज्ञः १ । न । सप्तधातृभिः ३ ॥

अन्वितपदार्थः–(सोमासः) सोमाः (प्रशस्तिभिः) प्रशंसाभिः (न) यथा (राजानः) नृपाः तथा (न) यथा (यज्ञः) (सप्तधातृभिः) सप्तभिर्होत्राभिः (अज्यते) अज्यते संस्क्रियते तद्वत् (गोभिः) सूर्यकिरणैः संस्क्रियन्ते ॥ ऋग्वेदे ९ । १० । ३ ऽपि ॥ ६ ॥

भाषार्थः–(न) जैसे (राजानः) राजा लोग (प्रशस्तिभिः) प्रशंसाओं से और (न) जैसे (यज्ञः) यज्ञ (सप्तधातृभिः) ७ होत्राओं से (अज्यते) संस्कृत किया जाता है, तद्वत् (सोमासः) सोम (गोभिः) सूर्यकिरणों से संस्कृत किये जाते हैं ॥ ऋ० ९ । १० । ३ में भी ॥ ६ ॥

अथ सप्तमी–

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २
परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
१ २ ३ १ २
मधो अर्षन्ति धारया ॥७॥ (११२२)

पदपाठः–परि अ० । स्वानासः १ । इन्दवः १ । मदाय ४ । बर्हणा, गिरा ३ । मधोः ६ । अर्षन्ति क्रि० । धारया ३ ॥

अन्वितपदार्थः–(बर्हणा) बृहत्या (गिरा) वाचा मन्त्ररूपया सह (स्वानासः) अभिषूयमाणाः सन्तः (इन्दवः) सोमाः (मदाय) हृष्टये (मधोः) मधुरस्य रसस्य (धारया) (परि अर्षन्ति) परितः प्रसरन्ति ॥ ऋग्वेदे ९ । १० । ४ ऽपि ॥ ७ ॥

भाषार्थः–(बर्हणा) महती (गिरा) मन्त्ररूपिणी वाणी के साथ (स्वानासः) अभिषुत किये जाते हुवे (इन्दवः) सोम (मदाय) हृष्टि के लिये (मधोः) मधुर रस की (धारया) धारा से (परि अर्षन्ति) सब ओर फैलते हैं ॥ ऋ० ९ । १० । ४ में भी ॥ ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथाऽष्टमी–

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
आपानासो विवस्वतो जिन्वन्त उषसो भगम् ।
२ ३ २ ३ १ २
सूरा अण्वं वितन्वते ॥ ८ ॥ (११२३)

पदपाठः–आ अ० । पानासः १ । विवस्वतः ६ । जिन्वन्तः १ । उषसः ६ । भगम् २ । सूराः १ । अण्वम् २ । वितन्वते क्रि० ॥

अन्वितपदार्थः–(विवस्वतः) सूर्यस्य (पानासः) पानभूताः (उषसः) प्रभातवेलोत्थिताऽरुणोदयस्य (भगम्) शोभां (जिन्वन्तः) वर्धयन्तः (सूराः) सूर्याइव प्रकाशमानाः सोमाः (अण्वम्) सूक्ष्मं (आ–वितन्वते) वितानमिव संपादयन्ति ॥ ऋग्वेदे ९ । १० । ५ ऽपि ॥ ८ ॥

भाषार्थः–(विवस्वतः) सूर्य के (पानासः) पानभूत और (उषसः) उषा की (भगम्) शोभा को (जिन्वन्तः) बढ़ाते हुवे (सूराः) सूर्यतुल्य प्रकाशमान सोम (अण्वम्) सूक्ष्म (आ–वितन्वते) कुछ वितान=चन्दोवा सा बना देते हैं ॥ ऋ० ९ । १० । ५ में भी ॥ ८ ॥

अथ नवमी–

२ ३ १ २ ३ २ ३ १ २ ३ १ २
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः ।
२ ३ १ २ ३ १ २
वृष्णो हरस आयवः ॥ ९ ॥ (११२४)

पदपाठः–अप अ० । द्वारा २ । मतीनाम् ६ । प्रत्नाः १ । ऋण्वन्ति क्रि० । कारवः १ । वृष्णः ६ । हरसे ४ । आयवः १ ॥

अन्वितपदार्थः–(मतीनां) बुद्धीनां (कारवः) उत्पादकाः (प्रत्नाः) वृद्धाः (आयवः) ऋत्विजो मनुष्याः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(हरसे) दीप्त्यै तेजसे (वृष्णः) वीर्यवतः सोमस्य (द्वारा) द्वाराणि अभिषवकाले (अप-ऋण्वन्ति) विवृण्वन्ति ॥ ऋग्वेदे ९ । १० । ६ ऽपि ॥ ९ ॥

भाषार्थः-(मतीनाम्) बुद्धियों के (कारवः) उत्पादक (प्रत्नाः) अनुभवी वृद्ध (आयवः) ऋत्विज् लोग (हरसे) दीप्ति वा तेज के लिये (वृष्णः) वीर्यवान् सोम के (द्वारा) दरवाज़े=द्वारों को (अप-ऋण्वन्ति) खोल देते हैं।। ऋ० ९ । १० । ६ में भी ॥ ९ ॥

अथ दशमी—

३ १२ ३ १२ ३१ २
समीचीनास आशत होतारः सप्त जानयः ।
३१र २र ३ १२
पदमेकस्य पिप्रतः ॥ १० ॥ (११२५)

पदपाठः—समीचीनासः १ । आशत क्रि० । होतारः, सप्त, जानयः १ । पदम् २ । एकस्य ६ । पिप्रतः १ ॥

अन्वितपदार्थः-(समीचीनासः) समीचीनाः (जानयः) जनाः (सप्त होतारः) १ होता, २ मैत्रावरुणः, ३ ब्राह्मणाच्छंसी, ४ पोता, ५ नेष्टा, ६ अच्छावाकः, ७ आग्नीध्रश्चेति सप्त (एकस्य) परस्परमेकस्य (पदं) स्थानमितरे (पिप्रतः) पूरयन्तः सन्तः (आशत) व्याप्नुवन्ति ॥

ऋग्वेदे तु ९ । १० । ७ आसत इति पाठः आसीनाभवन्तीति च तदर्थः ॥ १० ॥

भाषार्थः-(समीचीनासः) सत्पुरुष (जानयः) जन (सप्त होतारः) १-होता २-मैत्रावरुण ३-ब्राह्मणाच्छंसी ४-पोता ५-नेष्टा ६-अच्छावाक और ७ आग्नीध्र ये सातों (एकस्य) आपस में एक के (पदम्) स्थानको दूसरे (पिप्रतः) पूरा करते हुवे (आशत) व्यापते हैं ॥ ऋ० ९ । १० । ७ का पाठ और अर्थ का भेद संस्कृत भाष्य में देखिये ॥ १० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथैकादशी—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २

नाभा नाभिं न आददे चक्षुषा सूर्यं दृशे।

३ १ २ २ ३ १ २

कवेरपत्यमादुहे ॥ ११ ॥ (११२६)

पदपाठः—नाभा ७। नाभिम् २। नः ६। आददे क्रि०। चक्षुषा ३। सूर्यम् २। दृशे ४। कवेः ६। अपत्यम् २। आदुहे क्रि० ॥

अन्वितपदार्थः—(नाभिम्) यज्ञस्य नाभिभूतं सोमं (नः) अस्माकं (नाभा) नाभौ (आददे) आददन्महे, पीत्वा नाभिस्थाने कुर्मइत्यर्थः किमर्थम् ? (चक्षुषा) नेत्रेण (सूर्यम्) आदित्यं (दृशे) द्रष्टुम्। किञ्च (कवेः) क्रान्तकर्मणः सोमस्य (अपत्यम्) अंशुम् (आदुहे) पूरयामः ॥ ऋग्वेदे तु ९। १०। ८ चक्षुष्मित्सूर्ये सचा इति तृतीयपादपाठः ॥ ११ ॥

भाषार्थः—(नाभिम्) यज्ञ की नाभिरूपी सोम को (नः) हम अपनी (नाभा) नाभि में (आददे) ग्रहण करते अर्थात् पीते हैं। किस लिये ? उत्तर— (चक्षुषा) आंख से (सूर्यम्) सूर्य को (दृशे) देखने के लिये। और (कवेः) क्रान्तदर्शी सोम के (अपत्यम्) सन्तानरूपी अंशु को (आदुहे) हम पूरते हैं ॥ ऋ० ९। १०। ८ का पाठभेद संस्कृत भाष्य में देखिये ॥ ११ ॥

अथ द्वादशी—

३ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २

अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम्।

१ २ ३ १ २

सूरः पश्यति चक्षसा ॥ १२ ॥ [१] (११२७)

पदपाठः—अभि अ०। प्रियम् २। दिवः ६। पदम् २। अध्वर्युभिः ३। गुहा ७। हितम् २। सूरः १। पश्यति क्रि०। चक्षसा ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(सूरः) सूर्यइव प्रकाशमानो विद्वान् (चक्षसा) विद्याचक्षुषा (प्रियं) हितकरं (दिवः पदं) स्वर्गस्य सुखस्य स्थानं तथा (अध्वर्युभिः) याज्ञिकैः पुरुषैः (गुहा) गुहायामाकाशे (हितं) निहितं स्थापितं सोमप्रभावम् (अभि पश्यति) सर्वतः पश्यति॥ ऋग्वेदे ९। १०। ९ ऽपि ॥ १२ ॥

भाषार्थः—(सूरः) सूर्यवत्प्रकाशमान विद्वान् पुरुष (चक्षसा) विद्यारूपी नेत्र से (प्रियम्) प्यारे (दिवः पदम्) सुख के स्थान तथा (अध्वर्युभिः) यज्ञकर्त्ताओं से (गुहा) आकाश में (हितम्) स्थापित सोम के प्रभाव को (अभि) सब ओर (पश्यति) देखता है ॥ ऋ० ९। १०। ९ में भी ॥ १२ ॥

अथ द्वितीयखण्डे असृग्रमिति द्वादशर्चस्य प्रथममूक्तस्याऽसितः काश्यपोदेवलोवा ऋषिः। पवमानः सोमो देवता। गायत्री छन्दः॥

तत्र प्रथमा—

१ २ ३ १ २ ३१२ २१ ३१ २ ३१ २

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः।

३ १ २ ३ १ २

विदाना अस्य योजना ॥ १ ॥ (११२८)

पदपाठः—असृग्रम् क्रि०। इन्दवः १=२। पथा ७। धर्मन् ७। ऋतस्य ६। सुश्रियः १। विदानाः १। अस्य ६। योजना २॥

अन्वितपदार्थः—(अस्य) सोमस्य (योजना) योजनं (विदानाः) जानन्तः (सुश्रियः) सुशोभिता ऋत्विजः (ऋतस्य) सत्यस्य (धर्मन्) धर्म्ये (पथा) पथि=यज्ञे (इन्दवः) इन्दून्सोमान् (असृग्रं) सृजन्ति ॥ ऋग्वेदे तु ९। ७। १ योजनमित्येव पाठः ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(अस्य) इस सोम के (योजना) प्रयुक्त करने को (विदानाः) जानने वाले (सुश्रियः) सुन्दर शोभा वाले ऋत्विज् लोग (ऋतस्य) सत्य के (धर्मन्) धर्मानुकूल (पथा) मार्ग=यज्ञ में (इन्दवः) सोमों को (असृग्रम्) छोड़ते हैं ॥ ऋ० ९ । ७ । १ का पाठान्तर संस्कृत भाष्य में देखिये ॥ १ ॥

अथ द्वितीया—

३उ ३१२ ३ २ ३२ ३१र २र

प्र धारामधो अग्रियो महीरपो विगाहते ।

३ २३२ ३ १ २

हविर्हविष्षु वन्द्यः ॥ २ ॥ (११२९)

पदपाठः—प्र अ० । धारा २ । मधोः ६ । अग्रियः १ । महीः २ । अपः २ । विगाहते क्रि० । हविः १ । हविष्षु ७ । वन्द्यः १ ॥

अन्वितपदार्थः—(हविष्षु) अन्यहव्येषु (वन्द्यः) प्रशस्यः (हविः) हविःपदार्थः (अग्रियः) अग्योमुख्यः सोमः (महीः) महतीः (मधोः धाराः) मधुररसस्य धारारूपाः (अपः) (प्र–वि–गाहते) विलोडयति ॥ ऋग्वेदे तु ९ । ७ । २ मध्वः इति पाठः ॥ २ ॥

भाषार्थः—(हविष्षु) अन्य हवियों में (वन्द्यः) प्रशंसनीय (अग्रियः) मुख्य (हविः) हवि=सोम (महीः, मधोः धाराः, अपः) बड़ी भारी, मधुर रस की धारों वाले, जलों को (प्र–विगाहते) बिलोय डालता है ॥ ऋ० ९ । ७ । २ का पाठ भेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

२ ३ २ ३ २ २ ३१र २र ३१२

प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने ।

२ ३ २ ३ १ २ ३२

सद्मामि सत्यो अध्वरः ॥ ३ ॥ (११३०)

पदपाठः—प्र अ० । युजाः,वाचः २ । अग्रियः १ । वृषा १ । च अ० । अचिक्रदत् क्रि० । वने ७ । सद्म २ । अभि अ० । सत्यः १ । अध्वरः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(अग्रियः) हविष्षुमुख्यः सोमः (वाचः) वाणीः (युजाः) युक्ताः (प्र) प्रकुरुते । एतदेवाह—(वृषा) वर्षकः (उ) हि (सत्यः) स्थिरफलः (अध्वरः) यज्ञस्वरूपः सोमः (सद्म) यज्ञगृहम् (अभि) प्रति (वने) वसतीवरीसंज्ञके जले (अचिक्रदत्) शब्दायते ॥ यत्तु सायणाचार्येण " वृषा, उ " इति पदकाराभिमतं पदद्वय विश्लेषमकृत्वा व्याख्यातं " वृषः " इति तत्पदपाठविरुद्धम् इत्येव श्रीसत्यव्रतश्च ॥ ऋग्वेदे तु ९ । ७ । ३ वृषावचक्रदत् इति पाठः ॥ ३ ॥

भाषार्थः— (अग्रियः) हवियों में मुख्य सोम (वाचः) वाणियों को (युजाः) युक्त ठीक (प्र) करता है अर्थात् (वृषा उ) वृष्टिकारक (सत्यः) स्थिरफल वाला (अध्वरः) यज्ञस्वरूप सोम (सद्म) यज्ञस्थान (अभि) में (वने) वसतीवरी नाम के जल में (अचिक्रदत्) शब्द करता है ॥ सायणाचार्य ने जो पदपाठ के अनुसार " वृषा, उ " इस प्रकार पदद्वय न करके "वृषः" पद की व्याख्या की है सो पदकार के विरुद्ध है, यही श्री सत्यव्रतसामश्रमी जी का कथन है॥ ऋ० ९ । ७ । ३ का पाठभेद संस्कृत भाष्य में देखिये ॥३॥

अथ चतुर्थी—

२ ३ १र २र ३ २ ३ १ २ ३ १र २र
परि यत्काव्या कविर्नृम्णा पुनानो अर्षति ।
१र ३ १ २
स्वर्वाजी सिषासति ॥ ४ ॥ (११३१)

पदपाठः—परि अ० । यत् अ० । काव्या २। कविः १ । नृम्णा २ । पुनानः १। अर्षति क्रि० । स्वः अ० । वाजी १ । सिषासति क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(कविः) वाक्सौष्ठवकरः सोमः (नृम्णा) बलानि धनानि वा (पुनानः) शोधयन् (काव्या) काव्यानि कविकर्माणि वैदिकानि स्तोत्राणि (यत्) यदा (परि अर्षति) परि गच्छति वैदिकमन्त्रोक्तस्तुत्यनुकूलमात्मानं दर्शयति तदा (स्वः) सुखं (वाजी) बलवान्सोमः (सिषासति) लोकोपकाराय स्वरूपं संभक्तुमिच्छतीति प्रतिभाति॥ ऋग्वेदेतु ९।७।४ पुनानः=वसानः इति भेदः॥४॥

भाषार्थः-(कविः) वाणी का सुधारने वाला सोम (नृम्णा) धनों वा बलों को (पुनानः) शोधता हुवा (काव्या) कवि के कर्म काव्य=वैदिक स्तोत्रों को (यत्) जब कि (परि-अर्षति) प्राप्त होता अर्थात् अपने को वेदमन्त्रों में उक्त प्रशंसाओं के तुल्य दर्शाता है तब (स्वः) सुख को (वाजी) बलवान् बलदायक सोम (सिषासति) मानों बांटना चाहता है॥ ऋ० ९। ७।४ का पाठभेद संस्कृतभाष्य में देखिये॥ ४॥

अथ पञ्चमी—

१२ ३२उ ३ २ ३ १ २
पवमानो अभि स्पृधो विशोराजेव सीदति।
१२३१ २ ३१२
यदीमृण्वन्ति वेधसः॥ ५॥ (११३२)

पदपाठः—पवमानः १। अभि अ०। स्पृधः २। विशः २। राजेव अ०। सीदति क्रि०। यत्, ईम् अ०। ऋण्वन्ति क्रि०। वेधसः १॥

अन्वितपदार्थः-(यत्) यदा (ईम्) एनं सोमं (वेधसः) कर्मणः कर्त्तार ऋत्विजः (ऋण्वन्ति) अभिषुण्वन्ति तदा (पवमानः) एष सोमः (स्पृधः) स्पर्धमानान् दुष्टान् (अभि-सीदति) नाशयितुमभिगच्छति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र दृष्टान्तः—(विशः) स्पर्धमानाः प्रजाः (राजेव) राजा यथा दमयति तद्वत् ॥ ऋग्वेदे ९ । ७ । ५ ऽपि ॥ ५ ॥

भाषार्थः—(यत्) जब कि (ईम्) इस सोम को (वेधसः) कर्मकर्त्ता ऋत्विज् लोग (ऋण्वन्ति) अभिषुत करते हैं तब (पवमानः) यह सोम (स्पृधः) स्पर्धमान दुष्टों को (अभि-सीदति) नष्ट करने चलता है । दृष्टान्त—(विशः) स्पर्धमान प्रजाओं को (राजेव) जैसे राजा, तद्वत् ॥ ऋ० ९ । ७ । ५ में भी ॥५॥

अथ षष्ठी—

२ ३ २३ १२ ३२३ ३१२
अव्या वारे परि प्रियो हरिर्वनेषु सीदति ।
३१ २ ३ २
रेभो वनुष्यते मती ॥ ६ ॥ (११३३)

पदपाठः—अव्याः ६ । वारे ७ । परि अ० । प्रियः १ । हरिः १ । वनेषु ७ । सीदति क्रि० । रेभः १ । वनुष्यते क्रि० । मती ३ ॥

अन्वितपदार्थः—(हरिः) सोमः (प्रियः) रुचिकरः (वनेषु) वसतीवरीनामकेषु जलेषु संपृक्तः (अव्याः) अवेः (वारे) बाले बालमये ऊर्णामये दशापवित्रे (परि-सीदति), किंच (रेभः) अभिषवसमये उपरवेषु शब्दायमानः (मती) मत्या स्तुत्या प्रशंसया (वनुष्यते) सेव्यते ॥ ऋग्वेदे ९ । ७ । ६ ऽपि ॥ ६ ॥

भाषार्थः—(हरिः) सोम (प्रियः) प्यारा (वनेषु) वसतीवरीनामक जलों में छुवा मिला हुवा (अव्याः) भेड के (वारे) बाल के ऊनी दशापवित्रपर (परि सीदति) रहता है और (रेभः) अभिषव के समय उपरवों में शब्द करता हुवा (मती) प्रशंसा से (वनुष्यते) सेवित होता है ॥ ऋ० ९ । ७ । ६ में भी ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ सप्तमी—

२ ३ १र २र ३ १ २ ३ १र २र
स वायुमिन्द्रमश्विना साकं मदेन गच्छति ।
२ ३ १ २ ३ १ २
रणायो अस्य धर्मणा ॥ ७ ॥ (११३४)

पदपाठः—सः १ । वायुम्, इन्द्रम् २ । अश्विना २ । साकम् अ० । मदेन ३ । गच्छति क्रि० । रण क्रि० । यः १ । अस्य ६ । धर्मणा ३ ॥

अन्वितपदार्थः—(यः) यजमानः (अस्य) सोमस्य (धर्मणा) धर्मेणाऽभिषवादिना सह (रण) रमते (सः) यजमानः (इन्द्रम्) इन्द्रनामकं (वायुं) वातम् (अश्विना) अश्विनौ द्यावापृथिव्यौ च (मदेन) हर्षेण (गच्छति) प्राप्नोति ॥ ऋग्वेदे तु ९ । ७ । ७ धर्मभिरिति पाठः सायणाचार्येण च स एवाऽत्रापि भ्रान्त्या व्याख्यातः ॥ ७ ॥

भाषार्थः—(यः) जो यजमान (अस्य) इस सोम के (धर्मणा) अभिषवादि धर्म से (रण) रमण करता है (सः) वह (इन्द्रम्) इन्द्र नामक (वायुम्) वायु को (अश्विना) और द्यावा पृथिवी को (मदेन) हर्ष के साथ (गच्छति) प्राप्त होता है ॥ ऋ० ९ । ७ । ७ में धर्मणा के स्थान में धर्मभिः पाठ है और सायणाचार्य ने भ्रम से वही यहां भी व्याख्यात कर दिया है ॥७॥

अथाऽष्टमी—

२ ३ २र २र ३ २ ३ १ २ ३ १ २
आ मित्रे वरुणे भगे मधोः पवन्तऊर्मयः ।
३ १ २ ३ १ २
विदाना अस्य शक्मभिः ॥ ८ ॥ (११३५)

पदपाठः—आ अ० । मित्रे, वरुणे, भगे ७ । मधोः ६ । पवन्ते क्रि० । ऊर्मय १ । विदानाः १ । अस्य ६ । शक्मभिः ३ ॥

अन्वितपदार्थः—ये पुरुषाः (अस्य) (मधोः) मधुर-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रसवतः सोमस्य (ऊर्मयः) लहरीः (विदानाः) जानन्तः सन्तः (मित्रे, वरुणे, भगे) एतन्नामकेषु सूर्यरश्मिभेदेषु देवेषु (पवन्ते) शुद्धिं संपादयन्ति, ते (शवसभिः) कर्मभिः संगच्छन्ते ॥ ऋग्वेदे तु ९ । ७ । ८ मित्रावरुणा भगं मध्वः इति पाठभेदाः सायणाचार्येण चाऽत्रापि ते एव व्याख्याताः॥८॥

भाषार्थः—जो पुरुष (अस्य) इस (मधोः) मधुर रसयुक्त सोम की (ऊर्मयः) लहरों को (विदानाः) जानते हुवे (मित्रे वरुणे भगे) मित्र वरुण भग नामक सूर्यकिरणभेदरूपी देवों में (पवन्ते) शुद्धि करते हैं, वे (शवसभिः) पुरुषार्थों से युक्त होते हैं ॥ ऋ० ९ । ७ । ८ के पाठभेद संस्कृत-भाष्य में देखिये, यहां सामवेद में भी सायणाचार्य ने उन ऋग्वेद के ही पाठों की व्याख्या भ्रान्ति से कर दी है ॥ ८ ॥

अथ नवमी—

१ १ २ ३२३ ३ १ २ ३१२

अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये ।

२ ३ १२३ १२

श्रवो वसूनि संजितम् ॥ ९ ॥ (११३६)

पदपाठः-अस्मभ्यम् ४ । रोदसी १ । रयिम् २ । मध्वः, वाजस्य ६ । सातये ४ । श्रवः २ । वसूनि २ । संजितम् क्रि० ॥

अन्वितपदार्थः-(रोदसी) द्यावापृथिव्यौ (मध्वः) मधुरस्य (वाजस्य) सोमस्याऽन्नस्य (सातये) दानाय (अस्मभ्यं) याज्ञिकेभ्यः (श्रवः) यशः (रयिम्) धनं (वसूनि) पश्वादीनि (संजितम्) प्रयच्छताम् ॥ ऋग्वेदे ९ । ७ । ९ ऽपि ॥ ९ ॥

भाषार्थः-(रोदसी) द्यावापृथिवी दोनों (मध्वः) मधुर (वाजस्य) सोमरूपी अन्न के (सातये) दानार्थ (अस्मभ्यम्) हमें (श्रवः) यश (रयिम्) धन और (वसूनि) पशुआदि धन (संजितम्) देवें ॥ ऋ० ९ । ७ । ९ में भी ॥९॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ दशमी–

२ ३ १ २ ३ २३ १ २३ १ २

आ ते दत्तं मयो भुवं वह्निमद्यावृणीमहे ।

२ ३ १ २३ १२

पान्तमापुरुस्पृहम् ॥ १० ॥ (११३७) व्याख्याता (४९८)

अथैकादशी–

२ ३ १र २र ३ २उ ३ १ २३ १ २

आ मन्द्रमावरेण्यमाविप्रमा मनीषिणम् ।

२ ३ १ २३ १ २

पान्तमा पुरुस्पृहम् ॥ ११ ॥ (११३८)

पदपाठः-आ अ० । मन्द्रम् २ । आ । वरेण्यम् २ । आ । विप्रम् २ । आ । मनीषिणम् २ । पान्तम् २ । आ । पुरुस्पृहम् २ ॥

अन्वितपदार्थः-(मन्द्रम्) हृष्टिकरं सोमम् (आ) आवृणीमहे इति पूर्वमन्त्रादनुवर्त्तते (वरेण्यम्) वरणीयं संभजनीयम् (आ) आवृणीमहे (विप्रम्) मेधातत्त्ववन्तम् (आ) आवृणीमहे (मनीषिणम्) मनीषावन्तम् (आ) आवृणीमहे (पान्तम्) रक्षन्तम् तथा (पुरुस्पृहम्) बहुभिः स्पृहणीयं सोमम् (आ) आवृणीमहे ॥ ऋग्वेदे ९ । ६५ । २९ ऽपि ॥ ११ ॥

भाषार्थः-(मन्द्रम्) हृष्टिकारक सोम का (आ) [पूर्व मन्त्र से "वृणीमहे" क्रिया की अनुवृत्ति है] हम सर्वतः वरण करते हैं (वरेण्यम्) वरणीय वा भजनीय सोम का (आ) हम वरण करते हैं (विप्रम्) धारणावती बुद्धितत्ववाले सोम का (आ) हम करते हैं (मनीषिणम्) साधारण बुद्धितत्त्वयुक्त सोम का (आ) हम वरण करते हैं (पान्तम्) रक्षा करते हुवे तथा (पुरुस्पृहम्) बहुतों से चाहे हुवे सोम का (आ) हम वरण करते हैं ॥ ऋ० ९ । ६५ । २९ में भी ॥ ११ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वादशी-

२ ३१र २र३ र३१ २ ३२
आ रयिमासुचेतुनमा सुक्रतो तनूष्वा ।
२ ३१ २३१२
पान्तमा पुरुस्पृहम् ॥ १२ ॥ [२] (११३९)

पदपाठः-आ अ० । रयिम् २ । आ । सुचेतुनम् २ । आ । सुक्रतो सं० । तनूषु ७ । आ । पान्तम् । आ । पुरुस्पृहम् ॥

अन्वितपदार्थः-(सुक्रतो) यज्ञसौष्ठवकर ! वयं (रयिम्) धनस्वरूपं सोमम् (आ) आवृणीमहे (सुचेतुनम्) बुद्धिसौष्ठवकरं सोमम् (आ) आवृणीमहे (तनूषु) अस्मद्देहेषु निमित्तेषु (आ) सोममावृणीमहे (पान्तमापु०) उक्तपूर्वम् ॥ ऋग्वेदे ९ । ६५ । ३० ऽपि ॥ १२ ॥

भाषार्थः-(सुक्रतो) हे यज्ञ सुधारने वाले ! हम (रयिम्) सोमरूपी धन का (आ) सर्वतः वरण करते हैं (सुचेतुनम्) बुद्धि सुधारने वाले सोम का (आ) वरण करते हैं (तनूषु) हम अपने देहों के निमित्त (आ) सोम का वरण करते हैं (पान्तमा पु०) पूर्व अर्थ किया गया ॥ ऋ० ९ । ६५ । ३० में भी ॥१२॥

इति अष्टमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

उक्तं बहिष्पवमानम् इति विवरणकारः

अथ

तृतीये खण्डे प्रथमतृचस्य-भरद्वाज ऋषिः । अग्निर्वैश्वानरो देवता । त्रिष्टुप्छन्दः ॥ तत्र प्रथमा-

३१२ ३१ २३१२३१ २ ३२३२उ ३२३ २
मूर्धानं दिवो अरतिं पृथिव्या, वैश्वानरमृत आजातमग्निम् ।
३२ ३२३१२३१२ ३२३१२ ३२
कविꣳ सम्राजमतिथिं जनाना,मासन्नः पात्रं जनयन्त देवाः ॥१॥

(११४०) ऽगाख्याता (६७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१र २र ३ १ २ ३ २ ३ २ ३ २ ३ १र २र

त्वां विश्वे अमृत जायमानꣳ, शिशुं न देवा अभिसंनवन्ते ।

२ ३ १ ३ ३ १ २ ३ १र २ ३ २ ३ १र २र

तव क्रतुभिरमृतत्वमायन्, वैश्वानर यत्पित्रोरदीदेः॥ २॥ (११४१)

पदपाठः—त्वाम् २ । विश्वे १ । अमृत सं० । जायमानम् २ । शिशुम् २ । न अ० । देवाः १ । अभि सं–नवन्ते क्रि० । तव ६ । क्रतुभिः ३ । अमृतत्वम् २ । आयन् क्रि० । वैश्वानर सं० । यत् अ० । पित्रोः ७ । अदीदेः क्रि० ॥

अन्वितपदार्थः–(अमृत) मरणरहिताग्ने ! (विश्वे) सर्वे (देवाः) ऋत्विजः (जायमानम्) अरण्योरुत्पद्यमानं (त्वाम्) अग्निम् (अभि–सं–नवन्ते) सर्वतः सम्यक् प्रशंसन्ति । यद्वा देवारश्मयो जायमानमभि संनवन्तेऽभितः संगच्छन्ते। दृष्टान्तः–(शिशुं न) यथा जायमानं पुत्रं पित्रादयः प्रशंसन्ति समभिगच्छन्ति वा तद्वत् (वैश्वानर)अग्ने ! (यद्) यदा (पित्रोः) पालयित्रोर्द्यावापृथिव्योर्मध्ये (अदीदेः) दीप्यसे, तदा (तव) त्वदीयैः (क्रतुभिः) कर्मभिर्यज्ञैर्वा यजमानाः (अमृतत्वम्) देवत्वम् (आयन्) प्राप्नुवन्ति ॥ ऋग्वेदे ६ । ७ । ४ ऽपि ॥ २ ॥

भाषार्थः-(अमृत) मरणरहित ! अग्ने ! (विश्वे) सब (देवाः) वायु आदि देवता वा ऋत्विज् लोग (जायमानम्) उत्पद्यमान (त्वाम्) तुझ को (अभि–सं–नवन्ते) प्रशंसित करते वा तेरी ओर झुक कर आते हैं । दृष्टान्त–(न) जैसे (शिशुम्) उत्पद्यमान बच्चे को पिता आदि प्रशंसित करते वा उस की ओर झुक कर आते हैं तद्वत् । (वैश्वानर) हे अग्ने ! (तव) तेरे (क्रतुभिः) कर्मों वा यज्ञों से यजमान लोग (अमृतत्वम्) देवत्व को (आयन्) प्राप्त होजाते हैं ॥ ऋ० ६ । ७ । ४ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ २ २
नाभिं यज्ञानाꣳ सदनꣳ रयीणां,महामाहावमभि संनवन्त ।
३ २ क २ २ ३ १ २ ३ १ २ ३ १ २ ३ २
वैश्वानरꣳ रथ्यमध्वराणां, यज्ञस्य केतुं जनयन्त देवाः ॥

॥ ३ ॥ [३] (११४२)

पदपाठः-नाभिम् २ । यज्ञानाम् ६ । सदनम् २ । रयीणाम् ६ । महाम्, आहावम् २ । अभि-सं-नवन्त क्रि० । वैश्वानरम् , रथ्यम् २ । अध्वराणाम् ६ । यज्ञस्य ६ । केतुम् २ । जनयन्त क्रि० । देवाः १ ॥

अन्वितपदार्थः-(यज्ञानां नाभिम्) अग्निष्टोमादि-क्रतूनां केन्द्रं (रयीणां सदनं) धनानां स्थानं (महां) महा-न्तम् (आहावम्) आहूयन्ते अस्मिन्नाहुतय इत्याहावस्तं यद्वा वृष्ट्युदकधाराणामाहावो निपानस्थानीयोग्निस्तम् ऋत्विजः (अभि-सं-नवन्त) अभितः सम्यक् स्तुवन्ति। तथा (वैश्वानरम्) अग्निम् (अध्वराणां) यज्ञानाम् (रथ्यं) रथिनं यथा रथी स्वरथं यथेष्टं नयति तद्वन्नेतारं रंहि-तारं गमयितारमिति यावत् (यज्ञस्य) अध्वरस्य (केतुं) ध्वजम् (देवाः) ऋत्विजः (जनयन्त) मन्थनेनोत्पाद-यन्ति ॥ ऋग्वेदे ६ । ७ । २ ऽपि ॥ ३ ॥

भाषार्थः-(यज्ञानां नाभिम्) अग्निष्टोमादि यज्ञों के केन्द्रभूत (रयीणां सदनम्) धनों के स्थान (महाम्) बड़े (आहावम्) आहुतिस्थान यद्वा वर्षा के जल की धाराओं के चौबच्चे रूप अग्नि को ऋत्विज् लोग(अभि-सं-नवन्त) सब ओर से भले प्रकार स्तुत करते हैं तथा (अध्वराणां रथ्यम्) यज्ञों के रथी [जैसे रथी रथ को यथेष्ट लेजाता है तद्वत् यज्ञों के ले जाने वाले] (यज्ञस्य) यज्ञ के (केतुम्) ध्वजा रूप (वैश्वानरम्) अग्नि को

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(देवाः) ऋत्विज्लोग (जनयन्त) मन्थन से उत्पन्न करते हैं ॥ ऋ० ६ । ७ । २ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-यजत ऋषिः । मित्रावरुणौ देवते । गायत्री छन्दः ॥ तत्र प्रथमा-

१ २ ३ १२ ३ १२ ३ २ ३ २
प्र वो मित्राय गायत वरुणाय विपा गिरा ।
१२ ३२ ३२
महि क्षत्रावृतं बृहत् ॥ १ ॥ (११४३)

पदपाठः-प्र अ० । वः ६ । मित्राय ४=२ । गायत क्रि० । वरुणाय ४=२ । विपा, गिरा ३ । महिक्षत्रौ २ । ऋतम् २ । बृहत् २ ॥

अन्वितपदार्थः-हे मनुष्याः! (वः) युष्माकं (विपा) विस्तृतया (गिरा) वैदिक्या वाचा (महिक्षत्रौ) महाबलौ (मित्राय वरुणाय) मित्रावरुणौ (ऋतम्) यथार्थम् (बृहत्) महत् (प्र-गायत) प्रशंसत ॥ ऋग्वेदे ५ । ६८ । १ ऽपि ॥ १ ॥

भाषार्थः-हे मनुष्यो ! तुम (वः) तुम्हारी [अपनी] (विपा) विस्तृत (गिरा) वैदिकी वाणी से (महिक्षत्रौ) महाबली (वरुणाय) वरुण और (मित्राय) मित्र को (ऋतम्) यथार्थ (बृहत्) बहुत (प्र-गायत) प्रशंसित करो ॥ ऋ० ५ । ६८ । १ में भी ॥ १ ॥

अथ द्वितीया-

३ २ ३ २ ३ १२ ३ २ ३ १र २र
सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च ।
३ २ ३ १ २ ३ २
देवा देवेषु प्रशस्ता ॥ २ ॥ (११४४)

पदपाठः-सम्राजा, या, घृतयोनी १ । मित्रः १ । च अ० । उभा १ । वरुणः १ । च । देवा १ । देवेषु ७ । प्रशस्ता १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—ननु किंभूतौ तौ मित्रावरुणावित्यत्राह—(या) यौ (मित्रश्च, वरुणश्च) (उभा) उभौ (देवा) देवौ (देवेषु) अन्यदेवेषु (प्रशस्ता) प्रशस्तौ (घृतयोनी) जलोत्पादकौ (सम्राजा) सम्राजौ स्तस्तौ इति पूर्वेणान्वयः ॥ ऋग्वेदे ५। ६८। २ऽपि ॥ २ ॥

भाषार्थः—वे मित्र वरुण कैसे हैं ? सो कहते हैं कि (या) जो (मित्रश्च वरुणश्च) मित्र और वरुण (उभा) दोनों (देवा) देव (देवेषु) अन्यदेवों में (प्रशस्ता) श्रेष्ठ (घृतयोनी) जल के उत्पन्न करने वाले और (सम्राजा) भले प्रकार प्रकाशमान हैं उन को प्रशंसित करो यह पूर्व मन्त्र से अन्वय है ऋ० ५। ६८। २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ २ ३ २ ३ १ २
ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
३ २ ३ २ ३ १ २
महि वां क्षत्रं देवेषु ॥ ३ ॥ [४] (११४५)

पदपाठः—ता १। नः ४। शक्तम् क्रि०। पार्थिवस्य, महः, रायः, दिव्यस्य ६। महि १। वाम् । ६। क्षत्रम् १। देवेषु ७ ॥

अन्वितपदार्थः—(ता) तौ मित्रावरुणौ (नः) अस्मभ्यं (पार्थिव्यस्य, दिवस्य) च (महः) महतः (रायः) धनस्य दानाय (शक्तम्) शक्नुताम् (वाम्) तयोर्मित्रावरुणयोः (क्षत्रं) बलं (देवेषु) अन्येषु देवेषु (महि) महत् अस्ति ॥ ऋग्वेदे ५। ६८। ३ऽपि ॥ ३ ॥

भाषार्थः—(ता) वे दोनों मित्र और वरुण (नः) हमारे लिये (पार्थिवस्य) पृथिवीसंबन्धी और (दिव्यस्य) आकाशसंबन्धी (महः) बड़े (रायः) धन के देने को (शक्तम्) समर्थ हों (वाम्) उन मित्र वरुण का (क्षत्रम्) बल (महि) बड़ा है ॥ ऋ० ५। ६८। ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयतृचस्य-मधुच्छन्दा ऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१र २र ३ २ ३ २ ३ १ २

इन्द्रायाहि चित्रभानो सुता इमे त्वायवः ।

१ २ ३ १ २ ३ १ १

अण्वीभिस्तना पूतासः ॥१॥ (११४६)

पदपाठः—इद्र सं० । आयाहि क्रि० । चित्रभानो सं० । सुताः, इमे, त्वायवः १ । अण्वीभिः ३ । तना अ० । पूतासः १ ॥

अन्वितपदार्थः-(चित्रभानो) विचित्रदीप्ते ! (इन्द्र) एतन्नामक ! वायो ! (आयाहि) प्राप्नुहि (इमे) एते (त्वायवः) त्वामिच्छन्तइव (तना) नित्यम् (अण्वीभिः) अङ्गुलिभिः (पूतासः) शोधिताः (सुताः) अभिषुताः सोमाः सन्ति ॥

मनुष्यैरङ्गुलिभिः सोमानभिषुतान्पूतान् कृत्वा इन्द्रनामके वायौ यज्ञद्वारा प्रापणीया इति भावः ॥ ऋग्वेदे १ । ३ । ४ यजुर्वेदे २० । ८७ चापि ॥ १ ॥

भाषार्थः-(चित्रभानो) विचित्रप्रकाशयुक्त (इन्द्र) वायुविशेष ! (आयाहि) प्राप्त हो क्योंकि (इमे) ये (त्वायवः) तुझे चाहने वाले से (तना) सदा (अण्वीभिः)अङ्गुलियों से (पूतासः) शोधे हुवे (सुताः) अभिषुत सोम हैं ॥

भाव यह है कि मनुष्यों को अङ्गुलियों से शोधकर अभिषुत सोम यज्ञ द्वारा इन्द्रनामक विचित्रप्रकाशयुक्त वायु में पहुंचाने चाहियें ॥ ऋ० १ । ३ । ४ तथा यजुः २० । ८७ में भी ॥ १ ॥

अथ द्वितीया—

१र २र ३ २ ३ १र २र ३ १ २

इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२३ १२ ३ १२

उप ब्रह्माणि वाघतः ॥ २ ॥ (११४७)

पदपाठः-इन्द्र सं० । आयाहि क्रि० । धिया ३ । इषितः, विप्रजूतः १ । सुतावतः २ । उप अ० । ब्रह्माणि २ । वाघतः २ ॥

अन्वितपदार्थः-(इन्द्र) इन्द्र ! (विप्रजूतः) ऋत्विग्भिर्विप्रैः प्रेरितः (धिया) कर्मणा यज्ञेन (इषितः) प्राप्तः सन् (सुतावतः) अभिषुतवतः (वाघतः) ऋत्विजः [निघं० ३ । १८ । ३] (ब्रह्माणि) वेदमन्त्रानुच्चारयतः (उपा-याहि) ॥ ऋग्वेदे १ । ३ । ५ ऽपि ॥ २ ॥

भाषार्थः-(इन्द्र) वायो ! (विप्रजूतः) मेधावी लोगों ऋत्विजों से प्रेरित (धिया) कर्म=यजन से (इषितः) प्राप्त हुवा (सुतावतः) अभिषुत सोमयुक्त (वाघतः) ऋत्विजों को [निघं० ३ । १८ । ३] जो (ब्रह्माणि) वेदमन्त्रों को उच्चार रहे हैं उन के (उपा-याहि) समीप प्राप्त हो ॥ ऋ० १ । ३ । ५ में भी ॥ २ ॥

अथ तृतीया-

१२ २२३ १२ ३ २३१३

इन्द्रायाहि तूतुजान उप ब्रह्माणि हरिवः ।

३१ २ ३१२

सुते दधिष्व नश्चनः ॥३॥ [५] (११४८)

पदपाठः-इन्द्र सं० । आयाहि क्रि० । तूतुजानः १ । उप अ० । ब्रह्माणि २ । हरिवः सं० । सुते ७ । दधिष्व क्रि० । नः ४ । चनः २ ॥

अन्वितपदार्थः-हरिशब्द इन्द्राश्ववाचकः हरी इन्द्रस्य इति निघं० १ । १५ । १-२ पठितत्वात् हे (हरिवः) अश्वयुक्तेन्द्र ! वायो ! (ब्रह्माणि) मन्त्रानुच्चारयतोऽस्मान् (तूतुजानः) त्वरमाणः (उपा-याहि) प्राप्नुहि । किंच

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(नः) अस्मभ्यं (सुते) सोमेऽभिषुते सति (चनः) अन्नं (दधिष्व) धारय ॥ भावार्थः पूर्ववत् योजनीयः ॥ ऋग्वेदे १ । ३ । ६ ऽपि ॥ ३ ॥

भाषार्थः-हरि शब्द इन्द्र के अश्वों का वाचक है जैसा कि निघं० १ । १५ । १-२ ऊपर लिखा है तदनुसार (हरिवः) अश्व=किरणों वाले! इन्द्र ! वायो! (ब्रह्माणि) मन्त्रों को उच्चारते हुवे हमें (तूतुजानः) शीघ्रता करता हुवा (उपा-याहि) समीप प्राप्त हो और (नः) हमारे लिये (सुते) सोम अभिषुत करने पर (चनः) अन्न को (दधिष्व) धारित कर ॥

भावार्थ पूर्ववत् लगा लेना ॥ ऋ० १ । ३ । ६ में भी ॥ ३ ॥

अथ चतुर्थर्चस्य-भरद्वाज ऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ २ ३ २ ३ २३ १ २ ३ १ २

तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।

३ २ ३ १ २ ३१ २

कृष्णा कृणोति जिह्वया ॥ १ ॥ (११४१)

पदपाठः-तम् २ । ईडिष्व क्रि० । यः १ । अर्चिषा ३ । वना, विश्वा २ । परि-ष्वजत् क्रि० । कृष्णा २ । कृणोति क्रि० । जिह्वया ३ ॥

अन्वितपदार्थः-हे मनुष्य ! त्वम् (तम्) अग्निम् (ईडिष्व) स्तुहि प्रशंस (यः) अग्निः (अर्चिषा) ज्वालारूपेण तेजसा (विश्वा) सर्वाणि (वना) वनानि (परिष्वजत्) परितो वेष्टयति अथ च तानि वनानि (जिह्वया) ज्वालया दग्धवा (कृष्णा) कृष्णवर्णानि (कृणोति) करोति ॥ ऋग्वेदे ६ । ६० । १० ऽपि ॥ १ ॥

भाषार्थः-हे मनुष्य ! तू (तम्) उस अग्नि की (ईडिष्व) प्रशंसा कर (यः) जो (अर्चिषा) लपट से (विश्वा) सब (वना) जङ्गलों को (परिष्वजत्) लपेटता और उन को फूंक कर (कृष्णा) काले (कृणोति) कर देता है ॥ ऋ० ६ । ६० । १० में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

२ ३२ ३ १ २ ३ १२ २२ ३ १ २
य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः ।
३ १ २ ३१२ ३ २
द्युम्नाय सुतरा अपः ॥ २ ॥ (११५०)

पदपाठः–यः १ । इद्धे ७ । आविवासति क्रि० । सुम्नम् २ । इन्द्रस्य ६ । मर्त्यः १ । द्युम्नाय ४ । सुतराः, अपः २ ॥

अन्वितपदार्थः–(यः मर्त्यः) यो मनुष्यः (इन्द्रस्य) (सुम्नम्) सुखकरं हविः (इद्धे) समिद्धेऽग्नौ (आविवासति) परिचरति जुहोतीति भावः, तस्मै (द्युम्नाय) प्रकाशमानाय मनुजाय (सुतराः) अतिशोभनाः (अपः) इन्द्रो वर्षयतीति शेषः ॥

यो मनुजोऽग्निमुपसमाधाय सोमादिना जुहोति तेनोपकृत इन्द्रस्तदर्थं सुखकराणि जलान्यभिवर्षयति ॥ ऋग्वेदे ६ । ६० । ११ ऽपि ॥ २ ॥

भाषार्थः–(यः) जो (मर्त्यः) मनुष्य (इन्द्रस्य) इन्द्र के (सुम्नम्) रुचिर हव्य को (इद्धे) समिद्ध अग्नि में (आविवासति) होम करके परिचर्या करता है, उस (द्युम्नाय) प्रकाशमान मनुष्य के लिये (सुतराः, अपः) अत्युत्तम जल इन्द्र वर्षाता है ॥ ऋ० ६ । ६० । ११ में भी ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३१२ ३१ २ ३१२
ता नो वाजवतीरिष आशून् पिपृतमर्वतः ।
१ २३ २ ३ १२
एन्द्रमग्निं च वोढवे ॥ ३ ॥ (११५१)

पदपाठः–ता १ । नः ४ । वाजवतीः, इषः, आशून् २ । पिपृतम् क्रि० । अर्वतः २ । आ अ० । इन्द्रम्, अग्निम् २=१ । च, वोढवे अ० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(ता) तौ (इन्द्रम्) इन्द्रः (अग्निम्) अग्निः (च), (नः) अस्मभ्यं याज्ञिकेभ्यः (वाजवतीः इषः) बलवन्ति अन्नानि, (वोढवे) वोढुम् (आशून्) शीघ्रगामिनः (अर्वतः) अश्वांश्च (आ-पिपृतम्) आ-पूरयतः प्रयच्छत इत्यर्थः ॥ ऋग्वेदे ६।६०।१२ऽपि ॥ ३ ॥

भाषार्थः-(ता) वे दोनों (अग्निम्) अग्नि (च) और (इन्द्रम्) इन्द्र (नः) हमारे लिये (वाजवतीः, इषः) बलवान् अन्न और (आशून्) शीघ्रगामी (अर्वतः) घोड़े (आ-पिपृतम्) देते हैं ॥ ऋ० ६ । ६० । १२ में भी ॥ ३ ॥

इति अष्टमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥ चतुर्विंशस्तौमिकं प्रातः सवनमुक्तमिदानीं माध्यंदिनं सवनमिति विवरणकारः ॥

अथ चतुर्थे खण्डे प्रथमतृचस्य-सिकतानिवारी ऋषिगणः । इन्द्रो देवता । जगती छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ ३१२ ३२उ ३ २ ३२र २र
प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतꣳ सखा सख्युर्न प्रमिनाति
३ १२ १२ ३२३ १२ ३ १२ ३१२ ३१२
सं गिरम्। मर्य इव युवतिभिः समर्षति सोमः कलशे शतया-
३२
मना पथा ॥ १ ॥ (११५२) व्याख्याता (५५७)

अथ द्वितीया—

२ ३ १२ ३१२ ३१२ ३ १२ ३१२ २३
प्र वो धियो मन्द्रयुवो विपन्युवो पनस्युवः संवरणेष्वक्रमुः। हरिं
१२३क२र ३ २३ २३२३ २३१२
क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः॥२॥(११५३)

पदपाठः-प्र अ० । वः ६ । धियः १ । मन्द्रयुवः, विपन्युवः, पनस्युवः सं० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संवरणेषु ७। अक्रमुः क्रि०। हरिम्, क्रीड़न्तम् २। अभ्यनूषत क्रि०। स्तुभः सं०। अभि अ०। धेनवः १। पयसा ३। इत् अ०। अशिश्रयुः क्रि०॥

अन्वितपदार्थः-(मन्द्रयुवः) हे हर्षं कामयमानाः (पनस्युवः) हे स्तुतिं कामयमानाः (विपन्युवः) हे विशेषेण स्तोतारः (स्तुभः) स्तोतारः! यूयं (क्रीडन्तं, हरिम्) सोमम् (अभ्यनूषत) अभिष्टुत (इत्) यथा (पयसा) दुग्धेन (धेनवः) गावः (अभ्य-ऽशिश्रयुः) अभ्याश्रयन्ते तद्वत्। एवं कृते (वः) युष्माकं (धियः) कर्माणि (संवरणेषु) यज्ञशालासु (प्राऽक्रमुः) प्रक्राम्येयुः॥ ऋग्वेदे तु ९। ८६। १७ संवरणेषु=संवसनेषु। हरिं क्रीडन्तम्=सोमं मनीषा। इत्=ईम् इति पाठभेदाः सन्ति॥ २॥

भाषार्थः-(मन्द्रयुवः) हे हर्ष चाहने वालो! (पनस्युवः) स्तुति चाहने वालो! (विपन्युवः) स्तुति करने वालो! (स्तुभः) स्तोताओ! तुम (क्रीडन्तम्) क्रीड़ा करते हुवे (हरिम्) हरितवर्ण सोम की (अभ्यनूषत) प्रशंसा करो (इत्) जैसे (पयसा) दुग्ध से (धेनवः) गौवें (अभ्य-ऽशिश्रयुः) सर्वतः आश्रय करती हैं, तद्वत्। ऐसा करने पर (वः) तुम्हारे (धियः) कर्म (संवरणेषु) यज्ञगृहों में (प्रा-ऽक्रमुः) प्रचलित होवें॥ ऋ० ९। ८६। १७ के पाठभेद संस्कृत भाष्य में देखिये॥ २॥

अथ तृतीया—

१ २ ३१२ ३ २३ २३ २ ३ १२३ १२
आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान
३१२ २३ १२३ २३ ३१२ ३१२ २३१
ऊर्मिणा। या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्म-
२ ३१२
घुमत्सुवीर्यम्॥ ३॥ (११५४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—आ अ० । नः ४ । सोम सं० संयतम्, पिप्युषीम्, इषम् २ । इन्दो सं० । पवस्व क्रि० । पवमान सं० । ऊर्मिणा ३ । या १ । नः ४ । दोहते क्रि० । त्रिः अ० । अहन् १ । असश्चुषी १ । क्षुमत्, वाजवत्, मधुमत्, सुवीर्यम् २ ॥

अन्वितपदार्थः (इन्दो) आर्द्र ! (पवमानः) शोध्यमान ! (सोम !) (नः) अस्मभ्यं (संयतम्) संगृहीतम् (पिप्युषीम्) प्रवृद्धम् (इषम्) अन्नम् (ऊर्मिणा) लहर्या (आ-पवस्व) क्षर (या) या इट् यदन्नं (असश्चुषी) अप्रतिबन्धं सत् (क्षुमत्) अन्नयुक्तं (वाजवत्) बलयुक्तं (मधुमत्) माधुर्योपेतं (सुवीर्यम्) शोभनं वीर्यम् (अहन्) अहनि (त्रिः) वारत्रयं (दोहते) दोग्धि ॥ ऋग्वेदे तु ९ । ८६ । १८ ऊर्मिणा=अध्रियम् इतिपाठः ॥ ३ ॥

भाषार्थः—(इन्दो) गीले ! (पवमान) शोध्यमान ! (सोम) सोम ! तू (नः) हमारे लिये (संयतम्) संग्रह किये हुवे (पिप्युषीम्) बाहुल्ययुक्त (इषम्) अन्न को (ऊर्मिणा) लहरी से (आ-पवस्व) वर्षाव, (या) जो (असश्चुषी) निर्विघ्न अन्न (क्षुमत) अन्नयुक्त (वाजवत) बलयुक्त (मधुमत) माधुर्ययुक्त (सुवीर्यम्) शोभनवीर्य को (दोहते) भरता है ॥ ऋ० ९ । ८६ । १८ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥ उक्तो माध्यंदिनः पवमानः इति विव० ॥

अथ प्रगाथस्य द्वितीयसूक्तस्य—पुरुहन्माऋषिः । इन्द्रो देवता । बृहतीछन्दः ॥

तत्र प्रथमा—

२ ३१र २र ३ २ ३१२ ३ १ २

नकिष्टं कर्मणा नशद्यश्चकार सदा वृधम् ।

२ ३ २ ३२ ३१२३ १ २ ३१२ ३१र २र

इन्द्रं न यज्ञैर्विश्वगूर्त्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥

॥१॥ (११५५) व्याख्याता (२४३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ १र २र ३ १र २र ३ १ २ ३ १ २
अषाढमुग्रं पृतनासु सासाहिं यस्मिन्महीरुरुज्रयः ।
२ ३ २ ३ १ २ ३ २ ३ १ २
सं धेनवो जायमाने अनोनवुर्द्यावःक्षामीरनोनवुः ॥

॥ २ ॥ [८] (११५६)

पदपाठः—अषाढम्, उग्रम् २ । पृतनासु ७ । सासहिम् २ । यस्मिन् ७। महीः १ । उरुज्रयः १ । सम् अ० । धेनवः १ । जायमाने ७ । अनोनवुः क्रि० । द्यावः, क्षामीः १ । अनोनवुः ॥

अन्वितपदार्थः—(अषाढम्) असह्यम् (उग्रम्) अप्रधृष्यम् उद्गूर्णबलं (पृतनासु, सासहिं) शत्रुसेनासु अभिभवितारमिन्द्रं राजानं वा प्रशंसामि इति शेषः । किं भूतं ? (यस्मिन्) इन्द्रे (जायमाने) सति (उरुज्रयः) बहुवेगाः (महीः) महत्यः (धेनवः) सूर्यदीधितयः (सम्-अनोनवुः) संस्तुवन्ति तथा (द्यावः) द्युलोकस्थाः (क्षामीः)पृथिवीस्थाश्च (अनोनवुः) स्तुवन्ति सर्वे प्राणिनो नुवन्तीत्यर्थः ॥ ऋग्वेदे तु ८ । ७० । ४ क्षामो इति पाठः ॥ २ ॥

इत्यष्टमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

उक्तानि पृष्ठानीति विवरण कारः

इदानीमार्भवः पवमानः इति च विव०॥

भाषार्थः—(अषाढम्) असह्य (उग्रम्) अत्यन्त बलयुक्त (पृतनासु, सासहिम्) शत्रुसेनाओं में दबाव डाल सकने वाले इन्द्र वा राजा की प्रशंसा करता हूं (यस्मिन्) जिस के (जायमाने) उत्पन्न होने पर (महीः) बड़ी (उरुज्रयः) बहु वेग वाली (धेनवः) सूर्यकिरणें (समनोनवुः) भले

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकार स्तुति करती हैं और (द्यावः) द्युलोकस्थ तथा (क्षामीः) पृथिवीस्थ लोग (अनोनवुः) स्तुति करते हैं ॥ ऋ० ८ । ७० । ४ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

—*—

अथ पञ्चमखण्डे प्रथमतृचस्य—नारदऋषिः । सोमो देवता । उष्णिक्छन्दः ॥

तत्र प्रथमा—

१ २ ३ १र २र ३ २३ १ २ २ ३ २

सखाय आनिषीदत पुनानाय प्रगायत । शिशुं न

३ १र २र ३ २

यज्ञैः परिभूषत श्रिये ॥ १ ॥ (११५७) व्याख्याता(५६८)

अथ द्वितीया—

१ २ ३ २उ ३ १ २ ३ १ २ ३ १ २

समी वत्सं न मातृभिः सृजता गयसाधनम् ।

३ २ १ २ ३ १र २र

देवाव्यां ऽ३ ऽमदमभि द्विशवसम् ॥ २ ॥ (११५८)

पदपाठः—सम्, ई अ० । वत्सम् २ । न अ० । मातृभिः ३ । सृजत क्रि० । गयसाधनम् २ । देवाव्यम्, मदम् २ । अभि अ० । द्विशवसम् २ ॥

अन्वितपदार्थः—हे ऋत्विजः ! यूयम् (गयसाधनं) प्राणसाधनं, गृहसाधनं, धनसाधनं, सन्तानसाधनं वा (देवाव्यम्) देवानां रक्षकं (मदं) हृष्टिपुष्टिकरं (द्विशवसं) द्वयोर्लोकयोर्बलम् (ई) एतं सोमं (मातृभिः) मातृतुल्याभिर्वसतीवरीभिरद्भिः (अभि—सं—सृजत) संगतं कुरुत । दृष्टान्तः—(न) यथा (वत्सं) गोवत्सं मातृभिर्गोभिः संसृजन्ति तद्वत् ॥ ऋग्वेदे ९ । १०४ । २ ऽपि ॥

यद्यपि बाङ्गासियाटिकसभामुद्रापितपुस्तके सायणभाष्ये "अभिम्रिद्विशवसम्" इत्यत्र "म्रि" इत्यधिकः पाठो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दृश्यते, तदनुसरतैव च ज्वालाप्रसादेन बराकेणापि तथैव विन्यस्तं व्याख्यातं च, तथैव वैदिकयन्त्रालयपुस्तकस्थं चाऽशुद्धं पश्यामः। तथापि न सायणभाष्ये, नापि गानपुस्तके, न च जीवानन्दीयपुस्तके, नापि च लवपुरमुद्रितगुरुदत्त संस्कृतपुस्तके तथाविधः पाठो, न च ऋक्संहितायां दृश्यतेऽतोस्माभिर्नाद्रियते स पाठः। मन्यामहे च लेखकभ्रान्तिजमेव तथाविधं पाठम् ॥ २ ॥

भाषार्थः– हे ऋत्विजो ! तुम (गयसाधनम्) प्राण, गृह, धन वा सन्तान के साधन, (देवाज्यम्) देवों के रक्षक (मदम्) हृष्टिपुष्टिकारक (द्विशवसम्) दोनों लोकों के बल (ईं) इस सोम को (मातृभिः) माता के समान वसतीवरी नामक जलों से (अभि–सं–सृजत) सर्वतः मिलाओ (न) जैसे (वत्सम्) बछड़े को माताओं गौवों से मिलाते हैं, तद्वत्॥ ऋ० ९। १०४। २ में भी॥

यद्यपि बङ्गाल एसियाटिकसुसाइटी के सायणभाष्ययुक्त पुस्तक में "अग्नि 'प्रि' द्विशवसम्" यह "प्रि" इतना अधिक पाठ छप रहा है और अनुमान उसी की देखा देखी विचारे ज्वालाप्रसाद ने भी लिख दिया और व्याख्या भी कर मारी है, तथा वैदिकयन्त्रालय अजमेर ने भी वैसा ही छाप दिया है, तथापि हम इस पाठ का आदर नहीं करते, क्योंकि उसी सायणभाष्य में इस "प्रि" युक्त पाठ की व्याख्या नहीं है, न गान के पुस्तक में है, न ऋक्संहिता में, न जीवानन्द के पुस्तक में, और न पं० गुरुदत्त एम० ए० के संस्कारयुक्त लाहौर के पुस्तक में यह पाठ है। हमारी समझ में तो यह पाठ लेखकों की भ्रांति से ही बन गया है ॥ २ ॥

अथ तृतीया–

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
पुनाता दक्षसाधनं यथा शर्धाय वीतये।
१ २ ३ २ ३ १ २ ३ १ २
यथा मित्राय वरुणाय शंतमम् ॥३॥ [९] (११५९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—पुनाता क्रि० । दक्षसाधनम् २ । यथा अ० । शर्धाय ४ । वीतये ४ । यथा । मित्राय, वरुणाय ४ । शंतमम् २ ॥

अन्वितपदार्थः—हे ऋत्विजः ! (शर्धाय) बलाय (वीतये) भोजनार्थं (दक्षसाधनं यथा) बलसाधनं यथा स्यात्तथा, (मित्राय-वरुणाय) प्राणापानाभ्यां (शंतमं यथा) सुखदायकतमं यथा स्यात्तथा (पुनाता) पुनीत सोममिति शेषः । पूञ् पवने इत्यस्माद्धातोः क्र्यादेर्लोटि तप्तनप्तनथनाश्च ७ । १ । ४५ इति तस्य तबादेशे पित्त्वा-दीत्वाऽभावात् पुनातेति रूपम् ॥ ऋग्वेदे तु ९ । १०४ । ३ शंतमः इति भेदः ॥ ३ ॥

भावार्थः—हे ऋत्विजो ! (शर्धाय) बल और (वीतये) भोजन के लिये (दक्षसाधनं यथा) जैसे बल का साधन हो वैसे और (मित्राय) प्राण तथा (वरुणाय) अपान के लिये (यथा) जैसे (शंतमम्) सुखदायक हो वैसे (पुनाता) सोम का शोधन करो ॥ अष्टाध्यायी ७ । १ । ४५ का प्रमाण और ऋ० ९ । १०४ । ३ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ द्वितीयतृचस्य—ऐश्वरयः अग्नयधीषण्य ऋषिः * । सोमो देवता ।

द्विपदा गायत्री छन्दः ॥ तत्र प्रथमा—

२ ३क २र ३ १ २ ३ १ २ ३ २ ३ २उ ३ १ २

प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रं विवारमव्यम् ॥ १ ॥ (११६०)

पदपाठः—प्र अ० । वाजी १ । अक्षाः क्रि० । सहस्रधारः १ । तिरः अ० । पवित्रम् २ । वि अ० । वारम्, अव्यम् २ ॥

अन्वितपदार्थः—(वाजी) बलवान् वेगवान्वा (सहस्र-धारः) बहुधारायुक्तः सोमः (अव्यम्) अविभवं (वारम्) वालं दशापवित्रम् (तिरः) व्यवहितं कृत्वा (प्र-वि-अक्षाः) विविधं प्रक्षरति ॥ ऋग्वेदे तु ९ । १०९ । १६ प्रसुवान इत्या-रम्भः ॥ १ ॥

* यथादृष्टम् (तु० रा०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(वाजी) बलवान् वा वेगवान् (सहस्रधारः) बहुत सी धारों वाला सोम (अव्यम्) भेड़ की (धारम्) ऊर्णामय दशापवित्र को (तिरः) अन्तर्हित करके (वि-प्र-अक्षाः) विविध प्रकार से वर्षता है ॥ ऋ० ९ । १०९ । १६ का पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया-

२३क २र ३१२ ३१२३ १र २र ३२

स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः॥२॥ (११६१)

पदपाठः-सः, वाजी १ । अक्षाः क्रि० । सहस्ररेताः १ । अद्भिः ३ । मृजानः १ । गोभिः ३ । श्रीणानः १ ॥

अन्वितपदार्थः-(वाजी) बलिष्ठः (सहस्ररेताः) बहुवीर्यवान् (अद्भिः मृजानः) जलैः शोध्यमानः (गोभिः) किरणैः (श्रीणानः) स्रियमाणः (सः) सोमः (अक्षाः) क्षरति ॥ ऋग्वेदे ९ । १०९ । १७ ऽपि ॥ २ ॥

भाषार्थः-(वाजी) बलिष्ठ, (सहस्ररेताः) बहुत वीर्य वाला, (अद्भिः) जलों से (मृजानः) शोधा जाता हुआ, (गोभिः) किरणों से (श्रीणानः) आस्रियमाण (सः) वह सोम (अक्षाः) सिंचता है ॥ ऋ० ९ । १०९ । १७ में भी ॥२॥

अथ तृतीया-

१ २ ३१ २ ३१र २र ३१र २र ३२

प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमाणो अद्रिभिः सुतः ॥

॥ ३ ॥ [१०] (११६२)

पदपाठः-प्र अ० । सोम १ । याहि क्रि० । इन्द्रस्य ६ । कुक्षा ७ । नृभिः ३ । येमाणः १ । अद्रिभिः ३ । सुतः १ ॥

अन्वितपदार्थः-(नृभिः) ऋत्विग्भिः (येमाणः) नियम्यमानः (अद्रिभिः) मेघैः (सुतः) अभिषुतः (सोम) सोमः (इन्द्रस्य कुक्षा) इन्द्रोदरे (प्र-याहि) प्रयाति ॥ ऋग्वेदे ९ । १०१ । १८ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(नृभिः) ऋत्विजों से (येमाणः) नियमपूर्वक होम किया जाता हुआ (अद्रिभिः) मेघों से (सुतः) खिंचा हुवा (सोमः) सोम (इन्द्रस्य) इन्द्र के (कुक्षा) उदर में (प्र-याहि) प्रकर्ष से जाता है ॥ ऋ० ९ । १०१ । १८ में भी ॥ ३ ॥

अथ तृतीयतृचस्य—वारुणिर्भृगुर्जमदग्निर्वा ऋषिः । सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

१र २र ३ २ ३ १ २ ३ १ २ ३ २
ये सोमासः परावति ये अर्वावति सुन्विरे ।
२ ३ १ २ ३ १ २
ये वाऽदः शर्यणावति ॥ १ ॥ (११६३)
१ २ ३ २ ३ १ २ ३ १र २र क ३ २र
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
२ ३ १ २ ३ १ २
ये वा जनेषु पञ्चसु ॥ २ ॥ (११६४)
१ २ ३ २ ३२र ३ १ २ ३ २ ३ १ २
ते नो वृष्टिं दिवस्परि पवन्तामासु वीर्यम् ।
३ २ ३ २ ३ १ २
स्वाना देवास इन्दवः ॥ ३ ॥ [११] (११६५)

पदपाठः—ये, सोमासः १ । परावति ७ । ये १ । अर्वावति ७ । सुन्विरे क्रि० । ये १ । वा अ० । अदः ७ । शर्यणावति ७ ॥ १ ॥ ये १ । आर्जीकेषु ७ । कृत्वसु ७ । ये १ । मध्ये ५ । पस्त्यानाम् ६ । ये १ । वा अ० । जनेषु, पञ्चसु ७ ॥२॥ ते १ । नः ४ । वृष्टिम् २ । दिवः ६ । परि अ० । पवन्ताम् क्रि० । आ अ० । सुवीर्यम् २ । स्वानाः, देवासः, इन्दवः १ ॥ ३ ॥

अन्वितपदार्थः—सूक्तस्यैकत्रैवान्वयः । (ये) (सोमासः) सोमाः (परावति) दूरदेशे (ये) ये च (अर्वावति) समीपे देशे (ये वा) ये च (अदः) अस्यां (श-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

र्यणावति) भूमौ (ये) ये च (आर्जीकेषु) ऋजुषु देशेषु (कृत्वसु) कृतेषु (ये) ये च (पस्त्यानां) गृहाणां (मध्ये) (ये वा) ये च (पञ्चसु जनेषु) यजमानपञ्चमेषु चतुर्षुऋत्विक्षु (सुन्विरे) अभिषूयन्ते (ते) (स्वानाः) अभिषूयमाणाः (देवासः) दिव्याः (इन्दवः) सोमाः (नः) अस्मभ्यं (दिवः-परि) आकाशस्य सकाशात् (सुवीर्यम्) यथा स्यात्तथा (वृष्टिम्) (आ-पवन्ताम्) सर्वतः क्षरन्तु ॥ परावत इति दूरनाम निघं० ३ । २६ ॥ अर्वाके इति समीपनाम निघं० २ । १६ पस्त्यमिति गृहनाम निघं० ३ । ४ ॥ विवरणकृताऽप्येषएवार्थोऽनुमतो न तु सायणाचार्यकृतो देशविशेषनामपरोऽर्थः ॥ ऋग्वेदे ९ । ६५ । २२-२३-२४ ऽपि ॥ १ । २ । ३ ॥

भाषार्थः-समस्त सूक्त का एकत्र ही अन्वय है कि—(ये) जो (सोमासः) सोम (परावति) दूर देश में (ये) और जो (अर्वावति) समीप देश में (ये वा) और जो (अदः) इस (शर्यणावति) भूमि में (ये) और जो (आर्जीकेषु) ऋजु=सरल=सम (कृत्वसु) किये हुवे स्थानों में (ये) और जो (पस्त्यानां मध्ये) गृहों के मध्य में (ये वा) और जो (पञ्चसु जनेषु) ४ ऋत्विज् और ५ वां यजमान इन पांचों में (सुन्विरे) अभिषुत किये जाते हैं (ते) वे (स्वानाः) अभिषूयमाण (देवासः) दिव्य (इन्दवः) सोम (नः) हमारे लिये (दिवः-परि) आकाश के सकाश से (सुवीर्यम्) जिस से सुन्दर वीर्य होवे (वृष्टिम्) वर्षा को (आ-पवन्ताम्) सर्वतः वर्षावें ॥ निघण्टु ३ । २६, २ । १६, ३ । ४ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ६५ । २२-२३-२४ में भी ॥ १ । २ । ३ ॥

इत्यष्टमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे प्रथमतृचस्य-वत्सऋषिः । अग्निर्देवता । गायत्रीछन्दः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र प्रथमा—

१ २ ३ १र २र ३ १ २ ३ १ २
आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
२ ३ १ २ ३ २
अग्ने त्वां कामये गिरा ॥ १ ॥ (११६६) व्याख्याता (८)

अथ द्वितीया—

३ २उ ३ २उ ३ २ ३ २ ३ १ २ ३ २
पुरुत्रा हि सदृङ् ङसि दिशो विश्वा अनु प्रभुः ।
३१ २
समत्सु त्वा हवामहे ॥ २ ॥ (११६७)

पदपाठः— पुरुत्रा, हि अ० । सदृङ् १ । असि क्रि० । दिशः, विश्वाः २ । अनु अ० । प्रभुः १ । समत्सु ७ । त्वा २ । हवामहे क्रि० ॥

अन्वितपदार्थः—हे अग्ने ! स्वप्रकाशस्वरूप ! परमात्मन् ! त्वं (पुरुत्रा) सर्वत्र (हि) (सदृङ्) समानद्रष्टा (असि) भवसि (विश्वाः) सर्वाः (दिशः) (अनु) अनुलक्ष्य (प्रभुः) ईश्वरो भवसि । ईदृशं (त्वा) त्वां (समत्सु) संग्रामेषु तत्तुल्यकठिनसमयेषु च (हवामहे) आह्वयामहे ॥ ऋग्वेदे तु ८ । ११ । ८ दिशः=विशः इतिपाठः प्रजाः इति च तदर्थः ॥ २ ॥

भाषार्थः—हे स्वप्रकाशस्वरूप ! अग्ने ! परमात्मन् ! आप (पुरुत्रा) सर्वत्र (हि) ही (सदृङ्) समदर्शी (असि) हैं और (विश्वाः) सब (दिशः) पूर्वादि दिशाओं को (अनु) लक्ष्यकरके (प्रभुः) ईश्वर हैं । इस प्रकार के (त्वा) आप को (समत्सु) संग्रामों और तत्तुल्य कठिन समयों में (हवामहे) हम पुकारते हैं ॥ ऋ० ८ । ११ । ८ का पाठ और अर्थ का भेद संस्कृतभाष्य में देखिये २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

३ २ ३ १र २र ३ १ २
समत्स्वग्निमवसे वाजयन्तो हवामहे ।
१ २ ३ १ २
वाजेषु चित्रराधसम् ॥ ३ ॥ [१२] (११६८)

पदपाठः—समत्सु ७ । अग्निम् २ । अवसे ४ । वाजयन्तः १ । हवामहे क्रि० । वाजेषु ७ । चित्रराधसम् २ ॥

अन्वितपदार्थः—(समत्सु) संग्रामेषु (वाजयन्तः) बलमिच्छन्तो वयम् (अवसे) रक्षायै (अग्निम्) प्रकाशस्वरूपं परमेश्वरं (हवामहे) आह्वयामहे । किंभूतं ? (वाजेषु) संग्रामेषु (चित्रराधसम्) विचित्रधनिनम् ॥ ऋग्वेदे ८ । ११ । ९ ऽपि ॥ ३ ॥

भाषार्थः-(समत्सु) कामादि शत्रुओं के साथ युद्धों में (वाजयन्तः) बल चाहते हुवे हम (वाजेषु) उन संग्रामों में (चित्रराधसम्) विचित्र धनी (अग्निम्) प्रकाशस्वरूप परमात्मा को (अवसे) रक्षार्थ (हवामहे) पुकारते हैं ॥ ऋ० ८ । ११ । ९ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य - नृमेधऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २
त्वं न इन्द्राभर ओजो नृम्णं शतक्रतो विचर्षणे ।
२ ३ १ २ ३ १ २
आ वीरं पृतनासहम् ॥ १ ॥ (११६९) व्याख्याता (४०५)

अथ द्वितीया-

१र २र ३ १ २ ३ २ ३ १ २ ३ १ २
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
१ २ ३ १ २
अधा ते सुम्नमीमहे ॥ २ ॥ (११७०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–त्वम् १ । हि अ० । नः ६ । पिता १ । वसो सं० । त्वम् १ । माता १ । शतक्रतो सं० । बभूविथ क्रि० । अथ अ० । ते ६ । सुम्नम् २ । ईमहे क्रि० ॥

अन्वितपदार्थः–(वसो) सर्वाच्छादक ! सर्वान्तर्यामिन् ! (शतक्रतो) बहुकर्मन् ! (त्वं हि) (नः) अस्माकं (पिता, त्वं माता बभूविथ) (अथ) अस्मात् कारणात् (ते) तवैव (सुम्नम्) सुखमानन्दम् (ईमहे) याचामहे ऋग्वेदे ८ । ९८ । १० ऽपि ॥ २ ॥

भाषार्थः–(वसो) सब के अन्तर्यामित्व से सब में वसने वाले ! (शतक्रतो) बहुत कर्मों=सृष्टि उत्पत्ति स्थितियों के कर्त्ता ! (त्वम्) आप (हि) ही (नः) हमारे (पिता) पिता और (त्वम्) आप ही (माता) माता (बभूविथ) सृष्ट्यारम्भ में हुवे थे (अथ) इस लिये (ते) आप के ही (सुम्नम्) सुख आनन्द को (ईमहे) हम मांगते हैं ॥ ऋ० ८ । ९८ । १० में भी ॥ २ ॥

अथ तृतीया–

१ २ ३ २ ३ १ २
त्वाꣳ शुष्मिन्पुरुहूत वाजयन्तमुपब्रुवे सहस्कृत ।
१ २ ३ १ २
स नो रास्व सुवीर्यम् ॥ ३ ॥ [१३] (११७१)

पदपाठः–त्वाम् २ । शुष्मिन्, पुरुहूत सं० । वाजयन्तम् २ । उप-ब्रुवे क्रि० । सहस्कृत सं० । सः १ । नः ४ । रास्व क्रि० । सुवीर्यम् २ ॥

अन्वितपदार्थः–(शुष्मिन्) बलवन् ! (पुरुहूत) बहुष्टुत ! (सहस्कृत) बलप्रद ! बाहुलकात् कर्त्रर्थे कर्मप्रत्ययः । (वाजयन्तम्) बलं कुर्वन्तं प्रयच्छन्तं (त्वाम्) (उप-ब्रुवे) स्तौमि (सः) स्तुतस्त्वं (नः) अस्मभ्यं (सुवीर्यम्) शोभनं वीर्यं (रास्व) देहि ॥ शुष्ममिति बलनाम निघं० २ । ९ सह इति च, वाज इति च । ऋग्वेदे ८ । ९८ । ११ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(शुष्मिन्) बलवन् ! (पुरुहूत) बहुतों से पुकारे हुवे ! (सहस्कृत) अतएव बलप्रद ! परमेश्वर ! (वाजयन्तम्) बल देते हुवे (त्वाम्) आप को (उपब्रुवे) मैं स्तुत करता हूं (सः) वह आप (नः) हमारे लिये (सुवीर्यम्) सुन्दर वीर्य को (रास्व) दीजिये ॥ निघण्टु २।९ में शुष्म, सहस्, वाज ये बल के नाम हैं ॥ ऋ० ८।९८।११ में भी ॥ ३ ॥

अथ तृतीयतृचस्य भौमोऽत्रिर्ऋषिः इन्द्रो देवता । अनुष्टुप्छन्दः ॥

तत्र प्रथमा-

१ २ ३ २उ ३ १ २ २ ३ १ २

यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः । राधस्तन्नो विद-

३ १ २

दस उभया हस्त्याभर ॥ १ ॥ (११७१) व्याख्याता (३४५)

अथ द्वितीया-

१र २र३ १२ ३ १ २ ३१र २र

यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदाभर ।

३ २ ३ १ २ ३१र २र ३ १ २

विद्याम तस्य ते वयमकूपारस्य दावनः ॥२॥ (११७३)

पदपाठः-यत् २ । मन्यसे क्रि० । वरेण्यम् २ । इन्द्र सं० । द्युक्षम्, तत् २ । आभर, विद्याम क्रि० । तस्य, ते ६ । वयम् १ । अकूपारस्य, दावनः ६ ॥

अन्वितपदार्थः-(इन्द्र) परमेश्वर ! (यत् द्युक्षम्) अन्नं (वरेण्यं) वरणीयं (मन्यसे) (तत्) अन्नम् (आभर) आहर अस्मभ्यमिति शेषः । (वयं) (ते) तव (तस्य) वरेण्यस्य (अकूपारस्य) अकुत्सितान्तस्य सुपरिपाकस्यान्नस्य (दावनः) दानस्य (विद्याम) योग्या भवेम् ॥ ऋग्वेदे तु ५ । ३९ । २ दावने इति पाठः ॥ २ ॥

भाषार्थः-(इन्द्र) हे परमेश्वर ! (यत) जिस को आप (वरेण्यम्) उत्तम (मन्यसे) समझें (तत्) उस (द्युक्षम्) अन्न को (आभर) हमें प्राप्त

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करावें (ते) आप के (तस्य) उस (अकूपारस्य) अनिन्दित परिपाक वाले (दावनः) अन्नदान के (विद्याम) हम योग्य होवें ॥ ऋ० ५ । ३९ । २ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ २ ३ २
यत्ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।

१ २ ३ १ २ ३ १ २ २ ३ १ २
तेन दृढा चिदद्रिव आ वाजं दर्षि सातये ॥३॥ [१४] (११७४)

पदपाठः-यत् १ । ते ६ । दिक्षु ७ । प्रराध्यं, मनः १ । अस्ति क्रि० । श्रुतं, बृहत १ । तेन ३ । दृढा २ । चित् अ० । अद्रिवः सं० । आ अ० । वाजम् २ । दर्षि क्रि० । सातये ४ ॥

अन्वितपदार्थः-(अद्रिवः) हे वज्रवन्निन्द्र ! परमेश्वर ! (दिक्षु श्रुतं) प्रसिद्धं (यत्) (बृहत्) महत् (प्रराध्यं) प्रकर्षेणाराधनीयं (ते) तव (मनः) ज्ञानम् (अस्ति) भवति (तेन) ज्ञानेन (सातये) संभजनाय दानाय वा (दृढा चित्) दृढमपि (वाजम्) अन्नम् (आदर्षि) आदारयसि ॥ ऋग्वेदे तु ५ । ३९ । ३ दिक्षु=दित्सु इति पाठः ॥ ३ ॥

भाषार्थः—(अद्रिवः) हे वज्रवन् ! इन्द्र ! परमेश्वर ! (दिक्षु) दिशाओं में (श्रुतम्) विख्यात (यत्) जो (बृहत्) बड़ा (प्रराध्यम्) आराधनीय (ते) आप का (मनः) ज्ञान (अस्ति) है (तेन) उस ज्ञान से (सातये)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दान वा संभजन के लिये (दृढा) पुष्ट (चित्) भी (वाजम्) अन्न को (आ दर्षि) सब ओर से दहाते [भरमार से देते] हो ॥ ऋ० ५ । ३९ । ३ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

इति चतुर्थः प्रपाठकः ॥ ४ ॥

इति श्रीमत्कण्ववंशाऽवतंस पण्डित हज़ारीलालस्वामि सूनुना, हस्तिनापुरपार्श्ववर्त्ति परीक्षितगढ़निवासिना, तुलसीरामस्वामिना कृते सामवेदभाष्ये उत्तरार्चिके-ऽष्टमोऽध्यायः ॥ ८ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ नवमाऽध्यायः

तत्र

प्रथमे खण्डे प्रथमसूक्तस्य—प्रतर्दन ऋषिः । सोमो देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २३१ २ ३ २ ३ १ २ ३१२ ३१२
शिशुं जज्ञानं हर्यतं मृजन्ति, शुम्भन्ति विप्रं मरुतो गणेन ।
३ २३ १र २ ३१र २र ३२३१ २३१२
कविर्गीर्भिः काव्येन कविः सन्, सोमः पवित्रमत्येति रेभन्

॥ १ ॥ (११७५)

पदपाठः—शिशुम्, जज्ञानम्, हर्यतम् २ । मृजन्ति, शुम्भन्ति क्रि० । विप्रम् २ । मरुतः १ । गणेन ३ । कविः १ । गीर्भिः ३ । काव्येन ३ । कविः । सन्, सोमः १ । पवित्रम् २ । अत्येति क्रि० । रेभन् १ ॥

अन्वितपदार्थः—(मरुतः) ऋत्विज आदित्यरश्मयो वा (शिशुम्) नूतनम् (जज्ञानम्) प्रादुर्भूतम् अतएव (हर्यतम्) मनोहरम् (विप्रम्) मेधातत्त्वयुक्तं सोमं (गणेन) आत्मीयेन समूहेन (मृजन्ति) शोधयन्ति (शुम्भन्ति) अलङ्कुर्वन्ति च । (कविः) क्रान्तप्रज्ञातत्त्ववान्सोमः (कविः) शब्दकरणशीलः (रेभन्) शब्दं कुर्वन् (सन्) (काव्येन) वेदपाठेन तत्रापि (गीर्भिः) वेदवाणीभिः प्रशंसा वाग्भिश्च सह (पवित्रम्) दशापवित्रम् (अत्येति) अतीत्य गच्छति ॥ ऋग्वेदे तु ९ । ९६ । १७ विप्रम्=वह्निम इति पाठः ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(मरुतः) सूर्यकिरणें वा ऋत्विज् लोग (गणेन) अपने समूह से (शिशुम्) नवीन (जज्ञानम्) उत्पन्न हुवे (हर्यतम्) मनोहर (विप्रम्) बुद्धितत्त्वयुक्त सोम को (मृजन्ति) शोधते और (शुम्भन्ति) सुशोभित करते हैं। (कविः) क्रान्तबुद्धितत्त्वयुक्त (कविः) शब्द करने के स्वभाववाला सोम (रेभन्) शब्द करता हुवा (काव्येन) वेदपाठ से और उस में भी (गीर्भिः) सोम की प्रशंसायुक्त ऋचाओं की वाणियों के साथ (पवित्रम्) दशापवित्र को (अत्येति) उल्लङ्घन कर जाता है ॥ ऋ० ९ । ९६ । १७ का पाठान्तर संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २

ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीष्कवीनाम् ।

३ २ ३ १ २ ३ १ २ २ ३ १ २ ३ २ ३ १ २ ३ २

तृतीयं धाम महिषः सिषासन् सोमो विराजमनु राजति ष्टुप् ॥

॥ २ ॥ (११७६)

पदपाठः—ऋषिमनाः, यः, ऋषिकृत्, स्वर्षाः, सहस्रनीथः, पदवीः १ । कवीनाम् ६ । तृतीयं, धाम २ । महिषः, सिषासन्, सोमः १ । विराजम् २ । अनुराजति क्रि० । स्तुप् १ ॥

अन्वितपदार्थः—(यः) (ऋषिमनाः) ऋषीणां मनो यस्मिन्मनोहरत्वात् (ऋषिकृत्) ऋषीणां कर्त्ता ऋषित्व-संपादकत्वात् (स्वर्षाः) सुगतिः (सहस्रनीथः) बहुस्तुतिकः (कवीनां) मतिमतां (पदवीः) उन्नायकः (महिषः) सत्कर्त्तव्यः (स्तुप्) प्रशस्यमानः (सोमः) ओषधिराजः सः (तृतीयं धाम) द्युलोकम् (सिषासन्) संभक्तुमिच्छन्निव (विराजम्) इन्द्रवायुम् (अनुराजति) प्रकाशयति ॥ ऋग्वेदे ९ । ९६ । १९ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(यः) जो (ऋषिमनाः) ऋषियों का मन है जिस में, अतएव (ऋषिकृत्) ऋषि बनाने वाला (स्वर्षाः) सुन्दर गति वाला (सहस्रनीथः) बहुत प्रशंसा वाला [नीथा= स्तुतिः इति सायणः] (कवीनां पदवीः) कवियों बुद्धिमानों का उन्नतिकर्त्ता (महिषः) प्रशंसनीय (स्तुप्) प्रशस्यमान (तृतीयं धाम) द्युलोक को (सिषासन्) विभक्त करना चाहने वाला सा (सोमः)सोम है वह (विराजम्) इन्द्र वायु को (अनुराजति) प्रकाशित करता है ॥ ऋ० ९ । ९६ । १८ में भी ॥ २ ॥

अथ तृतीया–

३ २ ३१ २ ३ २ ३ १ २
चमूषच्छ्येनः शकुनो विभृत्वा
३ २ ३ १र २र ३ १ २
गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
३ २३१र २र ३ २
अपामूर्मिꣳ सचमानः समुद्रं
३ २ ३ १ २ ३ १ २
तुरीयं धाम महिषो विवक्ति ॥३॥ [१] (११७७)

पदपाठः—चमूषत्, श्येनः, शकुनः, विभृत्वा, गोविन्दुः, द्रप्सः १ । आयुधानि २ । बिभ्रत् १ । अपाम् ६ । ऊर्मिम् २ । सचमानः १ । समुद्रम्, तुरीयम्, धाम २ । महिषः १ । विवक्ति क्रि० ॥

अन्वितपदार्थः–(चमूषत्) चम्वोर्द्यावापृथिव्योस्तिष्ठतीति चमूषत् (श्येनः शकुनः) श्येननामा पक्षीव बली (विभृत्वा) आकाशविहारी (गोविन्दुः) सूर्यकिरणगतः (द्रप्सः) जलसंमिश्रः (आयुधानि) विद्युद्रूपाणि (बिभ्रत्) धारयत् (अपाम् ऊर्मिं समुद्रम्)जलानां लहरीवन्तमन्तरिक्षं (सचमानः) सेवमानः (महिषः) महान्सोमः (तुरीयं धाम) द्युपृथिव्यन्तरिक्षेषु चतुर्थ-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिवाऽपूर्वं धाम स्थानं (विवक्ति) सेवते ॥ ऋग्वेदे ९ । ९६ । १९ ऽपि ॥ सायणेन द्रप्साऽऽयुधशब्दौ न व्याख्यातौ दृश्येते, गतानुगतिकेन ज्वालाप्रसादेनाऽपि च तत्पदद्वयं विनैवान्वितं कृतं मन्त्रं पश्यामः ॥ ३ ॥

भाषार्थः-(चमूषत्) द्युलोक और पृथिवीलोक के मध्य में स्थित (श्येनः) शिखरा [बाज़] (शकुनः) पक्षी सा बलवान् (बिभृत्वा) आकाशबिहारी (गोविन्दुः) सूर्यकिरणों में गया (द्रप्सः) जल में मिला (आयुधानि, बिभ्रत्) बिजुली रूपी शस्त्रों को, धारण करता हुवा (अपाम्, ऊर्मिं, समुद्रं, सचमानः) जलों की, लहरीयुक्त, अन्तरिक्ष को, सेवन करता हुवा (महिषः) महान् सोम (तुरीयं धाम) द्युलोक पृथिवी लोक और अन्तरिक्ष लोक इन तीनों में चतुर्थ से अद्भुत स्थान को (विवक्ति) सेवित करता है ॥ ऋ० ९ । ९६ । १९ में भी ॥ सायणाचार्य ने " द्रप्सः " और " आयुधानि " पदों की व्याख्या नहीं की दीखती, या जो दो पुस्तक इसने देखे, वे खण्डित हों । इसी से उस भाष्य की सङ्गति भी नहीं बैठती । और आश्चर्य है कि ज्वालाप्रसाद ने उन दोनों पदों के विना ही अन्वय पूरा कर दिया ॥ ३ ॥

अथ नवर्चस्य द्वितीयसूक्तस्य-असितदेवलावृषी । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ १र २र ३ २ ३ १र २र ३ १ २
एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् ।
१ २ ३ ३क २र
वर्धन्तो अस्य वीर्यम् ॥ १ ॥ (११७८)

पदपाठः-एते, सोमाः १ । अभि अ० । प्रियम् २ । इन्द्रस्य ६ । कामम् २ । अक्षरन् क्रि० । वर्धन्तः १ । अस्य ६ । वीर्यम् २ ॥

अन्वितपदार्थः-(एते सोमाः अस्य इन्द्रस्य वीर्यम्) शक्तिं (वर्धन्तः) वर्धयन्तः सन्तः (प्रियं कामं) प्रियां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कामनाम् (अभि-अक्षरन्) सर्वतोऽभिवर्षयन्ति ॥ ऋग्वेदे ९ । ८ । १ ऽपि ॥ १ ॥

भाषार्थः—(एते) ये (सोमाः) सोम (अस्य) इस (इन्द्रस्य) इन्द्र के (वीर्यम्) वीर्य वा शक्ति को (वर्धन्तः) बढ़ाते हुवे (प्रियम्) प्यारी (कामम्) कामना को (अभि) सर्वतः (अक्षरन्) वर्षाते हैं ॥ ऋ० ९ । ८ । १ में भी ॥ १ ॥

अथ द्वितीया—

३ १ २ ३ २ ३ १ २ ३ २ ३ १ २

पुनानासश्चमूषदोगच्छन्तो वायुमश्विना ।

१ २ ३ १ २

ते नो धत्त सुवीर्यम् ॥ २ ॥ (११७९)

पदपाठः—पुनानासः, चमूषदः, गच्छन्तः १ । वायुम् २ । अश्विना २ । ते १ । नः ४ । धत्त क्रि० । सुवीर्यम् २ ॥

अन्वितपदार्थः—ये (पुनानासः) अभिषूयमाणाः पुनः (चमूषदः) द्यावापृथिव्योर्मध्ये तिष्ठन्तः (वायुं) वातं, तत्रस्थौ (अश्विना) प्राणापानौ च (गच्छन्तः) सन्तः सोमाः सन्ति (ते) (नः) अस्मभ्यं (सुवीर्यं) शोभनं वीर्यं (धत्त) दधतु ॥ ऋग्वेदे ९ । ८ । २ ऽपि ॥ २ ॥

भाषार्थः—जो (पुनानासः) अभिषुत किये जाते हुवे और फिर (चमूषदः) पृथिवी आकाश के बीच में स्थित हुवे (वायुम्) वायु को और उस में के (अश्विना) प्राण अपान को (गच्छन्तः) प्राप्त होते हुवे सोम हैं (ते) वे (नः) हमारे लिये (सुवीर्यम्) उत्तम वीर्य को (धत्त) धारण करें ॥ ऋ० ९ । ८ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ २

इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ १ २ ३ १ २
देवानां योनिमासदम् ॥ ३ ॥ (११८०)

पदपाठः—इन्द्रस्य ६ । सोम सं० । राधसे ४ । पुनानः १ । हार्द्दि २ । चोदय क्रि० । देवानाम् ६ । योनिम् २ । आसदम् क्रि० ॥

अन्वितपदार्थः—(सोम) सोम ! (इन्द्रस्य) वायोः (राधसे) संसिद्धै (पुनानः) अभिषूयमाणः सन् (हार्द्दि) हृदयस्य संबन्धिस्थानं (चोदय) उत्तेजय तेन जलं वर्षय (देवानां योनिं) यज्ञमहमतएव (आसदम्) आतिष्ठामि ॥ ऋग्वेदे तु ९।८।३ देवानाम्=ऋतस्य इति पाठः ३

भाषार्थः—(सोम) हे सोम ! तू (पुनानः) अभिषुत किया जाता हुवा (इन्द्रस्य) इन्द्रनामक वायुविशेष वृष्टिकारक की (राधसे) सिद्धि के लिये (हार्द्दि) हृदय के स्थान को (चोदय) उत्तेजित कर । मैं इसी लिये (देवानां योनिम्) देवों के स्थान=यज्ञस्थल में (आसदम्) आकर बैठता हूं ॥ ऋ० ९ । ८ । ३ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ चतुर्थी—

३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्तधीतयः ।
२ ३ १ २
अनु विप्रा अमादिषुः ॥ ४ ॥ (११८१)

पदपाठः—मृजन्ति क्रि० । त्वा २ । दश, क्षिपः १ । हिन्वन्ति क्रि० । सप्त, धीतयः १ । अनु अ० । विप्राः १ । अमादिषुः क्रि० ॥

अन्वितपदार्थः—सोम ! (त्वा) त्वाम् (दश) १० (क्षिपः) अङ्गुलयः (मृजन्ति) शोधयन्ति तथा (सप्त धीतयः) सप्त होतारः (हिन्वन्ति) अग्नौ जुह्वति (अनु) अनन्तरं (विप्राः) मेधाविनः (अमादिषुः) हृष्टाःपुष्टाश्च भवन्ति ॥ ऋग्वेदे ९ । ८ । ४ऽपि ॥ ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—सोम ! (त्वा) तुझ को (दश) १० (क्षिपः) अङ्गुलियें (मृजन्ति) शोधती हैं (सप्त) ७ (धीतयः) होता लोग (हिन्वन्ति) अग्नि में पहुंचाते हैं (अनु) फिर (विप्राः) बुद्धिमान् लोग (अमादिषुः) हृष्ट पुष्ट होते हैं ॥ ऋ० ९ । ८ । ४ में भी ॥ ४ ॥

अथ पञ्चमी—

३ १ २ ३ १ २ ३ १ २ ३ १ २र ३क २र
देवेभ्यस्त्वा मदाय कꣳ सृजानमति मेष्यः ।
१र २र
संगोभिर्वासयामसि ॥ ५ ॥ (११८२)

पदपाठः—देवेभ्यः ४ । त्वा २ । मदाय ४ । कम्, सृजानम् २ । अति अ० । मेष्यः १— २ । सम् अ० । गोभिः ३ । वासयामसि क्रि० ॥

अन्वितपदार्थः—सोम ! वयं (देवेभ्यः) (मदाय) हर्षाय (मेष्यः अति सृजानं त्वा) अविलोमभवं दशापवित्रमुल्लङ्घयन्तं त्वां (कम्) सुखं यथास्यात्तथा (गोभिः) सूर्यकिरणैः (सं वासयामसि) ॥ ऋग्वेदे ९ । ८ । ५ ऽपि॥५॥

भाषार्थः—सोम ! हम (देवेभ्यः) देवों के लिये (मदाय) हर्षार्थ, (मेष्यः) दशापवित्र को (अति सृजानम्) उल्लङ्घन करके छोड़ते हुवे (त्वा) तुझ को, (कम्) जिस से सुख हो, (गोभिः) सूर्य की किरणों से (सं-वासयामसि) सुवासित करते हैं ॥ ऋ० ९ । ८ । ५ में भी ॥ ५ ॥

अथ षष्ठी—

३ २ ३ २ ३ १र २र ३ १र २र
पुनानः कलशेष्वा वस्त्राण्यरुषोहरिः ।
२ ३ १ २
परि गव्यान्यव्यत ॥ ६ ॥ (११८३)

पदपाठः—पुनानः १ । कलशेषु ७ । आ अ० । वस्त्राणि २ । अरुषः, हरिः १ । परि अ० । गव्यानि २ । अव्यत क्रि० ॥

अन्वितपदार्थः—(कलशेषु) द्रोणकलशेषु (आ—पु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नानः) सर्वतोऽभिषूयमाणः सोमः (अरुषः) आरोचमानः (हरिः) अग्निसंबन्धेन हरितो जातःसन् (गव्यानि) गवां किरणानां संबन्धीनि (वस्त्राणि) वसनानि (परि-अव्यत) परिवीतानि करोति परिदधाति ॥ ऋग्वेदे ९ । ८ । ६ ऽपि ॥ ६ ॥

भाषार्थः- (कलशेषु) द्रोणकलशों में (आ) सर्वतः (पुनानः) अभिषूयमाण (अरुषः) प्रकाशमान और (हरिः) अग्निसंबन्ध से धूमरूप में परिणत होकर हरा हुवा सोम (गव्यानि) किरणमय (वस्त्राणि) वस्त्रों को (पर्यव्यत) पहर लेता है ॥ ऋ० ९ । ८ । ६ में भी ॥ ६ ॥

अथ सप्तमी—

३ २३ १ २ ३ २३ ३ २ ३ १ २
मघोन आ पवस्व नो जहि विश्वा अपद्विषः ।
२ ३ १ २ ३ १ २
इन्दो सखायमाविश ॥ ७ ॥ (११८४)

पदपाठः-मघोनः २ । आ-पवस्व क्रि० । नः २ । जहि क्रि० । विश्वा २ । अप अ० । द्विषः २ । इन्दो सं० । सखायम् २ । आविश क्रि० ॥

अन्वितपदार्थः-(इन्दो) सोम ! (नः) अस्मान् सोमयाजिनः (मघोनः) धनवतः (आ-पवस्व) संपादय तथा (विश्वा) सर्वान् (द्विषः) शत्रून् (अप-जहि) मारय किं च (सखायम्) स्वमित्रमिन्द्रम् (आविश) ॥ ऋग्वेदे ९ । ८ । ७ ऽपि ॥ ७ ॥

भाषार्थः-(इन्दो) सोम ! (नः) हम सोमयाजियों को (मघोनः) धनी (आपवस्व) बनाव और (विश्वा) सब (द्विषः) शत्रुओं को (अप-जहि) मार तथा (सखायम्) अपने मित्र इन्द्र [वायु] को (आविश) प्रवेश कर ॥ ऋ० ९ । ८ । ७ में भी ॥ ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथाऽष्टमी—

३ १ २ ३ १२ २२ ३ १ २
नृचक्षसं त्वा वयमिन्द्रपीतꣳ स्वर्विदम् ।
३ १ २ ३ १२ २
भक्षीमहि प्रजामिषम् ॥ ८ ॥ (११८५)

पदपाठः—नृचक्षसम्, त्वा २ । वयम् १ । इन्द्रपीतम्, स्वर्विदम् २ । भक्षीमहि क्रि० । प्रजाम्, इषम् २ ॥

अन्वितपदार्थः—(नृचक्षसं) नृणां दर्शयितारं [दृष्टिप्रसादकत्वात्] (इन्द्रपीतं) य इन्द्रेण पीयतेस्म तं (स्वर्विदं) सुखस्य लम्भकम् (इषम्) अन्नम् (त्वा) त्वां सोमं (वयं) याज्ञिकाः (भक्षीमहि) सेवेमहि (प्रजाम्) सन्तानं लभेमहि ॥ ऋग्वेदे ९ । ८ । ८ऽपि ॥ ८ ॥

भाषार्थः—(नृचक्षसम्) चक्षु को हितकारी होने से मनुष्यों के दिखाने वाले (इन्द्रपीतम्) जिस का इन्द्र ने पान किया है उस (स्वर्विदम्) सुखप्रापक (इषम्) अन्न (त्वा) तुझ सोम को (वयम्) हम याज्ञिक (भक्षीमहि) भक्षण करें और (प्रजाम्) सन्तान को पावें ॥ ऋ० ९ । ८ । ८ में भी ॥८॥

अथ नवमी—

३ २ ३ १२ २२ ३ १ २ ३ १२ २२
वृष्टिं दिवः परिस्रव द्युम्नं पृथिव्या अधि ।
१ २ ३ १ २
सहो नः सोम पृत्सु धाः ॥ ९ ॥ [२] (११८६)

पदपाठः—वृष्टिम् २ । दिवः ५ । परि-स्रव क्रि० । द्युम्नम् २ । पृथिव्याः ६ । अधि अ० । सहः २ । नः ४ । पृत्सु ७ । धाः क्रि० ॥

अन्वितपदार्थः—(सोम) ओषधिराज ! त्वं (पृथिव्याः) भूमेः (अधि) उपरि (दिवः) आकाशात् (वृष्टिं) वर्षं तथा (द्युम्नम्) अन्नं (परि-स्रव) सर्व-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तो वर्षय तथा (पृत्सु) संग्रामेषु (नः) अस्मभ्यं (सहः) बलं (धाः) धेहि ॥ ऋग्वेदे ९ । ८ । ९ऽपि ॥ ९ ॥

भाषार्थः— (सोम) ओषधिराज ! तू (पृथिव्याः) पृथिवी के (अधि) ऊपर (वृष्टिम्) वर्षा और (द्युम्नम्) अन्न को (परि-स्रव) सर्वतः वर्षाव और (नः) हमारे लिये (पृत्सु) संग्रामों में (सहः) बल को (धाः) धारण करा ॥ ऋ० ९ । ८ । ९ में भी ॥ ९ ॥

इति नवमाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे नवर्चस्य सूक्तस्य—असितदेवलावृषी । सोमो देवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ४ १ २

सोमःपुनानो अर्षति सहस्रधारो अत्यविः ।

३ १ २ २ २ ३ २

वायोरिन्द्रस्य निष्कृतम् ॥१॥ (११८७)

पदपाठः—सोमः, पुनानः १ । अर्षति क्रि० । सहस्रधारः, अत्यविः १ । वायोः, इन्द्रस्य ६ । निष्कृतम् २ ॥

अन्वितपदार्थः—(अत्यविः) उल्लङ्घिताऽविरोमोद्भव-दशापवित्रः (पुनानः) शोध्यमानः (सहस्रधारः) बहुधारः (सोमः), (वायोः) वायुरूपस्य (इन्द्रस्य) (निष्कृतम्) स्थानम् (अर्षति) गच्छति ॥ ऋग्वेदे ९ । १३ । १ऽपि ॥१॥

भाषार्थः—(अत्यऽविः) भेड़ की रोम के दशापवित्र को उलङ्घित करने वाला (पुनानः) शोधा जाता हुवा (सहस्रधारः) बहुत धारायुक्त (सोमः) सोम (इन्द्रस्य, वायोः) इन्द्र जो कि वायु है उस के (निष्कृतम्) स्थान को (अर्षति) जाता है ॥ ऋ० ९ । १३ । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १ २ ३ १ २

पवमानमवस्यवो विप्रमभि प्रगायत ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३१२
सुष्वाणं देववीतये ॥ २ ॥ (११८८)

पदपाठः—पवमानम् २ । अवस्यवः सं० । विप्रम् २ । अभिप्रगायत क्रि० । सुष्वाणम् २ । देववीतये ४ ॥

अन्वितपदार्थः—(अवस्यवः) हे रक्षामिच्छवः ! यूयं (देववीतये सुष्वाणं) देवभक्षणाय यज्ञाय अभिषूयमाणं (विप्रं) मेधावन्तं (पवमानं) सोमम् (अभि–प्र–गायत) प्रशंसत ॥ ऋग्वेदे ९ । १३ । २ ऽपि ॥ २ ॥

भावार्थः—(अवस्यवः) हे रक्षा को चाहने वालो ! तुम (देववीतये) देवों=घायु आदि के भक्षण यज्ञार्थ (सुष्वाणम्) अभिषुत किये जाते हुवे (विप्रम्) मेधातत्त्वयुक्त (पवमानम्) सोम को (अभि–प्रगायत) प्रशंसित करो ॥ ऋ० ९ । १३ । २ में भी ॥ २ ॥

अथ तृतीया—

१२३ १२ ३ १२२ ३१२
पवन्ते वाजसातये सोमाः सहस्रपाजसः ।

३ २ ३१२
गृणाना देववीतये ॥ ३ ॥ (११८९)

पदपाठः—पवन्ते क्रि० । वाजसातये ४ । सोमाः, सहस्रपाजसः, गृणानाः १ । देववीतये ४ ॥

अन्वितपदार्थः—(देववीतये) यज्ञाय (वाजसातये) बलप्राप्तये च (गृणानाः) प्रशस्यमानाः (सहस्रपाजसः) बहुबलाः (सोमाः पवन्ते) ॥ ऋग्वेदे ९ । १३ । ३ ऽपि ॥ ३ ॥

भावार्थः—(देववीतये) यज्ञसिद्धि (वाजसातये) और बल प्राप्ति के लिये (गृणानाः) प्रशस्यमान (सहस्रपाजसः) बहुबलयुक्त (सोमाः) सोम (पवन्ते) पवित्रता करते हैं ॥ ऋ० ९ । १३ । ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी—

३ २ ३ १ २ ३ १२ ३१२ २२
उत नो वाजसातये पवस्व बृहतीरिषः ।
३१२ ३१२
द्युमद्विन्दो सुवीर्यम् ॥ ४ ॥ (११९०)

पदपाठः—उत अ० । नः ४ । वाजसातये ४ । पवस्व क्रि० । बृहतीः, इषः २ । द्युमत् २ । इन्दो सं० । सुवीर्यम् २ ॥

अन्वितपदार्थः—तत्प्रशंसनमाह—(इन्दो) सोम ! (नः) अस्मभ्यं (वाजसातये) बलस्य दानाय (बृहतीः) महान्ति (इषः) अन्नानि (उत) च (द्युमत्) प्रकाशमानं (सुवीर्यं) (पवस्व) क्षर ॥ ऋग्वेदे ९ । १३ । ४ ऽपि ॥ ४ ॥

भावार्थः—उस प्रशंसा को कहते हैं कि:—(इन्दो) सोम ! (नः) हमारे लिये (वाजसातये) बलदानार्थ (बृहतीः) अद्भुत बड़े (इषः) अन्नों को (उत) और (द्युमत्) प्रकाशमान (सुवीर्यम्) शोभन वीर्य को (पवस्व) वर्षाय ॥ ऋ० ९ । १३ । ४ में भी ॥ ४ ॥

अथ पञ्चमी—

१ २ ३ २उ ३ २ १ १ २ ३ १ २
अत्या हियाना हेतृभिरसृग्रं वाजसातये ।
२उ ३१ २ ३ १ २
विबारमव्यमाशवः ॥ ५ ॥ (११९१)

पदपाठः—अत्याः, हियानाः १ । न अ० । हेतृभिः ३ । असृग्रम् क्रि० । वाजसातये ४ । वि अ० । बारम्, अव्यम् २ । आशवः १ ॥

अन्वितपदार्थः—(न) यथा (आशवः) घाणाः (हेतृभिः हियानाः) प्रेरकैःप्रेर्यमाणाः (वाजसातये) संग्रामाय विसृज्यन्ते तद्वदेव (अत्याः) सततगमनयोग्याः सोमाअपि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अव्यम्) अविभवं (वारं) वालमयं दशापवित्रं (वि-असृग्रम्) विसृज्यन्ते ॥ सायणाचार्येणाऽत्र "अत्या" इत्यस्य "अति-आ" इति छेदमङ्गीकृत्य व्याख्यानं कृतं तत्सामश्रमिलेखानुसारं पदपाठविरुद्धमतएवास्माभिरुपेक्षितम् ॥ ऋग्वेदे ९ । १३ । ६ ऽपि ॥ ५ ॥

भाषार्थः-(न) जैसे (आशवः) बाण (हेतृभिः) चलाने वालों से (हियानाः) चलाये हुवे (वाजसातये) संग्राम के लिये छोड़े जाते हैं, वैसे ही (अत्याः) निरन्तर गमन योग्य सोम भी (अव्यम्) भेड़ के (वारम्) वालमय दशापवित्र को (वि-असृग्रम्) विसर्जन किये जाते हैं ॥ पदपाठ में "अत्याः" एक पद होने से जैसा कि सत्यव्रत सामश्रमी जी कहते हैं, सायणाचार्य की "अति-आ" की व्याख्या करना विरुद्ध है ॥ ऋ० ९ । १३ । ६ में भी ५ ॥

अथ षष्ठी-

१ २ ३ १ २ ३ १ २ २ ३ २ ३ १ २
ते नः सहस्रिणꣳ रयिं पवन्तामा सुवीर्यम् ।
३ २ ३ २ ३ १ २
स्वाना देवास इन्दवः ॥ ६ ॥ (११९२)

पदपाठः-ते १ । नः ४ । सहस्रिणम्, रयिम् २ । पवन्ताम् क्रि० । आ अ० । सुवीर्यम् २ । स्वानाः, देवासः, इन्दवः १ ॥

अन्वितपदार्थः-(स्वानाः) अभिषूयमाणाः (देवासः) दिव्याः (ते इन्दवः) उक्ताः सोमाः (नः) अस्मभ्यं (सहस्रिणं) बहुसंख्याकं (रयिं) धनं (सुवीर्यं) शोभनं वीर्यं च (आ—पवन्ताम्) सर्वतः क्षरन्तु ॥ ऋग्वेदे ९ । १३ । ५ ऽपि ॥ ६ ॥

भाषार्थः-(स्वानाः) अभिषव किये जाते हुवे (ते) वे (देवासः) दिव्य (इन्दवः) सोम (नः) हमारे लिये (सहस्रिणम्) बहुत (रयिम्) धन तथा (सुवीर्यम्) उत्तम वीर्य को (आ-पवन्ताम्) सर्वतः वर्षावें ॥ ऋ० ९ । १३ । ५ में भी ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ सप्तमी-

३ १ २ ३ १ २३ २ ३ २उ ३ १ २
वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः ।
३ १र २र
दधन्विरे गभस्त्योः ॥ ७ ॥ (११९३)

पदपाठः-वाश्राः १ । अर्षन्ति क्रि० । इन्दवः १ । अभि अ० । वत्सम् २ । न अ० । मातरः १ । दधन्विरे क्रि० । गभस्त्योः ७ ॥

अन्वितपदार्थः—(इन्दवः) सोमाः (गभस्त्योः) बाह्वोः (दधन्विरे) ध्रियन्ते तथा (अभि-अर्षन्ति) सर्वतोऽभिमुखं यथा स्यात्तथा गच्छन्ति । तत्र दृष्टान्तः—(न) यथा (वाश्राः) शब्दायमानाः (मातरः) धेनवः (वत्सम्) अभिगच्छन्ति तद्वत् ॥ ऋग्वेदे ९ । १३ । ७ ऽपि ॥ ७ ॥

भाषार्थः-(इन्दवः) सोम (गभस्त्योः) दोनों बाहुओं में (दधन्विरे) धारण किये जाते और (अभि) सर्वतः (अर्षन्ति) जाते फैलते हैं । (न) जैसे (वाश्राः) शब्द करती हुई (मातरः) माता गौवें (वत्सम्) बछड़े के प्रति दौड़ती हैं तद्वत् ॥ ऋ० ९ । १३ । ७ में भी ॥ ७ ॥

अथाऽष्टमी-

२ ३ १ २ ३ १र २र ३ १ २
जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत् ।
२ ३ २ ३ १ २
विश्वा अप द्विषो जहि ॥ ८ ॥ (११९४)

पदपाठः-जुष्टः १ । इन्द्राय ४ । मत्सरः, पवमानः १ । कनिक्रदत् क्रि० । विश्वा २ । अप अ० । द्विषः २ । जहि क्रि० ॥

अन्वितपदार्थः—(इन्द्राय) राज्ञे वायवे यजमानाय वा (जुष्टः) सेवितः (मत्सरः) तृप्तिकरः [मन्दतेस्तृप्ति-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कर्मण इति निरुक्तमित्याह सायणः] (पवमानः) सोमः (कनिक्रदत्) शब्दायते तथा (विश्वा द्विषः) सर्वान् शत्रून् (अप-जहि) नाशयति ॥ ऋग्वेदे ९ । १३ । ८ ऽपि ॥ ८ ॥

भाषार्थः-(इन्द्राय) राजा वा वायुविशेष वा यजमान के लिये (जुष्टः) सेवन किया हुवा (मत्सरः) तृप्तिकारक (पवमानः) सोम (कनिक्रदत्) शब्द करता और (विश्वा) सब (द्विषः) शत्रुओं को (अप-जहि) नाशता है॥ सायण और निरुक्त का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ९ । १३ । ८ में भी ॥ ८ ॥

अथ नवमी-

३ २ ३ १ २ ३ १२ ३ १ २
अप घ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
१ २ ३ १ २
योनावृतस्य सीदत ॥ ९ ॥ (११९५)

पदपाठः-अपघ्नन्तः १ । अराव्णः २ । पवमानाः, स्वर्दृशः १ । योनौ ७। ऋतस्य ६ । सीदत क्रि० ॥

अन्वितपदार्थः-(स्वर्दृशः) सुखस्य दर्शयितारः, (अराव्णः) अदातृनयाज्ञिकानधार्मिकानिति यावत् (अपघ्नन्तः) नाशयन्तः (पवमानाः) सोमाः सोमपायिनो वा (ऋतस्य) यज्ञस्य (योनौ) स्थाने (सीदत) तिष्ठन्ति तिष्ठन्तु वा ॥ ऋग्वेदे ९ । १३ । ९ ऽपि ॥ ९ ॥

भाषार्थः—(स्वर्दृशः) सुख दिखाने वाले, (अराव्णः अपघ्नन्तः) अधार्मिकों का नाश करने वाले (पवमानाः) सोम वा सोमपायी लोग (ऋतस्य) यज्ञ के (योनौ) स्थान में (सीदत) ठहरते हैं वा ठहरें ॥ ऋ० ९ । १३ । ९ में भी ॥ ९ ॥

इति नवमाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

—:*:—

अथ तृतीयखण्डे नवर्चमेकं सूक्तं तस्य-असितदेवलावृषी । सोमो देवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ २ ३ १ २
सोमा असृग्रमिन्दवः सुता ऋतस्य धारया ।
१ २ ३ १ २
इन्द्राय मधुमत्तमाः ॥ १ ॥ (११९६)

पदपाठः-सोमाः १ । असृग्रम् क्रि० । इन्दवः १ । सुताः १ । ऋतस्य ६ । धारया ३ । इन्द्राय ४ । मधुमत्तमाः १ ॥

अन्वितपदार्थः-(ऋतस्य) यज्ञस्य (सुताः) अभिषुताः (मधुमत्तमाः) अतिमाधुर्योपेताः (इन्दवः) आर्द्राः (सोमाः) पवमानाः (धारया) (इन्द्राय) इन्द्रार्थम् (असृग्रम्) सृज्यन्ते ॥ ऋग्वेदे तु ९ । १२ । १ धारया=सादने इति पाठः ॥ १ ॥

भाषार्थः—(ऋतस्य) यज्ञ के (सुताः) अभिषुत (मधुमत्तमाः) अतिमाधुर्ययुक्त (इन्दवः) गीले (सोमाः) सोम (इन्द्राय) इन्द्र के लिये (धारया) धार से (सृज्यन्ते) छोड़े जाते हैं ॥ ऋ० ९ । १२ । १ का पाठ भेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया-

३ १ र २ र ३ १ २ ३ २ ३ ३ १ २
अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
२ ३ १ २ ३ १ २
इन्द्रꣳ सोमस्य पीतये ॥ २ ॥ (११९७)

पदपाठः-अभि अ० । विप्राः १ । अनूषत क्रि० । गावः १ । वत्सम् २ । न अ० धेनवः १ । इन्द्रम् २ । सोमस्य ६ । पीतये ४ ॥

अन्वितपदार्थः-(विप्राः) मेधाविन ऋत्विजः (सोमस्य) (पीतये) पानाय (इन्द्रम्) (अभि-अनूषत)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अभिस्तुवन्ति सोमेऽभिषुते सति इन्द्रस्तुतिविधायकान्मन्त्रान्पठन्ति । तत्र दृष्टान्तः- (धेनवः) पाययित्र्यः (गावः वत्सं) (न) यथा प्रीत्या शब्दयन्ति तद्वत् ॥ ऋग्वेदे ९ । १२ । २ ऽपि ॥ २ ॥

भाषार्थः-(विप्राः) मेधावी ऋत्विज् लोग (सोमस्य) सोम के (पीतये) पानार्थ (इन्द्रम्) इन्द्र को (अभि-अनूषत) आभिमुख्य से स्तुत करते अर्थात् सोम अभिषुत होने पर इन्द्र की स्तुति वाले मन्त्रों को पढ़ते हैं । दृष्टान्त-(न) जैसे (धेनवः) दुधार (गावः) गौवें (वत्सम्) बछड़े को प्रीति से रंभा कर पुकारती हैं ॥ ऋ० ९ । १२ । २ में भी ॥ २ ॥

अथ तृतीया-

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् ।
१ २ ३ १र २र ३ २
सोमो गौरी अधिश्रितः ॥ ३ ॥ (११९८)

पदपाठः-मदच्युत १ । क्षेति क्रि० । सादने ७ । सिन्धोः ६ । ऊर्मा ७ । विपश्चित्, सोमः १ । गौरी ७ । अधि अ० । श्रितः १ ॥

अन्वितपदार्थः-(विपश्चित्) बुद्धितत्त्वयुक्तः (मदच्युत्) हर्षस्य च्यावकः (सोमः) ओषधिराट् (सिन्धोः) मनसः समुद्रस्य (ऊर्मा) लहर्य्यां (सादने) सदने स्थाने (गौरीअधि) वाचि (श्रितः) सन् (क्षेति) क्षयति निवसति ॥ "मनो वै समुद्रो मनसो वै समुद्राद्वाचाऽभ्रया देवास्त्रयीं विद्यां निरखनन्" ७ । ४ । २ । ५२ इत्यपि अत्रानुसन्धेयं शतपथवाक्यम् ॥ गौरी इति वाङ् नाम निघं० १ । ११ ॥ ऋग्वेदे ९ । १२ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(विपश्चित्) बुद्धितत्त्वयुक्त (मदच्युत) हर्ष का टपकाने वाला

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(सोमः) सोम (सिन्धोः) मन रूपी समुद्र की (ऊर्मा) लहरीरूप (सादने) स्थान में (गौरी अधि) वाणी में (श्रितः) आश्रित हुवा (क्षेति) निवास करता है ॥ शतपथ ७ । ५ । २ । ५२ और निघण्टु १ । ११ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । १२ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

३ १र २र ३ २ ३ १ २
दिवो नाभा विचक्षणोऽव्या वारे महीयते ।
२ ३ २ ३ १ २ ३ २
सोमो यः सुक्रतुः कविः ॥ ४ ॥ (११९९)

पदपाठः-दिवः ६ । नाभा ७ । विचक्षणः १ । अव्याः ६ । वारे ७ । महीयते क्रि० । सोमः, यः, सुक्रतुः, कविः १ ॥

अन्वितपदार्थः-(यः सोमः) (सुक्रतुः) शोभनो यज्ञो येन सः (कविः) क्रान्तप्रज्ञातत्त्ववान् (विचक्षणः) विशेषेण दृष्टिप्रसादकरोऽस्ति, स हि (अव्याः) अवेः (वारे) बाले दशापवित्रे (दिवः) आकाशस्य (नाभा) नाभौ यज्ञे (महीयते) प्रशस्यते । अयं यज्ञो भुवनस्य नाभिरिति श्रूयमाणत्वात् ॥ ऋग्वेदे ९ । १२ । ४ ऽपि ॥ ४ ॥

भावार्थः-(यः) जो (सोमः) सोम (सुक्रतुः) यज्ञ की शोभा और (कविः) क्रान्तबुद्धितत्त्वयुक्त तथा (विचक्षणः) विशेष कर दृष्टि को प्रसन्न करने वाला है वह (अव्याः) भेड़ के (वारे) बालमय ऊनी दशापवित्र पर (दिवः) आकाश की (नाभा) नाभि=यज्ञ में (महीयते) महिमा पाता है ॥ " यह यज्ञ संसार की नाभि है " ऐसा सुनते हैं ॥ ऋ० ९ । १२ । ४ में भी ॥ ४ ॥

अथ पञ्चमी—

१र २र ३ २ ३ २ ३ २ ३ २ ३ १ २
यः सोमः कलशेष्वा अन्तः पवित्र आहितः ।
२उ ३ १ २
तमिन्दुः परिषस्वजे ॥ ५ ॥ (१२००)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–यः, सोमः १ । कलशेषु ७ । आः क्रि० । अन्तः अ० । पवित्रे ७ । आहितः १ । तम् २ । इन्दुः १ । परिषस्वजे क्रि० ॥

अन्वितपदार्थः–(यः सोमः) (कलशेषु) द्रोणकलशेषु (आः) आस्ते, यश्च (पवित्रे अन्तः) दशापवित्रमध्ये (आहितः) निहितो भवति (तं) सोमम् (इन्दुः) आकाशचारी चन्द्रमाः (परिषस्वजे) प्रविशति अंशुनेति शेषः ॥ ऋग्वेदे तु ९ । १२ । ५ ऽपि ॥ ५ ॥

भाषार्थः–(यः) जो (सोमः) सोम (कलशेषु) द्रोणकलशों में (आः) भरा रहता और (अन्तः पवित्रे) दशापवित्र के मध्य में (आहितः) रक्खा जाता है (तम्) उस सोम को (इन्दुः) आकाशस्थ चन्द्रमा (परिषस्वजे) किरणों द्वारा आलिङ्गन करता है ॥ ऋ० ९ । १२ । ५ में भी ॥ ५ ॥

अथ षष्ठी—

२उ ३ १ २ ३१र २र ३ १ २
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि ।
२ ३ १ २ ३ १ २
जिन्वन्कोशं मधुश्चुतम् ॥ ६ ॥ (१२०१)

पदपाठः–प्र अ० । वाचम् २ । इन्दुः १ । इष्यति क्रि० । समुद्रस्य ६ । अधि अ० । विष्टपि ७ । जिन्वन् १ । कोशम्, मधुश्चुतम् २ ॥

अन्वितपदार्थः–(इन्दुः) आकाशस्थश्चन्द्रमाः (समुद्रस्य अधि विष्टपि) आकाशस्य विष्टब्धे स्थाने स्थितः सन् (मधुश्चुतं) मधुनश्च्यावकं (कोशम्) आत्मीयं मण्डलम् (वाचम्) प्रति (प्र इष्यति) प्रेरयति ॥ ऋग्वेदे ९ । १२ । ६ ऽपि ॥ ६ ॥

भाषार्थः–(इन्दुः) चन्द्रमा (समुद्रस्य) आकाश के (विष्टपि अधि) विष्टब्धस्थान [नियतस्थान] में स्थित हुवा (मधुश्चुतम्) मधु टपकाने वाले (कोशम्) कोश=अपने मण्डल को किरण रूप से (वाचम्) वाणी के प्रति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(प्र-इष्यति) भेजता है ॥ अर्थात् सोम का प्रभाव वाणी की मधुरता पर पड़ता है ॥ ऋ० ९ । १२ । ६ में भी ॥ ६ ॥

अथ सप्तमी—

१ २ ३ २३ १ २३२ ३ १ २३१२

नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम् ।

३ १र २र ३ २

हिन्वानो मानुषा युजा ॥ ७ ॥ (१२०२)

पदपाठः–नित्यस्तोत्रः,वनस्पतिः १ । धेनाम् २ । अन्तः अ० । सबर्दुघाम् २ । हिन्वानः १ । मानुषा, युजा २ ॥

अन्वितपदार्थः–(नित्यस्तोत्रः) सततं प्रशंसनीयः (वनस्पतिः) वनानां पतिः सोमः (मानुषा) मानुषाणि (युजा) युग्मानि स्त्रीपुंसरूपाणि प्रति (सबर्दुघाम्) अमृतदोग्ध्रीं (धेनां) वाचम् (अन्तः) आभ्यन्तरे (हिन्वानः) प्रेरयन्नास्ते ॥ ऋग्वेदे ९ । १२ । ७ धीनामन्तः सबर्दुघः इति पाठः ॥ ७ ॥

भाषार्थः-(नित्यस्तोत्रः) निरन्तर प्रशंसनीय (वनस्पतिः) ओषधियों का राजा सोम (मानुषा युजा) मनुष्यों के जोड़े स्त्री पुरुषों के प्रति (सबर्दुघां धेनाम्) अमृत दुहने वाली वाणीरूप गौ को (हिन्वानः) प्रेरित करता हुवा वर्त्तमान है ॥ ऋ० ९ । १२ । ७ का पाठभेद संस्कृतभाष्य में देखिये ॥७॥

अथाऽष्टमी—

१ २ ३ २ ३ १ २

आ पवमान धारय रयिꣳ सहस्रवर्चसम् ।

३ १ २ ३ १ २

अस्मे इन्दो स्वाभुवम् ॥ ८ ॥ (१२०३)

पदपाठः–आ अ० । पवमान सं० । धारय क्रि० । रयिम्, सहस्रवर्चसम् २ । अस्मे ७ । इन्दो सं० । स्वाभुवम् २ ॥

अन्वितपदार्थः–(पवमान) हे पूयमान ! वा पुनान !

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(इन्दो) सोम ! (अस्मे) अस्मासु सोमयाजिषु सोमसेविषु च (सहस्रवर्चसम्) बहुदीप्तिं (स्वाभुवं) शोभनभवनं (रयिं) धनं (आ-धारय) ॥ ऋग्वेदे ९ । १२ । ८ ऽपि ॥ ८ ॥

भाषार्थः-(पवमान) हे शुद्ध किये गये ! वा शुद्धि करने वाले ! (इन्दो) सोम ! (अस्मे) हम में (सहस्रवर्चसम्) बहुत प्रकाश वाले (स्वाभुवम्) घर की शोभारूप (रयिम्) धन को (आ-धारय) सब ओर से रख ॥ ऋ० ९ । १२ । ८ में भी ॥ ८ ॥

अथ नवमी—

३ २ ३ २ ३ २ ३ २उ ३ १र २र ३ २

अभि प्रिया दिवः कविर्विप्रः स धारया सुतः ।

१ २ ३ १ २

सोमो हिन्वे परावति ॥ १ ॥ (१२०४)

पदपाठः-अभि अ० । प्रिया २ । दिवः ६ । कविः, विप्रः, सः १ । धारया ३ । सुतः, सोमः १ । हिन्वे क्रि० । परावति ७ ॥

अन्वितपदार्थः—(सः) पूर्वोक्तः (धारया) (परावति) उत्तमस्थाने यज्ञे (सुतः) अभिषुतः (कविः) क्रान्तकर्मा (विप्रः) बुद्धितत्त्वयुक्तः (सोमः) ओषधिराजः (दिवः) द्युलोकस्य सम्बन्धीनि (प्रिया) प्रियाणि प्रीतिकराणि स्थानानि (अभि-हिन्वे) सर्वतो गच्छति ॥ ऋग्वेदे तु ९ । १२ । ९ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः इति महताऽन्तरेण पाठः ॥ ९ ॥

भाषार्थ.—(सः) वह (परावति, धारया, सुतः) उत्तमस्थान यज्ञ में, धार से, अभिषुत किया हुवा (कविः) क्रान्तकर्मा (विप्रः) बुद्धितत्त्वयुक्त (सोमः) सोम (दिवः) द्युलोक के (प्रिया) प्यारे स्थानों को (अभि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिन्वे) सर्वतः जाता है ॥ ऋ० ९ । १२ । ९ का पाठान्तर संस्कृतभाष्य में देखिये ॥ ९ ॥

इति नवमाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

—:*:—

अथ चतुर्थे खण्डे पञ्चर्चमेकं सूक्तं तस्य—उचथ्यऋषिः । सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

२३ १ २ ३ १ २३ १२ ३२

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः ।

३ १ २ ३ २

बाणस्य चोदया पविम् ॥ १ ॥ (१२०५)

पदपाठः—उत् अ० । ते, शुष्मासः १ । ईरते क्रि० । सिन्धोः, ऊर्मेः ६ । इव अ० । स्वनः १ । बाणस्य ६ । चोदय क्रि० । पविम् २ ॥

अन्वितयदार्थः—(सिन्धोः) समुद्रस्य (ऊर्मेः) लहर्य्याः (स्वनः) शब्दः (इव) (ते) तव सोमस्य (शुष्मासः) वेगाः (उदीरते) उद्गच्छन्ति । स त्वं (बाणस्य) इन्द्रशरस्य (पविम्) वज्रं (चोदय) प्रेरय वृष्टिं वर्षयेति भावः ॥ ऋग्वेदे ९ । ५० । १ ऽपि ॥ १ ॥

भाषार्थः—(सिन्धोः) समुद्र की (ऊर्मेः) लहरी के (स्वनः) शब्द (इव) से (ते) तेरे (शुष्मासः) वेग (उत्-ईरते) ऊपर को उठते हैं, सो तू (बाणस्य) वायु विशेष वृष्टिकारक इन्द्र के धनुष् में प्रयुक्त बाण तुल्य वेग के (पविम्) वज्र को (चोदय) प्रेरित कर अर्थात् वर्षा का प्रेरक हो ॥ ऋ० ९ । ५० । १ में भी ॥ १ ॥

अथ द्वितीया—

३ २ ३ १ २ ३ १२ २२ ३ १ २

प्रसवे त उदीरते तिस्रो वाचो मखस्युवः ।

२उ ३ २ ३ १ २

यदव्य एषि सानवि ॥ २ ॥ (१२०६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-प्रसवे ७। ते ६। उदीरते क्रि०। तिस्रः, वाचः १। मखस्युवः ६। यद् अ०। अव्ये ७। एषि क्रि०। सानवि ७॥

अन्वितपदार्थः-सोम ! (यद्) यदा (सानवि) सानुवदुच्छ्रिते (अव्ये) ऊर्णामये दशापवित्रे (एषि) गमनं करोषि तदा (मखस्युवः) यज्ञमिच्छोर्यजमानादेः (तिस्रः वाचः) ऋग्यजुःसामात्मिकाः (ते) तव (प्रसवे) अभिषवे विषये (उदीरते) उद्गच्छन्ति॥

अर्थात् सोमेभिषुते पवित्रमागते च सति याज्ञिकैर्वेदत्रयीतो यानि वचांसि सोमवर्णनयुतानि सन्ति तान्यध्येतव्यानि॥ ऋग्वेदे ९। ५०। २ऽपि॥ २॥

भाषार्थः-सोम ! (यद्) जब कि (सानवि) पर्वतशिखर की आकृति वाले उच्च (अव्ये) ऊनी दशापवित्र पर (एषि) तू जाता है तब (मखस्युवः) यज्ञार्थी यजमानादि की (ते) तेरे (प्रसवे) अभिषवविषयक (तिस्रोवाचः) ऋग्यजुः साम वेदों की वाणियें (उदीरते) उच्चारित होती हैं॥

अर्थात् जब सोम अभिषुत होकर दशापवित्र में रक्खा जावे तब यजमानादि याज्ञिकों को सोमाऽभिषवविषयक वेदमन्त्रों का उच्चारण करना होता है॥ ऋ० ९। ५०। २ में भी॥ २॥

अथ तृतीया-

२ ३ २३ १ २ ३१र २र ३ १ २

अव्या बारैः परिप्रियꣳ हरिꣳ हिन्वन्त्यद्रिभिः।

१ २ ३ १ २

पवमानं मधुश्चुतम्॥ ३॥ (१२०७)

पदपाठः-अव्याः ६। बारैः ३। परि अ०। प्रियम्, हरिम् २। हिन्वन्ति क्रि०। अद्रिभिः ३। पवमानम्, मधुश्चुतम् २॥

अन्वितपदार्थः-(प्रियं) देवानां प्रीतिकरं (हरिं) हरितवर्णं (मधुश्चुतं) मधुनो रसस्य च्यावयितारं (पव-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मानं) सोमम् (अव्याः) अवेः (वारैः) वालैः (अद्रिभिः) ग्रावभिश्च (परि-हिन्वन्ति) परितः प्रेरयन्ति ॥ ऋग्वेदे ९ । ५० । ३ ऽपि ॥ ३ ॥

भावार्थः-(प्रियम्) देवतों के प्रसन्न करने वाले (हरिम्) हरे (मधु-श्चुतम्) मधुर रस को टपकाने वाले (पवमानम्) सोम को (अव्याः) भेड़ के (वारैः) वालों से बने दशापवित्रों और (अद्रिभिः) पथरेटों से (परि-हिन्वन्ति) पीस छेत छान कर त्यार करते हैं॥ ऋ० ९ । ५० । ३ में भी ॥ ३ ॥

अथ चतुर्थी-

१ २ ३ २ ३ १ ३

आ पवस्व मदिन्तम पवित्रं धारया कवे ।

३ २ ३ १ २ ३ १ २

अर्कस्य योनिमासदम् ॥ ४ ॥ (१२०८)

पदपाठः-आ-पवस्व क्रि० । मदिन्तम सं० । पवित्रम् २ । धारया ३ । कवे सं० । अर्कस्य ६ । योनिम् २ । आसदम् क्रि० ॥

अन्वितपदार्थः-(मदिन्तम) हेमादयितृतम ! (कवे) क्रान्तकर्मन् ! सोम ! (अर्कस्य) सूर्यस्य (योनिं) स्थान-माकाशम् (आसदम्) प्राप्तुं (पवित्रम्) पवित्रमादित्य-किरणसमूहं (धारया) संपातेन (आ-पवस्व) पावय॥

हृष्टिपुष्टिकारकस्य क्रान्तकर्मणः सोमस्य होमेनाऽऽदित्यरश्मयः पवित्रस्वरूपाअपि पूयन्ते इति भावः ॥ ऋग्वेदे ९ । ५० । ४ ऽपि ॥ ४ ॥

भावार्थः-(मदिन्तम) हे हृष्टिकारकतम ! (कवे) क्रान्तकर्मन् ! सोम ! (अर्कस्य) सूर्य के (योनिम्) स्थान आकाश को (आसदम्) पहुंचने को (पवित्रम्) पवित्र किरणसमूह को (धारया) धारा से (आपवस्व) शोध ॥

हृष्टिपुष्टिकारक सोम के होम से पवित्र किरणें भी विशेष परिपूत होती हैं ॥ ऋ० ९ । ५० । ४ में भी ॥ ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ पञ्चमी—

१ २ ३ १ २ ३ २ ३ १ २
स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः ।
१ २ ३ १ २
एन्द्रस्य जठरं विश ॥ ५ ॥ (१२०९)

पदपाठः—सः १ । पवस्व क्रि० । मदिन्तम १ । गोभिः ३ । अञ्जानः १ । अक्तुभिः ३ । आ अ० । इन्द्रस्य ६ । जठरम् २ । विश क्रि० ॥

अन्वितपदार्थः—(मदिन्तम)मादयितृतमः (अक्तुभिः) गमनशीलैः (गोभिः) किरणैः (अञ्जानः) अज्यमानः (सः) सोमः (इन्द्रस्य) सूर्यस्य (जठरम्) उदरभूतमाकाशम् (आविश) आविशति (पवस्व) पावयति च ॥ ऋग्वेदे तु ९ । ५० । ५ इन्द्र इन्द्राय पीतये इति तृतीय पादपाठः ॥ ५ ॥

भाषार्थः—(मदिन्तम) अत्यन्त हृष्टिकारक, (अक्तुभिः) गमनशील किरणों से (अञ्जानः) सना हुवा (सोमः) सोम (इन्द्रस्य) सूर्य के (जठरम्) उदर=आकाश में (आविश) घुसता और (पवस्व) शुद्धि करता है ॥ ऋ० ९ । ५० । ५ का पाठभेद संस्कृतभाष्य में देखिये ॥ ५ ॥

इति नवमाध्यायस्य चतुर्थःखण्डः ॥ ४ ॥

—*—

अथ पञ्चमे खण्डे प्रथमसूक्तस्य तृचस्य—अमहीयुर्ऋषिः । सोमो देवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

३ २ ३ १ २ २ ३ १ २ ३ २ ३ २
अया वीती परिस्रव यस्त इन्दो मदेष्वा ।
३ १ २ ३ १ २ २
अवाहन्नवतीर्नव ॥ १ ॥ (१२१०) व्याख्याता (४९५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २

पुरः सद्य इत्थाधिये दिवोदासाय शंबरम् ।

२ ३ २ ३ २ ३ १ २

अध त्यं तुर्वशं यदुम् ॥ २ ॥ (१२११)

पदपाठः—पुरः २ । सद्यः अ० । इत्थाधिये ४ । दिवोदासाय ४ । शंबरम् २ । अध अ० । त्यम्, तुर्वशम्, यदुम् २ ॥

अन्वितपदार्थः—सोमरसः (सद्यः) शीघ्रम् (इत्थाधिये) सत्यकर्मणे (दिवोदासाय) यजमानाय सोमयाजिने तत्पायिने च (त्यं) तं (शंवरम्) सुखस्य वारयितारं, पवर्गमध्यपाठे शम्बस्य वज्रस्य दायकं प्रहर्त्तारम्, अथवा शंबरं मेघजलं (तुर्वशं) समीपस्थं (यदुम्) शत्रुं मनुष्यम् (अध) अथ च (पुरः) शत्रुपुराणि अवाहन्नितिपूर्वेणान्वयः ॥ इत्थेति सत्यनाम निघं० ३ । १०, धीरिति कर्मनाम निघं० २ । १, तुर्वशे इति अन्तिकनाम निघं० २ । १६, यदवः इति मनुष्यनाम निघं० २ । ३ ॥ ऋग्वेदे ९ । ६१ । २ ऽपि ॥ २ ॥

भाषार्थः—सोमरस (सद्यः) शीघ्र (इत्थाधिये) सत्यकर्मा (दिवोदासाय) सोमयाजी और सोमपायी यजमान के लिये (त्यम्) उस (शंवरम्) सुख शान्ति में विघ्नकारक, [शम्बरं पाठ हो तो वज्रपात करने वाले, वा जल] (तुर्वशम्) समीपस्थ (यदुम्) शत्रु पुरुष को (अध) और (पुरः) उस की पुरियों को "नष्ट करता है" यह पूर्व मन्त्र से अन्वय है ॥ निघण्टु ३ । १०, २ । १, २ । १६ और २ । ३ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ९ । ६१ । २ में भी ॥२॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३ १ २

परि नो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३२३१२
क्षरा सहस्रिणीरिषः ॥ ३ ॥ [६] (१२१२)

पदपाठः–परि अ० । नः ४ । अश्वम् २ । अश्ववित् सं० । गोमत् २ । इन्दो सं० । हिरण्यवत् २ । क्षर क्रि० । सहस्रिणीः, इषः २ ॥

अन्वितपदार्थः–(इन्दो) सोम ! (अश्ववित्) अश्वानां प्राणानां लम्भक ! त्वं (नः) अस्मभ्यम् (गोमत्) इन्द्रिययुक्तं (हिरण्यवत्) तेजोयुक्तं (अश्वम्) प्राणं तथा (सहस्रिणीः इषः) बहूनि अन्नानि (परिक्षर) अभिवर्षय ॥ ऋग्वेदे ९ । ६१ । ३ ऽपि ॥ ३ ॥

भाषार्थः–(इन्दो) सोम ! (अश्ववित्) प्राणों के लाभदायक ! तू (नः) हमारे लिये (गोमत्) इन्द्रियों से युक्त (हिरण्यवत्) तेज से युक्त (अश्वम्) प्राण को तथा (सहस्रिणीः इषः) बहुत से अन्नों को (परि क्षर) अभिवर्षित कर ॥ ऋ० ९ । ६१ । ३ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य–अमहीयुर्ऋषिः । सोमो देवता । गायत्रीछन्दः ॥

तत्र प्रथमा—

३ १२ ३ २ऽ ३ २ १ १ २
अपघ्नन्पवते मृधोऽप सोमोऽअराव्णः ।
२ ३ १ २ ३२
गच्छन्निन्द्रस्य निष्कृतम् ॥१॥ (१२१३) व्याख्याता (४९२)

अथ द्वितीया—

३ १ २ ३ १र २र३ १ २ ३ १र २र
महो नो राय आभर पवमान जहीमृधः ।
१ २ ३२३१२
रास्वेन्दो वीरवद्यशः ॥ २ ॥ (१२१४)

पदपाठः–महः २ । नः ४ । रायः २ । आभर क्रि० । पवमान सं० । जहि क्रि० । मृधः २ । रास्व क्रि० । इन्दो सं० । वीरवत्, यशः २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—हे (पवमान) सोम वा पवित्रस्वरूप परमात्मन्! (इन्दो) प्रकाशमान! (नः) अस्मभ्यं (महः) महान्ति (रायः) धनानि (आभर) आहृत्य देहि (मृधः) हिंसकाञ्छत्रूंश्च (जहि) मारय (वीरवत्) पुत्राद्युपेतं (यशः) च (रास्व) देहि ॥ ऋग्वेदे ९। ६१ २६ ऽपि ॥ २ ॥

भाषार्थः—(इन्दो) प्रकाशमान! (पवमान) पवित्रस्वरूप परमात्मन्! वा सोम! (नः) हमारे लिये (महः) महा (रायः) धनों को (आभर) लाकर दीजिये और (मृधः) शत्रुओं को (जहि) मारिये तथा (वीरवत्) पुत्रादि युक्त (यशः) यश (रास्व) दीजिये ॥ ऋ० ९। ६१। २६ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३२ ३२उ ३ २३ १ २ ३ १ २

न त्वा शतं चन हुतो राधो दित्सन्तमामिनन्।

१२३ १ २३ १ २

यत्पुनानो मखस्यसे ॥ ३ ॥ [७] (१२१५)

पदपाठः—न अ०। त्वा २। शतम् १। चन अ०। हुतः १। राधः २। दित्सन्तम् २। आमिनन् क्रि०। यत् अ०। पुनानः १। मखस्यसे क्रि०॥

अन्वितपदार्थः—हे सोम! वा परमात्मन्! (यत्) यदा (पुनानः) शुद्धस्वरूपस्त्वं (मखस्यसे) धनादि दातुमिच्छसि तदा (शतं चन) बहवोऽपि (हुतः) हरणशीलाः अस्मच्छत्रवः (राधोदित्सन्तं) धनं दातुमिच्छन्तम् (त्वा) त्वाम् (न आमिनन्) न हिंसितुं प्रभवन्ति ॥ ऋग्वेदे ९। ६१। २७ ऽपि ॥ ३ ॥

भाषार्थः—हे सोम! वा परमात्मन्! (यत्) जब कि (पुनानः) शुद्धस्वरूप तू (मखस्यसे) धन देना चाहता है तब (शतं चन) बहुत भी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(द्रुतः) हरणशील हमारे शत्रु (राधः दित्सन्तं त्वा) धनादि देना चाहते हुये तुझ को (न आमिनन्) नहीं मार सकते ॥ ऋ० ९ । ६१ । २७ में भी ॥ ३ ॥

अथ तृतीय सूक्तस्य—निध्रुविर्ऋषिः । सोमो देवता । गायत्रीछन्दः ॥

तत्र प्रथमा—

३ १ २३ १ २ ३ २३ २३१ २
अया पवस्व धारया यया सूर्यमरोचयः ।
३ १र २र ३२
हिन्वानो मानुषीरपः ॥ १ ॥ (१२१६) व्याख्याता (४९३)

अथ द्वितीया—

१ २३ २३ १२ ३१२ ३१र २र
अयुक्त सूर एतशं पवमानो मनावधि ।
३ १ २ ३ १ २
अन्तरिक्षेण यातवे ॥ २ ॥ (१२१७)

पदपाठः—अयुक्त क्रि० । सूरः १=६ । एतशम् २ । पवमानः १ । मनौ ७ । अधि अ० । अन्तरिक्षेण ३ । यातवे अ० ॥

अन्वितपदार्थः—(पवमानः) सोमश्चन्द्रः (अन्तरिक्षेण) आकाशमार्गेण (यातवे) प्रकाशितो भूत्वा गन्तुं (सूरः) सूर्यस्य (एतशम्) अश्वं किरणं (मनौ अधि) मनोऽधिकृत्य वर्त्तमाने स्वस्मिन् (अयुक्त) युङ्क्ते चन्द्रमा मनसो जात इति श्रुत्यन्तरोक्तेः । सूर्यरश्मिश्चन्द्रमा मनो गन्धर्व इत्यन्यत्रोक्तेश्च ॥ ऋग्वेदे ९ । ६३ । ८ ऽपि ॥ २ ॥

भाषार्थः—(पवमानः) सोम=चन्द्रमा (अन्तरिक्षेण) आकाशमार्ग से (यातवे) प्रकाशित हो कर जाने के लिये (सूरः) सूर्य के (एतशम्) किरण को (मनौ अधि) मन रूप आपे में (अयुक्त) युक्त करता है । चन्द्रमा का मानस होना तथा सूर्य से प्रकाश पाना संस्कृत भाष्यस्थ श्रुतियों में देखिये ॥ ऋ० ९ । ६३ । ८ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ २उ ३ २ ३ २ ३ १ २ ३ १ २

उत त्या हरितो रथे सूरो अयुक्त यातवे ।

२ ३ २ ३ १ २ ३ १

इन्दुरिन्द्र इति ब्रुवन् ॥ ३ ॥ [८] (१२१८)

पदपाठः–उत अ० । त्याः १=२ । हरितः २ । रथे ७ । सूरः १=६ । अयुक्त क्रि० । यातवे अ० । इन्दुः १ । इन्द्रः १ । इति अ० । ब्रुवन् १ ॥

अन्वितपदार्थः–(उत) अपि च (इन्दुः) सोमः (यातवे) प्रकाशितो भूत्वा गमनाय (इन्द्रः इति ब्रुवन्) सूर्योऽयं मयि प्रकाशते इति ब्रुवन्निव (त्याः) तान् (सूरः) सूर्यस्य (हरितः) किरणान् (रथे) स्वीये रमणीये मण्डले (अयुक्त) युनक्ति ॥ औपचारिकीयमुक्तिः ॥ ऋग्वेदे तु रथे=दश इति ९ । ६३ । ९ पाठः ॥ ३ ॥

भाषार्थः–(उत) और (इन्दुः) चन्द्रमा (यातवे) प्रकाशित होकर जाने के लिये (इन्द्रः) सूर्य मुझ में प्रकाशता है (इति) ऐसे (ब्रुवन्) मानो बोलता हुवा (त्याः) उन (सूरः हरितः) सूर्य की किरणों को (रथे) अपने रमणीय मण्डल में (अयुक्त) जोड़ता है ॥ ऋ० ९ । ६३ । ९ का पाठभेद और उपचारोक्ति संस्कृतभाष्य में देखिये ॥ ३ ॥

इति नवमाध्यायस्य पञ्चम खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे प्रथम तृचस्य–वसिष्ठ ऋषिः । अग्निर्देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

अग्निं वो देवमग्निभिः सजोषा, यजिष्ठं दूतमध्वरे कृणुध्वम् ।

१२ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २

यो मर्त्येषु निध्रुविर्ऋतावा, तपुर्मूर्धा घृतान्नः पावकः ॥ १ ॥ (१२१९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अग्निम् २ । वः ६ । देवम् २ । अग्निभिः ३ । सजोषाः १ । यजिष्ठम्, दूतम् २ । अध्वरे ७ । कृणुध्वम् क्रि० । यः १ । मर्त्येषु ७ । निध्रुविः, ऋतावा, तपुः, मूर्धा, घृतान्नः, पावकः १ ॥

अन्वितपदार्थः—(सजोषाः) हे समानसेविनो याज्ञिकाः ! (यः) (मर्त्येषु) मनुष्येषु (निध्रुविः) नितरां ध्रुवस्स्थिरोस्ति, यश्च (ऋतावा) सत्यवान्यज्ञवान्वा, (तपुः) तापकः, (मूर्धा) ऊर्ध्वगमनशीलः, (घृतान्नः) घृतमन्नमस्य सः, (पावकः) शोधकोस्ति तम् (देवम्) द्योतमानम् (अग्निम्) (अग्निभिः) अङ्गारैः (वः) युष्माकम् (अध्वरे) हिंसारहितेऽध्वरे यज्ञे (यजिष्ठम्) यजनीयतमं (दूतं कृणुध्वम्) दूतकर्मणि नियोजयत येन तत्तद्देवोद्दिष्टं हविः प्रापयेत् ॥ ऋग्वेदे ७ । ३ । १ ऽपि ॥१॥

भाषार्थः—(सजोषाः) हे समानप्रीतिसेवायुक्त याज्ञिको ! तुम (यः) जो (मर्त्येषु) मनुष्यों में (निध्रुविः) निरन्तर स्थिर, (ऋतावा) सत्य और यज्ञवाला, (तपुः) तापयुक्त तपानेवाला, (मूर्धा) सदा ऊपर को लपट रखनेवाला, (घृतान्नः) घी खानेवाला, (पावकः) शुद्धि करनेवाला है, उस (देवम्) प्रकाशमान, (यजिष्ठम्) यजनीयतम (अग्निम्) अग्नि को (अग्निभिः) अङ्गारों से (वः) तुम अपने (अध्वरे) हिंसारहित यज्ञ में (दूतम्) दूत (कृणुध्वम्) बनाओ जिस से उस २ देवता के उद्देशका हव्य पहुंचावे ॥ ऋ० ७ । ३ । १ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ २ ३ १ २ २ ३ २ ३ २ ३ १ २ ३ १ २ १ २ ३

प्रोथदश्वो न यवसेविष्यन्, यदामहः संवरणाद्व्यस्थात् । आदस्य

२ ३ १ २ ३ १ २ १ २ ३ १ २ ३ १ २

वातो अनुवाति शोचि, रध स्म ते व्रजनं कृष्णमस्ति॥२॥(१२२०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-प्रोथत् १ । अश्वः १ । न अ० । यवसे ४ । अविष्यन् १ । यदा अ० । महः ५ । संवरणात् ५ । वि-अस्थात् क्रि० । आत् अ० । अस्य ६ । वातः १ । अनु अ० । वाति क्रि० । शोचिः २ । अध, स्म अ० । ते ६ । व्रजनम्, कृष्णम् १ । अस्ति क्रि० ॥

अन्वितपदार्थः-पूर्वमन्त्रेऽग्नेः सर्वदेवदूतत्वमुक्तम् । तत्रैकदेशे यज्ञवेद्यां स्थितस्याऽग्नेर्दूरदेशस्थदेवोद्दिष्टहव्यप्रापणेऽपि सामर्थ्यमाह-(यदा) यस्मिन्काले (महः) महतः (संवरणात्) संवृतकाष्ठपुञ्जात् (यवसेऽविष्यन् प्रोथत् अश्वोन) यवसं भक्षयिष्यत् हिंकुर्वन् तुरग इव (व्यऽस्थात्) वितिष्ठते (आत् स्म) अनन्तरमेव (अस्य) अग्नेः (शोचिः) ज्वालाम् (अनु) ज्वालया सह (वातः) वायुः (वाति) प्रचलति (अध) तथा (ते) तस्याग्नेः (व्रजनं) गमनं (कृष्णम्) श्यामवर्णम् (अस्ति) भवति ॥

अग्नेर्ज्वालाभिः सह प्रचलितस्य वायोः साहाय्येन दूरस्थदेवभागप्रापणमपि सुकरमिति भावः ॥ ऋग्वेदे ७ । ३ । २ ऽपि ॥ २ ॥

भाषार्थः-पूर्व मन्त्र में अग्नि को सब देवों का दूत कहा था, उस में यह बताने को कि एकदेश यज्ञवेदि में ही स्थित अग्नि, दूर देशस्थ देवों कोभी हव्य भाग पहुंचा सकता है, यह मन्त्र कहता है कि (यदा) जब (यवसे) घास को (अविष्यन्) खाने को तयार (प्रोथत्) हींसते हुवे (अश्वः) घोड़े के (न) समान, (महः) भारी (संवरणात्) रुकावट [काष्ठ के ढेर] से (व्यऽस्थात्) निकलता हुवा स्थित होता है (आत् स्म) तब ही (अस्य) इस अग्नि की (शोचिः) लपट के (अनु) साथ (वातः) वायु (वाति) चल पड़ता है (अध) और (ते) उस अग्नि की (व्रजनम्) चाल (कृष्णम्) काली (अस्ति) है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाव यह है कि अग्नि की लपट के साथ वायु चल पड़ने से अग्नि को वायु की सहायता प्राप्त हो जाती है जिस से वह दूरस्थ देवभाग भी पहुंचासकता है॥ ऋ० ७। ३। २ में भी॥ २॥

अथ तृतीया-

१ २२ ३ १ २ ३ २उ ३ १२ ३ १ २ ३ २

उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः।

२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २

अच्छाद्यामरुषो धूमएषि सन्दूतो अग्न ईयसे हि देवान्॥

॥ ३ ॥ [१] (१२२१)

पदपाठः-उत् अ०। यस्य, ते, नवजातस्य, वृष्णः ६। अग्ने सं०। चरन्ति क्रि०। अजराः, इधानाः १। अच्छ अ०। द्याम् २। अरुषः, धूमः १। एषि क्रि०। सम् अ०। दूतः १। अग्ने सं०। ईयसे क्रि०। हि अ०। देवान् २॥

अन्वितपदार्थः-पूर्वोक्तस्य अग्नेः सहायस्य वातस्य प्रचलनानन्तरं किं कथं भवतीत्याह-(अग्ने) पावक! (वृष्णः) वृष्टिकरस्य (नवजातस्य) अरण्योर्नूतनोत्पन्नस्य (यस्य) पूर्वोक्तस्य प्राप्तवायुसाहाय्यस्य (ते) तव (अजराः) जरारहिताः (इधानाः) दीप्ताज्वालाः (उत् चरन्ति) उद्गच्छन्ति (अग्ने) हे अग्ने! स त्वम् (अरुषः) आरोचमानः (धूमः) धूमयुक्तः (दूतः) देवदूतः (द्याम्) दिवमाकाशम् (अच्छ) प्रति (एषि) गच्छसि (हि) ततोहि (देवान्) सूर्यादिकान् (सम् ईयसे) मिलसि॥ ऋग्वेदे तु ७। ३। ३ एषि=एति इति पाठभेदः॥ ३॥

भावार्थः-अग्नि की सहायता को साथ ही वायु चल पड़ता है, यह तो पूर्व मन्त्र में कहा परन्तु अब यह बताते हैं कि वायु की सहायता पाकर भी अग्नि दूत, दूरस्थ देवों को किस प्रकार भाग पहुंचाता है-(अग्ने) हे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्ने (वृष्णः) वृष्टि के हेतु (नवजातस्य) अरणियों में नवोत्पन्न (यस्य) जिस वायु से सहायता पाये हुवे की (ते) तेरी (अजराः) बूढी नहीं किन्तु जवान (इधानाः) प्रदीप्त लपटें (उत्) ऊपर को (चरन्ति) चलती हैं (अग्ने) हे अग्ने ! तब तू (अरुषः) प्रकाशमान और (धूमः) यज्ञधूमयुक्त हुआ (दूतः) देवदूत (द्याम्) आकाश की (अच्छ) ओर (एषि) जाता है (हि) इस कारण (देवान्) सूर्यादि दूरस्थित देवों से (सम्-ईयसे) मिल जाता है ॥ ऋ० ७ । ३ । ३ में भी ॥ ३ ॥

अथ मैत्रावरुणसाज्यम् तद्विषये—

तमिन्द्रमिति तृचस्य द्वितीयसूक्तस्य–सुकक्षऋषिः । इन्द्रोदेवता । गायत्रीछन्दः॥

तत्र प्रथमा—

१र २र ३ २ ३ २ ३ १ २
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
१ २र ३ १ २
स वृषा वृषभो भुवत् ॥ १॥ (१२२२) व्याख्याता (११९)

अथ द्वितीया–

२ ३ १र २र ३१र २र ३ १र २र ३ २
इन्द्रः स दामने कृत ओजिष्ठः स बलेहितः ।
३ २ ३ २उ ३ २
द्युम्नी श्लोकी स सोम्यः ॥ २ ॥ (१२२३)

पदपाठः—इन्द्रः, सः १ । दामने ४ । कृतः, ओजिष्ठः, सः १ । बले ७ । हितः, द्युम्नी, श्लोकी, सः, सोम्यः १ ॥

अन्वितपदार्थः–(सः) पूर्वोक्तः (इन्द्रः) (दामने) अन्नधनादिदानाय (कृतः) परमेश्वरेण रचितः (ओजिष्ठः) बलवत्तमः (सः) इन्द्रः (बले) बलवति सोमे (हितः) प्रजापतिना निहितः (सः) इन्द्रः (द्युम्नी) अन्नवान् (श्लोकी) अतएव यशस्वी (सोम्यः) सोममर्हति यः (पा० ४ । ४ । १३७) ॥ ऋग्वेदे ८ । ९३ । ८ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः- (सः) वह (इन्द्रः) वृष्टिकर्त्ता (दासने) अन्नधनादि देने के लिये (कृतः) परमेश्वर ने बनाया है (ओजिष्ठः) वह अतिबलयुक्त है (सः) वह (बले) बलवान् सोम में (हितः) रक्खा गया है (द्युम्नी) अन्नशाला (श्लोकी) इसी से कीर्त्तिवाला (सः) वह (सोम्यः) सोमाहुति के योग्य है ॥ ऋ० ८ । ९३ । ८ में भी ॥ २ ॥

अथ तृतीया-

१ २उ ३ १र २र३ १ २ ३ १२
गिरा वज्रो न संभृतः सबलो अनपच्युतः ।
३ २ ३१र २र
ववक्ष उग्रो अस्तृतः ॥ ३ ॥ [१०] (१२२४)

पदपाठः-गिरा ३ । वज्रः १ । न अ० । संभृतः, सबलः, अनपच्युतः १ । ववक्षे क्रि० । उग्रः, अस्तृतः १ ॥

अन्वितपदार्थः-(वज्रः न) वज्रइव (सबलः) बलयुक्तः (अनपच्युतः) अशिथिलः (उग्रः) तीव्रः (अस्तृतः) अहिंसित इन्द्रः (ववक्षे) वोढुमिच्छति वृष्टिजलादिकमस्मभ्यम् अतएव (गिरा) ऋचा वेदद्वारा यज्ञे (संभृतः) परमात्मना धारितो धारयितश्चास्ति ॥

वायुविशेषस्येन्द्रस्य जडत्वेपि वोढुमिच्छोक्तिर्भित्तिः पिपतिषति इतीवौपचारिकी वेदितव्या ॥ ऋग्वेदे तु ८ । ९३ । ९ उग्रः=ऋष्व इति पाठः ॥ ३ ॥

भाषार्थः-(वज्रः) वज्र (न) सा (सबलः) बलयुक्त (अनपच्युतः) शिथिलतारहित (उग्रः) तीव्रः (अस्तृतः) न मारा हुवा इन्द्र (ववक्षे) हमारे लिये जलादि का वहन करना चाहता है । इसलिये (गिरा) वेद वाणी द्वारा (संभृतः) परमात्मा ने धारण किया और कराया है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वायुविशेष इन्द्र के जड़ होने पर भी "वहन करने की इच्छा" कहना ऐसा ही औपचारिक है जैसा कि "दीवार वा भित्ति गिरना चाहती है" इत्यादि में ॥ ऋ० ८ । ९३ । ९ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

इति नवमाऽध्यायस्य षष्ठः खण्डः ॥ ६ ॥

उक्तान्याज्यानि

इदानीं माध्यन्दिवः पवमान इति विव०

अथ सप्तमे खण्डे प्रथमतृचस्य-उचथ्य ऋषिः। पवमानः सोमो देवता । १ । २ गायत्री, ३ निचृद्गायत्री च छन्दः । तत्र प्रथमा-

१ २ ३ १ २ ३१२ ३२ ३ २ ३ १ २

अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आनय ।

३ १ २ ३ १ २

पुनाहीन्द्राय पातवे ॥ १ ॥ (१२२५) व्याख्याता (४९१)

अथ द्वितीया-

२ ३ १ २ ३ १ २ ३२उ कर ३२

तव त्य इन्दो अन्धसो देवा मधोव्यांशत ।

१ २ ३ १ २

पवमानस्य मरुतः ॥ २ ॥ (१२२६)

पदपाठः-तव ६ । त्ये १ । इन्दो सं० । अन्धसः ६ । देवाः १ । मधोः ६ । व्याशत क्रि० । पवमानस्य, मरुतः १ ॥

अन्वितपदार्थः-(इन्दो) सोम ! (पवमानस्य) शुद्धस्य शोधकस्य च (मधोः) मधुरस्य (अन्धसः) अन्नस्य (तव) सोमस्य (त्ये) ते (मरुतः) वायवस्तत्स्था अन्ये च (देवाः) (व्याशत) विविधमऽशनं कुर्वन्ति ॥ ऋग्वेदे तु ९ । ५१ । ३ व्यश्नते इति पाठभेदः ॥ २ ॥

भाषार्थः-(इन्दो) हे सोम ! (पवमानस्य) स्वयं शुद्ध और अन्यों के शोधक तथा (मधोः) मधुर (अन्धसः) अन्न का (तव) तेरा (त्ये) वे (मरुतः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वायु और तत्रस्थ अन्य (देवाः) देवता (व्याशत) विविध भोजन करते हैं ॥ ऋ० ९ । ५१ । ३ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया–

३ २ ३ १ २ ३ २ उ ३ १ २ ३ १ २

दिवः पीयूषमुत्तमꣳ सोममिन्द्राय वज्रिणे ।

३ २ ३ १ २

सुनोता मधुमत्तमम् ॥ ३ ॥ [११] (१२२७)

पदपाठः–दिवः ६ । पीयूषम्, उत्तमम्, सोमम् २ । इन्द्राय, वज्रिणे ४ । सुनोत क्रि० । मधुमत्तमम् २ ॥

अन्वितपदार्थः–हे अध्वर्यवः ! यूयं (मधुत्तमम्) अतिशयितमाधुर्योपेतम् (दिवः पीयूषम्) द्युलोकस्य अमृतभूतम् (उत्तमं) श्रेष्ठं (सोमं) सोमरसं (वज्रिणे) वज्रवते विद्युद्वते (इन्द्राय) वृष्टिकर्त्रे वायुविशेषाय (सुनोत) अभिषुणुत ॥ ऋग्वेदे ९ । ५१ । २ ऽपि ॥ ३ ॥

भाषार्थः—हे अध्वर्युलोगो ! तुम (मधुमत्तमम्) अति मधुर (दिवः) आकाश के (पीयूषम्) अमृत (उत्तमम्) उत्तम (सोमम्) सोम रस को (वज्रिणे) बिजुली वाले (इन्द्राय) मेघवर्षक वायुविशेष के लिये (सुनोत) अभिषुत करो ॥ ऋ० ९ । ५१ । २ में भी ॥ ३ ॥

अथ धर्त्तादिव इति द्वितीयतृचस्य–कविर्ऋषिः । पवमानः सोमो देवता । त्रिष्टुप्, विराड् जगती, निचृज्जगती चेति तिसृणां क्रमेण छन्दांसि ॥

तत्र प्रथमा–

३ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २

धर्त्ता दिवः पवते कृत्व्योरसो, दक्षो देवानामनुमाद्योनृभिः

१ २ ३ २ उ ३ १ र २ र ३ २ ३ १ २

हरिः सृजानो अत्यो न सत्वभि, र्वृथा पाजाꣳ सि कृणुषे

३ २

नदीष्वा ॥ १ ॥ (१२२८) व्याख्याता (५५८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३ १ २ ३ १ २ ३ १ २ ३ २ १ २ ३ १
शूरो न धत्त आयुधा गभस्त्योः स्वाःऽ३ सिषासन्नाथिरो
२र १ २ ३ १ २ ३१२ ३ २ ३ १ २ ३ १ २
गविष्टिषु। इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुाहन्वानो अज्यते
३ १ २
मनीषिभिः ॥ २ ॥ (१२२९)

पदपाठः-शूरः १। न अ०। धत्ते क्रि०। आयुधा २। गभस्त्योः ७। स्वः अ०। सिषासन्, रथिरः १। गविष्टिषु ७। इन्द्रस्य ६। शुष्मम् २। ईरयन् १। अपस्युभिः ३। इन्दुः, हिन्वानः १। अज्यते क्रि०। मनीषिभिः ३॥

अन्वितपदार्थः-(अपस्युभिः) कर्मकाण्डेच्छुभिः (मनीषिभिः) मेधाविभिर्ऋत्विभिः (हिन्वानः) हूयमानः (इन्दुः) सोमः (इन्द्रस्य) (शुष्मम्) बलम् (ईरयन्) प्रेरयन् वर्धयन्सन् (अज्यते) किरणैः संपृक्तो भवति। दृष्टान्तः-(न) यथा (रथिरः) रथी (शूरः) योद्धा (स्वः) स्वाधीनतां सुखं (सिषासन्) संभक्तुमिच्छन् (गभस्त्योः) हस्तयोः (आयुधा) आयुधानि असि-परशु-पाशादीनि (धत्ते), तद्वत्सोमोऽपि (गविष्टिषु) गवां सूर्यकिरणानामिष्टिषु इन्द्रं सज्जितं करोति ॥ ऋग्वेदे ९। ७६। २ ऽपि॥२॥

भाषार्थः-(अपस्युभिः) कर्मकाण्डार्थी (मनीषिभिः) बुद्धिमान् ऋत्विजों से (हिन्वानः) हवन किया हुवा (इन्दुः) सोम (इन्द्रस्य) वृष्टिकारक वायु विशेष के (शुष्मम्) बल को (ईरयन्) प्रेरता बढ़ाता हुवा (अज्यते) सूर्य किरणों से मिलता है। दृष्टान्त-(न) जैसे (रथिरः) रथी (शूरः) शूरवीर योद्धा (स्वः) स्वाधीनतारूप सुख को (सिषासन्) बांटना चाहता हुवा (गभस्त्योः) दोनों हाथों में (आयुधा) खड्ग, चर्म, परशु, पाश इत्यादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्त्र शस्त्रों को (धत्ते) धारण करके तैयार होता है। ऐसे ही (गविष्टिषु) सूर्य किरणों के यज्ञों में सोम इन्द्र को तैयार करता है॥ ऋ० ९। ७६। २। में भी॥२॥

अथ तृतीया—

१ २ ३ १२ ३ १ २ ३ १ २ ३ २ ३ १ २
इन्द्रस्य सोम पवमान ऊर्मिणा, तविष्यमाणो जठरेष्वाविश ।
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
प्र नः पिन्व विद्युदभ्रेव रोदसी;धिया नो वाजाँ उपमाहि शश्वतः॥

॥ ३ ॥ [१२] (१२३०)

पदपाठः—इन्द्रस्य ६। सोम, पवमान सं०। ऊर्मिणा ३। तविष्यमाणः १। जठरेषु ७। आ—विश क्रि०। प्र अ०। नः २। पिन्व क्रि०। विद्युत् १। अभ्रा २। इव अ०। रोदसी २। धिया ३। नः ४। वाजान् २। उप—माहि क्रि०। शश्वतः २॥

अन्वितपदार्थः—हे (पवमान) पूयमान ! (सोम) ओषधिराज ! (तविष्यमाणः) वर्धिष्यमाणस्त्वम् (इन्द्रस्य) वायुविशेषस्य (जठरेषु) उदरेषु—[नह्येकस्य देहधारिण इन्द्रस्य जठराणां बहुत्वं संभवति, नापि श्रूयते, ऽत्र च जठरेषु इति बहुत्वं प्रयुक्तं ततोऽपीन्द्रस्य वायुभेदत्वमेव ज्ञायते निरुक्तकारमतानुसारि, वायुविशेषस्य च बहुदेश-व्यापित्वात् बहुवचनोक्तिः सङ्गच्छते] (ऊर्मिणा) लहर्या (आविश) प्रविश। दृष्टान्तः—(इव) यथा (विद्युत्) सौदामिनी (अभ्रा) अभ्राणि प्रविशति तद्वत् । ततश्च (रोदसी) द्यावापृथिव्यौ (प्र—पिन्व) धुक्ष्व। ततः (धिया) यज्ञेन कर्मणा (नः) अस्मभ्यम् (शश्वतः) बहून् (वाजान्) अन्नबलादिपदार्थान् (उपमाहि) समीपे निर्माहि प्राप

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

येत्यर्थः ॥ ऋग्वेदे तु ९ । ७६ । ३ माहि=मासि, इति नः=न, इति च पाठौ ॥ ३ ॥

भाषार्थः-हे (पवमान) शोध्यमान ! (सोम) सोम ! तू (तविष्यमाणः) वृद्धि को प्राप्त होवेगा सो (इन्द्रस्य) वायुविशेष इन्द्र के (जठरेषु) पेटों में (ऊर्मिणा) लहरी द्वारा (आविश) प्रवेश कर (इव) जैसे कि (विद्युत्) बिजुली (अभ्रा) बादलों में प्रवेश करती है और (रोदसी) द्युलोक और पृथिवी लोक को (प्र-पिन्व) दुह अर्थात् वृष्टि तथा खेती को सम्पन्न कर और (धिया) यज्ञ कर्म से (नः) हमारे लिये (शश्वतः) बहुत (वाजान्) अन्न, धन, बल आदि पदार्थों को (उप-माहि) प्राप्त करा ॥ यदि इन्द्र कोई देहधारी विशेष विवक्षित होता तो १ इन्द्र का १ ही जठर=पेट होता, यहां "जठरेषु" इस बहुवचन से स्पष्ट होता है कि आकाश प्रदेश जिस में से वर्षा होती है बहुत है, और इसलिये उसको इन्द्र का जठर=उदर मान कर बहुवचन प्रयुक्त किया है ॥ ऋ० ९ । ७६ । ३ के पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

उक्तो माध्यन्दिनः पवमानः । इदानीं पृष्ठान्युच्यन्ते इति वि० ॥

अथ

प्रगाथस्य द्वितीयसूक्तस्य-देवातिथिः काण्व ऋषिः । इन्द्रो देवता । क्रमेण भुरिगनुष्टुप्, निचृत्पङ्क्तिश्च छन्दः ॥ तत्र प्रथमा—

१ २ ३ २उ ३ २ ३क २र ३ २ ३ १ २
यदिन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः ।
१ २ ३१र २र ३ २ ३ १ ३ १ २
सिमा पुरूनृषूतो अस्यानवेसि प्रशर्धतुर्वशे ॥
॥ १ ॥ (११२३१) व्याख्याता (२७१)

अथ द्वितीया-

२ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
यद्वा रुमे रुशमे श्यावके कृपे इन्द्र मादयसे सचा ।
१ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २
कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रायच्छन्त्यागहि ॥
॥ २ ॥ [१३] (१२३२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—यद्वा अ० । रुमे, रुशमे, श्यावके, कृपे ७ । इन्द्र सं० । सादयसे क्रि० । सचा अ० । कण्वासः १ । त्वा २ । स्तोमेभिः ३ । ब्रह्मवाहसः १ । इन्द्र सं० । आयच्छन्ति, आगहि क्रि० ॥

अन्वितपदार्थः—(इन्द्र) हे परमेश्वर ! (यद्वा) यद्यपि त्वं (रुमे) रमणीये देशे, (रुशमे) हिंसके, (श्यावके) अन्धकारयुक्ते, (कृपे) समर्थे च (सचा) सहैव एकरसत्वेन सर्वत्र (सादयसे) स्वेनाऽऽनन्दस्वरूपेण वर्त्तसे [तथापि] (ब्रह्मवाहसः) वेदवाहकाः (कण्वासः) मेधाविनः (त्वा) त्वाम् (स्तोमेभिः) वैदिकैः स्तुतिमन्त्रैः (आयच्छन्ति)अन्वेषितं कुर्वन्ति यदा, तदा त्वम् (आगहि) प्राप्नोषि ॥ कण्व इति मेधाविनाम निघं० ३ । १५ । ७ ऋग्वेदे ८ । ४ । २ऽपि ॥ २ ॥

भाषार्थः—(इन्द्र) हे परमेश्वर ! (यद्वा) यद्यपि आप (रुमे) क्या रमणीय देश और क्या (रुशमे) हिंसकदुष्ट, तथा क्या (श्यावके) अन्धियारे और (कृपे) क्या समर्थ, (सचा) सर्वत्र एक साथ ही एकरस (सादयसे) अपने आनन्दस्वरूप से वर्त्तमान हैं । तथापि (ब्रह्मवाहसः) वेदवाहक (कण्वासः) मेधा=धारणावती बुद्धि वाले लोग जब (त्वा) आप को (स्तोमेभिः) वैदिक स्तुतिमन्त्रों से (आयच्छन्ति) ढूंढते हैं, तब (आगहि) आप प्राप्त होते हैं ॥ निघण्टु २ । १५ । ७ का प्रमाण संस्कृतभाष्य में देखिये । ऋ० ८ । ४ । २ में भी ॥ २ ॥

अथ अच्छावाकं साम—इति विव०

चतुर्थप्रगाथसूक्तस्य—भर्गः प्रागाथ ऋषिः । इन्द्रो देवता । निचृद् बृहती पङ्क्तिश्चेति क्रमेण छन्दसी ॥ तत्र प्रथमा—

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २र ३ १ २

उभयꣳ शृणवच्च न इन्द्रो अर्वागिदं वचः । सत्राच्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ १ २ ३ १ २ २ ३ १ २
मघवान्त्सोमपीतये धिया शविष्ठ आगमत् ॥१॥ (१२३३)

व्याख्याता (२९०)

अथ द्वितीया–

२ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २ ३ २ ३ १ २
तं हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः। उतोपमानां
३ १ २ २ ३ १ २ ३ २ ३ १ २
प्रथमो निषीदसि सोमकामꣳ हि ते मनः॥२॥[१४] (१२३४)

पदपाठः–तम् २। हि अ०। स्वराजम्, वृषभम्, तम् २। ओजसा ३। धिषणे १। निष्टतक्षतुः क्रि०। उत अ०। उपमानाम् ६। प्रथमः १। निषीदसि क्रि०। सोमकामम् १। हि अ०। ते ६। मनः १॥

अन्वितपदार्थः–हे इन्द्र ! परमेश्वर ! इति पूर्वस्मान्मन्त्रादनुवर्त्तते। (धिषणे) द्यावापृथिव्यौ [तत्रस्थ प्राण्यभिप्रायतः] (तं स्वराजम्) पूर्वोक्तस्वाराज्यवन्तम्(तं वृषभम्) पूर्वोक्तकामवर्षकं त्वाम् (ओजसा) आत्मिकेन बलेन परमपुरुषार्थेन (निष्टतक्षतुः) सञ्जरतः प्राप्नुतः। कुतः? (हि) यस्मात् (ते मनः) त्वदीयं ज्ञानम्(सोमकामम्) हृद्गतसौम्यभावस्य जिघृक्षु वर्त्तते तस्मात्। (उत) तथा च त्वम् (उपमानाम्) उपमानभूतानामाकाशादीनां देवानां मध्ये (प्रथमः) सर्वोत्कृष्टोमुख्योऽतिसूक्ष्मः (निषीदसि) निरन्तरं तिष्ठसि सर्वत्र व्यापकत्वेन ॥ ऋग्वेदे तु ८। ६१। २ ओजस इति पाठः ॥ २ ॥

भाषार्थः–पूर्व मन्त्र से अनुवृत्ति करके हे इन्द्र ! परमेश्वर ! (तम्) पूर्वोक्त (स्वराजम्) स्वयंराजमान (तम्) उस (वृषभम्) कामवर्षक आप को (धिषणे) द्युलोक और पृथिवी लोक के निवासी (ओजसा) परमपुरुषार्थ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आत्मिकबल से (निष्टतक्षतुः) ढूंढ पाते हैं (हि) क्योंकि (ते) आप का (मनः) ज्ञान (सोमकामम्) हृद्गतसौम्यभाव को चाहता है (उत) और आप (उपमानाम्) आकाशादि उपमाओं में (प्रयसः) मुख्य अर्थात् अत्यन्त सूक्ष्म हैं (निषीदसि) और व्यापक होने से निरन्तर सर्वत्र वर्त्तमान हैं ॥ ऋ० ८ । ६१ । २ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

इति नवमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

उक्तानि पृष्ठानि इति विवरणकारः

अथाऽष्टमे खण्डे प्रथमतृचस्य-निभ्रुविः काश्यप ऋषिः । पवमानः सोमो देवता । आद्ययोर्निचृद् गायत्री, अन्त्याया गायत्री च छन्दः ॥ तत्र प्रथमा-

१२ ३१ २ ३१र २र ३ १२
पवस्व देवआयुषगिन्द्रं गच्छतु ते मदः ।
३१र २र ३१२
वायुमारोहधर्मणा ॥ १ ॥ (१२३५) व्याख्याता (४८३)

अथ द्वितीया-

१२ ३ १ २ ३१ २ ३१ २
पवमान नितोशसे रयिꣳ सोम श्रवाय्यम् ।
१ २ ३१र २र
इन्दो समुद्रमाविश ॥ २ ॥ (१२३६)

पदपाठः-पवमान सं० । नितोशसे क्रि० । रयिम् २ । सोम सं० । श्रवाय्यम् २ । इन्दो सं० । समुद्रम् २ । आविश क्रि० ॥

अन्वितपदार्थः-(पवमान) पावक ! (इन्दो) आर्द्र ! (सोम) ओषधिराज ! (नितोशसे) हंसि वृत्रं मेघं वर्षयसीत्यर्थः । स त्वं (श्रवाय्यम्) श्रवणीयं प्रशस्तम् (रयिम्) धनं धनधान्यप्रदं (समुद्रम्) आकाशं मेघमण्डलम् (आविश) प्रविश ॥ ऋग्वेदे तु ९ । ६३ । २३ इन्दो=प्रिय इति पाठे भेदः ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(पवमान) शुद्धिकारक ! (इन्दो) आर्द्र ! (सोम) ओषधि राज ! (नितोशसे) वृत्र=मेघ को मारता=वर्षाता है, सो तू (अवाय्यम्) अवणीय प्रशस्त (रयिम्) धनधान्यप्रद (समुद्रम्) आकाश में (आविश) घुस ॥ ऋ० ९ । ६३ । २३ के पाठ का भेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया-

३ १ २ ३ १ २

अपघ्नन् पवसे मृधः० ॥३॥ [१५] (१२३७) व्याख्याता (४९२)

अथ तृतीयतृचस्य-अम्बरीषऋजिष्वा च ऋषी । पवमानः सोमो देवता। १ । २ अनुष्टुप्, ३ निचृदनुष्टुप् च छन्दसी ॥ तत्र प्रथमा-

३ १ २ ३ १ २

अभी नो ऋजसातिमम्० ॥१॥ (१२३८) व्याख्याता (५४९)

अथ द्वितीया-

३ १ २ ३ १र २र ३ १ २ ३ १ ३ १ २र

वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः । नि नेदिष्ठ-

३ १र २र ३ १ २

तमा इषः स्याम सुम्ने ते अद्रिगो ॥२॥ (१२३९)

पदपाठः-वयम् १ । ते, अस्य, राधसः, वसोः ६ । वसो सं० । पुरुस्पृहः ६ । नि अ० । नेदिष्ठतमाः १ । इषः ६ । स्याम क्रि० । सुम्ने ७ । ते ६ । अद्रिगो सं०॥

अन्वितपदार्थः-(अद्रिगो) अचल ! (वसो) सर्वस्य वासहेतुभूत ! परमेश्वर ! (ते) त्वदीये (सुम्ने) सुखे मोक्षानन्दे (वयम्) भवद्भक्ताः (नि) निरन्तरं (नेदिष्ठतमाः) अत्यन्तं समीपे वर्त्तमानाः (स्याम) भवेम । तथा (ते) त्वदीयस्य (अस्य) ऐहिकस्य सांसारिकस्य (राधसः) धनस्य, तथा (पुरुस्पृहः) बहुभिः स्पृहणीयस्य (वसोः) वासहेतोः (इषः) अन्नस्य च नेदिष्ठतमाः स्याम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राधइति धन नाम निघं० २ । १० इषमित्यन्ननाम निघं० २ । ७ सुम्नमिति सुखनाम निघं० ३ । ६ अध्रिगुरित्यचलनाम निरु० ५ । ११ " अधृतगमनकर्मवत् " इति । ऋग्वेदे तु ९ । ९८ । ५ वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः । निनेदिष्ठतमा इषः स्याम सुम्नस्याऽध्रिगो इति महता पदानां क्रमस्य च व्यत्ययेन पाठः ॥ २ ॥

भाषार्थः—(अध्रिगो) हे अचल ! (वसो) सब के निवास हेतो ! परमेश्वर ! (ते) तेरे (सुम्ने) सुख=मोक्षानन्द में (वयम्) हम तेरे सेवक (नि) निरन्तर (नेदिष्ठतमाः) अत्यन्त समीप रहने वाले (स्याम) हों तथा (ते) तेरे (अस्य) इस ऐहिक सुख, (राधसः) धन, और (पुरुस्पृहः, वसोः) बहुतों के चाहे हुवे निवास के हेतु (इषः) अन्न के भी समीप रहने वाले होवें ॥

तात्पर्य यह है कि हे परमेश्वर ! ऐसी कृपा हो कि जब तक हम जीवें तब तक धनसंपत्ति धान्य आदि ऐहिक सुख साधन पास रहें और अन्त में मोक्ष के आनन्दभागी हों ॥

निघण्टु २ । १०, २ । ७, ३ । ६ निरुक्त ५ । ११ के प्रमाण और ऋ० ९ । ९८ । ५ के पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

२३ २ ३ १ २ ३ २ ३ ३ १२
परि स्य स्वानो अक्षरदिन्दुरव्ये मदच्युतः ।
२३ २३ १ २३ २३ १र २र ३ २
धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥

॥ ३ ॥ [१६] (१२४०)

पदपाठः—परि अ० । स्यः, स्वानः १ । अक्षरत् क्रि० । इन्दुः १ । अव्ये ७ । मदच्युतः १ । धारा ३ । यः, ऊर्ध्वः १ । अध्वरे ७ । भ्राजा ३ । न अ० । याति क्रि० । गव्ययुः १ ॥

अन्वितपदार्थः—(गव्ययुः) सूर्यकिरणेच्छुः (ऊर्ध्वः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऊर्ध्वगामी (यः) सोमः (भ्राजा, न) यथा भ्राजमानया दीप्त्या अन्तरिक्षे गच्छति तद्वत् दीप्त्या सह (अध्वरे) यज्ञे (धारा) धारया (याति) गच्छति (स्वानः) अभिषूयमाणः (स्यः) सः (इन्दुः) आर्द्रः सोमरसः (मदच्युतः) हर्षार्थं वेदैः प्रेरित उपदिष्टः सन् (अव्ये) अविरोमभवे दशापवित्रे (पर्यक्षरत्) परितः क्षरति भाति च ॥ ऋग्वेदे तु ९ । ९८ । ३ अक्षरत्=अक्षा इति, याति=एति इति च पाठभेदौ ॥ ३ ॥

भाषार्थः-(गव्ययुः) सूर्यकिरणों का चाहने वाला (ऊर्ध्वः) ऊर्ध्वगामी (यः) जो सोम (भ्राजा) प्रकाशमान दीप्ति के साथ (न) जैसे जाता है, तद्वत दीप्ति के साथ (अध्वरे) यज्ञ में (धारा) धार के साथ (याति) जाता है (स्वानः) अभिषूयमाण (स्यः) वह (इन्दुः) गीला सोमरस (मदच्युतः) हर्ष के लिये वेदमन्त्रों से प्रेरित=उपदिष्ट हुवा (अव्ये) ऊर्णामय दशापवित्र पर (परि) सर्वतः (अक्षरत्) टपकता है ॥ ऋ० ९ । ९८ । ३ के पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ तृतीयसूक्तस्य-अग्नयो धिष्ण्या ऐश्वरा ऋषयः । पवमानः सोमो देवता । आर्ची भुरिग्गायत्रीः २ । ३ आर्ची स्वराड् गायत्री च छन्दः ॥

तत्र प्रथमा-

१२ ३१ २३२ ३२ ३२३ २३ १२ २२

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभिधाम

॥ १ ॥ (१२४१) व्याख्याता (४१९)

अथ द्वितीया-

३१ २ ३१ २ ३१ ३ १२ २२ ३१ २

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥

॥ २ ॥ (१२४२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–शुक्रः १ । पवस्व क्रि० । देवेभ्यः ४ । सोम सं० । दिवे, पृथिव्यै ४ । शम् , च अ० । प्रजाभ्यः ४ ॥

अन्वितपदार्थः–(शुक्रः) आशुकारी त्वम् (सोम) हे शान्तिधाम ! (देवेभ्यः) सूर्यादिलोकेभ्यः (दिवे) अन्तरिक्षाय (पृथिव्यै) भूम्यै (प्रजाभ्यः) तत्र तत्र स्थिताभ्यः प्रजाभ्यः (च) (शम्) सुखम् (पवस्व) अभिवर्ष ॥ ऋग्वेदे तु ९ । १०९ । ५ प्रजायै इति पाठः ॥ २ ॥

भाषार्थः–(सोम) हे शान्तिधाम ! (शुक्रः) आशुकारी आप (देवेभ्यः) सूर्यादि देवों, (दिवे) अन्तरिक्ष, (पृथिव्यै) पृथिवीलोक (च) और (प्रजाभ्यः) वहां २ की प्रजाओं के लिये (शम्) सुख (पवस्व) वर्षाइये ॥ ऋ० ९ । १०९ । ५ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया–

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

दिवो धर्त्ताऽसि शुक्रः पीयूषः सत्ये विधर्मन् ।

३ १ २

वाजी पवस्व ॥ ३ ॥ [१७] (१२४३)

पदपाठः–दिवः ६ । धर्त्ता १ । असि क्रि० । शुक्रः, पीयूषः १ । सत्ये ७ । विधर्मन् ७ । वाजी १ । पवस्व क्रि० ॥]

अन्वितपदार्थः–हे सोम ! शान्तस्वरूप ! परमेश्वर ! (शुक्रः) आशुसृष्ट्यादिकरः (पीयूषः) अमृतस्वरूपः (वाजी) बलिनां बलिष्ठः सर्वशक्तिमत्त्वात् त्वम् (दिवः) द्युलोकादेः (धर्त्ता) धारकः (असि) भवसि स त्वम् (सत्ये) कारणाऽविनाशात्त्रिकालाऽबाधे (विधर्मन्) विविधधर्मवति संसारे (पवस्व) पावयाऽस्मानिति शेषः ॥ ऋग्वेदे ९ । १०९ । ६ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—हे शान्तस्वरूप ! परमेश्वर ! तू (शुक्रः) शीघ्र सृष्ट्यादि करने वाला (पीयूषः) अमृतस्वरूप (वाजी) अतिबलवान् है सो सर्वशक्तिमत्ता से (दिवः) द्युलोकादि का (धर्त्ता) धारक (असि) है। सो हे पिता ! तू (सत्ये) कारण के नाश न होने से सत्य=त्रिकालाऽबाध्य (विधर्मन्) विविध धर्मवाले जगत् में (पवस्व) हमें पवित्र कर ॥ ऋ० ९। १०९। ६ में भी ॥ ३ ॥

यज्ञायज्ञीयमग्निष्टोमसाम इति विव०

इति उत्तरार्चिके नवमाध्यायस्याऽष्टमः खण्डः ॥ ८ ॥

अथ नवमे खण्डे

प्रथमर्चस्य-उशनाऋषिः । अग्निर्देवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ १ ३ १ ३ २

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् ।

२ ३ २ ३ १र २र

अग्ने रथं न वेद्यम् ॥ १ ॥ (१२४४) व्याख्याता (५)

इदानीमुक्थसामानि भवन्ति औशनं प्रथमसुक्थम् इति विव०

अथ द्वितीया—

३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १

कविमिव प्रशंस्यं यं देवास इति द्विता ।

१र २र ३ २

नि मर्त्येष्वादधुः ॥ २ ॥ (१२४५)

पदपाठः—कविमिव अ० । प्रशंस्यम्, यम् २ । देवासः १ । इति अ० । द्विता अ० । नि अ० । मर्त्येषु ७ । आदधुः क्रि० ॥

अन्वितपदार्थः—(यम्) अग्निम् (देवासः) विद्वांसः (मर्त्येषु) मनुष्येषु (द्विता) द्विधा गार्हपत्याहवनीय रूपेण (नि-आ-दधुः) न्यादधते तं स्तुषे इति पूर्वेण संबन्धः । कथंभूतमग्निम् (कविमिव) विद्वांसमिव (प्रशंस्यम्) प्रशंसनीयम् ॥ ऋग्वेदे तु ८। ८४। २ प्रशंस्यं=प्रचेतसम्, इति=अथ इति च पाठान्तरम् ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(यम्) जिस अग्नि का (देवासः) विद्वान् (द्विता) गार्हपत्य और आहवनीयरूप दो प्रकार से (नि-आ-दधुः) आधान करते हैं " उस की प्रशंसा कर" यह पूर्वमन्त्र से सम्बन्ध है। कैसे अग्नि की, कि जो (कविमिव) विद्वान् के समान (प्रशंस्यम्) प्रशंसनीय है, उस की ॥ ऋ० ८। ८४। २ के पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया-

१ २ ३ २३ १ २ ३ १र २र
त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुही गिरः ।
१ २ ३ २ ३ १र २र
रक्षा तोकमुत त्मना ॥३॥ [१८] (१२४६)

पदपाठः-त्वम् १। यविष्ठ सं०। दाशुषः, नॄन् २। पाहि, शृणुहि क्रि०। गिरः २। रक्ष क्रि०। तोकम् २। उत अ०। त्मना ३ ॥

अन्वितपदार्थः-(यविष्ठ) हे अतिबलत्तम ! (त्वम्) (दाशुषः नॄन्) परोपकारकान्मनुष्यान् (पाहि) रक्ष (गिरः) तत्कृताः स्तुतीः (शृणुहि) शृणुष्व (उत) तथा (तोकम्) तत्पुत्रादिसन्ततिम् (त्मना) आत्मना (रक्ष) पाहि ॥

भौतिकपक्षे-(यविष्ठ) बलवत्तमअग्ने ! (दाशुषः) याज्ञिकान् (नॄन्) कर्मणां नेतॄन् पाहि, (गिरः) तत्कृताः प्रशंसाः (शृणुहि) गृहाण [यथा यथा ते त्वदजनेन वाञ्छन्ति तथा तथा तत्कामान् निष्पादयेति श्रवणार्थः] (उत) तथात्मना तोकं रक्षेति पूर्ववत् ॥

ये मनुजाः प्रत्यहं होमेनाग्निदूतद्वारा वाय्वादीन्देवांस्तर्पयन्ति, तत्कृतप्रीत्या प्रीणितास्ते वाय्वादयो देवास्तदीयान्कामान्पूरयन्ति तांस्तत्पुत्रादिसन्ततिं च रक्षन्ति इति भावः ॥ ऋग्वेदे ८। ८४। ३ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation

भावार्थः-(यविष्ठ) हे अतिबलवत्तम ! ईश्वर ! (दाशुषः) दानादि से परोपकाररत (नॄन्) मनुष्यों की (पाहि) रक्षा कीजिये, (गिरः) उन की स्तुतियों को (शृणुहि) सुनिये (उत) और (तोकम्) उन की पुत्रादि सन्तान वर्ग की (त्मना) अपने अनन्तसामर्थ्य से (रक्ष) रक्षा कीजिये ॥

भौतिक पक्ष में-(यविष्ठ) अति बलवान् अग्नि (दाशुषः) हव्यदान से होम करने वाले (नॄन्) कर्म के नेता कर्मकाण्डियों की रक्षा करता है और (गिरः) उन की वाणियों को सुनता अर्थात् जैसा २ वे चाहते हैं वैसा २ उत्तम काम उन का पूर्ण करता है और उन के सन्तानों की भी रक्षा करता है ॥

तात्पर्य यह है कि जो लोग नित्यप्रति होम से वायु आदि देवों को हव्य देकर अग्निदूत के द्वारा तृप्त करते हैं, उन की कराई तृप्ति से प्रसन्न हुवे वे वायु आदि भौतिक देवता उन की और उन के सन्तानों की आयु की रक्षा करते तथा सब प्रकार उन की कामना पूरी करते हैं ॥ ऋ० ८ । ८४ । ३ में भी ॥३॥

अथ द्वितीयतृचस्य-नृमेधऋषिः । इन्द्रोदेवता । उष्णिक्छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २
ऐन्द्र नो गधि प्रिय सत्राजिदगोह्य !
३ २उ ३ १ २ ३१र २र ३ २
गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥१॥(१२४७)व्याख्याता(३१३)

अथ द्वितीया-

३ १र २र ३ २ ३ २ ३ १ २
अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
१र २र ३ २ ३ १र २र ३ २
इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥३॥ (१२४८)

पदपाठः-अभि, हि अ० । सत्य सं० । सोमपाः सं० । उभे २ । बभूथ क्रि० । रोदसी २ । इन्द्र सं० । असि क्रि० । सुन्वतः ६ । वृधः १ । पतिः १ । दिवः ६ ॥

अन्वितपदार्थः-हे (सत्य ! सोमपाः ! इन्द्र !) (हि) नूनं त्वम् (उभे रोदसी) द्यावापृथिव्यौ (अभिबभूथ)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अभिभवसि। स त्वम् (सुन्वतः) यजमानस्य (वृधः) वर्धकः (असि) भवसि (दिवः) आकाशस्य (पतिः) पालकोसि॥

आकाशगतस्येन्द्रस्य वायुविशेषस्य वृष्टिहेतोर्यज्ञद्वारा यजनेन यजनकर्त्तृणां वृद्धिर्जायते यतः स इन्द्र आकाशगतानां सर्वेषां प्राएयप्राणिनां पालको वर्धकश्चास्ति॥ ऋग्वेदे ८। ९८। ५ऽधि॥ २॥

भाषार्थः—(सत्य! सोमपाः) इन्द्र! हे सच्चे सोम पीने वाले इन्द्र! (हि) निश्चय तू (उभे) दोनों (रोदसी) द्युलोक और पृथिवीलोक को (अभिबभूथ) दबा कर वर्त्तमान है, सो तू (सुन्वतः) सोमयाजी यजमान का (वृधः) बढ़ाने वाला और (दिवः) आकाश का (पतिः) पालक (असि) है॥

तात्पर्य यह है कि आकाशगत वायुविशेष वृष्टि के हेतु इन्द्र के यज्ञद्वारा यजन करने से यज्ञ करने वालों की वृद्धि होती है क्योंकि वह आकाश गत सब प्राणी और अप्राणियों का पालक और वर्धक है॥ ऋ० ८।९८।५ में भी॥२॥

अथ तृतीया—

१र २र १ २ ३ २ ३ १र २र
त्वꣳहि शश्वतीनामिन्द्र दर्त्ता पुरामसि।
३ २उ ३ १ २ ३ १र २र ३ २
हन्ता दस्योर्मनोर्वृधः पतिर्दिवः॥३॥ [१९] (१२४९)

पदपाठः—त्वम् १। हि अ०। शश्वतीनाम् ६। इन्द्र सं०। दर्त्ता १। पुराम् ६। असि क्रि०। हन्ता १। दस्योः, मनोः ६। वृधः १। पतिः १। दिवः ६॥

अन्वितपदार्थः—(इन्द्र) हे वृष्टिहेतो! वायुविशेष! (त्वं हि) त्वमेव (शश्वतीनां पुराम्) प्राचीनतमानां नगरीणाम् (दर्त्ता) वृष्ट्यादिना दारयिता, (दस्योः) असुरस्य मेघस्य (हन्ता) घातकः, तथा (मनोः) याज्ञिकस्य मनुष्यस्य (वृधः) वर्धकः (दिवः पतिः असि)॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वायुभेदेनेन्द्रेणैव वृष्टिर्भवत्यतो सोमाद्योषधिभिरनुष्ठितेन यज्ञेन तदाप्यायनं ततो वृष्टिर्वृष्ट्या च पुरातनभित्त्यादिपातेन पुरां दारणं याज्ञिकादिपुरुषेभ्यो धान्यादिवृद्ध्या तद्वृद्धिश्च भवतीत्याशयः ॥ ऋग्वेदे ८। ९८। ६ऽपि ॥३॥

भाषार्थः-(इन्द्र) हे वृष्टिहेतो ! वायुविशेष ! (त्वं हि) तू ही (शश्वतीनाम्) बहुत पुरानी (पुराम्) नगरियों का (दर्त्ता) फाड़ने वाला, (दस्योः) असुर मेघ का (हन्ता) हनन करने वाला और (मनोः) यज्ञशील मनुष्य का (वृधः) बढ़ाने वाला (असि) है जो कि (दिवः पतिः) आकाश का पति है ॥

वायुभेद जो इन्द्र कहाता है उस से ही वर्षा होती हैं, इसलिये सोमादि ओषधि द्वारा यज्ञ करने से उस का आप्यायन, उस से वर्षा, उन से पुरानी भित्ति आदि गिरजाने से पुरों का भेदन और यज्ञ करने वाले मनुष्यों के धान्यादि बढ़ने से उन की वृद्धि होती है। ऋ० ८। ९८। ६ वें की ॥ ३ ॥

अथ मारुतं साम इति विव०

तत्र तृतीयतृचस्य जेताऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ॥ तत्र प्रथमा-

३ २ ३ १र २र ३ १र २र १

पुरां भिन्दुर्युवा कविरमितौजा अजायत ।

२ ३ १ २३ १ २ ३ २ ३ १ २ ३ २

इन्द्रो विश्वस्य कर्मणो धर्त्ता वाजी पुरुष्टुतः ॥

॥१॥ (१२५०) वाजी=वज्रीति पाठान्तरेण व्याख्याता (३५९)

अथ द्वितीया-

२ ३ २ ३ २ ३ १ २ ३ १ २

त्वं बलस्य गोमतोऽपावरद्रिवो बिलम् ।

२ ३ १र २र ३ १ २

त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ २ ॥ (१२५१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-त्वम् १ । बलस्य, गोमतः ६ । अपाऽवः क्रि० । अद्रिवः सं० । बिलम् २ । त्वाम् २ । देवाः १ । अबिभ्युषः ६ । तुज्यमानासः १ । आविषुः क्रि० ॥

अन्वितपदार्थः-(अद्रिवः) हे मेघसमूहवन् ! इन्द्र ! (त्वम्) (गोमतः) किरणयुक्तस्य तथाऽपि अबिभ्युषः निर्भयस्य (बलस्य) मेघस्य (बिलम्) घनं समूहम् (अपाऽवः) अपावृणोषि (त्वाम्) इन्द्रं सूर्यं (देवाः) पृथिव्यादयो लोकाः (तुज्यमानासः) मेघेन हिंस्यमानाः सन्तः (आविषुः) प्राप्नुवन्ति ॥ अद्रिरिति, बल इति च मेघनाम निघं० १ । १० ॥ ऋग्वेदे १ । ११ । ५ ऽपि ॥ २ ॥

भाषार्थः-(अद्रिवः) हे मेघ वाले ! इन्द्र ! सूर्य ! (त्वम्) तू (गोमतः, अबिभ्युषः, बलस्य) किरणयुक्त, तथापि निर्भय, मेघ के (बिलम्) घने समूह को (अपाऽवः) तोड़ कर खोल देता है और तब (देवाः) पृथिव्यादि लोक (तुज्यमानासः) मेघ से भीगे हुवे (त्वाम्) तुझ को (आविषुः) प्राप्त होते हैं ॥ निघण्टु १ । १० के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १ । ११ । ५ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ १ २ ३ १र २र ३ २ ३ १ २
इन्द्रमीशानमोजसाभि स्तोमैरनूषत । सहस्रं यस्य
३ १२ ३ २ ३ २ ३ १ २
रातय उत वा सन्ति भूयसीः ॥ ३ ॥ [२०] (१२५२)

पदपाठः-इन्द्रम्, ईशानम् २ । ओजसा ३ । अभि अ० । स्तोमैः ३ । अनूषत क्रि० । सहस्रम् १ । यस्य ६ । रातयः १ । उत, वा अ० । सन्ति क्रि० । भूयसीः १ ॥

अन्वितपदार्थः-हे मनुष्याः ! यूयम् ! (ओजसा) धारणाकर्षणादिविविधाद्भुतबलेन (ईशानम्) शक्तिमन्तम् (इन्द्रम्) सूर्यं परमेश्वरं वा (स्तोमैः) स्तोत्रैः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अभि-अनूषत) प्रशंसत (यस्य) इन्द्रस्य (सहस्रम्) असंख्याताः (उत, वा) अथवा (भूयसीः) भूयस्यः (रातयः) दानक्रियाः सस्योत्पादादिरूपाः (सन्ति) ॥ ऋग्वेदे १ । ११ । ८ ऽपि ॥ ३ ॥

भाषार्थः हे मनुष्यो ! तुम (ओजसा ईशानम्) धारण आकर्षणादि विविध अद्भुत बल से ऐश्वर्यवान् (इन्द्रम्) सूर्य वा परमेश्वर की (स्तोमैः) प्रशंसाविधायक वेद मन्त्रों से (अभि-अनूषत) सर्वतः प्रशंसा करो ॥ ऋ० १ । ११ । ८ में भी ॥ ३ ॥

इति पञ्चमस्याऽर्धः प्रपाठकः ॥

इतिश्रीमत्कण्ववंशावतंस पण्डितहज़ारीलालस्वामिसूनुना, हस्तिनापुरपार्श्ववर्त्ति परीक्षितगढ़निवासिना, तुलसीराम स्वामिना कृते सामवेदभाष्योत्तरार्चिके,

नवमोऽध्यायः ॥ ९ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ दशमाऽध्यायः

इदानीं नवममहः इतिविवरणकारः

तत्र

अक्रान्त्समुद्र इति प्रथमतृचस्य पराशरऋषिः । सोमोदेवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा–

१ २ ३ १ २३१र २र ३ १ २ ३ १र २र ३ २

अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन्प्रजा भुवनस्य गोपाः ।

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ १र २र ३ १र २र

वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानोअद्रिः ॥

॥ १ ॥ (१२५३) व्याख्याता (५२९)

अथ द्वितीया–

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २

मत्सि वायुमिष्टये राधसे नो, मत्सि मित्रावरुणा पूयमानः ।

२ ३ २ ३ १ २ ३ १ २ ३ २उ ३ १ २ ३ १ २

मत्सि शर्धो मारुतं मत्सि देवान्, मत्सि द्यावापृथिवी देव सोम ॥

॥ १ ॥ (१२५४)

पदपाठः—मत्सि क्रि० । वायुम् २ । इष्टये, राधसे ४ । नः ६ । मत्सि । मित्रावरुणौ २ । पूयमानः १ । मत्सि । शर्धः, मारुतम् २ । मत्सि । देवान् २ । मत्सि । द्यावापृथिवी २ । देव, सोम सं० ॥

अन्वितपदार्थः–(देव) दिव्यगुणयुक्त ! (सोम) ओषधिराज ! त्वम् (नः) अस्माकम् (राधसे) धनाय (इष्टये) यज्ञाय च (वायुम्) (मत्सि) मादयसि, तथा (पूयमानः) शोध्यमानस्त्वं (मित्रावरुणा) प्राणाऽपानौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(मत्सि) मादयसि, (मारुतम्) मरुतामिदम् (शर्धः) बलम् (मत्सि), (देवान्) इन्द्रियाणि (मत्सि), [किं बहुना] (द्यावापृथिवी) द्यावापृथिव्यौ तत्रस्थप्राण्यप्राणिजातानि (मत्सि) ॥

एतान्हर्षयुक्तान्कृत्वा यज्ञानुष्ठानसौकर्येण तत्फलं धन धान्यादिकमस्मभ्यं सोमः प्रयच्छतीति भावः ॥ ऋग्वेदे ९। ९७। ४२ ऽपि ॥ २ ॥

भाषार्थः—(देव) दिव्यगुणयुक्त ! (सोम) सोम ! तू (नः) हमारे (राधसे) धन और (इष्टये) यज्ञ के लिये (वायुम्) साधारण वायु को (मत्सि) हृष्ट करता है, तथा (पूयमानः) शोध्यमान तू (मित्रावरुणा) प्राण और अपान को (मत्सि) बल देता है और (मारुतं, शर्धः) मरुतों=वायुभेदों के बल को (मत्सि) आप्यायित करता है और (देवान्) इन्द्रियों को (मत्सि) पुष्टि देता है और कहां तक कहा जावे—(द्यावापृथिवी) द्युलोक और पृथिवी लोक अर्थात् पृथिवी आकाश के प्राणी और अप्राणी सब पदार्थों की (मत्सि) हृष्टि पुष्टि करता और तद्द्वारा हमारे धन धान्यादि बढ़ाता है ॥ ऋ० ९। ९७। ४२ में भी ॥ २ ॥

अथ तृतीया—

३१र २र ३१२ ३ १र २र ३ २

महत्तत्सोमो महिषश्चकारा—ऽपां यद्गर्भोऽवृणीत देवान् ।

१२३१३ १२ ३१र २र ३ २३ २३१२

अदधादिन्द्रे पवमानओजोऽजनयत् सूर्ये ज्योतिरिन्दुः ॥

॥ ३ ॥ (१२५५) व्याख्याता (५४२)

अयैषदेव इति द्वितीयस्य दशर्चसूक्तस्य शुनःशेप ऋषिः। पवमानः सोमोदेवता। गायत्रीछन्दः ॥ तत्र प्रथमा—

३२३ २र ३१२

एष देवो अमर्त्यः पर्णवीरिव दीयति ।

३१र २र ३१२

अभि द्रोणान्यासदम् ॥ १ ॥ (१२५६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–एषः, देवः, अमर्त्यः १ । पर्णवीरिव अ० । दीयति क्रि० । अभि अ० । द्रोणानि २ । आसदम् क्रि० ॥

अन्वितपदार्थः–(एषः देवः) सोमः (अमर्त्यः) अमृतः (द्रोणानि) द्रोणकलशान् (आसदम्) आसत्तुम् (अभि दीयति) अभितो गच्छति । कइव ? (पर्णवीरिव) पक्षीव ॥ ऋग्वेदे ९ । ३ । १ ऽपि ॥ १ ॥

भाषार्थः–(एषः) यह (अमर्त्यः) अमृत (देवः) सोम (द्रोणानि) द्रोण कलशों में (आसदम्) स्थित होने को (अभि दीयति) सर्वतः जाता है, (पर्णवीरिव) जैसे पक्षी ॥ ऋ० ९ । ३ । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ १ २र३ १ २ ३ २ ३ १र ४
एष विप्रैरभिष्टुतोऽपो देवो विगाहते ।
२ ३ १ २ ३ १ २
दधद्रत्नानि दाशुषे ॥ २ ॥ (१२५७)

पदपाठः–एषः १ । विप्रैः ३ । अभिष्टुतः १ । अपः २ । देवः १ । विगाहते क्रि० । दधत् १ । रत्नानि २ । दाशुषे ४ ॥

अन्वितपदार्थः–(विप्रैः) मेधाविभिः ऋत्विग्भिः (अभिष्टुतः) कृतप्रशंसः (देवः) द्योतमानः (एषः) सोमः (दाशुषे) हविषां प्रदात्रे यजमानाय (रत्नानि) रमणीयानि धनादीनि (दधत्) धारयन् प्रयच्छन् (अपः) वसतीवरीः (वि–गाहते) विलोडयति ॥ ऋग्वेदे ९ । ३ । ६ ऽपि ॥ २ ॥

भाषार्थः–(विप्रैः) मेधावी ऋत्विजों से (अभिष्टुतः) प्रशंसित (देवः) द्योतमान (एषः) यह सोम (दाशुषे) हविषों के दाता यजमान के लिये (रत्नानि) रमणीय धनादि पदार्थ (दधत्) देता हुवा (अपः) वसतीवरी नामक जलों को (विगाहते) विलोडित करता है ॥ ऋ० ९ । ३ । ६ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

अथ तृतीया—

३ १र २र २ ३ २ ३ १ २ ३ १ २
एष विश्वानि वार्या शूरो यन्निव सत्त्वभिः ।
१ २
पवमानः सिषासति ॥ ३ ॥ (१२५८)

पदपाठः—एषः १ । विश्वानि, वार्या २ । शूरः १ । यन् १ । इव अ० । सत्त्वभिः ३ । पवमानः १ । सिषासति क्रि० ॥

अन्वितपदार्थः—(एषः, पवमानः) सोमः (विश्वानि) सर्वाणि (वार्या) वार्याणि धनादीनि वरणीयानि द्रव्याणि (सिषासति) संभक्तुमिच्छति, दृष्टान्तः—(सत्त्वभिः) बलैः (यन्) गच्छन् (शूरः) वीरो योद्धा (इव) यथा धनैश्वर्यं सिषासति तद्वत् ॥ ऋग्वेदे ९ । ३ । ४ ऽपि ॥ ३ ॥

भाषार्थः—(एषः) यह (पवमानः) सोम (विश्वानि) सब (वार्या) वरणीय धनादि पदार्थों को (सिषासति) विभाग पूर्वक देना चाहता है, (इव) जैसे कि (सत्त्वभिः) सेनाओं के साथ (यन्) चढ़ाई पर जाता हुवा (शूरः) शूरवीर सेनापति ॥ ऋ० ९ । ३ । ४ में भी ॥ ३ ॥

अथ चतुर्थी—

३ २ ३ १ २ ३ १ २
एष देवो रथर्यति पवमानो दिशस्यति ।
३ १ २ ३ २
आविष्कृणोति वग्वनुम् ॥ ४ ॥ (१२५९)

पदपाठः—एषः, देवः १ । रथर्यति क्रि० । पवमानः १ । दिशस्यति, आविष्कृणोति क्रि० । वग्वनुम् २ ॥

अन्वितपदार्थः—(एषः) सोमः (देवः) दिव्यगुणाढ्योऽस्ति सोऽयम् (रथर्यति) रथैर्याति इति विव० । रथेनैव हि याज्ञिकाः सोमयागे सोमं नयन्त्यादरार्थम् । (पवमानः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शुद्धिं कुर्वन्नयं सोमः (दिशस्यति) यजमानेभ्यो धनैश्वर्यं दातुमिच्छति (वग्वनुम्) शब्दं=वाचम् (आविष्कृणोति) प्रकटयति ॥

सोमेन यजमानान्मनुष्यान्सोमो धनैश्वर्यसंपन्नान्कृत्वा सोमपायिनां वाक्सौष्ठवं सम्पादयतीति भावः ॥

ऋग्वेदे तु ९ । ३ । ५ दशस्यतीति भेदः । ज्वालाप्रसादेन तु दिशस्पतिरिति व्याख्याय महाननर्थः कृतः ॥५॥

भाषार्थः-(एषः) यह सोम (देवः) दिव्य गुणयुक्त है सो वह (रथ्यति) रथद्वारा जाता है । जैसा कि सोमयाग में आदरार्थ सोम को रथ में ले चलते हैं । (पवमानः) शुद्धि करता हुआ वह सोम (दिशस्यति) यजमानों के लिये धनैश्वर्यादि देना चाहता और सोम पीने वालों की (वग्वनुम्) वाणी को (आविष्कृणोति) प्रकट करता है ॥

सोमयाग से मनुष्यों के धनैश्वर्य बढ़ते और सोमपान से वाणी (आवाज़) सुधरती है, इत्यादि दिव्यगुण होने से सोमयाजी लोग यज्ञ में सोम के आदरार्थ सोम को रथ में ले चलते हैं ॥

ऋ० ९ । ३ । ५ का पाठभेद संस्कृतभाष्य में देखिये ॥ ५ ॥

अथ षष्ठी-

१ २ १ १ २ ३ २ ३ १ २ १ १ २
एष देवो विपन्युभिः पवमान ऋतायुभिः ।
२ ३ १ २
हरिर्वाजाय मृज्यते ॥ ५ ॥ (१२६०)

पदपाठः-एषः, देवः १ । विपन्युभिः ३ । पवमानः १ । ऋतायुभिः ३ । हरिः १ । वाजाय ४ । मृज्यते क्रि० ॥

अन्वितपदार्थः-(पवमानः) शोध्यमानः (हरिः) हरितः (एषः) अयम् (देवः) दिव्यगुणः सोमः (ऋतायुभिः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 F

यज्ञकामैः (विपन्युभिः) ऋत्विग्भिः (वाजाय) बलाय तत्प्राप्तये (मृज्यते) शोध्यते संस्क्रियते ॥ ऋग्वेदे ९ । ३ । ३ ऽपि ॥ ५ ॥

भाषार्थः-(पवमानः) शोध्यमान (हरिः) हरित (एषः) यह (देवः) दिव्यगुण सोम (ऋतायुभिः) यज्ञ की कामना वाले (विपन्युभिः) ऋत्विजों द्वारा (वाजाय) बलप्राप्त्यर्थ (मृज्यते) संस्कृत किया जाता है ॥ ऋ० ९ । ३ । ३ में भी ॥ ५ ॥

अथ षष्ठी—

३२ ३२ ३२३२ १ १२
एष देवो विपाकृतोऽति ह्वराꣳसि धावति।
१२ ३ १ २
पवमानो अदाभ्यः ॥ ६ ॥ (१२६१)

पदपाठः—एषः, देवः १ । विपा ३ । कृतः १ । अति अ० । ह्वरांसि २ । धावति क्रि० । पवमानः, अदाभ्यः १ ॥

अन्वितपदार्थः-(विपा) अङ्गुल्या (कृतः) संस्कृतः अभिषुतः (एषः) अयम् (देवः) दिव्यगुणः (पवमानः) सोमः (अदाभ्यः) अहिंसितः सन् (ह्वरांसि) शत्रून् रोगांश्च (अति धावति) अतिक्रम्यगच्छति अभिभवतीत्यर्थः ॥

सोमोऽयं सोमयाजिनां रोगनाशकः सोमपायिनां च बलेन शत्रुदलनाशको वेदः ॥ ऋग्वेदे ९ । ३ । २ ऽपि ॥ ६ ॥

भाषार्थः-(विपा) अङ्गुलि से (कृतः) अभिषुत (एषः) यह (देवः) दिव्यगुण (पवमानः) सोम (अदाभ्यः) अहिंसित हुवा (ह्वरांसि) शत्रुओं और रोगों को (अतिधावति) अतिक्रमण करके जाता है अर्थात् दबाता है ॥

भाव यह है कि सोमयाजियों के रोग और सोमपायियों के शत्रु नष्ट होते हैं ॥ ऋ० ९ । ३ । २ में भी ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ सप्तमी–

३२उ ३ १ २ ३१र २र ३ १ २
एष दिवं विधावति तिरो रजाꣳसि धारया।
१ २ ३ १ २
पवमानः कनिक्रदत् ॥ ७ ॥ (१२६२)

पदपाठः–एषः १। दिवम् २। वि-धावति क्रि०। तिरः अ०। रजांसि २। धारया ३। पवमानः १। कनिक्रदत १॥

अन्वितपदार्थः–(एषः पवमानः) अयं सोमः (धारया) धाराभिः [अग्नौ हुतः सन्] (कनिक्रदत्) शब्दायमानः चट-चटाशब्दं कुर्वन् (दिवम्) द्युलोकम्(रजांसि) अन्यांल्लोकांश्च (तिरः) अन्तर्हितः (विधावति) विविधं गच्छति॥ ऋग्वेदे ९। ३। ७ऽपि ॥ ७ ॥

भाषार्थः–(एषः) यह (पवमानः) सोम (धारया) धाराओं से [अग्नि में हुत हुवा] (कनिक्रदत्) चटचटा शब्द करता हुवा (दिवम्) द्युलोक तथा (रजांसि) अन्य लोकों को (तिरः) छिपा हुवा (विधावति) विविधता से जाता है॥ ऋ० ९। ३। ७ में भी ॥ ७ ॥

अथाऽष्टमी—

३२उ ३ १ २ ३२उ ३ १ २
एष दिवं व्यासरत्तिरो रजाꣳस्यस्तृतः।
१ २ २ ३
पवमानः स्वध्वरः ॥ ८ ॥ (१२६३)

पदपाठः–एषः १। दिवम् २। व्यासरत् क्रि०। तिरः अ०। रजांसि २। अस्तृतः, पवमानः, स्वध्वरः १॥

अन्वितपदार्थः–(स्वध्वरः) सुयज्ञः (अस्तृतः) अ-हिंसितोऽनभिभूतः (एषः) अयम् (पवमानः) सोमः (तिरः)

CC-0. Gurukul Kangri University Haridwar Collection. Di...

अदृश्यरूपेण (रजांसि) लोकान्तराणि प्रति (व्यासरत्) विसरति गच्छति ॥ ऋग्वेदे ९ । ३ । ८ ऽपि ॥ ८ ॥

भाषार्थः—(स्वध्वरः) यज्ञ सुधारने वाला (अस्तृतः) अहिंसित=किसी से न दबने वाला (एषः पवमानः) यह सोम (तिरः) अदृश्यरूप से (रजांसि) लोकान्तरों को (व्यासरत्) अनेकधा जाता है ॥ ऋ० ९ । ३ । ८ में भी ॥८॥

अथ नवमी—

३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
१ २ ३ १ २
हरिः पवित्रे अर्षति ॥ ९ ॥ (१२६४)

व्याख्याता (७५८)

अथ दशमी—

३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ।
१ २ ३ २
धारया पवते सुतः ॥ १० ॥ (१२६५)

पदपाठः—एषः १ । उ अ० । स्यः, पुरुव्रतः, जज्ञानः, जनयन् १ । इषः २ । धारया ३ । पवते क्रि० । सुतः १ ॥

अन्वितपदार्थः—(एषः उ स्यः) एष एव स सोमोऽस्ति यः (पुरुव्रतः) बहुकर्मा (जज्ञानः) जायमान एव (इषः) अन्नानि धान्यानि (जनयन्) उत्पादयन् (सुतः) अभिषुतः (धारया) धाराभिः (पवते) पावयति ॥ ऋग्वेदे ९ । ३ । १० ऽपि ॥ १० ॥

भाषार्थः—(एषः) यह (उ) ही (स्यः) वह सोम है जो (पुरुव्रतः) बहुत कर्म वाला (जज्ञानः) उत्पन्न होते ही (इषः) अन्नों=धान्यों को (जनयन्) उत्पन्न करता हुवा (धारया) अपनी धारों से (पवते) शुद्धि करता है ॥ ऋ० ९ । ३ । १० में भी ॥ १० ॥

इति दशमाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीये खण्डे-

एषधियेत्यष्टर्चसूक्तस्य-असितदेवलावृषी । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ २ ३ २ ३ २३१२ ३ १ २
एष धिया यात्यण्व्या शूरोरथेभिराशुभिः ।
२ ३ १ २ ३ २
गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥ (१२६६)

पदपाठः-एषः १ । धिया ३ । याति क्रि० । अण्व्या ३ । शूरः १ । रथेभिः, आशुभिः ३ । गच्छन् १ । इन्द्रस्य ६ । निष्कृतम् २ ॥

अन्वितपदार्थः-(इन्द्रस्य) वायुविशेषस्य वृष्टिकर्त्तुः (निष्कृतम्) आकाशगतं स्थानं (गच्छन्), (एषः) सोमः (अण्व्या, धिया) सूक्ष्मतमेन कर्मणा (याति) प्राप्नोति। दृष्टान्तः-यथा (शूरः) विजयी योद्धा (आशुभिः) शीघ्रगैः (रथेभिः) रथैर्याति तद्वत् । "अभिषूयमाणः सन् होमद्वाराऽग्निं गच्छतीत्यर्थः " इत्येव सायणाचार्यः ॥ ऋग्वेदे ९ । १५ । १ ऽपि ॥ १ ॥

भाषार्थः-(इन्द्रस्य) वायुविशेष वृष्टिकर्त्ता इन्द्र के (निष्कृतम्) स्थान आकाश को (गच्छन्) जाता हुवा (एषः) यह सोमरस (अण्व्या) सूक्ष्मतम (धिया) कर्म से (याति) पहुंचता है ॥ दृष्टान्त—जैसे (शूरः) शूर वीर (आशुभिः) शीघ्रगामी (रथेभिः) रथों से जाता है ॥ ऋ० ९ । १५ । १ में भी ॥ १ ॥

अथ द्वितीया-

३ २ ३१ २ ३ २ ३१२
एष पुरु धियायते बृहते देवतातये ।
२ ३ १ २ ३ १ २
यत्राऽमृतास आशत ॥ २ ॥ (१२६७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

पदपाठः– एषः १। पुरु २। धियायते क्रि०। बृहते, देवतातये ४। यत्र अ०। अमृतासः १। आशत क्रि०॥

अन्वितपदार्थः–(एषः) सोमः (बृहते) (देवतातये) यज्ञाय (पुरु) बहु (धियायते) कर्मेच्छति। सुपां सुलुगि ७। १। ३९ त्यादिना याकारोपजनः (यत्र) यस्मिन् यज्ञे (अमृतासः) अमरा देवा वाय्वादयः (आशत) अश्नुवते॥ ऋग्वेदे ९। १५। २ ऽपि॥ २॥

भाषार्थः–(एषः) यह सोम (बृहते) बड़े (देवतातये) यज्ञ के लिये (धियायते) कर्म चाहता है (यत्र) जिस यज्ञ में (अमृतासः) वायु आदि देवता (आशत) खाते हैं॥ ऋ० ९। १५। २ में भी॥ २॥

अथ तृतीया–

३ १ २ ३ २ ३ २३ १ २ ३ १ २

एतं मृजन्ति मर्ज्यमुपद्रोणेष्वायवः।

३ २ ३ १र २र

प्र चक्राणं महीरिषः॥ ३॥ (१२६८)

पदपाठः–एतम् २। मृजन्ति क्रि०। मर्ज्यम् २। उप अ०। द्रोणेषु ७। आयवः १। प्रचक्राणम् २। महीः, इषः २॥

अन्वितपदार्थः–(आयवः) ऋत्विजो मनुष्याः (महीः, इषः, प्रचक्राणम्, एतम्) महान्ति, अन्नानि, अतिशयेनोत्पादयन्तमेतं (मर्ज्यम्) निष्पीडनीयं सोमं (द्रोणेषु) द्रोणकलशेषु (उप मृजन्ति) निष्पीडयन्ति॥ ऋग्वेदे ९। १५। ७ ऽपि॥ ३॥

भाषार्थः–(आयवः) ऋत्विज् लोग (महीः) बहुत (इषः) अन्नों को (प्रचक्राणम्) बहुतायत से उत्पन्न करने वाले (एतम्) इस (मर्ज्यम्) निचोड़ने योग्य सोम को (द्रोणेषु) द्रोण कलशों में (उपमृजन्ति) निचोड़ते हैं॥ ऋ० ९। १५। ७ में भी॥ ३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी-

३ २ ३ १ २ २ ३ २ ३ १ ९ ३ २
एष हितो विनीयतेऽन्तः शुन्ध्यावता पथा ।
१ २ ३ २ ३ १ २
यदी तुञ्जन्ति भूर्णयः ॥ ४ ॥ (१२६९)

पदपाठः-एषः, हितः १ । विनीयते क्रि० । अन्तः अ० । शुन्ध्यावता, पथा ३ । यदि अ० । तुञ्जन्ति क्रि० । भूर्णयः १ ॥

अन्वितपदार्थः-(यदि) यदा (भूर्णयः) भरणशीलाः, ये भूरि नयन्ति ते वा (तुञ्जन्ति) देवेभ्यः प्रयच्छन्ति यजन्ति तदा (एषः) सोमः (हितः) आच्छन्नः सन् (शुन्ध्यावता) शुद्धि-मता (पथा) मार्गेण (अन्तः) अभिषवस्थानादाहवनीय स्थानं प्रति तयोर्मध्ये (वि-नीयते) सावधानतया नीयते तैः ॥ ऋग्वेदे तु ९ । १५ । ३ शुभ्रावता इति पाठः ॥ ४ ॥

भाषार्थः-(यदि) जब (भूर्णयः) भरणशील व बहुत ले चलने वाले याज्ञिक लोग (तुञ्जन्ति) देवतों के लिये देते=यज्ञ करते हैं, तब (एषः) यह सोम (हितः) ढका हुवा (शुन्ध्यावता) शुद्धि वाले (पथा) मार्ग से (अन्तः) अभिषव स्थान से आहवनीय स्थान को दोनों के बीच में (वि-नीयते) विशेष सावधानी से लेजाया जाता है ॥ ऋ० ९ । १५ । ३ का पाठभेद संस्कृत भाष्य में देखिये ॥ ४ ॥

अथ पञ्चमी-

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः ।
२ ३ १ २ ३ १ २
पतिः सिन्धूनां भवन् ॥ ५ ॥ (१२७०)

पदपाठः-एषः १ । रुक्मिभिः ३ । ईयते क्रि० । वाजी १ । शुभ्रेभिः, अंशुभिः ३ । पतिः १ । सिन्धूनाम् ६ । भवन् १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

अन्वितपदार्थः-(वाजी) वेगवान् (एषः) अयं सोमः (सिन्धूनां) स्यन्दमानानां रसानां (पतिः) (भवन्) सन् (शुभ्रेभिः) शुभ्रैरुज्ज्वलैः (रुक्मिभिः) सुवर्णतुल्यभाभिः (अंशुभिः) सूर्यकिरणैः (ईयते) नीयते गच्छति वा ॥

यद्वाऽभिषवस्थानादावहनीयस्थानं प्रति सोमाऽऽनयनप्रकारमाह-(वाजी एषः) वेगवान्सोमः (रुक्मिभिः) स्वर्णकङ्कणादिधारिभिर्ऋत्विग्भिः (शुभ्रेभिः अंशुभिः) स्वच्छशुभ्रवस्त्रैः सह वर्त्तमानैः (ईयते) नीयते ॥ ऋग्वेदे ९ । १५ । ५ ऽपि ॥ ५ ॥

भाषार्थः-(वाजी) वेगवाला (एषः) यह सोम (सिन्धूनाम्) रसों का (पतिः) पति (भवन्) होता हुवा (रुक्मिभिः) सुवर्ण के से चमकीली (शुभ्रेभिः) उज्ज्वल (अंशुभिः) सूर्यकिरणों से (ईयते) लेजाया जाता है, वा जाता है ॥

अथवा-सोम को अभिषवस्थान से आहवनीयस्थान तक लेजाने का प्रकार कहते हैं कि सोम (रुक्मिभिः) सुवर्णकङ्कणादि धारने वाले ऋत्विजों द्वारा (शुभ्रेभिः) स्वच्छ श्वेत (अंशुभिः) वस्त्रों से (ईयते) लेजाया जाता है ॥ ऋ० ९ । १५ । ५ में भी ॥ ५ ॥

अथ षष्ठी—

३ १र २र ३ १ २ ३ १ २ ३ २ १ २
एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो वृषा ।
३ १र २र ३ १ २
नृम्णा दधान ओजसा ॥ ६ ॥ (१२७१)

पदपाठः-एषः १ । शृङ्गाणि २ । दोधुवत् क्रि० । शिशीते २ । यूथ्यः, वृषा १ । नृम्णा २ । दधानः १ । ओजसा ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-अधुना सोमं वृषालङ्कारेण वर्णयति (नृम्णा) बलानि (दधानः) धारयन् (एषः) सोमः (यूथ्य वृषा) यूथे भवो वृषभ इव (शिशीते) तीक्ष्णे (शृङ्गाणि) शृङ्गे (ओजसा) बलेन (दोधुवत्) धुनोति ॥ वृषशृङ्गवदुन्नतानंशून्सोमः प्रसारयतीति भावः ॥ ऋग्वेदे ९ । १५ । ४ ऽपि ॥ ६ ॥

भाषार्थः-अब सोम को बलवान् होने से वृषभके अलङ्कार में वर्णन करते हैं (नृम्णा) बलों को (दधानः) धारण किये हुवे (एषः) यह सोम (यूथ्यः, वृषा) यूथ में के वृष के समान (शिशीते) तीक्ष्ण (शृङ्गाणि) शृङ्गों को (दोधुवत्) कंपाता है अर्थात् बैल के समान उन्नत अंशुओं को फैलाता है॥ ऋ० ९ । १५ । ४ में भी ॥ ६ ॥

अथ सप्तमी-

३ १र २र ३ १र २र ३ १र २र
एष वसूनि पिब्दनः परुषा ययिवाँ अति ।
२३ १२
अव शादेषु गच्छति ॥ ७ ॥ (१२७२)

पदपाटः-एषः १ । वसूनि २ । पिब्दनः १ । परुषा ३ । ययिवान् १ । अति, अव अ० । शादेषु ७ । गच्छति क्रि० ॥

अन्वितपदार्थः-(वसूनि) आच्छादकानि रक्षः संज्ञकानि हिंसकानि प्राणिजातानि (पिब्दनः) पीडयन्नाशयंश्च (एषः) सोमः (परुषा) पर्वणा (अति) अतिक्रम्य (ययिवान्) गच्छन् (शादेषु) शातनीयेषु रक्षस्सु (अव गच्छति) ॥

सोम होमेन हिंसकाः सूक्ष्माः प्राणिनो वायुप्रभृतिगता नश्यन्ति तदर्थं हुतः सोमस्तान्गच्छति ॥ ऋग्वेदे ९ । १५ । ६ ऽपि ॥ ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

भाषार्थः-(वसूनि) दुष्ट प्राणियों को (पिप्रुदनः) पीड़ा देता हुवा (एषः) यह सोम (परुषा) पर्व से (अति) अतिक्रमण करके (ययिवान्) जाता हुवा (शादेषु) नाशनीय राक्षसों में (अव गच्छति) पहुंचता है ॥

अर्थात् सोम के हवन से वायुआदिगत दुष्ट प्राणी नष्ट होते हैं, इस लिये कि होमा हुवा सोम उन में पहुंचता है ॥ ऋ० ९ । १५ । ६ में भी ॥ ७ ॥

अथाऽष्टमी-

१ २ ३ २ ३ ३ २ ३ १ ३ ३ १ २
एतमु त्यं दश क्षिपो हरिꣳ हिन्वन्ति यातवे ।
३ २ ३ १ २
स्वायुधं मदिन्तमम् ॥८॥ [३] (१२७३)

पदपाठः-एतम् २ । उ अ० । त्यम् २ । दश, क्षिपः १ । हरिम् २ । हिन्वन्ति क्रि० । यातवे क्रि० । स्वायुधम्, मदिन्तमम् २ ॥

अन्वितपदार्थः-(हरिं) हरितं (त्यं) तम् (स्वायुधं) (मदिन्तमं) मादयितृतमम् (एतम् उ) एतमेव सोमं (दश) १० (क्षिपः) अङ्गुलयः (यातवे) प्रापणाय (हिन्वन्ति) प्रेरयन्ति । आयुधशब्देन यज्ञपात्राणि वेद्यानि, रक्षोहननसामर्थ्यप्रदर्शनाय च स्वायुधमित्यलंकारोक्तिः ॥ ऋग्वेदे तु ९ । १५ । ८ मृजन्ति सप्त धीतयः इति द्वितीय पादपाठे भेदः ॥ ८ ॥

भाषार्थः—(हरिम्) हरे (त्यम्) उस (स्वायुधम्) " उत्तम आयुध वाले" (मदिन्तमम्) अत्यन्त हृष्टिपुष्टिकारक (एतम् उ) इसी सोम को (दश) दस (क्षिपः) अङ्गुलियें (यातवे) पहुंचाने को (हिन्वन्ति) प्रेरती हैं ॥ राक्षसों के हनन का सामर्थ्य दिखाने को "उत्तम आयुध वाले" यह विशेषण अलङ्कारोक्ति है और आयुध शब्द से यज्ञपात्रों का भी ग्रहण है ॥ ऋ० ९ । १५ । ८ का पाठभेद संस्कृतभाष्य में देखिये ॥ ८ ॥

इति दशमाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीये खण्डे—

एष उ स्य इति षड्चस्य प्रथमसूक्तस्य—रहूगण ऋषिः । सोमोदेवता । गायत्रीछन्दः ॥

तत्र प्रथमा—

३ २ ३ २उ ३ २उ ३ १ २

एष उ स्य वृषा रथोऽव्या बारेभिरव्यत ।

२ ३ १ २ ३ १ २

गच्छन्वाजꣳ सहस्रिणम् ॥ १ ॥ (१२७४)

पदपाठः—एषः १ । उ अ० । स्यः, वृषा, रथः १ । अव्याः ६ । बारेभिः ३ । अव्यत क्रि० । गच्छन् १ । वाजम्, सहस्रिणम् २ ॥

अन्वितपदार्थः—(स्यः) सः (एषः) अयमभिषुतः सोमः (वृषा) वीर्यवर्धकोवीर्यवांश्च (रथः) रंहणस्वभावः (सहस्रिणं वाजम्) बहुपरिमाणकं बलं (गच्छन्) प्राप्नुवन् (अव्याः) अवेः (बारेभिः) बालैर्दशापवित्रेण (उ) पादपूरणे (अव्यत) द्रोणकलशं प्रति गच्छति ॥ ऋग्वेदे तु ९ । ३८ । १ अव्योवारेभिरर्षति इति पाठभेदः॥१॥

भाषार्थः—(स्यः) वह (एषः) यह अभिषुत सोम (वृषा) वीर्यवान् और वीर्यवर्धक है, (रथः) रपटने के स्वभाववाला है, सो (सहस्रिणम्) बहुत (वाजम्) बल को (गच्छन्) प्राप्त होता हुवा (अव्याः) भेड़ के (बारेभिः) बालों से बने दशापवित्र से (अव्यत) द्रोण कलश में को रपट जाता है ॥ ऋ० ९ । ३८ । १ का पाठभेद संस्कृत भाष्य में देखिये ॥ १ ॥

अथ द्वितीया—

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २

एतं त्रितस्य योषणो हरिꣳ हिन्वन्त्यद्रिभिः ।

२ ३ १ २ ३ १ २

इन्दुमिन्द्राय पीतये ॥ २ ॥ (१२७५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

पदपाठः-एतम् २। त्रितस्य ६। योषणः १। हरितम् २। हिन्वन्ति क्रि०। अद्रिभिः ३। इन्दुम् २। इन्द्राय, पीतये ४॥

अन्वितपदार्थः-(त्रितस्य) विद्याशिक्षाधर्मान्वितस्य विदुषऋत्विजः (योषणः) अङ्गुलयः [सायणाचार्योऽपि योषणोऽङ्गुलय इत्याह] (अद्रिभिः) अभिषवग्रावभिः (एतं) पूर्वोक्तगुणं (हरिम्) हरितमऽशुष्कम् (इन्दुं) सोमम् (पीतये) पानाय (इन्द्राय) वायुविशेषाय वर्षाकर्त्रे (हिन्वन्ति) प्रेरयन्ति ॥

ऋग्वेदे ९। ३८। २ ऽपि ॥ २ ॥

भावार्थः-(त्रितस्य) विद्या शिक्षा धर्मान्वित उत्तीर्ण विद्वान् ऋत्विज् की (योषणः) अङ्गुलियें (अद्रिभिः) अभिषवपाषाणों से (एतम्) इस (हरिम्) विना सूखे=हरे (इन्दुम्) सोम को (हिन्वन्ति) प्रेरित करती हैं ॥ ऋ० ९। ३८। २ में भी ॥ २ ॥

अथ तृतीया—

३ २ २र ३ २ ३ २उ ३ १ २
एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।
१ २ ३ २उ ३ १ २
गच्छन्नारो न योषितम् ॥ ३ ॥ (१२७६)

पदपाठः-एषः, स्यः १। मानुषीषु ७। आ अ०। श्येनः १। न अ०। विक्षु ७। सीदति क्रि०। गच्छन्, जारः १। न अ०। योषितम् २॥

अन्वितपदार्थः-(स्यः) सः (एषः) अयं सोमः (योषितं गच्छन् जारः) (नः) इव "गुप्तरूपेण" (मानुषीषु) (विक्षु) प्रजासु (श्येनः न) श्येनपक्षीव बलवान् वेगवांश्च (आसीदति) व्याप्नस्तिष्ठति ॥ ऋग्वेदे ९। ३८ ४। ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(एषः) यह (स्यः) वह सोम है जो (योषितम्) व्यभिचारिणी स्त्री से (गच्छन्) समागम करते हुवे (जारः) व्यभिचारी पुरुष के (न) समान 'गुप्तरूप से" (मानुषीषु) मनुष्यसम्बन्धिनी (विक्षु) प्रजाओं में (श्येनः) श्येन पक्षी (न) सा बलवान् (आ-सीदति) व्याप्त हुवा स्थित है ॥ ऋ० ९ । ३८ । ४ में भी ॥ ३ ॥

अथ चतुर्थी—

३२उ ३ १ २र ३१र २र
एष स्य मद्यो रसोऽवचष्टे दिवः शिशुः ।
२उ ३२३१ २
य इन्दुर्वारमाविशत् ॥ ४ ॥ (१२७७)

पदपाठः-एषः, स्यः, मद्यः, रसः १ । अव चष्टे क्रि० । दिवः ६ । शिशुः, यः, इन्दुः १ । वारम् २ । आविशत् क्रि० ॥

अन्वितपदार्थः-(एषः) अयं (स्यः) सः (मद्यः) हृष्टिपुष्टिकरः (रसः) सोमरसोऽस्ति (यः) (इन्दुः) आर्द्रः (वारम्) दशापवित्रम् (आविशत्) आविशति, यश्च (दिवः) द्युलोकस्य (शिशुः) पुत्र इव शंसनीय आह्लादकः (अव चष्टे) दृष्टिप्रसादं करोति ॥

ऋग्वेदे ९ । ३८ । ५ ऽपि ॥ ४ ॥

भाषार्थः-(एषः) यह (स्यः) वह (मद्यः) हृष्टिपुष्टिकारक (रसः) सोमरस है (यः) जो (इन्दुः) गीला (वारम्) दशापवित्र को (आविशत्) लिपट कर घुस जाता है और जो (दिवः) द्युलोक का (शिशुः) पुत्रवत् आह्लादक हो कर (अवचष्टे) दृष्टिप्रसाद करता है ॥ ऋ० ९ । ३८ । ५ में भी ॥४॥

अथ पञ्चमी-

३२उ ३१२ ३१र २र ३२
एष स्य पीतये सुतो हरिर्मिति धर्णसिः ।
२ ३१ २३ २३२
क्रन्दन्योनिमभिप्रियम् ॥ ५ ॥ (१२७८)

CC-0. Gurukul Kangri University Haridwar Collection.

पदपाठः—एषः, स्यः १। पीतये ४। सुतः, हरिः १। अर्षति क्रि०। धर्णसिः, क्रन्दन् १। योनिम् २। अभि अ०। प्रियम् २॥

अन्वितपदार्थः—(एषः) अयं (स्यः) सः सोमोस्ति यः (पीतये) पानार्थं (सुतः) अभिषुतः (हरिः) आर्द्रः (धर्णसिः) धारकः (प्रियम्) प्रीतिकरं (योनिम्) स्थानं द्रोणकलशं प्रति (क्रन्दन्) शब्दयन् (अभि-अर्षति) अभि गच्छति ॥ ऋग्वेदे ९। ३८। ६ऽपि ॥ ५ ॥

भाषार्थः—(एषः) यह (स्यः) वह सोम है जो (पीतये) पीने के लिये (सुतः) अभिषुत किया हुवा (हरिः) हरा गीला (धर्णसिः) धारण करने वाला और धैर्य का उत्पादक (प्रियम्) प्यारे (योनिम्) स्थान=द्रोणकलश एक प्रकार के पात्र में (क्रन्दन्) शब्द करता हुवा [सोडे के सा] उफान भरता हुवा (अभि-अर्षति) ठसाठस भर जाता है ॥ ऋ० ९। ३८। ६ में भी ॥५॥

अथ षष्ठी—

१२३ ३२३ १२ ३ १२ ३ १२
एतं त्यꣳ हरितो दश मर्मृज्यन्ते अपस्युवः।
२ ३ १ २३ १ २
याभिर्मदाय शुम्भते ॥६॥ [४] (१२७९)

पदपाठः—एतम्, त्यम् २। हरितः, दश १। मर्मृज्यन्ते क्रि०। अपस्युवः १। याभिः ३। मदाय ४। शुम्भते क्रि० ॥

अन्वितपदार्थः—(एतं) (त्यं) पूर्वोक्तं सोमम्अध्वर्योर्ऋत्विजः (दश) १० (अपस्युवः) कर्मेच्छवः (हरितः) अङ्गुलयः (मर्मृज्यन्ते) शोधयन्ति (याभिः) दशभिरङ्गुलिभिः (मदाय) हृष्टये (शुम्भते) शोध्यते ॥
ऋग्वेदे ९। ३८। ३ऽपि ॥ ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(एतम्) इस (त्यम्) पूर्वोक्त सोम को अध्वर्यु ऋत्विज् की (दश) दश १० (अपस्युवः) कर्म चाहती हुई (हरितः) अङ्गुलियें (मर्मृज्यन्ते) शोधती हैं (याभिः) जिन अङ्गुलियों से (मदाय) हृष्टि पुष्टि के लिये (शुम्भते) शोधा जाता है ॥ ऋ० ९ । ३८ । ३ में भी ॥ ६ ॥

इति दशमाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थे खण्डे-

एषवाजीति षड्चस्य-प्रियमेध ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ २ ३ १ २ २ ३ १ २ २ ३ १ २
एष वाजी हितो नृभिर्विश्ववित्मनसस्पतिः ।
२ ३ २ ३ १ २
अव्यं वारं विधावति ॥ १ ॥ (१२८०)

पदपाठः-एषः, वाजी, हितः १ । नृभिः ३ । विश्ववित् १ । मनसः ६ । पतिः १ । अव्यम्, वारम् २ । विधावति क्रि० ॥

अन्वितपदार्थः-(एषः) अयं (वाजी) बलवान् सोमः (नृभिः) ऋत्विग्भिः (हितः) धारितः (विश्ववित्) विश्वं विन्दति सः (मनसः पतिः) हृदयस्य पोषकोऽस्ति, सोऽयम् (अव्यम्) ऊर्णामयं (वारं) बालं दशापवित्रं (विधावति) विविधं गच्छति ॥ ऋग्वेदे तु ९ । २८ । १ अव्यः इति प्रथमान्तपाठः ॥ १ ॥

भाषार्थः-(एषः) यह (वाजी) बलवान् सोम (नृभिः) कर्म के नेता लोगों ऋत्विजों से (हितः) धारण किया हुवा (विश्ववित्) सब को मिलने वाला (मनसः) मन का (पतिः) पालन पोषण करने वाला है, सो यह (अव्यम्) ऊनी (वारम्) दशापवित्र को (विधावति) विविध प्रकार से जाता है ॥ चन्द्रमा की उत्पत्ति वेद में समष्टि मन से वर्णन की है और सोमरस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

का चन्द्रमा से बहुत साधर्म्य है, इस लिये यहां व्यष्टिगत मन का भी सोमरस को पोषक बताना युक्त है ॥ ऋ० ९ । २८ । १ का पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया-

३२ ३ १ २ ३ १ २ ३१ ३ १ २
एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः ।
२ ३ १ २ ३ २
विश्वा धामान्याविशन् ॥ २ ॥ (१२८१)

पदपाठः-एषः १ । पवित्रे ७ । अक्षरत् क्रि० । सोमः १ । देवेभ्यः ४ । सुतः १ । विश्वा, धामानि २ । आविशन् १ ॥

अन्वितपदार्थः-(एषः) अयं (सोमः) ओषधिराट् (विश्वा) विश्वानि (धामानि) स्थानानि (आविशन्) सन् (देवेभ्यः) वाय्वादिदेवार्थम् (सुतः) अभिषुतः (पवित्रे) दशापवित्रे (अक्षरत्) क्षरति ॥ ऋग्वेदे ९ । २८ । २ऽपि ॥ २ ॥

भाषार्थः-(एषः) यह (सोमः) सोम (विश्वा) सब (धामानि) स्थानों में (आविशन्) प्रवेश करता हुवा (देवेभ्यः) वायु आदि देवों के लिये (सुतः) अभिषुत हुवा (पवित्रे) दशापवित्र पर (अक्षरत्) टपकता है ॥ ऋ० ९ । २८ । २ में भी ॥ २ ॥

अथ तृतीया-

३२ ३१ २ ३ २ ३ २ ३ १ २
एष देवः शुभायते ऽधि योनावऽमर्त्यः ।
३ १ २ ३ १ २
वृत्रहा देववीतमः ॥ ३ ॥ (१२८२)

पदपाठः-एषः, देवः १ । शुभायते क्रि० । अधि अ० । योनौ ७ । अमर्त्यः, वृत्रहा, देववीतमः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(अमर्त्यः) अमृतरूपः (देववीतमः) देवानां भोजनीयतमः (वृत्रहा) रोगादिशत्रुनाशकः (एषः देवः) सोमः (अधि योनौ) स्थाने (शुभायते) शुभं करोति ॥ ऋग्वेदे ९ । २८ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(अमर्त्यः) अमृतरूप (देववीतमः) देवों का सर्वोत्तम भोजन (वृत्रहा) रोगादि शत्रुओं का घातक (एषः) यह (देवः) दिव्य-गुणयुक्त सोम (अधि योनौ) स्थान में (शुभायते) शुभ करता है ॥

ऋ० ९ । २८ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

३२उ १ १ २ ३ १ २ ३ १ २ ३ २

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः ।

३ १ २र

अभि द्रोणानि धावति ॥ ४ ॥ (१२८३)

पदपाठः—एषः, वृषा १ । कनिक्रदत् १ । दशभिः, जामिभिः ३ । यतः १ । अभि अ० । द्रोणानि २ । धावति क्रि० ॥

अन्वितपदार्थः—(एषः) अयं सोमः (वृषा) वीर्यवान् वीर्यप्रदो वृष्टिकरश्च (कनिक्रदत्) शब्दं कुर्वन् (दशभिः) अङ्गुलिभिः (यतः) बहुधृतः (द्रोणानि) द्रुममयानि द्रोणकलशाख्यानि यज्ञपात्राणि (अभि-धावति) अभि गच्छति ॥ ऋग्वेदे ९ । २८ । ४ ऽपि ॥ ४ ॥

भाषार्थः—(एषः) यह सोम (वृषा) वीर्यवान् वीर्यप्रद और वृष्टिकर्त्ता है (कनिक्रदत्) शब्द करता हुवा (दशभिः) दशों (जामिभिः) अङ्गुलियों से (यतः) दबाया=निचोड़ा हुवा (द्रोणानि) द्रुम=वृक्षों से बने काष्ठमय द्रोणकलशनामक यज्ञपात्रों में (अभि धावति) अभितः जाता है ॥ ऋ० ९ । २८ । ४ में भी ॥ ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

अथ पञ्चमी—

३ १ २र ३ १ २ ३ २ ३ १२
एष सूर्यमरोचयत्पवमानो अधि द्यवि ।
३ १ २ ३ १र २र
पवित्रे मत्सरो मदः ॥ ५ ॥ (१२८४)

पदपाठः—एषः १ । सूर्यम् २ । अरोचयत् क्रि० । पवमानः १ । अधि अ० । द्यवि, पवित्रे ७ । मत्सरः, मदः १ ॥

अन्वितपदार्थः—(एषः) अयं (मत्सरः मदः) निर्विडोहर्षकरः (पवमानः) सोमः (पवित्रे द्यवि अधि) पवित्रे द्युलोके (सूर्यमरोचयत्) ॥ आधिदैविकाऽऽधिभौतिकाऽऽध्यात्मिकभेदेन सूर्यस्त्रिधा वर्त्तते, अभिषुतोहुतः पीतश्च सोमस्त्रिविधं सूर्यं रोचयति । वृष्टिकारणभूतः सूर्यांशः सोमहोमेनाप्यायितो भूत्वा वर्षयति, तत्पानेन मानसः सूर्यश्च नितरां प्रकाशते ॥ ऋग्वेदे तु ९ । २८ । ५ अधि द्यवि=विचर्षणि, पवित्रे मत्सरो मदः=विश्वाधामानि विश्वविदिति पाठभेदस्तदर्थभेदश्च ॥ ५ ॥

भाषार्थः—(एषः) यह (मत्सरः) गाढ़ा (मदः) हर्षकारक (पवमानः) सोम (पवित्रे) पवित्र (द्यवि अधि) द्युलोक में (सूर्यम्) सूर्य को (अरोचयत्) प्रकाशित करता है ॥

आध्यात्मिक आधिभौतिक और आधिदैविक भेद से ३ प्रकार का सूर्य है। अभिषुत किया, हवन किया और पिया हुवा सोम उस तीनों प्रकार के सूर्य को रुचि देता है, वृष्टि का कारण जो सूर्यांश है, वह सोम के हवन से ऐसी वृद्धि पाता है कि वर्षा करे, सोम के पीने से मानस सूर्य की रुचि बढ़ती है ॥ ऋ० ९ । २८ । ५ का पाठभेद संस्कृतभाष्य में देखिये और तदनुसार अर्थ भेद है ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ षष्ठी-

३ १ २र ३ १ २ ३ १ २
एष सूर्येण हासते संवसानो विवस्वता ।
१ २ ३ १र २र
पतिर्वाचो अदाभ्यः ॥ ६ ॥ [५] (१२८५)

पदपाठः-एषः १ । सूर्येण ३ । हासते क्रि० । संवसानः १ । विवस्वता ३ । पतिः १ । वाचः ६ । अदाभ्यः १ ॥

अन्वितपदार्थः-(अदाभ्यः) अनिवार्यवीर्यः (वाचः पतिः) वाक्सौष्ठवकरः (संवसानः) सर्वमाच्छादयन् (एषः) सोमः (विवस्वता) दीप्तिमता (सूर्येण), (हासते) पृथिव्यां वृष्ट्या सह त्यज्यते ॥ ऋग्वेदे ९ । २८ । ६ ऽपि ॥६॥

भाषार्थः-(अदाभ्यः) अनिवार्यवीर्य, (वाचः पतिः) वाणी का सुधारक पालक पोषक, (संवसानः) सब का आच्छादन करता हुवा, (एषः) यह सोम-(विवस्वता सूर्येण) प्रकाशवाले सूर्य से (हासते) पृथिवी पर वर्षा के साथ त्यागा=छोड़ा जाता है ॥ ऋ० ९ । २८ । ६ में भी ॥ ६ ॥

इति दशमाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमे खण्डे-

एष कविरिति षड्वस्य-नृमेधऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ २३१ २ ३ २ ३ १ २
एष कविरभिष्टुतः पवित्रे अधि तोशत ।
३ २उ ३ १ २
पुनानोघ्नन्नप द्विषः ॥ १ ॥ (१२८६)

पदपाठः-एषः, कविः, अभिष्टुतः १ । पवित्रे ७ । अधि अ० । तोशत क्रि० । पुनानः १ । घ्नन् १ । अप अ० । द्विषः २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

अन्वितपदार्थः-(अभिष्टुतः) प्रशस्तः (कविः) मेधातत्त्ववान् (पवित्रे अधि पुनानः) दशापवित्रे शोध्यमानः (एषः) अयंसोमः (द्विषः) रोगादिशत्रून् (अपघ्नन्) अपबाधमानः (तोशत) तान्नाशयति। तोशतिर्वधकर्मेति सायणः॥ ऋग्वेदे तु ९।२७।१ द्विषः=स्निधः इति पाठः॥ १॥

भाषार्थः-(अभिष्टुतः) प्रशंसित (कविः) बुद्धितत्त्वयुक्त (पवित्रे अधि) दशापवित्र पर (पुनानः) शोध्यमान (एषः) यह सोम (द्विषः) रोगादि शत्रुओं को (अपघ्नन्) बाधित करता हुवा (तोशत) उन का नाश करता है॥ ऋ० ९।२७।१ का पाठान्तर और सायण का प्रमाण संस्कृत भाष्य में देखिये॥ १॥

अथ द्वितीया-

३१ २र ३१२ ३१र २र
एष इन्द्राय वायवे स्वर्जित्परिषिच्यते।
३१२ ३१२
पवित्रे दक्षसाधनः॥ २॥ (१२८७)

पदपाठः-एषः १। इन्द्राय, वायवे ४। स्वर्जित् १। परिषिच्यते क्रि०। पवित्रे ७। दक्षसाधनः १॥

अन्वितपदार्थः-(दक्षसाधनः) बलकारी (स्वर्जित्) स्वर्गस्य सुखस्य जेता (एषः) सोमः (इन्द्राय वायवे) इन्द्रनाम्ने पवनाय (पवित्रे) दशापवित्रे (परिषिच्यते) परिस्राव्यतेऽभिषूयेति भावः॥ ऋग्वेदे ९।२७।२ऽपि॥२॥

भाषार्थः-(दक्षसाधनः) बलकारी (स्वर्जित्) और सुख का जीतने वाला (एषः) यह सोम (इन्द्राय वायवे) इन्द्रनामक वायु के लिये अभिषुत करके (पवित्रे) दशापवित्र पर (परिषिच्यते) टपकाया जाता है॥ ऋ० ९।२७।२ में भी॥ २॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३२उ ३१ २ ३२ ३१र २र ३२
एष नृभिर्विनीयते दिवोमूर्धा वृषा सुतः ।
२ ३ १२ ३ २
सोमो वनेषु विश्ववित् ॥ ३ ॥ (१२८८)

पदपाठः—एषः १ । नृभिः ३ । विनीयते क्रि० । दिवः ६ । मूर्धा, वृषा, सुतः, सोमः १ । वनेषु ७ । विश्ववित् १ ॥

अन्वितपदार्थः—(दिवः) स्वर्गस्य सुखस्य वा (मूर्धा) मस्तकतुल्यः (वृषा) वर्षकः (विश्ववित्) विश्वलाभः (एषः) अयं (सोमः) ओषधिराजः (सुतः) अभिषुतः सन् (वनेषु) वसतीवरीनामकेषु जलेषु (नृभिः) ऋत्विग्भिः (विनीयते) संस्क्रियते ॥ ऋग्वेदे ९ । २७ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(दिवः) द्युलोक वा सुख का (मूर्धा) मस्तकतुल्य (वृषा) वृष्टिहेतु (विश्ववित्) विश्व का लाभ (एषः) यह (सोमः) सोम (सुतः) अभिषुत किया हुवा (वनेषु) वसतीवरीसंज्ञक जलों में (नृभिः) कर्म के नेता ऋत्विजों द्वारा (विनीयते) संस्कृत किया जाता है ॥ ऋ० ९ । २७ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

३२३१२ ३१२ ३२
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः ।
१२ ३१र २र
इन्दुः सत्राजिदस्तृतः ॥ ४ ॥ (१२८९)

पदपाठः—एषः, गव्युः १ । अचिक्रदत् क्रि० । पवमानः, हिरण्ययुः, इन्दुः, सत्राजित्, अस्तृतः १ ॥

अन्वितपदार्थः—(गव्युः) गाः सूर्यकिरणानिच्छति सः, अतएव (हिरण्ययुः) हिरण्यं तेजइच्छति सः, (इन्दुः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

य इन्द्वे सः, (सत्राजित्) सदा जेता, (अस्तृतः) स्वयमहिंसितोऽविजितः (एषः) अयं (पवमानः) सोमः (अचिक्रदत्) शब्दायते ॥ ऋग्वेदे ९ । २७ । ४ ऽपि ॥ ४ ॥

भाषार्थः—(गव्युः) सूर्यकिरणों को चाहने वाला और (हिरण्ययुः) तेज चाहने वाला (इन्दुः) प्रकाश करने वाला (सत्राजित्) सदा जीतने वाला और (अस्तृतः) स्वयं अन्यों से न हारने वाला (एषः) यह (पवमानः) सोम (अचिक्रदत्) शब्द करता है । ऋ० ९ । २७ । ४ में भी ॥ ४ ॥

अथ पञ्चमी—

३ २ ३क २र ३ १ २ ३ २ ३ १ २

एष शुष्म्यऽसिष्यददऽन्तरिक्षे वृषा हरिः ।

३ २उ ३ २ ३ २

पुनान इन्दुरिन्द्रमा ॥ ५ ॥ (१२९०)

पदपाठः—एषः, शुष्मी १ । असिष्यदत् क्रि० । अन्तरिक्षे ७ । वृषा, हरिः, पुनानः, इन्दुः १ । इन्द्रम् २ । आ अ० ॥

अन्वितपदार्थः—(शुष्मी) बलवान् (वृषा) वृष्टिकरः (हरिः) हरितवर्णः (पुनानः) शुद्धिं कुर्वाणः (एषः) अयम् (इन्दुः) सोमः (अन्तरिक्षे), (इन्द्रम्) वायुविशेषम् (आऽसिष्यदत्) गच्छति ॥ ऋग्वेदे ९।२७।५ऽपि॥५॥

भाषार्थः—(शुष्मी) बलवान् (वृषा) वृष्टिकर्त्ता (हरिः) हरा (पुनानः) शुद्धि करता हुवा (एषः) यह (इन्दुः) सोम (अन्तरिक्षे) आकाश में (इन्दुम्) वायुविशेष को (आऽसिष्यदत्) प्राप्त होता है ॥ ऋ० ९ । २७ । ५ में भी ॥ ५ ॥

अथ षष्ठी—

३ २ ३ १ २ ३ १ २ ३ १ २

एष शुष्म्यऽदाभ्यः सोमः पुनानो अर्षति ।

३ १ २ ३ २

देवावीरघशꣳसहा ॥ ६ ॥ [६] (१२९१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-एषः, शुष्मी, अदाभ्यः, सोमः, पुनानः १। अर्षति क्रि०। देवावीः, अघशंसहा १॥

अन्वितपदार्थः-(शुष्मी) बलवान् (अदाभ्यः) अहिंसनीयः (देवावीः) देवानां भक्ष्योत्तमः (अघशंसहा) पापहा (एषः) अयं (सोमः) ओषधिराट् (पुनानः) पूयमानः (अर्षति) गच्छति दिवमिति शेषः ॥

ऋग्वेदे ९। २८। ६ऽपि ॥ ६ ॥

भावार्थः-(शुष्मी) बलवान् (अदाभ्यः) नष्ट न करने योग्य (देवावीः) देवों का उत्तम भोजन (अघशंसहा) पाप का नाशक (एषः) यह (सोमः) सोम (पुनानः) शोध्यमान (अर्षति) [आकाश को] जाता है ॥

ऋ० ९। २८। ६ में भी ॥ ६ ॥

इति दशमाध्यायस्य-पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे—

सनुत इति षडृचस्य-रहूगणऋषिः। सोमो देवता। गायत्रीछन्दः ॥

तत्र प्रथमा—

२ १२ ३ २३ २३ १२ २ ३ १ २

स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।

१ १२ २२ ३ २

विघ्नन् रक्षाꣳसि देवयुः ॥ १ ॥ (१२९२)

पदपाठः-सः, सुतः १। पीतये ४। वृषा, सोमः १। पवित्रे ७। अर्षति क्रि०। विघ्नन् १। रक्षांसि २। देवयुः १ ॥

अन्वितपदार्थः-(वृषा) वृष्यः (देवयुः) देवकामः (सः) सोमः (पीतये) पानाय देवपानाय यज्ञाय (सुतः) अभिषुतः (रक्षांसि) राक्षसान् (विघ्नन्) विशेषेण नाशयन् (पवित्रे) पावनेऽन्तरिक्षे (अर्षति) गच्छति ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

ऋग्वेदे ९ । ३७ । १ ऽपि ॥ १ ॥

भाषार्थः–(वृषा) वीर्यवान् (देवयुः) देवकाम (सः) वह सोम (पीतये) देवतों के पानार्थ (सुतः) अभिषुत किया हुवा (रक्षांसि) राक्षसों को (विघ्नन्) विशेषकर नष्ट करता हुवा (पवित्रे) पवित्र अन्तरिक्ष में (अर्षति) जाता है ॥ ऋ० ९ । ३७ । १ में भी ॥ १ ॥

अथ द्वितीया–

२ ३१ २ ३ १र २र ३ २

स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ।

३ २उ ३ १ २

अभि योनिं कनिक्रदत् ॥ २ ॥ (१२९३)

पदपाठः–सः १ । पवित्रे ७ । विचक्षणः, हरिः १ । अर्षति क्रि० । धर्णसिः १ । अभि अ० । योनिम् २ । कनिक्रदत् १ ॥

अन्वितपदार्थः–(धर्णसिः) धारकः (विचक्षणः) चक्षुष्यः (हरिः) हरितवर्णः (सः) सोमः (कनिक्रदत्) शब्दायमानः (पवित्रे) अन्तरिक्षे सूर्यकिरणसमूहे (योनिम् अभि) स्थानमभिलक्ष्य (अर्षति) गच्छति ॥

ऋग्वेदे ९ । ३७ । २ ऽपि ॥ २ ॥

भाषार्थः–(धर्णसिः) धारक (विचक्षणः) आंख का हितकारी (हरिः) हरा (सः) वह सोम (कनिक्रदत्) शब्द करता हुवा (पवित्रे) पवित्र अन्तरिक्ष वा सूर्यकिरणसमूह में (योनिम्) स्थान को (अभि) लक्ष्यकरके (अर्षति) जाता है ॥ ऋ० ९ । ३७ । २ में भी ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३ २ ३ १र २र ३ १ २

स वाजी रोचनं दिवः पवमानो विधावति ।

३ १र २र ३ १ २

रक्षोहा वारमव्ययम् ॥ ३ ॥ (१२९४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-सः, वाजी १ । रोचनम् १ । दिवः ६ । पवमानः १ । विधावति क्रि० । रक्षोहा १ । बारम्, अव्ययम् २ ॥

अन्वितपदार्थः-(दिवः) द्युलोकस्य (रोचनं) रोचकः (वाजी) बलवान् (रक्षोहा) रक्षोघ्नः (सः) पूर्वोक्तगुणः (पवमानः) सोमः (अव्ययम्) ऊर्णामयं (बारम्) दशापवित्रम् (विधावति) वैचित्र्येण गच्छति ॥ ऋग्वेदे ९ । ३७ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(दिवः) द्युलोक का (रोचनम्) रोचक (वाजी) बलवान् (रक्षोहा) राक्षसहन्ता (सः) वह (पवमानः) सोम (अव्ययम्) ऊनी (बारम्) दशापवित्र पर (विधावति) विविध प्रकार से जाता है ॥ ऋ० ९ । ३७ । ३ में भी ॥ ३ ॥

अथ चतुर्थी—

२ ३ २उ ३ १ २ ३ १ २
स त्रितस्याधि सानवि पवमानो अरोचयत् ।
३ २ ३ १ २ ३ २
जामिभिः सूर्यꣳ सह ॥ ४ ॥ (१२९५)

पदपाठः-सः १ । त्रितस्य ६ । अधि अ० । सानवि ७ । पवमानः १ । अरोचयत् क्रि० । जामिभिः ३ । सूर्यम् २ । सह अ० ॥

अन्वितपदार्थः-(त्रितस्य) विद्याशिक्षाधर्मान्वितस्य विदुषऋत्विजः (अधि सानवि) समुच्छ्रिते यज्ञे (पवमानः) पूयमानः (सः) सोमः (जामिभिः) अन्तरिक्षगाभिरद्भिः [निघं० १ । १२] (सह) (सूर्यं) द्वादशात्मानम् (अरोचयत्) रोचयति ॥ ऋग्वेदे ९ । ३७ । ४ ऽपि ॥ ४ ॥

भाषार्थः-(त्रितस्य) विद्या शिक्षा और धर्म इन ३ पदार्थों से युक्त विद्वान् ऋत्विज् के (अधि सानवि) उच्च यज्ञ में (पवमानः) शोध्यमान

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

(सः) वह सोम (जामिभिः) जलों के [निघं० १। १२] (सह) साथ (सूर्यम्) सूर्य को (अरोचयत्) प्रकाशित करता है॥ ऋ० ९। ३७। ४ में भी॥४॥

अथ पञ्चमी-

१ २ ३ १र २र ३ १ २ ३ १ २र
स वृत्रहा वृषा सुतो वरिवोविददाभ्यः।
२ ३ १ २
सोमो वाजमिवासरत् ॥५॥ (१२९६)

पदपाठः-सः, वृत्रहा, वृषा, सुतः, वरिवोवित्, अदाभ्यः, सोमः १। वाजमिव अ०। असरत् क्रि०॥

अन्वितपदार्थः-(सः) सोमः (वृत्रहा) शत्रुहा (वृषा) वृष्यः (सुतः) अभिषुतः (वरिवोवित्) यष्टुर्धनस्य लम्भकः (अदाभ्यः) अहिंस्यः एवंविधगुणः सन् (वाजमिव) संग्रामाश्वइव (असरत्) गच्छति वेगेन॥ ऋग्वेदे ९। ३७ ५ऽपि॥५॥

भाषार्थः-(सः) वह सोम (वृत्रहा) रोगादिशत्रुघातक (वृषा) वृष्य वीर्यवान् वीर्यवर्धक वर्षा करने वाला (सुतः) अभिषव किया हुवा (वरिवोवित्) यजमान को धनादि लाभ कराने वाला (अदाभ्यः) नष्ट करने योग्य नहीं है, सो (वाजमिव) संग्राम के घोड़े के समान (असरत्) वेग से जाता है॥ ऋ० ९। ३७। ५ में भी॥५॥

अथ षष्ठी-

२ ३ २ १ १ २ ३ २ १र २र
स देवः कविनेषितोऽभिद्रोणानि धावति।
२ ३ १ २ ३ १ २
इन्दुरिन्द्राय मंहयन् ॥६॥ (१२९७)

पदपाठः-सः, देवः १। कविना ३। इषितः १। अभि अ०। द्रोणानि २। धावति क्रि०। इन्दुः १। इन्द्राय ४=२। मंहयन् १॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(सः) सोमः (देवः) द्योतमानः (इन्दुः) क्लिद्यमानः (कविना) मेधाविनाऽध्वर्युणा (इषितः) प्रेरितः सन् (द्रोणानि) द्रोणकलशान् (अभि धावति) अभिगच्छति । किं कुर्वन् ? (इन्द्राय) इन्द्रं वायुविशेषं (मंहयन्) स्वरसेन पूजयन् ॥ ऋग्वेदे तु ९ । ३७ । ६ मंहयन्=मंहना इति पाठः ॥ ६ ॥

भाषार्थः-(सः) वह सोम (इन्द्राय) वायुविशेष को (संहयन्) सत्कृत करता हुवा (देवः) द्योतमान और (इन्दुः) गीला किया हुवा (कविना) मेधावी अध्वर्यु से (इषितः) प्रेरित हुवा (द्रोणानि) द्रोणकलशों के (अभि) प्रति (धावति) वेग से जाता है ॥ ऋ० ९ । ३७ । ६ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ६ ॥

इति दशमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

—*—

अथ सप्तमे खण्डे-

यः पावमानीरिति षड्ऋचस्य-पवित्रऋषिः । पावमान्यऋचो देवताः ।

अनुष्टुप्छन्दः ॥ तत्र प्रथमा-

१ २ ३ २ ३ १र २र ३ १ २ ३ १ २

यः पावमानीरध्येत्यृषिभिः संभृतꣳ रसम् ।

२ ३ २ ३ १ २ ३ १ २ ३ १ २

सर्वꣳ स पूतमश्नाति स्वदितं मातरिश्वना ॥ १ ॥ (१२९८)

पदपाठः-यः १ । पावमानीः २ । अध्येति क्रि० । ऋषिभिः ३ । संभृतं, रसम्, सर्वम् २ । सः १ । पूतम् २ । अश्नाति क्रि० । स्वदितम् २ । मातरिश्वना ३ ॥

अन्वितपदार्थः-पवमानप्रकरणं समापयन् अध्ययन-फलमाह-(यः) पुरुषः (ऋषिभिः) ज्ञानिभिः (संभृतं) संपादितं (रसम्) वेदसाररूपं (पावमानीः) पावमानं सूक्तसंघम् (अध्येति) साङ्गोपाङ्गं पठति (सः) पुरुषः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by

(मातरिश्वना) वायुना (स्वदितं) स्वादूकृतं (पूतं) शोधितं च (सर्वम्) भोज्यजातम् (अश्नोति) भुङ्क्ते ॥ ऋग्वेदे ९ । ६७ । ३१ ऽपि ॥ १ ॥

भाषार्थः-पवमान सोम के प्रकरण को समाप्त करते हुवे इस प्रकरण के अध्ययन का फल कहते हैं-(यः) जो मनुष्य (ऋषिभिः) ऋषियों के (संभृतम्) संग्रह किये हुवे (रसम्) वेद के सार रूप (पावमानीः) पवमान सोम देवता सम्बन्धिसूक्तसमूह को (अध्येति) साङ्गोपाङ्ग पढ़ता है (सः) वह मनुष्य (मातरिश्वना) वायु से (स्वदितम्) स्वादु किये हुवे और (पूतम्) पवित्र किये हुवे (सर्वम्) सब भोज्यपदार्थों को (अश्नाति) खाता है ॥ ऋ० ९ । ६७ । ३१ में भी ॥ १ ॥

अथ द्वितीया-

३ २उ ३ १र २र ३ १ २ ३ १ २
पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम् ।
२ ३ १ २ ३ २ ३ १र २र ३ २
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥२॥ (१२९९)

पदपाठः-पावमानीः २ । यः १ । अध्येति क्रि० । ऋषिभिः ३ । संभृतम्, रसम् २ । तस्मै ४ । सरस्वती १ । दुहे क्रि० । क्षीरम्, सर्पिः, मधु, उदकम् २॥

अन्वितपदार्थः-(यः) वेदविद् (पावमानीः) पवमानदेवताका ऋचः (ऋषिभिः संभृतं रसम् अध्येति), (तस्मै) वेदविदेऽध्येत्रे जनाय (सरस्वती) वेदवाग्देवता (क्षीरं) पयः (सर्पिः) घृतं (मधु) मधुरम् (उदकं) जलं च (दुहे) दोग्धि ॥ ऋग्वेदे ९ । ६७ । ३२ ऽपि ॥ २ ॥

भाषार्थः-(यः) जो (पावमानीः) पवमान देवता की ऋचों के (ऋषिभिः संभृतं रसम्) ऋषियों द्वारा संगृहीत वेद के सार रूप सूक्तसमुदाय का (अध्येति) पाठ करता है (सरस्वती) वेदवाणीरूपिणी देवता (तस्मै) उस के लिये (क्षीरम्) दुग्ध (सर्पिः) घृत और (मधु) मीठे (उदकम्) जल (दुहे) भर पूर देती है ॥ ऋ० ९ । ६७ । ३२ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

३ २ ३ १ २ ३२३ १ २३ १ २
पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्च्युतः ।
१ २३ १२३ १२ ३ २३१२ ३२
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतꣳ हितम्॥३॥(१३००)

पदपाठः-पावमानीः, स्वस्त्ययनीः, सुदुघाः १ । हि अ० । घृतश्च्युतः १ । ऋषिभिः ३ । संभृतः, रसः १ । ब्राह्मणेषु ७ । अमृतं, हितम् १ ॥

अन्वितपदार्थः-(पावमानीः) पावमान्यः ऋचः (स्वस्त्ययनीः) क्षेमप्रापिकाः (सुदुघाः) सुष्टु फलं दुहानाः (घृतश्च्युतः) जलवर्षणाः सन्ति । सएष पावमानसूक्तसमुदायः (ऋषिभिः) ज्ञानिभिः (संभृत) सञ्चितः (रसः) वेदसारः (ब्राह्मणेषु) वेदपाठिषु (हि) तदेतत् (अमृतम्) अमरणधर्मकं बलं (हितम्) निहितम् ॥ ३ ॥

भाषार्थः-(पावमानीः) सोम प्रकरण की ऋचायें (स्वस्त्ययनीः) कल्याणी हैं, वे (सुदुघाः) सुन्दर फल की देने वाली हैं, वे (घृतश्च्युतः) जल की वर्षाने वाली हैं (ऋषिभिः) मन्त्रद्रष्टा ऋषियों ने (रसः) यह वेद का सार (संभृतः) इकट्ठा किया है (हि) सो यह (ब्राह्मणेषु) वेदपाठियों में (अमृतम्) अमर बल (हितम्) रक्खा हुवा है ॥

अर्थात् जो पवमानसूक्त पढ़ते हैं, उन को उस के अनुकूल आचरण करने से सब सुख, वर्षा, दीर्घायु आदि फल प्राप्त होते हैं, इस लिये पवमानसूक्त मानो अमृतरूप हैं और वेद का सार हैं ॥ ३ ॥

अथ चतुर्थी-

३ १२ ३२ ३१र २र ३ २
पावमानीर्दधन्तु न इमं लोकमथो अमुम् ।
२३ १२ ३२३२ १२३
कामान्त्समर्धयन्तु नो देवीर्देवैः समाहताः ॥४॥ (१३०१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-पावमानीः १ । दधन्तु क्रि० । नः ६ । इमम्, लोकम् २ । अथो अ० । अमुम् २ । कामान् २ । समर्धयन्तु क्रि० । नः ६ । देवीः १ । देवैः ३ । समाहृताः १ ॥

अन्वितपदार्थः-(देवीः) दिव्यगुणाः (पावमानीः) पवमानदेवताका ऋचः (नः) अस्माकं वेदपाठिनाम् (इमं लोकम् अथो अमुम्) लोकं (दधन्तु) धारयन्तु तथा (देवैः) विद्वद्भिः (समाहृताः) संगृहीतास्ता ऋचः (नः) अस्माकम् (कामान् समर्धयन्तु) ॥ ४ ॥

भाषार्थः-(देवीः) दिव्यगुणयुक्त (पावमानीः) पवमानदेवता की ऋचायें (नः) हमारे (इमम्) इस (लोकम्) लोक (अथो) और (अमुम्) परलोक को (दधन्तु) धारित करें तथा (देवैः) विद्वानों से (समाहृताः) संगृहीत की हुई वे ऋचायें-(नः) हमारे (कामान्) कामों को (समर्धयन्तु) समृद्ध करें ॥४॥

अथ पञ्चमी-

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २

येन देवाः पवित्रेणात्मानं पुनते सदा ।

१ २ ३ १ २ ३ १ २

तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥५॥ (१३०२)

पदपाठः-येन ३ । देवाः १ । पवित्रेण ३ । आत्मानम् २ । पुनते क्रि० । सदा अ० । तेन ३ । सहस्रधारेण ३ । पावमानीः १ । पुनन्तु क्रि० । नः २ ॥

अन्वितपदार्थः-(देवाः) वाय्वादयः (येन) (सहस्रधारेण) सूर्येण (सदा) (आत्मानं) स्वं (पुनते) शोधयन्ति (तेन) सूर्येण (पावमानीः) ऋचः (नः) अस्मान् (पुनन्तु) ॥ ५ ॥

भाषार्थः-(देवाः) वायुआदि देवता (येन) जिस (सहस्रधारेण) सहस्रकिरण सूर्य से (सदा) सर्वदा (आत्मानम्) आपे को (पुनते) शुद्ध करते हैं (तेन) उस सूर्य से (पावमानीः) पवमान देवता की ऋचायें (नः) हम को (पुनन्तु) शुद्ध करें ॥ ५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ षष्ठी—

३ २ ३ १२३ १ २ ३२

पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् ।

१२ ३१ २ ३१ २

पुण्यांश्चभक्षान्भक्षयत्यमृतत्वं च गच्छति॥६॥[८](१३०३)

पदपाठः—पावमानीः, स्वस्त्ययनीः १ । ताभिः ३। गच्छति क्रि० । नान्दनम् २ । पुण्यान् २ । च अ० । भक्षान् २ । भक्षयति क्रि० । अमृतत्वम् २ । च अ० । गच्छति क्रि० ॥

अन्वितपदार्थः—(पावमानीः) पावमान्यः (स्वस्त्ययनीः) स्वस्ति अविनाशं प्रापयित्र्यः ऋचः सन्ति (ताभिः) पावमानीभिस्तदध्ययनेन नरः (नान्दनम्) आह्लादम् (गच्छति) प्राप्नोति (च) तथा (पुण्यान्) पावनान् (भक्षान् भक्षयति, अमृतत्वं च गच्छति) ॥ ६ ॥

भावार्थः—(पावमानीः) पवमानसंबन्धिनी ऋचायें (स्वस्त्ययनीः) स्वस्ति=अविनाश को प्राप्त कराने वाली हैं (ताभिः) उन के अध्ययन से मनुष्य (नान्दनम्) आनन्द को (गच्छति) प्राप्त होता है, (च) और (पुण्यान्) पवित्र शुद्ध निर्मल (भक्षान्) भोज्यों का (भक्षयति) भोजन करता है (च) तथा (अमृतत्वम्) अमरभाव को (गच्छति) प्राप्त हो जाता है ॥ ६ ॥

इति दशमाऽध्यायस्य सप्तमः खण्डः ॥ ७ ॥

अथ

अष्टमे खण्डे अगन्मेति प्रथमर्चस्य वसिष्ठऋषिः । अग्निर्देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

१२ ३१र २र३ १२३ २ ३२३ १२३ १ २३२

अगन्म महा नमसा यविष्ठं, यो दीदाय समिद्धः स्वे दुरोणे ।

३१२१ १२ १२३१ २ ३ १२ १ १२

चित्रभानुꣳ रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् १(१३०४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अगन्म क्रि० । महा, नमसा ३ । यविष्ठम् २ । यः १ । दीदाय क्रि० । समिद्धः १ । स्वे, दुरोणे ७ । चित्रभानुम् २ । रोदसी ६ । अन्तः अ० । उर्वी ६ । स्वाहुतम् २ । विश्वतः अ० । प्रत्यञ्चम् २ ॥

अन्वितपदार्थः— (यः) अग्निः (स्वे) आत्मीये (दुरोणे) गृहे स्थाने आहवनीयाख्ये (समिद्धः) काष्ठैः सम्यद्धीप्रः सन् (दीदाय) प्रकाशते तमिमं (यविष्ठम्) युवतमम् (उर्वी रोदसी) विस्तृतयोर्द्यावापृथिव्योः (अन्तः) मध्ये अन्तरिक्षे (चित्रभानुम्) चित्रज्वालम् (स्वाहुतं) सुष्ठु, आहुतम् (विश्वतः) सर्वतः (प्रत्यञ्चम्) प्रतिगच्छन्तमग्निं (महा) महता (नमसा) अन्नेन हविषा सह (अगन्म) वयमुपगच्छाम ॥ ऋग्वेदे ७ । १२ । १ ऽपि ॥१॥

आर्याभिवादः—(यः) जो अग्नि (स्वे) अपने (दुरोणे) गृह आहवनीय वेदि में (समिद्धः) सुलगाया हुवा (दीदाय) प्रकाशता है उस (यविष्ठम्) अति युवा अर्थात् प्रचण्ड, (उर्वी) विस्तृत (रोदसी) द्यावापृथिवी के (अन्तः) बीच अन्तरिक्ष में (चित्रभानुम्) विचित्र ज्वाला वाले, (स्वाहुतम्) भले प्रकार से होम किये हुवे, (विश्वतः) सब ओर को (प्रत्यञ्चम्) फैलते हुवे अग्नि को (महा) बहुत (नमसा) अन्न=हविः के साथ (अगन्म) हम समीप जावें ॥ ऋ० ७ । १२ । १ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ १र २र ३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
स महा विश्वा दुरितानि साह्वानग्निष्टवे दम आजातवेदाः ।
१ २ ३ १ २ ३ २ ३ १ २ १ २ ३ १ २ ३ १ २
स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः२ (१३०५)

पदपाठः—सः १ । महा ३ । विश्वा, दुरितानि २ । साह्वान् १ । अग्निः १ । स्तवे क्रि० । दमे ७ । आ अ० । जातवेदाः, सः १ । नः २ । रक्षिषत् क्रि० । दुरितात, अवद्यात् ५ । अस्मान्, गृणतः २ । उत अ० । नः ६ । मघोनः २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(सः) पूर्वोक्तः (अग्निः) पावकः (जातवेदाः) जातप्रज्ञो जातधनो वा (महा) महत्त्वेन (विश्वा) सर्वाणि (दुरितानि) दुःखानि रोगादीनि (साह्वान्) अभिभवन् (दमे) यज्ञशालायां गृहे (आ स्तवे) सर्वतः स्तूयते (सः) सोऽग्निः (गृणतः) अग्नि-गुणकीर्त्तनं कुर्वतः (नः) अस्मान् (उत) अपि च (मघोनः) मखवतः (अस्मान्) (नः) अस्माकं (अवद्यात् दुरितात्) निन्द्यात्पापात् (रक्षिषत्) रक्षेत् ॥ ऋग्वेदे ७ । १२ । २ऽपि ।२।

भाषार्थः-(सः) वह (अग्निः) अग्नि (जातवेदाः) जिस के प्रकाशसे लोक में घटपटादि पदार्थ दीखते और जान पड़ते हैं वा जिस से समस्त रत्नादि धन उत्पन्न हुवे हैं, (महा) अपने महत्व से (विश्वा) सब (दुरितानि) रोगादि दुःखों को (साह्वान्) अभिभूत=तिरस्कृत करता हुवा (दमे) यज्ञशाला गृह में (आ-स्तवे) सर्वतः स्तुत किया जाता है (सः) वह अग्नि (गृणतः) स्तुति=अग्नि के वेदोक्त गुण कीर्त्तन रूप स्तोत्र पढ़ते हुवे (नः) हमलोगों को (उत) तथा (मघोनः) यज्ञ वाले (अस्मान्) हमलोगों को (नः) हमारे (अवद्यात्) निन्दनीय (दुरितात्) पाप से (रक्षिषत्) बचावे। यह चाहते हैं ॥ ऋ० ७ । १२ । २ में भी ॥ २ ॥

अथ तृतीया-

१ २र ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
त्वं वरुण उत मित्रो अग्ने, त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
१र १र ३ १ २ ३ १ २ ३ २ ३ १ २
त्वे वसू सुषणनानि सन्तु, यूयं पात स्वस्तिभिः सदा नः ॥

॥ ६ ॥ [९] (१३०६)

पदपाठः-त्वम्, वरुणः १ । उत अ० । मित्रः १ । अग्ने सं० । त्वाम् २ । वर्धन्ति क्रि० । मतिभिः ३ । वसिष्ठाः १ । त्वे ७ । वसू, सुषणनानि १ । सन्तु क्रि० । यूयम् १ । पात क्रि० । स्वस्तिभिः ३ । सदा अ० । नः २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(अग्ने) हे अग्ने ! (त्वम्) (वरुणः) रोगाणां निवारकोऽसि (उत) अपि च (मित्रः) सुखप्रापणे सखा भवसि (वसिष्ठाः) अतिशयेन वसवो वसिष्ठा सूर्यकिरणाः [निघं०] १ । १५ (मतिभिः) मतय इति मेधाविनाम निघं० ३ । १५ तैर्मेधाविभिः स्वतेजोभिः (त्वाम्) अग्निम् (वर्धन्ति) वर्धयन्ति (त्वे) त्वयि अग्नौ तेजोरूपे विद्यमानानि (वसू) वसूनि सुवर्णादीनि (सुषणनानि) सुसंभजनानि (सन्तु) भवन्तु (यूयं) मित्रवरुणप्रभृतयोऽग्न्यन्तर्गता देवाः (स्वस्तिभिः) क्षेमैः (नः) अस्मान् (सदा) सर्वदा (पात) रक्षत ॥ ऋग्वेदे ७ । १२ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(अग्ने) अग्ने ! (त्वम्) तू ही (वरुणः) रोगादि दुःखों का निवारक (उत) और (मित्रः) सुखप्रापक मित्र है (वसिष्ठाः) अत्यन्त वसु सूर्यकिरणें (मतिभिः) मेधातत्त्वयुक्त अपने तेजों से (त्वाम्) तुझ अग्नि को (वर्धन्ति) बढ़ाते हैं (त्वे) तुझ में विद्यमान (वसू) तैजस सुवर्णादि रत्न धन (सुषणनानि) भले प्रकार संविभाग वाले (सन्तु) हों (यूयम्) तुम अग्नि के अन्तर्गत वरुण मित्र आदि देवो ! (स्वस्तिभिः) क्षेम=सुखों से (नः) हमारी (सदा) सर्वदा (पात) रक्षा करो ॥ ऋ० ७ । १२ । ३ में भी ॥३॥

अथ द्वितीय तृचस्य-वत्सऋषिः । इन्द्रोदेवता । गायत्रीछन्दः ॥ तत्र प्रथमा—

३ २उ ३ १र २र ३ १ २ ३ १ २

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँइव ।

१ २ ३ १ २

स्तोमैर्वत्सस्य वावृधे ॥ १ ॥ (१३०७)

पदपाठः—महान्, इन्द्रः, यः १ । ओजसा ३ । पर्जन्यः, वृष्टिमान् १ । इव अ० । स्तोमैः ३ । वत्सस्य ६ । वावृधे क्रि० ॥

अन्वितपदार्थः—(वत्सस्य) वक्तुः पाठकर्त्तुः [उणा० ३ । ६२] (स्तोमैः) स्तोत्रैः सह (ओजसा) बलेन (महान्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अधिकः (वृष्टिमान् पर्जन्यः) मेघः (इव) (यः, इन्द्रः) यो वायुविशेषः (वावृधे) वर्धते ॥ ऋग्वेदे ८ । ६ । १ ऽपि, यजुर्वेदे ७ । ४० चाऽपि ॥ १ ॥

भाषार्थः-(वत्सस्य) वेदपाठी वक्ता के (स्तोमैः) वैदिकस्तोत्रों के साथ (ओजसा) बल से (मघवान्) अधिक (वृष्टिमान्) वर्षायुक्त (पर्जन्यः) बादल (इव) सा (यः) जो (इन्द्रः) वायुविशेष (वावृधे) बढ़ता है ॥ ऋ० ८ । ६ । १ तथा यजुः ७ । ४० में भी ॥ १ ॥

अथ द्वितीया-

२ ३ २ ३ १ २ २ ३ १ २ ३ १ २
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।
३ १ २ ३ १ २
जामि ब्रुवत आयुधा ॥ २ ॥ (१३०८)

पदपाठः-कण्वाः १ । इन्द्रम् २ । यत् अ० । अक्रत क्रि० । स्तोमैः ३ । यज्ञस्य ६ । साधनम् २ । जामि २ । ब्रुवते क्रि० । आयुधा २ ॥

अन्वितपदार्थः-(कण्वाः) मेधाविनः स्तोतारः [निघं० ३ । १५] (यत्) यदा (स्तोमैः) स्तोत्रैः (इन्द्रं) वायु विशेषं परमेश्वरं वा (यज्ञस्य साधनम्) यज्ञनिष्पादकम् (अक्रत) कुर्वन्ति स्तुवन्ति तदा (आयुधा) आयुधानि अन्यानि यज्ञसाधनानि स्रुवादीनि (जामि) अधिकानि अतिरिक्तानि व्यर्थानि (ब्रुवते) कथयन्ति । स्तुतिकाले यज्ञपात्राणि न प्रयुञ्जते इत्यर्थः ऋग्वेदे ॥ ८ । ६ । ३ ऽपि ॥ २ ॥

भाषार्थः-(कण्वाः) बुद्धिमान् स्तुतिकर्त्ता लोग (यत्) जब कि (इन्द्रम्) वायु विशेष को वा परमात्मा को (यज्ञस्य) यज्ञ का (साधनम्) साधक (अक्रत) करते=स्तुत करते हैं तब (आयुधा) यज्ञपात्रों को (जामि) निष्प्रयोजन (ब्रुवते) बताते हैं ॥ सायणाचार्य ने भी जामि का अर्थ अति-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(अग्ने) हे अग्ने ! (त्वम्) (वरुणः) रोगाणां निवारकोऽसि (उत) अपि च (मित्रः) सुखप्रापणे सखा भवसि (वसिष्ठाः) अतिशयेन वसवो वसिष्ठा सूर्यकिरणाः [निघं०] १ । १५ (मतिभिः) मत-य इति मेधाविनाम निघं० ३ । १५ तैर्मेधाविभिः स्वते-जोभिः (त्वाम्) अग्निम् (वर्धन्ति) वर्धयन्ति (त्वे) त्वयि अग्नौ तेजोरूपे विद्यमानानि (वसू) वसूनि सुव-र्णादीनि (सुषणनानि) सुसंभजनानि (सन्तु) भवन्तु (यूयं) मित्रवरुणप्रभृतयोऽग्न्यन्तर्गता देवाः (स्वस्तिभिः) क्षेमैः (नः) अस्मान् (सदा) सर्वदा (पात) रक्षत ॥ ऋग्वेदे ७ । १२ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(अग्ने) अग्ने ! (त्वम्) तू ही (वरुणः) रोगादि दुःखों का निवारक (उत) और (मित्रः) सुखप्रापक मित्र है (वसिष्ठाः) अत्यन्त वसु सूर्यकिरणें (मतिभिः) मेधातत्त्वयुक्त अपने तेजों से (त्वाम्) तुझ अग्नि को (वर्धन्ति) बढ़ाते हैं (त्वे) तुझ में विद्यमान (वसू) तैजस सुवर्णादि रत्न धन (सुषणनानि) भले प्रकार संविभाग वाले (सन्तु) हों (यूयम्) तुम अग्नि के अन्तर्गत वरुण मित्र आदि देवो ! (स्वस्तिभिः) क्षेम=सुखों से (नः) हमारी (सदा) सर्वदा (पात) रक्षा करो ॥ ऋ० ७ । १२ । ३ में भी ॥३॥

अथ द्वितीय तृचस्य-वत्सऋषिः । इन्द्रोदेवता । गायत्रीछन्दः॥ तत्र प्रथमा—

३ २उ ३ १र २र ३ १ २ ३ १ २

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँइव ।

१ २ ३ १ २

स्तोमैर्वत्सस्य वावृधे ॥ १ ॥ (१३०७)

पदपाठः—महान्, इन्द्रः, यः १ । ओजसा ३ । पर्जन्यः, वृष्टिमान् १ । इव अ० । स्तोमैः ३ । वत्सस्य ६ । वावृधे क्रि० ॥

अन्वितपदार्थः—(वत्सस्य) वक्तुः पाठकर्त्तुः [उणा० ३ । ६२] (स्तोमैः) स्तोत्रैः सह (ओजसा) बलेन (महान्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अधिकः (वृष्टिमान् पर्जन्यः) मेघः (इव) (यः, इन्द्रः) यो वायुविशेषः (वावृधे) वर्धते ॥ ऋग्वेदे ८ । ६ । १ ऽपि, यजुर्वेदे ७ । ४० चाऽपि ॥ १ ॥

भाषार्थः-(वत्सस्य) वेदपाठी वक्ता के (स्तोमैः) वैदिकस्तोत्रों के साथ (ओजसा) बल से (सह्वान्) अधिक (वृष्टिमान्) वर्षायुक्त (पर्जन्यः) बादल (इव) सा (यः) जो (इन्द्रः) वायुविशेष (वावृधे) बढ़ता है ॥ ऋ० ८ । ६ । १ तथा यजुः ७ । ४० में भी ॥ १ ॥

अथ द्वितीया-

२ ३ २३१र २र३ १ २१२ ३ १ २
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।
३ १ २ ३ १ २
जामि ब्रुवत आयुधा ॥ २ ॥ (१३०८)

पदपाठः-कण्वाः १ । इन्द्रम् २ । यत् अ० । अक्रत क्रि० । स्तोमैः ३ । यज्ञस्य ६ । साधनम् २ । जामि २ । ब्रुवते क्रि० । आयुधा २ ॥

अन्वितपदार्थः-(कण्वाः) मेधाविनः स्तोतारः [निघं० ३ । १५] (यत्) यदा (स्तोमैः) स्तोत्रैः (इन्द्रं) वायु विशेषं परमेश्वरं वा (यज्ञस्य साधनम्) यज्ञनिष्पादकम् (अक्रत) कुर्वन्ति स्तुवन्ति तदा (आयुधा) आयुधानि अन्यानि यज्ञसाधनानि स्रुवादीनि (जामि) अधिकानि अतिरिक्तानि व्यर्थानि (ब्रुवते) कथयन्ति । स्तुतिकाले यज्ञपात्राणि न प्रयुञ्जते इत्यर्थः ऋग्वेदे ॥ ८ । ६ । ३ ऽपि ॥ २ ॥

भाषार्थः-(कण्वाः) बुद्धिमान् स्तुतिकर्त्ता लोग (यत्) जब कि (इन्द्रम्) वायु विशेष को वा परमात्मा को (यज्ञस्य) यज्ञ का (साधनम्) साधक (अक्रत) करते=स्तुत करते हैं तब (आयुधा) यज्ञपात्रों को (जामि) निष्प्रयोजन (ब्रुवते) बताते हैं ॥ सायणाचार्य ने भी जामि का अर्थ अति-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रेकार्थक मान कर 'निष्प्रयोजन' ही बताया है ॥ तात्पर्य यह है कि स्तोता लोग स्तुतिकाल में यज्ञपात्रों का प्रयोग नहीं करते ॥ ऋ०८ । ६ । ३ में भी ॥२॥

अथ तृतीया—

३ २ १२ ३ १ २३ १२ २१ ३ १ २

प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ।

१ २ १ २ ३ १ २

विप्रा ऋतस्य वाहसा ॥३॥ [१०] (१३०९)

पदपाठः-प्रजाम् २ । ऋतस्य ६ । पिप्रतः १ । प्र अ० । यत् अ० । भरन्त क्रि० । वह्नयः १ । विप्राः १ । ऋतस्य ६ । वाहसा ३ ॥

अन्वितपदार्थः-(ऋतस्य) यज्ञस्य (प्रजाम्) प्रजारूपमिन्द्रं वायुं (यत्) यदा (वह्नयः) सूर्यकिरणाः होमकुण्डाग्निज्वाला वा (पिप्रतः) नभःप्रदेशान् पूरयन्तः (प्र-भरन्त) प्रभरन्ति, तदा (विप्राः) ऋत्विजो ब्राह्मणाः (ऋतस्य) यज्ञस्य (वाहसा) प्रापकेण मन्त्रपाठेन सह यजन मारभन्ते इति शेषः ॥ ऋग्वेदे ८ । ६ । २ ऽपि ॥ ३ ॥

भावार्थः-(ऋतस्य) यज्ञ की (प्रजाम्) प्रजारूप इन्द्र=वायु को (यत्) जब कि (पिप्रतः) आकाश में पूर्ण करते हुवे (वह्नयः) सूर्यकिरणें वा होमकुण्डस्थ अग्निज्वालायें (प्र-भरन्त) भरती हैं तब (विप्राः) ऋत्विज् ब्राह्मण लोग (ऋतस्य) यज्ञ के (वाहसा) पहुंचाने वाले मन्त्रपाठ के साथ यजन आरम्भ करते हैं । जिन मन्त्रों द्वारा मनुष्य को यज्ञ का प्रकार और उस का फल ज्ञात हुवा वे मन्त्र यज्ञ के पहुंचाने वाले समझने चाहियें ॥ ऋ० ८ । ६ । २ में भी ॥ ३ ॥

इति दशमाऽध्यायस्याऽष्टमः खण्डः ॥ ८ ॥

उक्तान्याज्यानि इति,

इदानीं माध्यन्दिनःपवमानः इति च विव०

अथ नवमे खण्डे प्रथमतृचस्य-वैखानस ऋषिः । सोमो देवता ।

गायत्रीछन्दः ॥ तत्र प्रथमा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३ १२३ १२१ २
पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत ।
३ १ २३ १२
जीरा अजिरशोचिषः ॥ १ ॥ (१३१०)

पदपाठः-पवमानस्य, जिघ्नतः, हरेः ६ । चन्द्राः १ । असृक्षत क्रि० । जीराः १ । अजिरशोचिषः ६ ॥

अन्वितपदार्थः-(जिघ्नतः) हन्यमानस्याऽभिषूयमाणस्य (हरेः) हरितस्य (अजिरशोचिषः) सर्वत्रगमनशीलतेजसः (पवमानस्य) सोमस्य (चन्द्राः) आह्लादयित्र्यः (जीराः) क्षिप्रं क्षरणशीलाः धाराः (असृक्षत) सज्यन्तेऽग्नौ ॥ ऋग्वेदे तु ९ । ६६ । २५ जिघ्नतः=जङ्घ्नतः इति पाठः॥१॥

भाषार्थः-(जिघ्नतः) अभिषूयमाण (हरेः) हरित (अजिरशोचिषः) सर्वत्रगमनशील तेज वाले (पवमानस्य) सोम की (चन्द्राः) आह्लादकरी (जीराः) धारायें (असृक्षत) अग्नि में छोड़ी जाती हैं ॥ ऋ० ९ । ६६ । २५ का पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथ द्वितीया-

१२ ३१२ ३१२ ३१२
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
१२ ३१२
हरिश्चन्द्रो मरुद्गणः ॥ २ ॥ (१३११)

अथ तृतीया-

१२ ३२२ ३१२ ३१२
पवमान व्यश्नुहि रश्मिभिर्वाजसातमः ।
१२ ३२ ३१२
दधत्स्तोत्रे सुवीर्यम् ॥ ३ ॥ [११] (१३१२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—पवमानः, रथीतमः १ । शुभ्रेभिः ३ । शुभ्रशस्तमः, हरिश्चन्द्रः, मरुद्गणः १ । पवमान सं० । व्यश्नुहि क्रि० । रश्मिभिः ३ । वाजसातमः १ । दधत् १ । स्तोत्रे ४ । सुवीर्यम् २ ॥

अन्वितपदार्थः—(पवमान) सोम ! (स्तोत्रे) स्तुतिकर्त्रे यजमानाय (सुवीर्यम्) शोभनं वीर्यं (दधत्) विदधत् प्रयच्छन् (वाजसातमः) अतिशयेन बलस्य दाता, (पवमानः) अभिषूयमाणः (रथीतमः) सोमोरथेन नीयते यज्ञे तस्मात् रथीतमः (शुभ्रशस्तमः) अत्यन्तं दीप्यमानः (हरिश्चन्द्रः) हरितवर्णदीप्तिमान् (मरुद्गणः) मरुतो गणाः सहाया यस्य तथाभूतः (शुभ्रेभिः रश्मिभिः) उज्ज्वलैः किरणैः सह (व्यश्नुहि) विविधं व्याप्नुहि ॥

ईद्रथिनः (८ । २ । १७ वा०) इति रथीतमे ईकारः । ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ६ । १ । १४९ इति हरिश्चन्द्रे सुट् ॥ ऋग्वेदे तु ९ । ६६ । २६—२७ व्यश्नवत् इति भेदेन पाठः ॥२—३॥

भाषार्थः—(पवमान) सोम ! (स्तोत्रे) प्रशंसा करने वाले यजमान के लिये (सुवीर्यम्) सुन्दर वीर्य को (दधत्) धारण करता हुवा=देता हुवा, (वाजसातमः) अत्यन्त बलदायक, (पवमानः) अभिषूयमाण, (रथीतमः) यज्ञ में रथ से ले जाया जाता है इस लिये अतिरथी, (शुभ्रशस्तमः) अति प्रकाशमान (हरिश्चन्द्रः) हरित वर्ण की चमक वाला, (मरुद्गणः) मरुत्=वायुभेद जिस के गण=सहायक हैं, (शुभ्रेभिः) उज्ज्वल (रश्मिभिः) किरणों के साथ (व्यश्नुहि) विविध प्रकार से व्यापे ॥ अष्टाध्यायी के प्रमाण और ऋ० ९ । ६६ । २६—२७ का पाठभेद संस्कृतभाष्य में देखिये ॥ २—३ ॥

अथ द्वितीय वृषस्य—सप्तर्षय ऋषयः । पवमानः सोमो देवता । तत्र प्रथमायाः विराड् बृहती छन्दः ॥ सेयम्—

२ ३ १ २ ३ २उ ३ १ २ ३ २ ३ २

परीतो षिञ्चता सुतꣳ सोमोय उत्तमꣳ हविः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ १२ २२ ३ २ २३ ३ २ ३ २ ३ १
दधन्वान्योनयों अप्स्वाऽ३ऽन्तरा सुषाव सोमम-
२
द्रिभिः ॥ १ ॥ (१३१३) व्याख्याता (६।१२)

अथ द्वितीयायाः-भुरिग्बृहती छन्दः ॥

३१ २३ १ २ ३ १२ ३१ २ ३ १ २ ३ १
नूनं पुनानोऽविभिः परिस्रवाऽदब्धः सुरभिन्तरः । सुते
२ ३ १ २ ३ १ २ ३ १ ३ २ ३ १२
चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥
॥ २ ॥ (१३१४)

पदपाठः-नूनम् अ० । पुनानः १ । अविभिः ३ । परिस्रव क्रि० । अदब्धः, सुरभिन्तरः १ । सुते ७ । चित् अ० । त्वा २ । अप्सु ७ । मदामः क्रि० । अन्धसा ३ । श्रीणन्तः १ । गोभिः ३ । उत्तरम् २ ॥

अन्वितपदार्थः-सोम ! (अदब्धः) अहिंसितः (सुरभिन्तरः) अत्यन्तं सुगन्धि त्वं (नूनम्) निश्चयम् (पुनानः) पूयमानः (अविभि) अविव्रालकृतैर्दशापवित्रैः (परिस्रव) परिक्षर (सुते, चित्) अभिषुते सति (अन्धसा) अन्नेन सह (गोभिः) इन्द्रियैः (श्रीणन्तः) मिश्रयन्तो वयम् (उत्तरम्) उत्तमम् (अप्सु) रसेषु वर्त्तमानं (त्वा) त्वाम् (मदामः) हर्षकरं सेवामहे ॥ ऋग्वेदे ९ । १०७ । २ ऽपि ॥ २ ॥

भाषार्थः-सोम ! (अदब्धः) अहिंसित और (सुरभिन्तरः) अतिसुगन्ध युक्त, (नूनम्) निश्चय (पुनानः) शोध्यमान, (अविभिः) दशापवित्रों से (परिस्रव) टपक, (सुते, चित्) अभिषुत होने पर (अन्धसा) अन्न के साथ (गोभिः) इन्द्रियों से (श्रीणन्तः) मिलाते हुवे हम (उत्तरम्) उत्तम, (अप्सु) रसों में वर्त्तमान, (त्वा) तुझ हर्षकारक का (मदामः) सेवन करते हैं॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थात् सोम की हानि न करके सुरक्षित करना, अभिषुत करना, दशापवित्र नामक ऊर्णामय पवित्र पर से टपकाना और अन्न के साथ भोजन में परिणत करके उस में बल उत्पन्न करना हर्ष का उत्पादक है ॥ ऋ० ९ । १०७ । २ में भी ॥ २ ॥

अथ तृतीयायाः पिपीलिकामध्या गायत्री छन्दः ॥

१ २ ३ १र २र ३ १ २ ३ २ ३ १ २ ३ २

परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥

॥ ३ ॥ [१२] (१३१५)

पदपाठः–परि अ० । स्वानः १ । चक्षसे क्रि० । देवमादनः, क्रतुः, इन्दुः विचक्षणः १ ॥

अन्वितपदार्थः–(स्वानः)अभिषूयमाणः सोमः(चक्षसे) दृष्टिप्रसादाय (परि) परिस्रवति । कीदृशः ?–(देवमादनः) देवानां मादनः (क्रतुः) यज्ञस्वरूपः (इन्दुः) आर्द्रः (विचक्षणः) चक्षुःप्रसादकः ॥ ऋग्वेदे ९ । १०७ । ३ ऽपि ॥ ३ ॥

भाषार्थः–(स्वानः) अभिषव किया जाता हुवा (देवमादनः) देवोंका हृष्टिकारक (क्रतुः) यज्ञ का स्वरूप (इन्दुः) गीला सोम (विचक्षणः) आंखों का हितकारी है, सो (चक्षसे) दृष्टिप्रसादार्थ (परि) चारों ओर से फैलता है ॥ ऋ० ९ । १०७ । ३ में भी ॥ ३ ॥

अथ तृतीय तृचस्य-वसुर्ऋषिः । सोमो देवता । जगती छन्दः ॥ तत्र प्रथमा–

१ २ ३ १ २ ३ २उ ३ २ ३ १ २ ३ २ ३ १र

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा

२र २ २उ ३ १ २ ३ १ २ ३ १र २र

अचिक्रदत् । पुनानो बारमत्येष्यव्ययꣳ श्येनो न योनिं

३ १ २ ३ १ २

घृतवन्तमासदत् ॥१॥ (१३१६) व्याख्याता (५६२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

३१२ ३१ २३१ २ ३ २३ १२ ३ २ ३ २३
पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु
१२ १ २३ १२ ३ २३ ३१२३ १
क्षयं दधे । स्वसार आपो अभि गा उदासरन् सं
२२ ३१ २ ३२
ग्रावभिर्वसते वीते अध्वरे ॥ २ ॥ (१३१७)

पदपाठः-पर्जन्यः, पिता १ । महिषस्य, पर्णिनः ६ । नाभा ७ । पृथिव्याः ६ । गिरिषु ७ । क्षयम् २ । दधे क्रि० । स्वसारः, आपः १ । अभि अ० । गाः २ । उदासरन् क्रि० । सम् अ० । ग्रावभिः ३ । वसते क्रि० । वीते, अध्वरे ७ ॥

अन्वितपदार्थः-सोमयागे सोमहोमानन्तरं पुनः सोम गतिमाह-(अध्वरे) सोमयज्ञे (वीते) व्यतीते सति (पर्णिनः) पर्णवतः (महिषस्य) महतः सोमस्य (पर्जन्यः) मेघः (पिता) जनकोभवति, (पृथिव्याः) भूमेः (नाभा) नाभिभूतेषु (गिरिषु) पर्वतेषु (क्षयम्) निवासं (दधे) धारयति, (स्वसारः) सोमस्य भगिन्यः (आपः) (गाः) भूमीः (अभि) अभिव्याप्य (उदासरन्) सर्वतउद्गच्छन्ति, तदा सोमः (ग्रावभिः) पर्वतस्थैः पाषाणैः (संवसते) ॥

सोमे हुते सति पर्जन्योऽपो वर्षयति तदाऽपां सोमस्य च पर्जन्योत्पन्नत्वादुभयोः पिता जनकः पर्जन्य उच्यते, एवं सोमोद्भिर्भगिनीभिः सह पर्वतप्रदेशेषु उत्पद्यते तत्रस्थैः पाषाणैः संवसन्, पर्णवान् जायते ॥ ऋग्वेदे तु ९ । ८२ । ३ उतासरन् वीथे इति पाठौ ॥ २ ॥

भाषार्थः-अब यह बताया जाता है कि सोम का होम करने पर पुनः सोम की उत्पत्ति किस के साथ, किस स्थान में, किस से, किस रूप में होती

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

है-(अध्वरे) यज्ञ (वीते) बीत चुकने पर (महिषस्य) बड़े (पर्णिनः) पत्तों वाले सोम का (पर्जन्यः) मेघ (पिता) जनक होता है, और (पृथिव्याः) भूमि के (नाभा) नाभि=मध्य (गिरिषु) पर्वतों में (क्षयम्) निवास को [सोम] (दधे) धारण करता है, तथा (स्वसारः आपः) भगिनी के तुल्य जल (गाः) भूमियों को (अभि) अभिव्याप्त करके (उदासरन्) उच्चभाव से सब ओर जाते हैं और तब सोम (ग्रावभिः) पत्थरों के साथ (संवसते) वास करता है ॥ अर्थात् यज्ञ से मेघ वर्षता है और वह जल तथा सोम को पर्वतों में वर्षा कर वहां सोम ओषधिराज को उपजाता है, क्योंकि सोम और अप् (स्त्रीलिङ्ग)=जलों को उत्पन्न करने वाला एक मेघ ही है, इस लिये सोम और जल का मेघ पिता कहा गया और सोम की बहन=भगिनियें अप् (जल कही गईं । इस प्रकार सोम पर्वतप्रदेशों में वर्षा ऋतु में पत्ते वाली बूंटी के रूप में पत्थरों में रहता है । ढूंढियेतो पाइयेगा॥ ऋ० ९ । ८२ । ३ के दो पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया-

३ १ २ ३ १र २र ३ १ २३ २ ३ २ ३ १२ ३ १ २र

कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।

३ १ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २

अपसेधन्दुरिता सोम नो मृड घृता वसान परियासि निर्णिजम्

॥ ३ ॥ [१३] (१३१८)

पदपाठः-कविः १ । वेधस्या ३ । पर्येषि क्रि० । माहिनम् २ । अत्यः १ । न अ० । मृष्टः १ । अभि अ० । वाजम् २ । अर्षसि क्रि० । अपसेधन् १ । दुरिता २ । सोम सं० । नः २ । मृड क्रि० । घृता २ । वसानः १ । परि-यासि क्रि० । निर्णिजम् २ ॥

अन्वितपदार्थः-(सोम) ओषधिराज ! (कविः) मेधातत्त्ववान् (वेधस्या) अस्मदीयया यागविधानेच्छया त्वं (माहिनम्) मंहनीयं दशापवित्रं (पर्येषि) परिगच्छसि (न) यथा (मृष्टः) स्नापितः (अत्यः) अश्वः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(वाजम्) संग्रामम् अभ्यर्षति तद्वत् त्वमपि मृष्टः प्रक्षालितोऽभिषुतश्च रोगादिशत्रुविनाशाय पीतो हुतश्च(अभ्यर्षसि) अभिगच्छसि, तथा (दुरिता) दुरितानि दुःखानि पापानि वा (अपसेधन्) परिहरन् (नः) अस्मान् (मृड) सुखय । यस्त्वं (घृता) उदकानि (वसानः) आच्छादयन् (निर्णिजं) पवित्रं (परियासि) ॥ ऋग्वेदे तु ९ । ८२ । २ नो मृडघृता=मृडय घृतम् इति पाठभेदः ॥ ३ ॥

भाषार्थः-(सोम) हे सोम ! (कविः) मेधायुक्त तू (वेधस्या) हमारी यज्ञ करने की इच्छा से (माहिनम्) आदरणीय दशापवित्र को (पर्येषि) सर्वतः प्राप्त होता है (न) जैसे (मृष्टः) स्नानादि से अलङ्कृत (अत्यः) अश्व (वाजम्) संग्राम को सामना करके जाता है तद्वत् तू भी मृष्टः=शोधित और अभिषुत होकर रोगादि शत्रुविनाशार्थ पान किया हुवा और होम किया हुवा (अभ्यर्षसि) सब ओर जाता है, तथा (दुरिता) दुःखों वा पापों को (अपसेधन्) विनष्ट करता हुवा (नः) हम को (मृड) सुखी कर । जो तू (घृता) उदकों में (वसानः) वसता हुवा (निर्णिजम्) दशापवित्र पर (परियासि) उतरता है ॥ ऋ० ९ । ८२ । २ का पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

इति दशमाऽध्यायस्य नवमः खण्डः ॥ ९ ॥

अथ

दशमे खण्डे प्रगाथात्मक प्रथम सूक्तस्य नृमेधऋषिः । इन्द्रो देवता। बृहती छन्दः ॥ तत्र प्रथमा–

१ २ ३ १ २ ३ १र २र १ २ ३ १र २र ३

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत । वसूनि जातो जनिमान्योजसा प्रतिभागं न दीधिमः ॥१॥ (१३१९) व्याख्याता (२६७)

अथ द्वितीया–

१ २ ३ १र २र ३ १र २र ३ १ २ १ २ ३

अलर्षिरातिं वसुदामुपस्तुहि भद्रा इन्द्रस्य रातयः । यो अस्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३११ २२३ १२ ३ १ २ ३ १२
कामं विधतो न रोषति मनो दानाय चोदयन् ॥२॥ [१४] (१३२०)

पदपाठः-अलर्षिरातिम्, वसुदाम् २। उप स्तुहि क्रि०। भद्राः १। इन्द्रस्य ६। रातयः १। यः १। अस्य ६। कामम् २। विधतः ६। न अ०। रोषति क्रि०। मनः २। दानाय ४। चोदयन् १॥

अन्वितपदार्थः-हे मनुष्य ! (अलर्षिरातिम्) अपापकदानम्, अलर्षिपदसमानार्थकमनर्शपदं यास्केन व्याख्यातम्-" अनर्शरातिमनश्लीलदानमश्लीलं पापकमस्मिन्द्विषम्। अनर्शरातिं वसुदामुपस्तुहीत्यपि निगमो भवति " निरु० ६। २३ (वसुदाम्) धनदं परमात्मानम् (उपस्तुहि) उपास्य स्तुहि, यतः (इन्द्रस्य) परमेश्वरस्य (रातयः) दानानि (भद्राः) भद्राणि कल्याणानि महैश्वर्यकराणि सन्ति, (यः) परमेश्वरः (दानाय) रातये (विधतः) परिचरतः (अस्य) भक्तस्य (मनः) हृदयं (चोदयन्) प्रेरयन् (कामम्) इच्छां (न रोषति) न हिनस्ति=पूरयतीति भावः ॥ ऋग्वेदे तु ८। ९९। ४ अनर्शरातिम् इत्येव पाठः ॥ २ ॥

भाषार्थः-हे मनुष्य ! तू (अलर्षिरातिम्) दोषरहित दानी (वसुदाम्) धनदाता परमात्मा की (उपस्तुहि) उपासना करके स्तुति कर क्योंकि (इन्द्रस्य) परमेश्वर के (रातयः) दान (भद्राः) कल्याणमय महैश्वर्यकारक हैं (यः) जो परमेश्वर (दानाय) दान के लिये (विधतः) सेवक (अस्य) इस भक्त के (मनः) मन को (चोदयन्) प्रेरित करता हुवा (कामम्) इस की कामना को (न) नहीं (रोषति) मारता=पूर्ण करता है ॥ ऋ० ८। ९९। ४ का पाठभेद और निरुक्त ६। २३ का प्रमाण संस्कृत भाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीय प्रगाथस्य भर्गऋषिः। इन्द्रो देवता। बृहती छन्दः॥ तत्र प्रथमा—

१२ ३ १२३१२ ३ १२ १२
यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवन्
३ २उ ३१२ ३२३२उ ३ १र २र
शग्धि तव तन्न ऊतये विद्विषो विमृधो जहि ॥१॥ (१३२१)

व्याख्याता (२७४)

अथ द्वितीया—

१र २र ३१२ ३२उ ३१२ ३२
त्वꣳ हि राधसस्पते राधसो महः क्षयस्यासि विधर्त्ता ।
१ २ ३१२ ३१२
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥

॥ २ ॥ [१५] (१३२२)

पदपाठः—त्वम् १। हि अ०। राधसस्पते सं०। राधसः, महः, क्षयस्य ६। असि क्रि०। विधर्त्ता १। तम्, त्वा २। वयम् १। मघवन्, इन्द्र, गिर्वणः सं०। सुतावन्तः १। हवामहे क्रि०॥

अन्वितपदार्थः—(राधसस्पते) हे धनपते ! (त्वं हि) त्वमेव (महः) महतः (राधसः) धनस्य (क्षयस्य) निवासस्य ब्रह्माण्डस्य च (विधर्त्ता) विशेषेण धारकः (असि) भवसि (गिर्वणः) गीर्भिर्वननीय ! (मघवन्) धनैश्वर्यवन्! (इन्द्र) परमेश्वर ! (तं त्वा) उक्तविशेषण-विशिष्टं त्वाम् (सुतावन्तः) अभिषुतसोमाः (वयम्) यजमानाः (हवामहे) स्तुमः॥ इन्द्रपक्षेऽपि॥ ऋग्वेदे तु ८। ६१। १४ राधस्पते, विधत्तः इति पाठौ॥ २॥

भाषार्थः—(राधसस्पते) हे धनपते ! (त्वम्) आप (हि) ही (महः) बड़े (राधसः) धन के और (क्षयस्य) निवास=ब्रह्माण्ड के (विधर्त्ता) विशेष से धारण करने वाले (असि) हैं। (गिर्वणः) हे वाणी से प्रशंसनीय!

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(मघवन्) धनैश्वर्यवन् ! (इन्द्र) परमेश्वर ! (तम्) उस (त्वा) आप को (वयं सुतावन्तः) हम सोमाभिषव कर चुकने वाले (हवामहे) पुकारते= स्तुति करते हैं । इन्द्र=वायु पक्ष में भी ॥ ऋ० ८ । ६१ । १४ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

इति दशमाऽध्यायस्य दशमः खण्डः ॥ १० ॥

अथैकादशे खण्डे-

प्रथम ऋचस्य-भरद्वाजऋषिः । सोमो देवता । गायत्री छन्दः ॥ तत्र प्रथमा-

१ २ ३२३ १र २र ३ २

त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।

१२ ३१२

पवस्व मꣳहयद्रयिः ॥ १ ॥ (१३२३)

पदपाठः-त्वम् १ । सोम सं० । असि क्रि० । धारयुः, मन्द्रः, ओजिष्ठः १ । अध्वरे १ । पवस्व क्रि० । मंहयद्रयिः १ ॥

अन्वितपदार्थः-(सोम) अभिषूयमाण ! पवमान ! वा ईश्वर ! (मन्द्रः) आह्लादकरः (अध्वरे) यज्ञे ज्ञान-यज्ञे वा (ओजिष्ठः) बलवत्तमः (धारयुः) धाराकामः भक्तिद्रवकामो वा (असि) भवसि (मंहयद्रयिः) प्रदीय-मानधनः सः (त्वम्) (पवस्व) पावय ॥ ऋग्वेदे ९ । ६७ । १ ऽपि ॥ १ ॥

भाषार्थः-(सोम) सोम ! वा परमेश्वर ! (मन्द्रः) आह्लादकारक और (अध्वरे) यज्ञ वा ज्ञानयज्ञ में बलप्रदायक होने से (ओजिष्ठः) अतिबलवान् (धारयुः) धारा वा प्रेम भक्ति की धारा चाहने वाला (असि) है । (मंहयद्रयिः) धनदायक सो (त्वम्) तू (पवस्व) शुद्धि कर ॥ ऋ० ९ । ६७ । १ में भी ॥१॥

Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

२ ३२ ३१२ ३१ २३१२
त्वꣳ सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः ।
१२ २१र २र
इन्द्रः सत्राजिदस्तृतः ॥ २ ॥ (१३२४)

पदपाठः–त्वम्, सुतः, मदिन्तमः, दधन्वान्, मत्सरिन्तमः, इन्दुः, सत्राजित्, अस्तृतः १ ॥

अन्वितपदार्थः–हे सोम ! वा परमेश्वर ! (त्वम्) (सुतः) अभिषुतो हृदयकमले कृतध्यानो वा (दधन्वान्) धारकः (मत्सरिन्तमः) अतिशयेन आह्लादकारकः (मदिन्तमः) अतिहृष्टियुक्तः (सत्राजित्) सर्वेषां जेता (अस्तृतः) केनाप्यहिंसितः (इन्दुः) प्रकाशवान् असीति पूर्वेण संबन्धः ॥ ऋग्वेदे तु ९ । ६७ । २ मदिन्तमः=बृमादनः इति पाठः । इन्दुः सत्राजिदस्तृतः=इन्द्राय सूरिरन्धसा, इति तृतीयपादपाठोऽर्थश्च तदीयोभिन्नः ॥२॥

भाषार्थः–हे सोम ! वा परमेश्वर ! (त्वम्) तू (सुतः) अभिषुत वा हृदयकमल में ध्यान किया हुवा (मदिन्तमः) अभिषुत करने वालों वा ध्यान करने वालों को हृष्टि वा आनन्द का दाता (दधन्वान्) धारक (सत्राजित्) सब का जेता और (अस्तृतः) अन्यों से अहिंसित (इन्दुः) प्रकाशवान् है ॥ ऋ० ९ । ६७ । २ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

१ २ ३ १र २र १क२र ३ १ २
त्वꣳ सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।
३२३ २३१२
द्युमन्तꣳ शुष्ममाभर ॥३॥ [१६] (१३२५]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-त्वम्, सुष्वाणः १। अद्रिभिः ३। अभ्यर्ष क्रि०। कनिक्रदत् १। द्युमन्तम्, शुष्मम् २। आभर क्रि०॥

अन्वितपदार्थः-हे परमेश्वर! (अद्रिभिः) ग्रावभिः (सुष्वाणः) अभिषूयमाणः सोमः (कनिक्रदत्) शब्दायमान आस्ते। (त्वम्) त्वं कृपया (अभ्यर्ष) प्राप्नुहि अस्मान्, तथा (द्युमन्तं शुष्मम्) दीप्तियुक्तं बलम् (आभर) अस्मिन्सोमे संपादय॥ ऋग्वेदे तु ९। ६७। ३ आभर=उत्तमम् इति पाठः॥ ३॥

भाषार्थः-हे परमेश्वर! (अद्रिभिः) सोमाभिषव के पत्थरों [सिल बट्टों] से (सुष्वाणः) अभिषुत किया हुवा सोम (कनिक्रदत्) शब्दायमान है, (त्वम्) आप कृपा करके (अभ्यर्ष) हमें प्राप्त हों और (द्युमन्तम्) दीप्तियुक्त (शुष्मम्) बल को (आभर) इस सोम में भरें॥ ऋ० ९। ६७। ३ का पाठान्तर संस्कृत भाष्य में देखिये॥ ३॥

अथ द्वितीय तृचस्य-मनुर्ऋषिः। सोमो देवता। त्रिष्टुप्छन्दः॥ तत्र प्रथमा-

१२ ३१ २ ३ २ ३ १ २ ३ १ २
पवस्व देव वीतय इन्द्रो धाराभिरोजसा।
२ ३ २ १ २
आ कलशं मधुमान्त्सोम न सदः॥१॥ (१३२६)

व्याख्याता (५७१) अथ द्वितीया-

१ २ ३ १ २ ३ २ २ ३ १ २
तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः।
२ ३ १ २ ३ १ २ ३ १ २
त्वां देवासो अमृताय कं पपुः॥२॥ (१३२७)

पदपाठः-तव ६। द्रप्साः १। उदऽप्रुतः १। इन्द्रम् २। मदाय ४। वावृधुः क्रि०। त्वाम् २। देवासः १। अमृताय ४। कम् २। पपुः क्रि०॥

अन्वितपदार्थः-(उदप्रुतः) उदकस्य निर्गमयितारः (तव द्रप्साः) त्वदीयाः रसाः (मदाय) हृष्ट्युत्पादाय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(इन्द्रम्) वृष्टिकरं देवं (वावृधुः) वर्धयन्ति । ततः (देवासः) वायुप्रभृतयः (कं) जलरूपं (त्वाम्) (अमृताय) अमरत्वाय (पपुः) पिबन्ति शोषयन्ति आत्मनि समावेशयन्ति ॥ ऋग्वेदे ९ । १०६ । ८ ऽपि ॥ २ ॥

भाषार्थः-(उदप्रुतः) जल के निकालने वाले (तव) तेरे (द्रप्सासः) रस (मदाय) हर्ष पुष्टि के उत्पादनार्थ (इन्द्रम्) वर्षक वायुभेद को (वावृधुः) बढ़ाते हैं । तब हे सोम ! (देवासः) आकाश के वायु आदि देव (कम्) जलरूप (त्वाम्) तुझ को (अमृताय) अमर होने के लिये (पपुः) पीते=शोषते=अपने में समावेशित करते हैं ॥ ऋ० ९ । १०६ । ८ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १ २ ३ २
आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
३ १ २ ३ १ २
वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ३ [१७] (१३२८)

पदपाठः-आ अ० । नः ४ । सुतासः, इन्दवः, पुनानाः १ । धावत क्रि० । रयिम् २ । वृष्टिद्यावः, रीत्यापः, स्वर्विदः १ ॥

अन्वितपदार्थः-(सुतासः) अभिषुताः (इन्दवः) सोमाः (पुनानाः) पावनाः (वृष्टिद्यावः) वृष्टिमभि द्यौर्यैःक्रियते, वृष्ट्यभिमुखद्युलोकवन्तः (रीत्यापः) यैः पृथिवीं प्रति स्रवण शीला आपः क्रियन्ते तादृशाः (स्वर्विदः) सुखस्य लम्भकाः सन्तः (नः) अस्मभ्यं (रयिम्) धनाद्यैश्वर्यम् (आ धावत) आगमयन्तु ॥ ऋग्वेदे ९ । १०६ । ९ ऽपि ॥ ३ ॥

भाषार्थः-(सुतासः) अभिषुत किये हुवे (इन्दवः) सोम (पुनानाः) पावन, (वृष्टिद्यावः) द्युलोक को वर्षा की ओर झुकाने वाले, (रीत्यापः) जलों को पृथिवी की ओर गिराने वाले, (स्वर्विदः) सुखप्रापक होते हुवे (नः) हमारे लिये (रयिम्) धनादि ऐश्वर्य को (आ धावत) प्राप्त करावें ॥ ऋ० ९ । १०६ । ९ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीय खण्डस्य-अम्बरीष ऋजिश्वा वा ऋषिः । सोमो देवता ।
अनुष्टुप्छन्दः ॥ तत्र प्रथमा-

२ ३ १ २३१र २र३ १ २ ३ १ २ २ ३ २उ ३
परित्यꣳ हर्यतꣳ हरिं बभ्रुं पुनन्ति बारेण । यो देवान् विश्वाँ
२उ ३ १ २ ३१र २र
इत्परि मदेन सह गच्छति ॥ १ ॥ (१३२९) व्याख्याता (५५२)

अथ द्वितीया—

२उ ३ १ २ ३ १ २ ३ १ २ ३ १र २र
द्विर्यं पञ्च स्वयशसꣳ सखायो अद्रिसꣳहितम् । प्रियमिन्द्र-
३ १ २ ३ १ २ ३ १ २
स्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ २ ॥ (१३३०)

पदपाठः-द्विः अ० । यम् २ । पञ्च १ । स्वयशसम् २ । सखायः १ । अद्रि-संहतम्, प्रियम् २ । इन्द्रस्य ६ । काम्यम् २ । प्रस्नापयन्ते क्रि० । ऊर्मयः १ ॥

अन्वितपदार्थः-(पञ्च सखायः) पञ्चर्त्विजः (अद्रि-संहतम्) ग्रावभिरभिषुतम् (स्वयशसम्) स्वभूतख्यातिम् (इन्द्रस्य प्रियम्) हितम् (काम्यम्) कमनीयम् (यम्) सोमम् (द्विः) वारद्वयम् (प्रस्नापयन्ते) वसतीवरीनामकेषु जलेषु निमज्जयन्ति, तम् (ऊर्मयः) लहर्यः पुनन्ति इति पूर्वेणान्वयः ॥ ऋग्वेदे तु ९ । ९८ । ६ सखायः=स्वसारः, ऊर्मयः=ऊर्मिणम् इति पाठेऽर्थे च भेदः ॥ २ ॥

भाषार्थः-(पञ्च) पांच (सखायः) सखा ऋत्विज् लोग (यम्) जिस (अद्रिसंहतम्) ग्रावा=सिलबट्टों से अभिषुत=छिते हुवे, (स्वयशसम्) अपनी कीर्त्ति वाले, (इन्द्रस्य प्रियम्) इन्द्र के प्यारे (काम्यम्) कमनीयसोम को (द्विः) दो बार (प्रस्नापयन्ते) वसतीवरी नामक जलों में डुबो कर रखते हैं, उस को (ऊर्मयः) लहरें "पुनन्ति"=शोधती हैं, यह पूर्वमन्त्र से अनुवृत्ति करके अन्वय है ॥ ऋ० ९ । ९८ । ६ के पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

१ २ ३ १२ ३१र २र १२ ३

इन्द्राय सोम पातवे वृत्रघ्ने परिषिच्यते । नरे च

१ २ ३ १ २ ३ १ २

दक्षिणावते वीराय सदनासदे ॥३॥[१८](१३३१)

पदपाठः-इन्द्राय ४ । सोम सं० । पातवे क्रि० । वृत्रघ्ने ४ । परिषिच्यसे क्रि० । नरे ४ । च अ० । दक्षिणावते, वीराय, सदनासदे ४ ॥

अन्वितपदार्थः-(सोम) ओषधिराज ! (सदनासदे) यज्ञे आसीनाय (वीराय) क्षात्रधर्मयुक्ताय (दक्षिणावते) यज्ञसम्पादनाऽर्हदक्षिणावते (वृत्रघ्ने) शत्रुविनाशकाय (इन्द्राय) ऐश्वर्यवते (नरे) मनुष्याय (पातवे) पानार्थं (च) यजनार्थं च (परिषिच्यसे) अभिषूयसे ॥ ऋग्वेदे तु ९ । ९८ । १० वीराय=देवाय इति भेदः ॥ ३ ॥

भाषार्थः-(सोम) ओषधिराज ! (सदनासदे) यज्ञासन पर बैठने वाले (वीराय) क्षात्रधर्मयुक्त (दक्षिणावते) यज्ञ कराने योग्य दक्षिणा वाले (वृत्रघ्ने) दुष्टशत्रुसंहारकारी (इन्द्राय) ऐश्वर्यवान् (नरे) मनुष्य के लिये (पातवे) पीने को (च) और यज्ञ करने को (परिषिच्यसे) अभिषुत किया जाता है ॥ ऋ० ९ । ९८ । १० का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थं तृचस्य-ऋणः त्रसदस्युर्वा ऋषिः । सोमो देवता । द्विपदा पङ्क्तिश्छन्दः ॥ तत्र प्रथमा—

१२ ३२उ ३ २ ३ २ ३ २ ३ १र

पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी

२र

धनाय ॥ १ ॥ (१३३२) व्याख्याता (४३०)

अथ द्वितीया—

१ २ ३ २ ३ १ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २

प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय॥२॥(१३३३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—प्र अ० । ते, सोतारः १ । रसम् २ । मदाय ४ । पुनन्ति क्रि० । सोमम् २ । महे ४ । द्युम्नाय ४ ॥

अन्वितपदार्थः—(ते) पूर्वोक्ताः (सोतारः) अभिषोतार ऋत्विजः (रसम्, सोमं) (मदाय) हृष्टिप्राप्तये (महे) महते (द्युम्नाय) अन्नाय च (प्र पुनन्ति) अभिषुण्वन्ति ॥ ऋग्वेदे तु ९ । १०९ । ११ प्र=ते इति पाठभेदः ॥ २ ॥

भाषार्थः—(ते) वे (सोतारः) अभिषुत करने वाले ऋत्विज् लोग (सोमं रसम्) सोम रस को (मदाय) हर्ष प्राप्ति के लिये और (महे) बहुत (द्युम्नाय) अन्न के लिये (प्र पुनन्ति) अभिषुत करते हैं ॥ ऋ० ९ । १०९ । ११ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ १र २र ३ २ ३ १ २ ३ २ ३ १ २

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम्

॥ ३ ॥ [१९] (१३३४)

पदपाठः—शिशुम्, जज्ञानम्, हरिम् २ । मृजन्ति क्रि० । पवित्रे ७ । सोमम् २ । देवेभ्यः ४ । इन्दुम् २ ॥

अन्वितपदार्थः—(शिशुम्) नूतनम् (जज्ञानं) जायमानं (हरिं) हरितम् (इन्दुम्) आर्द्रम् (सोमं) (पवित्रे) दशापवित्रे (मृजन्ति) शोधयन्ति ॥ ऋग्वेदे ९ । १०९ । १२ ऽपि ॥ ३ ॥

भाषार्थः—(शिशुम्) नये (जज्ञानम्) उत्पन्न होते हुवे (हरिम्) हरे (इन्दुम्) गीले (सोमम्) सोम को (पवित्रे) दशापवित्र पर (मृजन्ति) शोधते हैं ॥ ऋ० ९ । १०९ । १२ में भी ॥ ३ ॥

अथ पञ्चम तृचस्य—अमहीयुर्ऋषिः । सोमो देवता । गायत्री छन्दः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र प्रथमा

२ ३ २ ३ २३ २३ १ २ ३१र २र

उपोषु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।

१ २ ३१ २

इन्दुं देवा अयासिषुः ॥१॥ (१३३५) व्याख्याता (४८७)

अथ द्वितीया-

१र २र ३ १२ ३ २ ३ १ २

तमिद्वर्धन्तु नो गिरो वत्सꣳ सꣳ शिश्वरीरिव ।

१र २र ३ १२

य इन्द्रस्य हृदꣳ सनिः ॥ २ ॥ (१३३६)

पदपाठः-तम् २ । इत् अ० । वर्धन्तु क्रि० । नः ६ । गिरः १ । वत्सम् २ । सम् अ० । शिश्वरीरिव अ० । यः १ । इन्द्रस्य ६ । हृदंसनिः १ ॥

अन्वितपदार्थः-(यः) सोमः (इन्द्रस्य) ऐश्वर्यवतः पुंसः (हृदंसनिः) हृदयदाता-[षणु दाने] अस्ति (तमित्) तमेव सोमं (नः) अस्माकं (गिरः) प्रशस्तिवाचः (सं-वर्धन्तु) सं वर्धयन्तु । तत्र दृष्टान्तः-(वत्सम्) प्रियं पुत्रं (शिश्वरीरिव) शिशुमत्यस्तन्मातरइव ॥ ऋग्वेदे ९ । ६१ । १४ ऽपि ॥ २ ॥

भाषार्थः-(यः) जो सोम (इन्द्रस्य) ऐश्वर्यवान् पुरुष का (हृदंसनिः) हृदयदायक है (तम् इत्) उस ही सोम को (नः) हम याज्ञिकों की (गिरः) प्रशंसोक्तियें (सं-वर्धन्तु) भले प्रकार बढ़ावें । इस में दृष्टान्तः-(वत्सम्) प्यारे पुत्र को (शश्वरीरिव) जैसे बच्चों वाली उन की मातायें बढाती हैं, तद्वत् ॥ ऋ० ९ । ६१ । १४ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १र २र ३ १ २ ३ २ ३ १ २

अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३१२
वर्धा समुद्रमुक्थ्य ॥ ३ ॥ [२०] (१३३७)

पदपाठः–अर्ष क्रि० । नः ६ । सोम सं० । शम् अ० । गवे ४ । धुक्षस्व क्रि० । पिप्युषीम्, इषम् २ । वर्ध क्रि० । समुद्रम् २ । उक्थ्य सं० ॥

अन्वितपदार्थः– (उक्थ्य) प्रशंसनीय ! (सोम !) (नः) अस्माकं (गवे) गवादिपशुभ्यः (शम्) सुखं यथा स्यात्तथा (अर्ष) वृष्टिं कुरु । अपि च (पिप्युषीम्) प्रवृद्धाम् (इषम्) भोजनसंपदाम् (धुक्षस्व) प्रपूरय (समुद्रम्) मेघमण्डलं (वर्ध) वर्धय ॥ ऋग्वेदे तु ९ । ६१ । १५ नः=णः, उक्थ्य=उक्थ्यम् इति पाठौ ॥ ३ ॥

भाषार्थः–(उक्थ्य) प्रशंसनीय ! (सोम) सोम ! (नः) हमारे (गवे) गौ आदि पशुओं लिये (शम्) जिस से सुख हो उस प्रकार (अर्ष) वृष्टि करे और (पिप्युषीम्) बहुत सी (इषम्) अन्नादि भोजनसंपदा को (धुक्षस्व) पूर्ण करे तथा (समुद्रम्) मेघमण्डल को (वर्ध) बढावे ॥ ऋ० ९ । ६१ । १५ के पाठान्तर संस्कृतभाष्य में देखिये ॥

इति दशमाध्यायस्य एकादशः खण्डः ॥ ११ ॥

अथ

द्वादशे खण्डे प्रथमर्चस्य–त्रिशोक ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्रप्रथमा–

२ ३ २ ३२३ १२ ३१ २ ३१२३२
आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
२३ २ ३ २३ १२
येषामिन्द्रो युवा सखा ॥१॥ (१३३८) व्याख्याता (१३३)

अथ द्वितीया–

३२३ ३ १ २३ १२ ३२ ३१२ २२
बृहन्निदिध्म एषां भूरि शस्त्रं पृथु स्वरुः ।
२३ २ ३ २३ १२
येषामिन्द्रो युवा सखा ॥ २ ॥ (१३३९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–बृहन् १। इत् अ०। इध्मः १। एषाम् ६। भूरि, शस्तम्, पृथुः, स्वरुः १। येषाम् ६। इन्द्रः, युवा, सखा १॥

अन्वितपदार्थः–(एषाम्) यजमानानाम् (इध्मः) इन्धनार्थीयः काष्ठचयः (बृहन् इत्) सदैव महान् खलु भवति (शस्तं) शंसनं स्तोत्रं च (भूरि) प्रभूतम् तथा (स्वरुः) वज्राख्यः (पृथुः) विस्तीर्णो भवति, (येषां) युवा इन्द्रः सखा) इति पूर्ववत् ॥ ऋग्वेदे ८।४५।२ऽपि ॥२॥

भाषार्थः–(येषाम्) जिन यजमानों का (युवा) जवान (इन्द्रः) इन्द्र (सखा) मित्र है, (एषाम्) इन का (इध्मः) इन्धन (बृहन् इत्) बहुत ही है और (शस्तम्) स्तोत्र भी (भूरि) बहुत है तथा (स्वरुः) बिजुली का वज्र भी (पृथुः) विस्तीर्ण है ॥ ऋ० ८। ४५। २ में भी ॥ २ ॥

अथ तृतीया–

१ २ ३ ३ २ ३ ३ २ ३ १ २ ३ १ २

अयुद्ध इद्युधावृतꣳ शूर आजति सत्वभिः ।

२ ३ २ ३ २ ३ १ २

येषामिन्द्रो युवा सखा ॥ ३ ॥ [२१] (१३४०)

पदपाठः–अयुद्ध क्रि०। इत् अ०। युधावृतम् २। शूरः १। आजति क्रि०। सत्वभिः ३। येषाम् ६। इन्द्रः, युवा, सखा १॥

अन्वितपदार्थः–(युवा इन्द्रः येषां सखा) तरुणो राजा इन्द्रः येषामनुकूलोवर्त्तते तेषाम् (शूरः) वीरः स इन्द्रः (सत्वभिः) स्वबलैः सह वर्त्तमानः (अयुद्ध इत्) युध्यति शत्रून् पराजयते (युधावृतम्) भटैरावृतं शत्रुम् (आजति) नमयति च ॥ ऋग्वेदे ८। ४५। ३ ऽपि ॥ ३॥

भाषार्थः–(युवा) जवान (इन्द्रः) राजा इन्द्र (येषाम्) जिन का (सखा) अनुकूलवर्त्ती सहायक है उन का (शूरः) वह वीर राजा इन्द्र (सत्वभिः) अपनी सेनाओं सहित (अयुद्ध इत्) अवश्य युद्ध करता और

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(युधावृतम्) योद्धाओं से युक्त शत्रु को (आजति) नमाता है ॥ ऋ० ८ । ४५ । ३ में भी ॥ ३ ॥

अथ द्वितीय सूक्तस्य–गोतमऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ॥

तत्र प्रथमा–

२उ ३ २३१२३ २३ १२ ३१२ १२३ १२
य एक इद्विदयते वसु मर्ताय दाशुषे । देशानो अग्र-
३१ २ ३ २
तिष्कुत इन्द्रो अङ्ग ॥१॥(१३४१)व्याख्याता(३८९)

अथ द्वितीया–

२ ३ १ २ ३२३ २ ३१२३ १२
यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आ विवासति ।
३१र २र ३ २३१ २ ३२
उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥ २ ॥ (१३४२)

पदपाठः–यः १ । चित्, हि अ० । त्वा २ । बहुभ्यः ५ । आ अ० । सुतावान् १ । विवासति क्रि० । उग्रम् २ । तत् १ । पत्यते क्रि० । शवः २ । इन्द्रः १ । अङ्ग सं० ॥

अन्वितपदार्थः–(अङ्ग) हे प्रिय परमात्मन्! (बहुभ्यः) मनुष्येभ्यः सकाशात् (यः चित् हि) य एव यजमानो भक्तः (सुतावान्) सोमयाजी सन् (त्वा) त्वां परमेश्वरम् (आ-विवासति) परिचरति उपास्ते (तत्) सः (इन्द्रः) ऐश्वर्यवान् जायते अथ च (उग्रं शवः) उद्गूर्णं बलम् (पत्यते) प्राप्नोति ॥ ऋग्वेदे १ । ८४ । ९ ऽपि ॥ २ ॥

भाषार्थः–(अङ्ग) हे प्रिय ! परमात्मन् ! (बहुभ्यः) बहुत मनुष्यों में से (यः) जो (चित्) कोई (हि) ही भक्त धर्मात्मा यजमान (सुतावान्) सोमयाजी होकर (त्वा) आप की (आ–विवासति) परिचर्या उपासना करता है (तत्) वह (इन्द्रः) परमैश्वर्यवान् हो जाता और (उग्रम्) भारी (शवः) बल को (पत्यते) प्राप्त होता है ॥ ऋ० १ । ८४ । ९ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ १र २र ३ १ २ ३ १र २र
कदा मर्त्तमराधसं पदा क्षुम्पमिव स्फुरत् ।
३ १ २ ३ २ ३ १ २ ३ २
कदा नः सुश्रवद्गिर इन्द्रो अङ्ग ॥ ३ ॥ [२२] (१३४३)

पदपाठः—कदा अ० । मर्त्तम्, अराधसम् २ । पदा ३ । क्षुम्पमिव अ० । स्फुरत् क्रि० । कदा अ० । नः ६ । सुश्रवत् क्रि० । गिरः २ । इन्द्रः १ । अङ्ग सं० ॥

अन्वितपदार्थः—(अङ्ग) हे प्रिय ! परमेश्वर ! (इन्द्रः) परमेश्वरो भवान् (नः) अस्माकं (गिरः) प्रार्थनाः (कदा) (सुश्रवत्) आनुकूल्येन श्रोष्यति ? तथा (कदा) (अराधसम्) अयाज्ञिकं (मर्त्तं) मनुष्यं (पदा) (क्षुम्पमिव) मण्डलाकारेण शयानमहिच्छत्रमिव अनायासेन (स्फुरत्) फुल्लिष्यति हनिष्यति ? कृपया शीघ्रमस्मदीयाः प्रार्थनाः शृणोत्वित्यर्थः ॥ क्षुम्पमहिच्छत्रकं भवति इत्यादिना निरुक्ते ५ । १६—१७ व्याख्यातेयमृक् ॥ ऋग्वेदे १ । ८४ । ८ ऽपि ॥ ३ ॥

भाषार्थः—(अङ्ग) हे प्रिय ! परमेश्वर ! (इन्द्रः) परमेश्वर आप (नः) हमारी (गिरः) वाणी=प्रार्थनाओं को (कदा) कब (सुश्रवत्) अनुकूलता से सुनेंगे ? और (कदा) कब (अराधसम्) यज्ञ के विरोधी (मर्त्तम्) मनुष्य को (पदा) पांव से (क्षुम्पमिव) जैसे अहिच्छत्र=जो लकड़ी गल कर पृथिवी पर छत्राकार फूल आती है उस को नष्ट करदेते हैं, ऐसे (स्फुरत्) नष्ट करेंगे ? अर्थात् कृपया शीघ्र हमारी प्रार्थना सुनिये ॥ निरुक्त ५ । १६—१७ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । ८५ । ८ में भी ॥ ३ ॥

अथ तृतीय तृचस्य—मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १र २र ३ २ ३ १ २
गायन्ति त्वा गायत्रिणोर्चन्त्यर्कमार्किणः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ २ ३ १ २
ब्रह्माणस्त्वा शतक्रत उद्वꣳशमिव येमिरे ॥१॥ (१३४४)

व्याख्याता (३४२)

अथ द्वितीया-

२उ ३ १र २र ३ १र २र ३ १ २
यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्वम् ।

२उ २ १ ३ ३ १ २ ३ १ २
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥ (१३४५)

पदपाठः-यत् अ० । सानोः ५ । सानु २ । आरुहः क्रि० । भूरि २ । अस्पष्ट क्रि० । कर्त्वम् २ । तत् अ० । इन्द्रः १ । अर्थम् २ । चेतति क्रि० । यूथेन ३ । वृष्णिः १ । एजति क्रि० ॥

अन्वितपदार्थः-(यत्) मनुष्यो यजमानः (सानोः सानु) सोमवल्लीसमिदाद्याहरणाय पर्वतप्रदेशम् (आरुहः) आरोहति, तथा यत्, (भूरि) बहु (कर्त्वम्) कर्म याग-रूपम् (अस्पष्ट) स्पृशति अनुतिष्ठति (तत्) तदिदं (वृष्णिः) कामानां वर्षको वरप्रदः (इन्द्रः) परमेश्वरः (चेतति) जानाति, अथ च-(यूथेन) देवयूथेन (अर्थम्) तस्य यजमानस्येष्टम् (एजति) एजयति चेष्टयति पूरयतीति यावत् ॥ ऋग्वेदे तु १ । १०।२ सान्वारुहः=सानुमारुहत् इति पाठभेदः ॥ २ ॥

भाषार्थः-(यत्) जो कि, यजन करने वाला मनुष्य (सानोः सानु) पर्वत प्रदेश से देशान्तर को सोमवल्ली और समिध् आदि लाने के लिये (आरुहः) चढ़ता है, और (भूरि) बड़े (कर्त्वम्) यज्ञ कार्य को (अस्पष्ट) छूता=अनुष्ठित करता है (तत्) सो यह (वृष्णिः) कामना पूर्ण करने वाला वरदायक (इन्द्रः) परमेश्वर (चेतति) जानता है और (यूथेन) वायु आदि देवगण से (अर्थम्) इस यजमान के इष्ट को (एजति) पूरा कराता है ॥ ऋ० १ । १० । २ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

३ २उ ३ २ ३ २३ १ २ ३ २

युङ्क्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।

१ २ ३ १र २र

अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥३॥ [२३](१३४६)

पदपाठः-युङ्क्ष्व क्रि० । हि अ० । केशिना, हरी, वृषणा, कक्ष्यप्रा २ । अथ अ० । नः ६ । इन्द्र सं० । सोमपा, गिराम् ६ । उपश्रुतिम् २ । चर क्रि० ॥

अन्वितपदार्थः-(इन्द्र) हे परमेश्वर ! (नः) अस्माकं (सोमपा) सोमपां सोमयाजिनां (गिराम्) प्रार्थनानाम् (उपश्रुतिं चर) श्रवणं कुरु कृपया । (अथ हि) अपि च (केशिना) केशतन्तुवत्प्रतीयमानौ (हरी) हरणशीलौ (वृषणा) वर्षकौ (कक्ष्यप्रा) रज्जुतुल्यपूरकौ समीचीन तिरश्चीनभेदेन द्विविधौ सूर्यकिरणौ (युङ्क्ष्व) उपयोगं प्रापय ॥ ऋग्वेदे तु १।१०।३ युक्ष्वेतिङकाररहितः पाठः ॥ युङ्क्ष्वा इति-आद्युदात्तश्च ३ । १ । ३ इत्यनेन प्रत्ययस्वरः शिष्टत्वेन । द्व्यचोचस्तिङः ६ । ३ । १३५ इत्यनेन दीर्घः ॥ केशिना, वृषणा, कक्ष्यप्रा इत्यत्र-सुपां सुलुक्पूर्वसवर्णेत्यादिना ७ । १ । ३९ विभक्तेर्द्विवचनस्याकारः ॥ वृषणा इति-कनिन्युवृषि० उणा० १ । १५६ सूत्रेण कनिनि कृते, ञ्नित्यादिर्नित्यम् ६ । १ । १९७ इत्याद्युदात्तः स्वरः, वा षपूर्वस्य निगमे ६ । ४ । ९ इत्युपधायाः पक्षे दीर्घाभावः ॥ कक्ष्यप्रा-कक्षयोर्भवं कक्ष्यं रज्जुसूत्रं तत्पूरयत इति कक्ष्यप्रौ, प्रा पूरणे अदादिः परस्मैपदी, आतोनुपसर्गे कः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३।२।३ इति कः प्रत्ययः, गतिकारकोपपदात्कृत् ६।२।१३९ इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम् ॥ अथा-इत्यत्र, निपातस्य चेति ६।३।१३६ दीर्घः ॥ नः-इत्यत्र, अनुदात्तं सर्वमपादादौ ८।१।१८ इत्यनुवर्त्त्य, बहुवचनस्य वस्नसौ ८।१।२१ इति नसादेशोऽनुदात्तः ॥ सोमपा-इत्यत्राऽपि ७।१।३९ सूत्रेण षष्ठीबहुवचनस्याकारादेशः ॥

भाषार्थः-(इन्द्र) हे परमेश्वर ! (नः) हमारी (सोमपा) सोमयाजियों की (गिराम्) प्रार्थनारूप वाणियों का (उपश्रुतिं चर) कृपया श्रवण कीजिये (अथ हि) और (केशिना) केश के तन्तु समान प्रतीत होने वाले (हरी) हरण करने वाले (वृषणा) वर्षा करने वाले (कक्ष्यप्रा) रस्सी के समान पुरने वाले सीधे और तिरछे दो प्रकार के सूर्यकिरणों को (युङ्क्ष्व) उपयोग में लाइये ॥ ऋ० १।१०।३ का पाठान्तर और अष्टाध्यायी ३।१।३, ६।३।१३५, ७।१।३९, ६।१।१९७, ६।४।९, ३।२।३, ६।२।१३९, ६।३।१३६, ८।१।१८, ८।१।२१ और उणादि १।१५६ के प्रमाण संस्कृतभाष्य में देखिये ॥३॥

द्वादशाहस्य नवममह इति, अष्टचत्वारिंशत् स्तौमिकम् इति च विवरणकारः ॥

इति पञ्चमः प्रपाठकः समाप्तः ॥ ५ ॥

इति श्रीमत्कण्ववंशाऽवतंस-पण्डित हज़ारीलालस्वामि-सूनुना; हस्तिनापुरपार्श्ववर्त्ति परीक्षितगढ़निवासिना, तुलसीरामस्वामिना कृते सामवेदभाष्योत्तरार्चिके दशमोऽध्यायः ॥ १० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ एकादशाऽध्यायः

अथ षष्ठः प्रपाठकः

तत्र

प्रथमे खण्डे चतुर्ऋचस्य प्रथमसूक्तस्य-मेधातिथिः काण्वऋषिः । अग्निर्देवता । गायत्री छन्दः ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ १ २
सुषमिद्धो न आवह देवाँ अग्ने हविष्मते ।
१ २ ३ १ २
होतः पावक यक्षि च ॥ १ ॥ (१३४५ *)

पदपाठः-सुषमिद्धः १ । नः ६ । आवह क्रि० । देवान् २ । अग्ने सं० । हविष्मते ४ । होतः, पावक सं० । यक्षि क्रि० । च अ० ॥

अन्वितपदार्थः-(पावक) शोधक ! (होतः) होम-निष्पादक ! (अग्ने) ! त्वं (नः) अस्माकं मध्ये (हविष्मते) यजमानाय (देवान्) वाय्वादीन् देवदूतकर्मणा (आवह) आवहसि (यक्षि) यजसि (च) ॥ ऋग्वेदे १ । १३ । १ऽपि ॥

सुषमिद्ध इत्यत्र, सम् इत्यस्य क्रियाविशेषणत्वकृत-गतिसंज्ञकत्वेन प्रादिसमासः, शोभनाऽर्थस्य सु इत्यस्य

* सप्तमाध्यायान्ते " प्रबोर्चीप० " इति सूक्तसंकेतस्यैकत्वपरिगणनयाऽऽदितो मन्त्रसंख्या तत्र १११३ आयाति, तत्रैव च संकेतितसूक्तान्तर्गतमन्त्रसंख्यया तु १११५ संख्याऽऽयाति, तत एवारभ्याङ्कद्वयवृद्ध्याऽत्र दशमाध्यायान्ते १३५४ इत्यस्य स्थाने १३४६ इत्यङ्कद्वयमधिकं मुद्रितं जातं, तत्परिहृत्य भाष्यारम्भनिर्दिष्टचक्रानुसरणाय तदङ्कद्वयह्रासं कृत्वाऽऽरभ्यतेऽत्र पुनरेषाऽऽदितो मन्त्रसंख्या १३४५ * एवेति ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तु–विशेषणं विशेष्येण बहुलम् २।१।५७ इति समिद्ध शब्देन कर्मधारयः समासः, सुशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, कर्मधारयेऽनिष्ठा ६।२।४६ इति पूर्वपदप्रकृतिस्वरत्वम्। अथ यदि सुशब्दः क्रियाविशेषणं मन्येत, तर्हि स्वरविरोधो दोषः। यथा हि–क्रियाविशेषणत्वे सुशब्दस्य गतिसंज्ञायां प्रादिसमासे च सति–गतिरनन्तरः ६।२।४९ इति, समोयदुत्तर इति समोयदुत्तरत्वं, तदेव कृदुत्तरप्रकृतिस्वरेण–गतिकारकोपपदात्कृत् ६।२।१३९ इति स्थास्यति, तस्मात्सुशब्दोऽनुदात्तः स्यात्॥ देवाँ अग्ने–इत्यत्र, दीर्घादटि समानपादे ८।३।९ इति नस्य रुत्वे, अत्रानुनासिकः पूर्वस्य तु वा ८।३।२ इति, आतोटिनित्यम् ८।३।३ इति चाऽनुनासिकः॥ हविष्मते–हविरस्यास्तीति मतुपि,तसौ मत्वर्थे १।४।१९ इति भत्वेन पदत्वस्य बाधितत्वाद्रुत्वम्॥ होतः! इति,पावक! इति च संबुद्धोरामन्त्रितयोः पार्थक्येनैव क्रियान्वये परस्परसामर्थ्यात् पराङ्गवद्भावस्याऽभावात् न तत्कृतमेकस्वरत्वम्, नाऽपि द्वितीयस्याऽऽमन्त्रितस्य, आमन्त्रितस्य च ८।१।१९ इति निघातेनैकस्वरत्वम्, आमन्त्रितं पूर्वमविद्यमानवत् ८।१।७२ इत्यनेन पूर्वस्याऽविद्यमानवत्त्वात् पदादऽपरत्वात् पादादिस्थत्वाच्च परस्य समानाधिकरणत्वेऽपि होतः इत्यस्य विशेषणत्वे समानमेवाऽविद्यमानवत्त्वम्, अतोऽविद्यमानवत्त्वात्सामर्थ्येऽपि न पराङ्गवत्त्वम् इति नैकस्वरत्वसिद्धिः,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अतश्च होतरिति विशेष्यम्, पुनातीति पावक इत्यर्थवशात् विशेषणत्वाद्धोतरिति विशेष्यमेव, तत्र नामन्त्रिते समानाधिकरणे सामान्यवचनम् ८ । १ । ७३ इत्यऽविद्यमानवत्व-प्रतिषेधात् पदात्परत्वादऽपादादित्वाच्च द्वितीयामन्त्रितस्य, आमन्त्रितस्य चेत्याष्टमिकनिघातेन वा पराङ्गवत्त्वे, शेष निघातेन वा सर्वानुदात्तत्वसिद्धिः ॥ यक्षि–बहुलं छन्दसि २ । ४ । ७३ इति शपोलुक्, व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८ । २ । ३६ इति षत्वम्, षढोः कः षि ८ । २ । ४१ इति ककारः, सिपः पित्त्वेनाऽनुदात्तत्वात्, धातोः ६ । १ । १६२ इति धातुस्वर एव, न च–तिङ्ङतिङः ८ । १ । २८ इति निघातस्वरः, पूर्वस्य पावकेत्यस्य विद्यमानवत्त्वेन पदादऽपरत्वात् अतश्च तस्याऽव्यवधायकत्वे होतरित्यऽपेक्ष्य निघातः स्यादिति चेन्न, यक्षि पदापेक्षया होतरित्यस्यापि पूर्वत्वेनाऽविद्यमानवद्भावात्, ननु–नामन्त्रिते समा० ८ । १ । ७३ इति तस्य नित्यमविद्यमानवत्त्वम्, न च पावकेत्यस्याऽविद्यमानवद्भावेन समानाधिकरणपरत्वाभावः, यक्षि पदस्यैव हि कार्यं प्रति पावकेति पदं पूर्वत्वादऽविद्यमानवत्स्यात्, होतरिति पदमविद्यमानवत्त्व प्रतिषेधं प्रति तु परत्वेन विद्यमानवदेवेति अस्त्येव होतरित्यस्याऽविद्यमानवत्त्वप्रतिषेधः, अतस्तस्याऽविद्यमानवद्भावात्तदपेक्षया यक्षीति निघातः स्यादेव ? सत्यम्–अत्र यक्षीत्यस्मात् परस्य चेत्यव्ययस्य विद्यमानत्वात्, चादिषु च ८ । १ । ५८ इति विघातप्रतिषेधो जायतेऽतो न

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दोषः ॥ इदानीं दशममहरऽत्यग्निष्टोमः तत्राऽग्नेयमाज्यम् इत्यादि विवरणकृत् ॥ १ ॥

भाषार्थः-(पावक) शोधक ! (होतः) होमकर्त्तः ! (अग्ने) ! तू (नः) हमारे मध्य में (हविष्मते) यज्ञ करते हुवे यजमान के लिये (देवान्) वायु आदि देवों का देवदूत कर्म से (आवह) आवाहन करता है (च) और (यक्षि) यजन करता है ॥ ऋ० १ । १३ । १ में भी ॥

अष्टाध्यायी २ । १ । ५७ ॥ ६ । २ । ४६ ॥ ६ । २ । ४९ ॥ ६ । २ । १३९ ॥ ८ । ३ । ९ ॥ ८ । ३ । २ ॥ ८ । ३ । ३ ॥ १ । ४ । १९ ॥ ८ । १ । १९ ॥ ८ । १ । ७२ ॥ ८ । १ । ७३ ॥ २ । ४ । ७३ ॥ ८ । २ । ३६ ॥ ८ । २ । ४१ ॥ ६ । १ । १६२ ॥ ८ । १ । ६८ और ८ । १ । ५८ के प्रमाण संस्कृत भाष्य में देखिये ॥ १ ॥

अथ द्वितीया-

१ २ ३ २ ३ १ २
मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
३ १ २ ३ १ २
अद्या कृणुह्यूतये ॥ २ ॥ (१३४६ *)

पदपाठः-मधुमन्तम् २ । तनूनपात् १ । यज्ञम् २ । देवेषु ७ । नः ६ । कवे सं० । अद्य अ० । कृणुहि क्रि० । ऊतये ४ ॥

अन्वितपदार्थः-(कवे) मेधातत्त्वोद्बोधकत्वात् मेधाविन्नग्ने ! (तनूनपात्) अद्भ्यो जायमानः त्वम् (अद्य) (नः) अस्माकं (मधुमन्तं यज्ञम्) मधुरं हविः (ऊतये) रक्षणाय (देवेषु) वायुप्रभृतिषु (कृणुहि) प्रापयेति भावः ॥

"तनूनपादाज्यं भवति, नपादित्यनन्तरायाः प्रजायाः नामधेयं निर्णततमा भवति, गौरत्र तनूरुच्यते, ततोऽस्यां भोगास्तस्यां पयो जायते, पयस आज्यं जायते । अग्निरिति शाकपूणिरापोऽत्र तन्व उच्यन्ते, तता अन्तरिक्षे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ताभ्य ओषधिवनस्पतयो जायन्त ओषधिवनस्पतिभ्य एष जायते" इति निरुक्ते ८ । ५ ॥ ऋग्वेदे १ । १३ । २ऽपि ॥ २ ॥

भाषार्थः-(कवे) अग्नि के प्रकाश से ज्ञान बढ़ने के कारण हे मेधाविन् ! (तनूनपात्) जलों से उत्पन्न होने वाला तू (अद्य) आज (नः) हमारे (मधुमन्तम्) माधुर्ययुक्त (यज्ञम्) हव्य को (ऊतये) रक्षा के लिये (देवेषु) वायु आदि देवों के समीप (कृणुहि) कर=पहुंचादे ॥ अग्नि का नाम "तनूनपात्"= जलों से उत्पन्न हुवा होने में नीचे लिखा निरुक्त का भाषार्थ प्रमाण है । निरुक्त का प्रमाण ऊपर संस्कृत भाष्य में देखिये ॥

"तनूनपात् घृत है, "नपात्" यह अनन्तर सन्तान का नाम है जो कि निर्णततमा होती है, इस अर्थ में तनू नाम गौ का है क्योंकि इस में भोग विस्तृत हैं, गौ से दुग्ध और दुग्ध से घृत होता है ॥ शाकपूणि आचार्य का मत है कि तनूनपात् अग्नि का नाम है, इस अर्थ में तनू शब्द जलवाचक है क्योंकि जल आकाश में तने (फैले) रहते हैं, उनसे ओषधि वनस्पति उत्पन्न होती हैं, ओषधि वनस्पतियों से यह (अग्नि) उत्पन्न होता है ॥ ऋ० १ । १३ । २ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ २ ३ २ ३ १ २ २
नराशꣳसमिह प्रियमस्मिन्यज्ञउपह्वये ।
१ २ ३ १ २
मधुजिह्वꣳ हविष्कृतम् ॥ ३ ॥ (१३४७ *)

पदपाठः-नराशसम् २ । इह अ० । प्रियम् २ । अस्मिन्, यज्ञे ७ । उपह्वये क्रि० । मधुजिह्वम्, हविष्कृतम् २ ॥

अन्वितपदार्थः-अहं यजमानः (अस्मिन्) एतस्मिन्नुष्ठीयमाने (यज्ञे) यज्ञे (इह) वेदिदेशे (प्रियम्) हितकरम् (हविष्कृतम्) हविषो निष्पादकम् (मधुजिह्वम्) अतएव माधुर्यरसास्वादकजिह्वोपेतम् (नराशंसम्) अग्निम् (उपह्वये) स्तौमि प्रशंसामि ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

" नराशंसोयज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्ति। अग्निरिति शाकपूणिर्नरैः प्रशस्योभवति " निरुक्ते ८। ६ ऋग्वेदे १। १३। ३ ऽपि ॥ ३ ॥

भाषार्थः-मैं यज्ञकर्त्ता (अस्मिन्) इस (यज्ञे) यज्ञ में (इह) इस वेदी के बीच में (प्रियम्) हितकारक (हविष्कृतम्) द्रव्यों को हव्य बनाने वाले (मधुजिह्वम्) इसी से माधुर्यरस का स्वादु लेने वाली जिह्वा वाले (नराशंसम्) अग्नि की (उपह्वये) स्तुति=प्रशंसा करता हूं ॥

" नराशंस यज्ञ का नाम है क्योंकि नर=मनुष्य इस (यज्ञ) में बैठे हुवे स्तुति पढ़ते हैं, यह कात्थक्यियोंका मत है और शाकपूणि आचार्य (कहते हैं कि) अग्नि (का नाम नराशंस) है क्योंकि नरों=ऋत्विगादि से प्रशंसनीय है " निरुक्त ८। २ का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १। १३। ३ में भी ॥ ३ ॥

अथ चतुर्थी-

१ २ ३१२३ १२ ३१२ ३१२ ३२
अग्ने सुखतमे रथे देवाँईडित आवह।
२३ २३ १२
असि होता मनुर्हितः ॥ ४ ॥ [१] (१३४८)

पदपाठः-अग्ने सं० । सुखतमे, रथे ७ । देवान् २। ईडितः १। आवह, असि क्रि० । होता १। मनुः १=३। हितः १ ॥

अन्वितपदार्थः-(अग्ने) ! (ईडितः) अस्माभिः कृतप्रशंसः सन् (सुखतमे) अतिसुखदायके (रथे) रमणीये यज्ञमार्गे (देवान्) वाय्वादीन् (आवह) प्रापय, (मनुः) मनुना मन्त्रेण मनुष्येण यजमानादिना वा (हितः) स्थापितः (होता) देवानामाह्वाता (असि) भवसि ॥ ऋग्वेदे १। १३। ४ ऽपि ॥ ४ ॥

भाषार्थः-(अग्ने) हे अग्ने ! (ईडितः) प्रशंसा किया हुवा (मनुः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्त्र से वा मनुष्य=यजमानादि ने (हितः) स्थापित किया हुवा तू (होता) देवों का आह्वाता (असि) है (सुखतमे) अति सुख दायक (रथे) रमणीय मार्ग में (देवान्) वायु आदि देवों को (आवह) ला ॥ ऋ० १ । १३ । ४ में भी ॥ ४ ॥

अथ मैत्रावरुणमाज्यम् इति विव०

यदद्येति द्वितीयस्तृचस्य-वसिष्ठ ऋषिः । आदित्यो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

२ ३ २ ३ ३ २ ३ १ २ ३ १ २ ३ २

यदद्य सूर उदितेनागामित्रो अर्यमा ।

३ १ २ ३ १ २ २ २

सुवाति सविता भगः ॥ १ ॥ (१३४१)

पदपाठः-यत् १ । अद्य अ० । सूरे, उदिते ७ । अनागाः, मित्रः, अर्यमा १ । सुवाति क्रि० । सविता, भगः १ ॥

अन्वितपदार्थः-(यत्) ऐश्वर्यं (सूरे) सूर्ये (उदिते) सति प्रातः काले (अनागाः) निर्दोषः स्वच्छः (मित्रः) प्राणोवायुः (अर्यमा, सविता, भगः) तत्तन्नामा वायुभेदोदेवविशेषः (सुवाति) उत्पादयेत् तत् (अद्य) उदयकाले अस्मभ्यं भवतु इति शेषः ॥

प्राणादिसर्वसंपत्करा वायुभेदा देवाः प्रातरुत्थाय ेश्वरोपासनादिविदधतामस्माकं सुखदा भवन्तु इति भावः ॥ ऋग्वेदे ७ । ६६ । ४ ऽपि ॥ १ ॥

भाषार्थः-(यत्) जो कुछ (सूरे) सूर्य (उदिते) उदय होने पर=प्रातः काल (अनागाः) निर्दोष (मित्रः, अर्यमा, सविता, भगः) मित्र, अर्यमा, सविता, भग नामक आकाशस्थ वायुभेद देवविशेष (सुवाति) उत्पन्न करे, वह (अद्य) आज हमें प्राप्त हो ॥

मनुष्यों को चाहिये कि प्रातःकाल सबेरे उठकर परेश की उपासनादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करें और प्रार्थना करें कि प्राणादि वायु जो सर्वसंपत्तियों के कर्त्ता हैं और जो सूर्योदय के कुछ पूर्व से ही निर्दोष रहते हैं और जगत् का उपकार करते हैं, हमारा भी उपकार करें। इस लिये यह भी ध्वनित हुवा कि मनुष्य को बहुत सबेरे के निर्दोष प्राणादि वायुओं का सेवन करना चाहिये जिस से संपत्ति बढ़ती हैं ॥ ऋ० ७। ६६। ४ में भी ॥ १ ॥

अथ द्वितीया-

३ १२ ३ २उ ३ १र २र

सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः।

२ ३ १ २ ३ १२

ये नो अꣳहोतिपिप्रति ॥ २ ॥ (१३५०)

पदपाठः-सुप्रावीः १। अस्तु क्रि०। सः, क्षयः १। प्र, नु अ०। यामन् १। सुदानवः, ये १। नः २। अंहः २। अतिपिप्रति क्रि०॥

अन्वितपदार्थः-(ये) पूर्वोक्ता मित्रादयः (नः) अस्मान् (अंहः) दुरितम् (अतिपिप्रति) अतिपारयन्ति तैः (सः) (क्षयः) निवासः संवासः (यामन्) यामनि तस्मिन्प्रातः प्रहरे (नु) वितर्के (प्र) प्रकर्षेण (सुप्रावीः) सुरक्षकः (अस्तु) भवतु ॥

प्रातरुत्थायिनां प्रथमे प्रहरे मित्रादिवायुसेविनां निरलसानामस्माकं स तथाकृतो निवासः शुभो भवतु इति भावः ॥ ऋग्वेदे ७। ६६। ५ ऽपि ॥ २ ॥

भाषार्थः-(ये) जो पूर्व मन्त्र में मित्रादि वायुभेद गिनाये हुवे देव (नः) हम को (अंहः) आलस्यादि पाप से (अतिपिप्रति) पार करते हैं, उन के साथ (सः) वह (क्षयः) रहना=निवास (यामन्) उस प्रहर में (नु) [वितर्क में] (प्र) अत्यन्त (सुप्रावीः) सुरक्षक (अस्तु) होवे ॥

प्रातःकाल उठने और मित्रादि वायुभेद के सेवन करने वाले निरालस्य हम लोगों को वह उस प्रकार रहन सहन शुभ हो, यह तात्पर्य है ॥ ऋ० ७। ६६। ५ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ २ ३ २ ३ १ २ ३१२ ३ २ ३ २
उत स्वराजो अदितिरदब्धस्य व्रतस्य ये ।
३१२ २२
महो राजान ईशते ॥ ३ ॥ [२] (१३५१)

पदपाठः-उत अ० । स्वराजः १ । अदितिः १ । अदब्धस्य, व्रतस्य ६ । ये १ । महः ६ । राजानः १ । ईशते क्रि० ॥

अन्वितपदार्थः-(उत) अपि च (ये) मित्रादयः (स्वराजः) स्वयं राजन्ते ते (अदितिः) तन्माता प्रकृतिश्च, ते सर्वे (अदब्धस्य) रक्षितस्य (महः) महतः (व्रतस्य) शुभकर्मणः (राजानः) स्वामिनः (ईशते) समर्था भवन्ति ॥

मित्रादिपदवाच्यैः प्राणादिवायुभिः प्रकृत्या च सर्वाणि शुभानि कर्माणि अनुष्ठातुं शक्यानि अतस्ते सर्वकर्मणां राजान उच्यन्ते ॥ ऋग्वेदे ७ । ६६ । ६ ऽपि ॥ ३ ॥

भाषार्थः-(उत) और (ये) जो पूर्वोक्त मित्रादि देव (स्वराजः) स्वयंप्रकाशमान हैं (अदितिः) और उन की माता=प्रकृति, ये सब (अदब्धस्य) रक्षित (महः) बड़े (व्रतस्य) शुभ कर्मानुष्ठान के (राजानः) राजा (ईशते) समर्थ हैं ॥

अर्थात् मित्रादिपदवाच्य प्राणादि वायुभेद=देवों के ही सामर्थ्य से मनुष्य सब शुभ कर्मों के करने में कृतकार्य होते हैं ॥ ऋ० ७ । ६६ । ६ में भी ॥ ३ ॥

अथैन्द्रसाज्यम् इति वि०-

उत्त्वेति तृतीय तृचस्य-प्रगाथऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १२ २२ १ २
उत्त्वा मदन्तु सोमाः कृणुष्व राधो अद्रिवः । अव
३ १ २
ब्रह्मद्विषो जहि ॥ १ ॥ (१३५२) व्याख्याता(१९४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

३ २ ३१ २३२ ३ १ २ ३ १ २
पदा पणीनराधसो निबाधस्व महाँ असि ।
२उ ३ २ ३ १ २र
नहि त्वा कश्चन प्रति ॥ २ ॥ (१३५३)

पदपाठः—पदा ३ । पणीन्, अराधसः २ । निबाधस्व क्रि० । महान् १ । असि क्रि० । नहि अ० । त्वा ३ । कश्चन, प्रति अ० ॥

अन्वितपदार्थः—पूर्वमन्त्रात् अद्रिवः ! इत्यनुवर्त्त्य, हे परमेश्वर ! त्वं (महान्) ज्यायान् (असि) भवसि (कश्चन) कोऽपि (त्वा) त्वया (प्रति) सदृशः प्रतिनिधिर्वा (नहि) नास्ति, स त्वम् (अराधसः) अयाज्ञिकान् (पणीन्) लुब्धान् जनान् (पदा) सकीयेन व्याघ्रिपादेन आक्रम्य (निबाधस्व) नितरां पीडय ॥ ऋग्वेदे ८ । ६४ । २ ऽपि॥२॥

भाषार्थः—पूर्व मन्त्र से "अद्रिवः" पद की अनुवृत्ति लाकर—हे परमेश्वर ! आप (महान्) बड़े (असि) हैं, (कश्चन) कोई भी (त्वा) आप के (प्रति) बराबर (नहि) नहीं है, सो आप (अराधसः) यज्ञार्थ धन न लगाने वाले (पणीन्) लोभियों को (पदा) व्याघ्रिरूप पांव से (निबाधस्व) पीडित कीजिये=दण्ड दीजिये ॥ ऋ० ८ । ६४ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ २ ३ १र २र
त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् ।
२उ ३ १ २
त्वꣳ राजा जनानाम् ॥३॥[३] (१३५४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उक्तं प्रातः सवनमिति विश्व०

पदपाठः-त्वम् १ । ईशिषे क्रि० । सुतानाम् ६ । इन्द्र सं० । त्वम् १ । असुतानाम् ६ । त्वम् , राजा १ । जनानाम् ६ ॥

अन्वितपदार्थः-(इन्द्र) हे परमेश्वर ! (त्वम्) (सुतानाम्), सोमानां (त्वम्) त्वमेव (असुतानाम्) अनभिषुतानां च (ईशिषे) ईश्वरोऽसि, किं च (त्वं जनानां राजा) असि ॥

अत्र सोमोपलक्षणेन सर्वस्य स्थावरस्य, जनोपलक्षणेन जङ्गममात्रस्य च जगतः स्वामी परमेश्वरः स्तूयते ॥ ऋग्वेदे ८ । ६४ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(इन्द्र) हे परमेश्वर ! (त्वम्) आप (सुतानाम्) अभिषुत सोमों के और (त्वम्) आप ही (असुतानाम्) अनभिषुत सोमों के (ईशिषे) ईश्वर हैं (त्वम्) आप (जनानाम्) प्राणिमात्र के (राजा) राजा है ॥

यहां सोमों के उपलक्षण से संपूर्ण स्थावर और जनों के उपलक्षण से जङ्गम जगत् का स्वामी परमात्मा स्तुत किया जाता है ॥ ऋ० ८ । ६४ । ३ में भी ॥३॥

इति एकादशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

इदानीं माध्यंदिनं सवनमभिधीयते इति विव०

अथ द्वितीयखण्डे प्रथम तृचस्य-पराशर ऋषिः । सोमो देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा-

१र २र ३ १२ ३१ २३ १र २र ३१ २ ३१२

आजागृविर्विप्र ऋतं मतीनाꣳ सोमः पुनानो असदच्चमूषु ।

१२३ १ २३२३ १२ ३१२ ३१२ ३१ २

सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥

॥ १ ॥ (१३५५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–आ अ० । जागृविः, विप्रः १ । ऋतम् १=६ । मतीनाम् ६ । सोमः, पुनानः १ । असदत् क्रि० । चमूषु ७ । सपन्ति क्रि० । यम् २ । मिथुनासः, निकामाः, अध्वर्यवः, रथिरासः, सुहस्ताः १ ॥

अन्वितपदार्थः–(सत्यं मतीनां) सत्यानां मेधातत्त्वानां (विप्रः) मेधावी (सोमः) ओषधिराट् (जागृविः) निद्रातन्द्रालस्यादिनिवारकत्वाज्जागरणशीलः (पुनानः) पूयमानः शोध्यमानः (चमूषु) चमसेषु यज्ञपात्रेषु (आसदत्) आसीदति, (यम्) सोमं (मिथुनासः) पत्नीभिः सहिताः (निकामाः) नितरां कामयमानाः (रथिरासः) यज्ञस्य नेतारः (सुहस्ताः) कल्याणपाणयः (अध्वर्यवः) याजुषाः (सपन्ति) परिचरन्ति सत्कुर्वन्ति ॥

" सपति " इति परिचरणकर्मसु धातुषु (३ । ५) अर्चतिकर्मसु (३ । १४) च दृश्यते निघण्टौ, न तु स्पृशति कर्मसु, निरुक्तेऽपि तृतीयाध्याये त्रयोदशैकोनविंश खण्डयोरस्य निघण्टुस्थसपतिधातोर्व्याख्यानं विद्यते, तत्राऽपि नायं स्पृशतिकर्मा दृश्यते, तथा सति, सायणाचार्यभाष्ये "स्पृशतिकर्मा इति नैरुक्ताः" इति व्याख्यानं भ्रममूलकमेव भाति ॥ ऋग्वेदे तु ९ । ९७ । ३७ ऋता इति पाठभेदः ॥ १ ॥

भाषार्थः–(सत्यम्) सच्चे (मतीनाम्) मेधा तत्त्वों का (विप्रः) मेधावी (सोमः) सोम (जागृविः) निन्द्रा तन्द्रा आलस्यादि का निवारक चेतन करने वाला होने से जागरणशील (पुनानः) शोध्यमान (चमूषु) यज्ञपात्र चमसों में (आऽसदत्) सब ओर रक्खा जाकर रहता है, (यम्) जिस सोम को (मिथुनासः) सपत्नीक (निकामाः) नितरां कामना करने वाले (रथिरासः) यज्ञ के लेचलने वाले नेता (सुहस्ताः) शोभन हाथों वाले (अध्वर्यवः) अध्वर्यु लोग (सपन्ति) सत्कृत करते=सुधारते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निघण्टु ३ । १२ और ३ । १४ में सपति क्रिया को परिचरणकर्मा और अर्चतिकर्माओं में गिनाया है और निरुक्त ३ । १३ और ३ । १९ में इस का व्याख्यान है, वहां भी इस का स्पर्श अर्थ नहीं किया । इस से निरुक्तप्रमाण का नाम लेकर सायणाचार्य ने जो स्पर्श अर्थ किया है, वह भ्रममूलक ही जान पड़ता है ॥ ऋ० ९ । ९७ । ३७ का पाठान्तर संस्कृत भाष्य में देखिये ॥१॥

अथ द्वितीया-

१ २ ३ २उ ३ २ ३ १ २ ३
स पुनान उप सूरे दधान
१र २र३ १ २ ३ १र २र
ओभे अप्रा रोदसी वी ष आवः ।
३ २ ३ १ २ ३ १ २ ३ २
प्रिया चिद्यस्य प्रियसास ऊती
३ २र २र ३ २ ३ १र २र
सतो धनं कारिणे न प्रयंसत् ॥ २ ॥ (१३५६)

पदपाठः-सः, पुनानः १ । उप अ० । सूरे ७ । दधानः १ । आ अ० । उभे २ । अप्राः क्रि० । रोदसी २ । वि अ० । षः १ । आवः क्रि० । प्रिया १ । चित् अ० । यस्य ६ । प्रियसासः १ । ऊती ४ । सतः ६ । धनम् २ । कारिणे ४ । न अ० । प्रयंसत् क्रि० ॥

अन्वितपदार्थः-(सः) सोमः (पुनानः) शोध्यमानः सन् (सूरे) सूर्यकिरणमण्डले (उप दधानः) निहितः सन् (उभे रोदसी) द्यावापृथिव्यौ (आऽप्राः) आपूरयति (सः) सोमः (वि आवः) विवृणोति (सतः) विद्यमानस्य (यस्य) सोमस्य (प्रिया) प्रीतिकर्यः (प्रियसासः) प्रीतिदात्र्यश्च धाराः (चित्) नूनम् (ऊती) ऊत्यै रक्षणाय भवन्ति, स सोमः (कारिणे, न) यथा कर्मकारिणे धनं प्रयच्छन्ति, तद्वदज्ञानुष्ठात्रे (धनं) धान्यादि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कमुत्पादा (प्रयंसत्) प्रयच्छेत् ॥ ऋग्वेदे तु ९ । ९७ । ३८ दधानोभे इति सतूधनमिति च पाठभेदौ ॥

वि इत्यस्य–निपातस्य चेति दीर्घः ६ । ३ । १३६ ॥ सः–इत्यस्य वि इत्यस्मात्पदात्–पूर्वपदात् ८ । ३ । १०६ इति षत्वम् ॥ आवः–इत्यत्र, मन्त्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्योलेः २ । ४ । ८० इति च्लेर्लुक्, छन्दस्यपि दृश्यते ६ । ४ । ७३ इत्याडागमः ॥ २ ॥

भावार्थः-(सः) वह सोम (पुनानः) शोध्यमान (सूरे) सूर्यकिरणों में (उप-दधानः) रक्खा हुवा (उभे) दोनों (रोदसी) द्यावापृथिवी को (आऽप्राः) आपूरित करदेता है, तब (सः) वह सोम (वि–आवः) फैलता है (सतः) विद्यमान (यस्य) जिस सोम की (प्रिया) प्यारी और (प्रिय-सासः) प्रीतिदायिनी धारायें (चित्) अवश्य (ऊती) रक्षार्थ हैं, वह सोम (कारिणे न) जैसे काम करने वालों को धन देते हैं, तद्वत् यज्ञानुष्ठानी को (घनम्) धान्यादि उत्पन्न करके (प्रयंसत्) दे ॥

अष्टाध्यायी ६ । ३ । १३६ ॥ ८ । ३ । १०६ ॥ २ । ४ । ८० और ६ । ४ । ७३ के प्रमाण और ऋ० ९ । ९७ । ३८ के पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया–

१ २ ३ १ २ २ ३ १ २ ३
स वर्धिता वर्धनः पूयमानः
१ २ ३ २ ३ २ ३ १ २
सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।
१ २ ३ १ २ ३ १ २ ३ २
यत्र नः पूर्वे पितरः पदज्ञाः
३ १ २ ३ १ २ २ ३ २
स्वर्विदो अभि गा अद्रिमिष्णन् ॥३॥ [४] (१३५७)

पदपाठः–सः, वर्धिता, वर्धनः, पूयमानः, सोमः, मीढ्वान् १ । अभि अ० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नः २ । ज्योतिषा ३ । आवीत् क्रि० । यत्र अ० । नः ६ । पूर्वे, पितरः, पदज्ञाः, स्वर्विदः १ । अभि अ० । गाः २ । अद्रिम् २ । इष्णन् क्रि० ॥

अन्वितपदार्थः-(वर्धिता) वाय्वादिदेवानां स्वबलेन वर्धयिता (वर्धनः) स्वयंवर्धमानः (पूयमानः) पवित्रेण पूयमानः (मीढ्वान्) वृष्टिकरः (सः सोमः), (ज्योतिषा) स्वेन तेजसा (नः) अस्मान् (अभि-आवीत्) अभिरक्षतु (यत्र) यस्मिन्सोमविषये (नः) अस्माकं याज्ञिकानां (पूर्वे) चिरन्तनाः (पितरः) पितृपितामहादयः (पदज्ञाः) सोमादियाज्ञिकपदार्थज्ञाः (गाः) सूर्यकिरणान् (अद्रिम्) मेघं च (अभि) अभिलक्ष्य (इष्णन्) ऐच्छन् ॥ सोमओषधिराजोऽभिषुतोहुतश्च यदा सूर्यकिरणमण्डलं मेघमण्डलं च स्वमहिम्नाऽभिव्याप्य वायुभेदान् प्राणादीन् वर्धयित्वा वृष्ट्यादिसर्वसंपदोवर्धयति तदा सर्वस्य लोकस्य रक्षा जायतेऽतः पितृपरम्पराप्राप्तसोमज्ञानैर्मनुष्यैः सोमयागादयोनुष्ठेया इति भावः ॥ ऋग्वेदे तु ९ । ९७ । ३९ यत्र=येना, इष्णन्=ष्णन् इति पाठौ ॥ ३ ॥

भाषार्थः-(वर्धिता) अपने बल से प्राणादि वायुभेदप्रभृति देवों का बढाने वाला और (वर्धनः) स्वयं बढने वाला (पूयमानः) अभिषव के पश्चात् दशापवित्र से शोध्यमान (मीढ्वान्) वृष्टिकारक (सः) वह (सोमः) सोम (ज्योतिषा) अपने तेज से (नः) हमारी (अभि आवीत्) सर्वतः रक्षा करे (यत्र) जिस सोम के विषय में (नः) हम याज्ञिकों के (पूर्वे) पिछले (पितरः) पिता पितामहादि लोग जो (पदज्ञाः) सोमादि पदार्थों के ज्ञाता और (स्वर्विदः) सुख के ज्ञाता थे, वे (गाः) सूर्यकिरणों और (अद्रिम्) मेघमण्डल को (इष्णन्) चाहते थे ॥

भाव यह है कि अभिषव किया हुवा और फिर दशापवित्र से शोधा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हुवा और अनन्तर होमा हुवा सोम सूर्यकिरणमण्डल और मेघमण्डल में व्याप कर आप बढ़ता और अन्य प्राणादि वायुभेद इत्यादि देवों को बढ़ाता और वृष्टि आदि सर्वसम्पदों को बढ़ा कर सब जगत् का उपकारक होता है जिस के द्वारा सब की रक्षा होती है, इस लिये मनुष्यों को योग्य है कि पितृ परम्परा से जिन्हें सोमादि पदार्थों का ज्ञान है, उन विद्वान् लोगों द्वारा सोम यागादि का अनुष्ठान कराया करें ॥ ऋ० ९ । ९७ । ३९ के दो पाठभेद संस्कृत भाष्य में देखिये ॥ ३ ॥

प्रगाथात्मकस्य द्वितीय सूक्तस्य-प्रगाथः काण्व ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २र ३ १ २ ३ १ ३ २ ३ १ २ ३
मा चिदन्यद्विशंसत सखायो मा रिषण्यत । इन्द्रमित्स्तोता
१ २ ३ १ २ ३ १ २ १ २
वृषणं सचा सुते मुहुरुक्था च शंसत ॥ १ ॥ (१३५८)

व्याख्याता (२४२)

अथ द्वितीया—

३ १ २ ३ १ २ ३ २ ३ १ २र ३ १ २ ३ १ २
अवक्रक्षिणं वृषभं यथा जुवं गां न चर्षणीसहम् । विद्वेषणं
३ १ २ ३ १ २र ३ १ २
संवननमुभयङ्करं मंहिष्ठमुभयाविनम् ॥ २ ॥ [५] (१३५१)

पदपाठः—अवक्रक्षिणम्, वृषभम् २ । यथा अ० । जुवम्, गाम् २ । न अ० । चर्षणीसहम्, विद्वेषणम्, संवननम्, उभयङ्करम्, मंहिष्ठम्, उभयाविनम् २ ॥

अन्वितपदार्थः—(अवक्रक्षिणम्) सर्वस्य सूर्यादेर्लोकसमूहस्य ब्रह्माण्डकटाहजातस्याऽवकर्षकम् (वृषभं यथा) वृषभमिव मेघमण्डलादिना वृष्ट्यादिद्वारा सेचकम् (जुवम्) शीघ्रकारिणम् अनायासेनोत्पत्तिस्थितिप्रलयानां कर्त्तारम्, (गाम्) पृथिवीम् (न) इव (चर्षणीसहम्) मनुष्यादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राणिकृतसर्वकर्मणां सोढारम् (विद्वेषणम्) द्वेषरहितं रागरहितं च (संवननम्) संभजनीयम् (उभयङ्करम्) निग्रहाऽनुग्रहकरम् (मंहिष्ठम्) दातृतमम् (उभयाविनम्) उभयलोकरक्षकं परमात्मानं "शंसत" इति पूर्वेणाऽन्वयः ॥ ऋग्वेदे तु ८ । १ । २ जुवं=जुरं, संवननं=संवनना इति पाठौ ॥ २ ॥

भाषार्थः—(अवक्रक्षिणम्) सूर्यादिलोकसमूह ब्रह्माण्डकटाहों को अपनी २ मर्यादा में खेंचने वाले (वृषभम् यथा) वृषभ के समान मेघमण्डलादि से वृष्ट्यादि द्वारा सींचने वाले (जुवम्) शीघ्र उत्पत्ति स्थिति प्रलय को अनायास सहज में कर देने वाले (गां न) पृथिवी के समान (चर्षणीसहम्) मनुष्य आदि प्राणिकृत चेष्टाओं के सहनशील (विद्वेषणम्) राग द्वेष रहित (संवननम्) संभजनीय (उभयङ्करम्) निग्रह और अनुग्रह दोनों के कर्त्ता (मंहिष्ठम्) बड़े भारी दानी (उभयाविनम्) दोनों लोकों में रक्षा करने वाले परमात्मा को "स्तुत करो" यह पूर्व मन्त्र से अन्वय है ॥ ऋ० ८ । १ । २ के पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥

उदुत्य इति प्रगाथस्य तृतीय सूक्तस्य-मेधातिथिर्ऋषिः । इन्द्रो देवता ।

बृहतीच्छन्दः ॥ तत्र प्रथमा—

२ ३ १ २ २ २ ३ २ ३ १ २ ३ १ २

उदुत्ये मधुमत्तमा गिरः स्तोमास ईरते । सत्राजितो

३ १ २ २ २ ३ २ ३ १ २

धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ १ ॥ (१३६०)

व्याख्याता (२५१)

अथ द्वितीया—

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ २ ३

कण्वाइव भृगवः सूर्याइव विश्वामिद्गीतमाशत । इन्द्रꣳ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ ३ १२ ३ १ २
स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥ २ ॥

[६] (१३६१)

पदपाठः—कण्वाइव अ० । भृगवः १ । सूर्याइव अ० । विश्वम् २ । इत् अ० । धीतम् २ । आशत क्रि० । इन्द्रम् २ । स्तोमेभिः ३ । महयन्तः, आयवः, प्रियमेधासः १ । अस्वरन् क्रि० ॥

अन्वितपदार्थः—(कण्वाइव) मेधाविनइव (भृगवः) भर्जनकराः (सूर्याइव) सूर्यरश्मयइव तेजस्विनः (प्रियमेधासः) मेधाप्रियाः, यज्ञप्रियाः वा (आयवः) मनुष्याः (महयन्तः) पूजयन्तः सन्तः (स्तोमेभिः) स्तोत्रैः (विश्वम्) व्यापकम् (धीतम्) ध्यातम् (इन्द्रम्) परमेश्वरम् (इत्) एव (अस्वरन्) स्तुवन्तु, (आशत) प्राप्नुवन्तु च, नान्यं तद्बुद्धयेति इदर्थः ॥

कण्व इति मेधाविनाम निघं० ३ । १५ " प्रियमेधः प्रियाअस्यमेधाः" निरुक्ते ३ । १७ ॥ " भृगवः भर्जनकराः सूर्याइव=यथाऽऽदित्यरश्मयः" इति विवरणकारः ॥ " अर्चिषे भृगुः सम्बभूव भृगुर्भृज्यमानोन देहे" इति निरुक्ते ३ । १७ ॥ ऋग्वेदे तु ८ । ३ । १६ आशत=आनशुः इति पाठः॥२॥

भाषार्थः—(कण्वाइव) मेधावियों के समान और (भृगवः) फूंकने वाली (सूर्याइव) सूर्य की किरणों के समान तेजस्वी (प्रियमेधासः) जिन को मेधा प्यारी है, वा जिन को यज्ञ प्यारा है वे (आयवः) मनुष्य (महयन्तः) पूजते हुवे (स्तोमेभिः) स्तोत्रों से (विश्वम्) व्यापक (धीतम्) ध्यान किये हुवे (इन्द्रम्) परमेश्वर को (इत्) ही (अस्वरन्) स्तुत करें और (आशत) प्राप्त हों, "इत्" शब्दार्थ यह है कि परमेश्वर मान कर किसी अन्य को न पूजें ॥ निघण्टु ३ । १५ और निरुक्त ३ । १७ इत्यादि प्रमाण तथा ऋ० ८ । ३ । १६ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पर्यूषु इति वृचस्य चतुर्थसूक्तस्य-ऋणञ्चयदृस्युर्वा ऋषिः । सोमो देवता । पिपीलिकामध्या त्रिपदा त्रिष्टुप्छन्दः ॥ तत्र प्रथमा—

२३१ २२३ १२ ३ १२ ३१२ ३१ २
पर्यूषु प्रधन्व वाजसातये परि वृत्राणि सक्षणिः ।
३२ ३१२ ३ १२
द्विषस्तरध्या ऋणयानईरसे ॥ १ ॥ (१३६२)

व्याख्याता (४२८)

अथ द्वितीया—

१ २ ३ १ २ ३ १२ ३२३ १ २३ १२
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
१ २ ३ १ २ ३ १२
गोजीरया रंहमाणः पुरन्ध्या ॥ २ ॥ (१३६३)

पदपाठः—अजीजनः क्रि० । हि अ० । पवमान सं० । सूर्यम् २ । विधारे ७ । शक्मना ३ । पयः २ । गोजीरया ७ । रंहमाणः १ पुरन्ध्या ७ ॥

अन्वितपदार्थः—(पवमान) सोम ! (सूर्यं) सूर्यकिरणमण्डलम् (विधारे) विधरमाणे गमनमण्डले (शक्मना) बलेन (रंहमाणः) वेगं कुर्वाणस्त्वं (गोजीरया) रश्मिवेगयोः (पुरन्ध्या) पुरन्ध्योर्द्यावापृथिव्योर्मध्ये (पयः) उदकम् (हि) निश्चयेन (अजीजनः) उत्पादयसि ॥ गौरिति रश्मिनाम निघं० १। १४, जीराः इतिक्षिप्रनाम निघं० २। १५ गाः रश्मीन् जीरयतोवेगयतइति तयोर्गोजीरयोः पुरन्ध्योर्द्यावापृथिव्योः । सुपां सुलुगिति ७ । १ । ३९ विभक्तेर्यादेशे गोजीरया, पुरन्ध्या इत्यत्राऽपि तेनैव विभक्तेराकारः ऋग्वेदे तु ९ । ११० । ३ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(पवमान) सोम ! (सूर्यम्) सूर्यकिरणमण्डल के (विधारे) धारक गगनमण्डल में (शवसा) बल से (रंहमाणः) वेग करता हुवा तू (गोजीरया) किरणों के वेगयुक्त (पुरन्ध्या) दोनों द्यावापृथिवी के मध्य में (हि) ही (पयः) जल को (अजीजनः) उत्पन्न करता है ॥

निघण्टु १।१५, २।१५ अष्टाध्यायी ७।१।३९ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९।११०।३ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३१ २ ३ १ २ ३ १ २ ३ १ २

अनु हि त्वा सुतꣳ सोम मदामसि महे समर्य राज्ये ।

१ २ ३ १ २ ३ १२

वाजां अभि पवमान प्रगाहसे ॥ ३ ॥ [७] (१३६४)

व्याख्याता (४३२)

अथ पञ्चमस्य तृचसूक्तस्य-ऋणञ्चयदृस्युर्वा ऋषिः । सोमो देवता । द्विपदा पङ्क्तिश्छन्दः ॥ तत्र प्रथमा-

२३२३१२ ३२३१ ३१ २र

परिप्रयन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥१॥ (१३६५)

व्याख्याता (४२७)

अथ द्वितीया-

३१र २र ३१र २र३ २ ३१ २ ३२ ३१२

एवाऽमृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः॥२॥(१३६६)

पदपाठः-एव अ० । अमृताय, महे, क्षयाय ४ । सः, शुक्रः १ । अर्ष क्रि० । दिव्यः, पीयूषः १ ॥

अन्वितपदार्थः-(अमृताय) मेघजलाय (महे) महते (क्षयाय) निवासाय च (सः) पूर्वोक्तः (दिव्यः) दिवि भवः (पीयूषः) पानयोग्यः (शुक्रः) वीर्यप्रदः सोमः (एव) निश्चयेन (अर्ष) अर्षति गच्छति, दिवमिति शेषः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोम आहुतो दिवं गतो वृष्टिकृत् सुनिवासहेतुश्च जायते वीर्यप्रदोऽपि च भवति ॥ ऋग्वेदे तु ९ । १०९ । ३ऽपि॥२॥

भाषार्थः (अमृताय) मेघजल के लिये (महे) और बड़े उत्तम (क्षयाय) निवास के लिये (सः) वह (दिव्यः) दिव्य (पीयूषः) पानयोग्य (शुक्रः) वीर्यदायक सोम (एव) निश्चय (अर्षं) आकाश को जाता है ॥

अर्थात् आहुति दिया हुवा सोम आकाश को गया हुवा वृष्टिकारक, सुन्दर निवास का हेतु और वीर्यदायक होता है ॥ ऋ० ९ । १०९ । ३ में भी॥२॥

अथ तृतीया-

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २

इन्द्रस्ते सोम सुतस्य पेयात् क्रत्वे दक्षाय विश्वे च देवाः ॥

[८] (१३६७)

पदपाठः-इन्द्रः १ । ते ६ । सोम सं० । सुतस्य ६ । पेयात् क्रि० । क्रत्वे, दक्षाय ४ । विश्वे १ । च अ० । देवाः १ ॥

अन्वितपदार्थः-(सोम) ओषधिराज ! (इन्द्रः) वृष्टिकृद्देवो राजा वा (क्रत्वे) क्रतवे सोमयागाय (दक्षाय) बलाय (च) (ते) तव रसं (पेयात्) पिबेत् (विश्वे) सर्वे (देवाः) वाय्वादयो विद्वांसो वाऽपि पिबेयुः ॥ ऋग्वेदे ९ । १०९ । २ ऽपि ॥ ३ ॥

भाषार्थः-(सोम) सोम ! (इन्द्रः) वृष्टिकारक वायुविशेष वा राजा (क्रत्वे) यज्ञ के लिये (च) और (दक्षाय) बल के लिये (ते) तेरे रस को (पेयात) पीवे और (विश्वे) सब (देवाः) वायु आदि वा विद्वान् भी पीवें ॥ ऋ० ९ । १०९ । २ में भी ॥ ३ ॥

इति एकादशाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे प्रथमतृचस्य-हिरण्यस्तूपऋषिः । सोमो देवता । जगती छन्दः ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

सूर्यस्येव रश्मयो द्रावयित्नवो, मत्सरासः प्रसुतः साकमीरते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३२७ ३ १२ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ २
तन्तुं ततं परि सर्गास आशवो, नेन्द्राहते पवते धाम किञ्चन ॥
॥ १ ॥ (१३६८)

पदपाठः सूर्यस्य ६ । इव अ० । रश्मयः, द्रावयित्नवः, मत्सरासः, प्रसुतः १ । साकम् अ० । ईरते क्रि० । तन्तुम्, ततम् २ । परि अ० । सर्गासः, आशवः १ । न अ० । इन्द्रात् ५ । ऋते अ० । पवते क्रि० । धाम २ । किञ्चन अ० ॥

अन्वितपदार्थः—(सर्गासः) अग्नौ सृज्यमानाः (प्रसुतः) प्रसुताः (आशवः) शीघ्रगाः (मत्सरासः) हृष्टिप्रदाः सोमाः (सूर्यस्य रश्मय इव द्रावयित्नवः) द्रवणशीलाः (साकं) युगपत् (परि) परितः (ईरते) गच्छन्ति (इन्द्रात्) विशिष्टाद्वायोः (ऋते) अन्यः कश्चित् अपि (किञ्चन) किमपि (धाम) पृथिव्यादिकं (न पवते) न शोधयति ॥ ऋग्वेदे ९ । ६९ । ६ ऽपि ॥ १ ॥

भाषार्थः—(सर्गासः) अग्नि में छोड़े जाते हुवे (प्रसुतः) अत्यन्त अभिषुत (आशवः) शीघ्रगामी (मत्सरासः) हृष्टिकारक सोम (सूर्यस्य) सूर्य की (रश्मयः) किरणों के समान (द्रावयित्नवः) दौड़ने वाले (साकम्) एक साथ (परि) सब ओर (ईरते) दौड़जाते हैं । (इन्द्रात्) इन्द्रनामकवायु विशेष से (ऋते) अतिरिक्त कोई (किञ्चन) किसी (धाम) स्थान को (न) नहीं (पवते) शुद्ध करता ॥ ऋ० ९ । ६९ । ६ में भी ॥ १ ॥

अथ द्वितीया—

१२ ३२ ३ १२ ३ २३ १२ ३ १ २ ३ २ ३ १ २
उपो मतिः पृच्यते सिच्यते मधु, मन्द्राजनी चोदते अन्तरासनि।
१२ ३ १ २ ३ १ २ ३ १ २ ३ २७ ३ १ २
पवमानः संतनिः सुन्वतामिव, मधुमान्द्रप्सः परि वारमर्षति ॥
॥ २ ॥ (१३६९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—उप, उ अ० । मतिः १ । पृच्यते, सिच्यते क्रि० । मधु ३ । मन्द्राजनी १ । चोदते क्रि० । अन्तः अ० । आसनि ७ । पवमानः १ । सुन्वताम् ६ । इव अ० । मधुमान् द्रप्सः १ । परि अ० । बारम् २ । अर्षति क्रि० ॥

अन्वितपदार्थः—अथ सोमस्य मेधाजनकत्वमाह—(सुन्वताम्) अभिषुण्वतां (संतनिः) संततिः (इव), (द्रप्सः) द्रुतगमनः (पवमानः) सोमः (बारम्) दशापवित्रं (परि-अर्षति) प्रतिगच्छति, (उ) अथ (मधु) मधुना इक्षुप्रभृतिजनितेन रसेन (उप पृच्यते) संपृक्तः क्रियते, अथ (मधुमान्), सोमः (अन्तः आसनि) मुखमध्ये (सिच्यते), पीयते इत्यर्थः, तदा (मन्द्राजनी) हर्षस्य प्रेरयित्री (मतिः) मेधा (चोदते) चोद्यते प्रेर्यते तेन सोमेनेति भावः ॥ ऋग्वेदे तु ॥ ९ । ६९ । २ सुन्वतां=प्रसुन्वतामिति पाठः ॥ २ ॥

भाषार्थः=अब सोम का मेधा [बुद्धि] जनकत्व निरूपित करते हैं—(सुन्वताम्) अभिषव करने वालों के (सन्तनिः) सन्तान के (इव) तुल्य (द्रप्सः) रपटने वाला (पवमानः) सोम (बारम्) प्रथम दशा पवित्र पर (परि अर्षति) रपटता है (उ) फिर (मधु) मिठाई के साथ (उप पृच्यते) मिलाया जाता है और (मधुमान्) मिठाई से मिला हुवा (अन्तः आसनि) मुख के भीतर (सिच्यते) सींचा जाता=पिया जाता है तब (मन्द्राजनी) हर्ष की प्रेरक (मतिः) बुद्धि (चोदते) उस से प्रेरित होती है ॥ ऋ० ९ । ६९ । २ का पाठ संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २ ३ १ २

३ २ १ २ ३१२३ १२३२३ २ ३ २
निष्कृतम् । अत्यक्रमीदर्जुनं वारमव्यय, मत्कं न
३ २उ ३ १ २
निक्तं परि सोमो अव्यत ॥ ३ ॥ [९] (१३७०)

पदपाठः–उक्षा १ । मिमेति, प्रतियन्ति क्रि० । धेनवः १ । देवस्य ६ । देवीः १ । उपयन्ति क्रि० । निष्कृतम् २ । अत्यक्रमीत् क्रि० । अर्जुनम्, वारम्, अव्ययम्, अत्कम् २ । न अ० । निक्तम् २ । परि अ० । सोमः १ । अव्यत क्रि० ॥

अन्वितपदार्थः–(उक्षा) सेचकः सोमः (मिमेति) शब्दायते (धेनवः) पाययित्र्योधाराः (प्रतियन्ति) द्रोणं प्रतिगच्छन्ति (देवीः) दिव्याः धाराः (देवस्य) सोमस्य (निष्कृतम्) स्थानं द्रोणकलशम् (उपयन्ति) उपगच्छन्ति (सोमः), (अर्जुनम्) श्वेतवर्णम् (अव्ययम्) अविरोम विकारम् अतएव (वारम्) बालमयमूर्णामयं दशापवित्रम् (अत्यक्रमीत्) उल्लङ्घयति (निक्तम्) संमृष्टम् (अत्कम्) वज्रमिव दीप्यमानं द्रोणकलशं (परि–अव्यत) संपरि वृणोति ॥ ऋग्वेदे तु ९ । ६९ । ४ मिमाति इति पाठभेदः ॥३॥

भाषार्थः–(उक्षा) सींचने वाला सोम (मिमेति) शब्द करता है (धेनवः) सोम की धारायें (प्रतियन्ति) द्रोणकलश में जाती हैं (देवीः) दिव्य धारायें (देवस्य) सोम के (निष्कृतम्) स्वच्छ सोमघट रूप स्थान को (उपयन्ति) भरदेती हैं (सोमः) सोम (अर्जुनम्) श्वेतवर्ण (अव्ययम्) भेड के रोम-जनित (वारम्) ऊनी दशापवित्र को (अत्येति) छान कर चला जाता है (निक्तम्) स्वच्छ (अत्कम्) वज्र के तुल्य दीप्यमान द्रोणकलश को (परि–अव्यत) भर देता है ॥ ऋ० ९ । ६९ । ४ का पाठान्तर संस्कृत भाष्य में देखिये ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीयतृचस्य-वसिष्ठ ऋषिः । अग्निर्देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा-

२उ ३ १ २ ३२ ३१ २ ३ २

ाग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् ।

१२३१२ ३ २

रेदृशं गृहपतिमथव्युम् ॥१॥ (१३७१) व्याख्याता (७२)

अथ द्वितीया-

२३२उ ३ १२३उ२र ३२३१२३ १२

त्तमाग्निमस्ते वसवोन्यृण्वन्, सुप्रतिचक्षमवसे कुतश्चित् ।

३ २३ २उ ३२३१ २

दक्षाय्यो योदमआस नित्यः ॥ २ ॥ (१३७२)

पदपाठः-तम्, अग्निम् २ । अस्ते ७ । वसवः १ । न्यृण्वन् क्रि० । सुप्रतिचक्षम् २ । अवसे अ० । कुतश्चित् अ० । दक्षाय्यः,यः १ । दमे ७ । आस क्रि० । नित्यः १ ॥

अन्वितपदार्थः-(यः), (दक्षाय्यः) बलिष्ठः अग्निः (दमे) गृहे (नित्यः) नैरन्तर्येण स्थापितः (आस) स्यात् [सकारव्यत्ययः] (तम् अग्निं) पावकं (सुप्रतिचक्षम्) सुदर्शनम् (कुतश्चित्) सर्वस्मादपि (अवसे) रक्षणाय (वसवः) गृहस्थाः (अस्ते) गृहे (न्यृण्वन्) निदध्युः ॥

मनुष्यैर्गृहाश्रमिभिरग्निरजस्रं स्वस्वगृहेषु अग्न्यागारे आधातव्य इति भावः ॥ ऋग्वेदे ७ । १ । २ ऽपि ॥ २ ॥

भाषार्थः-(यः) जो (दक्षाय्यः) बलिष्ठ अग्नि (दमे) घर घर में (नित्यः) नित्य (आस) होवे (तम्) उस (सुप्रतिचक्षम्) भले प्रकार दर्शन हेतु (अग्निम्) अग्नि का (कुतश्चित्) सब से (अवसे) रक्षा के लिये (वसवः) बसने वाले गृहस्थ लोग (अस्ते) घर के अन्तर्गत अग्न्यागार में (न्यृण्वन्) आधान करें ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गृहस्थ मनुष्यों का धर्म है कि सब प्रकार की रक्षार्थ अपने अपने घरों में अग्न्यागार नामक स्थान विशेष में नियम से प्रत्येक समय अग्नि का स्थापन रक्खें ॥ ऋ० ७ । १ । २ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १र २र ३ २र

प्रेद्धोअग्ने दीदिहि पुरोनोऽजस्रया सूर्म्या यविष्ठ ।

१र २र ३ १ २ ३ १ २

त्वाꣳ शश्वन्त उपयन्ति वाजाः ॥३॥ [१०] (१३७३)

पदपाठः-प्रेद्धः १ । अग्ने सं० । दीदिहि क्रि० । पुरः अ० । नः ६ । अजस्रया, सूर्म्या ३ । यविष्ठ सं० । त्वाम् २ । शश्वन्तः १ । उपयन्ति क्रि० । वाजाः १॥

अन्वितपदार्थः-(यविष्ठ) युवतम ! (अग्ने) पावक ! (प्रेद्धः) प्रकर्षेण दीप्तस्त्वम् (अजस्रया) निरन्तरया (सूर्म्या) प्रदीप्तलौहशङ्कुसमया ज्वालया (नः) अस्माकं (पुरः) अग्रे देवयजनवेद्यां (दीदिहि) दीप्यस्व (त्वाम्) (शश्वन्तः) नैरन्तर्यप्रयुक्तानि बहूनि वा [निघं० ३ । १] (वाजाः) अन्नानि हवींषि (उपयन्ति) प्राप्नुवन्ति ॥ ऋग्वेदे ७ । १ । ३ ऽपि यजुर्वेदे १७ । ७६ ऽपि च ॥ ३ ॥

भाषार्थः-(यविष्ठ) अत्यन्त युवा अग्ने ! (प्रेद्धः) अत्यन्त प्रदीप्त तू (अजस्रया) निरन्तर (सूर्म्या) प्रदीप्त लोहे की कील के समान ज्वाला से (नः) हमारे (पुरः) आगे यज्ञवेदि में (दीदिहि) धधक, क्यों कि (त्वाम्) तुझ को (शश्वन्तः) निरन्तर वा बहुत [निघं० ३ । १] (वाजाः) हव्य अन्न (उपयन्ति) प्राप्त हो रहे हैं ॥ ऋ० ७ । १ । ३ और यजुः १७ । ७६ में भी ॥ ३ ॥

उक्तमग्निष्टोम साम । इदानीं मानसं स्तोत्रं भवति इत्यादि विवरणकारः ॥

तत्र तृतीयतृचस्य-सार्पराज्ञी ऋषिः । सूर्य आत्मा देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१र २र ३ १ २ ३ १ २ ३ २

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ १ २
पितरं च प्रयन्त्स्वः ॥१॥ (१३७४) व्याख्याता (६३०)

अथ द्वितीया-

३ १ २ ३ २उ ३ १ २ ३ २
अन्तश्चरति रोचनास्य प्राणादपानती ।
१र २र ३ १र २र
व्यख्यन्महिषो दिवम् ॥२॥ (१३७५) व्याख्याता (६३१)

अथ तृतीया-

१ २उ ३ १ २ ३ १ २ ३ १ २
त्रिष्ठंशद्धाम विराजति वाक्पतङ्गाय धीयते ।
२ ३ २ ३ २ ३ १ २
प्रतिवस्तोरह द्युभिः॥३॥[११](१३७६)व्याख्याता(६३२)

———+:०:+———

इत्येकादशाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

———*:०:*———

इति षष्ठप्रपाठके प्रथमोऽर्धः

———०:*:०———

सप्तमश्चायं द्वादशाहः सत्रात्मकोऽहीनात्मकश्चेति विवरणकारः ॥

इति श्रीमत्कण्ववंशावतंस पण्डित श्री हज़ारीलाल स्वामि सूनुना, हस्तिनापुर पार्श्ववर्त्ति परीक्षितगढ़ निवासिना, तुलसीराम स्वामिना कृते सामवेदभाष्ये उत्तरार्चिके एकादशोऽध्यायः ॥ ११ ॥

———:*:*———

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ द्वादशाऽध्यायः

——+:*:+——

इदानीं गवामयनं सवत्सरं सत्रमुच्यते । तत्रादौ ज्योतिष्टोमेऽतिरात्रः०००० आग्नेयमाज्यम् इति विवरणकारः—

तत्र

प्रथमे खण्डे चतुर्ऋचे प्रथमसूक्ते प्रथमयोर्गोतमो राहूगण ऋषिः । अग्निर्देवता । निचृद्गायत्री छन्दः ॥ तत्र प्रथमा—

३ १ २ ३१र २र ३ १ २

उप प्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।

३ २ ३ १ २ ३ २

आरे अस्मे च शृण्वते ॥ १ ॥ (१३७७)

पदपाठः—उपप्रयन्तः १ । अध्वरम् २ । मन्त्रम् २ । वोचेम क्रि० । अग्नये ४ । आरे ७ । अस्मे ६ । च अ० । शृण्वते क्रि० ॥

अन्वितपदार्थः—(अध्वरं) यज्ञम् (उपप्रयन्तः) उपेत्य प्रकर्षेण यन्तो गच्छन्तः प्राप्त्यविच्छेदेन सम्यगनुष्ठितवन्तो वयम् (आरे) दूरे (अस्मे) अस्माकं समीपे (च) (शृण्वते) अङ्गीकुर्वाणाय (अग्नये) ज्ञानस्वरूपाय परमात्मने (मन्त्रम्) स्तोत्रं (वोचेम) उच्चारयेम ॥

यः परमात्मा दूरसमीपवर्त्तिनां सर्वेषां स्तुतीरङ्गीकरोति तत्स्तुतिविशिष्टसूक्तपाठो यज्ञारम्भेऽवश्यं विधेयः इति भावः ॥

अथवा—भौतिकाग्निपक्षेऽपि (आरे) दूरे (अस्मे) अस्माकं समीपे (च) (शृण्वते) अङ्गीकुर्वते [स्तुत्य-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नुरूपफलप्रदानमेव श्रवणमनुसंधेयम्] (अग्नये) पावकाय (अध्वरम् उपप्रयन्तः), वयम् (मन्त्रम्) आग्नेय सूक्तादिरूपं (वोचेम) ॥

अग्निरपि दूरसमीपवर्त्तिनां प्राणिनां सर्वविधोपकारं कर्त्तुं शक्नोति हुतः सन्, तस्मात् यज्ञारम्भे तद्गुणवर्णनपरामन्त्रा याज्ञिकैरुच्चार्या इवि भावः ॥ ऋग्वेदे १ । ७४ । १ यजुर्वेदे ३ । ११ चाऽपि ॥ १ ॥

भाषार्थः—(अध्वरम्) जो हिंसा से रहित है उस यज्ञ के (उपप्रयन्तः) समीप उत्तम प्रकार से जाते हुवे और यज्ञ में पहुंच कर यज्ञारम्भ करते हुवे हम (आरे) दूर (च) और (अस्मे) हमारे समीपवर्त्तियों की (शृण्वते) सुनाई करते हुवे (अग्नये) ज्ञानस्वरूप परमात्मा के लिये (मन्त्रम्) स्तोत्र को (वोचेम) उच्चारित करें ॥

जो परमात्मा दूरस्थों और अस्मदादि के समीपस्थों की सब की सुनाई करता है उस ज्ञानस्वरूप परमात्मा के लिये उस की स्तुतिरूप वेदसूक्तों स्तोत्रों का पाठ यज्ञ के आरम्भ में अवश्य करना चाहिये ॥

अथवा—भौतिकपक्ष में, (आरे) दूरस्थों (च) और (अस्मे) हमारे समीपवर्त्तियों की सब की (शृण्वते) स्वीकार करने वाले (अग्नये) अग्निके लिये (मन्त्रम्) आग्नेयसूक्तादि वेदमन्त्र का (अध्वरम् उपप्रयन्तः) यज्ञ में जाते हुवे हम (वोचेम) उच्चारण करें ॥

भौतिक अग्नि भी दूरस्थ और समीपस्थ सब प्राणियों का उपकार कर सक्ता है जब कि होमा जावे, और अग्नि में होमजनित लाभ वर्णन करने वाले मन्त्रों में कहे फल को पूरा कर देना ही, सुनाई करना समझिये, सो उस अग्निविषयक मन्त्रों द्वारा यज्ञारम्भ में याज्ञिकों को पाठ करना चाहिये ॥ ऋ० १ । ७४ । १ तथा यजुः ३ । ११ में भी ॥ १ ॥

अथ द्वितीया—

१र २र ३ १ २ ३ १ २ ३ १ २

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १ २

अक्षरद्दाशुषे गयम् ॥ २ ॥ (१३७८)

पदपाठः—यः १ । स्त्रीहितीषु ७ । पूर्व्यः १ । संजग्मानासु, कृष्टिषु ७ । अक्षरत् क्रि० । दाशुषे ४ । गयम् २ ॥

अन्वितपदार्थः-(यः) (पूर्व्यः) सनातनः अग्निः परमेश्वरो भौतिको वा (स्त्रीहितीषु) हतासु मरणधर्मिणीषु (संजग्मानासु) निरन्तरं गच्छतीषु नश्यमानासु (कृष्टिषु) मनुष्यादिप्रजासु (दाशुषे) यज्ञानुष्ठात्रे जनाय (गयम्) प्राणम्(अक्षरत्) सिञ्चति,तस्मैमन्त्रं वोचेमेति पूर्वेणान्वयः॥

स्नेहयतीति वधकर्मसु निघं० २। १९ स्निह्यन्ते हन्यन्ते यास्ताः स्त्रीहितयस्तासु। संजग्मानासु-समोगम्यृच्छिभ्याम् १। ३ । २९ इत्यात्मनेपदे, लिटः कानज्वा ३। २। १०६ गमहनेत्यादिना ६। ४। ९८ उपधालोपः ॥

अयं भावः-सुहुतोग्निः सूपासितः परमात्मा वा मरणधर्मेषु निरन्तरं मृत्युं गच्छत्सु चापि मनुष्येषु मध्ये यो याज्ञिकस्तस्यायुर्वर्धयति इति ॥ ऋग्वेदे १। ७४। २ ऽपि॥२॥

भाषार्थः-(यः) जो (पूर्व्यः) सनातन परमेश्वर वा अग्नि (स्त्रीहितीषु, संजग्मानासु, कृष्टिषु) मरती, जाती, प्रजाओं में (दाशुषे) दानशील यज्ञ करने वाले मनुष्य के लिये (गयम्) प्राण को (अक्षरत्) सींचता है ॥ [उस अग्नि के लिये मन्त्रोच्चारण करें] यह पूर्व मन्त्र से अन्वय है ॥

भाव यह है कि यद्यपि सारी प्रजा मरती जाती दुनिया है, कोई अमर नहीं, परन्तु परमात्मा के उपासकों और अग्निहोत्रियों को प्राण अधिक मिलता है और वे दीर्घजीवी होते हैं॥ निघण्टु २। १९ अष्टाध्यायी १। ३। २९ और ३। २। १०६ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १। ७४। २ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयायाः-वसिष्ठ ऋषिः । अग्निर्देवता । विराड्गायत्री छन्दः ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २

स नो वेदो अमात्यमग्नीरक्षतु शंतमः ।

३ २उ ३ १ २

उतास्मान्पात्वंहसः ॥ ३ ॥ (१३७९)

पदपाठः-सः १ । नः ६ । वेदः २ । अमात्यम् २ । अग्निः १ । रक्षतु क्रि० । शंतमः १ । उत अ० । अस्मान् २ । पातु क्रि० । अंहसः ५ ॥

अन्वितपदार्थः-(सः) परमेश्वरो भौतिको वा (शंतमः) सुखदः (अग्निः), (नः) अस्माकं (वेदः) धनम् (अमात्यम्) अन्तिके भवं मन्त्रिवर्गं च (रक्षतु) पालयतु (उत) अपि च (अंहसः) पापात् वाय्वादिगतरोगकारक-जन्तुविशेषाद्वा (अस्मान्) नः (पातु) रक्षतु ॥ ऋग्वेदे ७ । १५ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(स) वह (शंतमः) सुखदायक (अग्निः) परमेश्वर वा अग्नि (नः) हमारे (वेदः) धन को और (अमात्यम्) मन्त्रिवर्ग को (रक्षतु) रक्षित करे (उत) और (अस्मान्) हमारी (अंहसः) पाप से वा वायु आदि गत सूक्ष्म कृमि आदि रोगजनक जन्तु से (पातु) रक्षा करे ॥ ऋ० ७ । १५ । ३ में भी ॥ ३ ॥

अथ चतुर्थ्याः-गोतमो राहूगण ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

३ १ २ ३ २ ३ २३ १ २ ३ १ २

उत ब्रुवन्तु जन्तवः उदग्निर्वृत्रहाऽजनि ।

३ १र २र

धनंजयो रणे रणे ॥ ४ ॥ [१](१३८०)

पदपाठः-उत अ० । ब्रुवन्तु क्रि० । जन्तवः १ । उत् अ० । अग्निः, वृत्रहा १ । अजनि क्रि० । धनंजयः १ । रणे, रणे ७ ॥

अन्वितपदार्थः-(वृत्रहा) पापहा शत्रुहन्ता वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अग्निः) पावकः (उत् अजनि) उत्पन्नः, स च (रणे रणे) प्रतिसंग्रामम् (धनंजयः) विजयप्रदोऽस्ति, (उत) वितर्कपूर्वकं (जन्तवः) आग्नेयविद्याविदः (ब्रुवन्तु) उपदेश्योपदेशकभावेन प्रचारयन्तु इति परमेश्वरोपदेशः ॥

देशविजयकृते संग्रामेऽपि आग्नेयैरेव शस्त्रास्त्रादिभिर्विजयोजायतेऽथ देहरक्षार्थे वाय्वादिगतदुष्टजन्तुविग्रहेपि होमादिकृतैराग्नेयैर्द्रव्यैर्देहगतैस्तत्तच्छत्रुपराभवः कर्त्तुं शक्य इत्यादिविचारार्थतर्कपुरस्सरं मनुष्यैरग्निविद्या प्रसार्येति भावः ॥ ऋग्वेदे १ । ७४ । ३ ऽपि ॥ ४ ॥

भाषार्थः-(वृत्रहा) पापहन्ता वा शत्रुहन्ता (अग्निः) अग्नि (उत् अजनि) उत्पन्न हुवा है, जो (रणे रणे) प्रत्येक संग्राम में (धनंजयः) विजयप्रद है (उत) तर्कपूर्वक (जन्तवः) आग्नेय विद्या के ज्ञाता प्राणी (ब्रुवन्तु) उपदेश्य उपदेशक भाव से प्रचार करें ॥

जो संग्राम देशविजयार्थ चक्रवर्त्ती राज्यस्थापनार्थ प्रजारक्षार्थ किये जावें उन में भी अग्निसिद्ध शस्त्रास्त्र ही विजयप्रद हैं, और जो संग्राम वायुआदिगतसूक्ष्म दुष्टजन्तुओं से मनुष्यादि के शरीरस्थ धातु आदि में स्वास्थ्य के लिये होता है, उस में भी आग्नेय द्रव्य जो होमादि द्वारा उत्पन्न होकर शरीरों और वायु आदि में फैलते हैं, उन्हीं के द्वारा विजय होता है इस लिये परमात्मा का उपदेश है कि लोग तर्कवितर्कपूर्वक उपदेश्य उपदेशक वा शिष्य अध्यापक होकर इस विद्या में नया २ आविष्कार करें ॥ ऋ० १ । ७४ । ३ में भी ॥ ४ ॥

अथ द्वितीयतृचात्मक सूक्तस्य-भरद्वाज ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १र २र ३ १ २

अग्ने युङ्क्ष्वादि ये तवाश्वासो देव साधवः ।

२ ३ १ २ ३ १ २

अरं वहन्त्याशवः ॥१॥ (१३८१) व्याख्याता (२५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

१ २ ३ १ २ ३ १र २र ३ १ २

अच्छानो याह्यावहाऽभिप्रयाꣳसि वीतये ।

२ ३१र २र

आ देवान्त्सोमपीतये ॥ २ ॥ (१३८२)

पदपाठः-अच्छ अ० । नः २ । याहि, आवह क्रि० । अभि अ० । प्रयांसि २ । वीतये ४ । आ अ० । देवान् २ । सोमपीतये ४ ॥

अन्वितपदार्थः-अग्ने ! (नः) अस्मान् (अच्छ) सुष्ठु (याहि) प्राप्नुहि, तथा (प्रयांसि) हवींषि अन्नानि (वीतये) भक्षणाय (सोमपीतये) सोमपानाय च (देवान्) वायुप्रभृतीन् (अभि-आ-वह) अभिमुखमावह ॥ ऋग्वेदे ६ । १६ । ४४ ऽपि ॥ २ ॥

भाषार्थः-अग्ने ! (नः) हम को (अच्छ) अच्छे प्रकार (याहि) प्राप्त हो और (प्रयांसि) अन्नों हव्यों को (वीतये) खाने के लिये तथा (सोमपीतये) सोम पीने के लिये (देवान्) वायु आदि देवों को (अभि-आ-वह) संमुख बुलाओ ॥ ऋ० ६ । १६ । ४४ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १र २र ३ १ २

उदग्ने भारत द्युमदजस्रेण दविद्युतत् ।

२ ३ १ २

शोचा विभाह्यजर ॥ ३ ॥ [२] (१३८३)

पदपाठः-उत् अ० । अग्ने, भारत सं० । द्युमत्, अजस्रेण ३ । दविद्युतत् १ । शोच, विभाहि क्रि० । अजर सं० ॥

अन्वितपदार्थः-(भारत अग्ने) हे भरणकर्त्तः ! अग्ने ! (उत् शोच) उद्दीप्यस्व (अजर) जरारहित ! (दविद्युतत्) भृशं द्योतमानस्त्वम् (द्युमत्) द्युमता दीप्तिमता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अजस्रेण) अविच्छिन्नेन तेजसा (विभाहि) प्रकाशयाऽन्यान् ॥ ऋग्वेदे ६ । १६ । ४५ ऽपि ॥ ३ ॥

भाषार्थः-(भारत) भरण करने वाले (अग्ने) अग्ने ! (उत् शोच) चमक (अजर) जरारहित ! (दविद्युतत्) निरन्तर प्रकाशमान तू (द्युमत् अजस्रेण) दीप्तिमान् अविच्छिन्न तेज से (विभाहि) अन्यों को प्रकाशित कर ॥ ऋ० ६ । १६ । ४५ में भी ॥ ३ ॥

अथ तृतीयसूक्तस्य तृचस्य-प्रजापतिर्ऋषिः । सोमो देवता । अनुष्टुप्छन्दः ॥

तत्र प्रथमा-

१ २ ३ १र २र ३ २ ३ १ २ ३ १र २र

प्रसुन्वानायान्धसो मर्त्तो नवष्ट तद्वचः ।

२३ १ २ ३१२ ३२३१र २र

अप श्वानमराधसꣳहतामखं न भृगवः ॥१॥ (१३८४)

व्याख्याता (५५३) आयाता च (७७४)

इदानीमाग्नेयमुच्यते इति विष० ॥

अथ द्वितीया-

२ ३ १र २र ३२उ ३ २ ३ २र

आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।

१ २ ३ १र २र ३ १र २र ३ १ २

सरज्जारो न योषणां वरो न योनिमासदम् ॥२॥ (१३८५)

पदपाठः-आ अ० । जामिः १ । अत्के ७ अव्यत क्रि० । भुजे ७ । न अ० । पुत्रः १ । ओण्योः ६ । सरत् क्रि० । जारः १ । न । योषणाम् २ । वरः १ । न । योनिम् २ । आसदम् क्रि० ॥

अन्वितपदार्थः-(जामिः) उदकरूपः सोमः (अत्के) आच्छादके दशापवित्रे (आ-अव्यत) आवृणोति संबद्धोभवति । दृष्टान्ताः-(न) यथा (ओण्योः) द्यावापृथिव्योरिव मातापित्रोः (भुजे) क्रोड़े (पुत्रः) आत्मजः (सरत्) प्रेम्णा गच्छति । (न) यथा च (जारः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कामी पुरुषः(योषणां) योषितम् गच्छति। (न)यथा वा(वरः) वैवाह्य पुरुषः कन्यां गच्छति तद्वदयं सोमः (योनिम्) स्थानं द्रोणकलशम् (आसदम्) आसत्तुं गच्छति ॥ ऋग्वेदे ९। १०१। १४ऽपि ॥ इत आरभ्य चतसृषु ऋक्षु मुग्धेन पक्षपातिना ज्वालाप्रसाद भार्गवेण सर्ववैदिकतन्त्रविलक्षणो हि सीतारामवर्णनपरोऽर्थोऽनर्थरूपः प्रदर्शितः ॥ २ ॥

भावार्थः-(जामिः) रसरूप सोम (अत्के) आच्छादक दशापवित्र पर (आ अठयत) संबद्ध होता और फिर (योनिम्) स्थान=द्रोणकलश में (आसदम्) स्थित होने को (सरत्) सरकता है। इस में ३ दृष्टान्त-१-(न) जैसे (पुत्रः) पुत्र ओषयोः) द्यावा पृथिवी के समान माता पिता की (भुजे) गोद में आ २ (न) जैसे (जामः) कामी पुरुष (योषणाम्) कामिनी स्त्री को और ३ (न) जैसे (वरः) विवाहेला पुरुष कन्या को प्राप्त होता है ॥ ऋ० ९। १०१। १४ वे भा ॥ यहां से ४ ऋचाओं में मुग्ध पक्षपाती ज्वालाप्रसाद भार्गव ने सब वैदिक तन्त्रों से निराला सीता राम का वर्णन करके अनर्थ किया है ॥२॥

अथ तृतीया—

२ ३ १ २३ १ २ ३ २उ ३ २ ३ १२
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।
१२ ३१२ ३१ र २र ३१२
हरिः पवित्रे अठयत वेधा न योनिमासदम् ॥३॥[३](१३८६)

पदपाठः-सः, वीरः, दक्षसाधनः १। वि अ०। यः १। तस्तम्भ क्रि०। रोदसी २। हरिः १। पवित्रे ७। अठयत क्रि०। वेधाः १। न अ०। योनिम् २। आसदम् क्रि०॥

अन्वितपदार्थः-(यः) (हरिः) सोमः (पवित्रे) दशापवित्रे (अठयत) आवृणोत् संबद्धोजायते (सः) सः सोम एव रूपान्तरेण (दक्षसाधनः) बलसाधनः (वीरः) बली सन् (रोदसी) द्यावापृथिव्यौ (वि त-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तम्भ) व्यस्तभ्नात् (न) यथा (वेधाः) विधाता (योनिम्) स्थानम् ब्रह्माण्डम् (आसदम्) आसीदति तद्वत् ॥

सोमेनैव शीतलत्वाज्जगद्व्यापकेन सता तत्तद्बलवद्वस्तुषु बलसाधनेन वीरेण द्यावाभूम्योर्धारणं क्रियते इति भावः ॥ ऋग्वेदे ९ । १०१ । १५ ऽपि ॥ ३ ॥

भाषार्थः-(यः) जो (हरिः) हरा सोम (पवित्रे) दशापवित्र पर (अट्यत) संबद्ध होता है (सः) वही रूपान्तर से (दक्षसाधनः) बल का साधन होकर (वीरः) बली सोम (रोदसी) द्युलोक पृथिवीलोक को (वितस्तम्भ) थांभ रहा है (न) जैसे (वेधाः) विधाता (योनिम्) स्थान= ब्रह्माण्ड में (आसदम्) आसीन है ॥

स्वभावसिद्ध बात है कि गरमी प्रत्येक वस्तु को विशीर्ण करती बखेरती और सोम शीतल होने से सब पदार्थों को जोड़ता है क्योंकि यह बल का साधन है । बस सोम ने ही रूपान्तर से उस उस पदार्थ में बलसाधनता से स्थित होकर उस उस पदार्थ को थांभ रक्खा है । यह भाव है ॥

ऋ० ९ । १०१ । १५ में भी ॥ ३ ॥

इति उत्तरार्चिके द्वादशाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीयखण्डे प्रथमप्रगाथस्य-मौभरिःकाण्वऋषिः । इन्द्रो देवता । निचृदुष्णिक् पादनिचृत्पङ्क्तिश्चेति क्रमेण छन्दसी ॥ तत्र प्रथमा-

३ २ ३ १ २र ३ १ २ ३ १ २

अभ्रातृव्यो अनात्वमनापिरिन्द्र जनुषा सनादसि ।

३ १ २ ३ १ २

युधे दापित्वमिच्छसे ॥ १ ॥ (१३८७) व्याख्याता (३९९)

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ १ २ ३ २र

नकीरेवन्तष्ँसख्याय विन्दसे पीयन्ति ते सुराश्वः ।

३ २ ३ १ २ ३ १ २र ३ २ ३ १ २

यदा कृणोषि नदनुष्ँसमूहस्यादित्पितेव हूयसे ॥

॥ २ ॥ [४] (१३८८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-नकिः अ० । रेवन्तम् २ । सख्याय ४ । विन्दसे, पीयन्ति क्रि० । ते २ । सुराश्वः १ । यदा अ० । आकृणोषि क्र० । नदनुम् २ । समूहसि क्रि० । आत्, इत्, पितेव अ० । हूयसे क्रि० ।

अन्वितपदार्थः—इन्द्र ! राजन् ! (रेवन्तम्) केवलधनवन्तं यागादिधर्मकार्यमकुर्वाणमाढ्यम्मन्यं मनुष्यं (सख्याय) मैत्र्यै (नकिः) नैव (विन्दसे) लभसे । कुतः ? (सुराश्वः) सुरया प्रवृद्धाः प्रमत्ता नास्तिकाः (ते) त्वाम् (पीयन्ति) हिंसन्तीत्यतः । किन्तु (नदनुम्) स्तोतारं राजभक्तं प्रजाजनं (यदा) (आकृणोषि) आकारयसि तदा (समूहसि) संवहसि धनादि तस्मै ददासि (आत् इत्) अतश्च (पितेव) पितृवत् (हूयसे) तेन स्तूयसे ॥ ऋग्वेदे ८ । २१ । १४ ऽपि ॥ २ ॥

भाषार्थः-इन्द्र ! हे राजन् ! (रेवन्तम्) केवल धनी जो यज्ञादि परोपकार में धन नहीं लगाता उस धनी मानी को आप (सख्याय) मित्रता के लिये (नकिः) नहीं (विन्दसे) रखते क्योंकि (सुराश्वः) मद्यादि व्यसनों से बढ़े हुए प्रमत्त नास्तिक वे धनी मानी लोग (ते) आप को (पीयन्ति) हिंसा करते हैं। किन्तु-(नदनुम्) स्तुति करने वाले राजभक्त प्रजाजन को (यदा) जब आप (आकृणोषि) बुलाते हैं तब (समूहसि) उस का धनादिसे सत्कार करते हैं (आत् इत्) तब (पितेव) पिता के समान (हूयसे) उस से स्तुत होते हैं ॥ ऋ० ८ । २१ । १४ में भी ॥ २ ॥

अथ द्वितीयस्य तृचस्य सूक्तस्य-मेधातिथिर्मेध्यातिथी ऋषी । इन्द्रो देवता । बृहती छन्दः ॥ तत्र प्रथमा-

१ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १

आ त्वा सहस्रमाशतं युक्ता रथे हिरण्यये । ब्रह्मयुजो

२ ३ २ ३ १ २ ३ १ २

हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ १ ॥ (१३८९)

व्याख्याता (२४५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३ १२ ३ २३ १ २ ३१२ ३ १
आ त्वा रथे हिरण्यये हरी मयूरशेप्या । शितिपृष्ठा
२ ३ २ ३ १ २ ३ १२ ३१२
वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥२॥ (१३९०)

पदपाठः—आ अ० । त्वा २ । रथे, हिरण्यये ७ । हरी, मयूरशेप्या, शितिपृष्ठा १ । वहताम् क्रि० । मध्वः, अन्धसः, विवक्षणस्य ६ । पीतये ४ ॥

अन्वितपदार्थः—इन्द्र ! सूर्य ! (मयूरशेप्या) मयूरपुच्छवन्नानावर्णोपेतौ (शितिपृष्ठा) श्वेतवर्णप्रतीतियुक्तौ (हरी) हरणशीलौ समीचीनतिरश्चीनभेदाभिन्नत्वाद् द्विविधौ किरणसमूहौ (विवक्षणस्य, मध्वः, अन्धसः) वक्तुमिष्टस्य प्रशस्तस्य, मधुरस्य, अन्नस्य हव्यस्य सोमस्य (पीतये) पानाय (हिरण्यये) तेजोमये (रथे) रमणीये स्वरूपे (त्वा) त्वाम् (आवहताम्) आवहतः ॥

मयूरशेप्याइत्यत्र—सुपां सुलुगित्यादिना ७ । ३ । ३९ विभक्तेरीकारस्य "ङा" आदेशः, तेनैव शितिपृष्ठा इत्यत्रा ऽऽकारादेशः ॥

सूर्यस्य समविषमभेदभिन्नौ द्विविधौ किरणौ स्तस्तौ च मयूरपुच्छवद्विचित्रसप्तवर्णयुक्तौ अपि सप्तवर्णसंघेन श्वेतौ प्रतीयेते, तौ ह्यग्नौप्रास्ताहुतिः सम्यगादित्यमुपातिष्ठते इत्यादि मनुवचनोक्तरीत्या सोमादिहव्यद्रव्यरसास्वादाय सूर्यं वहतः इति भावः ॥ ऋग्वेदे ८ । १ । २५ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-इन्द्र ! सूर्य ! (मयूरशेप्या) मयूर की पूंछ के समान अनेक वर्ण वाले भी (शितिपृष्ठा) एक श्वेतवर्ण की प्रतीति से युक्त (हरी) तिरछे सीधे भेद से दो प्रकार के किरणसमूह, (विवक्षणस्य) प्रशंसनीय (मध्वः) मधुर (अन्धसः) अन्न इव्य सोम के (पीतये) पानार्थ (हिरण्यये) तेजोमय (रथे) रमणीय स्वरूप में (त्वा) तुझ को (आवहताम्) सर्वतः लेचलते हैं ॥

तात्पर्य यह है कि सूर्य की किरणें जो सीधी और तिरछी होकर दो प्रकार हम तक आती हैं और जिन में मोर की पुच्छ के से सात ७ रङ्ग हैं पर सब मिल कर एक श्वेतपृष्ठ जान पड़ते हैं, वे किरणें " अग्नौ प्रास्ताहुतिः० " इत्यादि मनुवचनोक्त रीत्यनुसार सोमादि मधुर प्रशंसनीय इष्ट पदार्थ सूर्य में पहुंचाती हैं ॥ अष्टाध्यायी ७ । ३ । ३९ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । १ । २५ में भी ॥ २ ॥

अथ तृतीया-

२ १ २ १ २ ३ १ २ ३ १ २
पिबात्वा ऽ३ऽ स्य गिर्वणः सुतस्य पूर्वपाइव ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥

॥ ३ ॥ [५] (१३९१)

पदपाठः-पिब क्रि० । तु अ० । अस्य ६ । गिर्वणः सं० । सुतस्य ६ पूर्वपा इव अ० । परिष्कृतस्य, रसिनः ६ । इयम्, आसुतिः, चारुः १ । मदाय ४ । पत्यते क्रि० ॥

अन्वितपदार्थः-(गिर्वणः) हे प्रशंसनीय ! (पूर्वपाइव) पूर्वं पिबत्यसौ वायुरिव वर्त्तमानस्त्वम् (अस्य) (सुतस्य) अभिषुतस्य (परिष्कृतस्य) सुमृष्टस्य (रसिनः) रसवतः सोमस्य (इयम्) अस्माभिः कृता (आसुतिः) (मदाय) हर्षाय (चारु) शोभना (पत्यते) जायते (तु) अतः (पिब) ॥ यतस्त्वत्किरणसंपृक्तेनाऽनेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लोका एतस्य सर्वगुणैः संपृक्ताः स्युः ॥ ऋग्वेदे ८ । १ । २६ ऽपि ॥ ३ ॥

भाषार्थः-(गिर्वणः) हे वाणी से प्रशंसनीय ! (पूर्वपाइव) प्रथम पीने वाले वायु के समान वर्त्तमान तू (अस्य) इस (सुतस्य) अभिषुत और (परिष्कृतस्य) शोधित (रसिनः) रसवाले सोम का (इयम्) यह (आसुतिः) आसव (मदाय) हर्ष के लिये (चारुः) उत्तम है (तु) अतः (पिब) शोषण कर, जिस से तेरी किरणों से छुवे हुवे इस सोमरस से संपृक्त सब लोक उस के गुणों से संपृक्त होजावें ॥ ऋ० ८ । १ । २६ में भी ॥ ३ ॥

अथ तृतीयसूक्तस्य प्रगाथस्य ऋजिष्वा ऋषिः । पवमानः सोमोदेवता । ककुप्छन्दः ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ २ ३ १र २र ३ १ २ ३ १ २
आ सोता परिषिञ्चताऽश्वं न स्तोममप्तुरꣳरजस्तुरम् ।
३ १ २ ३ १ २
वनप्रक्षमुदप्रुतम् ॥ १ ॥ (१३९२) व्याख्याता (५८०)

अथ तृतीया-

३ १ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने ।
३ २ ३ २ ३ १ २ ३ १र २र ३ २ ३ २ ३ २
ऋतेन यऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥२॥[६](१३९३)

पदपाठः—सहस्रधारम्, वृषभम्, पयोदुहम्, प्रियम् २। देवाय, जन्मने ४। ऋतेन ३। यः, ऋतजातः १। विवावृधे क्रि०। राजा, देवः, ऋतम्, बृहत् १ ॥

अन्वितपदार्थः-(सहस्रधारम्) बहुधारोपेतम् (वृषभम्) अतएव वृष्टिकरम् (पयोदुहम्) जलानां दोग्धारम् (प्रियम्) प्रीणयितारम् सोमं (देवाय) दिव्याय (जन्मने) उत्पादाय [आ सोत] इति पूर्वेणान्वयः। (ऋतजातः) उदकाज्जातः (यः)(राजा) सोमः (ऋतेन) वसती-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्याख्येन जलेन (विवावृधे) विशेषेण वर्धते (देवः) द्योतमानः (ऋतम्) जलभूतः (बृहत्) महान् भवति ॥ ऋग्वेदे ९ । १०८ । ८ ऽपि ॥ २ ॥

भाषार्थः-(सहस्रधारम्) बहुत धारा वाले (वृषभम्) इसी से वृष्टिकर्त्ता (पयोदुहम्) जलों के दोग्धा (प्रियम्) प्यारे सोम को (देवाय) दिव्य (जन्मने) जन्म के लिये [अभिषुत करो] यह पूर्व मन्त्र से अन्वय है (यः) जो सोम (ऋतजातः) जल से उत्पन्न हुवा (ऋतेन) वसतीवरी नामक जल से (विवावृधे) बढ़ता है और जो (राजा) प्रकाशमान (देवः) दिव्य (ऋतम्) द्रवीभूतजलरूप (बृहत) महान् है ॥ ऋ० ९।१०८। ८ में भी ॥ २ ॥

इति द्वादशाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ-

तृतीये खण्डे प्रथमर्चस्य--भरद्वाजऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ १ २ ३ १ २ ३ १ २

अग्निर्वृत्राणि जङ्घनद्विणस्युर्विपन्यया ।

१ २ ३ १र २र

समिद्धः शुक्र आहुतः ॥१॥ (१३१४) व्याख्याता (४)

अथ द्वितीया-

१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २

गर्भे मातुः पितुः पिता विदिद्युतानो अक्षरे ।

१ २ ३ २ ३ २ ३ २

सीदन्नृतस्य योनिमा ॥२॥ (१३१५)

पदपाठः-गर्भे ७ । मातुः, पितुः ६ । पिता, विदिद्युतानः १ । अक्षरे ७ । सीदन् १ । ऋतस्य ६ । योनिम् २ । आ अ० ॥

अन्वितपदार्थः-अत्र पितृशब्देन द्यौः, मातृशब्देन भूमिश्चाभिधीयते-द्यौः पिता पृथिवी मातेति श्रवणात् (मातुः) भूमेः (गर्भे) मध्ये (अक्षरे) क्षरणरहिते वेदि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्थाने (विदिद्युतानः) प्रकाशमानः (पितुः) द्युलोकस्य हविषां प्रापणात् (पिता) पालयिता अग्निः (ऋतस्य) यज्ञस्य (योनिम्) उत्तरवेदिनामकं धिष्ण्यम् (आ-सीदन्) सन्, "वृत्राणिजङ्घनदिति" पूर्वेणान्वयः ॥ ऋग्वेदे ६। १६। ३५ऽपि ॥ २ ॥

भाषार्थः-यहां पिता और माता शब्द से द्युलोक और पृथिवीलोक का ग्रहण है। श्रवण करते हैं कि "द्यौः पिता पृथिवी माता"। (मातुः) पृथिवी के (गर्भे) मध्य (अक्षरे) क्षरणरहित वेदिस्थान में (विदिद्युतानः) प्रकाशमान (पितुः) द्युलोक का [हव्य पहुंचा कर पालन करने से] (पिता) पालक अग्नि (ऋतस्य) यज्ञ की (योनिम्) उत्तर वेदि नामक स्थान में (आ-सीदन्) स्थित हुवा " वृत्रों का नाश करता है " यह पूर्व मन्त्र से अन्वय है ॥ ऋ० ६ । १६ । ३५ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
ब्रह्म प्रजावदाभर जातवेदो विचर्षणे ।
२ ३ २ ३ १ २ ३ २
अग्ने यद्दीदयद्दिवि ॥३॥ [७] (१३९६)

पदपाठः-ब्रह्म, प्रजावत् २। आभर क्रि०। जातवेदः, विचर्षणे, अग्ने सं०। यत् १। दीदयत् क्रि०। दिवि ७ ॥

अन्वितपदार्थः-(जातवेदः) ज्ञानसहायक ! (विचर्षणे) विशेषेण दृष्टिसहायक ! (अग्ने) प्रकाशक ! पावक ! (प्रजावत) पुत्रपौत्रादिसन्तानयुक्तं (ब्रह्म) धनम् [निघं० २।१०] अन्नं वा [निघं० २ । ७] (आभर) आहर (यत्) धनमन्नं वा (दिवि) आकाशे (दीदयत्) दीप्येत ॥ अग्निहोत्राद्यनुष्ठायिनां धनधान्यसन्तानवृद्धिरुत्तरोत्तरं जायते इति भावः ॥ ऋग्वेदे ६ । १६ । ३६ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(जातवेदः) ज्ञानोत्पादक ! (विचर्षणे) विशेष करके दृष्टि के सहायक ! (अग्ने) अग्ने ! (प्रजावत्) पुत्रपौत्रादि सन्तान युक्त (रयिम्) धन वा अन्न [निघं० २ । १० और २ । ७] (आभर) प्राप्त करा (यत्) जो अन्न वा धन (दिवि) आकाश में (दीदयत्) प्रकाशमान होवे ॥

भाव यह है कि होमादि द्वारा अग्नि की परिचर्या करने वाले के धन धान्य सन्तानादि की उत्तरोत्तर वृद्धि होती है ॥ ऋ० ६ । १६ । ३६ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य-वसिष्ठ ऋषिः । सोमो देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २

अस्य प्रेषा हेमना पूयमानो, देवो देवेभिः समपृक्त रसम् ।

३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २

सुतः पवित्रं पर्येति रेभन्, मितेव सद्म पशुमन्ति होता ॥ १ ॥

(१३९७) व्याख्याता (५२६)

अथ द्वितीया-

३ १ २र ३ २ १२ ३ ३ २ ३ १ २ ३ १ २

भद्रा वस्त्रा समन्याऽ३ऽवसानो,महान्कविर्निवचनानि शंसन्।

१ २ ३क २र ३ १ २ ३ १ २र ३ १ २

आवच्यस्व चम्वोः पूयमानो, विचक्षणो जागृविर्देववीतौ ॥

॥ १ ॥ (१३९८)

पदपाठः-भद्रा, वस्त्रा, समन्या २ । वसानः, महान्, कविः १ । निवचनानि ३ । शंसन् १ । आवच्यस्व क्रि० । चम्वोः ७ । पूयमानः, विचक्षणः, जागृविः १ । देववीतौ ७ ॥

अन्वितपदार्थः-(भद्रा) भद्राणि कल्याणानि (समन्या) संग्रामयोग्यानि (वस्त्रा) वस्त्राणीव आच्छादकानि तेजांसि (वसानः) आच्छादयन् (महान्) (कविः) क्रान्तदर्शी (निवचनानि) नितरां वक्तव्यानि सूक्तानि (शंसन्) पठन् (विचक्षणः) द्रष्टा (जागृविः) जागरूकः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुरुष इव हृष्टिपुष्टिबलमेधास्मृत्यादिवर्धकः (पूयमानः) शोध्यमानः सोमः (देववीतौ) यज्ञे (चम्वोः) द्यावापृथिव्योर्मध्ये (आवच्यस्व) आविशति ॥ समनमिति संग्रामनाम निघं० २। १७ ऋग्वेदे ९। ९७। २ ऽपि ॥ २ ॥

भाषार्थः-(भद्रा) भले (समन्या) संग्रामयोग्य (वस्ना) वस्त्रतुल्य तेजों को (वसानः) ओढ़े हुवे (महान्) बड़े (कविः) क्रान्तदर्शी विद्वान् (निवचनानि) सूक्तों को (शंसन्) पढ़ते हुवे (विचक्षणः) द्रष्टा (जागृविः) आलस्य प्रमाद रहित पुरुष के समान (पूयमानः) शोध्यमान सोम (देववीतौ) यज्ञ में (चम्वोः) द्युलोक और पृथिवी लोक में (आवच्यस्व) प्रवेश करता है ॥ निघण्टु २। १७ का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ९। ९७। २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
सम प्रियो मृज्यते सानो अव्ये, यशस्तरो यशसां क्षैतो अस्मे।
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
अभिस्वर धन्वा पूयमानो, यूयं पात स्वस्तिभिः सदा नः ॥
॥ ३ ॥ [८] (१३९९)

पदपाठः-सम्, उ अ०। प्रियः १। मृज्यते क्रि०। सानो ७। अव्ये ७। यशस्तरः १। यशसाम् ६। क्षैतः १। अस्मे ४। अभि-स्वर क्रि०। धन्वा ७। पूयमानः १। यूयम् १। पात क्रि०। स्वस्तिभिः ३। सदा अ०। नः २॥

अन्वितपदार्थः-(यशसाम्) यशस्विनां मध्ये (यशस्तरः) अतिशयेन यशस्वी (क्षैतः) क्षितौ भूमौ भवः (प्रियः) प्रीणयिता सोमः (सानो) सानौ समुच्छ्रिते (अव्ये) अविभवे ऊर्णामये दशापवित्रे (अस्मे) अस्मदर्थं (सं मृज्यते) सम्यक् ऋत्विग्भिः परिपूयते (उ) अवधारणे (पूयमानः) शोध्यमानश्च (धन्वा) अन्तरिक्षे [निघं० १।३]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(अभि-स्वर) शब्दायमानो भवति मेघगर्जनमुत्पादयति (यूयम्) आदरे बहुवचनम् पुरुषव्यत्ययेन च सः सोमः (स्वस्तिभिः) कल्याणतमैः पालनैः (सदा) सर्वदा (नः) अस्मान्सोमयाजिनः (पात) पाति रक्षति ॥ ऋग्वेदे ९ । ९७ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(यशसाम्) यशस्वियों में (यशस्तरः) अतियशस्वी (क्षैतः) भूमि में उत्पन्न हुआ (प्रियः) प्यारा सोम (सानो) ऊंचे (अव्ये) ऊनी दशापवित्र पर (अस्मे) हमारे लिये (संमृज्यते) शोधित किया जाता है (उ) और वही (पूयमानः) शोध्यमान सोम (धन्वा) अन्तरिक्ष में [निघण्टु १ । ३] (अभिस्वर) शब्द करता और मेघगर्जन को उत्पन्न करता है । (यूयम्) तू वही सोम (स्वस्तिभिः) सुखदायक पालनों से (सदा) सर्वदा (नः) हम को (पात) पालता है ॥ ऋ० ९ । ९७ । ३ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-तिरश्ची ऋषिः । इन्द्रो देवता । अनुष्टुप्छन्दः ॥

तत्र प्रथमा—

२३ २ ३ १ २ ३ २ ३२३ १ २
एतो न्विन्द्रꣳस्तवाम शुद्धꣳशुद्धेन साम्ना ।
३२३ १ २३ १ २ ३२३१ २
शुद्धैरुक्थैर्वावृध्वाꣳसꣳशुद्धैराशीर्वान्ममत्तु ॥
॥ १ ॥ (१४००) व्याख्याता (३५०)

अथ द्वितीया-

१ २ ३ २ ३ १ २ ३१ ३१ २ ३१ २
इन्द्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः ।
३ २ ३१२ २२ ३ १ २
शुद्धो रयिं निधारय शुद्धो ममद्धि सोम्य ॥ २ ॥ (१४०१)

पदपाठः-इन्द्र सं० । शुद्धः १ । नः २ । आगहि क्रि० । शुद्धः । शुद्धाभिः ३ । शुद्धः । रयिम् २ । निधारय क्रि० । शुद्धः । ममद्धि क्रि० । सोम्य सं० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(इन्द्र) हे परमेश्वर ! (शुद्धः) पावनस्त्वम् (नः) अस्मान् (आगहि) प्राप्नुहि (शुद्धः) यतः पावनस्त्वमसि अतः (शुद्धाभिः) पावनीभिः (ऊतिभिः) रक्षाभिरस्मान् रक्ष (शुद्धः) पावनस्त्वम् (रयिम्) शुद्धं निश्छलव्यापारेणाप्तं धनं (निधारय) नितरां धारयास्मासु (सोम्य) हे अमृतस्वरूप ! (शुद्धः) पावनस्त्वम् (मम-द्धि) अस्मदुपरि प्रसन्नोभव ॥ ऋग्वेदे तु ८ । ९५ । ८ सोम्यः इति पाठः ॥ २ ॥

भाषार्थः-(इन्द्र) हे परमेश्वर ! (शुद्धः) पवित्र करने वाले=पावन आप (नः) हम को (आगहि) प्राप्त हों (शुद्धः) पावन आप (शुद्धाभिः) पावनी (ऊतिभिः) रक्षाओं से हमारी रक्षा करें (शुद्धः) पावन आप (रयिम्) निश्छल व्यवहार द्वारा प्राप्त धन को (निधारय) निरा धारण करावें (सोम्य) हे अमृतस्वरूप ! (शुद्धः) पावन आप (ममद्धि) हम पर प्रसन्न हों ॥ ऋ० ८ । ९५ । ८ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ २ ३ १र २र ३ २ ३ १र २र ३ १ २

इन्द्र शुद्धो हि नो रयिꣳशुद्धो रत्नानि दाशुषे ।

३ २ ३ १ २ ३ १र २र

शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजꣳ सिषाससि ॥

॥ ३ ॥ [९] (१४०२)

पदपाठः—इन्द्र सं० । शुद्धः १ । हि अ० । नः ४ । रयिम् २ । शुद्धः । रत्नानि २ । दाशुषे ४ । शुद्धः । वृत्राणि २ । जिघ्नसे क्रि० । शुद्धः । वाजम् २ । सिषाससि क्रि० ॥

अन्वितपदार्थः-(इन्द्र) हे परमेश्वर ! (हि) यतः (शुद्धः) पावनोऽस्यऽतः (नः) अस्मभ्यं (रयिम्) शुद्धं धनं देहि (शुद्धः) पावनस्त्वम् (दाशुषे) दानशीलाय

पुण्यात्मने पुरुषाय (रत्नानि) शुद्धानि रमणीयानि मणि-मुक्तादीनि रत्नानि देहि (शुद्धः) पावनस्त्वम् (वृत्राणि) रक्षांसि (जिघ्नसे) हंसि (शुद्धः) पावनस्त्वम् (वाजम्) शुद्धमन्नं (सिषाससि) कर्मानुसारं दातुमिच्छसि ॥ ऋग्वेदे ८ । १०८ । ९ ऽपि ॥ ३ ॥

भाषार्थः—(इन्द्र) हे परमेश्वर ! (हि) क्योंकि आप (शुद्धः) पवित्र हैं इस कारण (रयिम्) शुद्ध धन को (नः) हमारे लिये दीजिये (शुद्धः) आप पवित्र हैं सो (दाशुषे) दानी पुरुषात्मा पुरुष के लिये (रत्नानि) पवित्र मणिमुक्तादि रत्न दीजिये (शुद्धः) आप शुद्ध हैं इस से (वृत्राणि) दुष्ट अशुद्ध राक्षसों का (जिघ्नसे) नाश करते हैं और (शुद्धः) शुद्ध आप (वाजम्) शुद्ध अन्न को (सिषाससि) कर्मानुसार देना चाहते हैं ॥ ऋ० ८ । १०८ । ९ में भी ॥३॥

इति उत्तरार्चिके द्वादशाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थे खण्डे प्रथमतृचस्य—सुतंभर ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ १२ ३२ ३ २३ १ २ ३ १२

अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः ।

१ १ २ ३ १ २

देवस्य द्रविणस्यवः ॥ १ ॥ (१४०३)

पदपाठः—अग्नेः ६ । स्तोमम् २ । मनामहे क्रि० । सिध्रम् २ । अद्य अ० । दिविस्पृशः, देवस्य ६ । द्रविणस्यवः १ ॥

अन्वितपदार्थः—(द्रविणस्यवः) धनमिच्छन्तो वयं मनुष्याः (दिविस्पृशः) सूर्यरूपेण दिवं व्याप्नुवतः (देवस्य) द्योतमानस्य (अग्नेः) पावकस्य (सिध्रम्) पुरुषार्थ-साधकं (स्तोमम्) स्तोत्रम् (मनामहे) ब्रूमः ॥ ऋग्वेदे ५ । १३ । २ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(द्रविणस्यवः) धन चाहने वाले हम मनुष्य (दिविस्पृशः) सूर्यरूप से आकाश के छूने वाले (देवस्य) द्योतमान (अग्नेः) अग्नि के (सिध्रम्) पुरुषार्थसाधक (स्तोमम्) प्रशंसा के मन्त्रों को (मनामहे) उच्चारित करते हैं ॥ ऋ० ५ । १३ । २ में भी ॥ १ ॥

अथ द्वितीया—

३ १ २ ३ २ ३ २ ३ १र २र ३ २

अग्निर्जुषत नो गिरो होता यो मानुषेष्वा ।

१ २ ३ २ ३ १ २

स यक्षद्दैव्यं जनम् ॥ २ ॥ (१४०४)

पदपाठः-अग्निः १ । जुषत क्रि० । नः ६ । गिरः २ । होता, यः १ । मानुषेषु ७ । आ अ० । सः १ । यक्षत् क्रि० । दैव्यम्, जनम् २ ॥

अन्वितपदार्थः-(होता) देवानामाहूाता होम-निष्पादकोवा (अग्निः) पावकः (मानुषेषु) मनुष्य-सम्बन्धिषु लोकेषु (आ) वसति (यः) अग्निः (नः) अस्माकं (गिरः) वाचः (जुषत) जुषते सेवतेऽस्मदभीष्टं पूरयति (सः) सोग्निः (दैव्यम्) दिवि भवां (जनम्) सृष्टिम् (यक्षत्) यजेत् ॥ ऋग्वेदे ५ । १३ । ३ ऽपि ॥ २ ॥

भाषार्थः-(होता) वायु आदि देवों का बुलाने वाला वा होमसाधक (अग्निः) अग्नि (मानुषेषु) मनुष्यों के लोकों में (आ) वास करता है (यः) जो कि (नः) हमारी (गिरः) वाणियों को (जुषत) सेवित करता है अर्थात् हमारे अभीष्ट पूरे करता है (सः) वह अग्नि (दैव्यम्) द्युलोक की (जनम्) सृष्टि का (यक्षत्) यजन करे ॥ ऋ० ५ । १३ । ३ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ २ ३ २ ३ १ २

त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः ।

१ २ ३ १र २र

त्वया यज्ञं वितन्वते ॥ ३ ॥ [१०] (१४०५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–त्वम् १ । अग्ने सं० । सप्रथाः १ । असि क्रि० । जुष्टः, होता, वरेण्यः १ । त्वया ३ । यज्ञम् २ । वितन्वते क्रि० ॥

अन्वितपदार्थः–(अग्ने) पावक ! (जुष्टः) सेवितः (होता) देवानामाहूता होमसंपादको वा (वरेण्यः) वरीतुं योग्यः (सप्रथाः) सर्वतः पृथुर्विस्तृतः (असि) भवसि । किञ्च सर्वे यजमानाः (त्वया) अग्निना साधनेन (यज्ञं वितन्वते) ॥ " सप्रथाः सर्वतः पृथुः " इति निरु० ६ । ७ ॥ ऋग्वेदे ५ । १३ । ४ ऽपि ॥ ३ ॥

भाषार्थः–(अग्ने) ! तू (जुष्टः) सेवित (होता) देवों को बुलाने वाला वा होमसंपादक (वरेण्यः) वरणीय (सप्रथाः) सर्वतः फैलने वाला (असि) है, और सब यजमान (त्वया) तुझ अग्नि साधन से (यज्ञम्) यज्ञ को (वितन्वते) विस्तृत करते हैं ॥ निरुक्त ६ । ७ का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ५ । १३ । ४ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य-वसिष्ठ ऋषिः । सोमो देवता । त्रिष्टुप्छन्दः ॥ तत्र प्रथमा–

(पञ्चमस्याहुः संपत्तया मध्यंदिनमिति विवरणकारः)

३ १ २ ३ १र ३ १ २३ १ २ ३ १ २

अभि त्रिपृष्ठं वृषणं वयोधा–मङ्गेषिणमवावशन्त वाणीः ।

२ ३ १ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २

वना वसानो वरुणो न सिन्धु–र्वि रत्नधा दयते वार्याणि ॥ १ ॥

(१४०६) व्याख्याता (५२८)

अथ द्वितीया–

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

शूरग्रामः सर्ववीरः सहावान्, जेता पवस्व सनिता धनानि ।

३ १ २ ३ १ २ ३ १र २र ३ १र २र ३ १ २

तिग्मायुधः क्षिप्रधन्वा समत्स्व, ऽषाढः साह्वान्पृतनासु शत्रून् ॥ २ ॥

पदपाठः–शूरग्रामः, सर्ववीरः, सहावान्, जेता १ । पवस्व क्रि० । सनिता १ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धनानि २८६ । तिग्मायुधः, क्षिप्रधन्वा १ । समत्सु ७ । अषाढः, साह्वान् १ । पृतनासु ७ । शत्रून् २ ॥

अन्वितपदार्थः–(शूरग्रामः) शूराणां ग्रामः समूहो यस्य सः (सर्ववीरः) सर्वे वीराः यस्य सः (सहावान्) धर्षणवान् (तेजा) विजयी (धनानि) धनानां (सनिता) दाता (तिग्मायुधः) तीक्ष्णायुधः (क्षिप्रधन्वा) वेगवद्बाणयुक्तधनुर्धरः (समत्सु) संग्रामेषु (अषाढः) असोढा (पृतनासु) शत्रुसेनासु (शत्रून्) परान् (साह्वान्)अभिभवन् सोमः (पवस्व) क्षरति ॥

सोमयाजिनां तत्पायिनां च सुभटत्वादिगुणान् सोमे आरोप्य तत्प्रशंसाऽत्र वर्णिता बोध्या ॥ ऋग्वेदे ९ । ९० । ३ ऽपि ॥ २ ॥ (१४०७)

भाषार्थः–(शूरग्रामः) शूरों का समूह बनाने वाला (सर्ववीरः) सब को वीर करने वाला (सहावान्) सब को दबासकने वाला (जेता) विजय कराने वाला (धनानि) धनों का (सनिता) देने वाला (तिग्मायुधः) तीक्ष्ण आयुध वाला (क्षिप्रधन्वा) शीघ्रगामी बाणों के धनुष् का धारक (समत्सु) संग्रामों में (अषाढः) किसी को न सहने वाला (पृतनासु) सेनाओं में (शत्रून्) शत्रुओं को (साह्वान्) तिरस्कृत करने वाला [सोम] (पवस्व) अभिषुत होता है ॥

यहां सोमयाजियों और सोमपान करने वालों का आरोप सोम में करके वर्णन है ॥ ऋ० ९ । ९० । ३ में भी २ ॥

अथ तृतीया–

३१२ ३१२ ३१ २ ३१र २र ३

उरु गव्यूतिरभयानि कृण्वन्, समीचीने आपवस्वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १र २र ३ २ ३ १र ३र २र
पुरन्धी । अपः सिषासन्नुषसः स्वाऽ३ऽर्गाः, संचिक्रदो
३ २ ३ २ ३ १ २
महोअस्मभ्यं वाजान् ॥ ३ ॥ [११] (१४०८)

पदपाठः—उरुगव्यूतिः १ । अभयानि २ । कृण्वन् १ । समीचीने २ । आ पवस्व क्रि० । पुरन्धी २ । अपः २ । सिषासन् १ । उषसः २ । स्वः अ० । गाः २ । संचिक्रदः क्रि० । महः २ । अस्मभ्यम् ४ । वाजान् २ ॥

अन्वितपदार्थः—(उरुगव्यूतिः) विस्तीर्णमार्गः सोमः (अभयानि) सोमयाजिनां दैवीप्रभृतिविपद्भयनिराकरणानि (कृण्वन्) कुर्वन् (पुरन्धी) द्यावापृथिव्यौ (समीचीने) सङ्गते (आपवस्व) सर्वतः पूते करोति, तथा (अस्मभ्यम्) सोमयाजिभ्यः (महः) महान्ति (वाजान्) अन्नानि (अपः) जलानि (उषसः) सुप्रभातजातानि (स्वः) आदित्यमण्डलं (गाः) तद्रश्मींश्च (सिषासन्) दातुमिच्छन्निव (सं चिक्रदः) शब्दायते ॥

यदा हूयमानः सोम आकाशं गच्छन् शब्दायते तदैव द्यावापृथिव्यौ पूते जायेते, सोमयाजिनां मनुष्याणां जलवायुसूर्यतत्किरणसुप्रभातजनितं सुखं च जायते ॥ ऋग्वेदे ९ । ९० । ४ ऽपि ॥ ३ ॥

भाषार्थः—(उरुगव्यूतिः) विस्तृत मार्गवाला सोम, सोमयाजियों को (अभयानि) दैवी विपत्ति आदि से अभय (कृण्वन्) करता हुवा (पुरन्धी) द्युलोक और पृथिवीलोक को (समीचीने) सुखदायक सङ्गत (आपवस्व) पवित्र करता है तथा (अस्मभ्यम्) हम सोमयाजी मनुष्यों के लिये (महः वाजान्, अपः, उषसः, स्वः, गाः) बड़े अन्न, जल, सुप्रभात, सूर्य, और किरणें (सिषासन्) देना चाहता हुवा सा (संचिक्रदः) शब्द करता है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जब कि सोम का होम होता है और वह शब्द करता हुआ आकाश को जाता है तब द्युलोक पृथिवीलोक पवित्र शुद्ध होते हैं और मनुष्यों को जल वायु सूर्य उस की किरण और सुप्रभात से उत्पन्न सुख प्राप्त होता है ॥ ऋ० ९ । ९० । ४ में भी ॥ ३ ॥

अथ प्रगाथात्मकस्य द्वितीयसूक्तस्य-नृमेधपुरुमेधावृषी । इन्द्रोदेवता । पादनिचृद्बृहती, निचृत्पङ्क्तिश्च छन्दसी ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २

त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः । त्वं वृत्राणि

३ २ ३ ३ २ ३ १ २ ३ १ २

हꣳस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ १ ॥

(१४०९) व्याख्याता (२४८)

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २

तमु त्वा नूनमसुर प्रचेतसꣳ राधोभागमिवेमहे । महीव कृत्तिः

३ १ २ ३ १ २ ३ १ २

शरणा त इन्द्र प्र ते सुम्ना नो अश्नुवन् ॥२॥ [१२](१४१०)

पदपाठः-तम् २ । उ अ० । त्वा २ । नूनम् अ० । असुर सं० । प्रचेतसम् २ । राधः २ । भागमिव अ० । ईमहे क्रि० । मही १ । इव अ० । कृत्तिः १ । शरणा १ । ते ६ । इन्द्र सं० । प्र अ० । ते ६ । सुम्ना १ । नः २ । अश्नुवन् क्रि० ॥

अन्वितपदार्थः-(असुर) हे असून् प्राणान् राति ददाति तत्सम्बद्धौ असुर ! प्राणदातः ! परमेश्वर ! (तम्) पूर्वोक्तं (त्वा) त्वाम् (उ) एव (प्रचेतसम्) सर्वज्ञं (नूनम्) निश्चयेन, वयं (भागमिव) पितुः स्वदायभागं पुत्रा इव (राधः) धनं धर्मादिसाधनम् (ईमहे) याचामहे । (इन्द्र) हे परमेश्वर ! (ते) तव (कृत्तिः) [कृत्तिः कृन्तते र्यशोवाऽन्नं वा, महीव कृत्तिः शरणा त इन्द्र=सुमहत्त इन्द्र शरणमन्तरिक्षे कृत्तिरिव] इति निरुक्ते । ५ । २२ आश्रयभूत-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मस्ति (ते) तव (सुम्ना) सुम्नानि सुखानि (नः) अस्मान् (प्राऽश्नुवन्) प्राप्नुयुः ॥ ऋग्वेदे ८ । ९० । ६ ऽपि ॥ २ ॥

भाषार्थः—(असुर) हे प्राणदाता ! (तम्) पूर्वोक्तगुणविशिष्ट (त्वा) आप (प्रचेतसम्) सर्वज्ञ से (उ) ही (नूनम्) निश्चय (भागमिव) पुत्र जैसे पिता से दायभाग को मांगते हैं, वैसे हम (राधः) धर्मादि के साधन धन को (ईमहे) मांगते हैं । (इन्द्र) हे परमेश्वर ! (ते) आप का (क्रत्तिः) यश वा अन्न (मही) बड़ा (इव) ही (शरणा) शरण है (ते) आप के (सुम्ना) आनन्द (नः) हम को (प्राऽश्नुवन्) प्राप्त हों ॥ निरुक्त ५ । २२ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । ९० । ६ में भी ॥ २ ॥

अथ प्रगाथात्मकचतुर्थसूक्तस्य-सौभरिर्ऋषिः । अग्निर्देवता । ककुप्छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २३ १ २र३ १ २
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
३ २ ३१ २ ३ १ २
अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥ (१४११) व्याख्याता (११२)

अथ द्वितीया—

३१ २र ३१२ ३१२ ३ २ ३१२
अपां न पातꣳ सुभगꣳ सुदीदितिमग्निमु श्रेष्ठशोचिषम् ।
१ २ ३ २ ३ १२ ३ २ ३२उ ३१ २ ३ २
स नो मित्रस्य वरुणस्य सोअपामा सुम्नं यक्षते दिवि ॥२॥

[१३] (१४१२)

पदपाठः—अपांनपातम्, सुभगम्, सुदीदितिम्, अग्निम् २ । उ अ० । श्रेष्ठशोचिषम् २ । सः १ । नः ४ । मित्रस्य, वरुणस्य ६ । सः १ । अपाम् ६ । आ अ० । सुम्नम् २ । यक्षते क्रि० । दिवि ७ ॥

अन्वितपदार्थः—(अपांनपातम्) जलानां न पातयितारम् (सुभगम्) शोभनैश्वर्यदम् (सुदीदितिम्) सुष्ठु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दीदयन्तम् (श्रेष्ठशोचिषम्) पवित्रज्वालम् (अग्निम्) पावकम् (उ) अवश्यम् [स्तौमि] (सः) अग्निः (वरुणस्य) अपानस्य (मित्रस्य) प्राणस्य च (सः) स एवाग्निः (दिवि अपाम्) दिव्यानां जलानां (सुम्नम्) सुखम् (आ यक्षते) आवहति ॥ ऋग्वेदे तु ८ । १९ । ४ "ऊर्जो नपातम् " इत्यन्तरम् । सायणकृतभाष्ये च तस्यैवाऽत्रापि व्याख्यानमुपलभ्यते, न सामवेदस्थपाठस्य ॥ २ ॥

भाषार्थः-(अपांनपातम्) जलों को न गिरने देने वाले (सुभगम्) शोभन ऐश्वर्यदायक (सुदीदितिम्) भले प्रकार प्रकाशमान (श्रेष्ठशोचिषम्) पवित्र लपटों वाले (अग्निम्) अग्नि को (उ) अवश्य [प्रशंसित करता हूं] (सः) वह अग्नि (वरुणस्य) अपान का (मित्रस्य) प्राण का और (सः) वही (दिवि) आकाश में वर्त्तमान (अपाम्) जलों का (सुम्नम्) सुख (नः) हमारे लिये (आ यक्षते) देता है ॥ ऋ० ८ । १९ । ४ का पाठान्तर ऊपर संस्कृत भाष्य में देखिये और यह भी देख कर आप आश्चर्य करेंगे कि सायणाचार्य के भाष्य में उस ऋग्वेदस्थ " ऊर्जोन पातम् " की ही व्याख्या यहां सामवेदभाष्य में धरदी है, सामवेद के "अपां न पातम्" की नहीं ॥ २ ॥

इति द्वादशाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमे खण्डे प्रथम तृचस्य शुनः शेप ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ २उ ३ २ ३ १ २ ३ २ ३ २

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।

२उ ३ १ २ ३ १ २

स यन्ता शश्वतीरिषः ॥१॥ (१४१३)

पदपाठः-यम् २ । अग्ने सं० । पृत्सु ७ । मर्त्यम् २ । अवाः क्रि० । वाजेषु ७ । यम् २ । जुनाः क्रि० । सः, यन्ता १ । शश्वतीः, इषः २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(अग्ने) ! (पृत्सु) संग्रामेषु (यम्) (मर्त्यम्) मनुष्यम् (अवाः) रक्षसि (यं) यं च (वाजेषु) बलेषु (जुनाः) अवसि (सः) स मनुष्यः (शश्वतीः) नित्यानि चिरस्थायीनि (इषः) अन्नानि (यन्ता) नियन्तुं समर्थोभवति ॥

पृत्सु इति संग्रामनाम निघं० २ । १७ पदादिषुमांस् पृतस्नूनामुपसंख्यानम् (६ । १ । १६८ वा०) इति पृतनाशब्दस्य पृदादेशः । जुनाः इत्यत्र-जुइति गत्यर्थः सौत्रोधातुः, लङ्, सिप्, क्र्यादिभ्यः श्ना ३ ।१। ८१ बहुलं छन्दस्यमाङ्योगेपि ६ । ४ । ७५ इत्यडागमाऽभावः । अनेकार्थवशाद्रक्षार्थः ॥ ऋग्वेदे १ । २७ । ७ ऽपि ॥ १ ॥

भाषार्थः- (अग्ने) हे अग्ने ! (पृत्सु) संग्रामों में (यम्) जिस (मर्त्यम्) मनुष्य को (अवाः) तू रक्षित करता है (यम्) और जिस को (वाजेषु) बल=जीवन=प्राणनों में (जुनाः) तू प्राप्त होता वा रक्षा करता है (सः) वह मनुष्य (शश्वतीः) नित्य=बहुत काल ठहरने वाले (इषः) अन्नों को (यन्ता) नियमन कर सकता है ॥ निघण्टु २ । १७ अष्टाध्यायी ६ । ४ । ७५ ॥ ३ । १ । ८१ वार्त्तिक ६ । १ । १६८ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १ । २७ । ७ में भी ॥ १ ॥

अथ द्वितीया-

१ २ ३१र २र

नकिरस्य सहन्त्य पर्येता कयस्यचित् ।

१ २ ३ १ २

वाजो अस्ति श्रवाय्यः ॥ २ ॥ (१११४)

पदपाठः-नकिः अ० । अस्य ६ । सहन्त्य सं० । पर्येता १ । कयस्यचित् अ० । वाजः १ । अस्ति क्रि० । श्रवाय्यः १ ॥

अन्वितपदार्थः-(सहन्त्य) हे शत्रूणामभिभवनशील ! अग्ने ! (अस्य) अग्न्युपयोगं जानतः पुरुषस्य (कयस्य-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चित्) कस्याऽपि (पर्येता) आक्रमिता (नकिः) नास्ति कश्चित् । किञ्च-(श्रवाय्यः) श्रवणीयः यशस्यः (वाजः) बलविशेषः (अस्ति) भवति ॥ ऋग्वेदे १ । २७ । ८ऽपि॥२॥

भाषार्थः-(सहन्त्य) हे शत्रुओं के तिरस्कृत करने वाले ! अग्ने ! (अस्य) इस अग्नि का उपयोग जानने वाले (कस्यचित्) किसी भी पुरुष का (पर्येता) आक्रमण करने वाला (नकिः) कोई नहीं किन्तु इस का (श्रवाय्यः) श्रवण करने योग्य कीर्त्तिकारक (वाजः) बलविशेष (अस्ति) है ॥ ऋ० १ । २७ । ८ में भी ॥ २ ॥ अथ तृतीया-

१र २र ३ १ २ ३ १ २ ३ १ २

स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता ।

१ २ ३ १ २

विप्रेभिरस्तु सनिता ॥३॥ [१४] (१४१५)

पदपाठः-सः १ । वाजम् २ । विश्वचर्षणिः १ । अर्वद्भिः ३ । अस्तु क्रि० । तरुता १ । विप्रेभिः ३ । अस्तु । सनिता १ ॥

अन्वितपदार्थः-(सः) पूर्वोक्तः (विश्वचर्षणिः) विश्वस्य दर्शकः अग्निः (अर्वद्भिः) अश्वैः प्राणैः सह (वाजम्) अन्नं बलं वा (तरुता) तारयिता (अस्तु) भवतु (विप्रेभिः) विप्रैर्मेधाविभिर्ऋत्विग्भिः (सनिता) यज्ञफलस्य दाता (अस्तु) ॥ ऋग्वेदे १ । २७ । ९ऽपि ॥ ३ ॥

भाषार्थः-(सः) वह (विश्वचर्षणिः) विश्व की दृष्टि का सहायक अग्नि (अर्वद्भिः) प्राणों सहित (वाजम्) अन्नवा बल को (तरुता) पार लगाने वाला (अस्तु) हो, (विप्रेभिः) मेधावी ऋत्विजों से (सनिता) यज्ञफल का दाता (अस्तु) हो ॥ ऋ० १ । २७ । ९ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-नोधाऋषिः । सोमो देवता । त्रिष्टुप् छन्दः ॥ तत्र प्रथमा-

३ १ २ ३ १ २३ २३ १ २ ३ २ ३ १ २

साकमुक्षो मर्जयन्त स्वसारो, दश धीरस्य धीतयो धनुत्रीः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १ २ ३ १र २र ३ १ २ ३ २ ३ २ ३ २
हरिः पर्यद्रवज्जाः सूर्यस्य, द्रोणं ननक्षे अत्यो न वाजी ॥१॥

(१४१६) व्याख्याता (५३८)

अथ द्वितीया-

२ ३ २ ३ २र ३ १र २र ३ १ २ ३ २
सं मातृभिर्न शिशुर्वावशानो, वृषा दधन्वे पुरुवारो अद्रिः ।
२ ३ १र २र ३ १ २ ३ १र २र ३ १ २ ३ १ २
मर्यो न योषामभि निष्कृतं यन्, संगच्छते कलशे उस्रियाभिः ॥२॥

पदपाठः-सम् अ० । मातृभिः ३ । न अ० । शिशुः, वावशानः, वृषा १ । दधन्वे क्रि० । पुरुवारः १ । अद्रिः ३ । मर्यः १ । न अ० । योषाम् २ । अभि अ० । निष्कृतम् २ । यन् १ । संगच्छते क्रि० । कलशे ७ । उस्रियाभिः ३ ॥

अन्वितपदार्थः-(वावशानः) देवान्कामयमान इव (वृषा) वर्षकः (पुरुवारः) बहुभिर्वरणीयः सोमः (अद्रिः) मातृस्वरूपाभिर्वसतीवरीभिः (सन्दधन्वे) संधार्यते । तत्र दृष्टान्तः-(मातृभिः शिशुः न) कामयमानः पुत्रोयथा मातृभिः पयःप्रदानेन संधार्यते तद्वत् । (न) यथा (मर्यः) मनुष्यः पुरुषः (योषाम्) स्त्रियम् (अभि यन्) अभिगच्छति तद्वत् (कलशे) (निष्कृतम्) संस्कृतं स्थानं अभिगच्छन् (उस्रियाभिः) गोभिः किरणैः (संगच्छते) सङ्गतोभवति ॥ ऋग्वेदे ९ । ९३ । २ऽपि ॥ २ ॥ (१४१७)

भाषार्थः-(वावशानः) वायुआदि देवों को मानो चाहता हुवा सा (वृषा) वृष्टिकारक (पुरुवारः) बहुतों से वरण किया हुवा सोम (अद्रिः) वसतीवरी नामक मातृ तुल्यजलों से (सम् दधन्वे) भले प्रकार धारण किया जाता है । इस में दृष्टान्तः-(मातृभिः) माताओं से (शिशुः) बच्चा (न) जैसे दुग्धादि देकर धारण किया जाता है, तद्वत् । (मर्यः) पुरुष (न) जैसे (योषाम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

को (अभियन्) समागत करता है तद्वत् (कलशे) द्रोणकलश में (निष्कृतम्) संस्कृत स्थान को संगत करता हुवा (उस्रियाभिः) गौवों=किरणों से (संगच्छते) मिलता है ॥ ऋ० ९ । ९३ । २ में भी ॥ २ ॥

अथ तृतीया–

३१र २र ३ २ ३ १ २ ३ २ ३ १ २ ३ २

उत प्रपिप्यऊधरघन्याया, इन्दुर्धाराभिः सचते सुमेधाः ।

३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २

मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥

॥ ३ ॥ [१५] (१४१८)

पदपाठः–उत अ० । प्रपिप्ये क्रि० । ऊधः २ । अघन्यायाः ६ । इन्दुः १ । धाराभिः ३ । सचते क्रि० । सुमेधाः १ । मूर्धानम् २ । गावः १ । पयसा ३ । चमूषु ७ । अभि श्रीणन्ति क्रि० । वसुभिः ३ । न अ० । निक्तैः ३ ॥

अन्वितपदार्थः–(उत) अपि च (अघन्यायाः) गोः हन्तुमनर्हायाः (ऊधः) वक्षइव सरसः सोमः (प्रपिप्ये) ओषध्यादिषु प्रविश्य प्रकर्षेणाऽऽप्याययति (सुमेधाः) बुद्धिसौष्ठवकरः (इन्दुः) सोमः (धाराभिः) (सचते) संगच्छते ततः (गावः) किरणाः (चमूषु) द्यावापृथिव्योः प्रदेशेषु व्याप्य (मूर्धानम्) दिवोमूर्धानं सूर्यम् (पयसा) उदकेन (अभिश्रीणन्ति) आच्छादयन्ति । दृष्टान्तः–(निक्तैः) प्रक्षालितैः शुद्धैः (वसुभिः) वस्त्रैः (न) यथा आच्छादयन्ति तद्वत् ॥ प्रपिप्ये इत्यत्र लिङ्यडोश्च ६ । १ । २९ इति पीभावः । चम्वौ इति द्यावाभूम्योर्नाम निघं० ३ । ३० अघन्या इति गोनाम निघं० २ । ११, ५ । ५ तत्र निरुक्तं ११ । ४३ च–" अघन्याऽहन्तव्या भवत्यघ्नीति वा " ऋग्वेदे ९ । ९३ । ३ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(उत) और (अघन्यायाः) गौ के (ऊधः) बाख के समान सरस सोम (प्रपित्ये) ओषध्यादि में प्रविष्ट होकर आप्यायन करता है (सुमेधाः) बुद्धि सुधारने वाला (इन्दुः) सोम (धाराभिः) धारों से (सचते) मिलता है तब (गावः) किरणें (चमूषु) द्युलोक और पृथिवी लोक के नाना प्रदेशों में व्यापकर (मूर्धानम्) द्युलोक के मस्तक रूप सूर्य मण्डल को (पयसा) मेघजल से (अभिश्रीणन्ति) ढक देती हैं। दृष्टान्तः-(न) जैसे (निक्तैः) धुले उज्ज्वल (वसुभिः) वस्त्रों से आच्छन्न करते हैं तद्वत् ॥

निघण्टु २। ११, ३। ३०, ५। ५ निरुक्त ११। ४३ और अष्टाध्यायी ६। १। २९ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ९। ९३। ३ में भी ॥ ३ ॥

अथ प्रगाथात्मकतृतीयसूक्तस्य-मेधातिथिर्ऋषिः। इन्द्रोदेवता। बृहती छन्दः॥

तत्र प्रथमा-

१ २ ३१ २ ३ २ ३ १ २ ३ १ २ ३ १ २

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः। आपिर्नोबोधि

३ १ २ ३ २ १ २ ३ १ २

सधमाद्ये वृधेऽ३ऽस्माँ अवन्तु ते धियः ॥ १ ॥ (१४१९)

व्याख्याता (२३९)

अथ द्वितीया-

३ १ २ ३ २ ३ १ २३१ २१ ३ १ २ ३ २ ३ १

भूयाम ते सुमतौ वाजिनोवयं मानस्तरभिमातये। अस्माञ्चित्रा-

२ ३१ २३१ २ ३१२

भिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥२॥ [१६] (१४२०)

पदपाठः-भूयाम क्रि०। ते ६। सुमतौ ७। वाजिनः, वयम् १। मा अ०। नः २। स्तः क्रि०। अभिमातये ४। अस्मान् २। चित्राभिः ३। अवतात् क्रि०। अभिष्टिभिः ३। आ अ०। नः २। सुम्नेषु ७। यामय क्रि० ॥

अन्वितपदार्थः-हे इन्द्र ! परमेश्वर ! इति पूर्वस्मादनुवर्त्त्य-(ते) त्वदीयायां (सुमतौ) शोभनायां मतौ वेदोपदेशरूपायां (वयं) भवदुक्ताः (वाजिनः) बलवन्तो-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽन्नादिमन्तश्च (भूयाम) स्याम (नः) अस्मान् (अभिमातये) अभिमानाय गर्वाय (मा) न (स्तः) हिन्धि अपि तु नम्रान्कृत्वा (चित्राभिः) विविधाभिः (अभिष्टिभिः) अभ्येषणीयाभिरूतिभिः (अस्मान्) त्वदाज्ञापरायणान् (अवतात्) रक्ष, तथा (नः) अस्मान् (सुम्नेषु) सुखेषु (आ-यामय) निर्वाहय ॥

ईश्वरभक्तैर्मनुष्यैस्तत्कृपया निरभिमानिता रक्षा सुखनिर्वाहश्च प्रार्थनीयः इति भावः ॥ ऋग्वेदे ८ । ३ । २ ऽपि स्तरिति स्तृङ् हिंसायाम् (क्र्या० प०) इत्यस्य माङि लुङि छान्दसच्लेर्लुकि रूपम् ॥ २ ॥

भाषार्थः—पूर्वमन्त्र से अनुवृत्तिलाकर हे इन्द्र ! परमेश्वर ! (ते) तुम्हारी (सुमतौ) उत्तम मति जो वेदोपदेशरूप है उस में (वयम्) हम (वाजिनः) बलवान् और अन्नादि साधनवान् (भूयाम) होवें (नः) हम को (अभिमातये) अभिमान के लिये (मा) मत (स्तः) मारो किन्तु नम्र करके (चित्राभिः) अपनी विचित्र (अभिष्टिभिः) चाहने योग्य रक्षाओं से (अस्मान्) हम को (अवतात) रक्षित करो, तथा (नः) हम को (सुम्नेषु) सुखों में (आ-यामय) निर्वाहित करो [गुज़ारो] ॥

ईश्वरभक्त मनुष्यों को उस की कृपा से निरभिमानता, रक्षा और सुख से निर्वाह, बल तथा अन्नादि सर्वसुख के साधन मांगने चाहियें, यह भाव है ॥ ऋ० ८ । ३ । २ में भी ॥ २ ॥

अथ तृचस्य चतुर्थसूक्तस्य-रेणुर्ऋषिः । सोमो देवता । जगती छन्दः ॥

तत्र प्रथमा—

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २

त्रिरस्मै सप्त धेनवो दुदुह्रिरे, सत्यामाशिरं परमे व्योमनि ।

३ २ ३ १ २ २ ३ २ ३ १ २ ३ २ ३ १ २ २

चत्वार्यन्या भुवनानि निर्णिजे, चारूणि चक्रे यदृतैरवर्धत ॥

॥ १ ॥ (१४२१) व्याख्याता (५६०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ २ ३ ३ १ २ ३ १ २ ३

स भक्ष्यमाणो अमृतस्य चारुण, उभे द्यावा काव्येना विशश्रथे ।

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २

तेजिष्ठा अपो मंहना परिव्यत,यदी देवस्य श्रवसा सदो विदुः॥

॥ २ ॥ (१४२२)

पदपाठः-सः, भक्ष्यमाणः १ । अमृतस्य, चारुणः ६ । उभे, द्यावा २ । काव्येन ३ । विशश्रथे क्रि० । तेजिष्ठाः, अपः २ । मंहना ३ । परिव्यत क्रि० । यदि अ० । देवस्य ६ । श्रवसा ३ । सदः ७ । विदुः क्रि० ॥

अन्वितपदार्थः-(अमृतस्य) आनन्ददस्य (चारुणः) शोभनस्य वेदस्य (काव्येन) सस्वरपाठेन सह (यदि) यदा (सः) सोमः (भक्ष्यमाणः) भोज्यमानो हूयमानो भवति तदा (उभे) द्वे अपि (द्यावा) द्यावाभूमी (विशश्रथे) उदकेन संपूरयति (तेजिष्ठाः) अतिशयेन तेजोवतीः (अपः), (मंहना) महत्त्वेन (परिव्यत) आच्छादयति (सदः) सदसि यज्ञे (देवस्य) दिव्यस्य सोमस्य (श्रवसा) यशसा वेदोक्तप्रशंसारूपेण (विदुः) वेदज्ञा जानन्ति ॥ ऋग्वेदे तु ९ । ७० । १ भिक्ष्यमाण इति पाठः, परं सायणाचार्येणेकारस्थानेऽकारं मत्वा सएवाऽत्रापि व्याख्यातः ॥ २ ॥

भाषार्थः-(अमृतस्य) अमृतरूप (चारुणः) सुन्दर वेद के (काव्येन) सस्वर पाठ के साथ (भक्ष्यमाणः) भोजन कराया जाता हुवा=होम किया जाता हुवा (सः) वह सोम (उभे) दोनों (द्यावा) द्युलोक पृथिवीलोक को (विशश्रथे) भर देता है और (मंहना) महत्त्व से (तेजिष्ठाः) अत्यन्त प्रकाशमान (अपः) जलों को (परिव्यत) आच्छन्न कर देता है (सदः) यज्ञ में (देवस्य) दिव्य सोम देवता के (श्रवसा) यश से [जो वेदमन्त्रों में वर्णित है]

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(विदुः) वेदन्न जानते हैं ॥ ऋ० ९ । ७० । २ में " भिक्ष्यमाणः " पाठ है और सायणचार्यने यहां भी इकार को अकार मान कर वही अर्थ रक्खा है ॥ २ ॥

अथ तृतीया–

१ २ ३१ २र ३१ २ ३१३ २१ २र

ते अस्य सन्तु केतवोऽमृत्यवो, ऽदाभ्यासो जनुषी उभे अनु ।

१ २ ३ १ २३क २र ३१ २र ३१२

येऽभि नृम्णा च देव्या च पुनत, आदिद्राजानं मनना अगृभ्णत ॥

॥ ३ ॥ [१७] (१४२३)

पदपाठः–ते १ । अस्य ६ । सन्तु क्रि० । केतवः, अमृत्यवः, अदाभ्यासः १ । जनुषी, उभे २ । अनु अ० । येभिः ३ । नृम्णा २ । च अ० । देव्या २ । पुनते क्रि० । आत्, इत् अ० । राजानम् २ । मननाः १ । अगृभ्णत क्रि० ॥

अन्वितपदार्थः–(येभिः) यैः केतुभिः किरणैः (नृम्णा च) नृम्णानि बलानि च (देव्या च) देवार्हाणि अन्नानि च (पुनते) शोधयति सोमः (ते) (अस्य) सोमस्य (अमृत्यवः) अमृताः (अदाभ्यासः) अदाभ्या अहिंस्याः (केतवः) किरणाः (उभे) द्वे (जनुषी) जन्मनी स्थावरजङ्गमरूपे (अनु सन्तु) आनुकूल्येन भवन्तु (आत् इत्) एवं सति एव (मननाः) मन्त्राः (राजानम्) सोमम् (अगृभ्णत) परिगृह्णन्ति प्राप्नुवन्ति ॥ ऋग्वेदे ९ । ७० । ३ ऽपि ॥ ३ ॥

भाषार्थः–(येभिः) जिन किरणों से सोम (नृम्णा च) बलों को (च) और (देव्या) देवयजनयोग्य अन्नों को (पुनते) शुद्ध करता है (ते) वे (अमृत्यवः) अमृत तुल्य (अदाभ्यासः) न हिंसनीय (केतवः) किरणें (उभे) दोनों स्थावर जङ्गम (जनुषी) जीवयोनियों को (अनु सन्तु) अनुकूल हों (आत् इत्) तब ही (मननाः) मन्त्र (राजानम्) ओषधिराज सोम को (अगृभ्णत) परिगृहीत करते=प्राप्त होते हैं, अर्थात् मन्त्रानुकूल सोम का फल होता है ॥ ऋ० ९ । ७० । ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति द्वादशाऽध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे प्रथमर्चस्य–कुत्सऋषिः । सोमोदेवता त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

३ २ ३ २ ३क २र ३ २ २ ३ १ २र ३ १ २

अभि वायुं वीत्यर्षा गृणानो,ऽ३ऽभि मित्रावरुणा पूयमानः ।

३ १ २र ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २

अभी नरं धीजवनꣳरथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥

॥ १ ॥ (१४२४)

पदपाठः–अभि अ० । वायुम् २ । वीति ४ । अर्ष क्रि० । गृणानः १ । अभि । मित्रावरुणा २ । पूयमानः १ । अभि । नरम्, धीजवनम्, रथेष्ठाम् २ । अभि । इन्द्रम्, वृषणम्, वज्रबाहुम् २ ॥

अन्वितपदार्थः–प्रकरणात्सोमः (गृणानः) प्रशस्यमानः (वीति) वीत्यै भक्षणाय (वायुम्) पवनं साधारणम् (अभि–अर्ष) अभिव्याप्नोति (पूयमानः) शोध्यमानः सोमः (मित्रावरुणा) प्राणापानौ श० १ । ८ । ३ । १२ (अभि) अभ्यर्षति अभिव्याप्नोति (धीजवनम्) बुद्धि-प्रसारकम् (रथेष्ठाम्) देहस्थम् (नरम्) पुरुषम् (अभि) अभ्यर्षति (वज्रबाहुम्) विद्युत्किरणम् (वृषणम्) वृष्टि-करम् (इन्द्रम्) वायुविशेषं सूर्यं वा (अभि) अभ्यर्षति ॥ ऋग्वेदे ९ । ९७ । ४९ ऽपि ॥ १ ॥

भाषार्थः–प्रकरण से सोम (गृणानः) प्रशंसित हुवा (वीति) खाने के लिये (वायुम्) वायुसामान्य को (अभि अर्ष) अभिव्याप्त होता है, (पूयमानः) शुद्ध किया हुवा सोम (मित्रावरुणा) मित्र प्राण और वरुण अपान को [श० १ । ८ । ३ । १२] (अभि) अभिव्यापता है और (धीज-वनम्) बुद्धि दौड़ाने वाले (रथेष्ठाम्) देहस्थ (नरम्) पुरुष को (अभि)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राप्त होता है, तथा (वज्रबाहुम्) बिजुली की किरण वाले (वृषणम्) वृष्टि-कारक (इन्द्रम्) वायुविशेष वा सूर्य को (अभि) प्राप्त होता है ॥ ऋ० ९ । ९७ । ४९ में भी ॥ १ ॥

अथ द्वितीया—

३ १ २र ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
अभि वस्त्रा सुवसनान्यर्षा, ऽभि धेनूः सुदुघाः पूयमानः ।
३ २ ३ १ २र ३ १२ ३ १ २ ३ १ २
अभि चन्द्रा भर्त्तवे नो हिरण्या, ऽभ्यश्वान्रथिनो देव सोम ॥२॥

पदपाठः-अभि अ० । वस्त्रा, सुवसनानि २ । अर्ष क्रि० । अभि । धेनूः, सुदुघाः २ । पूयमानः १ । अभि । चन्द्रा २ । भर्त्तवे अ० । नः ६ । हिरण्या २ । अभि । अश्वान् , रथिनः २ । देव, सोम सं०=१ ॥

अन्वितपदार्थः-(देव) दिव्यः (सोम) सोमः (सुवसनानि) सुपरिधानानि (वस्त्रा) वस्त्राणि (अभिअर्ष) अभिगच्छति (पूयमानः) सोमः (सुदुघाः) शोभनस्य पयसो दोग्ध्रीः (धेनूः) गाः (अभि) अभिगच्छति (नः) अस्माकं (भर्त्तवे) धारणाय (चन्द्रा) रजतानि (हिरण्या) सुवर्णानि च (अभि) अभिगच्छति (रथिनः) रथवतः (अश्वान्) वाजिनः (अभि) अभिगच्छति ॥ ऋग्वेदे ९ । ९७ । ५० ऽपि ॥ २ ॥ (१४२४)

भाषार्थः-(देव) दिव्य (सोम) सोम (सुवसनानि) भले प्रकार पहरने के (वस्त्रा) वस्त्रों को (अभि-अर्ष) प्राप्त होता है, (पूयमानः) सोम (सुदुघाः) सुन्दर दूध देने वाली (धेनूः) दुधार गौओं को (अभि) प्राप्त होता है, (नः) हमारे (भर्त्तवे) धारणार्थ (चन्द्रा) चान्दी और (हिरण्या) सोने को (अभि) प्राप्त होता है और (रथिनः) रथ वाले (अश्वान्) घोड़ों को (अभि) प्राप्त होता है ॥ ऋ० ९ । ९७ । ५० में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

३ १ २ ३ १र २र ३ २उ ३ १ २ ३ १ २ ३ २उ
अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः। अभि
३ १२ ३ १२ ३क २र ३ १ २ ३ १ २
येन द्रविणमश्नुवामाभ्यार्षेयं जमदग्निवन्नः॥३॥ [१८] (१४२६)

पदपाठः–अभि अ० । नः ४ । अर्ष क्रि० । दिव्या, वसूनि २ । अभि । विश्वा, पार्थिवा २ । अभि । येन ३ । द्रविणम् २ । अश्नुवाम क्रि० । अभि । आर्षेयम् २ । जमदग्निवत् अ० । नः ४ ॥

अन्वितपदार्थः–(पूयमानः) सोमः (नः) अस्मभ्यं (दिव्या) दिवि भवानि (वसूनि) धनानि (अभिअर्ष) अभितः प्रापयति (विश्वा) सर्वाणि (पार्थिवा) पृथिव्यां भवानि च (अभि) अभितः प्रापयति (येन) बलेन नैरोग्येण च (द्रविणम्) तद्दिव्यं पार्थिवं च धनं वयम् (अश्नुवाम) भुञ्जीमहि तदपि (अभि) अभितः प्रापयति तथा (नः) अस्मभ्यं (जमदग्निवत्) चक्षुर्वत् (आर्षेयम्) ऋषीणां ज्ञानेन्द्रियाणामिदं तेजः (अभि) अभितः प्रापयति ॥

" चक्षुर्वै जमदग्निर्ऋषिः " शतपथे ८ । १ । २ । ५ ऋग्वेदे ९ । ९७ । ५१ ऽपि ॥३॥

भाषार्थः–(पूयमानः) सोम (नः) हमारे लिये (दिव्या) आकाशीय (वसूनि) धनों को (अभिअर्ष) सर्वतः प्राप्त कराता है और (विश्वा) सब (पार्थिवा) पृथिवीसंबन्धी धनों को भी (अभि) प्राप्त कराता है तथा (येन) जिस बल वा नीरोगता से (द्रविणम्) उस आकाशीय और पार्थिव धन को हम (अश्नुवाम) भोग सकें वह भी (अभि) प्राप्त कराता है और (नः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हमारे लिये (जमदग्निवत्) आंख के समान [श० ८ । १ । २ । ५] (आर्षेयम्) अन्य ज्ञानेन्द्रियों के तेज को भी (अभि) प्राप्त कराता है ॥ ऋ० ९ । ९७ । ५१ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य नृमेधपुरुमेधावृषी । इन्द्रो देवता । विराडनुष्टुप्, निचृदनुष्टुप्, बृहती च क्रमेण छन्दः ॥ तत्र प्रथमा–

१र २र ३ १ २ ३ १ २

यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।

१ २ ३ १ २ ३ १ २ ३ १र २र

तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ १ ॥ (१४२७)

पदपाठः–यत् अ० । जायथाः क्रि० । अपूर्व्य, मघवन् सं० । वृत्रहत्याय ४ । तत् अ० । पृथिवीम् २ । अप्रथयः क्रि० । तत् । अस्तभ्नाः क्रि० । उतो अ० । दिवम् २ ॥

उक्थोऽग्निष्टवः । उक्तः पृष्ठ्यः । उक्थोऽग्निजित् ।

इदानीं स्वरसामानः इति विवरणकारः ॥

अन्वितपदार्थः–(अपूर्व्य) हे अनादे ! (मघवन्) इन्द्र ! परमेश्वर ! (यत्) यदा त्वम् (वृत्रहत्याय) प्रलयकालीनस्य तमसोवृत्रस्य नाशाय (जायथाः) जनयसि जगत् (तत्) तदा (पृथिवीम्) भूमिम् (अप्रथयः) विस्तीर्णां करोषि (उतो) अपि च (तत्) तदानीमेव (दिवम्) द्युलोकस्थं चराचरम् (अस्तभ्नाः) स्तभ्नासि ॥ ऋग्वेदे तु ८ । ८९ । ५ दिवम्=द्याम् इति पाठभेदः ॥ १ ॥

भाषार्थः–(अपूर्व्य) हे अनादि ! (मघवन्) ईश्वर ! (वृत्रहत्याय) अन्धियारे के नाशार्थ (यत्) जब कि आप (जायथाः) जगत् को उत्पन्न करते हैं (तत्) तब (पृथिवीम्) भूमिको (अप्रथयः) विस्तीर्ण बनाते हैं (उतो) और (तत्) तभी (दिवम्) द्युलोकस्थ चराचर को भी (अस्तभ्नाः) थांभते हैं ॥ ऋ० ८ । ८९ । ५ का पाठान्तर संस्कृत भाष्य में देखिये ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २ ३ १ २ ३ २ ३ २ ३ १ २ २ २

तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।

१ २ २ ३ १ २ ३ २ ३ २ उ ३ १ २

तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥ २ ॥ (१४२८)

पदपाठः–तत् अ० । ते ६ । यजायत क्रि० । तत् । अर्कः १ । उत अ० । हस्कृतिः १ । तत्, विश्वम् २ । अभिभूः १ । असि क्रि० । यत्, जातम्, यत् १ । च अ० । जन्त्वम् १ ॥

अन्वितपदार्थः–(तत्) तदानीमेव (ते) तव (हस्कृतिः) अहस्करः (अर्कः) सूर्यः (अजायत) उत्पन्नः (उत) अथ च (तत्) तदानीमेव (यज्ञः) सूर्यसाध्यो होमादिः अजायत । किं ब्रूमः (यत्) (जातम्) उत्पन्नम् (यत् च) (जन्त्वम्) जनिष्यमाणम् (तत्) (विश्वम्) सर्वम (अभिभूः) (असि) स्वमहत्त्वेनाऽभिभूतवानऽसि ॥ ऋग्वेदे ८ । ८९ । ६ ऽपि ॥ २ ॥

भाषार्थ–(तत्) तभी (ते) तुम्हारा (हस्कृतिः) दिनकर (अर्कः) सूर्य (अजायत) उत्पन्न हुवा (उत) और (तत्) तभी (यज्ञः) सूर्य से सधने वाला तुम्हारा (यज्ञः) होमादि उत्पन्न हुवा, कहां तक कहाजाय (यत्) जो कुछ (जातम्) उत्पन्न हो चुका (यत् च) और जो कुछ (जन्त्वम्) उत्पन्न होगा (तत्) उस (विश्वम्) सब को (अभिभूः असि) तुम दबाये हो ॥ ऋ० ८ । ८९ । ६ में भी ॥ २ ॥

अथ तृतीया–

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ २

आमासु पक्वमैरय आ सूर्ये रोहयो दिवि । घर्मं न सामं

३ २ ३ २ ३ १ २ ३ २

तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ ३ ॥ [१९] (१४२९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-आमासु ७। पक्वम्। २। ऐरयः क्रि०। आ अ०। सूर्यम् २। रोहयः क्रि०। दिवि ७। घर्मम् २। न अ०। सामम् २। तपत क्रि०। सुवृक्तिभिः ३। जुष्टम् २। गिर्वणसे ४। बृहत् २॥

अन्वितपदार्थः-परमेश्वर! (आमासु) अपक्वासु ओषधिषु त्वं (पक्वम्) पक्वं रसम् (ऐरयः) प्रेरितवान् (सूर्यम्) आदित्यम् (दिवि) द्युलोके तथा (आरोहयः) आरोहितवान् (न) यथा (सामं) समासु वर्षेषु भवं (घर्मम्) तापम् (सुवृक्तिभिः) ऋतुरूपेण सुविभक्तिभिः (तपत) तपेत्। अतएव हेईश्वरभक्ताः! (गिर्वणसे) गीर्भिर्वननीयायेन्द्राय परमेश्वराय (जुष्टम्) प्रीतिपूर्वकं (बृहत्) बृहत्साम गायतेति शेषः॥ ऋग्वेदे ८। ८९। ७ऽपि॥ ३॥

भाषार्थः-परमेश्वर ने (आमासु) कच्ची ओषधियों में (पक्वम्) पके रस को (ऐरयः) प्रेरित किया और (सूर्यम्) सूर्य को (दिवि) द्युलोक में (आरोहयः) ऐसे चढ़ाया कि (न) जैसे (सामम्) वर्ष भर के (घर्मम्) ताप को (सुवृक्तिभिः) ऋतुरूप विभागों से (तपत) तपे। इस लिये हे ईश्वरभक्तो! तुम (गिर्वणसे) वाणी से सेवनीय इन्द्र=परमेश्वर के लिये (जुष्टम्) प्रीतिपूर्वक (बृहत्) बड़े साम को "गाओ" यह परिशेष है॥

परमेश्वर ने आकाश में सूर्य को ऐसी युक्ति से रक्खा है कि वह सब ऋतुओं में क्रम और विभागपूर्वक ऐसा तपे कि जिस से सब ओषधि वनस्पति आदि भले प्रकार कच्ची से पक्की हो जावें। यह अद्भुत परन्तु ज्ञानपूर्वक महाकार्य है जिस से उस परमात्मा का महत्त्व सूचित होता है, जिस के लिये हम को उस की महती स्तुति सामगान द्वारा करनी चाहिये॥ ऋ० ८। ८९। ७ में भी॥३॥

अथ तृतीयतृचस्य-अगस्त्यऋषिः। इन्द्रोदेवता। १-स्वराडनुष्टुप्, २-विराडनुष्टुप् ३-निचृत्त्रिष्टुप् चेति क्रमेण छन्दांसि॥ तत्र प्रथमा—

१ २ ३ २३ १ २ ३ १ २र

मत्स्यऽपायि ते महः पात्रस्येव हरिवो मत्सरो मदः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥१॥ (१४३०)

पदपाठः–मत्सि, अपायि क्रि० । ते ६ । महः १ । पात्रस्य ६=३ । इव अ० । हरिवः सं० । मत्सरः, मदः, वृषा १ । ते, वृष्णः ६ । इन्दुः, वाजी, सहस्रसातमः १ ॥

अन्वितपदार्थः–(हरिवः) सर्वशक्तिमन्निन्द्र ! (ते) तव (वृष्णः) कामानां वर्षकस्य (महः) महान् सर्ववनस्पतिप्रभृतिषु तत्तद्रूपेण परिणतः (मत्सरः) हर्षकरः (मदः) तर्पयिता (वाजी) बलप्रदो बलवान् (सहस्रसातमः) अपरिमितदातृतमः, सहस्रपुरुषसंभजनपर्याप्तशक्त्यतिशयोवा महानुभावः (इन्दुः) सोमः (ते) तव एव प्रसादात् (पात्रस्य इव) पात्रेणेव (अपायि) अस्माभिः पीतः (मत्सि) एवं त्वमस्मान्मादयसि अतोऽस्माभिः स्तोतव्योसीति पूर्वेण सन्दर्भः ॥ ऋग्वेदे १ । १७५ । १ ऽपि ॥ १ ॥

भावार्थः–(हरिवः) हे सर्वशक्तिमन्निन्द्र ! परमेश्वर ! (ते) आप (वृष्णः) कामपूरक का पूर्वसूक्तोक्त रीति से उत्पन्न किया (महः) सब ओषधि वनस्पत्यादि में उस २ रूप से परिणत भारी (मत्सरः) हर्षकारक (मदः) तृप्तिकारक (वाजी) बलवान् बलदायक (सहस्रसातमः) अपरिमित अत्यन्त दाता वा सहस्रों पुरुषों के बांटने को पर्य्याप्त शक्ति की बहुतायत वाला महानुभाव (इन्दुः) सोम (ते) आप के ही प्रसाद से (पात्रस्येव) मानों पात्र से पीरहे हों ऐसे (अपायि) हमने किया । (मत्सि) आप इस प्रकार हम को हृष्ट और पुष्ट करते हैं, इस लिये पूर्वोक्त प्रकार स्तुत्य हैं ॥ ऋ० १ । १७५ । १ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ २उ ३ २ ३ १२

आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।

३१२ ३ १ २ ३ १र २र

सहावाँ इन्द्र सानसिः पृतनाषाडऽमर्त्यः ॥२॥ (१४३१)

पदपाठः-आ अ० । नः २ । ते ६ । गन्तु क्रि० । मत्सरः, वृषा, मदः, वरेण्यः, सहावान् १ । इन्द्र सं० । सानसिः, पृतनाषाड्, अमर्त्यः १ ॥

अन्वितपदार्थः-(इन्द्र) हे परमेश्वर ! (मत्सरः) हर्षकरः (वृषा) वर्षकः (मदः) तर्पकः (वरेण्यः) वरीतुमर्हः (सहावान्) मर्षणः (सानसिः) संभजनीयः (पृतनाषाड्) शत्रुसेनाया अभिभावुकः (अमर्त्यः) अमृतः (ते) त्वदीयः सोमः (नः) अस्मान् (आ गन्तु) प्राप्नोतु ॥ ऋग्वेदे १ । १७५ । २ ऽपि ॥ २ ॥

भाषार्थः-(इन्द्र) हे ईश्वर ! (मत्सरः) हर्षकारक (वृषा) वृष्टिकारक (मदः) तृप्तिकारक (वरेण्यः) स्वीकरणीय (सहावान्) मर्षणशील (सानसिः) संभजनीय (पृतनाषाड्) शत्रुसेनाओं को तिरस्कृत करने वाला (अमर्त्यः) अमृत (ते) आप का सोम (नः) हम को (आ-गन्तु) प्राप्त हो ॥ ऋ० १ । १७५ । २ में भी ॥ २ ॥

अथ तृतीया—

२उ ३ १ २ ३ २ ३ १ २ ३ १ २

त्वꣳहि शूरः सनिता चोदयो मनुषोरथम् ।

३ २ ३ १ २ ३ २उ ३ २ ३ २ ३ १ २

सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा॥३॥[२०](१४३२)

पदपाठः-त्वम् १ । हि अ० । शूरः, सनिता १ । चोदयः क्रि० । मनुषः ६ । रथम् २ । सहावान् १ । दस्युम्, अव्रतम् २ । ओषः क्रि० । पात्रम् २ । न अ० । शोचिषा ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-हे परमेश्वर ! (त्वं हि) त्वमेव (शूरः) सर्वोत्कृष्टोवीरः (सनिता) दातासि (मनुषःरथम्) मनोरथं (चोदयः) सत्कर्मसु प्रेरय । त्वं (सहावान्) दुष्टशत्रुनिबर्हणः (अव्रतम्) नास्तिकम् (दस्युम्) अधार्मिकम् (ओषः) दह (न) यथा (पात्रम्) भाण्डम् (शोचिषा) अग्निना दहन्ति शोधयन्ति तद्वत् ॥ ऋग्वेदे तु १ । १७५ । ३ ऽपि ॥ ३ ॥

भाषार्थः-हे ईश्वर ! (त्वं हि) आप ही (शूरः) सच्चे वीर और (सनिता) दाता हैं सो (मनुषः रथम्) मनोरथ को (चोदयः) सत्कर्मों में लगाइये और आप (सहावान्) दुष्टजनशिक्षक हैं सो (अव्रतम्) नास्तिक (दस्युम्) उपद्रवी अधर्मी को (ओषः) फूंक दीजिये (न) जैसे (पात्रम्) अशुद्ध पात्र को (शोचिषा) अग्नि से तपाकर शुद्ध करते हैं तद्वत् ॥ ऋ० १ । १७५ । ३ में भी ॥ ३ ॥

इति द्वादशाऽध्यायस्य षष्ठः खण्डः ॥ ६ ॥

—:*:—

इति श्रीमत्कण्ववंशावतंस पण्डित हज़ारीलाल स्वामिसूनुना
हस्तिनापुर पार्श्ववर्ति परीक्षितगढ़ निवासिना
तुलसीरामस्वामिना
कृते सामवेदभाष्योत्तरार्चिके
द्वादशोऽध्यायः ॥ १२ ॥

इति षष्ठप्रपाठके द्वितीयोऽर्धः,
षष्ठःप्रपाठकश्च समाप्तः ॥६॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ त्रयोदशाऽध्यायः

तत्र

प्रथमे खण्डे पञ्चर्चस्य प्रथमसूक्तस्य-कविर्ऋषिः । सोमोदेवता । गायत्रीछन्दः॥

तत्र प्रथमा-

१ २ ३ २उ ३ २ ३ २ ३१र २र

पवस्व वृष्टिमा सु नोपामूर्मिं दिवस्परि ।

३ १ २ ३ १र २र

अयक्ष्मा बृहतीरिषः ॥ १ ॥ (१४३३)

पदपाठः-पवस्व क्रि० । वृष्टिम् २ । आ, सु अ० । नः ४ । अपाम् ६ । ऊर्मिम् २ । दिवः ५ । परि अ० । अयक्ष्माः, बृहतीः, इषः २ ॥

अन्वितपदार्थः-सोम ! वा हे ईश्वर ! कामानां वर्षक ! (नः) अस्मभ्यम् (अपाम्) जलानाम् (ऊर्मिम्) लहरीम् (वृष्टिम्), तथा (अयक्ष्माः, बृहतीः, इषः) रोग रहितानि नैरोग्यप्रदानि, महान्ति, अन्नानि (दिवः) आकाशात् (आ-परि-सु पवस्व) सर्वतःसुष्ठु वर्षय ॥ ऋग्वेदे ९ । ४९ । १ ऽपि ॥ १ ॥

भाषार्थः-हे कामपूरक ! परमेश्वर ! वा सोम ! (नः) हमारे लिये (अपाम्, ऊर्मिम्, वृष्टिम्) जलों की, लहरी, वर्षा को तथा (अयक्ष्माः, बृहतीः, इषः) नीरोग, बहुत, अन्नों को (दिवः) आकाश से (आ-परि-सु-पवस्व) सर्वतः भले प्रकार वर्षाओ ॥

वर्षा की बहुतायत और उत्तमता से अन्न भी नीरोग और उत्तम तथा बहुतायत से होते हैं और मानो वर्षा रूप से आकाश से ही अन्न वर्षते हैं ॥ ऋ० ९ । ४९ । १ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २ ३ १२३ २ ३ १ २ ३१र २र

तया पवस्व धारया यया गाव इहागमन् ।

१ २३ १२ ३ २

जन्यास उप नो गृहम् ॥ २ ॥ (१४३४)

पदपाठः–तया ३ । पवस्व क्रि० । धारया, यया ३ । गावः १ । इह अ० । आगमन् क्रि० । जन्यासः १ । उप अ० । नः ६ । गृहम् २ ॥

अन्वितपदार्थः–हे परमेश्वर ! वा सोम ! (तया) तादृश्या (धारया पवस्व) वर्षणेनाऽस्मान्पावय (यया) यादृश्या धारया (जन्यासः) जनेषु भवाः (गावः) धेनवः तदुपलक्षिता अश्वादयश्च पशवः (नः) अस्माकं (गृहम्) सद्म (इह) अस्मिन्नेव लोके (उपाऽऽगमन्) उपागच्छेयुः ॥ ऋग्वेदे ९ । ४९ । २ ऽपि ॥ २ ॥

भाषार्थः–हे परमेश्वर ! वा सोम ! (तया) उस (धारया) धारा से (पवस्व) वर्षा द्वारा हमें पवित्र करो (यया) जिस से कि (जन्यासः) जङ्गली नहीं किन्तु जनसमुदाय में रहने वाली (गावः) गौवें और तदुपलक्षित अन्य अश्वादि पशु (नः) हमारे (गृहम्) घर को (इह) इसी लोक में (उपाऽऽगमन्) आवें ॥ ऋ० ९ । ४९ । २ में भी ॥ २ ॥

अथ तृतीया–

३१ २ ३ १२ ३१२ ३१२

घृतं पवस्व धारया यज्ञेषु देववीतमः ।

३ १ २ ३१र २र

अस्मभ्यं वृष्टिमापव ॥ ३ ॥ (१४३५)

घृतम् २ । पवस्व क्रि० । धारया ३ । यज्ञेषु ७ । देववीतमः १ । अस्मभ्यम् ४ । वृष्टिम् २ । आपव क्रि० ॥

अन्वितपदार्थः–हे परमेश्वर ! वा सोम ! (यज्ञेषु, देववीतमः) ब्रह्मयज्ञादियज्ञेषु देवानां भवदुपासकानां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गम्यतमः अथवा-होमादिषु देवानां भक्ष्यतमः (घृतम्) उदकम् (धारया) मुसलधाराख्यया धारया (पवस्व) वर्षय अर्थात् (अस्मभ्यम्) अस्मदर्थं (वृष्टिम्) वर्षाः (आ पव) सर्वतोवर्षय ॥ ऋग्वेदे ९ । ४९ । ३ ऽपि ॥ ३ ॥

भाषार्थः-हे परमेश्वर वा सोम ! (यज्ञेषु देववीतमः) ब्रह्मयज्ञादि यज्ञों में देवों=उपासकों को प्राप्यतम, वा होमादि में वायु आदि देवों के भक्ष्यतम (घृतम्) जल को (धारया) मुसलधार से (पवस्व) वर्षाओ अर्थात् (अस्मभ्यम्) हमारे लिये (वृष्टिम्) वर्षा को (आ-पव) सर्वतः वर्षावो ॥ ऋ० ९ । ४९ । ३ में भी ॥३॥

अथ चतुर्थी-

१ २ ३ २ १ २ ३ १ २ ३ १२

स न ऊर्जे व्याऽइऽव्ययं पवित्रं धाव धारया ।

३ १ २ ३ २ ३ १ २

देवासः शृणवन् हि कम् ॥४॥ (१४३६)

पदपाठः-सः १ । नः ४ । ऊर्जे ४ । वि अ० । अव्ययम्, पवित्रम् २ । धाव क्रि० । धारया ३ । देवासः १ । शृणवन् क्रि० । हि अ० । कम् २ ॥

अन्वितपदार्थः-(देवासः) विद्वांसः (हि) एव (कम्) प्रजापतिं परमात्मानम् अथवा जलं रसरूपं सोमम् (शृणवन्) श्रुतिभ्यः शृण्वन्ति श्रुत्वा जानन्ति, यत् (सः) पूर्वोक्तः प्रजापतिः अथवा सोमः (नः) अस्मभ्यम् (ऊर्जे) रसोत्पादाय (अव्ययम्) अविनाशि (पवित्रम्) पावनं गगनमण्डलम् (धारया) मेघवर्षणधारया (वि-धाव) विगतोस्ति ॥ ऋग्वेदे ९ । ४९ । ४ ऽपि ॥ ४ ॥

भाषार्थः-(देवासः) विद्वान् (हि) ही (कम्) प्रजापति परमात्मा को, अथवा रस रूप सोम को (शृणवन्) वेद की श्रुतियों से सुनते और सुनकर जानते हैं कि (सः) वह (नः) हमारे लिये (ऊर्जे) रस की उत्पत्ति के लिये (अव्ययम्) अविनाशी (पवित्रम्) शुद्ध आकाशमण्डल को (धारया) मेघवर्षण धारा से (विधाव) विविध प्रकार प्राप्त है ॥ ऋ० ९ । ४९ । ४ में भी ॥ ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ पञ्चमी—

१ २ ३ १ २ ३ १ २

पवमानो असिष्यदद्रक्षाꣳस्यपजङ्घनत् ।

३ २ ३ २ ३ १ २

प्रत्नवद्रोचयन्रुचः ॥ ५ ॥ [१] (१४३७)

पदपाठः—पवमानः १ । असिष्यदत् क्रि० । रक्षांसि २ । अपजङ्घनत् १ । प्रत्नवत् अ० । रोचयन् १ । रुचः २ ॥

अन्वितपदार्थः—(पवमानः) पावनः परमात्मा सोमो वा (रक्षांसि) दुष्टजन्तून् (अपजङ्घनत्) नाशयन् (रुचः) सूर्यकिरणान् (प्रत्नवत्) पुरातनवत् (रोचयन्) दीपयन् (असिष्यदत्) वर्षयति ॥ ऋग्वेदे ९ । ४९ । ५ ऽपि ॥ ५ ॥

भाषार्थः—(पवमानः) पावन परमात्मा, वा सोम (रक्षांसि) प्राणघातक दुष्टजन्तुओं को (अपजङ्घनत्) नष्ट करता हुवा और (रुचः) सूर्यकिरणों को (रोचयन्) प्रकाशित करता हुवा (असिष्यदत्) वर्षाता है ॥ ऋ० ९ । ४९ । ५ में भी ॥ ५ ॥

अथ चतुर्ऋचस्य द्वितीयसूक्तस्य—भरद्वाजऋषिः । इन्द्रोदेवता । अनुष्टुप्छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।

३ २ ३ २ ३ १ २ ३ १ २

अरं गमाय जग्मयेपश्चादघ्वने नरः ॥ १ ॥ (१४३८)

व्याख्याता (३५२)

अथ द्वितीया—

१ २ ३ १ २ ३ १ २ ३ १ २

एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।

१ २ ३ २ ३ १ २ ३ २ ३ १ २

अमत्रेभिर्ऋजीषिणमिन्द्रꣳसुतेभिरिन्दुभिः ॥ २ ॥ (१४३९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—आ, ईम् अ० । एनम् २ । प्रति अ० । एतन क्रि० । सोमेभिः ३ । सोमपातमम् २ । अमत्रेभिः ३ । ऋजीषिणम्, इन्द्रम् २ । सुतेभिः, इन्दुभिः ३ ॥

अन्वितपदार्थः—हे मनुष्याः ! (एनम्) उक्तम् (ऋजीषिणम्) अर्जनसाधनं बलमृजीषं तद्वन्तम् (सोमपातमम्) अतिशयेन सोमस्य पातारम् (इन्द्रम्) ऐश्वर्यवन्तं पुरुषं राजानं (प्रति) (सुतेभिः) अभिषुतैः (इन्दुभिः) आर्द्रैः (सोमेभिः) सोमैः (अमत्रेभिः) सोमपानपात्रैश्च (ईम्) नूनम् (आ—एतन) आगच्छत ॥ ऋग्वेदे ६ । ४२ । २ऽपि ॥२॥

भाषार्थः—हे मनुष्यो ! (एनम्) इस (ऋजीषिणम्) बलवान् (सोमपातमम्) अति सोमपान करने वाले (इन्द्रम्) ऐश्वर्यशाली पुरुष राजा के (प्रति) प्रति (सुतेभिः) अभिषुत (इन्दुभिः) गीले (सोमेभिः) सोमरसों और (अमत्रेभिः) सोमपानपात्रों के सहित (ईम्) अवश्य (आ—एतन) आओ ॥ ऋ० ६ । ४२ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २

यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।

२ ३ १ २ ३ १ २ ३ २ ३ ३ १ २ २ २

वेदा विश्वस्य मेधिरो धृषत्तं तमिदेषते ॥ ३ ॥ (१४४०)

पदपाठः—यदि अ० । सुतेभिः, इन्दुभिः, सोमेभिः ३ । प्रतिभूषथ, वेद क्रि० । विश्वस्य ६=२ । मेधिरः १ । धृषत् १ । तं, तम् २ । इत् अ० । एषते क्रि० ॥

अन्वितपदार्थः—हे मनुष्याः ! (यदि) यदि यूयम् (सुतेभिः) अभिषुतैः (इन्दुभिः) आर्द्रैः (सोमेभिः) सोमैः [इन्द्रम्] (प्रतिभूषथ) सत्कुरुथ तर्हि (मेधिरः) मेधावी इन्द्रः (धृषत्) शत्रूणां धर्षकः (विश्वस्य) विश्वं सर्वं (वेद) जानाति (इत्) तथा (तं तं) तं तं कामं युस्मभ्यम् (एषते) प्रापयति ॥ ऋग्वेदे ६ । ४२ । ३ऽपि ॥३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—हे मनुष्यो ! (यदि) यदि तुम (सुतेभिः) अभिषुत (इन्दुभिः) ताज़े (सोमेभिः) सोमरसों से [इन्द्र को] (प्रतिभूषथ) सत्कृत करते हो तो वह (मेधिरः) बुद्धिमान् इन्द्र (धृषत्) शत्रुओं का धर्षण करने वाला (विश्वस्य) सब (वेदः) जानता है (इत्) और (तं तम्) उस उस काम को (एषते) तुम को पहुंचाता है ॥ ऋ० ६ । ४२ । ३ में भी ॥ ३ ॥

अथ चतुर्थी

३ १ २ ३ २३ ३ १ २ ३ १ २ ३ २

अस्मा अस्मा इदन्धसोध्वर्यो प्रभरा सुतम् ।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत्

॥ ४ ॥ [२] (१४४१)

पदपाठः—अस्मै, अस्मै ४ । इत् अ० । अन्धसः ६ । अध्वर्यो सं० । प्रभर क्रि० । सुतम् २ । कुवित् अ० । समस्य, जेन्यस्य, शर्धतः, अभिशस्तेः ६ । अव स्वरत् क्रि० ॥

अन्वितपदार्थः—हे (अध्वर्यो) ऋत्विक् (अस्मै अस्मै इत्) उक्तायेन्द्राय राज्ञे एव (अन्धसः) सोमलक्षणस्यान्नस्य (सुतम्) अभिषुतं रसं (प्रभर) प्रयच्छ । एष हि (समस्य) सर्वस्य (शर्धतः) उत्सहमानस्य (जेन्यस्य) जेतव्यस्य शत्रोः (अभिशस्तेः) अभिशंसनाद्धिंसनात् (कुवित्) सर्वशः (अवस्वरत्) युष्मान्पालयति ॥ ऋग्वेदे ६ । ४२ । ४ ऽपि ॥ ४ ॥

भाषार्थः— (अध्वर्यो) हे यज्ञ के अध्वर्यु ! तू (अस्मै अस्मै इत्) इसी इन्द्र राजा के लिये (अन्धसः) सोम रूप अन्न के (सुतम्) अभिषुत रस को (प्रभर) दे । क्योंकि यही (समस्य) सब (शर्धतः) उत्साह करते हुवे (जेन्यस्य) जीतने योग्य शत्रु की (अभिशस्तेः) हिंसा से (कुवित्) सर्वशः (अवस्वरत्) तुम को पालता है ॥ ऋ० ६ । ४२ । ४ में भी ॥ ४ ॥

इति त्रयोदशाध्यायस्य प्रथमः खण्डः ॥ १ ॥

उक्ताः स्वरसामानः इति विश्व०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ

द्वितीये खण्डे प्रथमस्य षड्चस्य सूक्तस्य–असितो देवलो वा ऋषिः। सोमोदेवता। गायत्री छन्दः॥ तत्र प्रथमा–

३ २ ३ १र २र ३ १ २ १ २
बभ्रवे नु स्वतवसेरुणाय दिविस्पृशे।
१ २ ३ १ २
सोमाय गाथमर्चत॥ १॥ (१४४२)

पदपाठः–बभ्रवे ४। नु अ०। स्वतवसे, अरुणाय, दिविस्पृशे, सोमाय ४। गाथम् २। अर्चत क्रि०॥

अन्वितपदार्थः–हे मनुष्याः! ऋत्विजोयाज्ञिकाः! (बभ्रवे) पिङ्गलवर्णाय (अरुणाय) कदाचिद्रक्तवर्णाय च (स्वतवसे) स्वस्य बलाय (दिविस्पृशे) गगनस्पृशे हुताय (सोमाय) (गाथम्) गानं तत्प्रशंसनम् (अर्चत) चर्चत॥ ऋग्वेदे ९। ११। ४ऽपि॥ १॥

भाषार्थः–हे याज्ञिको! ऋत्विजो! मनुष्यो! तुम (बभ्रवे) पिङ्गलवर्ण और (अरुणाय) कभी २ रक्तवर्ण (स्वतवसे) अपने बल (दिविस्पृशे) गगन मण्डल को छूने वाले हुत (सोमाय) सोम के लिये (गाथम्) गानयुक्त प्रशंसा की (अर्चत) चर्चा करो॥ ऋ० ९। ११। ४ में भी॥ १॥

अथ द्वितीया–

१ २ ३ १ २ ३ १र २र
हस्तच्युतेभिरद्रिभिः सुतꣳ सोमं पुनीतन।
२ ३ १ २ ३ १ २
मधावाधावता मधु॥ २॥ (१४४३)

पदपाठः–अस्तच्युतेभिः, अद्रिभिः ३। सुतम्, सोमम् २। पुनीतन क्रि०। मधौ ७। आधावत क्रि०। मधु २॥

अन्वितपदार्थः–हे ऋत्विजोध्वर्युप्रभृतयः! यूयम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(हस्तच्युतेभिः) हस्तप्रच्युतैः (अद्रिभिः) अभिषवग्रावभिः (सुतम्) अभिषुतम् (सोमम्) ओषधिराजम् (पुनीतन) पवित्रे पावयत । अपि च (मधौ) माधुर्योपेते सोमे (मधु) दुग्धम् (आधावत) प्रक्षिपत । ऋग्वेदे ९ । ११ । ५ ऽपि ॥ २ ॥

भाषार्थः—हे अध्वर्यु आदि ऋत्विजो ! मनुष्यो ! तुम (हस्तच्युतेभिः) हाथ से छूटे (अद्रिभिः) बट्टों से (सुतम्) अभिषुत (सोमम्) सोम को (पुनीतन) दशापवित्र पर छान कर शुद्ध करो और (मधौ) मधुर सोम में (मधु) दुग्ध को (आधावत) गेरो ॥ ऋ० ९ । ११ । ५ में भी ॥ २ ॥

अथ तृतीया—

२३१र २र ३२३ १ २
नमसेदुपसीदत दध्नेदभिश्रीणीतन ।
२ ३ १ २
इन्दुमिन्द्रे दधातन ॥ ३ ॥ (१४१४)

पदपाठः—नमसा ३ । इत् अ० । उपसीदत क्रि० । दध्ना ३ । इत् । अभि श्रीणीतन क्रि० । इन्दुम् २ । इन्द्रे ७ । दधातन क्रि० ॥

अन्वितपदार्थः—हे ऋत्विजः ! (दध्ना) (इन्दुम्) सोमम् (अभि श्रीणीतन) अभिश्रीणीत (इत्) अथवा (नमसा) भोज्येनाऽन्नेन (उपसीदत) सह सेवध्वम् (इत्) अथवा (इन्द्रे) राजनि (दधातन) अर्पयत ॥ ऋग्वेदे ९ । ११ । ६ ऽपि ॥ ३ ॥

भाषार्थः—हे ऋत्विजो ! (इन्दुम्) सोम को (दध्ना) दही से (अभिश्रीणीतन) मिलावो (इत्) अथवा (नमसा) भोजनीय अन्न के साथ (उपसीदत) सेवन करो, (इत्) अथवा (इन्द्रे) राजा में (दधातन) जमा करो ॥ ऋ० ९ । ११ । ६ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी-

३ १र २र ३ १ २ ३ १ २र
अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।
३१ २ ३ २
देवेभ्यो अनुकामकृत् ॥ ४ ॥ (१४४५)

पदपाठः-अमित्रहा, विचर्षणिः १ । पवस्व क्रि० । सोम सं० । शम् अ० । गवे ४ । देवेभ्यः ४ । अनुकामकृत् १ ॥

अन्वितपदार्थः-(सोम) सोम ! (अमित्रहा) शत्रु नाशनः (विचर्षणिः) विशेषण चक्षुष्यः (देवेभ्यः) वाय्वादिभ्यः (अनुकामकृत्) आनुकूल्येन कामकृत् असि, अत एव (गवे) गवादिपशुभ्यः (शम्) सुखं यथा स्यात्तथा (पवस्व) क्षर वर्षय ॥ ऋग्वेदे ९ । ११ । ७ ऽपि ॥ ४ ॥

भाषार्थः-(सोम) सोम (अमित्रहा) शत्रुनाशक और (विचर्षणिः) विशेष कर चक्षु का सहायक (देवेभ्यः) वायु आदि देवों के लिये (अनुकामकृत्) आनुकूल्य से काम करने वाला है सो (गवे) गौ आदि पशुओं के लिये (शम्) जिस प्रकार सुख हो उस प्रकार से (पवस्व) वर्षा कर ॥ ऋ० ९ । ११ । ७ में भी ॥ ४ ॥

अथ पञ्चमी-

१ २ ३ १ २ ३ १ २ ३ १ २
इन्द्राय सोम पातवे मदाय परिषिच्यसे ।
३ १र २र ३ १
मनश्चिन्मनसस्पतिः ॥ ५ ॥ (१४४६)

पदपाठः-इन्द्राय ४ । सोम सं० । पातवे अ० । मदाय ४ । परिषिच्यसे क्रि० । मनश्चित् १ । मनसः ६ । पतिः १ ॥

अन्वितपदार्थः-(सोम) ओषधिराज ! (मनश्चित्) मनसश्चेता निर्माता मनस्वित्वत्वर्धकः (मनसः पतिः) पा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लकः त्वम् (मदाय) हर्षाय (पातवे) पानार्थम् (इन्द्राय) राज्ञे (परिषिच्यसे) पात्रेषु परितः सिच्यसे ॥ ऋग्वेदे ९ । ११ । ८ ऽपि ॥ ५ ॥

भाषार्थः-(सोम) सोम ! (मनश्चित्) मन का चिनने वाला=निर्माण करने वाला अर्थात् मनस्वीपने का बढ़ाने वाला और (मनसः) मन का (पतिः) पालक [चन्द्रमा की उत्पत्ति समष्टि मनस्तत्त्व से वेद में कहीं है, तदनुसार सोम भी चान्द्रमस होने से अपने कार्य का वर्धक पोषक और पालन करने वाला है] (मदाय) हर्ष के लिये (पातवे) पानार्थ (इन्द्राय) राजा के लिये (परि सिच्यसे) सर्वतः पात्रों में सेचन किया जाता है ॥ ऋ० ९ । ११ । ८ में भी ॥ ५ ॥

अथ षष्ठी-

१ २ ३ १ २ ३ १ २
पवमान सुवीर्यꣳ रयिꣳसोम रिरीहि णः ।
२ ३ १ २ ३ २
इन्दविन्द्रेण नो युजा ॥ ६ ॥ [३] (१४४७)

पदपाठः-पवमान सं० । सुवीर्यम् , रयिम् २ । सोम सं० । रिरीहि क्रि० । नः ४ । इन्दो सं० । इन्द्रेण ३ । नः ६ । युजा ३ ॥

अन्वितपदार्थः-(पवमान) पावन ! (इन्दो) प्रकाशक ! (सोम) ओषधिराज ! (नः) अस्माकं (युजा) सहायेन (इन्द्रेण) राज्ञा सह (सुवीर्यम्) शोभनं वीर्यं तथा (रयिम्) धनम् (नः) अस्मभ्यं (रिरीहि) देहि ॥ ऋग्वेदे ९ । ११ । ९ ऽपि ॥ ६ ॥

भाषार्थः-(पवमान) शुद्ध ! शोधक ! (इन्दो) प्रकाशक ! (सोम) सोम ! तू (नः) हमारे (युजा) सहायक (इन्द्रेण) इन्द्र के साथ (नः) हमारे लिये (सुवीर्यम्) सुन्दर वीर्य और (रयिम्) धान्यादि धन को (रिरीहि) दे ॥ ऋ० ९ । ११ । ९ में भी ॥ ६ ॥

अथ तृचस्य द्वितीयसूक्तस्य-सुकक्षऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र प्रथमा-

२उ ३ २ ३ १ २ ३ १र २र
उद्घेदभिश्रुता मघं वृषभं नर्यापसम् ।
१ २
अस्तारमेषि सूर्य ॥१॥ (१४१८) व्याख्याता (११५)

अथ द्वितीया-

२ ३ १ २ ३ १र २र ३ १ २ ३क २र
नव यो नवतिं पुरो बिभेद बाह्वोजसा ।
१ २ ३ १ २
अहिं च वृत्रहाऽवधीत् ॥२॥ (१४१९)

पदपाठः-नव २ । यः १ । नवतिम् २ । पुरः २ । बिभेद क्रि० । बाह्वो-जसा ३ । अहिम् २ । च अ० । वृत्रहा १ । अवधीत् क्रि० ॥

अन्वितपदार्थः-(यः) (वृत्रहा) मेघशत्रुः इन्द्रः (अहिम्) मेघम् (अवधीत्) हिनस्ति । (बाह्वोजसा) किरणात्मकबाहुबलेन (नव नवतिम्) ९९ (पुरः) दुर्गाणि (च) (बिभेद) भिनत्ति [स इन्द्रः] इत्यादिनोत्तरेणान्वयः ॥

अत्र ९९ संख्यायां पूर्वोक्तं (१७९) संख्याया ऋचो व्याख्यानमनुसंधेयम् ॥ ऋग्वेदे ८ । ९३ । २ ऽपि ॥ २ ॥

भाषार्थः- (यः) जो (वृत्रहा) मेघहन्ता इन्द्र (अहिम्) मेघ को (अवधीत्) मारता (च) और (नव नवतिम्) ९९ (पुरः) क़िलों को (बिभेद) ढाता है [वह इन्द्र इत्यादि) अगले मन्त्र से अन्वय है ॥ यहां ९९ संख्या के क़िलों का व्याख्यान जानने के लिये पूर्व (१७९) संख्या की ऋचा का भाष्य देखकर मिलालेना चाहिये ॥ ऋ० ८ । ९३ । २ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

२ ३ १ २ ३ १र २र ३ २ ३ १ २

स न इन्द्रः शिवः सखाऽश्वावद्गोमद्यवमत् ।

३ १ २

उरुधारेव दोहत ॥ ३ ॥ [४] (१४५०)

पदपाठः-सः १ । नः ४ । इन्द्रः, शिवः, सखा १ । अश्वावत्, गोमत्, यवमत् २ । उरुधारा १ । इव अ० । दोहते क्रि० ॥

अन्वितपदार्थः-(सः) पूर्वमन्त्रोक्तः (शिवः) सुखस्वरूपोऽतएव सुखप्रदश्च (सखा) यष्टृयष्टव्यसंबन्धेन सुहृत् (इन्दुः) एतन्नामकोवायुभेदोदेवः (नः) अस्मभ्यम् (अश्वावत्) अश्वेन, प्राणेन वा युक्तं (गोमत्) इन्द्रियैः, पयस्विनीभिर्वा युक्तं (यवमत्) यवोपलक्षितैर्धान्यैश्च युक्तं धनम् (बहुधारा) बहुक्षीरदात्री गौः (इव) यथा दोग्धि तथा (दोहते) प्रपूरयति ॥ मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८ । २ । ९ इत्यत्राऽयवादिभ्यः इति विशेषणात् यवमत् इत्यत्र न वत्वम् ॥ ऋग्वेदे ८ । ९३ । ३ ऽपि ॥ ३ ॥

इतित्रयोदशाऽध्याये द्वितीयः खण्डः ॥ २ ॥

" उक्थो विषुवान् " अथ " महादिवाकीर्त्यं पृष्ठम् "

इतिविवरणकृत् ॥

भाषार्थः-(सः) वह (शिवः) सुखस्वरूप और सुखदायक (सखा) याज्ञिक और यजनीय संबन्ध से मित्र (इन्द्रः) इन्द्रनामक वायुविशेष (नः) हमारे लिये (अश्वावत) अश्वों या प्राणों से युक्त (गोमत्) गौ वा इन्द्रियों से युक्त (यवमत्) जौ और अन्य धान्यों से युक्त धन को (बहुधारा) बहुत दुधार गौ के (इव) समान (दोहते) दुहकर पूर्ण करता है ॥ अष्टाध्यायी ८ । २ । ९ का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ८ । ९३ । ३ में भी ॥ ३ ॥

अथ-

तृतीये खण्डे प्रथमतृचस्य-बिभ्राट्सौर्यऋषिः । सूर्यो देवता । जगती छन्दः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र प्रथमा-

३ २ ३ २ ३ २उ ३१२३१२३१२

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविं-

१२ ३ १ २ ३१२ ३१२ ३१ २

हुतम्। वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्त्ति

३१ २र

बहुधा विराजति ॥१॥ (१४५१) व्याख्याता (६२८)

अथ द्वितीया-

३१ ३१र २र ३१२३१२ ३२३१२ ३१र

विभ्राड् बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्य

२र ३ १२३१ २३१२३ १२३१

मर्पितम्। अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे

२ ३१ २ ३ २

असुरहा सपत्नहा ॥ २ ॥ (१४५२)

पदपाठः-विभ्राट्, बृहत्, सुभृतम्, वाजसातमम् १। धर्मन् ७। दिवः ६। धरुणे ७। सत्यम्, अर्पितम्, अमित्रहा, वृत्रहा, दस्युहन्तमम्, ज्योतिः १। जज्ञे क्रि०। असुरहा, सपत्नहा १॥

अन्वितपदार्थः-(धर्मन्) धारके (दिवः) द्युलोकस्य (धरुणे) स्तम्भरूपे सूर्यमण्डले (अर्पितम्) निक्षिप्तं (विभ्राड्) विभ्राजमानं (बृहत्) महत् (सुभृतं) सुपुष्टं (वाजसातमं) वाजस्याऽन्नस्य वृष्ट्या दातृतमं, बलस्य वा प्राणाप्यायनेन दातृतमं (सत्यं) स्थिरम् (अमित्रहा) दुष्टजन्तुनाशकं (वृत्रहा) मेघविदारकं (दस्युहन्तमं) प्रकाशेन दस्यूनां घातकं [दस्यवो हि रात्रावन्धकारे निपतन्ति] (असुरहा) अन्धकारनाशनं (सपत्नहा) शत्रु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विजये सहायकं [सूर्योदये प्रकाशएव युद्धस्य सुकरत्वात्] (ज्योतिः) सौरं तेजः (जज्ञे) प्रादुर्भवति ॥ ऋग्वेदे १० । १७० । २ ऽपि ॥ २ ॥

भाषार्थः—(धर्मन्) धारण करने वाले (दिवः) द्युलोक के (धरुणे) धरन=स्तम्भ रूप सूर्यमण्डल में (अर्पितम्) पिरोई हुई (विभ्राड्) जाज्वल्यमान (बृहत्) बड़ी भारी (सुभृतम्) भले प्रकार पुष्ट (वाजसातमम्) अन्न वा बल की वर्षा द्वारा देने वाली (सत्यम्) स्थिर (अमित्रहा) दुष्ट जन्तुओं की नाशक (वृत्रहा) मेघ की विदारक (दस्युहन्तमम्) प्रकाश से चोरों की निवारक [जो कि चोर रात्रि को अन्धकार में पड़ते हैं] (असुरहा) अन्धकार की नाशक (सपत्नहा) दिन में युद्ध के सुगम और सुकर होने से शत्रुओं के नाश की सहायक (ज्योतिः) सूर्य की ज्योति (जज्ञे) उत्पन्न हुई है ॥ ऋ० १० । १७० । २ में भी ॥ २ ॥

अथ तृतीया-

३२उ ३ १ २ ३ १ २ ३१ २ ३ १ २ ३ १ २
इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदु-
३२ ३ २ ३ २उ ३ १ २ ३ २ ३ १ २ ३
च्यते बृहत् । विश्वभ्राड्भ्राजोमहि सूर्योदृश उरु पप्रथे
२३ २ ३ १ २
सह ओजो अच्युतम् ॥ ३ ॥ [५] (१४५३)

पदपाठः—इदम्, श्रेष्ठम् १ । ज्योतिषाम् ६ । ज्योतिः, उत्तमम्, विश्वजित्, धनजित् १ । उच्यते क्रि० । बृहत्, विश्वभ्राड्, भ्राजः, महि १ । सूर्यः १ । दृशे ४ । उरु २ । पप्रथे क्रि० । सहः, ओजः, अच्युतम् २ ॥

अन्वितपदार्थः—(इदम्) उक्तं सौरं तेजः (श्रेष्ठं) प्रशस्यतमं (विश्वजित्) सर्वस्य जगतो जेतृ (धनजित्) धनस्य जेतृ (बृहत्) महत् (विभ्राड्) विश्वस्य प्रकाशकं (महि) अतिशयितं (भ्राजः) भर्जकं (ज्योतिषाम् उत्तमं ज्योतिः उच्यते), तदिदम् (दृशे) दर्शनाय (अच्युतम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अविनाशि (सहः) सर्वस्याभिभवित्र (ओजः) बलदात्र (सूर्यः), (उरु) बहु (पप्रथे) विस्तारयति ॥ ऋग्वेदे १० । १७० । ३ ऽपि ॥ ३ ॥

भाषार्थः-(इदम्) यह (श्रेष्ठम्) प्रशंसनीय (विश्वजित्) विश्व को जीतने वाली (धनजित्) धन को जीतने वाली (बृहत्) बड़ी भारी (विश्वभ्राड्) विश्व की प्रकाशक (महि) बड़ी भारी (भ्राजः) भून देने वाली (ज्योतिषाम् उत्तमं ज्योतिः) ज्योतियों में उत्तम ज्योति (उच्यते) कहाती है सो इस (अच्युतम्) अविनाशि (सहः) सब को दबाने वाली (ओजः) बलदायक ज्योति को (दृशे) देखने के लिये (सूर्यः) सूर्य (उरु) बहुतायत से (पप्रथे) फैलाता है ॥ ऋ० १० । १७० । ३ में भी ॥ ३ ॥

अथ प्रगाथात्मकद्वितीयसूक्तस्य-शक्तिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा-

२ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २

इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा ।

१ २ ३ १ २ ३ १ २ ३ १ २

शिक्षा णो अस्मिन्पुरुहूत यामनि जीवाज्यो-

२ २

तिरशीमहि॥ १॥(१४५४)व्याख्याता(२५१)

अथ द्वितीया-

२ ३ १ २ ३ १ २ ३ २ १ २ ३ १ २

मा नो अज्ञाता वृजना दुराध्योऽ३ऽमा शिवासोऽवक्रमुः ।

१ २ ३ २ ३ २ ३ १ २ ३ १ २

त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि॥ २॥[६](१४५५)

पदपाठः- मा अ० । नः २ । अज्ञाता, वृजना १ । दुराध्यः १ । मा । अशिवासः १ । अवक्रमुः क्रि० । त्वया ३ । वयम्, प्रवतः १ । शश्वतीः, अपः २ । अति अ० । शूर सं० । तरामसि क्रि० ॥

अन्वितपदार्थः-हे (शूर) अनन्तवीर्य ! इन्द्र ! पर-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेश्वर ! (नः) अस्मान् (अज्ञाता) अज्ञातानि (वृजना) वृजनानि पापानि (मा) न (अवक्रमुः) लिम्पेयुः तथा (दुराध्यः) दुराराध्याः (अशिवासः) पापिनोमनुष्याः (मा) न प्राप्नुयुः । किन्तु (त्वया) त्वत्साहाय्येन (प्रवतः) प्रणमन्तः (वयम्) भक्ताः (शश्वतीः) बहूनि जन्ममरणादिदुःखदानि (अपः) कर्माणि (अति तरामसि) लङ्घयेम ॥ ऋग्वेदे ७ । ३२ । २७ ऽपि ॥ २ ॥

भाषार्थः-(शूर) अनन्तवीर्य ! इन्द्र ! परमेश्वर ! (नः) हम को (अज्ञाता) विना जाने (वृजना) पाप (मा) न (अवक्रमुः) लगें और (दुराध्यः) हठी दुराराध्य (अशिवासः) पापी पुरुष संगति को (मा) न मिलें किन्तु (त्वया) आप की सहायता से (प्रवतः) प्रणाम करते हुवे (वयम्) हम भक्त (शश्वतीः) निरन्तर असंख्य जन्ममरणादि दुःखदायक (अपः) कर्मों को (अति तरामसि) लांघ जावें ॥ ऋ० ७ । ३२ । २७ में भी ॥ २ ॥

अथ प्रगाथात्मकतृतीयसूक्तस्य-भर्ग ऋषिः । इन्द्रो देवता । ककुप्छन्दः ॥

तत्र प्रथमा -

३ २ ३ २ ३ २ ३ १ २ ३ १ २

अद्याऽद्या श्वः श्व इन्द्र त्रास्व परे च नः ।

१ २ ३ १ २ ३ २ ३ २ ३ १ २

विश्वा च नो जरितॄन्त्सत्पते अहा, दिवा नक्तं च रक्षिषः ॥ १ ॥ (१४५६)

पदपाठः-अद्य, अद्य, श्वः, श्वः अ० । इन्द्र सं० । त्रास्व क्रि० । परे ७ । च अ० । नः २ । विश्वा ७ । च । नः, जरितॄन् २ । सत्पते सं० । अहा ७ । दिवा, नक्तम्, च अ० । रक्षिषः क्रि० ॥

अन्वितपदार्थः-(सत्पते) हे सतांपालक ! (इन्द्र) परमेश्वर ! (नः) अस्मान् (अद्य अद्य) वर्त्तमानेऽहनि (श्वः श्वः) आगामिनि दिने (परे) परेद्युः (च) (विश्वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अहा) एवं सर्वेष्वहस्सु (त्रास्व) त्रायस्व (च) तथा च (जरितॄन्) स्तोतॄन् (नः) अस्मान् (दिवा नक्तं च) दिवसे तथा रात्रौ च (रक्षिषः) रक्षस्व ॥

मनुष्यैः प्रत्यहं प्रातरुत्थायोत्थाय वर्त्तमानाऽनागतादिसर्वकालेषु रक्षार्थं परमात्मा प्रार्थनीयः विशेषत उभयोः सन्ध्ययोरुपासनासमये नक्तंदिवरक्षाप्रार्थना विधेयेति भावः ॥ ऋग्वेदे ८ । ६१ । १७ ऽपि ॥ १ ॥

भाषार्थः-(सत्पते) हे सत्पुरुषों के रक्षक ! पालक ! (इन्द्र) परमेश्वर ! (नः) हमारी (अद्य अद्य) आज (च) और (श्वः श्वः) कल्ह २ और (परे) परले दिन, इस प्रकार (विश्वा अहा) सब दिन (त्रास्व) रक्षा करो (च) और (नः) हम (जरितॄन्) स्तोताओं की (दिवा) दिन में (च) और (नक्तम्) रात्रि में भी (रक्षिषः) रक्षा करो ॥

भाव यह है कि आज कल परसों इत्यादि सब दिन परमात्मा से रक्षा प्रार्थना करनी चाहिये क्योंकि वह सब काल में दिन रात सत्पुरुषों की रक्षा और पालन करने वाला है ॥ ऋ० ८ । ६१ । १७ में भी ॥ १ ॥

अथ द्वितीया-

३ १र २र ३१२ ३१२३ १ २ ३क२र३ २ ३१ २
प्रभङ्गी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कम् । उभा ते
३१र २र ३ १र २र ३ १ २
बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः॥२॥[७](१४५७)

पदपाठः-प्रभङ्गी, शूरः, मघवा, तुवीमघः, संमिश्लः १ । वीर्याय ४ । कम् १ । उभा १ । ते ६ । बाहू, वृषणा १ । शतक्रतो सं० । नि अ० । या १ । वज्रम् २ । मिमिक्षतुः क्रि० ॥

अन्वितपदार्थः-(शतक्रतो) हे असंख्यकर्मन् ! परमेश्वर ! (ते) तव (उभा) असंख्यत्वेऽपि वामदक्षिणभेदभिन्नौ उभौ (बाहू) भुजौ (वृषणा) कामानां वर्षकौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भवतः (या) यौ (वीर्याय) दुष्टप्राणिनिबर्हणार्थं (वज्रम्) विविधशक्तिरूपमायुधं (नि–मिमिक्षतुः) परिगृह्णीतः । स त्वम् (प्रभङ्गी) प्रकर्षेण भञ्जनः प्रलयकारकः (शूरः) विजयी (मघवा) मखवान्यज्ञवान्परोपकारी (तुवीमघः) प्रभूतधनः (संमिश्लः) सर्वव्यापकः (कम्) प्रजापतिः श० २ । ५ । २ । १३ असि ॥ अत्र " सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । सर्वस्य प्रभुमीशानं मत्वा धीरोन शोचति" इत्यादीन्युपनिषद्वाक्यानि, "विश्वतश्चक्षुरुत विश्वतो मुखोविश्वतोबाहुरुत विश्वतस्पात् । सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः" ऋ० १० । ८१ । ३ इत्यादिवेदवचनानि चानुसंधेयानि, न तु परमेश्वरस्य मूर्त्तिमत्त्वम् । " न तस्य प्रतिमा अस्ति" यजुः ३२ । ३ इत्यादि श्रुत्यन्तरात् ॥ ऋग्वेदे ८ । ६१ । १८ ऽपि ॥ २ ॥

भाषार्थः–(शतक्रतो) हे असंख्यकर्मा परमेश्वर ! विविधसृष्टिकर ! (ते) आप की (उभा) असंख्य होने पर भी बायें दहिने [अनुकूल प्रतिकूल] भेद से दो प्रकार की (बाहू) भुजायें (वृषणा) कामनाओं को वर्षानेवाली हैं । (या) जो कि (वीर्याय) दुष्टप्राणियों के निग्रहार्थ (वज्रम्) विविधशक्ति रूप आयुध को (नि–मिमिक्षतुः) धारण कर रही हैं । सो आप (प्रभङ्गी) प्रलयकाल में सर्वसंहारकारक और (शूरः) अतिविक्रमी (मघवा) परोपकार यज्ञ वाले और (तुवीमघः) अनन्तधन और (संमिश्लः) सब में रमे सर्वव्यापक (कम्) प्रजापति [शतपथ २ । ५ । २ । १३] हैं ॥

इस में संस्कृतभाष्योक्त "सर्वेन्द्रियगु०" इत्यादि उपनिषदों और " विश्वतश्चक्षुरुत" इत्यादि वेदमन्त्रों के अनुसंधान से जानना चाहिये कि परमात्मा की अनन्तशक्ति ही रूपकालङ्कार से वर्णित है, न कि उस का मूर्त्तिमत्त्व,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्योंकि "न तस्य प्रतिमा अस्ति" यजुः ३२ । ३ इत्यादि अन्य श्रुतियों ने उस की प्रतिमा का निषेध कहा है ॥ ऋ० ८ । ६१ । १८ में भी ॥ २ ॥

इति त्रयोदशाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थे खण्डे प्रथमस्यैकर्चसूक्तस्य वसिष्ठ ऋषिः । सरस्वान्देवता । गायत्री छन्दः ॥

३ २ ३ १२ ३ १ २ ३ १ २
जनीयन्तोन्वग्रवः पुत्रीयन्तः सुदानवः ।
१ २
सरस्वन्तꣳ हवामहे ॥१॥ [८] (१४५८)

पदपाठः–जनीयन्तः १ । नु अ० । अग्रवः, पुत्रीयन्तः, सुदानवः १ । सरस्वन्तम् २ । हवामहे क्रि० ॥

अन्वितपदार्थः–(जनीयन्तः) जायन्ते आस्वऽपत्यानीति जनयोजायास्ताइच्छन्तः (पुत्रीयन्तः) आत्मनः पुत्रानिच्छन्तः (सुदानवः) शोभनदानवन्तः (अग्रवः) उपगन्तारो वयम् (नु) अद्य (सरस्वन्तम्) सरतीति सरोज्ञानं तद्वन्तं सर्वज्ञं परमेश्वरं (हवामहे) आह्वयामहे ॥

"विवरणमते तु प्रगाथात्मकमेतत्सूक्तं, नत्वेकर्चम् । तथा च "उत न" इत्यग्रिमा ऋक् खल्वस्यैव सूक्तस्य द्वितीया, न तु सूक्तान्तरम्, मूलपाठदर्शनं चात्रानुकूलमिति ध्येयम्" इति सामश्रमी ॥ ऋग्वेदे ७ । ९६ । ४ ऽपि ॥ १ ॥

भाषार्थः–(जनीयन्तः) स्त्री चाहते हुवे (पुत्रीयन्तः) और पुत्र चाहते हुवे (सुदानवः) यज्ञादि परोपकार करने वाले (अग्रवः) उपासक हम (नु) आज (सरस्वन्तम्) सर्वज्ञ परमात्मा को (हवामहे) पुकारते हैं ॥

अर्थात् यज्ञादि परोपकार करने वालों को परमात्मा की यज्ञानुष्ठान-जनित कृपा से स्त्री पुत्र आदि सब ऐश्वर्य सुख भोग सम्पत्ति प्राप्त होती है ॥

सामश्रमी जी कहते हैं कि "विवरण के मत में यह १ एक ऋचा का सूक्त

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नहीं है, किन्तु दो ऋचा का प्रगाथ है। तथा च अगली "उत नः" यह ऋचा इसी सूक्त की द्वितीया ऋचा है, न कि अन्य सूक्त। और मूल पुस्तकस्थ पाठों के देखने से भी यह अनुकूल जान पड़ता है" परन्तु हमने ऊपर व्याख्या में सायणमत लेकर इस को एकर्च सूक्त कहा है॥ ऋ० १। ९६। ४ में भी॥१॥

अथ द्वितीयस्यैकर्चसूक्तस्य-भरद्वाजऋषिः। सरस्वती देवता। गायत्री छन्दः॥

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा।

१ २ ३ १ २

सरस्वती स्तोम्याऽभूत्॥ १॥ [९] (१४५१)

पदपाठः-उत अ०। नः ६। प्रिया १। प्रियासु ७। सप्तस्वसा, सुजुष्टा, सरस्वती, स्तोम्या १। भूत् क्रि०॥

अन्वितपदार्थः-यदा वयं सरस्वन्तं ज्ञानस्वरूपं सर्वज्ञं परमात्मानमाह्वयामहे तदाऽऽह्वानार्थं (उत) अपि च (नः) अस्माकं (प्रियासु) प्रीतिभाक्षु (प्रिया) प्रियतमा (सप्तस्वसा) गायत्र्यादयः सप्त छन्दोजातयः स्वसारो यस्याः सा (सुजुष्टा) सुष्ठु अभ्यासेन सेविता (स्तोम्या) स्तोतव्या प्रशंसनीया (सरस्वती) वाक् [निघं० १। ११] (भूत्) भवतु॥

परमात्मनः स्तुत्यर्थं प्रशंसनीया प्रियतमा मधुरा सुसेविता गायत्रीप्रभृतिच्छन्दोमयी वाक् भवतु न इति भावः॥ ऋग्वेदे ६। ६१। ११ ऽपि॥ १॥

भाषार्थः-(उत) और पूर्वोक्त सर्वज्ञ परमात्मा की स्तुति के लिये (नः) हमारी (प्रियासु) प्यारियों में (प्रिया) अतिप्यारी मधुरस्वरयुक्ता (सप्त स्वसा) गायत्री आदि सात ७ छन्दोजातिरूप बहनों वाली (सुजुष्टा) भले प्रकार अभ्यास से सेवित (स्तोम्या) प्रशंसनीय (सरस्वती) वाणी [निघं० १। ११] (भूत्) होवे॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थात् जब हम वेदसूक्तों से परमात्मा की स्तुति प्रार्थना करें तो हमारी वाणी अतिप्रिय मधुर गायत्री आदि सात ७ छन्दों में विभक्त अच्छे प्रकार अभ्यस्त और प्रशंसनीय हो ॥ ऋ० ६ । ६१ । ११ में भी ॥ १ ॥

अथ तृतीयस्यैकर्चसूक्तस्य-विश्वामित्र ऋषिः । सविता देवता । गायत्री छन्दः ॥

१ २ ३ १र २र ३ १ २ ३ १ २
तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि ।
२ ३ १ २ ३ १ २
धियोयोनः प्रचोदयात् ॥१॥ [१०] (१४६०)

पदपाठः-तत् २ । सवितुः ६ । वरेण्यम् २ । भर्गः २ । देवस्य ६ । धीमहि क्रि० । धियः २ । यः १ । नः ६ । प्रचोदयात् क्रि० ॥

अन्वितपदार्थः-वयमुपासकाः तस्य (सवितुः) सर्वपितुः (देवस्य) प्रकाशमानस्य देवस्य (तत्) अनिर्वचनीयं (वरेण्यम्) वरणीयं (भर्गः) तेजः (धीमहि) ध्यायामः (यः) सविता देवः (नः) अस्माकं (धियः) बुद्धीः (प्रचोदयात्) प्रेरयेत् ॥

यः सविता देवः परमेश्वरोऽस्माकं धर्मादिविषया बुद्धीः प्रेरयेत् तस्य सवितुः सर्वपितुरीश्वरस्य वरेण्यं सत्स्वरूपतया ज्ञेयतया च भजनीयं अविद्यातत्कार्याणां भर्जकत्वाद्भर्गो ज्योतिर्मयं स्वरूपं ध्यायामः ॥

यद्वा-यः सविता सूर्यदेवोद्द्योतमानोऽस्माकं धियः कर्माणि बुद्धीर्वा प्रकाशेन प्रेरयति तस्य वरेण्यं भजनीयं सेवनीयं ज्योतिरातपं भर्गः सर्वस्य मालिन्यस्य भर्जकं शोधकं वयं धीमहि धारयेम ॥ सूर्यज्योतिःसेवनाद् दुर्गन्धादिजनितसर्वदुःखदायकजन्त्वादिनिवृत्तिरतः सर्वैः सेवनीयं तत् इति भावः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथवा भर्गः शब्देनाऽन्नमुच्यते । सूर्यादेवोषधिवनस्पतयो जायन्ते ताभ्योऽन्नम् । " भर्गोदेवस्य कवयोऽन्नमाहुः " इति सायणाचार्योद्धृतः पाठ आथर्वणिकानाम् ॥

इमानेवार्थान्सायणाचार्योव्याचख्यौ ॥ भर्ग इत्यत्र–भ्रस्जोपाके (तु० उ०) इत्यस्मात् सर्वधातुभ्योऽसुन् । उणा० ४ । १८९ इत्यनुवर्त्त्य, अञ्जिव्यञ्जिमृजिभृजिभ्यः कुत्वञ्च । उणा० ४ । २१६ इति असुनि कुत्वे, भ्रस्जोरोपधयोरमन्यतरस्याम् ६ । ४ । ४७ इति रमागमः ॥ सायणाचार्येण च न्यङ्क्वादित्वात्कुत्वमिति (उणादिसूत्रं विस्मृत्य) उक्तम् ॥ धीमहि इत्यत्र ध्यायतेर्लटि–बहुलं छन्दसि ६ । १ । ३४ इति संप्रसारणं,व्यत्ययेनाऽस्मनेपदम् । यद्वा–धीङ् आधारे (दि० आ०) लिटि–बहुलं छन्दसि २ । ४ । ७३ इति विकरणस्य लुक् ॥ प्रचोदयात् इत्यत्र लेटिआडाऽऽगमः ॥ ऋग्वेदे ३ । ६२ । १० ऽपि ॥

अत्राऽपि सूक्तसंख्यायां मतान्तरम्।यथाह सामश्रमी– " विवरणमते संहितादिसमस्तमूलग्रन्थलिपिदर्शनाच्चैतत् तृचं सूक्तम्, एवं चाग्निमे " सोमानं स्वरणम् " इति, अग्न आयूंषि " इति च द्वे ऋचावस्यैव द्वितीयतृतीये, न तु सूक्तान्तरमिति विवेकः " इति ॥ १ ॥

भाषार्थः–हम उपासक लोग उस (सवितुः) सर्वोत्पादक सर्वपिता (देवस्य) प्रकाशमान ज्योतिःस्वरूप परमेश्वर के (तत्) उस अनिर्वचनीय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(वरेण्यम्) वरणीय भजनीय (भर्गः) तेजका (धीमहि) ध्यान करते हैं (यः) जो परमेश्वर (नः) हमारी (धियः) बुद्धियों को (प्रचोदयात्) अत्यन्त प्रेरित करे ॥

अर्थात् जो सर्वजगदुत्पादक सर्वपिता सविता देव ज्योतिःस्वरूप परमात्मा हमारी धर्मादिविषयक बुद्धियों को भले प्रकार प्रेरित करे उस जगदीश्वर के भजनीय और भर्गः=अविद्यादि दुःखदायक विघ्नों के भूनडालने वाले ज्ञानस्वरूप का हम ध्यान करते हैं ॥

अथवा (यः) जो सूर्य (नः) हमारी (धियः) बुद्धियों को (प्रचोदयात्) प्रेरित करता है उस (सवितुः) ओषधि वनस्पत्यादि सब प्राणी जगत् की उत्पत्ति के निमित्तभूत (देवस्य) प्रकाशमान सूर्य के (तत्) उस अनिर्वचनीय इयत्ता से जानने में न आने वाले (वरेण्यम्) सेवनीय (भर्गः) दुर्गन्धादिजनित दुष्ट जन्तु रोगकारकों के भून डालने वाले [धूप] को हम (धीमहि) धारण करते हैं॥

सूर्य की धूप के सेवन से दुर्गन्धादि दोष दूर होकर नैरोग्यादि की वृद्धि होती है और उस की धूप तथा प्रकाश से निद्रा आलस्यादि तमोगुण के कार्यों का नाश होकर मनुष्यों की बुद्धियें फुरती हैं। हम को यह सब जान कर सूर्य की धूप का विधिवत् सेवन करके उपकार ग्रहण करना चाहिये ॥

यद्वा—भर्गः शब्द से अन्न का ग्रहण जानिये। सूर्यद्वारा वर्षा और यवगोधूमादि ओषधि और वट पिप्पलादि वनस्पति उगते हैं जिन से अन्न होता है। इस लिये भी सूर्यजनित अन्न का विधिपूर्वक धारण सेवन करना इस मन्त्र का उपदेश है। सायणाचार्य ने भर्गः पद से अन्न अर्थ लेने में एक आथर्वणिकों का मत उद्धृत किया है जो हमने ऊपर संस्कृत भाष्य में लिख दिया है ॥

ये ही तीनों अर्थ सायणाचार्य ने भी किये हैं। भर्गः, धीमहि और प्रचोदयात् पदों की सिद्धि में अष्टाध्यायी ६। ४। ४७, ६। १। ३४, २। ४। ७३ और उणादि ४। १८९, ४। २१६ के प्रमाण संस्कृत भाष्य में देखिये ॥

इस में भी सूक्तसंख्या में मतभेद है। सत्यव्रतसामश्रमी जी कहते हैं कि "विवरण के मत और समस्त मूलसंहिताग्रन्थों के देखने से ज्ञात होता है कि यह तीन ऋचा का सूक्त है। तथा च—इस से अगली "सोमानं स्व०" और "अग्न आयूंषि०" ये दो ऋचायें इसी सूक्त की दूसरी और तीसरी ऋचा जाननी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चाहियें, न कि अलग अन्य सूक्त। यह विवेक है। * इसने जो ऊपर इस को एकर्चसूक्त लिखा है सो सायणाचार्य का मत है ॥ ऋ० ३। ६१। १० में श्री॥१॥

अथैकर्चस्य चतुर्थसूक्तस्य-मेधातिथिर्ऋषिः। (इन्द्राऽपरनामा) ब्रह्मणस्पतिर्देवता। गायत्री छन्दः ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १
सोमानाꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य
२ ३ २
औशिजः ॥१॥ [११] (१४६१) व्याख्याता (१३९)

अथैकर्चस्य पञ्चनसूक्तस्य-वैखानस ऋषिः। अग्निर्देवता। गायत्री छन्दः ॥

२ ३ १ २ ३ २ ३ २ ३ १ २
अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः ।
३ १ २ ३ १ २
आ रे बाधस्व दुच्छुनाम् ॥१॥ [१२] (१४६२)
व्याख्याता (६२७)

अथ तृचस्य षष्ठसूक्तस्य-यजत ऋषिः। मित्रावरुणौ देवते। गायत्री छन्दः ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ २ ३ २ १ २
ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
१ २ ३ २ ३ १ २
महि वां क्षत्रं देवेषु ॥ १ ॥ (१४६३)
व्याख्याता (११४३)

अथ द्वितीया-

३ २ ३ २ ३ १ २ ३ १ २ २
ऋतमृतेन सपन्तोपिरं दक्षमाशाते ।
३ १ २ ३ १ २
अद्रुहा देवौ वर्धते ॥ २ ॥ (१४६४)

पदपाठः-ऋतम् २। ऋतेन ३। सपन्ता १। इषिरम्, दक्षम् २। आशाते क्रि०। अद्रुहा, देवौ १। वर्धते क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(ऋतेन) उदकेन साधनेन (ऋतं) यज्ञं (सपन्ता) स्पृशन्तौ (इषिरम्) एषणवन्तमिष्यमाणं (दक्षं) बलम् (आशाते) प्राप्नुतः (अद्रुहा) अद्रोग्धारौ द्रोहरहितौ हितकरौ (देवौ) दिव्यौ मित्रावरुणौ प्राणाऽपानौ (वर्धते) ॥ ऋग्वेदे ५ । ६८ । ४ ऽपि ॥ २ ॥

भाषार्थः-(ऋतेन) जल से (ऋतम्) यज्ञ को (सपन्ता) स्पर्श करते हुये (इषिरम्) मनचाहे (दक्षम्) बल को (आशाते) प्राप्त होते और (अद्रुहा) द्रोहरहित (देवौ) दिव्य प्राण और अपान (वर्धते) बढ़ते हैं ॥ ऋ० ५ । ६८ । ४ में भी ॥ २ ॥

अथ तृतीया-

३ १ २ ३क २र ३२उ ३ १ २
वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः ।
३ २ ३ १ २
बृहन्तं गर्त्तमाशाते ॥ ३ ॥ [१३] (१४६५)

पदपाठः-वृष्टिद्यावा, रीत्यापा १ । इषः ६ । पती १ । दानुमत्याः ६ । बृहन्तम्, गर्त्तम् २ । आशाते क्रि० ॥

अन्वितपदार्थः-(वृष्टिद्यावा) वृष्टिर्वर्षिका द्यौरन्तरिक्षं याभ्यां तौ (रीत्यापा) री गतिरेषणयोः [क्र्या० प०] रीतिः प्राप्तिरपां याभ्यां तौ (दानुमत्याः) दातुमुचितायाः (इषः) यवादेः (पती) स्वामिनौ वृष्ट्याऽन्नस्य पोषकौ (बृहन्तं गर्त्तम्) ब्रह्माण्डम् (आशाते) व्याप्नुतः ॥ ऋग्वेदे ५ । ६८ । । ५ ऽपि ॥ ३ ॥

भाषार्थः-(वृष्टिद्यावा) जिन से द्युलोक वर्षा करने वाला होता है ऐसे (रीत्यापा) जिन से जलों की प्राप्ति होती है वे दोनों (दानुमत्याः इषः) देने योग्य अन्न के (पती) पालन करने वाले दोनों प्राण और अपान

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(बृहन्तं गर्त्तम्) बड़े गर्त्त=ब्रह्माण्ड को (आशाते) व्याप रहे हैं ॥ ऋ० ५ । ६८ । ५ में भी ॥ ३ ॥

अथ सप्तमस्य तृचसूक्तस्य—मधुच्छन्दा ऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ १ २ ३ १ २ ३ १ र २ र ३ १ २ ३ १ २
युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
१ २ ३ २ ३ २
रोचन्ते रोचना दिवि ॥ १ ॥ (१४६५)

पदपाठः—युञ्जन्ति क्रि० । ब्रध्नम्, अरुषम्, चरन्तम् २ । परि अ० । तस्थुषः १ । रोचन्ते क्रि० । रोचनाः १ । दिवि ७ ॥

अन्वितपदार्थः—(परि) समन्तात् (तस्थुषः) तिष्ठन्तः (रोचनाः) प्रकाशमाना नक्षत्रादयोलोकाः (ब्रध्नम्) आदित्यम् (अरुषम्) अग्निम् (चरन्तम्) वायुं च (युञ्जन्ति) आत्मनि युञ्जते, ततः (दिवि) अन्तरिक्षे (रोचन्ते) प्रकाशन्ते ॥

इन्द्रोहि परमैश्वर्यवान्, परमैश्वर्यं चाऽग्निवायुसूर्यरूपेणाऽस्थानात्। अतएवाऽत्र—ब्रध्नाऽरुश्चरच्छब्दैरादित्यपावकपवमाना गृह्यन्ते। सायणाचार्यश्चाह—" अस्य मन्त्रस्योक्तार्थपरं ब्राह्मणान्तरे व्याख्यानम्—'युञ्जन्ति ब्रध्नमित्याह—असौ वाआदित्योब्रध्नःआदित्यमेवास्मै युनक्ति । अरुषमित्याह—अग्निर्वा अरुषः अग्निमेवास्मै युनक्ति । चरन्तमित्याह—वायुर्वै चरन्वायुमेवास्मै युनक्ति । परितस्थुषइत्याह—इमे वै लोकाः परितस्थुष इमानेवास्मै लोकान्युनक्ति। रोचन्ते रोचना दिवीत्याह—नक्षत्राण्येवास्मै रोचयतीति' इति" ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सूर्यस्य परितोवर्त्तमानाः पृथिवीचन्द्रमःप्रभृतयो लोकास्तत्तेजसा प्रकाशन्ते इति भावः। तथैव च यजुर्वेदे २३। ५ आगतायामस्यामृचि महीधरभाष्येऽपि "रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि ब्रध्नस्य भासा रोचन्ते। 'तेजसां गोलकः सूर्यो नक्षत्राण्यम्बुगोलकाः' इति ज्योतिःशास्त्रोक्तेः" इति ॥ ऋग्वेदे १। ६। १ ऽपि ॥ १ ॥

भाषार्थः-(परि) चारों ओर (तस्थुषः) स्थित (रोचनाः) प्रकाशमान लोक लोकान्तर (ब्रध्नम्) सूर्य और (अरुषम्) सूर्याश्रित अग्नि तथा (चरन्तम्) अग्न्याश्रित चलने वाले वायु को (युञ्जन्ति) आपे में जोड़ते हैं, तब (दिवि) अन्तरिक्ष में (रोचन्ते) प्रकाशते हैं ॥

इन्द्र का इन्द्रत्व परमैश्वर्य के योग से है और सूर्य अग्नि वायु रूप से अवस्थान परमैश्वर्य है। इसलिये यहां इन्द्र की ही प्रशंसा है क्योंकि इन्द्र ही इस ऋचा का देवता है। इस लिये यहां ब्रध्न शब्द से सूर्य, अरुष् से अग्नि और चरन् से वायु का ग्रहण है। तथाच सायणाचार्य ने भी लिखा है कि "उक्तार्थपरक ही इस मन्त्र का व्याख्यान ब्राह्मणान्तर में भी है कि-'युञ्जन्ति ब्रध्नम्० से सूर्य को, अरुषम्० से अग्नि को, और चरन्तम्० से वायु को युक्त करना तात्पर्य है, परितस्थुषः-से इन गगनमण्डल में दृश्यमान लोकलोकान्तरों का तात्पर्य है। रोचन्ते रोचना दिवि-से नक्षत्रों के प्रकाशन का तात्पर्य है'॥

भाव यह हुवा कि सूर्य के चारों ओर वर्त्तमान पृथिवी चन्द्रमा आदि लोक लोकान्तर सूर्य के तेज से चमकते हैं। ऐसा ही मन्त्र यजुर्वेद अ० २३ में ५वां है, उस का भाष्य करते हुवे महीधर ने भी लिखा है कि " प्रकाशित चन्द्र ग्रह तारा आदि सूर्य के तेज से चमकते हैं " फिर महीधर अपने कथन की पुष्टि में कहते हैं कि ज्योतिःशास्त्र में भी कहा है कि " तेजों का गोला सूर्य है और अन्य नक्षत्रादि अम्बुगोलक हैं,"[स्वयं प्रकाश नहीं है] ॥ ऋ० १। ६। १ में भी ॥ १ ॥ अथ द्वितीया-

३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे।
१ २ ३ २ ३ १ २
शोणा धृष्णू नृवाहसा ॥ २ ॥ (१४६६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-युञ्जन्ति क्रि० । अस्य ६ । काम्या, हरी, विपक्षसा २ । रथे ७। शोणा, धृष्णू, नृवाहसा २ ॥

अन्वितपदार्थः-(अस्य) इन्द्रस्य सूर्यस्य अग्नितत्कार्येषु तत्तद्रूपं प्राप्तस्य (रथे) रमणीये गोले वर्त्तमानौ (काम्या) कामयितव्यौ (विपक्षसा) विविधानि सप्तवर्णानि पक्षांसि पार्श्वरूपाणि ययोस्तौ (शोणा) तथापि रक्तौ प्रतीयमानौ (धृष्णू) सर्वस्य धर्षकौ असह्यौ (नृवाहसा) नृणां तदुपलक्षितानां प्राणिनां च वोढारौ [धारकत्वात्] (हरी) हरणशीलौ [शोषकत्वात्] समीचीनतिरश्चीन भेदभिन्नौ किरणौ (युञ्जन्ति) परितोवर्त्तमानाः पृथिव्यादय आत्मनि योजयन्ति ॥ ऋग्वेदे १ । ६ । २ऽपि, यजुर्वेदे २३ । ६ चापि ॥ २ ॥

भाषार्थः-(अस्य) इस [अग्नि और उस के कार्य पदार्थों में उस उस रूप को प्राप्त] सूर्य के (रथे) रमणीय गोले में वर्त्तमान (काम्या) कामना करने योग्य (विपक्षसा) विविध ७ रंगे पार्श्व जिन में हैं, तौ भी (शोणा) रक्तवर्ण प्रतीत होने वाले (धृष्णू) न सहारे जाने वाले (नृवाहसा) मनुष्यादि प्राणियों के धारक होकर वहने वाले (हरी) शोषक होने से हरण करने वाले सीधे तिरछे दो प्रकार के किरणों को (युञ्जन्ति) पृथिव्यादि लोक जो सूर्य के चारों ओर वर्त्तमान हैं, अपने में युक्त करते हैं ॥ ऋ० १ । ६ । २ और यजुः २३ । ६ में भी ॥ २ ॥

अथ तृतीया-

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
केतुं कृण्वन्नकेतवे पेशोमर्या अपेशसे ।
२ ३ १ २
समुषद्भिरजायथाः ॥३॥ [१४] (१४६७)

पदपाठः-केतुम् २ । कृण्वन् १ । अकेतवे ४ । पेशः २ । मर्याः सं० । अपेशसे ४ । सम् अ० । उषद्भिः ३ । अजायथाः क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-हे (मर्याः) मनुष्याः ! अयं सूर्यः (अकेतवे) रात्रिसमये प्रज्ञानरहिताय प्राणिवर्गाय (केतुम्) प्रज्ञानं, तथा (अपेशसे) अरूपाय पदार्थजाताय (पेशः) रूपं (कृण्वन्) कुर्वन् (उषद्भिः) दाहकैरश्मिभिः (सम् अजायथाः) उत्पद्यते प्रादुर्भवति ॥

केतुरिति प्रज्ञानाम निघं० ३ । ९ पेश इति रूपनाम ३ । ७ सूर्येणैव प्रज्ञोद्बोधः प्राणिनां भवति, सूर्येणैव तत्तद्रूपवद्वस्तुषु रूपवत्त्वं, स एव यदा प्रातरुदेति तदा तत्तत्पदार्थानां रूपं भावयति ॥ ऋग्वेदे १ । ६ । ३ ऽपि, यजुर्वेदे २९ । ३७ ऽपि च ॥ ३ ॥

भाषार्थः-(मर्याः) हे मनुष्यो ! (अकेतवे) प्रज्ञानरहित रात्रि में सोये हुवे प्राणिवर्ग के लिये (केतुम्) प्रज्ञान (कृण्वन्) करता हुवा और (अपेशसे) रूपरहित पदार्थ के लिये (पेशः) रूप करता हुवा यह सूर्य (उषद्भिः) दाहक किरणों से (सम् अजायथाः) उदय होता है ॥

निघण्टु ३ । ७ व ९ के प्रमाण संस्कृत भाष्य में देखिये । सूर्य से ही प्रज्ञा का उद्बोधन होता है और सूर्य से ही उस उस पदार्थ का रूपवान्पना है, सूर्य ही जब प्रातः उदय होता है तब प्रत्येक पदार्थ के रूप की भावना कराता है । वास्तव में सब रूप रङ्गों की उत्पत्ति ही सूर्य से है । यह मन्त्र में परमात्मा का मनुष्यों के प्रति उपदेश है ॥ ऋ० १ । ६ । ३ और यजुः २९ । ३७ में भी ॥ ३ ॥

इति त्रयोदशाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ

पञ्चमे खण्डे प्रथमतृचस्य-उशनाऋषिः । सोमोदेवता । १-सतः पङ्क्तिः, २-विराट्त्रिष्टुप्, ३-निचृत् त्रिष्टुप् च छन्दः ॥ तत्र प्रथमा-

३ १ २ २ ३ १ २ ३ १ २ ३ १ २

अयꣳ सोम इन्द्र तुभ्यꣳ सुन्वे, तुभ्यं पवते त्वमस्य पाहि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १ २३१र २र३२उ ३ १२३ १२३ १२
त्वꣳ ह यं चकृषे त्वं ववृष, इन्दुं मदाय युज्याय सोमम् ॥
॥ १ ॥ (१४६८)

पदपाठः-अयम्, सोमः १ । इन्द्र सं० । तुभ्यम् ४ । सुन्वे क्रि० । तुभ्यम् । पवते क्रि० । त्वम् १ । अस्य ६ । पाहि क्रि० । त्वम् । ह अ० । यम् २ । चकृषे क्रि० । त्वम् । ववृषे क्रि० । इन्दुम् २ । मदाय, युज्याय ४ । सोमम् २ ॥

अन्वितपदार्थः-(इन्द्र) हे इन्द्र ! (अयं सोमः) एषओषधिराजः (तुभ्यम्) त्वदर्थं (सुन्वे) अभिषूयते (तुभ्यं) त्वदर्थं (पवते) पूयते (त्वम्) (अस्य) सोमस्य (पाहि) रक्षां पानं वा कुरु (त्वम्) (ह) प्रसिद्धौ (यम्) सोमं (चकृषे) करोष्युत्पादयसि (त्वम्) (मदाय) हर्षाय (युज्याय) सहायाय तम् (इन्दुम्) आर्द्रं (सोमम्) (ववृषे) वृणुहि ॥

अत्रेन्द्रपदेन "इन्द्रानिलयमार्काणाम्०" इत्यादिमनुप्रोक्तरीत्या राजाऽपि ग्राह्यः ॥ ऋग्वेदे ९ । ८८ । १ ऽपि ॥१॥

भाषार्थः-(इन्द्र) हे राजन् ! वा सूर्य ! (अयम्) यह (सोमः) सोम (तुभ्यम्) तेरे लिये (सुन्वे) अभिषुत किया जाता है (तुभ्यम्) तेरे लिये (पवते) शोधा जाता है (त्वम्) तू (अस्य) इस सोम की (पाहि) रक्षा वा पान कर (त्वम्) तू (ह) प्रसिद्ध (यम्) जिस सोम को (चकृषे) उत्पन्न करता है (त्वम्) तू (मदाय) हर्ष और (युज्याय) सहाय के लिये उस (इन्दुम्) गीले (सोमम्) सोम को (ववृषे) अङ्गीकृत कर ॥

" इन्द्रानिलयमार्काणाम्० " इत्यादि मनुप्रोक्त रीति से यहां इन्द्र पद से राजा का भी ग्रहण है ॥ ऋ० ९ । ८८ । १ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

२ ३ २३१ २३१२ ३२ ३१२ ३२३ १२
स ईं रथो न भूरिषाडयोजि, महः पुरूणि सातये वसूनि ।
२३ २ ३क २र ३१ २ ३१२ ३१ २
आदीं विश्वा नहुष्याणि जाता, स्वर्षाता वन ऊर्ध्वा नवन्त ॥
॥ २ ॥ (११६९)

पदपाठः–सः १ । ईम् अ० । रथः १ । न अ० । भूरिषाट् १ । अयोजि क्रि० । महः १ । पुरूणि २ । सातये ४ । वसूनि २ । आत्, ईम् अ० । विश्वा, नहुष्याणि, जाता, स्वर्षाता २ । वने ७ । ऊर्ध्वा २ । नवन्त क्रि० ॥

अन्वितपदार्थः–(महः) महान् (सः ईम्) स एव सोमः (भूरिषाट्) भूरिभारस्य सोढा क्षतस्य च सोढा (रथः न) रथइव (वने) युद्धस्थले (अयोजि) युज्यते प्रयुज्यते सेव्यते । किमर्थम् ? (पुरूणि) बहूनि युद्धलभ्यानि (वसूनि) धनानि (सातये) दातुम् । (आत् ईम्) अनन्तरम् (विश्वा) सर्वाणि (नहुष्याणि) मानुषाणि (जाता) उत्पन्नानि (ऊर्ध्वा) उच्चानि (स्वर्षाता) स्वर्षा-न्तानि क्षात्रधर्मोचितयुद्धलभ्यस्वर्गप्रदानि युद्धानि (नवन्त) संगच्छन्ते ॥

पूर्वमन्त्रे राजानं प्रति सोमोत्पादनरक्षणाऽभिषवण पानोपदेशः, अत्र च तत्प्रयोजनं वर्णितम् । यतः सोमः साहनशक्तिप्रदोऽतो युद्धस्थले राजपुरुषैर्योद्धृभिः स सेवनीयः । येन स्वर्गप्रदक्षात्रधर्मोचितयुद्धे धनानि लभ्येरन् संग्रामाश्च संगताः सार्थकाः स्युरिति भावः ॥ नहुष इति मनु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्याणां नाम निघं० २ । ३ ॥ स्वर्षाता इति संग्रामनामेति सायणाचार्योऽपि ॥ नवतिर्गतिकर्मा निघं० २ । १४ ॥ ऋग्वेदे ९ । ८८ । २ ऽपि ॥ २ ॥

भाषार्थः—(महः) महान् (रथः) रथ (न) सा रक्षक (सः) वह (ईम्) ही सोम (वने) संग्रामस्थल [मैदान] में (भूरिषाट्) बहुत सहन शक्तिदायक है, अतः (अयोजि) प्रयुक्त=सेवित किया जाता है । किस लिये ? उत्तर-(पुरूणि) बहुत (वसूनि) युद्धलभ्य धनों को (सातये) देने के लिये । (आत् , ईम्) अनन्तर (विश्वा) सब (मनुष्याणि) मानुष (जाता) उत्पन्न हुवे (ऊर्ध्वा) ऊंचे=भारी (स्वर्षाता) क्षात्रधर्मोचित युद्ध करने वाले योद्धाओं को स्वर्गप्रद संग्राम (नवन्त) संगत होते हैं ॥

पूर्व मन्त्र में राजा को सोम का उत्पादन, रक्षा, अभिषव और पान का उपदेश था, इस मन्त्र में उस का प्रयोजन वा फल कहा है कि सोम, संग्राम में एक बड़े भारी रथ के समान रक्षक है, उस के प्रयोग (सेवन) से चोट के सहन की शक्ति बढती है, जिस से संग्रामों में विजयपूर्वक बहुत धनों की प्राप्ति होती है और मनुष्यों के सब उत्पन्न हुवे संग्राम, जो क्षात्रधर्मानुसार हों तो स्वर्गदायक हैं, संगत=सार्थक होते हैं ॥

निघण्टु २ । ३, २ । १४ के प्रमाण और सायणाचार्य का संमतत्व संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ८८ । २ में भी ॥२ ॥

अथ तृतीया-

३ २उ ३ १र २र ३ १ २ ३ २उ ३ २

शुष्मी शर्धोन मारुतं पवस्वा, ऽनभिशस्ता दिव्या यथा विट् ।

२ ३२ ३१ २३१२ ३१२ ३ २उ ३ २

आपोन मक्षु सुमतिर्भवा नः, सहस्राप्साः पृतनाषाड् न यज्ञः ॥

॥ ३ ॥ [१५] (१४७०)

पदपाठः—शुष्मी १ । शर्धः १ । न अ० । मारुतम् १ । पवस्व क्रि० । अनभिशस्ता, दिव्या १ । यथा अ० । विट् १ । आपः १ । न । मक्षु अ० । सुमतिः १ । भव क्रि० । नः ४ । सहस्राप्साः, पृतनाषाड् १ । न । यज्ञः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(शुष्मी) बलवान्सोमः (मारुतं शर्धः न) मरुतां बलमिव (पवस्व) शुद्धिं कुर्यात् (यथा) येन प्रकारेण (दिव्या विट्) मरुद्गणः ["मरुतो वै देवानां विशः इति हि ब्राह्मणम्" इति सायणः] (अनभिशस्ता) अनिन्द्यः प्रशस्तः स्यात्, (आपः) जलानि (न) इव (नः) अस्मभ्यं (मक्षु) शीघ्रं (सुमतिः) शान्तप्रज्ञा-तत्त्ववान् (भव) एधि अस्तु, (सहस्राप्साः) बहुरूपः (पृतनाषाड्) सेनासु सहनशक्तिप्रदः (न) यथा (यज्ञः) अध्वर उपकारकोभवति तथा सोमोऽपि स्यात् ॥

सोमसेविनोबलवन्तोबुद्धिमन्तश्च जायन्तेऽतः सोमस्य शुष्मित्वं=बलवत्त्वं सुमतित्वं चोक्तम् । यथा जलेन शान्तिः प्राप्यते तथा तद्दृष्टान्तेन सोमे शान्तिरप्युक्ता । यथा चानुऽष्ठितोदेवयज्ञोविविधरूपैः सुखप्रदोभवति तथा सेवि-तोहुतश्च सोमोऽपि सर्वसुखप्रद इति यज्ञोपमोक्ता । विशेषतः क्षात्रधर्मोपयोगित्वात्सोमस्य पृतनाषाड् इति विशेषणं युक्तमेव ॥ ऋग्वेदे ९ । ८८ । ७ ऽपि ॥ ३ ॥

भाषार्थ-:(शुष्मी) बलवान् सोम (मारुतं शर्धः न) वायुओं के बल= वेग के समान (पवस्व) शुद्धि करे (यथा) जिस से (दिव्या विट्) देवतों के वैश्य=मरुद्गण [सायणाचार्य कहते हैं कि " मरुत् देवों के वैश्य हैं " यह ब्राह्मण में लिखा है] (अनभिशस्ता) उत्तम अनिन्द्य प्रशस्त हो, (आपः न) जलों के समान (नः) हमारे लिये (मक्षु) शीघ्र (सुमतिः) सुन्दर बुद्धि तत्त्ववाला (भव) हो, (सहस्राप्साः) बहुतरूपों वाला (पृतनाषाड्) सेनाओं में सहनशक्ति का देने वाला (न) जैसे (यज्ञः) यज्ञ अनेक प्रकार से उपकारक है, वैसे अनेक प्रकार का उपकार करने वाला सोम भी हो ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोम का सेवन करने वाले बलवान् हो जाते हैं इस से सोम का विशेषण (शुष्मी) बलवान् रक्खा है, सोमसेवी लोग बुद्धिमान् भी हो जाते हैं अतः उस को (सुमतिः) उत्तमबुद्धिमान् कहा है। जैसे जल से शीघ्र शान्ति प्राप्त होती है वैसे सोम को भी शान्तिदायक कहने के लिये जल का दृष्टान्त उपयोगी है। और जैसे अनुष्ठान किया हुआ यज्ञ अनेक प्रकार उपकारक है, वैसे ही सेवन और होम किया हुआ सोम भी अनेकरूप से उपकारक होता है। इस से यज्ञ की उपमा कही गई। विशेषकर क्षात्रधर्म का उपयोगी होने से सोम को (पृतनाषाड्) सेना की उपयुक्त सहनशक्ति का दाता बताया गया है ॥ सायणाचार्योद्धृत ब्राह्मण का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ९ । ८८ । ७ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य—भरद्वाजऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ २ ३ २ ३ १ २ ३ २
त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः ।
३ २ ३ १ २ ३ १ २
देवेभिर्मानुषे जने ॥१॥ (१४७१) व्याख्याता (२)

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ १ २ ३ २
स नोमन्द्राभिरध्वरे जिह्वाभिर्यजा महः ।
१ २ १ २ ३ १ २
आ देवान्वक्षि यक्षि च ॥ २ ॥ (१४७२)

पदपाठः—सः १ । नः ६ । मन्द्राभिः ३ । अध्वरे ७ । जिह्वाभिः ३ । यज क्रि० । महः २ । आ अ० । देवान् २ । वक्षि, यक्षि क्रि० । च अ० ॥

अन्वितपदार्थः—(सः) अग्निः (नः) अस्माकम् (अध्वरे) यज्ञे (मन्द्राभिः) हव्यसंसर्गयुक्तत्वान्मदकरीभिः (जिह्वाभिः) ज्वालाभिः (महः) महतः (देवान्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वाय्वादीन् (यज) यजतु। यतः स एव देवान् (आवक्षि) आवहति (यक्षि) यजति (च) ॥

केचिदऽत्र अग्नेर्ज्वालानां सप्तधा विभागमामनन्ति। यथा सूर्यकिरणाः सप्तवर्णत्वात्सप्तोच्यन्ते, तथाऽग्नेर्ज्वालानामपि सप्तधात्वात् ते आहुः सप्त नामानि। यथा—

१ काली २ कराली च ३ मनोजवा च,
४ सुलोहिता चैव ५ सुधूम्रवर्णा।
६ स्फुलिङ्गिनी ७ विश्वरूपा तथोक्ता,
लेलायमाना इति सप्त जिह्वाः ॥ १ ॥

परं सत्यव्रतसामश्रमी " लीला " इत्यष्टमीं चाह ॥ ऋग्वेदे ६। १६। २ ऽपि ॥ २ ॥

भाषार्थः-(सः) वह अग्नि (नः) हमारे (अध्वरे) यज्ञ में (मन्द्राभिः) हव्य पदार्थों के संसर्ग से हर्षकरी (जिह्वाभिः) लपटों से (महः) बड़े भारी (देवान्) वायु आदि देवों का (यज) यजन करे क्योंकि अग्नि ही देवदूत होने से देवों का (आवक्षि) आवाहन करता (च) और (यक्षि) यजन करताहै॥

कोई लोग सूर्य के किरणों के ७ रङ्गों के समान अग्नि की लपटों में भी ७ अवस्था मान कर ७ नाम धरते हैं कि:—

१—काली=श्याम। २—कराली=असह्यवर्णा।
३—मनोजवा=मन के समान अत्यन्त चञ्चल।
४—सुलोहिता=पूरी सुर्ख। ५—सुधूम्रवर्णा=धुंधली।
६—स्फुलिङ्गिनी=चिनगारियों वाली।
७—विश्वरूपा=सब रूपों वाली मिली हुई॥

सत्यव्रतसामश्री अपनी टिप्पणी में " लीला " नाम ८ वीं भी लिखते हैं॥ ऋ० ६। १६। २ में भी॥ २॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २

वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा ।

१ २ ३ १ २

अग्ने यज्ञेषु सुक्रतो ॥ ३ ॥ [१६] (१४७३)

पदपाठः–वेत्थ क्रि० । हि अ० । वेधः सं० । अध्वनः, पथः २ । च अ० । देव सं० । अञ्जसा ३ । अग्ने सं० । यज्ञेषु ७ । सुक्रतो सं० ॥

अन्वितपदार्थः–(वेधः) यज्ञस्य विधातः ! (सुक्रतो) शोभनकर्मन् ! (देव) द्योतमान ! (अग्ने) पावक ! त्वम् (यज्ञेषु) दर्शपौर्णमासादिषु (हि) निश्चयेन (अध्वनः) दूरमार्गान् (पथः) समीपमार्गान् (च) (अञ्जसा) झटिति (वेत्थ) जानासि प्रापयसि ॥

अग्निर्हि यज्ञेन शोभनेन कर्मणा सुक्रर्मा, यज्ञस्य विधायकत्वाद्विधाता, द्योतमानत्वाद्देवः, दूरसमीपसर्वमार्गगत्वाद्दञ्जसाऽनायासेन झटिति सर्वत्रस्थान् देवान् तत्तद्भागं प्रापयति ॥ ऋग्वेदे ६ । १६ । ३ ऽपि ॥ ३ ॥

भाषार्थः–(वेधः) यज्ञ के विधाता ! (सुक्रतो) सुकर्मन् ! (देव) प्रकाशमान ! (अग्ने) अग्ने ! तू (यज्ञेषु) दर्शपौर्णमासादि यज्ञों में (हि) निश्चय (अध्वनः) दूरमार्गों (च) और (पथः) समीपमार्गों को (अञ्जसा) अनायास शीघ्र (वेत्थ) जानता=पहुंचाता है ॥

अग्नि को यज्ञ का विधायक होने से विधाता, और यज्ञरूप शोभनकर्म का प्रधान साधन होने से सुकर्मा और प्रकाशमान होने से देव कहा गया । वह देवदूत अग्नि दूरस्थ तथा समीपस्थ सब देवों के मार्गों को पहचानता अर्थात् उस २ देवता को उस का भाग पहुंचाने में समर्थ है ॥ ऋ० ६ । १६ । ३ में भी ॥ ३ ॥

Digitized by S3 Foundation USA

उक्तोविश्वजित्। इदानीं महाव्रते भवान्याज्यानि। इति विव० ॥

अथ तृतीयतृचस्य-देवश्रवा देववातोवा ऋषिः। अग्निर्देवता। गायत्रीछन्दः॥

तत्र प्रथमा-

१ २ ३ १र २र ३ १ २ ३ १ २

होता देवो अमर्त्यः पुरस्तादेति मायया।

१ २ ३ ३ १ २

विदथानि प्रचोदयन् ॥ १ ॥ (१४७१)

पदपाठः-होता, देवः, अमर्त्यः १। पुरस्तात् अ०। एति क्रि०। मायया ३। विदथानि २। प्रचोदयन् १ ॥

अन्वितपदार्थः-(होता) होमसाधकः (देवः) द्योतमानः (अमर्त्यः) अमरः अग्निः (मायया) प्रज्ञया (विदथानि) ज्ञानेन्द्रियाणि (प्रचोदयन्) प्रेरयन् (पुरस्तात्) अग्रे आकाशम् (एति) गच्छति ॥

अग्निर्नास्मदादिवत् मृत्युमृच्छतीत्यमर्त्यः, प्रकाशमानत्वाद्देवः, देवदूतत्वाद्धोता, प्रकाशेन बुद्धेः प्रेरकोहीन्द्रियाणां प्रेरकश्चोक्तः ॥ ऋग्वेदे ३। २७। ७ ऽपि ॥ १ ॥

भाषार्थः-(होता) होम का साधक (देवः) प्रकाशमान (अमर्त्यः) अमर अग्नि (मायया) बुद्धि से (विदथानि) ज्ञानेन्द्रियों को (प्रचोदयन्) प्रेरित करता हुवा (पुरस्तात्) आगे आकाश को (एति) जाता है ॥

अग्नि हमारे समान मरणधर्मा न होने से अमर, प्रकाशमान होने से देव, देवों का दूत होने से होता, और प्रकाश से बुद्धि का प्रेरक होने से ज्ञानेन्द्रियों का भी प्रेरक है ॥ ऋ० ३। २७। ७ में भी ॥ १ ॥

अथ द्वितीया-

३ १र २र ३ २ ३ १ २

वाजी वाजेषु धीयतेऽध्वरेषु प्रणीयते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १ २
विप्रो यज्ञस्य साधनः ॥ २ ॥ (१४७५)

पदपाठः–वाजी १ । वाजेषु ७ । धीयते क्रि० । अध्वरेषु ७ । प्रणीयते क्रि० । विप्रः १ । यज्ञस्य ६ । साधनः १ ॥

अन्वितपदार्थः–(वाजी) बलवानऽग्निः (वाजेषु) बलसाध्येषु यानादिषु (धीयते) स्थापितः क्रियते (अध्वरेषु) यज्ञेषु (प्रणीयते) अध्वर्य्वादिभिः प्रकर्षेणाऽऽहवनीयादिस्थानेषु नीयतेऽतएव (विप्रः) मेधावी अग्निः (यज्ञस्य) अग्निहोत्रादेः (साधनः) साधकोभवति ॥ ऋग्वेदे ३ । २७ । ८ ऽपि ॥२॥

भाषार्थः–(वाजी) बलवान् अग्नि (वाजेषु) बलसाध्यकार्यों=यानादिकों में (धीयते) रक्खा जाता है । (अध्वरेषु) यज्ञों में (प्रणीयते) अध्वर्यु आदिकों द्वारा अतिशयता से आहवनीयादि कुण्डस्थानों में ले जाया जाता है (विप्रः) वह बुद्धितत्त्वयुक्त अग्नि (यज्ञस्य) यज्ञ का (साधनः) साधक है ॥ ऋ० ३ । २७ । ८ में भी ॥ २ ॥

अथ तृतीया–

३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
धिया चक्रे वरेण्यो भूतानां गर्भमादधे ।
१ २ ३ २ ३ १ २
दक्षस्य पितरं तना ॥३॥ [१७] (१४७६)

पदपाठः–धिया ३ । चक्रे क्रि० । वरेण्यः १ । भूतानाम् ६ । गर्भम् २ । आदधे क्रि० । दक्षस्य ६ । पितरम् २ । तना २ ॥

अन्वितपदार्थः–अग्निस्तेनेन्द्रियाणां प्रेरणेन किं फलमुत्पादयति तदाह–(वरेण्यः) वरणीयः अग्निः (भूतानां) प्राणिनां (गर्भम्) आत्मानमेव गर्भरूपतया (आदधे) आधत्ते, तथा (धिया) प्रज्ञया (दक्षस्य) बलस्य (पितरं) जनकं (तना) धनं (चक्रे) करोति ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्निः कस्माद्वरणीयः ? सर्वभूतेषु गर्भरूपेण जीवनरूपेणाहितत्वात्, बुद्धिं प्रेर्य बलजनकस्य धनस्य चोत्पादकत्वात् ॥ ऋग्वेदे ३ । २७ । ९ ऽपि ॥ ३ ॥

भाषार्थः—अग्नि द्वारा इन्द्रियों की प्रेरणा से क्या फल होता है सो कहते हैं:—(वरेण्यः) वरणीय अग्नि (भूतानाम्) प्राणियों के (गर्भम्) गर्भ का (आदधे) आधान करता है अर्थात् गर्भरूप से स्वयं स्थित होता है और (धिया) बुद्धि तत्त्व से (दक्षस्य) बल के (पितरम्) पिता=जनक (तना) धन को (चक्रे) उत्पन्न कराता है ॥

अग्नि इस लिये वरण करने योग्य है कि सब प्राणियों में जीवन रूप गर्भ बन कर स्वयं स्थित है और बुद्धितत्त्व की प्रेरणा करके बल के जनक धन को उत्पन्न कराता है ॥ ऋ० ३ । २७ । ९ में भी ॥ ३ ॥

इति त्रयोदशाऽध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ—

षष्ठे खण्डे प्रथमर्चस्य—इर्यतऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

२ ३१ २ ३ २३ १२ ३ १२
आ सुते सिञ्चत श्रियꣳ रोदस्योरभिश्रियम् ।
३ १ २ ३ २
रसा दधीत वृषभम् ॥ १ ॥ (१४७७)

पदपाठः—आ अ० । सुते ७ । सिञ्चत क्रि० । श्रियम् २ । रोदस्योः ६ । अभिश्रियम् २ । रसा ७ । दधीत क्रि० । वृषभम् २ ॥

अन्वितपदार्थः—हे मनुष्या ! (वृषभम्) वर्षकं होमवेदिस्थमग्निं (दधीत) आहितं कुरुत । अनन्तरं (रसा) रसे अन्ने सोमाख्ये (सुते) अभिषुते सति (रोदस्योः) द्यावापृथिव्योः (अभिश्रियम्) अभ्याश्रयं कुर्वन्तं करिष्यन्तं (श्रियम्) श्रयणमाज्यम् (आ सिञ्चत) ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवतानुक्रमण्यनुसारतोऽस्याऋचोऽग्निं देवतां पठता सायणाचार्येणाऽपि मया चाग्निपरमेव व्याख्यानं विहितम्। होमार्थाऽग्नेर्वृष्टिकारकत्वात् वृषभमिति विशेषणं नाऽनुचितम् ॥ ऋग्वेदे ८। ७२। १३ ऽपि ॥ १ ॥

भाषार्थः—हे मनुष्यो! (वृषभम्) वर्षा करने वाले होमाग्नि का (दधीत) आधान "अग्न्याधान" की रीति से करो और फिर (रसा) सोमरूप अन्न (सुते) अभिषुत होने पर (रोदस्योः) द्यावाभूमी का (अभिश्रियम्) अभ्याश्रय करने वाले (श्रियम्) तये हुवे घृत=आज्य का (आ सिञ्चत) आसेचन करो ॥

यहां देवतानुक्रमणी के अनुसार इस ऋचा का अग्नि देवता पढ़ते हुवे सायणाचार्य ने और हम ने भी अग्निपरक व्याख्यान किया है। होमार्थ अग्नि के वृष्टिकारक होने से "वृषभम्" यह अग्नि का विशेषण अनुचित नहीं है ॥ ऋ० ८। ७२। १३ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ २ ३ २ २ ३ २ ३ २ ३ १ २
ते जानत स्वमोक्या३ꣳ सं वत्सासो न मातृभिः।
३ १ २ ३ १ २
मिथो नसन्त जामिभिः ॥ २ ॥ (११७८)

पदपाठः—ते १। जानत क्रि०। स्वम्, ओक्यम् २। सम् अ०। वत्सासः १। न अ०। मातृभिः ३। मिथः अ०। नसन्त क्रि०। जामिभिः ३ ॥

अन्वितपदार्थः—(ते) अन्नेन सोमेन मिश्रिता आज्यभागा हुताः सन्तः (स्वम्, ओक्यम्) स्वकीयं स्थानम् (जानत) जानन्तीव (जामिभिः) मेघोदकैः सह (मिथः) परस्परं (नसन्त) संगच्छन्ते ॥ अत्र दृष्टान्तः—(वत्सासः) गोवत्साः (न) यथा (मातृभिः) गोभिः (सम्) संगच्छन्ते तद्वत् ॥ जामीति उदकनाम निघं० १। १२ ऋग्वेदे ८। ७२। १४ ऽपि॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(ते) जो सोमाऽन्न से मिश्रित अग्नि में हुत अन्य भाग हैं, वे (स्वम्) अपने (ओक्यम्) स्थान को (जानते) जानते हुवे से (जामिभिः) मेघजलों से (मिथः) परस्पर (नसन्त) जा मिलते हैं। दृष्टान्त-(न) जैसे (वत्सासः) बछड़े (मातृभिः) गौवों से (सम्) जा मिलते हैं, तद्वत ॥ निघण्टु १ । १२ में जामि=जलनाम है ॥ ऋ० ८ । ७२ । १४ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ १ २ ३ २ ३१ २ ३ २

उपस्रक्केषु बप्सतः कृण्वते धरुणं दिवि ।

१ २ ३ २उ ३ २

इन्द्रे अग्ना नमः स्वः ॥ ३ ॥ [१८] (१४७१)

पदपाठः-उप अ० । स्रक्केषु ७ । बप्सतः ६=१ । कृण्वते क्रि० । धरुणम् २ । दिवि, इन्द्रे, अग्ना ७ । नमः, स्वः अ०॥

अन्वितपदार्थः-(स्रक्केषु) ओष्ठप्रान्तेष्विव ज्वालासु (बप्सतः) भक्षयति दहति सति (अग्नौ) पावके (इन्द्रे) वायौ (दिवि) आदित्ये च (स्वः) सुखदं (धरुणम्) धारकम् (नमः) अन्नम् (उप कृण्वते) उपकुर्वते ऋत्विज इति शेषः ॥

होतृभिर्ऋत्विग्भिर्यदन्नं हव्यमग्नौ हूयते तेन त्रयाणां लोकानां महानुपकारः क्रियते इति भावः ॥ ऋग्वेदे ८ । ७२ । १५ ऽपि ॥ ३ ॥

भाषार्थः-(स्रक्केषु) गलाफुंकों के तुल्य लपटों में (बप्सतः) भक्षण करते=भस्म करते हुवे (अग्नौ) अग्नि में, (इन्द्रे) मध्यस्थान वायु में और (दिवि) द्युस्थान आदित्य में (स्वः) सुखदायक (धरुणम्) धारण करने वाले स्तम्भरूप (नमः) अन्न को (उप-कृण्वते) उपकृत करते हैं [ऋत्विज् लोग]

अर्थात् जब होता लोग अग्नि में हव्य छोड़ते हैं तब वे तीनों लोकों को उस से उपकृत करते हैं ॥ ऋ० ८ । ७२ । १५ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीयतृचस्य-बृहद्दिवऋषिः । इन्द्रोदेवता । त्रिष्टुप्छन्दः ॥
तत्र प्रथमा-

१र २र३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
तदिदास भुवनेषु ज्येष्ठं यतोजज्ञ उग्रस्त्वेषनृम्णः ।
१ १ २ ३ १र २र ३ २ ३ २ ३ २उ ३ २ ३ १ २
सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदन्त्यूमाः॥१॥(१४८०)

पदपाठः-तत् १ । इत् अ० । आस क्रि० । भुवनेषु ७ । ज्येष्ठम् १ । यतः ५ । जज्ञे क्रि० । उग्रः, त्वेषनृम्णः १ । सद्यः अ० । जज्ञानः १ । निरिणाति क्रि० । शत्रून् २ । अनु अ० । यम् २ । विश्वे १ । मदन्ति क्रि० । ऊमाः १ ॥

अन्वितपदार्थः-(तत्) प्रसिद्धं (भुवनेषु) लोकेषु (ज्येष्ठम्) महत् (इत्) ब्रह्मैव (आस) पूर्वमासीत् (यतः) ब्रह्मणोनिमित्तकारणात् (उग्रः) तेजस्वी (त्वेषनृम्णः) दीप्तिबल इन्द्रः सूर्यः (जज्ञे) जातो बभूव । (जज्ञानः) उत्पन्नः स सूर्यः (सद्यः) सपदि (शत्रून्) मनुष्याणां विरोधकर्त्तॄन्जन्तून् (निरिणाति) नितरां हिनस्ति नाशयति (यं) सूर्यम् (अनु) पश्चात् (विश्वे) सर्वे (ऊमाः) प्राणिनः (मदन्ति) हृष्यन्ति ॥

ब्रह्मणोज्येष्ठत्वं सर्वत्राऽन्यत्राऽपि " तस्मै ज्येष्ठाय ब्रह्मणे नमः " अथर्ववेदे १० । ४ । ७ इत्यादिषु स्थलेषु प्रसिद्धम् । " चक्षोः सूर्योअजायत " ऋ० १० । ९० । १३ तथा य० ३१ । १२, तथा अथर्व० १९ । १ । ६, इत्यादौ सूर्योत्पत्तिः स्पष्टा, तथा च "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् " ऋ० १० । १९० । ३ इत्यत्र च । सूर्योदये प्राणिनोहृष्यन्तीत्यत्र प्रत्यक्षं प्रमाणमपि पश्यामः, प्रातरेव पशुपक्षिगणानां साह्लादं रुतश्रवणात् । सायणाचार्योब्रा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ह्मणवाक्यं चात्रोद्धार, तद्यथा–"भूतानि वै विश्व ऊमास्तएनमनुमदन्ति उदगादुदगादिति" इति ॥

आस–इत्यत्र "छन्दस्युभयथा" ३।४।११७ इति सार्वधातुकार्धधातुकोभयसंज्ञयोरुभयोः सार्वधातुकसंज्ञाबलेन–"अस्तेर्भूः" २।४।५२ इति भूभावाऽभावः ॥ त्विषूदीप्तौ इत्यस्माद् घञि त्वेषः, नृम्णमिति बलनाम निघं० २।९ ॥ जज्ञे–इत्यत्र, "गमहनेत्यादिना" ६।४।९८ उपधालोपः, "द्विर्वचचनेऽचि" १।१।५९ इति उपधायाः स्थानिवत्त्वाद्द्विर्वचनादिकम् । "यद्वृत्तान्नित्यम्" ८।१।६६ इति निघातप्रतिषेधः ॥ जज्ञानः–इति जनेर्लिटः कानचि रूपम् ॥ रिणाति–इत्यत्र, "प्वादीनां ह्रस्वः" ७।३।८० इति री गतिरेषणयोरित्यस्य ह्रस्वत्वम् ॥ अवन्ति रक्षन्तीत्यूमाः प्राणिनः, अवतेरौणादिको मन्प्रत्ययः, "ज्वरत्वरस्रव्यवि०" ६।४।२० इति वकारोपधयोरूठ् ॥ मदन्ति–इत्यत्र, श्यनि प्राप्तेऽपि "व्यत्ययोबहुलम्" ३।१।८५ इति शपू ॥ यम्–इत्यत्र "कर्मप्रवचनीययुक्ते द्वितीया" २।३।८ इति द्वितीया । "अनुर्लक्षणे" १।४।८४ इति कर्मप्रवचनीयताऽनोः ॥ ऋग्वेदे १०।१२०।१ऽपि ॥१॥

भाषार्थः-(तत्) वह प्रसिद्ध (भुवनेषु) सब भुवनों में (ज्येष्ठम्) अत्यन्त बड़ा ब्रह्म (इत) ही (आस) था, (यतः) जिस निमित्त कारण से (उग्रः) तेजस्वी (त्वेषनृम्णः) प्रकाश बल वाला इन्द्र=सूर्यः (जज्ञे) उत्पन्न हुवा । (जज्ञानः) सो उत्पन्न हुवा सूर्य (सद्यः) शीघ्र (शत्रून्) मनुष्यों के शत्रु सूक्ष्म दुष्टजन्तुओं को (नि रिणाति) निरा नष्ट कर डालता है (यम्) जिस सूर्य के (अनु) उदय होने पश्चात् (विश्वे) सब (ऊमाः) प्राणी (मदन्ति) हृष्ट होते हैं ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्म ही सब भुवनों से बड़ा है, यह बात अथर्व १०। ४। ७ में कही गई है। उस ने तेजोरूप चक्षुःस्थानी सूर्य को उत्पन्न किया, यह भी ऋ० १०। ९०। १३, यजुः ३१। १२, अथर्व १९। १। ६ और ऋ० १०। १९०। ३ में तथा अन्य बहुत स्थलों में प्रसिद्ध है, मूल मन्त्र और अष्टाध्यायी ७। ४। ११७, २। ४। ५२, ६। ४। ९८, १। १। ५९, ८। १। ६६, ७। ३। ८०, ६। ४। २०, ३। १। ८५, २। ३। ८, १। ४। ८४ निघण्टु २। ९ और सायणाचार्य के उद्धृत किये हुये ब्राह्मण का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १०। १२०। १ में भी ॥ २ ॥

अथ द्वितीया—

३ १र २र३ १ २ ३ १२३ १ २ ३ १२

वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।

१ २ ३ २३ २ ३ १ २ ३ १२३ १२

अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु॥२॥(१४८१)

पदपाठः—वावृधानः १ । शवसा ३ । भूर्योजाः, शत्रुः १ । दासाय ४ । भियसम् २ । दधाति क्रि० । अव्यनत् १ । च अ० । व्यनत् १ । च । सस्नि १ । सम् अ० । ते ४ । नवन्त क्रि० । प्रभृता १ । मदेषु ७ ॥

अन्वितपदार्थः—(वावृधानः) उदयमानः (भूर्योजाः) प्रभूतबलः (शत्रुः) शातयिता नाशयिता सूर्यः (शवसा) बलेन (दासाय) उपक्षयकारिणे दुष्टजन्तवे (भियसम्) भयम् (दधाति) धारयति (च) पुनः (अव्यनत्) अप्राणि (व्यनत् च) प्राणि चेति सर्वाणि (प्रभृता) प्रभृतानि प्रकर्षेण भृतानि पोषितानि धारितानि भूतजातानि (सस्नि) संस्नातानि शोधितानि सन्ति (मदेषु) हृष्टिषु (ते) तस्मै सूर्याय (सं नवन्त) संगच्छन्ते ॥

सूर्यः स्थावरजङ्गमानां संगमयिता दुष्टजन्तुनाशकः प्रातः प्रातरुदितोजगदुपकुरुते ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सस्निम्=संस्नातम् इति निरु० ५ । १ संपूर्वात्स्नातेः "आदृगमहनः" ३ । २ । १७१ इति किन् ॥ नवतिर्गतिकर्मा निघं० २ । १४ ॥ प्रभृता–इत्यत्र " शेश्छन्दसि बहुलम् " ६ । १ । ७० इति शेर्लोपः ॥ ऋग्वेदे १० । १२० । २ ऽपि ॥ २ ॥

भाषार्थः–(वावृधानः) उदय होकर बढ़ता हुवा, (भूर्योजाः) अति बली (शत्रुः) दुष्टजन्तुनाशक सूर्य (शवसा) बल से (दासाय) हानिकारक दुष्ट जन्तु के लिये (भियसम्) भय का (दधाति) धारण कराता है (च) और (अव्यनत्) अप्राणी (च) तथा (व्यनत्) प्राणी ये सब (प्रभृता) पोषित वा धारित भूतमात्र (सस्नि) भले प्रकार शोधित हुवे (मदेषु) हर्षों में (ते) उस सूर्य के लिये (संनवन्त) संगत होते हैं ॥

सूर्य चराऽचरात्मा होने से सब का धारक पोषक और हानि वा रोगादि कारक वायु वा जल के विकार से उत्पन्न जन्तुओं का नाशक उन का शत्रु होकर जगत् का उपकार करता है ॥

निरुक्त ५ । १ निघण्टु २ । १४ अष्टाध्यायी ३ । २ । १७१ व ६ । १ । ७० के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १० । १२० । २ में भी ॥ २ ॥

अथ तृतीया—

२उ ३ १ २ ३ २ ३ २उ३ २उ ३ १ २

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।

३ १र २र ३ १ २ ३ २ ३२उ ३ १ २ ३

स्वादोः स्वादीयः स्वादुना सृजा समदः सुमधु मधुना

१ २

ऽभियोधीः ॥ ३ ॥ [१९] (१४८२)

पदपाठः- त्वे ७ । क्रतुम् २ । अपि अ० । वृञ्जन्ति क्रि० । विश्वे १ । द्विः, यत् अ० । एते १ । त्रिः अ० । भवन्ति क्रि० । ऊमाः १ । स्वादोः ५ । स्वादीयः २ । स्वादुना ३ । सृज क्रि० । सम् अ० । अदः, सुमधु २ । मधुना ३ । अभियोधीः क्रि० ॥

अन्वितपदार्थः–(यत्) यदा (एते) कर्मिणः (ऊमाः) प्राणिनोमनुष्याः (द्विः) पुत्रजन्मना द्विस्त्वेन (त्रिः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पौत्रजन्मना त्रिस्त्वेन च युक्ताः (भवन्ति) जायन्ते तदा (अपि) (त्वे) तस्मिन् सूर्ये एव (विश्वे) सर्वे (क्रतुम्) कर्म (वृञ्जन्ति) समापयन्ति (स्वादोः स्वादीयः) स्वादोरपि स्वादुतरं (अदः) रसजातम् (स्वादुना) तर्पकेण रसेन (सं सृज) संसृजति, तथा (सुमधु) रसजातं सुमधुरं (मधुना) मधुरेण (अभियोधीः) संघट्टयति ॥

सूर्य एव कर्मात्माऽतस्तस्मिन्नेवेमे सर्वे मनुष्याः पुत्रपौत्रसंयुक्ता वृद्धा अपि स्वात्मानुष्ठितं सर्वं कर्म समापयन्ति, सूर्य एव तत्तद्रसालफलपत्रपुष्पादिषु स्वादुमाधुर्यप्रभृतिप्रीतिजनकरसानुत्पादयति इति भावः ॥

त्वे इत्यत्र त्वशब्दात्सर्वनाम्नः सप्तम्येकवचनस्य " सुपां सुलु० " ७ । १ । ३९ इत्यादिना शे इत्यादेशः ॥

सूर्य एव कर्मात्मेत्यत्र सायणाचार्येणेदं ब्राह्मणमुद्धृतम्—

" त्वयीमानि सर्वाणि भूतानि मनांसि सर्वे क्रतवोऽपि वृञ्जन्तीत्येतदाह" इति ॥ ऋग्वेदे १० । १२० । ३ ऽपि ॥ ३ ॥

भाषार्थः—(यत्) जब कि (एते) ये (जनाः) कर्मानुष्ठानी प्राणी मनुष्य (द्विः) पुत्र जन्म से दुहरे और (त्रिः) पौत्र जन्म से तीहरे (भवन्ति) होजाते हैं, (अपि) तो भी (त्वे) उस सूर्य में ही (विश्वे) सब लोग (क्रतुम्) कर्म को (वृञ्जन्ति) समाप्त करते हैं । (स्वादोः) स्वादु से (स्वादीयः) अति स्वादु (अदः) इस रस को (स्वादुना) स्वादु रस से (सं सृज) सूर्य मिलाता है और (सुमधु) उत्तम मधु को (मधुना) मधुर रस से (अभियोधीः) लड़ाता=जुटाता है ॥

सूर्य ही कर्मात्मा है, उसी के सहारे से सब लोग बेटे पोतों वाले बूढ़े होकर भी सब कर्म पूरे करते हैं । सूर्य ही उस २ रसाल पत्र पुष्प फलादि से स्वादु से स्वादु और मधुर से अति मधुर रस को जुटाता है ॥ सायणाचार्योक्त ब्राह्मण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का पाठ और अष्टाध्यायी ७ । १ । ३९ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १० । १२० । ३ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-गृत्समदऋषिः । इन्द्रोदेवता । अष्टिश्छन्दः ॥

तत्र प्रथमा-

१ २ ३ १र २र ३ २ ३ १ २र

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपि

३ १ २ ३ १ २ ३ २ १ २ ३ २ ३ १ २ १ २

वह्निष्णुना सुतं यथावशम् । स ईं ममाद महि कर्म कर्त्तवे

३ २ ३ १र २र ३ २ ३ २ ३ १र २र ३ १र २र

महामूरुꣳसैनꣳसश्चद्देवो देवꣳसत्यइन्दुः सत्यामिन्द्रम्

॥ १ ॥ (१४८३) व्याख्याता (४५७)

अथ द्वितीया-

३ २ ३ १र २र ३ १र २र ३ २ ३ २

साकं जातः क्रतुना साकमोजसा ववक्षिथ । साकं वृद्धो

३ क २र ३ २ व ३ १ २ २ ३ १ २ ३ २ व

वीर्यैः सासह्विर्मृधो विचर्षणिः ॥ दाता राधः स्तुवते

३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १र २र ३ १र

काम्यं वसु प्रचेतन सैनꣳसश्चद्देवो देवꣳसत्यइन्दुः सत्य-

२र

मिन्द्रम् ॥ २ ॥ (१४८४)

पदपाठः-साकम् अ० । जातः १ । क्रतुना ३ । साकम् । ओजसा ३ । ववक्षिथ क्रि० । साकम् । वृद्धः १ । वीर्यैः ३ । सासह्विः १ । मृधः २ । विचर्षणिः १ । दाता १ । राधः २ । स्तुवते ४ । काम्यं, वसु २ । प्रचेतन सं० । सः १ । एनम् २ । सश्चत क्रि० । देवः १ । देवम् २ । सत्यः, इन्दुः १ । सत्यम्, इन्द्रम् २ ॥

अन्वितपदार्थः-(प्रचेतन) चेतनतावर्धक ! सूर्य ! (क्रतुना) कर्मणा प्रज्ञया वा (साकं) सह (ओजसा) बलेनाऽऽकर्षणेन (साकं) सह (जातः) उदितः (वीर्यैः) बलवद्भिः किरणैः (साकं) सह (वृद्धः) वृद्धिं प्राप्तः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(ववक्षिथ) वहसि पृथिव्यादींल्लोकान् इति शेषः । (मृधः) दुष्टजन्तून् (सासहिः) अभिभवितुं शीलमस्य सः (विचर्षणिः) दर्शयिता (स्तुवते) प्रशंसते स्तोत्रे यजमानाय (राधः) साधकं (काम्यं) कमनीयं (वसु) धनं धान्यं " न लोकेति " २ । ३ । ६९ न षष्ठी । (दाता) दातुं शीलमस्य सः (एनम्) उक्तं (सत्यम्) वास्तविकं (देवम्) दिवि भवम् (इन्द्रम्) सूर्यम् (सत्यः) वास्तविकः (इन्दुः) सोम ओषधिराजश्चन्द्रलोको वा (देवः) दिव्यः (सश्चत्) प्राप्नोति ॥

सूर्योऽयं सर्वस्य जगतो जागरणकारकत्वात् प्रचेतनः, धारणाऽऽकर्षणबलेन धारको वोढा च, प्रातरुदितः सन् किरणैर्वर्धमानो दुष्टजन्तून्हन्ति, सर्वस्य दृष्टिमनुगृह्णाति, इत्यादीन् सूर्यगुणान् वेदसूक्तैः पठन्तोजानाना ये यज्ञमनुतिष्ठन्ति तेभ्यस्तद्द्वारा धनधान्यप्रदाता चाऽस्ति । तादृशमेतं सूर्यं चन्द्रलोक आश्रयते प्रकाशार्थम् । सोमओषधिराड्वाऽऽश्रयते हुतः सन् ॥ ऋग्वेदे तु २ । २२ । ३ " सत्यइन्दुः सत्यमिन्द्र "-मित्यस्य स्थाने " सत्यमिन्द्रं सत्यइन्दु "-रिति व्यत्ययेन पाठः । " प्रचेतन " इति च सर्वथैव नास्ति शब्दः ॥ २ ॥

भाषार्थः-(प्रचेतन) चेताने वाले ! सूर्य ! (क्रतुना) कर्म वा बुद्धि तत्त्व के (साकम्) साथ और (ओजसा) आकर्षण बल के (साकम्) साथ (जातः) उदय हुवा (वीर्यैः) बलवान् किरणों के (साकम्) साथ (वृद्धः) वृद्धि को प्राप्त हुवा (ववक्षिथ) पृथिव्यादि लोकों को ढो रहा है । (मृधः) दुष्ट जन्तुओं को (सासहिः) तिरस्कृत करने वाला (विचर्षणिः) विशेष कर दृष्टि पर अनुग्रह करने वाला (स्तुवते) यजमान जो प्रशंसा करता है

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उस के लिये (राधः) कार्यों के साधन (काम्यम्) चाहने योग्य (वसु) धन धान्य का (दाता) देने वाला है । (एनम्) इस (सत्यम्) सच्चे (देवम्) देव (इन्द्रम्) सूर्य को (सत्यः) सच्चा (देवः) देव (इन्दुः) चन्द्रलोक वा सोम ओषधिराज (सश्वत्) प्राप्त होता है ॥

यह सूर्य सब जगत् का जगाने वाला होने से प्रचेतन है, धारण और आकर्षण के बल से पृथिव्यादि लोकों का वोढा (ले चलने वाला) और धारक है, प्रातः उदय होते ही किरणों से बढ़ता हुवा सब दुष्ट जन्तुओं का नाश करता है, सब की आंखों का सहायक है, जो लोग इन सूर्य के गुणों को वेद सूक्तों द्वारा पढ़ते जानते और यज्ञ करते हैं उन की धन और धान्य की वृद्धि करता है । इस ऐसे सूर्य लोक को प्रकाशार्थ चन्द्रमा और होम किया हुवा सोम आश्रय करता है ॥ ऋ० २ । २२ । ३ का पाठभेद और अष्टाध्यायी २ । ३ । ६९ का प्रमाण संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

२३ १२ ३ १२३ १२३१ २३१र २र

अध त्विषीमाँ अभ्योजसा कृविं युधा भवदारोदसी अपृणदस्य

३ २३ १२ १२३ २ ३२३१२ ३ १२ ३ १२

मज्मना प्रवावृधे । अधत्तान्यं जठरे प्रेमरिच्यत प्रचेतय सैनꣳ

१३ २३२ ३१र २र ३१र २र

सश्चेदेवो देवꣳ सत्य इन्दुः सत्यमिन्द्रम् ॥३॥ [२०](१४८५)

पदपाठः–अथ अ० । त्विषीमान् १ । अभि अ० । ओजसा ३ । कृविम् २ । युधा ३ । अभवत् क्रि० । आ अ० । रोदसी २ । अपृणत् क्रि० । अस्य ६ । मज्मना ३ । प्रवावृधे, अधत्त क्रि० । अन्यम् २ । जठरे ७ । प्र, ईम् अ० । अरिच्यत, प्रचेतय क्रि० । सः । एनम् । सश्चत् । देवः । देवम् । सत्यः । इन्दुः । सत्यम् । इन्द्रम् ॥

अन्वितपदार्थः–(अध) सोमपानानन्तरं (त्विषीमान्) दीप्तिमान्सूर्यः (ओजसा) तेजसा बलेन (युधा) युद्धेन (कृविम्) सूक्ष्मजन्तुं वायुगतमसुरम् (अभि अभवत्) तिरस्करोति (अस्य) सोमस्य (मज्मना)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बलेन च (प्रवावृधे) अधिकशक्तिमान्भवति वर्धते (रोदसी) द्यावाभूमी (आ-अपृणत्) आपूरयति (अन्यम्) एकं सोमभागं (जठरे) उदरे अन्तरिक्षे (अधत्त) धारयति (ईम्) अथाऽपरं द्वितीयभागम् (प्र-अरिच्यत) त्यजति [अन्यदेवतार्थम्] (प्रचेतय) प्रचेतयति अन्यान् चन्द्रादीन् ॥ (सःएनम्०) इत्यादि पूर्वमन्त्रवत् ॥ ऋग्वेदे तु २ । २२ । २ प्रचेतयेति सर्वथा नास्ति । अन्यत्पूर्ववत् ॥३॥

भाषार्थः-(अध) सोमपान के पश्चात् (त्विषीमान्) तेजस्वी प्रकाशमान सूर्य (ओजसा) तेजोबल से (युधा) युद्ध से (कृविम्) कृमि कीटादि रूप वायुगत सूक्ष्म जन्तुरूप असुर को (अभि-अभवत्) तिरस्कृत करता है (अस्य) इस सोम के (मज्मना) बल से (प्रवावृधे) बढ़ता और (रोदसी) द्यावा भूमी को (आ-अपृणत्) आपूरित करता है (अन्यम्) सोम के एक भाग को (जठरे पेट=अन्तरिक्ष में (अधत्त) धरता और (ईम्) इस दूसरे भाग को (प्र-अरिच्यत) अन्य देवों के लिये बचा देता है (प्रचेतय) और चन्द्रादि लोकों को चेताता=प्रकाश पहुंचाता है (सः एनम्०) इत्यादि पूर्वमन्त्रवत् जानो ॥ ऋ० २ । २२ । २ में "प्रचेतय" पाठ नहीं है। अन्य सब पूर्ववत् है ॥ ३ ॥ (१४८५=१४८६) देखो १४६५ दो बार भूल से छप गया ॥

इति त्रयोदशाऽध्यायस्य षष्ठः खण्डः ॥ ६ ॥

इति षष्ठः प्रपाठकः

॥ ६ ॥

इति श्रीमत्कण्ववंशाऽवतंस पण्डित श्री हज़ारीलालस्वामि सूनुना, हस्तिनापुर पार्श्ववर्ति परीक्षितगढ़ निवासिना, तुलसीरामस्वामिना कृते सामवेदभाष्ये उत्तरार्चिके त्रयोदशोऽध्यायः समाप्तः ॥ १३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ चतुर्दशाऽध्यायः

तत्र

प्रथमे खण्डे प्रथमतृचस्य-प्रियमेधऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ १र २र ३१ २ १ २ १ २ ३ २
अभि प्र गोपतिं गिरेन्द्रमर्च यथाविदे ।
३ २ ३ २ ३ १ २
सूनुꣳसत्यस्य सत्पतिम् ॥१॥ (१४८७)व्याख्याता(१६८)

अथ द्वितीया—

१र २र ३ १ २ ३ १ २ ३ १ २
आ हरयः ससृज्रिरेरुषीरधि बर्हिषि ।
२ ३ २ ३ १ २
यत्राभि सं नवामहे ॥ २ ॥ (१४८८)

पदपाठः-आ अ० । हरयः १ । ससृज्रिरे क्रि० । अरुषी २ । अधि अ० । बर्हिषि ७ । यत्र अ० । अभि-सं-नवामहे क्रि० ॥

अन्वितपदार्थः-(यत्र) यस्मिन् (बर्हिषि) कुशास्तीर्णे यज्ञे (अरुषीः) आरोचमानाः सूर्यत्विषः (अधि) अधिकृत्य (हरयः) हरिताः सोमाः (आ ससृज्रिरे) अग्नौ समन्तात् हूयन्ते, तत्र यज्ञे (अभि-सं-नवामहे) अभितः सम्यक् सूर्यमिन्द्रं प्रशंसामः ॥ ऋग्वेदे ८ । ६९ । ५ ऽपि ॥ २ ॥

भाषार्थः-(यत्र) जिस (बर्हिषि) कुशास्तीर्ण यज्ञ में (अरुषीः) प्रकाशमान सूर्यकिरणों (अधि) पर (हरयः) हरित सोम (आ-ससृज्रिरे)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्नि में चारों ओर से होमे जाते हैं, उस यज्ञ में (अग्नि-सं-नवामहे) हम चारों ओर से भले प्रकार इन्द्र=सूर्य की प्रशंसा करते हैं ॥ ऋ० ८ । ६९ । ५ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु ।
१ २ ३ २ ३ २
यत्सीमुपह्वरे विदत् ॥३॥ [१] (१४८९)

पदपाठः-इन्द्राय ४ । गावः १ । आशिरम् २ । दुदुह्रे क्रि० । वज्रिणे ४ । मधु २ । यत्, सीम् अ० । उपह्वरे ७ । विदत् क्रि० ॥

अन्वितपदार्थः-(वज्रिणे) विद्युद्युक्ताय (इन्द्राय) मेघवर्षकाय सूर्याय (गावः) किरणाः (मधु) मधुरम् (आशिरम्) आम्रयणसाधनमाज्यादिकम् (दुदुह्रे) प्रपूरयन्ति (यत्) येन (उपह्वरे) समीपे यज्ञे वा (सीम्) सर्वतः (विदत्) लभते ॥ ऋग्वेदे ८ । ६९ । ६ ऽपि ॥ ३ ॥

भाषार्थः-(वज्रिणे) बिजुलीयुक्त (इन्द्राय) मेघवर्षक सूर्य के लिये (गावः) उस की किरणें (मधु) मधुर (आशिरम्) तावने योग्य घृतादि को (दुदुह्रे) दुहती हैं (यत्) जिस से (उपह्वरे) समीप वा यज्ञ में (सीम्) सर्वतः (विदत्) पाता है ॥ ऋ० ८ । ६९ । ६ में भी ॥ ३ ॥

अथ प्रगाथात्मक द्वितीयसूक्तस्य - नृमेधपुरुषेधावृषी । इन्द्रोदेवता । बृहतीछन्दः ॥

तत्र प्रथमा-

२ ३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ १ २ ३
आनो विश्वासु हव्यमिन्द्रꣳसमत्सु भूषतः । उप ब्रह्माणि
१ २ २ ३ १ २
सवनानि वृत्रहन् परमज्या ऋचीषम ॥ १ ॥ (१४९०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३ १ २ ३ १र २र ३ १ २ ३ १ २ ३ २

त्वं दाता प्रथमोराधसामस्यसि सत्यईशानकृत् ।

३ २ ३ १र २र ३ २ ३ १ २ ३ २

तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः॥२॥ (१४९१)

पदपाठः-त्वम्, दाता, प्रथमः १ । राधसाम् ६ । असि, असि क्रि० । सत्यः, ईशानकृत् १ । तुविद्युम्नस्य ६ । युज्या २ । वृणीमहे क्रि० । पुत्रस्य, शवसः, महः ६ ॥

अन्वितपदार्थः-हे इन्द्र ! परमेश्वर ! (त्वम्) (प्रथमः) अनादिः (राधसाम्) विद्यादिधनानां (दाता असि), त्वं (सत्यः) यथार्थः (ईशानकृत्) स्वभक्तानामैश्वर्ययुक्तानां कर्त्ता (असि) । (महः) महतः (शवसः पुत्रस्य) बलात्मजस्य (तुविद्युम्नस्य) बहोर्धनस्य (युज्या) योग्यानि कार्याणि (वृणीमहे) स्वीकुर्यामेति प्रार्थनाऽस्माकम् ॥ ऋग्वेदे ८ । ९० । २ऽपि ॥ २ ॥

भाषार्थः-हे इन्द्र ! परमेश्वर ! (त्वम्) तू (प्रथमः) सब से पहला अनादि (राधसां दाता) विद्यादि धनों का देने वाला (असि) है और तू (सत्यः) सच्चा (ईशानकृत्) स्वभक्तों को ऐश्वर्यसंपन्न करने वाला (असि) है (महः) बड़े (शवसः) बल के (पुत्रस्य) पुत्र (तुविद्युम्नस्य) बहुत धन के (युज्या) योग्य कार्यों को (वृणीमहे) हम स्वीकार करें। यह हमारी प्रार्थना है ॥ ऋ० ८ । ९० । २ में भी ॥ २ ॥

अथ तृतीयतृचस्य-त्रसदस्युर्ऋषिः । सोमोदेवता । विराड्बृहती, पादनिचृद्बृहती, बृहती च क्रमेण छन्दांसि ॥ तत्र प्रथमा—

३ २ ३ १ २ ३ २ उ ३ क २र ३ २ ३ २ ३ १र २र

प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महोगाहादिवभा निरऽधुक्षत ।

१ २ ३ १र २र ३ १ २

इन्द्रमभिजायमानꣳ समस्वरन् ॥ १ ॥ (१४९२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-प्रत्नम्, पीयूषम्, पूर्व्यम्, यत्, उक्थ्यम् २। महः, गाहात्, दिवः ५। आ-निरधुक्षत क्रि०। इन्द्रम् २। अभि अ०। जायमानम् २। समस्वरन् क्रि० ॥

अन्वितपदार्थः-(पूर्व्यम्) पूर्वं भवम् अतएव (प्रत्नम्) प्राचीनं पक्वं (पीयूषम्) पातुं योग्यममृतं (यत्) यम् (उक्थ्यम्) वचनैः प्रशस्यं सोमम् (महः) महतः (गाहात्) गाहनात् (दिवः) द्युलोकात् (आ-निरधुक्षत) आभिमुख्येन नितरामधुक्षत (जायमानम्) उत्पद्यमानम् सन्तं तमेव सोमम् (इन्द्रम्) सूर्यम् (अभि) अभिलक्ष्य (समस्वरन्) स्तोतारः संस्तुवन्ति ॥ ऋग्वेदे तु ९। ११०। ८ प्रत्नं=दिवः इति पाठः ॥ १ ॥

भाषार्थः- (पूर्व्यम्) पूर्व उत्पन्न हुवे अतएव (प्रत्नम्) पुरातन कारण रूप (पीयूषम्) पीने योग्य (यत) जिस (उक्थ्यम्) प्रशंसनीय सोम को (महः) बड़े (गाहात्) अवगाहन (दिवः) द्युलोक से (आ-निरधुक्षत) सामने निरा दुहा था (जायमानम्) लतारूप से उत्पन्न हुवे उसी सोम को (इन्द्रम्) सूर्य को (अभि) लक्ष्य करके (समस्वरन्) प्रशंसित करते हैं॥

वह अमृतसमान पीने योग्य प्राचीन सनातन कारणरूप सोम जो इस इस द्युलोक में भरा है और जिस को सामने करके निरन्तर प्राकृत रसायनी संयोग दुहते हैं उसी सोम को जब वह लता वल्ली पत्र रूप से उत्पन्न होता है तब अभिषुत करके सूर्यार्थ होम करने को लक्ष्य करके स्तुत करते हैं ॥ ऋ० ९। ११०। ८ का पाठान्तर संस्कृत भाष्य में देखिये ॥ १ ॥

अथ द्वितीया-

२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ऽ२र

आदीं केचित्पश्यमानास आप्यं वसु रुचो दिव्या अभ्यऽनूषत।

३ १र २र ३ १ २

दिवो न वारꣳ सविता व्यूर्णुते ॥ २ ॥ (१४९३)

पदपाठः-आत, ईम्, केचित् अ०। पश्यमानासः १। आप्यम्, वसु २। रुचः, दिव्याः २। अभि अ०। अनूषत क्रि०। दिवः ६। न अ०। वारम् २। सविता १। व्यूर्णुते क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(केचित्) केचन (विद्वांसः) (ईम्) एतम् (आप्यम्) अप्सु भवं (वसु) धनं सोमरूपम् (आत्) दूरात् (पश्यमानासः) पश्यन्तः (दिव्याः) दिवि भवाः (रुचः) दीप्तीः (अभि) अभिलक्ष्य (अनूषत) स्तुवन्ति वर्णयन्ति (दिवः) अन्तरिक्षस्य (वारम्) आवरणकरं (न) इव, सोमं (सविता) सूर्यः (व्यूर्णुते) विविधमूर्णुते आच्छादयति ॥ ऋग्वेदे ९। ११०। ६ऽपि॥२॥

भाषार्थः-(केचित्) कोई विद्वान् लोग (ईम्) इस (आप्यम्) जलोत्पन्न (वसु) धन=सोम को (आत्) दूर से (पश्यमानासः) देखते=जानते हुवे (दिव्याः) द्युलोक की (रुचः) दीप्तियों को (अभि) लक्ष्य करके (अनूषत) स्तुत करते हैं। (दिवः) अन्तरिक्ष के (वारम्) आवरण करने वाले (न) से, सोम को (सविता) सूर्य (व्यूर्णुते) विविध प्रकार फैलाता पूरता है ॥ ऋ० ९। ११०। ६ में भी ॥ २ ॥

अथ तृतीया-

२३ २३१२ ३१२ ३१३ २३ १२३ २ ३१ २
अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाऽभि मज्मना ।
३२र ३१ २३१र २र
यूथे न निष्ठा वृषभो विराजसि ॥ ३ ॥ [३] (१४९४)

पदपाठः—अध, यत् अ० । इमे २ । पवमान सं० । रोदसी २ । इमा २ । च अ० । विश्वा, भुवना २ । अभि अ० । मज्मना ३ । यूथे ७ । न अ० । निष्ठाः, वृषभः १ । विराजसि क्रि० ॥

अन्वितपदार्थः-(पवमान) सोम ! (अध) अथ (यत्) यदा (इमे, रोदसी) एते द्यावाभूमी (इमा) इमानि (विश्वा) सर्वाणि (भुवना) भुवनानि (च) (मज्मना) बलेन (यूथे) समूहे (निष्ठाः) स्थितः (वृषभः) वृषः (न) इव (अभि) अभिव्याप्य (विरा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जसि) विराजसे, तदा स्तूयसे इति शेषः ॥ ऋग्वेदे ९ । ११० । ९ऽपि ॥ ३ ॥

भाषार्थः-(पवमान) सोम ! (अध) फिर (यत्) जब कि तू (इमे) इन दोनों (रोदसी) द्युलोक और पृथिवी लोक को (च) और (इमा) इन (विश्वा) सब (भुवना) भुवनों को (मज्मना) बल से (यूथे) झुंड में (निष्ठाः) स्थित (वृषभः) बैल के (न) समान (अभि) अभिव्याप कर (विराजसि) विराजता है, तब स्तुत किया जाता है ॥ ऋ० ९ । ११० । ९ में भी ॥ ३ ॥

अथ चतुर्थतृचस्य-शुनःशेप ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ २उ ३ १ २ ३ १ २ ३ १र २र

इममू षु त्वमस्माकꣳ सनिं गायत्रं नव्याꣳसम् ।

१ २ ३ २ ३ १ २

अग्ने देवेषु प्रवोचः ॥१॥(१४९५) व्याख्याता(२८)

अथ द्वितीया-

३ १ २ ३ १ २ ३ १ २ ३ २

विभक्ताऽसि चित्रभानो सिन्धोरूर्मा उपाक्या ।

३ २ ३ १ २

सद्यो दाशुषे क्षरसि ॥ २ ॥ (१४९६)

पदपाठः-विभक्ता १ । असि क्रि० । चित्रभानो सं० । सिन्धोः ६ । ऊर्मौ ७ । विपाके ७ । आ, सद्यः अ० । दाशुषे ४ । क्षरसि क्रि० ॥

अन्वितपदार्थः-(चित्रभानो) हे विचित्रज्वालावन्नग्ने ! (विभक्ता) भेदकः (असि) भवसि। तत्र दृष्टान्तः- (आ) यथा (सिन्धोः) समुद्रस्य नद्या वा (ऊर्मौ) लहर्य्याम् (उपाके) समीपे भेदकत्वमस्ति, तद्वत् सः त्वं (दाशुषे) हविर्दात्रे यजमानाय (सद्यः) शीघ्रं (क्षरसि) वृष्टिं करोषि ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्निद्वाराभेदं प्राप्तं हव्यं सद्योवृष्टिकरं जायते इति भावः ॥ ऋग्वेदे तु १ । २७ । ६ "उपाक आ" इति पाठः ॥२॥

भाषार्थः—(चित्रभानो) हे विचित्र लपटों वाले ! अग्ने ! तू (विभक्ता) विभाग करने वाला भेदक है, (आ) जैसे (सिन्धोः) समुद्र वा नदी की (ऊर्मा) लहरी में (उपाके) समीप ही विभाग होता है तद्वत् । वह तू (दाशुषे) हव्य देने वाले यज्ञकर्त्ता के लिये (अद्यः) शीघ्र (क्षरसि) वर्षा करता है ॥

अग्नि द्वारा भेद को प्राप्त हुवा हव्य शीघ्र वृष्टिकारक होता है । यह तात्पर्य है ॥ ऋ० १ । २७ । ६ का पाठान्तर संस्कृतभाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१ ३१२ २२ ३ १ २
आ नो भज परमेष्वा वाजेषु मध्यमेषु ।
२ ३ २ ३ १ २
शिक्षा वस्वो अन्तमस्य ॥३॥ [४] (१४९७)

पदपाठः—आ अ० । नः २ । भज क्रि० । परमेषु ७ । आ । वाजेषु, मध्यमेषु ७ । शिक्ष क्रि० । वस्वः, अन्तमस्य ६ ॥

अन्वितपदार्थः—अग्ने ! (परमेषु) उत्कृष्टेषु द्युलोकस्थेषु (वाजेषु) अन्नेषु (नः) अस्मान् (आ-भज) सर्वतः प्रापय (मध्यमेषु) अन्तरिक्षस्थेषु अन्नेषु (आ) अस्मान्प्रापय (अन्तमस्य) समीपस्थस्य भूलोकवर्त्तिनः (वस्वः) वसुनो धनस्य (शिक्ष) दानं कुरु ॥

लोकत्रयवर्त्ति धनं धान्यं च हुतोऽग्निरस्मभ्यं प्रापयत्विति भावः ॥ ऋग्वेदे १ । २७ । ५ ऽपि ॥ ३ ॥

भाषार्थः—अग्ने ! (परमेषु) द्युलोकस्थ परले (वाजेषु) अन्नों में (नः) हम को (आ-भज) पहुंचा और (मध्यमेषु) अन्तरिक्षस्थ बीचले अन्नों में (आ) हमें पहुंचा तथा (अन्तमस्य) समीपस्थ भूलोक के (वस्वः) धन का (शिक्ष) हमें दान कर ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ लोकों के धन धान्य होम किये अग्नि द्वारा हमें प्राप्त हों, यह भाव है ॥ ऋ० १ । २७ । ५ में भी ॥ ३ ॥

अथ पञ्चमतृचस्य-वत्सऋषिः । इन्द्रो देवता । गायत्रीछन्दः ॥ तत्र प्रथमा-

३ २उ ३ १र २र ३ २ ३ १ २ ३ १ २

अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।

३ १र २र

अहꣳसूर्य इवाजान ॥ १ ॥ (१४९८)

व्याख्याता (१५२)

अथ द्वितीया-

३ २ ३ २ ३ १ २ ३ १ २ ३ २

अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत् ।

२उ ३ २ ३ २ ३ २

येनेन्द्रः शुष्ममिद्दधे ॥ २ ॥ (१४९९)

पदपाठः-अहम् १ । प्रत्नेन, जन्मना ३ । गिरः २ । शुम्भामि क्रि० । कण्ववत् अ० । येन ३ । इन्द्रः १ । शुष्मम् २ । इत् अ० । दधे क्रि० ॥

अन्वितपदार्थः-जीवात्माऽऽह-(अहम्) वीतकल्मषोऽहम् (प्रत्नेन) पूर्वतनेन (जन्मना), तत्संस्कारबलेन (कण्ववत्) मेधाविवत् (गिरः) वेदवाचः (शुम्भामि) अलंकरोमि (येन) वेदवागलङ्कारेण (इन्द्रः) परमेश्वरः मयि (शुष्मम्) बलम् (इत्) अवश्यं (दधे) धत्ते ॥

ऋग्वेदे तु ८ । ६ । ११ जन्मना=मन्मना इति पाठः ॥ २ ॥

भाषार्थः-जीवात्मा कहता है कि-(अहम्) मैं निष्पाप (प्रत्नेन) पूर्वले (जन्मना) जन्म के संस्कारबल से (कण्ववत्) बुद्धिमानों के समान [विना पढ़े भी] (गिरः) वेदवाणियों को (शुम्भामि) अलंकृत करता हूं (येन) जिस से (इन्द्रः) परमेश्वर (इत्) अवश्य (शुष्मम्) बल को

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(दधे) मुझे धारित करे ॥ ऋ० ८ । ६ । ११ का पाठभेद संस्कृतभाष्य में देखिये ॥ २ ॥ अथ तृतीया—

१र २र ३ २ ३ १र २र २ १ २ ३ २
ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः ।
१र २र ३ १ २
ममेद्वर्धस्व सुष्टुतः ॥ ३ ॥ [५] (१५००)

पदपाठः–ये १ । त्वाम् २ । इन्द्र सं० । न अ० । तुष्टुवुः क्रि० । ऋषयः, ये १ । च अ० । तुष्टुवुः । मम ६ । इत् अ० । वर्धस्व क्रि० । सुष्टुतः १ ॥

अन्वितपदार्थः–(इन्द्र) हे परमेश्वर ! (ये) नास्तिकाः (त्वाम्) परमेश्वरं (न) (तुष्टुवुः) स्तुवन्ति (ये च) (ऋषयः) मन्त्राणां द्रष्टारः (तुष्टुवुः) स्तुवन्ति तेषामुभयेषां मध्ये (सुष्टुतः) शोभनं यथा स्यात्तथा स्तुतः सन् (मम), सुस्तोतुः (इत्) अवश्यं (वर्धस्व) वृद्धिं कुरु ॥ ऋग्वेदे ८ । ६ । १२ ऽपि ॥ ३ ॥

भाषार्थः–(इन्द्र) हे परमेश्वर ! (ये) जो नास्तिक (त्वाम्) आप की (न तुष्टुवुः) स्तुति नहीं करते (च) और (ये) जो (ऋषयः) मन्त्रों के द्रष्टा लोग (तुष्टुवुः) स्तुति करते हैं, उन दोनों में (सुष्टुतः) भले प्रकार स्तुत किये हुवे आप (मम) मेरी (इत्) अवश्य (वर्धस्व) वृद्धि कीजिये ॥ ऋ० ८ । ६ । १२ में भी ॥ ३ ॥

इति चतुर्दशाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे प्रथमतृचस्य–अग्निर्ऋषिः । अग्निर्देवता ॥ अनुष्टुप्छन्दः ॥ तत्र प्रथमा–

२ ३ १ २ ३ २ ३ २ ३ १ २ १ २ ३ २
अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत । ये देवत्रा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २३ १२ ३ १२

य आयुषु तेभिर्नो महया गिरः ॥ १ ॥ (१५०१)

पदपाठः—अग्ने सं० । विश्वेभिः ३ । अग्निभिः ३ । जोषि क्रि० । ब्रह्म २ । सहस्कृत सं० । ये १ । देवत्रा ७ । ये । आयुषु ७ । तेभिः ३ । नः ६ । महय क्रि० । गिरः २ ॥

अन्वितपदार्थः—(सहस्कृत) सहसा बलेनोत्पादित ! (अग्ने) पावक ! (विश्वेभिः) सर्वैः (अग्निभिः), सह (ब्रह्म) हविरन्नं (जोषि) जुषसे (ये), अग्नयः (देवत्रा) वाय्वादिदेवेषु (ये) ये च (आयुषु) मनुष्येषु तत्तच्छरीरवर्त्तिनः सन्ति (तेभिः) तैरग्निभिः (नः) अस्माकं (गिरः) वाचः (महय) सत्कुरु ॥

सुसेवितो होमेनाऽग्निर्देहगतान्वाय्वादिगतांश्च सजातीयानग्नीन् अस्मदनुकूलान्संपाद्य वाक्सौष्ठवं संपादयति । "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यन्यत्रोक्तेः ॥ ऋग्वेदे तु ३ । २४ । ४ "अग्नेविश्वेभिरग्निभिः" इति प्रथमः पाद एवोपलभ्यते, अर्थस्तु सर्वमन्त्रस्याऽपि समानकल्प एव १

भाषार्थः—(सहस्कृत) बल से अरणियों को रगड़ कर उत्पन्न किये ! (अग्ने) अग्ने ! तू (विश्वेभिः) सब (अग्निभिः) अग्नियों के साथ (ब्रह्म) हव्य अन्न को (जोषि) सेवन करता है (ये) जो अग्नि (देवत्रा) वायु आदि देवतों में हैं (ये) और जो (आयुषु) मनुष्यों में हैं (तेभिः) उन सब के साथ (नः) हमारी (गिरः) वाणियों को (महय) सत्कृत कर ॥

यज्ञ में बलपूर्वक अरणियों से उत्पादित हुत अग्नि मनुष्यों के देहस्थ और आकाश में वायुआदिस्थित में अग्नियों को अनुकूल बना कर वाणी का सुधार करता है क्योंकि अन्यत्र भी कहा है कि " अग्नि वाणी होकर मुख में प्रवेश कर गया " ॥ ऋग्वेद ३ । २४ । ४ में केवल इस ऋचा का प्रथम पाद मिलता है, परन्तु अर्थ पूरे मन्त्र का लगभग इसी के है ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१र २र ३ १ २ ३ १र २र ३ १ २

प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः ।

१ २ ३ २ १ २उ ३ २उ ३ १ २

तनये तोके अस्मदा सम्यङ् वाजैः परीवृतः ॥२॥ (१५०२)

पदपाठः–प्र अ० । सः १ । विश्वेभिः, अग्निभिः ३ । अग्निः, सः १ । यस्य ६ । वाजिनः १ । तनये, तोके ७ । अस्मत् ७ । आ अ० । सम्यङ् १ । वाजैः ३ । परीवृतः १ ॥

अन्वितपदार्थः– (सः) पूर्वोक्तः । (अग्निः) पावकः (यस्य) पावकस्य (वाजिनः) हव्यवन्तो होतारः सन्ति (सः) एषोऽग्निः (विश्वेभिः) सर्वैः (अग्निभिः) जाठराग्निप्रभृतिभिः सह (वाजैः) बलैरन्नैर्वा (परीवृतः) युक्तः सहितः सन् (अस्मत्) अस्मासु (तनये) अस्मत्पुत्रे (तोके) अस्मत्पौत्रे च (सम्यङ्) समीचीनः (आ प्र) आगच्छतु ॥

अस्माकं वंशे पुत्रपौत्रादिकाः सर्वेऽग्निहोत्रानुष्ठानिनः सन्तु इति भावः ॥ २ ॥

भाषार्थः–(सः) पूर्वोक्त (अग्निः) अग्नि (यस्य) जिस अग्नि के (वाजिनः) हव्य वाले होता लोग हैं (सः) वह (विश्वेभिः) सब (अग्निभिः) जाठरादि अग्नियों के सहित (वाजैः) बलों वा अन्नों से (परीवृतः) युक्त हुवा (अस्मत्) हम में (तनये) हमारे पुत्र में (तोके) हमारे पोते में (सम्यङ्) भले प्रकार वर्त्तने वाला (आ प्र) प्राप्त हो ॥
हमारे वंश में पुत्र पौत्रादि परंपरा अग्नि होत्र करने वाली हो, यह भाव है ॥२॥

अथ तृतीया–

१ २ ३ २ ३ १ २ ३ १ २

त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३१२ ३ १र २र

त्वं नो देवतातये रायो दानाय चोदय ॥३॥ [६] (१५०३)

पदपाठः-त्वम् १। नः ६। अग्ने सं०। अग्निभिः ३। ब्रह्म, यज्ञम् २। च अ०। वर्धय क्रि०। त्वम्। नः। देवतातये ४। रायः ६। दानाय ४। चोदय क्रि०॥

अन्वितपदार्थः-(अग्ने) पावक ! (अग्निभिः) पावकैः सह (त्वम्) (नः) अस्माकं (यज्ञम्) होमादि (ब्रह्म) अन्नं (च) (वर्धय) वर्धयसि। (त्वं) तथा त्वमेव (नः) अस्माकं (देवतातये) यज्ञाय (रायः) धनस्य (दानाय) प्रदानाय (चोदय) देवान्प्रेरयसि ॥ ऋग्वेदे १०। १४१। ६ ऽपि ॥ ३ ॥

भाषार्थः—(अग्ने) अग्नि ! (त्वम्) तू (अग्निभिः) अन्य अग्नियों सहित (नः) हमारे (यज्ञम्) यज्ञ (च) और (ब्रह्म) अन्न को (वर्धय) बढ़ाता है (त्वम्) और तू ही (नः) हमारे (देवतातये) यज्ञ के लिये (रायः) धन के (दानाय) देने के लिये (चोदय) देवतों को प्रेरणा करता है ॥ ऋ० १०। १४१। ६ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-त्रसदस्युर्ऋषिः। सोमोदेवता। ऊर्ध्वबृहती छन्दः॥ तत्र प्रथमा-

१ २ ३ २ ३१२ ३१र २र ३ १२३ १२

त्वे सोम प्रथमा वृक्तबर्हिषो, महे वाजाय श्रवसे धियं दधुः।

१र २ ३क २र

स त्वं नोवीर वीर्याय चोदय ॥ १ ॥ (१५०४)

पदपाठः—त्वे ७। सोम सं०। प्रथमाः, वृक्तबर्हिषः १। महे, वाजाय, श्रवसे ४। धियम् २। दधुः क्रि०। सः, त्वम् १। नः ४। वीर सं०। वीर्याय ४। चोदय क्रि०॥

अन्वितपदार्थः-(सोम) ओषधिराज ! (वीर) वीर्यवन् ! (प्रथमाः) मुख्याः (वृक्तबर्हिषः) वृक्तं छिन्नं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बर्हिर्यज्ञार्थं यैस्ते यजमानाः (महे) महते (वाजाय) बलाय (श्रवसे) यशसे च (त्वे) त्वयि (धियम्) बुद्धिं (दधुः) दधति, (सः त्वं) (नः) अस्मभ्यं (वीर्याय) वीरोभ्यो हिताय (चोदय) महद् बलं यशश्च प्रेरय ॥ ऋग्वेदे ९। ११०। ७ऽपि ॥ १ ॥

भाषार्थः—(वीर) वीर्ययुक्त! वीर्यवर्धक! (सोम) सोम! (प्रथमाः) मुख्य (वृक्तबर्हिषः) यज्ञार्थ कुशा काटने वाले यजमान (महे) बड़े (वाजाय) बल के लिये (श्रवसे) और यश के लिये (त्वे) तुझ में (धियम्) बुद्धि को (दधुः) धारण करते हैं, (सः) वह (त्वम्) तू (वीर्याय) वीरों के लिये हित के अर्थ (चोदय) बड़े बल और यश को प्रेरित कर ॥ऋ०९।११०।७में भी॥१॥

अथ द्वितीया—

३ २र ३ १र २र ३ २ ३ २ ३ १र २र ३ २ ३ १ २
अभ्यभि हि श्रवसा ततर्दिथोत्सं न कंचिज्जनपानमक्षितम् ।
१ २ ३ १र २र ३ १ २
शर्याभिर्न भरमाणो गभस्त्योः ॥ २ ॥ (१५०५)

पदपाठः—अभि, अभि, हि० अ०। श्रवसा ३। ततर्दिथ क्रि०। उत्सम् २। न अ०। कंचित् अ०। जनपानम्, अक्षितम् २। शर्याभिः ३। न। भरमाणः १। गभस्त्योः ६ ॥

अन्वितपदार्थः—हे सोम! त्वं (श्रवसा) अन्नेन (गभस्त्योः) दावाभूम्योर्मध्ये (अभि,अभि) उपर्युपरि (उत्सम्) कूपम् (न) इव (ततर्दिथ) भिनत्सि। (न) यथा (भरमाणः) कूपाज्जलमाहरन् (शर्याभिः) अङ्गुलिभिः (कंचित्) (जनपानम्) जनाः पिबन्ति यत्र तम् (अक्षितम्) पूर्णम् भिनत्ति तद्वत् ॥ ऋग्वेदे ९। ११०। ५ऽपि ॥२॥

भाषार्थः—सोम! तू (श्रवसा) अन्न से (गभस्त्योः) द्यावा भूमियों के बीच में (अभि,अभि) ऊपर ऊपर (उत्सम्) कुवा (न) सा (ततर्दिथ)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तोड़ देता है (न) जैसे (प्रस्माणः) कुवा से पानी भरने वाला=कुवा चलाने वाला (कंचित्) किसी (जनपानम्) मनुष्यों के पीने के स्थान को जो (अक्षितम्) भरपूर हो उस को तोड़ता है तद्वत् ॥ऋ०९।११०।५ में भी ॥२॥

अथ तृतीया-

१ २ ३ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २

अजीजनो अमृत मर्त्याय कमृतस्य धर्मन्नमृतस्य चारुणः ।

१ २ ३ २ ३ २ ६ १ २

सदाऽसरोवाजमच्छा सनिष्यदत् ॥ ३ ॥ [७] (१५०६)

पदपाठः—अजीजनः कि० । अमृत सं० । मर्त्याय ४ । कम् २ । ऋतस्य ६ । धर्मन् ७ । अमृतस्य, चारुणः ६ । सदा अ० । असरः कि० । वाजम् २ । अच्छ अ० । सनिष्यदत् कि० ॥

अन्वितपदार्थः-(अमृत) हे अमृत ! त्वम् (ऋतस्य) सत्यभूतस्य (चारुणः) कल्याणस्य (अमृतस्य) उदकस्य (धर्मन्) धारकेऽन्तरिक्षे (कम्) सुखम् (मर्त्याय) मनुष्याय (अजीजनः) जनयसि तथा (वाजम्) अन्नं (सनिष्यदत्) संभजसि (अच्छ) सुष्टु (असरः) सरसि ॥ ऋग्वेदे ९ । ११० । ४ऽपि ॥ ३ ॥

भाषार्थः-(अमृत) हे अमृत ! सोम ! तू (ऋतस्य) सच्चे (चारुणः) सुन्दर (अमृतस्य) जल के (धर्मन्) धारक अन्तरिक्ष में (कम्) सुख को (मर्त्याय) मनुष्य के लिये (अजीजनः) उत्पन्न करता है तथा (वाजम्) अन्न को (सनिष्यदत्) बांटता और (अच्छ) अच्छे प्रकार (असरः) चलता है ॥ ऋ० ९ । ११० । ४ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-विश्वमनाऋषिः । इन्द्रोदेवता ।

उष्णिक् छन्दः ॥ तत्र प्रथमा-

२ ३ १ २ ३ १ २ ३ १र २र

एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१र २र ३ २
प्र राधाꣳसि चोदयते महित्वना ॥ १ ॥ (१५०७)

व्याख्याता (३८६)

अथ द्वितीया–

२३ १२३ २३ १२ ३१ २
उपो हरीणां पतिꣳराधः पृञ्चन्तमब्रवम् ।
३१ २ ३२ ३१ २
नूनꣳश्रुधि स्तुवतो अश्वस्य ॥२॥ (१५०८)

पदपाठः–उप, उ अ० । हरीणाम् ६ । पतिम् २ । राधः २ । पृञ्चन्तम् २ । अब्रवम् क्रि० । नूनम् अ० । श्रुधि क्रि० । स्तुवतः, अश्वस्य ६ ॥

अन्वितपदार्थः–(अश्वस्य) प्राणस्य (स्तुवतः) प्रशंसां कुर्वतो मनुष्यस्य मम (नूनम्) अवश्यम् (श्रुधि) अङ्गीकुरु प्रार्थनामिति शेषः । हे ईश्वर ! इन्द्र ! (हरीणाम्) प्राणानां (पतिम्) पालकं (राधः) धनं (पृञ्चन्तम्) ददतं त्वाम् (उप–उ–अब्रवम्) उपेत्य ब्रवीमि ॥ऋग्वेदे तु ८ । २४ । १४ राधः=दक्षमिति पाठः ॥ २ ॥

भाषार्थः–(अश्वस्य) प्राण की (स्तुवतः) स्तुति प्रशंसा करने वाले मुझ मनुष्य की (नूनम्) अवश्य (श्रुधि) सुनाई कीजिये । हे ईश्वर ! इन्द्र ! (हरीणाम्) प्राणों के (पतिम्) पालक (राधः) धन को (पृञ्चन्तम्) देने वाले आपसे (उप–उ–अब्रवम्) शरणागत हो कर जो कुछ कहता हूं ॥ ऋ० ८ । २४ । १४ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

२३ २ ३२ ३२ ३२ ३१२३ २
नह्याऽ३ऽङ्ग पुराचन जज्ञे वीरतरस्त्वत् ।
१२३ २उ ३ २३१ २
नकीराया नैवथा न भन्दना ॥३॥ [८] (१५०९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—न, हि अ० । अङ्ग सं० । पुराचन अ० । जज्ञे क्रि० । वीरतरः १ । त्वत् ५ । नकिः अ० । राया ३ । न अ० । एवथा अ० । न । भन्दना ३ ॥

अन्वितपदार्थः—(अङ्ग) हे प्रिय ! परमेश्वर ! इन्द्र ! (त्वत्) त्वत्तोधिकः (पुराचन) पुराऽपि, नाऽपि वर्त्तमाने (वीरतरः) अतिशयेन वीरः (न हि जज्ञे) नजा तः (नकिः राया) नापि धनेन, (न एवथा) न रक्षया (न भन्दना) न स्तुत्यत्वेन किन्तु त्वमेव सर्वोत्तमो धनवान्, रक्षकः, स्तुत्यश्चासि ॥ ऋग्वेदे ८ । २४ । १५ऽपि ॥ ३ ॥

भाषार्थः—(अङ्ग) हे प्रिय ! इन्द्र ! परमेश्वर ! (पुराचन) पूर्वकाल में भी और वर्त्तमान में भी (त्वत्) आप से अधिक (वीरतरः) अत्यन्त वीर पुरुष कोई (नहि) नहीं (जज्ञे) उत्पन्न हुवा, (न) न तो (राया) धन से, (न) न (एवथा) रक्षा से (न) और न (भन्दना) स्तुत्यपने से अर्थात् आप ही सर्वोपरि धनी, रक्षक और स्तुत्य हैं ॥ ऋ० ८ । २४ । १५ में भी ॥३॥

अथैकर्चस्य चतुर्थसूक्तस्य—प्रियमेधऋषिः । इन्द्रो देवता । अनुष्टुप्छन्दः ॥ सेयम्—

३ २ ३ १ २ ३ १ र २ र १ २ ३

नदं व ओदतीनां नदं योयुवतीनाम् । पतिं वो

१ २ ३ १ २

अघ्न्यानां धेनूनामिषुध्यसि ॥१॥[९] (१५१०)

पदपाठः—नदम् २ । वः, ओदतीनाम् ६ । नदम् । योयुवतीनाम् ६ । पतिम् २ । वः, अघ्न्यानाम्, धेनूनाम् ६ । इषुध्यसि क्रि० ॥

अन्वितपदार्थः—(वः) युष्माकं भक्तानां पुरुषाणाम् (ओदतीनाम्) उषसां (नदम्) स्तोतारम् प्रशंसकं (योयुवतीनाम्) संयोजकानां चन्द्रकिरणानाम् (नदम्) प्रशंसकम् (अघ्न्यानां धेनूनाम्) अहिंस्यानां गवां (पतिम्) पालकमिन्द्रं परमेश्वरम् (इषुध्यसि) इषुध्यामि [निघं० ३ । १९] याचे ॥ ऋग्वेदे ८ । ६९ । २ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(वः) तुम्हारी (ओदतीनाम्) उषाओं के (नदम्) प्रशंसक (योयुवतीनाम्) संयोजक चन्द्रकिरणों के (नदम्) प्रशंसक (अघन्यानां धेनूनाम्) न मारने योग्य गौवों के (पतिम्) पालक इन्द्र=परमेश्वर को (इषुध्यसि) प्रार्थित करता हूं ॥ ऋ० ८ । ६९ । २ में भी ॥ १ ॥

इति चतुर्दशोऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे—

प्रगाथस्य तृतीयसूक्तस्य-वसिष्ठऋषिः । अग्निर्देवता । बृहती छन्दः ॥

तत्र प्रथमा—

३ १ २ ३ २ ३ १ २ ३ १ २
देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् ।
१ २ ३ २ ३ १ २ ३ ३ १र २र ३ १
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वोदेव
२
ओहते ॥ १ ॥ (१५११) व्याख्याता (५५)

अथ द्वितीया—

१र २र ३ २ ३ १ २ ३ १ २ ३ १ २
तꣳ होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
१ २ ३ १ २ ३ २ ३ १ २ ३ १र २र ३ १ २
दधाति रत्न विधते सुवीर्यमग्निर्जनाय दाशुषे ॥
॥ २ ॥ [१०] (१५१२)

पदपाठः-तम्, होतारम् २ । अध्वरस्य ६ । प्रचेतसम्, वह्निम् २ । देवाः १ । अकृण्वत, दधाति क्रि० । रत्नम् २ । विधते ४ । सुवीर्यम् २ । अग्निः १ । जनाय, दाशुषे ४ ॥

अन्वितपदार्थः-(देवाः) वाय्वादयः (तम्), (वह्निम्) अग्निम् (अध्वरस्य) यज्ञस्य (प्रचेतसम्) सावधानं (होतारम् (अकृण्वत) कुर्वन्ति। (अग्निः) सः पावकः (विधते) परिचरते (दाशुषे) दानिने (जनाय) यजमानाय (रत्नं)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रमणीयं (वीर्यम्) बलं (दधाति) ॥ ऋग्वेदे ७ । १६ । १२ ऽपि ॥ २ ॥

भाषार्थः-(देवाः) देवतों ने (तम्) उस (अग्निम्) अग्नि को (अध्वरस्य) यज्ञ का (प्रचेतसम्) सचेत (होतारम्) होता (अकृण्वत) बनाया है । (अग्निः) वह अग्नि (विधते) अग्निपरिचर्या करने वाले (दाशुषे) दानी (जनाय) मनुष्य=यजमान के लिये (रत्नम्) रमणीय (वीर्यम्) बल को (दधाति) धारित करता है ॥ ऋ० ७ । १६ । १२ में भी ॥ २ ॥

अथ तृचस्य द्वितीयसूक्तस्य-सौभरिर्ऋषिः । अग्निर्देवता । बृहती छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २ ३ २ २ ३ २ ३ १ २ २ ३

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः । उपो षु जातमार्यस्य

१ २ ३ १ २ ३ १ २

वर्धनमग्निं नक्षन्तु नो गिरः ॥१॥(१५१३) व्याख्याता (४७)

अथ द्वितीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ २

यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः । सहस्रसां

३ १ २ ३ २ ३ २ ३ १ २

मेधसाताविव त्मनाऽग्निं धीभिर्नमस्यत ॥२॥ (१५१४)

पदपाठः-यस्मात् ५ । रेजन्त क्रि० । कृष्टयः १ । चर्कृत्यानि २ । कृण्वतः ५ । सहस्रसाम् २ । मेधसातौ ७ । इव अ० । त्मना ३ । अग्निम् २ । धीभिः ३ । नमस्यत क्रि० ॥

अन्वितपदार्थः-(यस्मात्) कारणात् (कृष्टयः) मनुष्याः (चर्कृत्यानि) अग्निप्रयुक्तकर्माणि (कृण्वतः) कुर्वाणात् (रेजन्त) भयेन कम्पन्ते, तस्मात् कारणात् हे याज्ञिकाः ! (मेधसातौ) यज्ञे (धीभिः) बुद्धिभिः कर्मभिर्वा (सहस्रसाम्) सहस्रदम् (अग्निम्) पावकम् (त्मना)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आत्मना (इव) (नमस्यत) परिचरत ॥ ऋग्वेदे ८ । १०३ । ३ ऽपि ॥ २ ॥

भाषार्थः-(यस्मात्) जिस कारण (कृष्टयः) मनुष्य (चर्कृत्यानि) अग्नि से किये कामों को (कृण्वतः) करते हुवे पुरुष से (रेजन्त) कांपते हैं, इस कारण हे याज्ञिको ! तुम (सहस्रसाम्) असंख्यदायक (अग्निम्) अग्नि की (त्मना) आत्मा के (इव) समान (नमस्यत) परिचर्या करो ॥

ऋ० ८ । १०३ । ३ में भी ॥ २ ॥

अथ तृतीया—

१ २र ३ २ ३२उ ३ २ ३ १ २ १ २ ३ १ २
प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना । अनु मातरं
३ १ २र ३ १ २र ३ १ २
पृथिवीं विवावृते तस्थौ नाकस्य शर्मणि ॥३॥[११](१५१५)

व्याख्याता (५१)

अथ तृतीयतृचस्य-वैखानसऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

२ ३ १ २ ३ २ ३ २ ३ १ २
अग्न आयू ꣳषि पवस आसुवोर्जमिषं च नः ।
३ १ २ ३ १ २
आरे बाधस्व दुच्छुनाम् ॥१॥ (१५१६) व्याख्याता (६२७)

अथ द्वितीया-

३ २उ ३ १ २ ३ १ २ ३ १ २
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
१ २ ३ २
तमीमहे महागयम् ॥ २ ॥ (१५१७)

पदपाठः-अग्निः, ऋषिः, पवमानः, पाञ्चजन्यः, पुरोहितः १ । तम् २ । ईमहे क्रि० । महागयम् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(ऋषिः) दृष्टिसहायकः (पवमानः) शोधकः (पाञ्चजन्यः) ब्रह्मादिपञ्चानामृत्विजामयम् (पुरोहितः) अग्रे आहितः (अग्निः) पावकोस्ति (तम्) उक्तम् (महागयम्) महाप्राणमऽग्निम् (ईमहे) परिचरामः ॥ ऋग्वेदे ९ । ६६ । २० ऽपि ॥ २ ॥

भाषार्थः-(ऋषिः) दृष्टि का सहायक (पवमानः) शोधक (पाञ्चजन्यः) ब्रह्मा होता उद्गाता अध्वर्यु और यजमान इन ५ जनों का (पुरोहितः) आगे स्थापन किया हुवा (अग्निः) अग्नि है (तम्) उस (महागयम्) महाप्राण वाले अग्नि को (ईमहे) हम परिचरित करते हैं ॥

ऋ० ९ । ६६ । २० में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ १ २ ३ १र २र ३ १ २

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।

१ २ ३ २ऽ ३ १ २

दधद्रयिं मयि पोषम् ॥ ३ ॥ [१२] (१५१८)

पदपाठः-अग्ने सं० । पवस्व क्रि० । स्वपाः १ । अस्मे ४ । वर्चः, सुवीर्यम् २ । दधत् क्रि० । रयिम् २ । मयि ७ । पोषम् २ ॥

अन्वितपदार्थः- (अग्ने) पावक ! (स्वपाः) शोभनकर्मा त्वम् (अस्मे) अस्मभ्यं (सुवीर्यम्) शोभनवीर्योपेतम् (वर्चः) तेजः (पवस्व) आगमय तथा (रयिम्) धनं (पोषम्) पुष्टिं च (मयि) याज्ञिके (दधत्) धारय ॥ ऋग्वेदे ९ । ६६ । २१ ऽपि, यजुर्वेदे ८ । ३८ ऽपि च ॥ ३ ॥

भाषार्थः-(अग्ने) अग्ने ! (स्वपाः) उत्तम कर्मकाण्ड का साधन तू (अस्मे) हमारे लिये (सुवीर्यम्) शोभन वीर्यसहित (वर्चः) तेज को (पवस्व) प्राप्त करा, तथा (रयिम्) धन और (पोषम्) पुष्टि को (दधत्) धारण करा ॥ ऋ० ९ । ६६ । २१ में तथा यजुः ८ । ३८ में भी ॥ ३ ॥

अथ चतुर्थतृचस्य-वसूयव ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
२ ३ १ २ ३ १ २
आ देवान्वक्षि यक्षि च ॥ १ ॥ (१५१९)

पदपाठः—अग्ने, पावक सं० । रोचिषा, मन्द्रया ३ । देव सं० । जिह्वया ३ । आ अ० । देवान् २ । वक्षि, यक्षि क्रि० । च अ० ॥

अन्वितपदार्थः—(अग्ने) अग्ने ! (पावक) शुद्धि-कर्त्तः ! (देव) देव ! त्वम् (मन्द्रया) मादयित्र्या (रोचिषा) दीप्तिमत्या (जिह्वया) ज्वालया (देवान्) वाय्वादीन् (आ वक्षि) आवहसि (यक्षि) यजसि (च) ॥ ऋग्वेदे ५ । २६ । १ यजुर्वेदे १७ । ८ ऽपि च ॥ १ ॥

भाषार्थः—(अग्ने) अग्ने ! (पावक) पावन ! (देव) देव ! तू (मन्द्रया) सुखदायिनी (रोचिषा) दीप्ति वाली (जिह्वया) लपट से (देवान्) वायु आदि देवतों को (आ-वक्षि) बुलाता (च) और (यक्षि) उन का यजन करता है ॥ ऋ० ५ । २६ । १ यजुः १७ । ८ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १ २ ३ १ २
तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।
३ २उ ३ १ २
देवाँ आ वीतये वह ॥ २ ॥ (१५२०)

पदपाठः— तम्, त्वा २ । घृतस्नो सं० । ईमहे क्रि० । चित्रभानो सं० । स्वर्दृशम् २ । देवान् २ । आ अ० । वीतये ४ । वह क्रि० ॥

अन्वितपदार्थः—(चित्रभानो) विचित्रस्फुलिङ्गवन् ! (घृतस्नो) हुतस्य घृतस्य प्रेरक ! देवेषु प्रापक ! (स्वर्दृशम्) सुखस्य दर्शकं (तं) (त्वा) त्वाम् (ईमहे)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

याचामहे, यत् (देवान्) वाय्वादीन् (वीतये) हविर्भक्षणाय (आ-वह), इति ॥ ऋग्वेदे ५ । २६ । २ ऽपि ॥ २ ॥

भाषार्थः-(विश्वभानो) हे विचित्र चिनगारी वा दीप्ति वाले (घृतस्नो) घृत को, जो होमा जाता है, देवों को पहुंचाने वाले ! (स्वर्दृशम्) सुख दिखाने वाले (तम्) उस (त्वा) तुझ को (ईमहे) चाहते हैं कि (देवान्) वायु आदि देवों को (वीतये) हव्य भक्षण के लिये (आ-वह) बुला ॥ ऋ० ५ । २६ । २ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ २ ३ १ २
वीतिहोत्रं त्वा कवे द्युमन्तꣳसमिधीमहि ।
१ २ ३ १ २ ३ २
अग्ने बृहन्तमध्वरे ॥ ३ ॥ [१६] (१५२१)

पदपाठः—वीतिहोत्रम् , त्वा २ । कवे सं० । द्युमन्तम् २ । समिधीमहि क्रि० । अग्ने सं० । बृहन्तम् २ । अध्वरे ७ ॥

अन्वितपदार्थः-(कवे) क्रान्तदर्शिन् ! (अग्ने) पावक ! (वीतिहोत्रम्) हव्यभक्षकम् (द्युमन्तम्) दीप्तिमन्तम् (बृहन्तम्) महान्तम् (त्वा) त्वाम् (अध्वरे) यज्ञे (समिधीमहि) समिद्भिः संदीपयामः ॥ ऋग्वेदे ५ । २६ । ३ यजुर्वेदे ११ । ४ऽपि च ॥ ३ ॥

भाषार्थः-(कवे) क्रान्तदर्शिन् (अग्ने) अग्ने ! (वीतिहोत्रम्) हव्यभक्षक (द्युमन्तम्) दीप्तिवाले (बृहन्तम्) महान् (त्वा) तुझ को हम (अध्वरे) यज्ञ में (समिधीमहि) समिधाओं से संदीप्त करते हैं ॥ ऋ० ५ । २६ । ३ यजुः ११ । ४ में भी ॥ ३ ॥

इति चतुर्दशाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

—○:※:○—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ

चतुर्थे खण्डे प्रथमतृचस्य–गोतमऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा–

१ २ ३ १ २ ३ २ ३ १ २

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।

१ २ ३ १ २

विश्वासु धीषु वन्द्य ॥ १ ॥ (१५२२)

पदपाठः–अव क्रि० । नः २ । अग्ने सं० । ऊतिभिः ३ । गायत्रस्य ६ । प्रभर्मणि ७ । विश्वासु, धीषु ७ । वन्द्य सं० ॥

अन्वितपदार्थः–(वन्द्य) वन्दनीय ! (अग्ने) ज्ञानस्वरूप ! परमेश्वर ! (गायत्रस्य) गीतियुक्तस्य साम्नः गायत्रीछन्दस्कस्य वा (प्रभर्मणि) प्रभरणे संपादने यज्ञे (विश्वासु) सर्वासु (धीषु) कर्माऽपरनाम्नीषु (नः) अस्मान् (अव) रक्ष ॥ ऋग्वेदे १ । ७९ । ७ऽपि ॥ १ ॥

भाषार्थः-(वन्द्य) हे वन्दनीय ! (अग्ने) प्रकाशस्वरूप ! परमेश्वर ! (गायत्रस्य) गीतियुक्त साम वा गायत्रीछन्दोबद्धमन्त्र के (प्रभर्मणि) सम्पादन यज्ञ में (विश्वासु) सब (धीषु) कर्मों में (नः) हम को (अव) रक्षित कीजिये ॥ऋ०१।७९।७में भी ॥१॥

अथ द्वितीया

१ २ ३ १ २ ३ २ ३ १ २

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् ।

१ २ ३ २ ३ १ २

विश्वासु पृत्सु दुष्टरम् ॥ २ ॥ (१५२३)

पदपाठः– आ अ० । नः ४ । अग्ने सं० । रयिम् २ । भर क्रि० । सत्रासाहम्, वरेण्यम् २ । विश्वासु, पृत्सु ७ । दुष्टरम् २ ॥

अन्वितपदार्थः–(अग्ने) हे ज्ञानस्वरूप ! (नः) अस्मभ्यम् (सत्रासाहम्) सत्रा सह युगपदेव द्वारिद्र्यस्य नाशनं (वरेण्यम्) अतएव वरणीयम् (विश्वासु पृत्सु)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वेषु संग्रामेषु (दुष्टरम्) शत्रुभिस्तरीतुमशक्यम् (रयिम्) धनम् (आ-भर) आहर ॥ ऋग्वेदे १ । ७९ । ८ऽपि ॥ २ ॥

भाषार्थः—(अग्ने) हे ज्ञानस्वरूप ! (नः) हमारे लिये (सत्रासाहम्) एक साथ दारिद्र्य के नाशक अतएव (वरेण्यम्) वरणीय (विश्वा पृत्सु) सब संग्रामों में (दुष्टरम्) दुस्तर (रयिम्) धन (आभर) प्राप्त कराइये ॥ ऋ० १।७९।८ में भी ॥२॥

अथ तृतीया—

१ २ ३ १ २ ३ २ ३ १ २

आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् ।

३ १ ३ ३ १ २

मार्डीकं धेहि जीवसे ॥ ३ ॥ [१४] (१५२४)

पदपाठः—आ अ० । नः ४ । अग्ने सं० । सुचेतुना ३ । रयिम्, विश्वायुपोषसम्, मार्डीकम् २ । धेहि क्रि० । जीवसे अ० ॥

अन्वितपदार्थः—(अग्ने) ज्ञानस्वरूप ! परमेश्वर ! (नः) अस्मभ्यम् (जीवसे) जीवितुम् (सुचेतुना) शोभनेन ज्ञानेन युक्तं (मार्डीकम्) सुखहेतुकं (विश्वायुपोषसम्) सर्वमनुष्यपोषकं (रयिम्) धनम् (आ धेहि) आ धारय ॥ ऋग्वेदे १ । ७९ । ९ऽपि ॥ ३ ॥

भाषार्थः—(अग्ने) ज्ञानस्वरूप ! परमात्मन् ! (नः) हमारे लिये (जीवसे) आजीवनार्थ (सुचेतुना) अच्छी चेतना [होशियारी] के सहित, (मार्डीकम्) सुखहेतु, (विश्वायुपोषसम्) सर्व मनुष्यों के पालक पोषक, (रयिम्) धन को (आ-धेहि) सर्वतोभाव से धारित कीजिये ॥ ऋ० १।७९।९ में भी ॥३॥

अथ पञ्चर्चस्य द्वितीयसूक्तस्य—केतुर्ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु ।

१ २ ३ १ २

तेन जेष्म धनं धनम् ॥ १ ॥ (१५२५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अग्निम् २ । हिन्वन्तु क्रि० । नः ६ । धियः १ । सप्तिम्, आशुम् २ । इव अ० । आजिषु ७ । तेन ३ । जेष्म क्रि० । धनम्, धनम् २ ॥

अन्वितपदार्थः—(नः) अस्माकं (धियः) बुद्धयः (अग्निम्), (हिन्वन्तु) प्रेरयन्तु (आजिषु) संग्रामेषु (इव) यथा (आशुम्) शीघ्रगम् (सप्तिम्) अश्वम् प्रेरयन्ति तद्वत् । (तेन) अग्निप्रेरणेन (धनं धनं) सर्वं धनम् (जेष्म) अर्जितुं शक्नुयाम ॥ सुप्रेरितोऽग्निरश्व इव बलवान् बलसाध्य-कार्यसाधकोनानायन्त्रस्थापितः सर्वधनप्राप्तिहेतुरतोऽस्माकं बुद्धयोऽग्निं प्रेरयन्तु ॥ ऋग्वेदे १० । १५६ । १ऽपि ॥ १ ॥

भाषार्थः—(नः) हमारी (धियः) बुद्धियें (अग्निम्) अग्नि को (हिन्वन्तु) प्रेरित करें (तेन) उस से हम (धनं धनम्) धन ही धन (जेष्म) कमासकें (इव) जैसे (आजिषु) संग्रामों में (आशुम्) शीघ्रगामी (सप्तिम्) तुरङ्ग को प्रेरित करते हैं, तद्वत् ॥

अर्थात् नाना प्रकार के यन्त्रों में स्थापित किया अग्नि चलाक घोड़े के समान बलवान् बलसाध्य कार्यों का साधक है, अतः हम चाहते हैं कि हमारी बुद्धियें चातुर्य से अग्नि को प्रेरित करना जानें ॥ ऋ० १० । १५६ । १ में भी ॥१॥

अथ द्वितीया—

२ ३ २ ३ १ २ ३ १ २ ३ २ ३ २
यया गा आकरामहै सेनयाग्ने तवोत्या ।
१ २ ३ १ २
तां नो हिन्व मघत्तये ॥ १ ॥ (१५२६)

पदपाठः—यया ३ । गाः २ । आकरामहै क्रि० । सेनया ३ । अग्ने सं० । तव ६ । ऊत्या ३ । ताम् २ । नः ४ । धेहि क्रि० । मघत्तये ४ ॥

अन्वितपदार्थः—(अग्ने) पावक ! (सेनया) इनेन सूर्येण सह वर्त्तमानया (यया) (तव) त्वत्कृतया (ऊत्या) रक्षया गत्या वा वयं (गाः) सूर्यकिरणान् (आकरामहै)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आहूयामहै=आकर्षयाम (ताम्) गतिं रक्षां वा (नः) अस्मभ्यं (मघत्तये) धनस्य दानाय धनलाभाय (हिन्व) प्रेरय ॥

येऽग्निप्रेरणं जानन्ति ते सूर्यकिरणगतमग्निं संसाध्याऽनेकानि धनलाभकार्याणि कर्त्तुं शक्नुवन्ति ॥ ऋग्वेदे १० । १५६ । २ ऽपि ॥ २ ॥

भाषार्थः-(अग्ने) अग्ने ! (शेनया) सूर्यसहित (यया) जिस (तव) तेरी की हुई (ऊत्या) रक्षा वा गति से (गाः) सूर्यकिरणों को (आक्रामहै) हम खींच सकें (ताम्) उस गति वा रक्षा को (नः) हमारे लिये (मघत्तये) धनदानार्थ=धनलाभार्थ (हिन्व) प्रेरित कर ॥ जो लोग अग्नि से गति उत्पन्न करना जानते हैं वे सूर्य की किरणों में से अग्नि खींच कर सिद्ध करके अनेक धनलाभदायक कार्य कर सकते हैं ॥ ऋ० १० । १५६ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ १ २ ३ १र २र ३ १ २

आऽग्ने स्थूरꣳ रयिं भर पृथुं गोमन्तमश्विनम् ।

३ २उ ३ १ २ ३ २

अङ्ग्धि खं वर्त्तया पविम् ॥ ३ ॥ (१५२७)

पदपाठः-आ अ० । अग्ने सं० । स्थूरम्, रयिम् ३ । भर क्रि० । पृथुम्, गोमन्तम्, अश्विनम् २ । अङ्ग्धि क्रि० । खम् २ । वर्त्तय क्रि० । पविम् २ ॥

अन्वितपदार्थः-(अग्ने) अग्ने ! (स्थूरम्) स्थूलम् वृद्धं (पृथुम्) विस्तीर्णं (रयिम्) धनम् (आ-भर) आहर (खम्) आकाशम् (पविम्) शुद्धम् (गोमन्तम्) किरणवन्तम् (अङ्ग्धि) व्यञ्जय (अश्विनम्) प्राणवन्तम् (वर्त्तय) ॥ सुसेवितोहुतोऽग्निर्धनं वायुमाकाशं च स्वच्छं संपाद्य सुखयति इति भावः ॥ ऋग्वेदे तु १० । १५६ । ३ पविम्=पणिमिति पाठभेदः ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(अग्ने) अग्ने ! (स्थूरम्) स्थूल बहुत (पृथुम्) विस्तृत (रयिम्) धन को (आ-भर) प्राप्त करा और (खम्) आकाश को (पविम्) स्वच्छ शुद्ध (गोमन्तम्) किरणों वाला (अङ्ग्धि) प्रकट कर और (अ-श्विनम्) प्राण वायु वाला (वर्त्तय) वर्त्ताव ॥

होम से सुसेवित अग्नि द्वारा पुष्कल धन धान्य की प्राप्ति, आकाश की स्वच्छता, धूप, वर्षा, प्राणवायु आदि का ठीक २ वर्त्ताव और प्रकाश होता है ॥ ऋ० १० । १५६ । ३ का पाठान्तर संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थी—

२ ३ १ २ ३ २ ३ १ २ २ ३ २

अग्ने नक्षत्रमजरमासूर्यꣳ रोहयो दिवि ।

२ ३ २ ३ १ २

दधज्ज्योतिर्जनेभ्यः ॥ ४ ॥ (१५२८)

पदपाठः-अग्ने सं० । नक्षत्रम् , अजरम् २ । आ अ० । सूर्यम् २ । रोहयः क्रि० । दिवि ७ । दधत् १ । ज्योतिः २ । जनेभ्यः ४ ॥

अन्वितपदार्थः-(अग्ने) अग्ने ! (जनेभ्यः) प्राणिभ्यः (ज्योतिः) प्रकाशं (दधत्) धारयन् त्वं (दिवि) आकाशे (अजरम्) जरारहितं (नक्षत्रम्) कृत्तिकादिनक्षत्रमण्डलं (सूर्यम्) आदित्यं च (आ-रोहयः) ॥ अग्निना देवेन भौतिकेन परमेश्वरेण वा सर्वेभ्यः प्रकाशार्थं नक्षत्राणि सूर्यश्च दिवमारोहितः ॥ ऋग्वेदे १० । १५६ । ४ ऽपि ॥ ४ ॥

भाषार्थः-(अग्ने) हे अग्ने ! (जनेभ्यः) प्राणियों के लिये (ज्योतिः) प्रकाश=रोशनी को (दधत्) धारित कराते हुवे पहुंचाते हुवे तूने (अजरम्) जरारहित (नक्षत्रम्) कृत्तिकादि २७ वा २८ नक्षत्रों के मण्डल और (सूर्यम्) सूर्य को (दिवि) आकाश में (आ-रोहयः) चढाया है ॥

जगत्स्रष्टा वा भौतिकाग्निदेव ने सब लोगों को प्रकाश पहुंचे इस लिये नक्षत्र और सूर्य आकाश में ऊंचे टांगे हैं ॥ ऋ० १० । १५६ । ४ में भी ॥ ४ ॥

अथ पञ्चमी—

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २

अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २उ ३१२

बोधा स्तोत्रे वयोदधत् ॥ २ ॥ (१५२९)

पदपाठः–अग्ने सं० । केतुः १ । विशाम् ६ । असि क्रि० । प्रेष्ठः, श्रेष्ठः, उपस्थ-सत् १ । बोध क्रि० । स्तोत्रे ४ । वयः २ । दधत् १ ॥

अन्वितपदार्थः–(अग्ने) अग्ने ! त्वम् (विशाम्) प्रजानाम् (प्रेष्ठः) अतिप्रियः (श्रेष्ठः) अत्युत्तमः (उप-स्थसत्) यज्ञे स्थितः (केतुः) ज्ञानदः (स्तोत्रे) वेदमन्त्र-द्वारा त्वद्गुणवर्णनपराय पुरुषाय यजमानाय (वयः) अन्नं (दधत्) धारयन् (असि) भवसि । स त्वं (बोध) बोधय चेतय ॥ सुष्ठूपासितोऽग्निरीश्वरोवा प्रजानां प्रियउत्तमोज्ञान-दोऽन्नदश्च भवति ॥ ऋग्वेदे १० । १५६ । ५ ऽपि ॥ ५ ॥

भाषार्थः–(अग्ने) अग्ने तू (विशाम्) प्रजाओं का (प्रेष्ठः) अतिप्यारा (श्रेष्ठः) अतिउत्तम (उपस्थसत्) यज्ञ में स्थित (केतुः) ज्ञानदाता (स्तोत्रे) वेदमन्त्रों से अग्निगुण वर्णन करने वाले यजमान के लिये (वयः) अन्न को (दधत्) धारण कराता हुवा (असि) है । सो तू (बोध) चेताव ॥

भले प्रकार सेवित अग्नि वा परमेश्वर प्रजाओं का अतिप्रिय अत्युत्तम ज्ञानदाता अन्नदाता और चेताने वाला है ॥ ऋ० १० । १५६ । ५ में भी ॥ ५ ॥

अथ तृचस्य तृतीयसूक्तस्य–विरूपऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा–

१ २ ३ २ ३ २ ३१र २र ३ २ ३

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

३१र २र

अपाꣳ रेताꣳसि जिन्वति ॥ १ ॥ (१५३०) व्याख्याता (२७)

अथ द्वितीया–

१ २ ३ १ २ ३ २ ३१ २ ३ २र

ईशिषे वार्यस्य हि दात्रस्याग्ने स्वः पतिः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ २३ १ २
स्तोता स्यां तव शर्मणि ॥ २ ॥ (१५३१)

पदपाठः-ईशिषे क्रि० । वार्यस्य ६ । हि अ० । दात्रस्य ६ । अग्ने सं० । स्वः अ० । पतिः १ । स्तोता १ । स्याम् क्रि० । तव ६ । शर्मणि ७ ॥

अन्वितपदार्थः-(अग्ने) पावक ! त्वं (स्वः) सुखस्य (पतिः) स्वामी (वार्यस्य) वरणीयस्य (दात्रस्य) दातव्यस्य धनस्य धान्यस्य च (हि) निश्चयेन (ईशिषे) ईश्वरोऽसि, अतएव (शर्मणि) सुखे निमित्ते (तव) अग्नेः (स्तोता) गुणज्ञोगुणकीर्त्तनपरश्च (स्याम्) भवेयम् ॥

यस्मादग्निविद्यया मनुष्याः वरणीयस्य दानादिकृत्य प्रयोक्तव्यस्य च धनधान्यादिकस्य स्वामिनोभवितुमर्हन्ति अतोमनुष्यैस्तद्विषयकविद्याविद्भिर्भवितव्यम्, तच्च तद्गुणवर्णनादेव साध्यम् ॥ ऋग्वेदे ८ । ४४ । १८ ऽपि ॥ २ ॥

भाषार्थः-(अग्ने) अग्ने ! तू (स्वः) सुख का (पतिः) स्वामी है और (वार्यस्य) वरणीय (दात्रस्य) दान करने योग्य धन धान्य का (ईशिषे) स्वामी है, अतः मैं (शर्मणि) सुख चाहूं तो (तव) तेरा (स्तोता) गुणवर्णनकर्त्ता (स्याम्) होऊं ॥

अग्निविद्या से मनुष्य उत्तम धन धान्यादि से जो दानादि में काम में लाये जावें उन के स्वामी हो सक्ते हैं अतः मनुष्यों को अग्निविषयक विज्ञान प्राप्त करने वाला होना चाहिये और वह तब होसक्ता है जब कि वे अग्नि के स्तोता=गुण खोजने में श्रम करने वाले हों ॥ ऋ० ८ । ४४ । १८ में भी ॥२॥

अथ तृतीया-

१ २ ३ १ २ ३ १ २ ३ १र २र
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।
२ ३ १ २ ३ १ २
तव ज्योतींष्यर्चयः ॥ ३ ॥ [१६] (१५३२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—उत् अ० । अग्ने सं० । शुचयः १ । तव ६ । शुक्राः १ । भ्राजन्तः १ । ईरते क्रि० । तव ६ । ज्योतींषि २ । अर्चयः १ ॥

अन्वितपदार्थः—(अग्ने) कृष्णवर्त्मन् ! (तव) त्वदीयाः (शुचयः) शुद्धाः (शुक्राः) श्वेतवर्णाः (भ्राजन्तः) भ्राजमानाः (अर्चयः) अर्चिषः प्रभाः (तव) त्वदीयानि (ज्योतींषि) तेजांसि (उत् ईरते) उद्गमयन्ति ॥

ऋग्वेदे ८ । ४४ । १७ ऽपि ॥ ३ ॥

भाषार्थः—(अग्ने) अग्ने ! (तव) तेरी (शुचयः) शुद्ध (भ्राजन्तः) चमकती (शुक्राः) श्वेतवर्ण (अर्चयः) प्रभायें (तव) तेरे (ज्योतींषि) तेजों को (उत) ऊपर को (ईरते) लेजाती हैं ॥ ऋ० ८ । ४४ । १७ में भी ॥ ३ ॥

इति चतुर्दशाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

इति सप्तमप्रपाठकस्य प्रथमोऽर्धप्रपाठकः

इति श्रीमत्कण्ववंशाऽवतंस पण्डित श्री हज़ारीलाल स्वामि सूनुना, हस्तिनापुर पार्श्ववर्त्ति परीक्षितगढ निवासिना, तुलसीरामस्वामिना, कृते सामवेदभाष्ये उत्तरार्चिके चतुर्दशोऽध्यायः समाप्तः ॥ १४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ पञ्चदशाऽध्यायः

तत्र

प्रथमे खण्डे प्रथमर्चस्य-गोतम ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १र २र३ २ ३ २३क२र

कस्ते जामिर्जनानामग्ने कोदाश्वध्वरः ।

२३ १ २ ३ २

कोह कस्मिन्नसि श्रितः ॥१॥ (१५३३)

पदपाठः—कः १ । ते ६ । जामिः १ । जनानाम् ६ । अग्ने सं० । कः, दाश्वध्वरः १ । कः । ह अ० । कस्मिन् ७ । असि क्रि० । श्रितः १ ॥

अन्वितपदार्थः—(अग्ने) परमेश्वर ! (ते) त्वदीयानां (जनानाम्) प्रजाजनानां (जामिः) बन्धुः (कः) कोस्ति (दाश्वध्वरः) दत्तयज्ञः (कः), (कः ह) किंभूतः (कस्मिन्) कुत्र (श्रितः) आश्रयवान् (असि) अस्तीति प्रश्नाः । एषामुत्तराण्यग्रिममन्त्रे विद्यन्ते ॥

भौतिकपक्षे—(अग्ने) पावक ! (ते) त्वदीयानां त्वयाग्नितत्त्वेन विशिष्टानां (जनानां); (जामिः) बन्धुरिव हितैषी (कः) ? (दाश्वध्वरः) दत्तयज्ञश्च (कः) ? (कः ह) कः प्रसिद्धः (कस्मिन्) ? (श्रितः) आश्रितः (असि) अस्ति ॥ ऋग्वेदे १ । ७५ । ३ ऽपि ॥ १ ॥

भाषार्थः—(अग्ने) परमेश्वर ! (ते) आप के (जनानाम्) प्रजाजनों का (जामिः) बन्धु (कः) कौन है ? (दाश्वध्वरः) दत्तयज्ञ (कः) कौन है ?

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(कः) कौन (ह) प्रसिद्ध (कस्मिन्) किस में (श्रितः) आश्रित (असि) है ? इन प्रश्नों के उत्तर अगले मन्त्र में हैं ॥

भौतिकपक्ष में–(अग्ने) अग्ने ! (ते) तुझ अग्नि तत्त्व से निर्मित (जनानाम्) जनों=प्राणियों का (जामिः) बन्धु (कः) कौन है ? (दाम्नुष्वरः) यज्ञ को जिस ने दिया, वह (कः) कौन है ? (कः) कौन प्रसिद्ध (कस्मिन्) किस में (श्रितः) आश्रित (असि) है ॥ ऋ० १ । ७५ । ३ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ १र २र३ १ २ ३ १ २ ३ २
त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।
२ ३ १ २ ३ १ २
सखा सखिभ्य ईड्यः ॥ २ ॥ (१५३४)

पदपाठः–त्वम्, जामिः १ । जनानाम् ६ । अग्ने सं० । मित्रः १ । असि क्रि० । प्रियः, सखा १ । सखिभ्यः ५=३ । ईड्यः १ ॥

अन्वितपदार्थः–(अग्ने) परमेश्वर ! (त्वम्), (जनानां) प्रजानां (जामिः) बन्धुः (प्रियः) सुहृद् (मित्रः) स्नेहकरः (सखा) समानख्यातिः (सखिभ्यः) सखिभिः (ईड्यः) स्तुत्यः (असि) भवसि ॥

भौतिकपक्षे–(अग्ने) पावक ! (त्वम्), (जनानां) प्रजानां (बन्धुः) बन्धुरिव सहजः (प्रियः) प्रीतिकरः (मित्रः) स्नेहकरः (सखा) सुहृदिव हिते रतः (सखिभ्यः) सखिभिः सुहृद्भिरस्माभिः (ईड्यः) कीर्त्तनीयः (असि) भवसि ॥ ऋग्वेदे १ । ७५ । ४ ऽपि ॥ २ ॥

भाषार्थः–(अग्ने) हे परमेश्वर ! (त्वम्) तू (जनानाम्) प्रजाजनों का (जामिः) बन्धु, (प्रियः) प्यारा, (मित्रः) मित्र, (सखा) समाननामा [चेतन होने से] (सखिभ्यः) मित्रों से (ईड्यः) स्तुति किये जाने योग्य (असि) है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भौतिकपक्ष में-(अग्ने) अग्ने ! (त्वम्) तू (जनानाम्) प्राणियों का (बन्धुः) भाई के समान सहज (प्रियः) प्रीतिकर (मित्रः) हितकर वा स्नेहकर (सखा) मित्र के समान हित में रत (सखिभ्यः) अग्निहोत्रियों के (ईड्यः) कीर्त्तनीय (असि) है ॥ ऋ० १ । ७५ । ४ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १र २र ३ १ २ ३ २ ३ २ ३ २

यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् ।

२ ३ २ ३ १र २र

अग्ने यक्षि स्वं दमम् ॥ ३ ॥ [१] (१५३५)

पदपाठः-यज क्रि० । नः ४ । मित्रावरुणा २ । यज । देवान् २ । ऋतम्, बृहत २ । अग्ने सं० । यक्षि क्रि० । स्वम्, दमम् २ ॥

अन्वितपदार्थः-(अग्ने) पावक ! वा परमेश्वर ! (नः) अस्मभ्यमसमद्धिताय (मित्रावरुणा) प्राणाऽपानौ देवौ (यज) सङ्गमय (देवान्) अन्यान्वायुप्रभृतीनऽपि (यज), (ऋतम्) यथार्थफलं (बृहत्) महत् (स्वम्) स्वकीयं (दमम्) गृहमिव व्याप्यत्वेनाऽऽवास्यं जगत् (यक्षि) सङ्गमयसि ॥ ऋग्वेदे १ । ७५ । ५ ऽपि॥३॥

भाषार्थः-(अग्ने) हे अग्ने ! व परमेश्वर । (नः) हमारे हित के लिये (मित्रावरुणौ) प्राण और अपान देवतों को (यज) संगत करो (देवान्) अन्य वायु आदि देवों को भी (यज) संगत करो (ऋतम्) सत्य फल वाले (बृहत्) बड़े (स्वम्) अपने (दमम्) घर रूप इस जगत् को (यक्षि) संगत करते हो ॥ ऋ० १ । ७५ । ५ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य—देवश्रवा देववातऋषिः । अग्निर्देवता । गायत्रीछन्दः ॥

तत्र प्रथमा-

३ १ २ ३क २र ३ १र २र ३ २

ईडेन्योनमस्यस्तिरस्तमाꣳसि दर्शतः ।

२ ३ १ २ ३ १ २

समग्निरिध्यते वृषा ॥ ३ ॥ (१५३६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-ईडेन्यः, नमस्यः १ । तिरः अ० । तमांसि २ । दर्शतः १ । सम् अ० । अग्निः १ । इध्यते क्रि० । वृषा १ ॥

अन्वितपदार्थः-(ईडेन्यः) स्तोतृभिरीड्यः (नमस्यः) नमस्कारार्होहव्यान्नार्होवा (तमांसि) अन्धकारान् (तिरः) तिरस्कुर्वन् (दर्शतः) ज्ञानदानेन प्रकाशेन वा दृष्टिदोदर्शकः (वृषा) कामानां वर्षकोहोमेन मेघवर्षकोवा (अग्निः) ज्ञानस्वरूपः परमेश्वरोभौतिकोवा (सम्-इध्यते) हृदये ध्यायते कुण्डे प्रदीप्यते वा॥ ऋग्वेदे ३ । २७ । १३ऽपि ॥१॥

भाषार्थः-(ईडेन्यः) वर्णनीय, (नमस्यः) नमने योग्य वा हव्य अन्न देने योग्य, (तमांसि) अंधियारों को (तिरः) तिरस्कृत करता हुवा, (दर्शतः) ज्ञान द्वारा वा प्रकाश द्वारा मार्गदर्शक, (वृषा) कामनाओं का वर्षाने वाला वा होम से वृष्टि का हेतु (अग्निः) ज्ञानस्वरूप परमेश्वर वा भौतिक अग्नि (सम्) भले प्रकार (इध्यते) ध्यान किया जाता वा यज्ञकुण्ड में सुलगाया जाता है ॥ ऋ० ३ । २७ । १३ में भी ॥ १ ॥

अथ द्वितीया-

१ २ ३ १र २र ३ २ ३ १ २ ३ १ २
वृषो अग्निः समिध्यतेऽश्वेन देववाहनः ।
२ ३ १ २
तꣳहविष्मन्त ईडते ॥ २ ॥ (१५३७)

पदपाठः-वृषा १ । उ अ० । अग्निः १ । समिध्यते क्रि० । अश्वः १ । न अ० । देववाहनः १ । तम् २ । हविष्मन्तः १ । ईडते क्रि० ॥

अन्वितपदार्थः-(वृषा) कामानां वर्षको वृष्टिकरोवा (उ) एव (देववाहनः) पृथिव्यादीनामाधारत्वेन वोढा, वाय्वादीनां वोढा वा (अश्वः) प्राणः (न) इव वर्त्तमानः (अग्निः) परमेश्वरो भौतिको वा (समिध्यते) सम्यक् हृदये वेद्यां वा प्रकाश्यते (तम्) अग्निम् (हवि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्मन्तः) भक्त्युपायनवन्तो हव्यवन्तो वा (ईडते) स्तुवन्ति ॥ ऋग्वेदे ३ । २७ । १४ ऽपि ॥ २ ॥

भाषार्थः-(वृषा) कामनाओं का वर्षक वा वृष्टि का हेतु (उ) निश्चय, (देववाहनः) पृथिव्यादि लोकों का आधार होने से वाहन, वा वाय्वादि देवों का बोढा (अग्नः) प्राण के (न) समान वर्त्तमान (अग्निः) परमेश्वर वा भौतिक (समिध्यते) भले प्रकार हृदय वा यज्ञवेदि में प्रकाशित किया जाता है ॥ ऋ० ३ । २७ । १४ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ १ २ ३ १ २ ३ १ २
वृषण त्वा वयं वृषन्वृषणः समिधीमहि ।
२ ३ १ २ ३ २
अग्ने दीद्यतं बृहत् ॥ ३ ॥ (१५३८)

पदपाठः-वृषणम् , त्वा २ । वयम् १ । वृषन् सं० । वृषणः १ । समिधीमहि क्रि० । अग्ने सं० । दीद्यतम् , बृहत् २ ॥

अन्वितपदार्थः-(वृषन्) कामानां जलानां व वर्षक ! (अग्ने) परेश्वर ! वा पावक ! (वृषणः) भक्त्यार्द्रहृदयाः होमे घृतादिसेचकाः वा (वयम्) योगिनो याज्ञिका वा (बृहत्) बहु यथा स्यात्तथा (दीद्यतम्) प्रकाशमानं (वृषणम्) कामवर्षकं जलवर्षकं वा (त्वा) त्वाम् (समिधीमहि) ध्यायेम प्रदीप्तं वा कुर्वीमहि ॥ ऋग्वेदे ३ । २७ । १५ ऽपि ॥ ३ ॥

भाषार्थः-(वृषन्) हे कामनाओं के पूरक ! वा जलों के वर्षक ! (अग्ने) ज्ञानस्वरूप ! प्रकाशमान ! पावक ! (वृषणः) भक्ति से नम्र आर्द्रचित्त वा घृतादि के सेचक (वयम्) हम योगी वा याज्ञिक जन (बृहत्) बहुतायत से (दीद्यतम्) प्रकाशमान (वृषणम्) कामनाओं वा जलों के पूरक (त्वा)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तुझ परमेश्वर वा अग्नि को (समिधीमहि) ध्यान करें वा सुलगावें ॥ ऋ० ३ । २७ । १५ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-विरूपऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३१२ ३१ २ ३१ २

उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।

१ २ ३१ २

अग्ने शुक्रास ईरते ॥ १ ॥ (१५३९)

पदपाठः-उत् अ० । ते ६ । बृहन्तः, अर्चयः १ । समिधानस्य ६ । दीदिवः, अग्ने सं० । शुक्रासः १ । ईरते क्रि० ॥

अन्वितपदार्थः-हे (दीदिवः) प्रकाशवन् ! (अग्ने) परमेश्वर ! वा पावक ! (समिधानस्य) प्रकाशमानस्य (ते) तव (बृहन्तः) महान्तः (शुक्रासः) शुद्धाः (अर्चयः) अर्चिषः किरणाः (उत् ईरते) उत्कृष्टतया वर्त्तन्ते उद्गच्छन्ति वा ॥ ऋग्वेदे ८ । ४४ । ४ ऽपि ॥ १ ॥

भाषार्थः-(दीदिवः) हे प्रकाशवन् ! (अग्ने) परमेश्वर ! वा भौतिक अग्ने ! (समिधानस्य) प्रकाशमान (ते) तेरी (बृहन्तः) बड़ी (शुक्रासः) शुद्ध निर्मल (अर्चयः) किरणें (उत् ईरते) उत्कृष्ट भाव से वर्त्तती वा ऊपर को जाती हैं ॥ ऋ० ८ । ४४ । ४ में भी ॥ १ ॥

अथ द्वितीया-

१२ ३२ १२ ३ २

उप त्वा जुह्वो मम घृताचीर्यन्तु हर्यत ।

१ २ ३१ २

अग्ने हव्या जुषस्व नः ॥ २ ॥ (१५४०)

पदपाठः-उप अ० । त्वा २ । जुह्वः १ । मम ६ । घृताचीः १ । यन्तु क्रि० । हर्यत, अग्ने सं० । हव्या २ । जुषस्व क्रि० । नः ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(हर्यत) हे अभिगम्य ! (अग्ने) परमेश्वर ! वा अग्ने ! (मम) स्तोतुर्मम (घृताचीः) घृताच्यः घृतं स्नेहं भक्तिमञ्चन्त्य आज्ययुक्ता वा (जुहूः) अन्तःकरणानि जुहूसंज्ञिकाः स्रुचो वा (त्वा) त्वाम् (उप यन्तु) प्राप्नुवन्तु, स त्वं (नः) अस्माकमुपासकाना-मग्निहोत्रिणां वा (हव्या) हव्यानि अन्तःकरणानि, घृता-दीनि होमद्रव्याणि वा (जुषस्व) अङ्गीकुरु ॥ ऋग्वेदे ८ । ४४ । ५ ऽपि ॥ २ ॥

भाषार्थः—(हर्यत) हे अभिगम्य ! (अग्ने) परमेश्वर ! वा पावक ! (मम) मुझ स्तोता की (घृताचीः) स्नेहभक्तिपूर्ण (जुहूः) अन्तःकरण की वृत्तियें वा घृत भरे चमस जुहू वा स्रुच् को जिन से होम किया जाता है, (त्वा) तुझ को (उपयन्तु) प्राप्त हों, सो तू (नः) हम उपासकों वा अग्निहोत्रियों के (हव्या) होमयोग्य अन्तःकरणों वा घृतादि हव्यों को (जुषस्व) स्वीकृत कर ॥ ऋ० ८ । ४४ । ५ में भी ॥ २ ॥

अथ तृतीया—

३ १र २र ३ १ २ ३ १ २ ३ १ २

मन्द्र ꣳ होतारमृत्विजं चित्रभानुं विभावसुम् ।

३ १ २३ १ २

अग्निमीडे स उ श्रवत् ॥ ३ ॥ [३](१५४१)

पदपाठः—मन्द्रम्, होतारम्, ऋत्विजम्, चित्रभानुम्, विभावसुम्, अग्निम्, २ । ईडे क्रि० । सः १ । उ अ० । श्रवत् क्रि० ॥

अन्वितपदार्थः—(मन्द्रं) मोदनं (होतारं) कर्मफल-दातारं देवानामाह्वातारं वा (ऋत्विजम्) ऋतौ ऋतौ यष्टव्यं (चित्रभानुं) चित्रा विचित्रा भानवो दीप्तयो यस्य तं (विभावसुं) विविधप्रकाशधनम् (अग्निं) परमेश्वरं भौतिकं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वा (ईडे) स्तौमि (सः) सोऽग्निः (उ) अवश्यं (श्रवत्) शृणुयात् स्वीकुर्यात् ॥

"तस्य भासा सर्वमिदं विभाति" इत्यादिषु उपनिषत्सु तत्तेजसैव सूर्यादितेजस्विसु विविधतेजःसत्त्वात् चित्र भान्वादीनि विशेषणानि परमेश्वरपक्षे सुवचानि॥ ऋग्वेदे ८। ४४। ६ ऽपि ॥ ३ ॥

भाषार्थः—(मन्द्रम्) मोद=हर्षदायक (होतारम्) कर्मों के फलदाता वा देवों के दूत (ऋत्विजम्) प्रत्येक ऋतु में यजनीय (चित्रभानुम्) विचित्र प्रकाशों वाले (विभावसुम्) विविध प्रकाश के धनी (अग्निम्) ईश्वर वा अग्नि की (ईडे) स्तुति करता हूं. (सः) वह अग्नि (उ) अवश्य (श्रवत्) सुने=स्वीकृत करे ॥

"तस्य भासा०" उस (परमेश्वर) के प्रकाश से ही यह सब (सूर्यादि) प्रकाशता है, इत्यादि उपनिषदों में उसी के तेज से सूर्यादि तेजस्वियों में विविध तेज का होना पाया जाता है इस कारण चित्रभानु आदि विशेषण परमेश्वरपक्ष में सुवच हैं ॥ ऋ० ८। ४४। ६ में भी ॥ ३ ॥

अथ प्रगाथात्मक चतुर्थसूक्तस्य-भर्गऋषिः। अग्निर्देवता। बृहती छन्दः॥

तत्र प्रथमा-

३ १ २ ३ १ २ ३ २ २ ३ १ २

पाहि नो अग्न एकया पाह्यू३ऽउ३त द्वितीयया।

३ २ ३ २ ३ १ २ ३ १ २३१ २

पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥१॥

(१५४२) व्याख्याता (३६)

अथ द्वितीया-

३ १र २र ३ २ ३ १ २ ३ २ ३ १ २

पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव।

१र २र ३ १ २ ३ १ २र ३ २

त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥२॥[४](१५४३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—पाहि क्रि० । विश्वस्मात्, रक्षसः, अराव्णः ५ । अ, स्म अ० । वाजेषु ७ । नः २ । अव क्रि० । त्वाम् २ । इत्, हि अ० । नेदिष्ठम् २ । देवतातये ४ । आपिम् २ । नक्षामहे क्रि० । वृधे ४ ॥

अन्वितपदार्थः—हे अग्ने ! ईश्वर ! वा पावक ! इति पूर्वप्रकरणादनुवर्त्त्यं—(त्वाम् इत्) त्वामेव (नेदिष्ठं) समीपतमम् (आपिं) बन्धुभूतं (वृधे) वृद्धौ (देवतातये) यज्ञाय च (हि) निश्चयेन (नक्षामहे) व्याप्नुमः [निघं० २ । १८] सः त्वं (विश्वस्मात्) सर्वस्मात् (अराव्णः) अदातुः (रक्षसः) राक्षसात् (पाहि) रक्ष (वाजेषु) कामादिभिः परैराजभिर्वा संग्रामेषु (नः) अस्मान् (प्राऽव स्म) प्रकर्षेण रक्ष ॥ ऋग्वेदे ८ । ६० । १० ऽपि ॥ २ ॥

भावार्थः—प्रकरण से हे अग्ने ! परमेश्वर ! वा पावक ! (त्वाम्) तुझ (इत्) ही (नेदिष्ठम्) अत्यन्त समीपी (आपिम्) बन्धु को (वृधे) वृद्धि और (देवतातये) यज्ञ के लिये (हि) निश्चय (नक्षामहे) हम व्याप्त होते हैं [निघण्टु २ । १८] सो तू (विश्वस्मात्) सब (अराव्णः) दान न करने वाले= यज्ञविरोधी (रक्षसः) राक्षस से (पाहि) हम को बचा और (वाजेषु) कामादि वा शत्रु राजों के संग्रामों में (नः) हम को (प्राऽव स्म) रक्षित कर ॥ ऋ० ८ । ६० । १० में भी ॥ २ ॥

इति पञ्चदशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

———⊜०⊜———

अथ द्वितीये खण्डे प्रथमतृचस्य—आप्त्यस्त्रित ऋषिः । अग्निर्देवता । त्रिष्टुप्छन्दः ॥ तत्र प्रथमा—

३ १ २ ३ १ २२ ३ २ ३ १ २ ३ १
इनो राजन्नरतिः समिद्धो, रौद्रो दक्षाय सुषुमाँ
२ ३१२ २२ ३ १ २३१ २
अदर्शि । चिकिद्विभाति भासा बृहता, ऽसिक्नी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १२ ३ १ २
मेति रुशतीमपाजन्॥ १ ॥ (१५४४)

पदपाठः—इनः १। राजन् १। अरतिः, समिद्धः, रौद्रः १। दक्षाय ४। सुषुमान् १। अदर्शि क्रि०। चिकित् १। विभाति क्रि०। भासा, बृहता ३। असिक्नीम् २। एति क्रि०। रुशतीम् २। अपाऽजन् १॥

अन्वितपदार्थः—सूर्यरूपोऽग्निरत्र स्तूयते—(इनः) सूर्यः (अरतिः) गन्ता (राजन्) राजा प्रकाशमानः (समिद्धः) प्रदीप्तः (रौद्रः) रुद्राणां प्राणानामयं निधानभूतः (दक्षाय) बलाय बलप्राप्तये (सुषुमान्) शोभनप्रसवओषध्यादेरुत्पादकः (अदर्शि) उदेति (चिकित्) ज्ञानप्रसारकः (बृहता) महत्या (भासा) दीप्त्या (विभाति) प्रकाशते (रुशतीम्) उषसि श्वेतवर्णप्रायाम् (असिक्नीम्) रात्रिम् (अपाजन्) अपक्षिपन् (एति) प्राप्नोति ॥ ऋग्वेदे १० । ३ । १ऽपि ॥१॥

भाषार्थः—सूर्यरूप अग्नि का वर्णन किया जाता है कि—(इनः) सूर्य (अरतिः) भ्रमणकर्त्ता (राजन्) प्रकाशमान (समिद्धः) दहकता हुवा (रौद्रः) रुद्रों=प्राणों का निधानभूत (दक्षाय) बल की प्राप्ति के लिये (सुषुमान्) ओषध्यादि का उत्पादक (अदर्शि) उदित हो दीखता है और (चिकित्) ज्ञान का फैलाने वाला (बृहता) बड़ी (भासा) दीप्ति [रौशनी] से (विभाति) प्रकाशता है तथा (रुशतीम्) अरुणोदय काल के पीछे श्वेतवर्णप्राया (असिक्नीम्) रात्रि को (अपाऽजन्) दूर फैंकता हुवा (एति) प्राप्त होता है ॥ ऋ० १० । ३ । १ में भी ॥ १ ॥

अथ द्वितीया—

३ १र २र ३ १र २र ३ २ ३ २ ३ १ २ ३ २
कृष्णां यदेनीमभि वर्पसाऽभूज्जनयन्योषां बृहतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ २ ३१र २र ३ २ ३ १र
पितुर्जाम् । ऊर्ध्वं भानुः सूर्यस्य स्तभायन्दिवो
२र ३ १र २र
वसुभिररतिर्विभाति ॥ २ ॥ (१५४५)

पदपाठः-कृष्णाम् २। यत् अ०। एनीम् २। अभि अ०। वर्पसा ३। अभूत् क्रि०। जनयन् १। योषाम् २। बृहतः, पितुः ५। जाम् २। ऊर्ध्वम् अ०। भानुः १। सूर्यस्य ६। स्तभ्नायन् १। दिवः ६। वसुभिः ३। अरतिः १। विभाति क्रि०॥

अन्वितपदार्थः-(यत्) यदा (बृहतः) महतः (पितुः) पालकादादित्यात् (जाम्) जायमानाम् (योषाम्) योषितमिवोषसम् (जनयन्) अभिव्यञ्जयन् अग्निः (कृष्णाम्) तमिस्राम् (एनीम्) गच्छन्तीं रात्रिम् (वर्पसा) ज्वालात्मकेन रूपेण (अभि-भूत्) अभिभवति तदा (अरतिः) गमनशीलोऽग्निः (दिवः) द्युलोकस्य (वसुभिः) वासयित्रभिराच्छादनैरात्मीयैस्तेजोभिः (सूर्यस्य) आदित्यमण्डलस्य (भानुं) प्रकाशम् (ऊर्ध्वम्) उपरि (स्तभायन्) स्तम्भयन् (विभाति) विशेषेण दीप्यते॥ ऋग्वेदे १०। ३। २ऽपि ॥ २ ॥

भाषार्थः-(यत्) जब कि (बृहतः) पृथिव्यादि की अपेक्षा बहुत बड़े (पितुः) पालक पितृरूप सूर्य से (जाम्) उत्पद्यमान (योषाम्) स्त्रीरूप उषा को (जनयन्) उत्पन्न करता हुवा अग्नि (कृष्णाम्) काली अन्धियारी (एनीम्) चलती जाती रात्रि को (अभि-भूत्) तिरस्कृत करता है तब (अरतिः) गमनस्वभाव अग्नि (दिवः) द्युलोक के (वसुभिः) बसाने वाले आच्छादित करने वाले अपने तेजों से (सूर्यस्य) सूर्य के (भानुम्) प्रकाश को (ऊर्ध्वम्) ऊपर (स्तभायन्) थांमता हुवा (विभाति) चमकता है॥ ऋ० १०। ३। २ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

३ २ ३२३ १२ ३ २ ३ १ २ ३ २ ३ऊ २र ३ २
भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
३ १र २र३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्, नुशद्भिर्वर्णैरभि राममस्थात् ॥
॥ ३ ॥ [५] (१५४६)

पदपाठः-भद्रः १ । भद्रया ३ । सचमानः १ । आगात् क्रि० । स्वसारम् २ । जारः १ । अभ्येति क्रि० । पश्चात् अ० । सुप्रकेतैः, द्युभिः ३ । अग्निः १ । वितिष्ठन् १ । उशद्भिः, वर्णैः ३ । अभि अ० । रामम् २ । अस्थात् क्रि० ॥

अन्वितपदार्थः-(भद्रः) भजनीयः कल्याणः सूर्यरूपः (अग्निः) (भद्रया) शोभनया उषसा योषिता (सचमानः) समवेतः (आगात्) आगच्छति उदेति, सोऽयम् (जारः) रात्रेर्जरयिता सूर्यः (स्वसारम्) स्वयं सारिणीमुषसम् (पश्चात्) (अभ्येति) अभिगच्छति (सुप्रकेतैः) सुप्रज्ञानैः (द्युभिः) तेजोभिः सह (वितिष्ठन्) विविधं तिष्ठन्सन् (उशद्भिः) श्वेतैः (वर्णैः) रूपैस्तेजोभिः (रामम्) राम्या रात्रिस्तस्या इदं तमः (अभि-अस्थात्) अभिभूय तिष्ठति ॥

अहो कियदाश्चर्यं यत् अग्निं देवतामस्य जानन्, सायणाचार्यकृतमग्निपरकं व्याख्यानं च पश्यन्नपि पक्षपातग्रस्तो ज्वालाग्रसादो सीताराम रावणकथया व्यऽनाशयन्मन्त्रमिमम् ॥ ऋग्वेदे १० । ३ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(भद्रः) शोभन तेजःस्वरूप तेजस्वी सूर्यरूप (अग्निः) अग्नि (भद्रया) शोभनरूपिणी उषा के साथ (सचमानः) मिला हुवा (आगात्) आता=उदय होता है, सो यह (जारः) जार के समान रात्रि को बुड्ढी करने वाला सूर्य (स्वसारम्) स्वयं दौड़ने वाली उषा के (पश्चात्) पीछे (अभ्येति)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दौड़ता है। (सुप्रकेतैः) सुन्दर ज्ञान के फैलाने वाले (द्युभिः) तेजों के साथ (वितिष्ठन्) अनेक प्रकार से स्थित हुआ (उशद्भिः) श्वेत (वर्णैः) वर्ण वाले तेजों से (रामम्) रात्रि के अन्धकार को (अभि अस्थात्) तिरस्कृत करके स्थित होता है ॥

कितना आश्चर्य है कि ज्वालाप्रसाद जी ने इस मन्त्र का देवता "अग्नि" जानते हुये भी और सायणाचार्य के अग्निपरक भाष्य के देखते हुये भी इस में सीता राम और रावण की कथा बता कर सत्यानाश मारा है ॥ ऋ० १०। ३। ३ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-उशना ऋषिः। अग्निर्देवता। गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ १ २
कया ते अग्ने अङ्गिर ऊर्जोनपादुपस्तुतिम्।
१ २ ३ १ २
वराय देव मन्यवे ॥ १ ॥ (१५४७) ॥

पदपाठः-कया ३। ते ४। अग्ने, अङ्गिरः, ऊर्जोनपात् सं०। उपस्तुतिम् २। वराय ४। देव सं०। मन्यवे ४ ॥

अन्वितपदार्थः-(ऊर्जोनपात्) बलस्य न पातयितः! (अङ्गिरः) सर्वग ! सर्वज्ञ ! (अग्ने) परेश ! (वराय) वरणीयाय (मन्यवे) दुष्टानामुपरि क्रोधेन दण्डस्य पातयित्रे (ते) तुभ्यं (कया) कया वाचा रीत्या वा (उपस्तुतिम्) उपेत्य स्तोत्रं कुर्याम, न कयापि। त्वक्तवने वयमसमर्थास्तव वाङ्मनोऽतीतत्वात् इत्यर्थः ॥ ऋग्वेदे ८। ८४। ४ऽपि ॥ १ ॥

भाषार्थः-(ऊर्जोनपात्) हे बल के न गिराने वाले ! (अङ्गिरः) सर्वग ! सर्वज्ञ ! (अग्ने) परमेश्वर ! (वराय) वरणीय श्रेष्ठ (मन्यवे) दुष्टों के दण्डार्थ क्रोध के धारण करने वाले (ते) तेरे लिये (कया) किस वाणी से (उप-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तुतिम्) उपासनापूर्वक स्तुति करें ? अर्थात् तुम वाणी और मन से अतीत हो, इसलिये तुम्हारी स्तुति करने को हम समर्थ नहीं ॥ ऋ० ८ । ८४ । ४ में भी ॥१॥

अथ द्वितीया—

१ २ ३ २ ३ १ २ ३१ २
दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
१ २ ३१ २
कदु वोच इदं नमः ॥ २ ॥ (१५४८)

पदपाठः–दाशेम क्रि० । कस्य ६ । मनसा ३ । यज्ञस्य, सहसः ६ । यहो सं० । कद्, उ अ० । वोचः क्रि० । इदम् , नमः अ० ॥

अन्वितपदार्थः–(सहसः यहो) हे बलस्य आत्मज-तुल्य ! बलेनाऽरण्योर्निष्पाद्यमानत्वात् पावक ! बलेन योगबलेन साक्षात्क्रियमाणत्वाद्वा परमेश्वर ! (कस्य यज्ञस्य) कीदृशस्य यज्ञस्य (मनसा) हृदयेन ज्ञानेन वा (दाशेम) हव्यं शुद्धमन्तःकरणं वा ददाम (कत् उ) कश्च (इदं नमः) इदं हव्यं, इदं नमनं वेति (वोचः) ब्रूयात् ॥ ऋग्वेदे ८ । ८४ । ५ ऽपि ॥ २ ॥

भाषार्थः–(सहसः) बल के (यहो) सन्तान तुल्य ! बल से अरणियों उत्पन्न किया जाने से हे अग्ने ! अथवा बल=योगबल से साक्षात् किया जाने से हे परमेश्वर ! (कस्य) कैसे (यज्ञस्य) यज्ञ के हव्य वा शुद्ध अन्तःकरण का (मनसा) हृदय वा ज्ञान से (दाशेम) हम दान करें (उ) और (कद्) कौन (इदं नमः) "यह हव्य है" वा "यह नमस्कार है" ऐसा (वोचः) कहे ? । ऋ० ८ । ८४ । ५ में भी ॥ २ ॥

अथ तृतीया—

२ ३ २उ ३ २ ३ १ २ ३ १ २ ३ २
अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः ।
१ २ ३ १ २
वाजद्रविणसोगिरः ॥ ३ ॥ [६] (१५४९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अध अ० । त्वम् १ । हि अ० । नः ६ । करः क्रि० । विश्वाः २ । अस्मभ्यम् ४ । सुक्षितीः, वाजद्रविणसः, गिरः २ ॥

अन्वितपदार्थः—अग्ने ! इत्यनुवर्त्त्य (अध) अथाऽनन्तरं (त्वं हि) त्वमेव (नः) अस्माकं (विश्वा) सर्वाः (गिरः) वाचः (अस्मभ्यम्) अस्मदर्थं (सुक्षितीः) सुगतीः (वाजद्रविणसः) अन्नधनयुक्ताः (करः) करोषि ॥

येऽग्निमुपासते ते यथेष्टधनबलादियुक्तास्तेन जायन्ते इति भावः ॥ ऋग्वेदे ८ । ८४ । ६ ऽपि ॥ ३ ॥

भाषार्थः—प्रथम मन्त्र से हे अग्ने ! वा परमेश्वर ! (त्वम्) तू (हि) ही (नः) हमारी (विश्वाः) सब (गिरः) वाणियों को (अस्मभ्यम्) हमारे लिये (सुक्षितीः) सुज्ञान और (वाजद्रविणसः) अन्न और धन से युक्त (करः) करता है ॥

अर्थात् अग्निहोत्र करने वाले वा ईश्वर के उपासक लोग उस से धान्य बलादि युक्त होजाते हैं ॥ ऋ० ८ । ८४ । ६ में भी ॥ ३ ॥

अथ प्रगाथात्मक द्वितीयसूक्तस्य—भर्गऋषिः । अग्निर्देवता । बृहती छन्दः ॥

तत्रप्रथमा—

२ ३ १ २ ३ २ ३ १ २ १२ २२ ३

अग्नआयाह्यग्निभिर्होतारं त्वा वृणीमहे । आ त्वामनक्तु

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २

प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १ ॥ (१५५०)

पदपाठः—अग्ने सं० । आयाहि क्रि० । अग्निभिः ३ । होतारम्, त्वा २ । वृणीमहे क्रि० । आ अ० । त्वाम् २ । अनक्तु क्रि० । प्रयता, हविष्मती १ । यजिष्ठम्, बर्हिः २ । आसदे अ० ॥

अन्वितपदार्थः—(अग्ने) पावक ! (अग्निभिः) यष्टव्यैर्वाय्वादिभिः सह (आयाहि) प्राप्नुहि (होतारं) होमसाधकं (त्वा) त्वां (वृणीमहे) स्वीकुर्मः (प्रयता) अध्वर्युणा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नियमिता (हविष्मती) घृतादिहव्यपात्री (यजिष्ठम्) पूजनीयं (बर्हिः) यज्ञम् (आसदे) आसाद्य स्थितं (त्वाम्) (आऽनक्तु) आसिञ्चतु ॥ ऋग्वेदे ८ । ६० । १ ऽपि ॥१॥

भाषार्थः—(अग्ने) अग्ने ! (अग्निभिः) यजनीय वायु आदि देवों सहित (आयाहि) प्राप्त हो (होतारं त्वा) तुझ होमसाधक को (वृणीमहे) हम वरण करते हैं (अध्वर्यु से नियमित (हविष्मती) हविःपात्री (यजिष्ठम्) पूजनीय (बर्हिः) यज्ञ में (आसाद्य) विराजमान होकर स्थित (त्वाम्) तुझ को (आऽनक्तु) आसेचन करे ॥ ऋ० ८ । ६० । १ में भी ॥१॥

अथ द्वितीया—

२ ३ १ २ ३ २३१२ ३ २
अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।
३ १र २र ३१२ ३ २ ३१२ ३२
ऊर्जो न पातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥२॥ [७](१५५१)

पदपाठः—अच्छ, हि अ० । त्वा २ । सहसः ६ । सूनो, अङ्गिरः सं० । स्रुचः १ । चरन्ति क्रि० । अध्वरे ७ । ऊर्जः ६ । नपातम्, घृतकेशम् २ । ईमहे क्रि० । अग्निम् २ । यज्ञेषु ७ । पूर्व्यम् २ ॥

अन्वितपदार्थः—(सहसः) बलस्य (सूनो) पुत्र! अरण्योर्बलेनोत्पाद्यमानत्वादग्ने ! (अङ्गिरः) गतिमन् ! (हि) यस्मात् (त्वा) त्वाम् (अध्वरे) यज्ञे (अच्छ) अभिप्राप्तुं (स्रुचः) एतन्नामिका यज्ञपात्र्यः (चरन्ति) गच्छन्ति । अतः (ऊर्जः) अन्नस्य (नपातम्) न पातयितारं रक्षकं बलस्य वा रक्षकं (घृतकेशम्) केशभूताज्वाला यस्य घृतेन वर्धते तस्मात्सोग्निस्तं (पूर्व्यम्) पूरकम् (अग्निम्) पावकं (यज्ञेषु) ज्योतिष्टोमादिषु (ईमहे) स्तुमः ॥ ऋग्वेदे ८। ६० । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(सहसः) बल के (सूनो) पुत्र ! अग्नि ! [क्योंकि अरणियों में से बल से उत्पन्न किया जाता है] (अङ्गिरः) हे गतिमन् ! (हि) जिस कारण (त्वा) तुझ को (अध्वरे) यज्ञ में (स्रुचः) स्रुच् संज्ञक यज्ञपात्री जिन से होम करते हैं वे (चरन्ति) प्राप्त होती हैं अतः (ऊर्जः) अन्न वा बल के (न पातम्) न गिराने वाले=रक्षक (घृतकेशम्) घृत से जिस की ज्वाला बढ़ती हैं उस (पूर्व्यम्) पूरक (अग्निम्) अग्नि को (यज्ञेषु) ज्योतिष्टोमादि विविध यज्ञों में (ईळते) हम प्रशंसित करते हैं ॥ ऋ० ८ । ६० । २ में भी ॥ २ ॥

अथ प्रगाथात्मक चतुर्थसूक्तस्य पुरुमीढऋषिः । अग्निर्देवता । निचृद् बृहती, बृहती च छन्दसी ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ २

अच्छा नः शीरशोचिषं गिरोयन्तु दर्शतम् ।

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ १

अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥ १ ॥ (१५५२)

पदपाठः-अच्छ अ० । नः ६ । शीरशोचिषम् २ । गिरः १ । यन्तु क्रि० । दर्शतम् २ । अच्छ । यज्ञासः १ । नमसा ३ । पुरूवसुम्, पुरुप्रशस्तम् २ । ऊतये ४ ॥

अन्वितपदार्थः-(नः) अस्माकं (गिरः) वाचः (दर्शतम्) ज्ञानदं दर्शकं दर्शनसाधनंवा (शीरशोचिषं) शयानाः शान्ताः शोचिषः प्रकाशा यस्य तमीश्वरं महासर्पतुल्यज्वालावन्तं वाऽग्निम् (अच्छ) सुष्ठु (यन्तु) प्राप्नुवन्तु (यज्ञासः) ज्ञानयज्ञाः, कर्मयज्ञा वा (नमसा) नमस्कारेण, अन्नेनाऽऽहुत्या वा (ऊतये) रक्षायै (पुरूवसुं) प्रभूतधनं (पुरुप्रशस्तं) बहुस्तुतं परमेश्वरं, पावकं वा (अच्छ) सुष्ठु प्राप्नुवन्तु ॥

अस्माकं वाचो ज्ञानयज्ञाश्च परमेश्वरं प्राप्नुवन्तु अथवा अस्मदीयाः कर्मयज्ञप्रयुक्ता वाचो यज्ञाश्चाऽग्निविषयका भवन्तु इत्यर्थयामः ॥ ऋग्वेदे ८ । ७१ । १० ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(नः) हमारी (गिरः) वाणियें (दर्शतम्) ज्ञान से मार्गदर्शक, वा दृष्टि के सहायक=साधन (शीरशोचिषम्) शान्तप्रकाश ईश्वर वा महासर्प के तुल्य लपटों वाले अग्नि को (अच्छ) भले प्रकार (यन्तु) प्राप्त हों (यज्ञासः) हमारे ज्ञानयज्ञ, वा कर्मयज्ञ (नमसा) नमस्कार से वा हव्य अन्न से (ऊतये) रक्षा के लिये (पुरूवसुम्) बहुत धनप्रद (पुरुप्रशस्तम्) बहुत प्रशंसित ईश्वर वा अग्नि को (अच्छ) भले प्रकार प्राप्त हों ॥

हमारी वाणी और ज्ञानयज्ञ वा कर्मयज्ञ ईश्वरविषयक वा अग्निविषयक सार्थक हों ॥ ऋ० ८ । ७१ । १० में भी ॥ १ ॥

अथ द्वितीया—

३ २ ३ १र २र ३ १२ ३ २ ३ १ २
अग्निꣳ सूनुꣳ सहसो जातवेदसं दानाय वार्याणाम् ।
३ २उ ३ २ ३ २ ३ १र २र ३ १ २ ३ २
द्विता योऽभूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥
॥ २ ॥ [८] (१५५३)

पदपाठः-अग्निम्, सूनुम् २ । सहसः ६ । जातवेदसम् २ । दानाय ४ । वार्याणाम् ६ । द्विता अ० । यः १ । अभूत् क्रि० । अमृतः १ । मर्त्येषु ७ । आ अ० । होता, मन्द्रतमः १ । विशि ७ ॥

अन्वितपदार्थः-(वार्याणाम्) वरणीयानां पदार्थानां (दानाय) दानेन लाभाय (सहसः) बलस्य (सूनुम्) पुत्रमिव वर्त्तमानम् (जातवेदसम्, अग्निम्) ज्ञानप्रसारकमग्निम् [नः गिरः यन्तु] इति पूर्वेणाऽन्वयः । (यः) योऽग्निः (अमृतः) अमरः सन् (मर्त्येषु) मरणधर्मसु जनेषु (द्विता) द्विधा (अभूत्) भवति, किं तद् द्वैधं तदाह-(आ होता) १-समन्ताद्देवानामाह्वाता, २-(विशि) प्रजायां (मन्द्रतमः) मादयितृतमश्चेति ॥ ऋग्वेदे ८ । ७१ । ११ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(वार्याणाम्) वरणीय पदार्थों के (दानाय) दानद्वारा लाभार्थ (सहसः) बल के (सूनुम्) पुत्रतुल्य (जातवेदसम्) ज्ञानप्रसारक (अग्निम्) अग्नि को [हमारी, वाणियें, प्राप्त हों] यह पूर्व मन्त्र से अन्वय है। (यः) जो (अमृतः) अमर अग्नि (मर्त्येषु) मरणधर्मा मनुष्यों में (हितः) दो प्रकार से (अभूत) है। १-(आ, होता) सब ओर से, देवों का बुलाने वाला और २-(विशि) प्रजा में (मन्द्रतमः) भोजन पाकादि व्यवहार से अति सुखदायक है ॥ ऋ० ८। ७१। ११ में भी ॥ २ ॥

इति पञ्चदशाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ

तृतीये खण्डे प्रथमर्चस्य-विश्वामित्र ऋषिः। अग्निर्देवता। गायत्री छन्दः ॥

तत्र प्रथमा-

१२ ३२ ३२ ३१२ २२
अदाभ्यः पुर एता विशामग्निर्मानुषीणाम् ।
२३ २३ २३ १२
तूर्णी रथः सदा नवः ॥ १ ॥ (१५५४)

पदपाठः-अदाभ्यः, पुरएता १। विशाम् ६। अग्निः १। मानुषीणाम् ६। तूर्णीः, रथः १। सदा अ०। नवः १॥

अन्वितपदार्थः-(मानुषीणाम्) मनुष्यसंबन्धिनीनां (विशाम्) प्रजानां (पुरएता) अग्रगन्ता (तूर्णीः) त्वरा-युक्तः (रथः) हविषां वहनाद्रथसदृशः (सदा) सर्वदा (नवः) नूतनः (अग्निः) पावकः (अदाभ्यः) अहिंसनी-योऽस्ति=न केनाऽपि तिरस्कर्त्तव्यः, सदा सर्वैः स्वस्वहोमेषु प्रयोज्यएव ॥ ऋग्वेदे ३। ११। ५ ऽपि ॥१॥

भाषार्थः-(मानुषीणाम्) मनुष्यों की (विशाम्) प्रजाओं के (पुरएता) आगे चलने वाला (तूर्णीः) शीघ्रगामी (रथः) रथ के समान हव्यों का ढोने वाला (सदा) सदा (नवः) नया (अग्निः) अग्नि (अदाभ्यः) किसी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

को तिरस्कृत न करना चाहिये किन्तु आदर पूर्वक निज २ होम में वर्त्तना चाहिये ॥ ऋ० ३ । ११ । ५ में भी ॥ १ ॥

अथ द्वितीया—

३ १र २र ३ १ २ ३ १ २ ३ १ २
अभि प्रयाꣳसि वाहसा दाश्वाँ अश्नोति मर्त्यः ।
१ २ ३ १ २
क्षयं पावकशोचिषः ॥ २ ॥ (१५५५)

पदपाठः—अभि अ० । प्रयांसि २ । वाहसा ३ । दाश्वान् १ । अश्नोति क्रि० । मर्त्यः १ । क्षयम् २ । पावकशोचिषः ५ ॥

अन्वितपदार्थः—(दाश्वान्) दानशीलः (मर्त्यः) यजमानो मनुष्यः (पावकशोचिषः) शोधकदीप्तेः अग्नेः सकाशात् (क्षयम्) निवासगृहम् (प्रयांसि) अन्नानि च (अभि अश्नोति) सर्वतः प्राप्नोति ॥

अग्निहोत्रेणान्नोत्पादोगृहशुद्धिश्चेति फलद्वयं यजमानेन प्राप्यते ॥ ऋग्वेदे ३ । ११ । ७ ऽपि ॥ २ ॥

भाषार्थः—(दाश्वान्) दानी यजमान (मर्त्यः) मनुष्य (पावकशोचिषः) शोधक किरणों वाले अग्नि से (क्षयम्) निवासगृह को और (प्रयांसि) अन्नों को (अभि अश्नोति) सब ओर से पाता है ॥

अग्निहोत्र से उस के करने वाले यजमान को शुद्ध गृह और अन्न इन दो फलों की प्राप्ति होती है ॥ ऋ० ३ । ११ । ७ में भी ॥ २ ॥

अथ तृतीया—

३ १र २र ३ २३ १२३२ ३ १ २
साह्वान्विश्वा अभियुजः क्रतुर्देवानामसृक्तः ।
३ २३ २
अग्निस्तुविश्रवस्तमः ॥ ३ ॥ [९] (१५५६)

पदपाठः—साह्वान् १ । विश्वाः, अभियुजः २ । क्रतुः १ । देवानाम् ६ । असृक्तः, अग्निः, तुविश्रवस्तमः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(अग्निः) पावकः (विश्वाः) सर्वाः (अभियुजः) अभियोक्त्रीः शत्रुसेनाः (साह्वान्) तिरस्कुर्वाणः (देवानां) वायुप्रभृतीनां (क्रतुः) यजनकरः (असृक्तः) अहिंसितो न नाशितः (तुविश्रवस्तमः) अतिशयेन बहुविधान्नवान् अस्तीति शेषः ॥ ऋग्वेदे ३ । ११ । ६ऽपि ॥३॥

भाषार्थः-(अग्निः) अग्नि, (विश्वाः) सब (अभियुजः) शत्रुसेनाओं को (साह्वान्) तिरस्कृत करता हुवा (देवानाम्) वायु आदि देवों का (क्रतुः) यजन करने वाला (असृक्तः) न नष्ट किया हुवा (तुविश्रवस्तमः) अतिशय से बहुविध अन्न वाला है ॥ ऋ० ३ । ११ । ६ में भी ॥ ३ ॥

अथ प्रगाथात्मक द्वितीयसूक्तस्य-सौभरिः काण्वऋषिः । अग्निर्देवता । उष्णिक् ककुप् निचृत्पङ्क्तिश्च क्रमेण छन्दसी ॥ तत्र प्रथमा-

३ १ २ ३ १र २र ३ २ ३ १ २ ३ १ २ ३ २
भद्रो नो अग्नि राहुतो भद्रा रातिः सुभगभद्रो अध्वरः ।
३ २ ३ १र २र
भद्रा उत प्रशस्तयः ॥१॥ (१५५७) व्याख्याता (१११)

अथ द्वितीया-

३ १र २र ३ २ ३ १ २ ३ १ २ ३ २
भद्रं मनः कृणुष्व वृत्रतूर्ये यनो समत्सु सासहिः ।
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ २ ॥

[१०] (१५५८)

पदपाठः-भद्रम्, मनः २। कृणुष्व क्रि० । वृत्रतूर्ये ७ । येन ३ । समत्सु ७ । सासहिः १ । अव अ० । स्थिरा २ । तनुहि क्रि० । भूरि २ । शर्धताम् ६ । वनेम क्रि० । ते २ । अभिष्टये ४ ॥

अन्वितपदार्थः-पूर्वमन्त्रात् हे " सुभग ! " इत्यनुवर्त्त्य-(वृत्रतूर्ये) संग्रामे (मनः) अस्मदीयं स्वान्तं (भद्रं)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कल्याणं धर्मयुद्धपरं (कृणुष्व) कुरु (येन) येन मनसा (समत्सु) संग्रामेषु (सासहिः) शत्रूणामभिभावुको भवति नरः । अपि च-(शर्धतां) शत्रूणां (भूरि) भूरीणि (स्थिरा) स्थिराण्यपि बलानि (अव-तनुहि) पराजितानि कुरु । वयं (ते) त्वाम् (अभिष्टये) अभीष्टफलप्राप्तये (वनेम) संभजेमहि ॥ वृत्रतूर्ये, समत्सु इति संग्रामनामनी निघं० २ । १७ ॥ ऋग्वेदे ८ । १९ । २० ऽपि, यजुर्वेदे १५ । ४० च ॥२॥

भाषार्थः-पूर्व मन्त्र से अनुवृत्ति लाकर हे "सुभग !" (वृत्रतूर्ये) संग्राम में (मनः) हमारे मन को (भद्रम्) कल्याण=भला=धर्मानुकूलयुद्ध में तत्पर (कृणुष्व) कर, (येन) जिस मन से (समत्सु) संग्रामों में (सासहिः) शत्रुओं का अभिभव=तिरस्कार करने में मनुष्य समर्थ होता है और (शर्धताम्) दबाते हुवे शत्रुओं की (भूरि) बहुत सी (स्थिरा) दृढ भी सेनाओं को (अव-तनुहि) अवनत कर, (ते) तुझ को (अभिष्टये) मनोवाञ्छित फलप्राप्ति के लिये (वनेम) हम भजते हैं ॥ निघण्टु २ । १७ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । १९ । २० और यजुः १५ । ४० में भी ॥ २ ॥

अथ तृचस्य तृतीयसूक्तस्य-गोतमऋषिः । अग्निर्देवता । उष्णिक्छन्दः ॥

तत्र प्रथमा-

२ ३ १ २ ३ १ २३ १ २
अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
३ १ २ ३ २३ १ २
अस्मे दोह जातवेदो महि श्रवः ॥ १ ॥ (१५५९)

व्याख्याता (९९)

अथ द्वितीया-

१ २३ १२ २२ ३ २ ३ २ ३ १ २ ३ २
स इधानो वसुः कविरग्निरीड्यो गिरा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ ३ १ २
रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ २ ॥ (१५६०)

पदपाठः—सः, इधानः, वसुः, कविः, अग्निः, ईडेन्यः १ । गिरा ३ । रेवत् २ । अस्मभ्यम् ४ । पुर्वणीक सं० । दीदिहि क्रि० ॥

अन्वितपदार्थः—(सः) उक्तस्त्वम् (इधानः) दीपनशीलः (वसुः) अष्टसु वसुष्वन्यतमः (कविः) क्रान्तदर्शनः मेधातत्त्वयुक्तो वा (अग्निः) पावकः (गिरा) वेदवाचा (ईडेन्यः) स्तुत्यः प्रशस्यो भवसि । (पुर्वणीक) बहुमुख ! बहुज्वाल ! अनीकं मुखमिति सायणाचार्यः (रेवत्) रैवद्धनवत् धनयुक्तं पदार्थजातम् (अस्मभ्यम्) अस्मदर्थं (दीदिहि) देहीति तात्पर्यार्थः । धातूनामनेकाऽर्थत्त्वात् ॥ ऋग्वेदे १ । ७९ । ५ यजुर्वेदे १५ । ३६ ऽपि ॥ २ ॥

भाषार्थः—(सः) वह (इधानः) प्रकाशशील (वसुः) ८ वसुओं में एक वसु (कविः) क्रान्तदर्शन वा बुद्धितत्त्वयुक्त (अग्निः) अग्नि (गिरा) वेद वाणी से (ईडेन्यः) प्रशंसनीय है सो (पुर्वणीक) हे बहुमुख ! बहुत लपटों वाले ! (अस्मभ्यम्) हमारे लिये (रेवत्) धनयुक्त पदार्थों को (दीदिहि) दे ॥ ऋ० १ । ७९ । ५ और यजुर्वेद १५ । ३६ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३२३ ३ १ २ ३ १२ २२
क्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः ।
१ २ ३ १ २ ३ १ २
स तिग्मजम्भ रक्षसो दह प्रति ॥ ३ ॥ [११] (१५६१)

पदपाठः—क्षपः क्रि० । राजन् सं० । उत अ० । त्मना ३ । अग्ने सं० । वस्तोः अ० । उत । उषसः २ । सः १ । तिग्मजम्भ सं० । रक्षसः २ । दह क्रि० । प्रति अ० ॥

अन्वितपदार्थः—(तिग्मजम्भ) हे तीक्ष्णज्वाल !

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(राजन्) प्रकाशमान ! (अग्ने) पावक ! (रक्षसः) दुष्ट जन्तून् (वस्तोः) दिने (उत) च (उषसः प्रति) उषः कालोपलक्षितासु रात्रिषु (सः) स त्वम् (क्षपः) दूरं गमय (उत) चार्थे (त्मना) आत्मना स्वतेजसा (दह) भस्मीकुरु ॥ ऋग्वेदे १ । ७९ । ६ यजुर्वेदे १५ । ३७ ऽपि ॥ ३ ॥

भाषार्थः-(तिग्मजम्भ) हे तीक्ष्णज्वालारूपी डाढों वाले ! (राजन्) प्रकाशमान ! (अग्ने) अग्ने ! (रक्षसः) दुष्ट जन्तुओं को (वस्तोः) दिन में (उत) और (उषसः प्रति) उषःकालोपलक्षित रात्रियों में भी (सः) वह तू (क्षपः) निवृत्त कर (उत) और (त्मना) अपने तेज से (दह) भस्म कर ॥ ऋ० १ । ७९ । ६ और यजुः १५ । ३७ में भी ॥ ३ ॥

इति पञ्चदशाऽध्याये तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थेखण्डे प्रथम तृचस्य-गोपवनः सप्तवध्रिर्वा ऋषिः । अग्निर्देवता । निचृदनुष्टुप्, गायत्री, विराड्गायत्री च क्रमेण छन्दांसि ॥ तत्र प्रथमा—

३ १ ३ ३ १ २ ३ १ २ ३ २
विशोविशोवो अतिथिं वाजयन्तः पुरुप्रियम् ।
३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ १ ॥ (१५६२)

व्याख्याता (८७)

अथ द्वितीया—

१ २ २ २ ३ १ २ ३ २ २ ३ १ २
यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् ।
२ ३ २ ३ १ २
प्रशꣳसन्ति प्रशस्तिभिः ॥ २ ॥ (१५६३)

पदपाठः यम् २ । जनासः, हविष्मन्तः १ । मित्रम् २ । न अ० । सर्पिरा-ऽऽसुतिम् २ । प्रशंसन्ति क्रि० । प्रशस्तिभिः ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(सर्पिरासुतिम्) घृताहुतिम् (यम्), अग्निम् (हविष्मन्तः) हव्ययुक्ताः (जनासः) जना यजमानाः (मित्रं न) सखायमिव (प्रशस्तिभिः) स्तोत्रैः (प्रशंसन्ति)॥ ऋग्वेदे ८ । ७४ । २ ऽपि ॥ २ ॥

भाषार्थः-(सर्पिरासुतिम्) घृत की आहुति वाले (यम्) जिस अग्नि की (मित्रम्) मित्र के (न) समान (जनासः) यजमान लोग (प्रशस्तिभिः) स्तोत्रों से (प्रशंसन्ति) प्रशंसा करते हैं ॥ ऋ० ८ । ७४ । २ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ १ २ ३ २ ३ २ ३ १ २

पन्याꣳ सं जातवेदसं यो देवतात्युद्यता ।

३ १ २ २ २ ३ १ २

हव्यान्यैरयद्दिवि ॥३॥ [१२] (१५६४)

पदपाठः-पन्यांसम्, जातवेदसम् २ । यः १ । देवताति ७ । उद्यता २ । हव्यानि २ । ऐरयत् क्रि० । दिवि ७ ॥

अन्वितपदार्थः-(पन्यांसम्) अतिशयेन प्रशंसनीयं (जातवेदसम्) जातधनं जातज्ञानं वा अग्निं स्तुम इति शेषः (यः) योग्निः (देवताति) देवतातौ यज्ञे (दिवि) आकाशे (उद्यता) उद्यतानि (हव्यानि) हवींषि (ऐरयत्) प्रेरयेत् देवेभ्यः ॥ ऋग्वेदे ८ । ७४ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(पन्यांसम्) अतिप्रशंसनीय (जातवेदसम्) अग्नि की " हम प्रशंसा करते हैं" (यः) जो अग्नि (देवताति) यज्ञ में (उद्यता) उद्यत (हव्यानि) हव्यों को (दिवि) आकाश में (ऐरयत्) देवतों के लिये पहुंचावे= भेजे ॥ ऋ० ८ । ७४ । ३ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य-भरद्वाजो बीतहव्यो बार्हस्पत्यो वा ऋषिः । अग्निर्देवता। जगती, विराड् जगती, त्रिष्टुप् चेति क्रमेण छन्दांसि ॥ तत्र प्रथमा-

१ २ ३ २ ३ १ २ ३ १ २ ३

समिद्धमग्निꣳ समिधा गिरा गृणे,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १ २ ३ २ ३ २
शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
२ ३ १ २ ३ १ २ ३ १ २
विप्रꣳ होतारं पुरुवारमद्रुहं,
३ २ ३ १ २ ३ १ २
कविꣳ सुम्नैरीमहे जातवेदसम् ॥ १ ॥ (१५६५)

पदपाठः–समिद्धम्, अग्निम् २ । समिधा, गिरा ३ । गृणे क्रि० । शुचिम्, पावकम् २ । पुरः अ० । अध्वरे ७ । ध्रुवम्, विप्रम्, होतारम्, पुरुवारम्, अद्रुहम्, कविम् २ । सुम्नैः ३ । ईमहे क्रि० । जातवेदसम् २ ॥

अन्वितपदार्थः–(समिधा) काष्ठेन (समिद्धं) सम्यक् प्रदीप्तम् (अग्निं) वैश्वानरं (गिरा), मन्त्रेण (गृणे) वर्णयामि स्तौमि। अपि च–(शुचिं) स्वयं शुद्धं (पावकम्) अन्येषामपि शोधकं (पुरः) अग्रे वर्त्तमानम् (अध्वरे) यज्ञे (ध्रुवं) निश्चलत्वेन स्थापितं (विप्रं) मेधातत्त्वयुक्तं (होतारं) देवानामाह्वातारं (पुरुवारं) बहुभिर्वरणीयम् (अद्रुहम्) अद्रोग्धारं सर्वेषामनुकूलं (कविं) क्रान्तदर्शिनं (जातवेदसं) जातधनं जातज्ञानं वा पावकं वयं (सुम्नैः) सुखैः सह (ईमहे) याचामहे॥ ऋग्वेदे ६ । १५ । ७ ऽपि॥१॥

भाषार्थः–(समिधा) पलाशादि की समिध् से (समिद्धम्) सुलगे हुवे प्रदीप्त (अग्निम्) अग्नि को (गिरा) वेदवचन मन्त्र से (गृणे) वर्णन करता हूं और (शुचिम्) आप शुद्ध तथा (पावकम्) औरों के शुद्ध करने वाले (पुरः) आगे (अध्वरे) यज्ञ में (ध्रुवम्) निश्चल स्थिर स्थापित (विप्रम्) बुद्धितत्त्व वाले (होतारम्) देवों के बुलाने वाले (पुरुवारम्) बहुतों से वरण किये जाने योग्य (अद्रुहम्) किसी से द्रोह न करने वाले सब के अनुकूल-वर्त्ती (कविम्) क्रान्तदर्शी (जातवेदसम्) अग्नि को हम (सुम्नैः) सुखोंके साथ (ईमहे) मांगते=चाहते हैं ॥ ऋ० ६ । १५ । ७ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३१२ ३१२ ३१२ ३१२ २१र २र
त्वां दूतमग्ने अमृतं युगे युगे हव्यवाहं दधिरे पायुमीड्यम् ।
३१२३ १२ ३ १२ ३२ ३२ ३ १२३ १२
देवासश्च मर्त्तासश्च जागृविं विभुं विश्पतिं नमसा निषेदिरे

॥२॥ (१५६६)

पदपाठः-त्वाम्, दूतम् २ । अग्ने सं० । अमृतम् २ । युगे, युगे ७ । हव्यवाहम् २ । दधिरे क्रि० । पायुम्, ईड्यम् २ । देवासः १ । च अ० । मर्त्तासः १ । च । जागृविम्, विभुम्, विश्पतिम् २ । नमसा ३ । निषेदिरे क्रि० ॥

अन्वितपदार्थः-(अग्ने) पावक ! (देवासः) देवाः (च) तथा (मर्त्तासः) मनुष्याः (च) अन्ये च (युगे युगे) समये समये (अमृतं) सुखदं (हव्यवाहं) हविषां वोढारं (त्वां, दूतं), (दधिरे) विदधिरे कृतवन्तः तथा (जागृविं) जागरूकं (विभुं) व्यापकं (पायुं) पालयितारम् (ईड्यं) प्रशंसनीयं (विश्पतिं) विशां प्रजानां पालकमग्निं (नमसा) अन्नेन हव्येन सह (निषेदिरे) उपसीदन्ति ॥

सूर्यादयो देवा अपि अग्निहोत्रं स्वाभाविकं विदधति, तथैव मनुष्यैरपि अनुष्ठातव्यम् ॥ ऋग्वेदे ६ । १५ । ८ऽपि ॥२॥

भाषार्थः-(अग्ने) अग्ने ! (देवासः) देवता (च) और (मर्त्तासः) मनुष्य (च) और अन्य सब (युगे युगे) समय २ पर (अमृतम्) सुखदायी अमर (त्वाम्) तुझ को (हव्यवाहम्) हव्य लेजाने वाला (दूतम्) दूत (दधिरे) बनाते हैं, तथा (जागृविम्) जागने और जगाने चेताने वाले (विभुम्) काष्ठादि में व्यापे हुवे (पायुम्) रक्षा करने वाले (ईड्यम्) प्रशं-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सनीय (विश्पतिम्) प्रजापालक अग्नि की (नमसा) हव्य अन्न से (निषेदिरे) उपासना करते हैं ॥

सूर्यादि देव जैसे स्वाभाविक होम करते हैं तथा अन्य प्राणी करते हैं, वैसे मनुष्यों को भी करना चाहिये ॥ ऋ० ६ । १५ । ८ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ २ ३ १ २ ३ २ ३ ३ २ ३ २ ३
विभूषन्नग्न उभयाँ अनुव्रता, दूतो देवानाꣳ

१ २ ३ १ २ १ २ ३ १ २ ३ २ ३ १
रजसी समीयसे । यत्ते धीतिꣳ सुमतिमावृणीमहे,

२ ३ १ २ ३ १ २
ऽध स्मा नस्त्रिवरूथः शिवोभव ॥३॥ [१३] (१५६७)

पदपाठः—विभूषन् १ । अग्ने सं० । उभयान् २ । अनुव्रताः १ । दूतः १ । देवानाम् ६ । रजसी २ । समीयसे क्रि० । यत् ५ । ते ४ । धीतिम्, सुमतिम् २ । आवृणीमहे क्रि० । अध, स्म अ० । नः ४ । त्रिवरूथः, शिवः १ । भव क्रि० ॥

अन्वितपदार्थः—(अग्ने) पावक ! (देवानां दूतः) देवदूतस्त्वम् (उभयान्) देवान्मनुष्यांश्च (विभूषन्) विशेषेण भूषयन्सन् (रजसी) द्यावाभूमी (समीयसे) संचरसि (यत्) यस्मात्कारणात् (अनुव्रताः) अकूलवर्त्तिनोवयं (सुमतिं) शोभनमतिमत् (धीतिं) कर्म अनुष्ठानं (ते) तुभ्यम् (आवृणीमहे) संभजामहे (अध स्म) अतः कारणात् (त्रिवरूथः) आहवनीयादिभेदैः भूलोकादिभेदैर्वा त्रिस्थानस्त्वम् (नः) अस्मभ्यं (शिवः) सुखदः (भव) एधि ॥ ऋग्वेदे ६ । १५ । ९ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(अग्ने) अग्ने ! (देवानाम्) देवों का (दूतः) दूत तू (उभयान्) दोनों देवतों और मनुष्यों को (विभूषन्) विशेषकर भूषित करता हुवा (रजसी) द्युलोक और भूमिलोक को (समीयसे) भले प्रकार जाता है (यत्) जिस कारण (अनुव्रताः) अनुकूलवर्त्ती हम (सुमतिम्) सुन्दर मति वाले (धीतिम्) कर्म अनुष्ठान का (ते) तेरे लिये (आवृणीमहे) सेवन करते हैं (अध स्म) इस कारण (त्रिरूथः) आहवनीयादि वा भूलोकादि तीन स्थानों वाला तू (नः) हमारे लिये (शिवः) सुखदायी (भव) हो ॥ ऋ० ६ । १५ । ९ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-प्रयोग ऋषिः । अग्निर्देवता ।

गायत्री छन्दः ॥ तत्र प्रथमा-

१२ ३ २ ३ २ ३ १२ ३ १ ३

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।

३ १र २र

वायोरनीके अस्थिरन् ॥१॥ (१५६८) व्याख्याता (१३)

अथ द्वितीया-

१ २ ३ १र २र ३ २ ३ १र २र

यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनम् ।

१ २ ३ १ २ ३ २

आपश्चिन्निदधा पदम् ॥ २ ॥ (१५६९)

पदपाठः-यस्य ६ । त्रिधातु, अवृतम्, बर्हिः १ । तस्थौ क्रि० । असन्दिनम् १ । आपः १ । चित् अ० । निदधा क्रि० । पदम् २ ॥

अन्वितपदार्थः-(यस्य), अग्नेः (त्रिधातु) त्रिपर्व ग्रन्थित्रययुक्तम् (अवृतम्) अनावृतम् (असंदिनम्) अबद्धं च (बर्हिः) आस्तरणं (तस्थौ) तिष्ठति, सुबद्धमपि बर्हिरग्निहोत्रकाले अबद्धं कृत्वा आस्तृणन्ति (आपः) जलानि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(चित्) अपि (पदम्) यथास्थानं (निदधा) निधीयन्ते प्रणीतादिषु । सोऽग्निरेवमवश्यं सेव्यः ॥ ऋग्वेदे ८ । १०२ । १४ ऽपि ॥ २ ॥

भाषार्थः-(यस्य) जिस अग्नि का (त्रिधातु) तीन जोड़ों वा गांठों वाला (अवृतम्) विना ढका (असंदिनम्) खुला (बर्हिः) कुशास्तरण (तस्थौ) रहता है (चित्) और (आपः) जल (पदम्) यथास्थान (निदधा) रक्खे रहते हैं । वह अग्नि सेवनीय अवश्य है ॥

अर्थात् अग्निहोत्र के समय कुशमुष्टि खोल कर खुले में बिछानी चाहिये जो अन्य समय बन्धी रक्खी रहती है, जिस में ३ पर्व वा गांठ होती हैं, और जल भी प्रणीतापात्रादि ठीकस्थान में रखना चाहिये ॥ ऋ० ८।१०२।१४ में भी ॥२॥

अथ तृतीया-

३ १ ३ १ २ ३ १ र २ र ३ १ २
पदं देवस्य मीढुषो ऽनाधृष्टाभिरूतिभिः ।
३ १ र २ र ३ २
भद्रा सूर्य इवोपदृक् ॥ ३ ॥ [१४] (१५७०)
इति सप्तम प्रपाठकस्य द्वितीयोऽर्धप्रपाठकः ॥

* इति सप्तमः प्रपाठकः ॥ ७ ॥ *

पदपाठः-पदम् १ । देवस्य, मीढुषः ६ । अनाधृष्टाभिः, ऊतिभिः ३ । भद्रा १ । सूर्यइव अ० । उपदृक् १ ॥

अन्वितपदार्थः-(अनाधृष्टाभिः) (ऊतिभिः) रक्षाभिः (मीढुषः) वृष्टिकरस्य (देवस्य) दिव्यगुणयुक्तस्याऽग्नेः (पदम्) स्वरूपम् (सूर्यइव) सूर्यसमं दृष्टिसहायकं (भद्रा) उपयोगाऽर्हा (उपदृक्) सूक्ष्मवीक्षणदूरवीक्षणादिकार्यो-पयुक्तोपदृक् उपनेत्रं भवतीति शेषः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्यक् ज्ञातगुणस्य वृष्ट्यादिद्वारा सेक्तुरग्नेर्देवस्य विकारतो भद्रोपदृक् शोभनं सूक्ष्मवीक्षणदूरवीक्षणादिकमुपनेत्रमपि मनुष्यैः संसाध्यमिति भावः॥ ऋग्वेदे ८। १०२। १५ऽपि ॥ ३ ॥

इति

श्रीमत्कण्व वंशाऽवतंस पं० हज़ारीलाल स्वामिसूनुना,

हस्तिनापुर पार्श्ववर्त्ति-परीक्षितगढ़ निवासिना,

तुलसीराम स्वामिना

कृते सामवेदभाष्योत्तरार्चिके पञ्चदशोऽध्यायः ॥ १५ ॥

भाषार्थः-(अनाधृष्टाभिः) न सताई हुई है (ऊतिभिः) रक्षाओं से (मीढुषः) वर्षक (देवस्य) देव अग्नि का (पदम्) स्वरूप (सूर्यइव) सूर्य के समान आंखों का सहायक (भद्रा) शोभन उत्तम (उपदृक्) उपनेत्र होता है॥

जब अग्नि के गुण भले प्रकार ज्ञात होजावें तो रक्षापूर्वक उस से ऐसे उपनेत्र (दूनबीन और सूक्ष्मबीन आदि) बन सक्ते हैं कि जो सूर्य के समान आंख की सहायता करें कि जैसे सूर्य की सहायता से मनुष्य दूर और सूक्ष्म पदार्थों को देखता है॥ ऋ० ८। १०२। १५ में भी ॥ ३ ॥

यह

श्रीमान् कण्ववंशावतंस-पं०-हज़ारीलाल स्वामी के पुत्र,

परीक्षितगढ़ जिला मेरठ निवासी,

तुलसीराम स्वामिकृत

सामवेद भाष्य उत्तरार्चिक में पन्द्रहवां अध्याय समाप्त हुवा ॥ १५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ षोडशाऽध्यायः

"इदानीं सर्वस्वारश्च पुनश्चातुर्मास्यानि" इति विव०

तत्र

प्रथमे खण्डे

प्रगाथात्मक प्रथम सूक्तस्य-मेधातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा—

३ १ २ ३१२ ३ २३ १ २ ३१२ ३ १ २
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः । समीचीनास
१ २३ १ २ ३१ २ ३ २
ऋभवः समस्वरन्नुद्रा गृणन्त पूर्व्यम् ॥ १ ॥ (१५७१)

व्याख्याता (२५६)

अथ द्वितीया-

३ १र २र ३ २ ३ २३१२३२३ १ २
अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवोमदे सुतस्य विष्णवि।
३ १र २र ३१२३१र २र ३१२
अद्या तमस्य महिमानमायवोऽनुष्टुवन्ति पूर्वथा ॥

॥ २ ॥ [१] (१५७२)

पदपाठः-अस्य ६ । इत् अ० । इन्द्रः १ । वावृधे क्रि० । वृष्ण्यम्, शवः २ । मदे ७ । सुतस्य ६ । विष्णवि ७ । अद्य अ० । तम् २ । अस्य ६ । महिमानम् २ । आयवः १ । अनुष्टुवन्ति क्रि० । पूर्वथा अ० ॥

अन्वितपदार्थः-(विष्णवि) विष्णौ सर्वदेहव्यापिनि (मदे) हर्षे निमित्ते (सुतस्य) अभिषुतस्य सोमस्य (वृष्ण्यं) वृष्यत्वं वीर्यवर्धकत्वं (शवः) बलं (इत्) च (इन्द्रः) परमेश्वरः (वावृधे) वर्धयति (अद्य) वर्त्तमान काले (तम्) उक्तम् (अस्य) परमेश्वरस्य (महिमानं)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महत्त्वम् (आयवः) मनुष्याः (पूर्वथा) पूर्ववत् तेनैव प्रकारेण (अनुष्टुवन्ति) प्रशंसन्ति ॥ ऋग्वेदे ८ । ३ । ८ ऽपि ॥ २ ॥

भाषार्थः-(विष्णवि) सर्वदेहव्यापी (मदे) हर्ष के निमित्त (सुतस्य) अभिषुत सोम के (वृष्णयम्) वीर्यवर्धकत्व (इत्) और (शवः) बल को (इन्द्रः) परमेश्वर (वावृधे) बढ़ाता है (अद्य) अब वर्त्तमान में (तम्) उस (अस्य) इस परमेश्वर की (महिमानम्) बड़ाई को (आयवः) मनुष्य लोग (पूर्वथा) पूर्ववत् (अनुष्टुवन्ति) स्तुत करते हैं ॥ ऋ० ८ । ३ । ८ में भी ॥२॥

अथ चतुर्ऋचस्य द्वितीय सूक्तस्य-विश्वामित्र ऋषिः ।
इन्द्राग्नी देवते । गायत्री छन्दः ॥ तत्र प्रथमा-

१ २ ३ १ २ ३ १ २ ३ १ २
प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
१ २ ३ २३ १ २
इन्द्राग्नी इष आवृणे ॥१॥ (१५७३)

पदपाठः-प्र अ० । वाम् २ । अर्चन्ति क्रि० । उक्थिनः, नीथाविदः, जरितारः १ । इन्द्राग्नी सं० । इषे ४ । आवृणे क्रि० ॥

अन्वितपदार्थः-(इन्द्राग्नी) हे इन्द्र ! हे अग्ने ! (उक्थिनः) उक्थवन्तो होत्रादयः शस्त्रवन्तः (नीथाविदः) स्तोत्राभिज्ञाः सामगानकुशलाः (जरितारः) स्तोतारउद्गात्रादयः (वाम्) युवाम् (अर्चन्ति) यजन्ति, अहं यजमानोऽपि (इषे) अन्नाद्याय (प्र-आ-वृणे) युवां सर्वथा प्रयजामि ॥

इन्द्राग्न्योर्व्याख्यानमुक्तपूर्वं बहुशस्तदेवात्राऽपि योज्यम् ॥ ऋग्वेदे ३ । १२ । ५ ऽपि ॥ १ ॥

भाषार्थः-(इन्द्राग्नी) हे इन्द्र ! और अग्ने ! (उक्थिनः) उक्थ=शस्त्र=

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तोत्र वाले होता आदि और (नीथाविदः) स्तोत्र जानने वाले सामगान में चतुर उद्गाता आदि (अरितारः) स्तोताजन (वाम्) तुम दोनों का (अर्चन्ति) यजन करते हैं और मैं यजमान भी (इषे) अन्नाद्य के लिये तुम्हारा (प्र-आ-वृणे) सर्वथा अतिशय यजन करता हूं ॥ इन्द्र और अग्नि का व्याख्यान बहुत वार कर चुके हैं, वही यहां जानो ऋ० ३ । १२ । ५ में भी ॥ १ ॥

अथ द्वितीया-

१ ३ ३ १र २र ३ १ २

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।

३ १र २र३ १ २

साकमेकेन कर्मणा ॥ २ ॥ (१५७४)

पदपाठः-इन्द्राग्नी सं० । नवतिम् २ । पुरः २ । दासपत्नीः २ । अधूनुतम् क्रि० । साकम् अ० । एकेन, कर्मणा ३ ॥

अन्वितपदार्थः-(इन्द्राग्नी) इन्द्रोमध्यस्थानः अग्निः पृथिवीस्थानश्चेति तत्संबुद्धौ इन्द्राग्नी ! युवां (साकम्) सह (एकेन) अभिन्नेन (कर्मणा) दाहादिना (दास-पत्नीः) दासा उपक्षयितारः पतयः पालका यासां ताः (न-वतिं पुरः) नवतिसंख्याकाः पुरः पुरीः (अधूनुतम्) अकम्पयतं कम्पयथः ॥

यथाऽस्मिन्देहे १० दश प्राणाः १० दशेन्द्रियाणि, ६ षट् रसाः, ४ चत्वार्यन्तःकरणानि इति त्रिंशत् ३० पुरस्त्रिगुण-भेदभिन्ना नवतिसंख्यां लभन्ते, तथाऽस्मिन्ब्रह्माण्डेऽपि षट् ऋतवः, दश प्राणाः, दशेन्द्रियाणि, चत्वारि मनोबुद्धि-चित्ताऽहङ्काराख्यान्यन्तःकरणकारणानि सर्वत्र प्रसृतानि सन्ति, ता इमाः सत्त्वरजस्तमोगुणत्रयभेदभिन्ना नवति-संख्याकाः सर्वा भवन्ति, ता एता एवाऽकूलवर्त्तिन्यो मित्रपुरो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽननुकूलाश्चोपक्षयितणां शत्रूणां पुरोवेदितव्यास्तासां शत्रु पुरामिन्द्राग्नी स्वेनकर्मणाऽऽनुकूल्ये प्रवर्त्तकौ स्तोऽतस्तयो-र्यजनं कर्त्तव्यमित्याशयः ॥ ऋग्वेदे ३। १२ । ६ ऽपि ॥ ३ ॥

भाषार्थः-(इन्द्राग्नी) इन्द्र ! मध्यस्थान देव ! और अग्ने ! पृथिवीस्थान देव ! तुम दोनों (साकम्) साथ (एकेन) अपने एक अभिन्न मिले हुवे (कर्मणा) दाहादि कर्म से (दासपत्नीः) उपक्षय करने वाले हमारे शत्रु जिन के पालक हैं उन (नवतिम्) नठवे ९० (पुरः) पुरियों को (अधूनुतम्) कम्पमान कर देते हो ॥

जिस प्रकार इस देह में १० प्राण, १० इन्द्रियां, ६ रस, ४ अन्तःकरण ये ३० तीस पुरी ३ सत्त्व रज तम गुणों के भेद से भिन्न होकर ९० नठवे हैं, इसी प्रकार इस ब्रह्माण्ड में भी ६ ऋतु, हिम, शिशिर, वसन्त, ग्रीष्म, वर्षा और शरद् । १० प्राण, अपान, उदान, समान, व्यान, नाग, कूर्म, कृकल, देवदत्त और धनञ्जय, १० प्रसिद्ध इन्द्रियों और चार मन, बुद्धि, चित्त और अहङ्कार रूप अन्तःकरण के कारण पदार्थ सर्वत्र फैले हैं, वे भी ३ गुणों के भेद से ९० प्रकार के हो जाते हैं, वे ९० पुरी जब हमारे अनुकूल हों तब मित्रपुरी और जब विरुद्ध वा प्रतिकूल हों तब शत्रुपुरी कहाती हैं, इन्द्र और अग्नि के यजन करने से ये दोनों उन ९० पुरियों के प्रतिकूल अंश वा प्रवृत्ति को अपने दाह प्रकाश आदि मिश्रित कर्म से नष्ट कर डालते हैं॥ ऋ० ३। १२ । ६ में भी ॥ २॥

अथ तृतीया-

१ २ ३ १ २ ३ २ ३ ३ १ २ ३ १ २
इन्द्राग्नी अपसस्पर्युप प्रयन्ति धीतयः ।
३ १ २ ३ २ १ २
ऋतस्य पथ्याऽ३ऽअनु ॥ ३ ॥ (१५७५)

पदपाठः-इन्द्राग्नी सं० । अपसः ६ । पर्युपप्रयन्ति क्रि० । धीतयः १ । ऋतस्य ६ । पथ्याः २ । अनु अ० ॥

अन्वितपदार्थः-(इन्द्राग्नी) हे इन्द्र ! हे अग्ने ! च (धीतयः) सोमादीनां धातारः पातारोवा होत्रादयः(ऋतस्य)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कर्मफलस्य (पथ्याः) मार्गान् (अनु) लक्षीकृत्य (अपसः) कर्मणोऽस्माभिः क्रियमाणस्य यज्ञस्य (परि, उप, प्र, यन्ति) समन्तात् समीपे स्थिताः सन्तो युवां प्रपद्यन्ते ॥ ऋग्वेदे ३ । १२ । ७ ऽपि ॥ ३ ॥

भाषार्थः-(इन्द्राग्नी) हे इन्द्र ! और हे अग्ने ! (धीतयः) सोमादि को धारण करने वा पीने वाले होता अध्वर्यु उद्गाता और ब्रह्मा आदि ऋत्विज् लोग (ऋतस्य) कर्मफल के (पथ्याः) मार्गों को (अनु) लक्ष्य करके (अपसः) हमारे द्वारा किये जाते हुवे यज्ञकर्म के (परि, उप, प्र, यन्ति) चारों ओर, समीप, बहुतायत से, तुम को प्राप्त होते हैं ॥ ऋ० ३ । १२ । ७ में भी ॥ ३ ॥

अथ चतुर्थी—

१ २ ३ १ २ ३ १ २ ३ १ २

इन्द्राग्नी तविषाणि वाꣳ सधस्थानि प्रयाꣳसि च ।

३ २ ३ १ २ ३ २

युवोरप्तूर्यꣳ हितम् ॥ ४ ॥ [२] (१५७६)

पदपाठः-इन्द्राग्नी सं० । तविषाणि १ । वाम् ६ । सधस्थानि, प्रयांसि १ । च अ० । युवोः ७ । अप्तूर्यम् , हितम् १ ॥

अन्वितपदार्थः-(इन्द्राग्नी) हे इन्द्राग्नी ! (वाम्) युवयोः (तविषाणि) बलानि (प्रयांसि) अन्नानि (च) (सधस्थानि) सहवर्त्तीनि सन्ति तथा (अप्तूर्यम्) वृष्टि-धारायाः प्रेरकत्वं (युवोः) युवयोः (हितम्) निहितम् ॥ ऋग्वेदे ३ । १२ । ८ ऽपि ॥ ४ ॥

भाषार्थः-(इन्द्राग्नी) हे इन्द्र ! और अग्ने ! (वाम्) तुम दोनों के (तविषाणि) बल (च) और (प्रयांसि) अन्न (सधस्थानि) साथ रहने वाले हैं और (अप्तूर्यम्) वर्षा की धाराओं का प्रेरकत्व भी (युवोः) तुम दोनों में (हितम्) स्थित है ॥ ऋ० ३ । १२ । ८ में भी ॥ ४ ॥

अथ प्रगाथात्मक द्वितीय सूक्तस्य-भर्गऋषिः । इन्द्रोदेवता । बृहती छन्दः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र प्रथमा–

३ २ १ २ ३ १ २ १ २ ३ १ २

शग्ध्यू ऽ३ऽषुशचीपत इन्द्र विश्वाभिरूतिभिः ।

२ ३ १र २र ३ १ २ ३ २ ३ १ २ ३ १ २

भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥

॥१॥ (१५७७) व्याख्याता (२५३)

अथ द्वितीया–

३ १र २र ३ १र २र ३ १ २ ३ १ २

पौरो अश्वस्य पुरुकृद्गवामस्युत्सोदेव हिरण्ययः ।

२ ३ १र २'३ १ २ १ २उ ३ २ ३ १र २र

नकिर्हि दानं परि मर्धिषत्त्वे यद्यद्यामि तदाभर ॥२॥ [३] (१५७८)

पदपाठः–पौरः १ । अश्वस्य ६ । पुरुकृत् १ । गवाम् ६ । असि क्रि० । उत्सः १ । देव सं० । हिरण्ययः १ । नकिः, हि अ० । दानम् २ । परि मर्धिषत् क्रि० । त्वे ६ । यत्, यत् २ । यामि क्रि० । तत् २ । आभर क्रि० ॥

अन्वितपदार्थः–(देव) दिव्य ! (इन्द्र) परमेश्वर ! त्वम् (अश्वस्य) प्राणस्य तुरगस्य वा (पौरः) पूरयिता (असि) भवसि (गवाम्) चक्षुरादीनामिन्द्रियाणां दुग्धदात्रीणां गवां वा (पुरुकृत्) बाहुल्यकृत् असि=त्वत्प्रसादात्प्राणिनां प्राणा इन्द्रियाणि च समीचीनतया तिष्ठन्ति गवाश्वादिपशुलाभो वा जायते । स त्वं (हिरण्ययः) ज्योतिःस्वरूपः (उत्सवः) कूपवद्गभीरोऽसि (त्वे) तव=त्वदीयं (दानम्) वितरणं कस्मिंदपि (हि) निश्चयेन (नकिः) नैव (परिमर्धिषत्) परि हिनस्ति=नाशयति, अतः (यत्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यत्), वस्तुजातं (यामि) याचे (तत्) तत्तदेव सर्वम् (आभर) कृपयापूरय ॥ ऋग्वेदे ८ । ५० । ६ ऽपि ॥ २॥

भाषार्थः-(देव) हे दिव्य ! (इन्द्र) परमेश्वर ! तू (अश्वस्य) प्राण वा घोड़ों का (पौरः) भरपूर करने वाला (असि) है और (गवाम्) इन्द्रियों वा गौवों का (पुरुकृत्) बहुत करने वाला है अर्थात् तेरे प्रसाद से प्राण और इन्द्रियां अच्छे प्रकार मिलते और वर्त्तते हैं वा घोड़े गौ आदि उपयोगी धन धान्यादि की कमी नहीं रहती सो तू (हिरण्ययः) ज्योतिस्स्वरूप और (उत्सः) कुवे के समान गम्भीर है (त्वे) तेरे (दानम्) दिये दान को कोई (हि) निश्चय (नकिः) नहीं (परिमर्धिषत्) लूट सक्ता=नष्ट कर सक्ता, अतः (यत् यत्) जो जो (यामि) मांगता हूं (तत्) वह वह (आभर) भरपूर करदे ॥ ऋ० ८ । ५० । ६ में भी ॥ २ ॥

अथ प्रगाथात्मक चतुर्थ सूक्तस्य-भर्गऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा-

२उ ३ १ २ ३२उ ३ १ २ १ २ ३

त्वं ꣳ ह्यहि चेरवे विदा भगं वसुत्तये । उद्वावृषस्व मघवन्

१ २ ३ २ ३ १ २

गविष्टय उदिन्द्राश्वमिष्टये ॥१॥ (१५७९) व्याख्याता (२४०)

अथ द्वितीया-

१ ३२ ३१२ ३ १ २ ३२ ३ १ २

त्वं पुरू सहस्राणि शतानि च यूथा दानाय मꣳहसे ।

१ २ ३१२ ३ १ २ ३ २ ३ २ ३ १ २

आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥२॥[४](१५८०)

पदपाठः-त्वम् १ । पुरू, सहस्राणि, शतानि २ । च अ० । यूथा २ । दानाय ४ । मंहसे क्रि० । आ अ० । पुरन्दरम् २ । चकृम क्रि० । विप्रवचसः १ । इन्द्रम् २ । गायन्तः १ । अवसे ४ ॥

अन्वितपदार्थः-पूर्वमन्त्रात् हे मघवन्! इन्द्र ! परमेश्वर ! इत्यनुवर्त्त्य-(त्वम्), (पुरू) पुरूणि बहूनि (सह-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्राणि शतानि च), (यूथा) गोधनादियूथानि (दानाय) दानकर्मणे यजमानाय (मंहसे) ददासि, (विप्रवचसः) विविधप्रकृष्टवचनरचनावन्तः (गायन्तः) सामगानादि द्वारा भवन्तं स्तुवन्तो वयं (पुरन्दरं) कामादिशत्रुपुरां दरयितारम् (इन्द्रं) परमेश्वरं त्वाम् (अवसे) रक्षायै (आ चक्रम) अभिमुखं कुर्याम ॥ ऋग्वेदे ८। ६१ । ८ऽपि ॥२॥

भाषार्थः-पूर्व मन्त्र से अनुवृत्ति लाकर हे मघवन् ! इन्द्र ! परमेश्वर ! (त्वम्) आप (पुरू) बहुत (सहस्राणि शतानि च) सैंकड़ों और सहस्रों (यूथा) गौ धनादि के समूहों को (दानाय) दानकर्मा यजमान के लिये (मंहसे) देते हैं, सो (विप्रवचसः) विविध उत्तम वचनों वाले और (गायन्तः) सामगानादि द्वारा आप की स्तुति गाते हुवे हम (अवसे) रक्षा के लिये (पुरन्दरम्) कामादि शत्रुओं के पुरों को तोड़ने वाले (इन्द्रम्) तुम परमेश्वर को (आ चक्रम) साक्षात् करें ॥ ऋ० ८ । ६१ । ८ में भी ॥ २ ॥

अथ प्रगाथात्मक पञ्चम सूक्तस्य-सौभरिर्ऋषिः । अग्निर्देवता । बृहती छन्दः ॥

तत्र प्रथमा-

२उ ३ १२३ २३ १ २ ३ १र २र २ ३ १र २र

यो विश्वा दयत वसु होता मन्द्रोजनानाम् । मधोर्न पात्रा

३ १ २ ३ १र २र ३ १२

प्रथमान्यस्मै प्रस्तोमा यन्त्वग्नये ॥१॥(१५८१) व्याख्याता(४४)

अथ द्वितीया-

२ ३ २ ३ २ ३क२र ३१२ ३ १ २

अश्वं न गीर्भी रथ्यꣳ सुदानवो मर्मृज्यन्ते

३१२ ३ २ ३ १र २र ३

देवयवः । उभे तोके तनये दस्म विश्पते

२ ३ १ २ ३ १ २

पर्षि राधो मघोनाम् ॥ २ ॥ [५] (१५८२)

पदपाठः-अश्वम् २ । न अ० । गीर्भिः ३ । रथ्यम् २ । सुदानवः १ । मर्मृ-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्यन्ते क्रि० । देवयवः १ । उभे, तोके, तनये ७ । दस्म, विश्पते सं० । पर्षि क्रि० । राधः २ । मघोनाम् ॥

अन्वितपदार्थः-(दस्म) साक्षात्कर्त्तव्य ! वा दर्शनीय ! (विश्पते) विशां प्रजानां पते पालक ! परमेश्वर ! वा अग्ने ! (सुदानवः) शोभनदाना भक्ता यजमाना वा (देवयवः) देवानात्मन इच्छन्तः त्वां (रथ्यं) रथस्य वोढारम् (अश्वं न) अश्वमिव कर्मफलस्य वोढारं प्रापयितारं हव्यवोढारं वा (गीर्भिः) वचोभिः (मर्मृज्यन्ते) प्रशंसन्ति परिचरन्ति (मघोनाम्) मघवतां मखवतां यज्ञवतां याज्ञिकानां (तोके) पुत्रे (तनये) पौत्रे चेति (उभे) उभयस्मिन् (राधः) धनधान्यादिकं (पर्षि) ददासि ॥

सम्यक् परिचरितः परमात्माऽग्निर्वा ज्ञानयज्वनां कर्मयज्वनां वा पुत्रपौत्रादिसन्ततिपर्यन्तं धनधान्यादिकं ददाति, तस्मात् वचोभिः प्रशस्योभवति ॥

ऋग्वेदे ८ । १०३ । ७ ऽपि ॥ २ ॥

भाषार्थः-(दस्म) साक्षात् करने योग्य ! (विश्पते) प्रजापते ! परमात्मन्! (सुदानवः) जिन्हों ने अच्छे दान किये हैं वे भाग्यवान् (देवयवः) देवों को चाहने वाले जन (रथ्यम्) रथ के लेचलने वाले (अश्वम्) घोड़े (न) के समान कर्मफल के पहुंचाने वाले तुझ को (गीर्भिः) स्तोत्रों से (मर्मृज्यन्ते) स्तुत करते हैं क्योंकि तू (मघोनाम्) ज्ञानयज्ञाऽनुष्ठानियों के (तोके) पुत्र (तनये) और पौत्र (उभे) दोनों में (राधः) धन धान्यादि को (पर्षि) देता है ॥

परमात्मा की भले प्रकार उपासना प्रार्थना करने वाले भाग्यशाली जनों के पुत्र पौत्रादि सन्तति पर्यन्त को धन धान्यादि की कमी नहीं रहती, इस लिये वह कर्मफलप्रदाता सदा स्तुति के योग्य है ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भौतिक पक्ष में–(दस्म) देखने योग्य ! (विश्पते) यज्ञ द्वारा अन्नादि उत्पन्न करके प्रजा का पालन करने वाले ! अग्ने ! (सुदानवः) अच्छा दान करने वाले (देवयवः) देवों को चाहने वाले यजमान लोग (रथ्यम्) रथ वाहने वाले (अश्वम्) घोड़े (न) के समान हव्य वाहने वाले तुझ को (गीर्भिः) वचनों से (समृञ्जन्ते (परिचरित) करते हैं क्योंकि (सघोनाम्) यज्ञ वालों के (तोके) पुत्र और (तनये) पौत्र (उभे) दोनों में (राधः) धन धान्यादि को (धिषे) तू देता है ॥

भले प्रकार यज्ञद्वारा अग्नि की परिचर्या करने वालों के पुत्र पौत्रादि सन्तति पर्यन्त धन धान्यादि की समृद्धि होती है, इस लिये रथ्य अश्व के तुल्य हव्यों के वोढा अग्नि की वचनों से प्रशंसा करनी चाहिये ॥ ऋ० ८ । १०३ । ७ में भी ॥ २ ॥

इति षोडशाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे एकर्चस्य प्रथमसूक्तस्य शुनःशेपऋषिः । वरुणोदेवता । गायत्री छन्दः ॥ तेयम्—

३ १ २ ३ १२३ १ २
इमं मे वरुण श्रुधी हवमद्या च मृडय ।
१ २ ३ १र २र
त्वामवस्युराचके ॥ १ ॥ [६] (१५८३)

पदपाठः–इमम् २ । मे ६ । वरुण सं० । श्रुधि क्रि० । हवम् २ । अद्य, च अ० । मृडय क्रि० । त्वाम् २ । अवस्युः १ । आ चके क्रि० ॥

अन्वितपदार्थः–(वरुण) हे वरेण्य ! परमेश्वर ! (मे) मम (इमम्) प्रस्तूयमानं (हवम्) आह्वानं स्तोत्रं (श्रुधि) अङ्गीकुरु (च) पुनः (अद्य) वर्त्तमानदिने (मृडय) मां सुखय (अवस्युः) रक्षणेच्छुरहं (त्वाम्) परमेश्वरं वरुणम् (आ चके) सर्वथा स्तौमि ॥

संहितायाम् श्रुधी इति प्रयोगे श्रुश्रवणे भ्वा० प०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इत्यस्माद्धातोः लोटि-सेर्ह्यपिच्च ३।४।८७ इति हिः, श्रु-शृणुपृकृवृभ्यश्छन्दसि ६।४।१०२ इति हेर्धिः, बहुलं छन्दसि २।४।७३ इति शपोलुक्, अन्येषामपि दृश्यते ६।३।१३७ इति दीर्घः। अद्रा इत्यत्राऽपि-निपातस्य च ६।३।१३६ इति दीर्घः। अवस्युः इत्यत्राऽवस् शब्दात्-सुपआत्मनः क्यच् ३।१।८ इति क्यच्, क्याच्छन्दसि ३।२।१७० इत्युप्रत्ययः। चके इत्यत्र कै शब्दे (भ्वा० प०) धातोर्लिटि आदेचउपदेशेऽशिति ६।१।४५ इत्यात्वं, द्विर्भावः, चर्त्वम्, आतोलोप इटि च ६।४।६४ इत्याकारलोपः, लिङ्ङितिङः ८।१।२८ इति निघातस्वरः॥ ऋग्वेदे १।२५।१९ऽपि॥१॥

भाषार्थः-(वरुण) हे वरणीय! परमेश्वर! (मे) मेरे (इमम्) इस (हवम्) पुकारने को (श्रुधि) सुन कर स्वीकार करो, (च) और (अद्य) आज (मृडय) मुझे सुख दो, (अवस्युः) रक्षा चाहता हुवा मैं (त्वाम्) तुम्हारी (आ चके) सर्वतः स्तुति करता हूं॥

अष्टाध्यायी ६।३।१३७, ६।३।१३६, ३।१।८, ३।२।१७०, ६।१।४५, ६।४।६४ और ८।१।२८ के प्रमाण संस्कृत भाष्य में देखिये॥ ऋ० १।२५।१९ में भी॥१॥

अथ द्वितीयैकर्चस्य-सुकक्षऋषिः। इन्द्रो देवता। गायत्रीछन्दः॥

२ ३ १ २ ३ १र २र

कया त्वं न ऊत्या ऽभि प्रमन्दसे वृषन्।

३१ २३ २ १ २

कया स्तोतृभ्य आभर॥ ३॥ [७] (१५८४)

पदपाठः-कया ३। त्वम् १। नः २। ऊत्या ३। अभि प्र मन्दसे क्रि०। वृषन् सं०। कया। स्तोतृभ्यः ४। आ भर क्रि०॥

अन्वितपदार्थः- (वृषन्) हे कामानां वर्षक! पूरक!

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इन्द्र ! परमेश्वर ! (त्वम्) अस्माभिः प्रार्थितस्त्वम् (कया) अनिर्वचनीयया (ऊत्या) रक्षया (नः) अस्मान् (अभि प्र मन्दसे) अभितः प्रकर्षेणाऽऽनन्दयसि (स्तोतृभ्यः) स्तुतिपूर्वकं प्रार्थकेभ्योऽस्मभ्यं (कया) साधारणैरज्ञेयया भवत्कर्तृकया रक्षया (आ भर) सुखोपस्करं सर्वतः पूरय ॥ ऋग्वेदे ८ । ९३ । १९ ऽपि ॥ १ ॥

भाषार्थः-(वृषन्) हे कामनापूरक ! परमेश्वर ! (त्वम्) तुम (कया) अपनी अकथनीय अलौकिक (ऊत्या) रक्षा से (नः) हम भक्तों के लिये (अभि प्र मन्दसे) सर्वतः अद्भुत आनन्द देते हो, सो (स्तोतृभ्यः) स्तुति प्रार्थना करने वालों के लिये (कया) साधारण पुरुष की समझ में न आने वाली रक्षा वा कृपा से (आभर) सुखभोग की सामग्री भरपूर करो ॥ ऋ० ८ । ९३ । १९ में भी ॥ १ ॥

अथ प्रगाथात्मक तृतीय सूक्तस्य-मेधातिथिर्ऋषिः । इन्द्रोदेवता । बृहती छन्दः ॥

तत्र प्रथमा-

२ ३ २३१२ ३ १ २ ३क२२३२ १ २ ३ २ ३ १ २
इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे । इन्द्रꣳ समीके वनिनो
३ २ ३ १ २ ३ १ २
हवामह इन्द्रं धनस्य सातये ॥ १ ॥ (१५८५) व्याख्याता (२४९)

अथ द्वितीया-

१ २ ३१२ २२ ३ २३ २ ३ १ २ १ २ ३
इन्द्रो महा रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् । इन्द्रे ह
२ ३ १ २ ३१३ ३ २ ३ १ २
विश्वा भुवनानि येमिर इन्द्रे स्वानास इन्दवः ॥२॥[८](१५८६)

पदपाठः-इन्द्रः १ । महा ३ । रोदसी १ । पप्रथत् क्रि० । शवः २ । इन्द्रः । सूर्यम् २ । अरोचयत् क्रि० । इन्द्रे १ । ह अ० । विश्वा, भुवनानि १ । येमिरे क्रि० । इन्द्रे । स्वानासः, इन्दवः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(इन्द्रः) परमेश्वरः (महा) महत्त्वेन (रोदसी) रोदस्योर्द्यावाभूम्योः (शवः) बलम् (पप्रथत्) विस्तारितवान् अस्ति (इन्द्रः) परमेश्वर एव (सूर्यम्) आदित्यमण्डलम् (अरोचयत्) प्रकाशितवानस्ति (ह) निश्चयेन (इन्द्रे) परमेश्वरे एव (विश्वा) सर्वाणि (भुवनानि) लोकलोकान्तराणि (येमिरे) नियमेन भ्रममाणानि सन्ति (इन्द्रे) तस्मिन्नेवेश्वरे (स्वानासः) अभिषूयमाणाः (इन्दवः) सोमाः सन्ति ॥ ऋग्वेदे तु ८। ३। ६ सुवानासः इतिपाठः ॥२॥

भाषार्थः—(इन्द्रः) परमेश्वर ने (महा) महत्त्वसे (रोदसी) द्युलोक और पृथिवी के बीच में (शवः) अपने अनन्त बल को (पप्रथत्) फैलाया हुवा है (इन्द्रः) परमेश्वर ने (सूर्यम्) सूर्यलोक को (अरोचयत) प्रकाशित किया है (इन्द्रे) परमेश्वर में (ह) ही (विश्वा) सब (भुवनानि) भुवन (येमिरे) नियम से घूम रहे हैं, (इन्द्रे) उसी ईश्वर में (स्वानासः) अभिषूयमाण (इन्दवः) सोम वर्त्तमान हैं ॥ ऋ० ८ । ३ । ६ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथैकर्चं चतुर्थसूक्तस्य—विश्वकर्मौशनऋषिः । विश्वकर्मा देवता । त्रिष्टुप्छन्दः ॥

१ २ ३ १ २ ३ २ ३ १ २ ३ २

विश्वकर्मन्हविषा वावृधानः, स्वयं यजस्व तन्वाऽ३ऽ

१र २र १ २ ३ २ ३ २ ३ १ २ ३ १र २र

ऽस्वाहिते । मुह्यन्त्वन्ये अभितो जनास, इहास्माकं

३ १ २ ३ १ २

मघवा सूरिरस्तु ॥ १ ॥ [९] (१५८७)

पदपाठः—विश्वकर्मन् सं० । हविषा ३ । वावृधानः १ । स्वयम् अ० । यजस्व क्रि० । तन्वाम्, स्वाहिते ७ । मुह्यन्तु क्रि० । अन्ये १ । अभितः अ० । जनासः १ । इह अ० । अस्माकम् ६ । मघवा, सूरिः १ । अस्तु क्रि० ॥

अन्वितपदार्थः—(विश्वकर्मन्) हे विश्वस्रष्टः ! परमे-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्वर ! (वावृधानः) जगद्वर्धयन् (स्वाहिते) स्वेन आहिते कृताधाने (तन्वाम्) विस्तृते यज्ञकुण्डे (हविषा) हव्येन (स्वयं, यजस्व) स्वयं यजसि (अन्ये जनासः) इतरेऽज्ञानिनो मनुष्याः (इह) एतद्विषये (अभितः) सर्वतः (मुह्यन्तु) मुह्यन्ति तर्हि मुह्यन्तु, परन्तु (अस्माकं), मध्ये (मघवा) मखवान् यजमानः (सूरिः) पण्डितः भवत्कर्तृकं यज्ञं जानानः स्वयं तथाऽनुतिष्ठन्सन् (अस्तु) अस्मिन्लोके भवतु ॥

जगतोवृद्धिं कुर्वता विश्वकर्मणा जगदीश्वरेण स्वयं सूर्यादिलोकरूपाणि महान्ति विस्तृतानि यज्ञकुण्डानि आधाय तत्रौषधिवनस्पत्यादिहोमः क्रियतेऽत्र प्रायशोजना मुह्यन्ति न जानन्ति रहस्यमेतत्, परमस्माकं मध्ये यो याज्ञिकः सः विद्वान् भवतु जानातु सर्वमेतद्रहस्यम् ॥

अत्र विश्वकर्मशब्देनेश्वरग्रहणे प्रमाणानि–विश्वकर्मा विश्वस्य कर्त्ता इति निरु० १०। २५, परमेश्वर इति सायणाचार्यः, ऋग्वेदीयं सूक्तं चैतत्प्रकरणकम् । वावृधानः–इत्यत्र–वर्धयमानः इति निरु० १० । २७ ॥ ऋग्वेदे तु १० । ८१ । ६ तन्वां स्वाहिते=पृथिवीमुत द्याम् इति पाठभेदः ॥ निरुक्ते (१० । २६) प्रोक्त इतिहासस्तु "विश्वकर्मा भौवनः सर्वमेधे" इत्यादिकः सचर्षिपरो, नतु मन्त्रोक्तदेवतापरः ॥ १ ॥

भाषार्थः–(विश्वकर्मन्) हे विश्वस्रष्टः ! परमेश्वर ! (वावृधानः) जगत् की वृद्धि करते हुवे आप (स्वाहिते) अपने आप आधान किये हुवे (तन्वाम्) विस्तृत अग्निकुण्ड में (हविषा) हव्य से (स्वयम्) अपने आप (यजस्व) यजन करते हैं, (अन्ये) साधारण अन्य अज्ञानी (जनासः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनुष्य (इह) इस विषय में (अभितः) सर्वतः (मुह्यन्तु) भूलते हैं तो भूलो परन्तु (अस्माकम्) हम में (मघवा) यज्ञवाला पुरुष (सूरिः) पण्डित जानने वाला और आप के यज्ञ को देखकर स्वयं यज्ञ करने वाला (अस्तु) होवे ॥

जगत् को धन धान्य आरोग्यादि से बढ़ाते हुये परमात्मा ने स्वयं सूर्यादि लोक रूप बड़े विस्तृत यज्ञकुण्डों में अग्न्याधान करके उन में ओषधि वनस्पति आदि का होम कर रक्खा है जिस को प्रायः अज्ञानी लोग नहीं जानते सो मत जानो परन्तु हम में से याज्ञिक लोग इस रहस्य को जानने वाला और आप के यज्ञ को देखकर स्वयं यज्ञानुष्ठान करने वाला होवे ॥

निरुक्त १० । ३५, १० । २६, १० । २१, सायणाचार्य इत्यादि प्रमाण और ऋ० १० । ८१ । ६ का पाठभेद संस्कृत भाष्य में देखिये ॥ १ ॥

अथ तृतीयस्य तृच सूक्तस्य—अनानतः पारुच्छेपिर्ऋषिः । सोमोदेवता ।

अत्यष्टिश्छन्दः ॥ तत्र प्रथमा—

३ २ ३१र २र ३ २उ ३ २

अया रुचा हरिण्या पुनानो विश्वा द्वेषाꣳसि

३१२ ३ २३ २ ३१ २

तरति सयुग्वभिः सूरो न सयुग्वभिः ।

१ २ ३१ २ ३ १ २३१र २

धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।

२ ३ २३१ २३१र २र ३१ २ ३ १ २

विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥१॥

(१५८८) व्याख्याता (४६३)

अथ द्वितीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ ३

प्राचीमनु प्र दिशं याति चेकितत्सꣳरश्मिभि-

३२उ ३ १ २ ३१र २र १ २ ३ २ ३

र्यतते दर्शतो रथो दैव्यो दर्शतोरथः । अग्मन्नुक्थानि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२उ ३ १ २ १ २ ३ १र २र ३
पौंस्येन्द्रं जैत्राय हर्षयन्, वज्रश्च यद्ववथो
१ २ ३ १र २र
अनपच्युता समत्स्वनपच्युता ॥ २ ॥ (१५८९)

पदपाठः—प्राचीम् २ । अनु, प्र अ० । दिशम् २ । याति क्रि० । चेकितत् १ । सम् अ० । रश्मिभिः ३ । यतते क्रि० । दर्शतः, रथः, दैव्यः, दर्शतः, रथः १ । अग्मन् क्रि० । उक्थानि, पौंस्या १ । इन्द्रम् २ । जैत्राय ४ । हर्षयन् १ । वज्रः १ । च, यत् अ० । ववथः क्रि० । अनपच्युता १ । समत्सु ७ । अनपच्युता ॥

अन्वितपदार्थः—यथा (चेकितत्) चेतयन्, (दैव्यः) दिवि भवः, (दर्शतः) दृष्टिप्रसादकरः दर्शनीयश्च, सूर्यस्य (रथः) रमणीयोगोलः (रश्मिभिः) किरणैः (सम्) सह (प्राचीम्) पूर्वाम् (दिशम्), (अनु) आनुपूर्व्येण (प्र याति) परिक्रामति (यतते) चेष्टां धारणाकर्षणादिकां करोति च। तथैव (दर्शतः) दर्शनीयः (रथः) महारथस्य विजयिनोराज्ञ इन्द्रस्य रथोरमणीयं यानं भवति। किं च (पौंस्या) पौंस्यानि पुंसामिमानि (उक्थानि) स्तुतिवचनानि (इन्द्रं) तं राजानं (जैत्राय) विजयाय (हर्षयन्) हर्षयन्ति सन्ति (अग्मन्) प्राप्नुवन्ति (यत्) यस्मात् स्तोत्रात् (वज्रश्च) चकारादन्यायुधानां संग्रहः वज्रादीनि आयुधानि (समत्सु) संग्रामेषु (अनपच्युता) अनपच्युतानि अकुण्ठितानि (ववथः) भवन्ति। अनपच्युतेति पुनः पाठो वीप्साऽऽदरार्था ॥

यथा सूर्यस्य रमणीयोगोलो रथइवपूर्वां दिशमानुपूर्व्येण रश्मिभिः प्रयाति धारणाकर्षणादियत्नं च करोति तथैव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दिग्विजयार्थं दुष्टशत्रुनिबर्हणार्थं च शस्त्रास्त्रैराज्ञा गन्तव्यम्, तदानीं राजपुरुषै राजा बलसहितो हर्षयितव्यः स्तोत्रसमूहैः॥ ऋग्वेदे ९। १११। ३ऽपि ॥ २ ॥

भाषार्थः-जैसे (चेकितत्) चेताता हुवा (दैव्यः) दिव्य (दर्शतः) दिखाने वाला और स्वयं दर्शनीय (रथः) सूर्यका रमणीय गोला (रश्मिभिः) किरणों के (सम्) साथ (प्राचीं दिशम्) पूर्व दिशा को (अनु) आनुपूर्व्यसे (प्रयाति) परिक्रमा करता हुवा जाता है, (यतते) और धारण आकर्षणादि यत्न भी करता है, तद्वत् (दर्शतः) दर्शनीयः (रथः) विजयी महारथी इन्द्र राजा का रथ रमणीय यान होता है। और (पौंस्या) लोगों के कहे (उक्थानि) स्तोत्र (इन्द्रम्) उस राजा को (जैत्राय) विजय के लिये (हर्षयन्) हर्ष दिलाते हुवे (अगमन्) प्राप्त होते हैं (यत) जिस से (वज्रः) (वज्र (च) और अन्य आयुध (समत्सु) संग्रामों में (अनऽपच्युता) ख़ाली न जाने वाले= अकुण्ठित (भवथः) होते हैं। (अनपच्युता) यह दूसरी बार आदरार्थे वीप्सा का पाठ है॥

जिस प्रकार रमणीय सूर्य का गोला रथ के समान पूर्व दिशासे क्रमपूर्वक अपनी किरण रूप शस्त्रास्त्रों सहित मानो रोग शोक अन्धकारादि शत्रुओं के नाशार्थ और पृथिव्यादि लोकों के धारणाऽऽकर्षणादि के लिये जाता है, इसी प्रकार राजा को भी दिग्विजयार्थ दुष्ट शत्रुओं के निवारण और धर्मात्माओं के धारण पालन पोषण के लिये वज्रादि शस्त्रास्त्रों सहित गमन करना चाहिये। जिस से हर्ष दिलाने वाले जी बढ़ाने वाले स्तुतिवचनों द्वारा प्रोत्साहित राजा के शस्त्राऽस्त्र संग्रामों में व्यर्थ न जायं=कुण्ठित न रहें॥ ऋ० ९। १११। ३ मैंभी ॥२॥

अथ तृतीया-

२ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३
त्वꣳ ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि
१ २२ ३ १ २ ३ २ ३ १ २ ३ २ ३ २७ ३
स्व आदम ऋतस्य धीतिभिर्दमे। परावतो न साम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२उ ३१२ ३१२ ३१२३१२ ३१२ ३
तत्यत्रारणन्ति धीतयः । त्रिधातुभिरुषीभिर्वयो दधे
१२ ३ १२
रोचमानो वयो दधे ॥ ३ ॥ [१०] (१५९०)

पदपाठः—त्वम् १ । ह अ० । त्यत् २ । पणीनाम् ६ । विदः क्रि० । वसु २ । सम् अ० । मातृभिः ३ । मर्जयसि क्रि० । स्वे ७ । आ अ० । दमे ७ । ऋतस्य ६ । धीतिभिः ३ । दमे । परावतः ५ । न अ० । साम, तत् १ । यत्र अ० । आ रणन्ति क्रि० । धीतयः १ । त्रिधातुभिः, अरुषीभिः ३ । वयः २ । दधे क्रि० । रोचमानः १ । वयः । दधे ॥

अन्वितपदार्थः—सोम!(त्वम्),(त्यत्) तत् (पणीनां) व्यवहारिणां (वसु) धनं तत्तद्द्रव्यं (विदः) लम्भयसि (ह) प्रसिद्धौ (ऋतस्य) यज्ञस्य (धीतिभिः) धारयित्रीभिः (मातृभिः) मातृवत्पोषयित्रीभिः सूर्यदीधितिभिः (स्वे दमे दमे) स्वकीये गृहे गृहे (आ सं मर्जयसि) समन्तात्सम्यङ् मार्जनं करोषि (यत्र) यस्मिन् यज्ञे (धीतयः) कर्मणो धर्तारो यजमानाः (आ रणन्ति) आरमन्ते (तत् साम) तत्सामगानं (न) यथा (परावतः) दूरात् संभाव्यते तथा दूरात्तव धीतयो मरीचयोपि पावनं कुर्वन्ति । त्वं (त्रिधातुभिः) त्रयाणां लोकानां धारिकाभिः (अरुषीभिः) रोचमानाभिर्दीधितिभिः (वयः) अन्नं (दधे) धारयसि (रोचमानः) प्रकाशमानः (वयोदधे) अन्नं धारयसि ॥ पुनः पाठोऽतिशयार्थः ॥ ऋग्वेदे ९ । १११ । २ऽपि ॥ ३ ॥

भाषार्थः—सोम ! (त्वम्) तू (त्यत्) उस (पणीनाम्) व्यापारियों के (वसु) धन को (विदः) लब्ध कराता है (ह) प्रसिद्ध है कि (ऋतस्य) यज्ञ की (धीतिभिः) धारने वाली (मातृभिः) माता के समान पोषण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करने वाली सूर्य की किरणों से (स्वे) अपने (दमे दमे) घर घर में (आ सं सर्जयसि) चारों ओर से भले प्रकार शुद्धि करता है (यत्र) जिस यज्ञ में (धीतयः) कर्म के धारण करने वाले यजमान लोग (आ रणन्ति) आराम करते हैं (तत्) वह (साम) सामवेदगान (न) जैसे (परावतः) दूर से सुनाई देता है, इसी प्रकार दूर से तेरी किरणें भी शुद्धिकरती हैं। तू (त्रिधातुभिः) तीनों लोकों को धारण करने वाली (अरुषीभिः) प्रकाशमान किरणों से (वयः) अन्न को (दधे) धारित करता है, तू (रोचमानः) प्रकाशमान हुवा (वयः) अन्न को (दधे) धारित करता है। द्विरुक्ति अतिशयार्थ है ॥ ऋ० ९। १११। २ में भी ॥ ३ ॥

इति षोडशाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे

प्रथमैकर्चसूक्तस्य-भरद्वाजऋषिः। पूषा देवता। गायत्री छन्दः॥ सैषा-

३१ २ ३ २ २ १२ ३१ २ ३२३ २

उत नो गोषणिं धियमश्वसां वाजसामुत ।

३१ २ ३१२

नृवत्कृणुह्यूतये ॥ १ ॥ [११] (१५९१)

पदपाठः-उत अ० । नः ६। गोषणिम्, धियम्, अश्वसाम्, वाजसाम्२। उत। नृवत् २। कृणुहि क्रि०। ऊतये ४॥

अन्वितपदार्थः-हे पूषन्! पुष्टिकर्त्तः! पोषकेश्वर! (नः) अस्माकं (ऊतये) रक्षायै (गोषणिं) गवां दात्रीम् (उत) च (अश्वसाम्) अश्वानां दात्रीम् (उत) च (वाजसाम्) अन्नदात्रीं बलदात्रीं वा (धियम्) बुद्धिम् (कृणुहि) कुरु॥

सकलजगत्पोषकस्य परमेश्वरस्य, पोषकानां सूर्यकिरणानां समूहस्य वा प्रसादेन मनुष्याः गवाश्वबलाऽन्नादि सर्वसुखदायकभोगोपकरणयुक्ता यया स्युस्तादृशीं बुद्धिं प्राप्नुवन्ति, बुद्ध्यैव सर्वं साध्यम् ॥ ऋग्वेदे तु ६। ५३। १० ऊतये=वीतये इति पाठः ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—हे सकलजगत्पोषक ! पूषन् ! परमेश्वर ! (नः) हमारी (ऊतये) रक्षा के लिये (गोषणिम्) गौ देने वाली (उत) और (अश्वसाम्) घोड़े देने वाली (उत) और (वाजसाम्) अन्न वा बल देने वाली (धियम्) बुद्धि को (कृणुहि) कीजिये ॥

संपूर्ण जगत् के पालक पोषक परमेश्वर वा सूर्यकिरण समूह के प्रसाद से मनुष्यों को वैसी बुद्धि प्राप्त होती है जिस से गौ, अश्व, अन्न, बल आदि सब सुख भोग की सामग्री सुलभ हो ॥ ऋ० ६ । ५३ । १० का पाठभेद संस्कृतभाष्य में देखिये ॥ १ ॥

अथैकर्चस्य द्वितीय सूक्तस्य—गोतमऋषिः । मरुतो देवताः । गायत्री छन्दः ॥ सैषा—

३ १ २ ३ १ २

शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।

३ १र २र ३ १ २

विदा कामस्य वेनतः ॥१॥ [१२] (१५१२)

पदपाठः—शशमानस्य ६ । वा अ० । नरः सं० । स्वेदस्य ६ । सत्यशवसः सं० । विदा क्रि० । कामस्य ६=२ । वेनतः ६ ॥

अन्वितपदार्थः—(सत्यशवसः) हे सत्यबलेन बलिष्ठाः ! (नरः) नरोमनुष्याः मरुत ऋत्विजः ! (शशमानस्य) संभजमानस्य युष्मान्सेवमानस्य (स्वेदस्य) स्तावकमन्त्रोच्चारणजनितस्वेदयुक्तगात्रस्य (वेनतः) स्तोतुः (कामस्य) यजमानस्य कामं (वा) समुच्चये, (विदा) लम्भयत ॥ मरुतः इत्यृत्विङ्नाम निघं० ३ । १८ ॥

ऋत्विग्भिः कृतवरणैर्यज्ञस्तथानुष्ठातव्यो यथा श्रमयुक्तस्य यजमानस्य श्रमसाफल्यं स्यात् ॥ ऋग्वेदे १ । ८६ । ८ऽपि ॥१॥

भाषार्थः—(सत्यशवसः) हे सत्य बल से बलिष्ठो ! (नरः) मरुतो ! ऋत्विजो ! मनुष्यो ! (शशमानस्य) स्तुति से तुम्हारी सेवा करने वाले (स्वेदस्य) स्तुति के मन्त्रोच्चारण में जिस को पसीना आगया उस (वेनतः) स्तोता यजमान के (कामस्य) काम को (विदा) लब्ध कराओ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निघण्टु ३ । १८ का प्रमाण संस्कृत भाष्य में देखिये । भाव यह है कि अन्न से यज्ञ करने और याज्ञिक ऋत्विजों की प्रशंसा करने वाले श्रद्धालु यजमान के यज्ञ में वरण किये ऋत्विजों को वैसा यत्न करना चाहिये जिस से यजमान की कामना पूरी हो ॥ ऋ० १ । ८६ । ८ में भी ॥ १ ॥

अथैकर्चस्य तृतीयसूक्तस्य-ऋजिश्वा ऋषिः । विश्वेदेवा देवताः । गायत्री छन्दः ॥ सेयम्—

१२ ३२३ १ २ ३ २ ३ १२ ३ २

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये ।

३ १ २

सुमृडीका भवन्तु नः ॥१॥ [१३] (१५९३)

पदपाठः-उप अ० । नः ६ । सूनवः १ । गिरः २ । शृण्वन्तु क्रि० । अमृतस्य ६ । ये, सुमृडीकाः १ । भवन्तु क्रि० । नः ४ ॥

अन्वितपदार्थः- (ये), (अमृतस्य) अमरस्येश्वरस्य (सूनवः) पुत्राः, ते (नः) अस्माकं (गिरः) वाचः (शृण्वन्तु), तथा (नः) अस्मभ्यं (सुमृडीकाः) सुसुखप्रदाः (भवन्तु) ॥ ऋग्वेदे ६ । ५२ । ९ ऽपि ॥ १ ॥

भाषार्थः-(ये) जो (अमृतस्य) अमर ईश्वर के (सूनवः) पुत्र हैं, वे (नः) हमारी (गिरः) वाणियों को (शृण्वन्तु) सुनें और (नः) हमारे लिये (सुमृडीकाः) सुन्दर सुखदायक (भवन्तु) हों ॥ ऋ० ६ । ५२ । ९ में भी ॥ १ ॥

अथ तृचस्य चतुर्थसूक्तस्य-पुरुमीढोऽजमीढोवा ऋषिः । द्यावाभूमी देवते । गायत्री छन्दः ॥ तत्र प्रथमा—

२ ३ २ ३ १ २ ३ १ २

प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे ।

२ ३ २ ३ १ २

शुची उपप्रशस्तये ॥ १ ॥ (१५९४)

पदपाठः- प्र अ० । वाम् ६ । महि क्रि० वि० । द्यवी सं० । अभि अ० । उपस्तुतिम् २ । भरामहे क्रि० । शुची सं० । उपप्रशस्तये ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः- हे (द्यवी) द्योतमाने ! (शुची) शुद्धे ! द्यावाभूमी ! वयं (वाम्) युवयोः (उपप्रशस्तये) उपप्रशंसायै (महि) प्रभूता यथा स्यात्तथा (उपस्तुतिम्) उपप्रशंसां (अभि-प्र-भरामहे) अभितः प्रकर्षेण सम्पादयामः ॥

द्यावाभूम्योर्वर्त्तमानाश्चराऽचरात्मिकाः प्रजाः तत्पदेन स्तूयन्ते ॥ ऋग्वेदे ४ । ५६ । ५ ऽपि ॥ १ ॥

भाषार्थः-हे (द्यवी) प्रकाशमान (शुची) शुद्ध पवित्र दोनों द्युलोक और पृथिवी लोको ! (वाम्) तुम दोनों की (उपप्रशस्तये) उपप्रशंसा के लिये (महि) बाहुल्य से (उपस्तुतिम्) उपप्रशंसा को, हम (अभि प्र भरामहे) सर्वतः उत्कर्ष से संपादन करते हैं ॥

द्यावाभूमी पद से द्युलोक और पृथिवी लोक में स्थित चराऽचर प्रजा की स्तुति की जाती है ॥ ऋ० ४ । ५६ । ५ में भी ॥ १ ॥

अथ द्वितीया—

३ २ ३क २र ३ २उ ३ १ २
पुनाने तन्वा मिथः स्वेन दक्षेण राजथः ।
३ १ २ ३ २ ३ २
उह्याथे सनादृतम् ॥ २ ॥ (१५९५)

पदपाठः-पुनाने १ । तन्वा ३ । मिथः अ० । स्वेन, दक्षेण ३ । राजथः, उह्याथे क्रि० । सनात् अ० । ऋतम् २ ॥

अन्वितपदार्थः-हे द्यावापृथिव्यौ ! युवाम् (मिथः) परस्परं (तन्वा) देहेन (पुनाने) पावयन्त्यौ (स्वेन) आत्मीयेन (दक्षेण) बलेन (राजथः) विराजमाने भवथः तथा (सनात्) सदा (ऋतम्) यज्ञम् (उह्याथे) वहथः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्युलोको वृष्ट्यादिना भूमिं, भूमिश्च यज्ञाऽहौषधि-वनस्पत्यादयुत्पादेन तद्द्वारानुष्ठितैर्यज्ञैर्द्युलोकं पावयति, एवं मिथस्तयोः पावकत्वम् ॥ ऋग्वेदे ४ । ५६ । ६ ऽपि ॥२॥

भाषार्थ हे द्यौः ! और हे पृथिवि ! तुम दोनों (मिथः) एक दूसरे को (तन्वा) अपने देह पिण्ड से (पुनाने) पवित्र करती हुईं (स्वेन) अपने (दक्षेण) बल से (राजथः) विराजमान हो, तथा (सनात्) सदा (ऋतम्) यज्ञ को (उह्याथे) ले चलती हो ॥

द्युलोक वृष्ट्यादि से भूमि को और भूमिलोक यज्ञयोग्य ओषधि वनस्पत्यादि की उत्पत्ति और उस के द्वारा हुवे यज्ञों से द्युलोक को पवित्र करता है, इस प्रकार दोनों लोक एक दूसरे के पावन हैं ॥ ऋ० ४ । ५६ । ५ में भी ॥ २ ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

महो मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् ।

१ २ ३ १ २ २ २

परि यज्ञं निषेदथुः ॥ ३ ॥ [१४] (१५९६]

पदपाठः–महो १ । मित्रस्य ६ । साधथः क्रि० । तरन्ती, पिप्रती १ । ऋतम् २ । परि अ० । यज्ञम् २ । नि-षेदथुः क्रि० ॥

अन्वितपदार्थः–(महो) महत्यौ द्यावापृथिव्यौ (मित्रस्य) मित्रं प्राणं (साधथः) साधयथः (ऋतम्) अन्नं (तरन्ती) तारयन्त्यौ (पिप्रती) पूरयन्त्यौ (यज्ञम्) अग्निष्टोमादिकं (परि-नि-षेदथुः) सर्वतआश्रयतः ॥ ऋग्वेदे ४ । ५६ । ७ ऽपि ॥ ३ ॥

भाषार्थः–(महो) महती द्यावाभूमी (मित्रस्य) प्राण को (साधथः) साधती हैं और (ऋतम्) अन्न को (तरन्ती) तिराती और (पिप्रती) भरती और (यज्ञम्) यज्ञ को (परि-नि-षेदथुः) सर्वतः आश्रय करती हैं ॥ ऋ० ४ । ५६ । ७ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University, Haridwar Collection.

अथ तृचस्य पञ्चममूक्तस्य-शुनःशेप ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ १ २ ३ १२ ३ १ २ ३ २
अयमु ते समतसि कपोत इव गर्भधिम् ।
२ ३ १ २
वचस्तश्चिन्न ओहसे ॥१॥ (१५९७) व्याख्याता (१८३)

अथ द्वितीया—

३ १ ३ १ २ ३ १ २
स्तोत्रꣳ राधानां पते गिर्वाहो वीर यस्य ते ।
१ २ ३ १ २
विभूतिरस्तु सूनृता ॥ २ ॥ (१५९८)

पदपाठः—स्तोत्रम् १ । राधानाम् ६ । पते सं० । गिर्वाहः ६ । वीर सं० । यस्य ६ । ते ६ । विभूतिः १ । अस्तु क्रि० । सूनृता १ ॥

अन्वितपदार्थः—(वीर !) वीर्योपेत ! (राधानां पते) धनपते ! राजन् ! वा परमेश्वर ! (यस्य), (ते) तव (गिर्वाहः) गीर्भिः स्तुतिभिरुह्यमानस्य (स्तोत्रं) स्तुतिः, क्रियते इति शेषः । तस्य तव (विभूतिः) ऐश्वर्यम् (सूनृता) प्रियसत्यरूपम् (अस्तु) भवतु ॥ ऋग्वेदे १ । ३० । ५ऽपि ॥ २ ॥

भाषार्थः—(वीर) हे शूरवीर ! (राधानां पते) धनों के पति ! राजन् ! वा परमेश्वर ! (यस्य) जिस (गिर्वाहः) स्तुतिरूप वाणियों से वहन किये हुवे (ते) तेरी (स्तोत्रम्) स्तुति की जाती है । उस तेरी (विभूतिः) विभूति (सूनृता) प्यारी और सच्ची (अस्तु) होवे ॥

'परमेश्वर की विभूति प्यारी सच्ची होवे' कहने से यह तात्पर्य नहीं कि परमेश्वर के प्रति आशिष् हो, किन्तु लोक में परमेश्वर की सच्ची और प्यारी विभूति विश्वास में आवे, यह लोक के प्रति आशि_ है ॥ ऋ० १ । ३० । ५ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

३ १ २ ३ २ ३ १२ २२

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो ।

२३ १२

समन्येषु ब्रवावहै ॥ ३ ॥ [१५] (१५९१)

पदपाठः-ऊर्ध्वः १ । तिष्ठ क्रि० । नः ६ । ऊतये ४ । अस्मिन्, वाजे ७ । शतक्रतो सं० । समन्येषु ७ । ब्रवावहै क्रि० ॥

अन्वितपदार्थः-(शतक्रतो) बहुकर्मन् ! इन्द्र ! राजन्! वा परमेश्वर ! (नः) अस्माकम् (ऊतये) रक्षायै (अस्मिन्वाजे) अत्र शत्रुसंग्रामे, कामादिपरिपन्थिसंग्रामे वा (ऊर्ध्वः) अधिकृतः (तिष्ठ) विराजस्व, यथा (समन्येषु) समनं युद्धं तत्संबन्धिषु कार्येषु (ब्रवावहै) परस्परं मन्त्रयाव अर्थात् त्वत्सम्मतिपूर्वकमहं युद्धं कुर्याम् ॥

ईश्वरपक्षे परमेश्वरोपदिष्टवेदानुकूलवर्त्ती अहं युद्धं कुर्यामिति योज्यम् ॥ ऋग्वेदे १ । ३० । ६ ऽपि ॥ वाजे इति, समनमिति च संग्रामनामनी निघं० २ । १७ ॥ ३ ॥

भाषार्थः- (शतक्रतो) हे बहुकर्मन् ! इन्द्र ! राजन् ! वा परमेश्वर ! आप (अस्मिन्) इस (वाजे) संग्राम में वा कामक्रोधादिशत्रुओं के संग्राम में (नः) हमारे (ऊर्ध्वः) ऊपर (तिष्ठ) रहें, जिससे (समन्येषु) संग्राम के सम्बन्धी कार्यों में (ब्रवावहै) मैं और आप सम्मति कर सकें । अर्थात् राजा की सम्मति से तदनुकूल योद्धा लड़ें और ईश्वरपक्ष में परमेश्वर की सम्मति वेद द्वारा लेकर कामादि शत्रुगण का सामना करें, यह तात्पर्य है ॥ निघण्टु २ । १७ के प्रमाण संस्कृत भाष्य में देखिये ॥ ३ ॥

अथ षष्ठृचस्य-हर्यत ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २

गाव उपवदाऽवटे मही यज्ञस्य रप्सुदा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १२ २ ३ १ २
उभा कर्णा हिरण्यया ॥१॥ (१६००) व्याख्याता (११७)

अथ द्वितीया—

३ २ ३१२ २३ १ २ ३ १ २ ३ १ २
अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु ।

३ १ २ ३ १ २
अवटस्य विसर्जने ॥ २ ॥ (१६०१)

पदपाठः–अभि, आरम्, इत् अ० । अद्रयः १ । निषिक्तम् २ । पुस्करे ७ । मधु २ । अवटस्य ६ । विसर्जने ७ ॥

अन्वितपदार्थः–(अवटस्य) यज्ञकुण्डस्य महावीर पात्रस्य वा (विसर्जने) समापने (पुष्करे) आकाशे (निषिक्तं) कृतनिषेकं (मधु) रसम् (अद्रयः) मेघाः (अभि, आरम्, इत्) सर्वतो निषिञ्चन्ति॥

यज्ञाद्भवति पर्जन्यः इति कृष्णभगवद्वचनमपि ॥
ऋग्वेदे ८ । ७२ । ११ ऽपि ॥२॥

भाषार्थः–(अवटस्य) यज्ञकुण्ड रूप गर्त्त के (विसर्जने) विसर्जन करने पर (पुष्करे) आकाश में (निषिक्तम्) निषेक किये हुवे (मधु) रस को (अद्रयः) मेघ (अभि, आरम्, इत्) सर्वतः वर्षासे हैं ॥

यज्ञ से मेघ होता है, ऐसा कृष्णभगवद्वचन भी एतन्मूलक है॥ ऋ० ८ । ७२ । ११ में भी ॥ २ ॥

अथ तृतीया–

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
सिञ्चन्ति नमसाऽवटमुच्चाचक्रं परिज्मानम् ।

३ १ २ ३ १ १
नीचीनवारमक्षितम् ॥ ३ ॥ [१६] (१६०२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–सिञ्चन्ति क्रि० । नमसा ३। अवटम्, उच्चाचक्रम्, परिज्मानम्, नीचीनवारम्, अक्षितम् २ ॥

अन्वितपदार्थः–(उच्चाचक्रम्) उच्चभागे परिखाचक्रयुतम् (परिज्मानम्) परितोनतम् (नीचीनवारम्) नीचीनान्तम् (अक्षितम्) अक्षीणम् (अवटम्) गर्त्तं यज्ञकुण्डं गर्त्तयुतं महावीरपात्रं वा (नमसा) नम्रतया (सिञ्चन्ति) जलेनेति शेषः ॥

यज्ञाऽवसाने ऋत्विजो यज्ञपात्राणि महावीरप्रभृतीनि जलेनाभ्युक्ष्याऽऽसादयन्ति ॥ ऋग्वेदे ८। ७२। १० ऽपि ॥३॥

भाषार्थः–(उच्चाचक्रम्) ऊंचे चक्र वाले (परिज्मानम्) चारों ओर से नमे हुवे (नीचीनवारम्) नीचे किनारों के (अक्षितम्) अखण्ड (अवटम्) यज्ञकुण्ड वा महावीर पात्र को (नमसा) नम्रता से (सिञ्चन्ति) जल से धोते हैं॥

यज्ञान्त में ऋत्विज्लोग यज्ञकुण्ड को वा महावीरोपलक्षित पात्रों को जल से अभ्युक्षण करके रखते हैं ॥ ऋ० ८ । ७२ । १० में भी ॥ ३ ॥

इति षोडशाऽध्यायस्य तृतीयः खण्डः ॥३॥

अथ चतुर्थे खण्डे प्रथमस्य प्रगाथात्मकस्य सूक्तस्य–काण्वो देवातिथिर्ऋषिः । इन्द्रो देवता। अनुष्टुप्, निचृत् पङ्क्तिश्च क्रमेण छन्दसी ॥ तत्र प्रथमा–

१ २३ १ २ ३१२ ३१ २र
मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
३२३ १ २ ३१ २३१ २र
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम
३२३ १२
तुर्वशं यदुम् ॥ १ ॥ (१६०३)

पदपाठः–मा अ० । भेम क्रि० । मा । अभिष्म क्रि० । उग्रस्य ६ । सख्ये ७ । तव ६ । महत् १ । ते ६ । वृष्णः ६ । अभिचक्ष्यम्, कृतम् १ । पश्येम क्रि० । तुर्वशम्, यदुम् २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—हे इन्द्र ! परमेश्वर ! (उग्रस्य) उद्गीर्ण बलस्य (तव), (सख्ये) आनुकूल्ये सौहार्दे सति (मा भेम) भयं न कुर्याम (मा श्रमिष्म) श्रान्ता न भवेम (ते) तव (वृष्णः) कामानां वर्षितुः (महत्) प्रभूतम् (अभिचक्ष्यम्) सर्वतः ख्यापनीयं स्तोतव्यं (कृतम्) कर्म अस्तीति शेषः । तथाभूतस्य तव सख्ये सति (तुर्वशम्) समीपस्थम् (यदुम्) मनुष्यं (पश्येम) ॥

तुर्वशे इति अन्तिक [समीप] नाम निघं० २ । १६ यदवः इति मनुष्यनाम निघं० २ । ३ ॥ ऋग्वेदे ८ । ४ । ७ ऽपि ॥ १ ॥

भाषार्थः—हे इन्द्र=परमेश्वर ! (उग्रस्य) अतिबलवान् (तव) तेरी (सख्ये) मित्रता में (मा भेम) हम किसी से न डरें (मा श्रमिष्म) न थकें (ते) तेरा (वृष्णः) कामना पूरक का (महत्) बहुत (अभिचक्ष्यम्) सर्वतः स्तुतियोग्य (कृतम्) कर्म है । हम (तुर्वशम्) समीपस्थ (यदुम्) मनुष्य को (पश्येम) देखें ॥

निघण्टु २ । ३ ॥ २ । १६ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । ४ । ७ में भी ॥ १ ॥

अथ द्वितीया—

३ १र १र ३ २र ३ २३ २ ३ १ २
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
२ ३ १२३ ३१२ ३२३ २ ३२३ २३ १२
मघवा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ २ ॥

[१७] (१६०४)

पदपाठः—सव्याम् २ । अनु अ० । स्फिग्यम् २ । वावसे क्रि० । वृषा १ । न अ० । दानः १ । अस्य ६ । रोषति क्रि० । मघवा ३ । संपृक्ताः १ । सारघेण ३ । धेनवः १ । तूयम् २ । एहि क्रि० । द्रव, पिब क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—हे मनुष्य ! (वृषा) वृष्टिकर इन्द्रः परमेश्वरो वा (सव्याम्) अनुकूलां (स्फिग्यं) स्फिचं कटिम् (अनु वावसे) अनुलक्ष्य वर्त्तते (अस्य) इन्द्रस्य परमेश्वरस्य वा (दानः) दानम् (न), (रोषति) हिनस्ति किन्तु सुखदमेव भवति । (धेनवः) पानार्हाः सोमाः (सारघेण) सरघा मधुमक्षिकास्ताभ्यआगतेन (मध्वा) मधुना (संपृक्ताः) संस्कृताः सन्ति (द्रव एहि) झटित्यागच्छ (तूयम्) जलं सोमरसं (पिब) ॥

यदा परमेश्वरस्य, वृष्टिकर्त्तुरिन्द्रस्य वाऽऽनुकूल्यं स्यात् तदा भाग्येन सोमरसोलभ्यते, तदेतदवसरं सौभाग्यलब्धं मन्यमानेन जनेन माक्षिकमधुमिश्रितसोमरसपानेऽनलसेन त्वरया तत्पानं विधेयम् ॥

अपसव्यमपष्टुचेति ३ । १ । ८४ अमरकोशात् विपरीतमपसव्यमनुकूलं सव्यम् तथाभूतामनुकूलां सव्याम् । सरघामधुमक्षिका २ । ५ । २६ अमरः । धेनव इति धेट् इत्यस्मात् दाभाभ्यां नुः (उणा० ३ । ३२) इत्यतो नुरित्यनुवर्त्त्य—धेटइच्च ३ । ३४ इति नु प्रत्यय इकारान्तादेशश्च । तूयमित्युदकनाम निघं० १ । १२ ॥ ऋग्वेदे ८ । ४ । ८ऽपि ॥२॥

भाषार्थः—हे मनुष्य ! (वृषा) वृष्टिकर्त्ता इन्द्र देव वा परमात्मा (सव्याम्) सीधी अनुकूल (स्फिग्यम्) करवट (अनु) को (वाव से) वर्त्तमान है और (धेनवः) पानयोग्य सोम (सारघेण) माक्षिक (मध्वा) मिठास सहद से (संपृक्ताः) सने हुवे संस्कृत तयार हैं (अस्य) इस इन्द्र वा परमेश्वर का (दानः) दान (न) नहीं मारता किन्तु सुखदायक ही होता है, (द्रव) दौड (एहि) आव और (तूयम्) सोमरस को (पिब) पी ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जब परमेश्वर वा इन्द्रदेव की अनुकूलता हो, सुन्दर वर्षा से पानयोग्य सोम उत्पन्न होकर मधु मिला तैयार हो तो ऐसे उत्तम अवसर पर सौभाग्य जानकर मनुष्य को आलस्य त्याग कर सोमरस पान में चूक न करनी चाहिये ॥

अमरकोष ३।१।८४॥ २।५। २६ उणादिकोष ३।३२॥ ३।३५ निघण्टु १।१२ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८।४।८ में भी ॥ २ ॥

अथ द्वितीयप्रगाथसूक्तस्य—मेधातिथिर्ऋषिः। इन्द्रोदेवता। बृहती छन्दः ॥

तत्र प्रथमा—

३ १ २ ३ १ २ ३ १र २र

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।

३ १२३ १ २ ३ २ ३ १र २र

पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमै-

रनूषत ॥ १ ॥ (१६०५) व्याख्याता (२५०)

अथ द्वितीया—

३ २ ३२३ १ २ ३ १ २ ३ १ २

अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।

३१र २र ३ १ २३ १२ ३१२ ३१३

सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये

॥ २ ॥ [१८] (१६०६)

पदपाठः—अयम् १। सहस्रम् अ०। ऋषिभिः ३। सहस्कृतः १। समुद्र इव अ०। पप्रथे क्रि०। सत्यः, सः १। अस्य ६। महिमा १। गृणे क्रि०। शवः २। यज्ञेषु ७। विप्रराज्ये ७॥

अन्वितपदार्थः—(अयम्) एष इन्द्रः परमेश्वरः (सहस्रम् ऋषिभिः) बहुभिर्ऋषिभिः (सहस्कृतः) बलत्वेन स्वीकृतः (समुद्र इव) आकाशमिव (पप्रथे) विस्तृतोऽनन्तोस्ति (सः) एषः (अस्य) इन्द्रस्य (महिमा), (सत्यः), अस्ति (विप्रराज्ये) विदुषां ब्राह्मणानां राज्ये

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(यज्ञेषु), (शवः) अस्य बलं (गृणे) स्तौमि ॥ ऋग्वेदे ८ । ३ । ४ ऽपि ॥ २ ॥

भाषार्थः -(अयम्) यह परमेश्वर इन्द्र (सहस्रम्) बहुत (ऋषिभिः) ऋषियों ने (सहस्कृतः) अपना बल बनाया है (सः) वह (अस्य) इस का (महिमा) बड़प्पन (सत्यः) सत्य है (विप्रराज्ये) विद्वानों ब्राह्मणों के राज्य में (यज्ञेषु) अग्निष्टोमादि यज्ञों में (शवः) उस बल की (गृणे) स्तुति करता हूं ॥

परमेश्वर को असंख्य ऋषियों ने अपना बल बनाया है इस लिये उस आत्मिक बल की प्रशंसा स्तुति प्रार्थना प्रत्येक यज्ञ में जहां ब्राह्मणों की आज्ञा चलती है, करनी योग्य है ॥ ऋ० ८ । ३ । ४ भी ॥ २ ॥

अथ प्रगाथात्मक तृतीयसूक्तस्य–पुष्टिगुः काण्वऋषिः । इन्द्रो देवता । विराड्बृहती छन्दः ॥ तत्र प्रथमा–

२ ३ २उ ३ २ ३ १ २ ३ २ ३ २
यस्याऽयं विश्व आर्यो दासः शेवधिपा अरिः ।
३ १ २ ३ २ ३ २ ३ १ २ ३ १र २र ३ २
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥१॥ (१६०७)

पदपाठः–यस्य ६ । अयम्, आर्यः, दासः, शेवधिपाः, अरिः १ । तिरः, चित् अ० । अर्ये, रुशमे, पवीरवि ७ । तुभ्य ४ । इत् अ० । सः १ । अज्यते क्रि० । रयिः १ ॥

अन्वितपदार्थः–(यस्य) परमेश्वरस्य (अयम्), (विश्वः) सर्वः (आर्यः) आर्यवर्गः (शेवधिपाः) वेद विद्यानिधेरक्षकः (दासः) भक्तः (अरिः) प्रापकश्चाऽस्ति तस्मिन् (अर्ये) स्वामिनि (रुशमे) नियन्तरि (पवीरवि) वाक्पतिरि परमेश्वरे (तिरः) अन्तर्भूतं (चित्) अपि (सः) तत् (रयिः) धनं वेदधनम् (तुभ्य) तुभ्यं भक्ताय (इत्) एव (अज्यते) प्रकटीक्रियते ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शेवधिरिति वेदकोषस्य नाम । यथा–" विद्मा ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि" । ...निधिः शेवधिरिति निरु० २ । ४ ॥ अरिरिति–अचइः उणा० ४ । १३९ इत्यर्तेरिः ॥ रुशमे=नियन्तरि । पवीरवि=सरस्वत्याः पितरि इति सायणाचार्यः ॥ ऋग्वेदे ८ । ५१ । ९ऽपि ॥ १ ॥

भाषार्थः–(यस्य) जिस परमेश्वर का (अयम्) यह (विश्वः) सब (आर्यः) आर्यगण (शेवधिपाः) वेदविद्यारूप कोष का रक्षक (दामः) भृत्य वा सेवक वा भक्त और (अरिः) प्रापक है. उस (अर्ये) स्वामी (रुशमे) नियन्ता (पीवरवि) वाणी के पिता परमेश्वर में (तिरः) छिपा हुवा (वित्) भी (सः) वह (रयिः) वेद कोष का धन (तुभ्य) तुझ भक्त के लिये (इत्) अवश्य (अज्यते) प्रकट किया जाता है ॥

निरुक्त २ । ४ उणादि ४ । १३९ और सायणाचार्य के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ८ । ५१ । ९ में भी ॥ १ ॥

अथ द्वितीया–

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २

तुरण्यवोमधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।

३ २ ३ १ २ ३ २ ३ २३ २ ३ २ ३ १ २

अस्मे रयिः पप्रथे वृष्ण्यꣳशवोस्मे स्वानास इन्दवः

॥ २ ॥ [१९] (१६०८)

पदपाठः–तुरण्यवः १ । मधुमन्तम्, घृतश्चुतम् २ । विप्रासः १ । अर्कम् २ । आनृचुः क्रि० । अस्मे ४ । रयिः १ । पप्रथे क्रि० । वृष्ण्यम्, शवः १ । अस्मे । स्वानासः, इन्दवः १ ॥

अन्वितपदार्थः–(तुरण्यवः) कर्मसु त्वरायुक्ताः(विप्रासः) मेधाविन ऋत्विजः (मधुमन्तम्) मधुक्षीरादियुक्तम् (घृतश्चुतम्) घृतस्योदकस्य श्चोतकं क्षारकं (अर्कम्) अर्चनीयं परमेश्वरमिन्द्रं वा (आनृचुः) अर्चयन्ति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूजयन्ति यजन्ति वा । तथा प्रार्थयन्ते–(अस्मे) अस्मभ्यं (रयिः) धनं (पप्रथे) विस्तृतं भवतु (वृष्ण्यं शवः) वृष्यं बलं विस्तृतं भवतु (अस्मे) अस्मभ्यं (स्वानासः) अभिषूयमाणाः (इन्दवः) सोमाः विस्तृता भवन्तु इति ॥ ऋग्वेदे तु ८ । ५१ । १० सुवानासः इत्यन्तरम् ॥ २ ॥

भाषार्थः–(तुरण्यवः) फुर्तीले (विप्रासः) बुद्धिमान् ऋत्विज् (मधुमन्तम्) मधुक्षीरादि वाले (घृतश्चुतम्) जल वर्षाने वाले (अर्कम्) अर्चनीय वा यजनीय परमेश्वर वा इन्द्र को (आनृचुः) पूजते वा यजन करते हैं और चाहते हैं कि (अस्मे) हमारे लिये (रयिः) धन (पप्रथे) विस्तृत हो (वृष्ण्यं शवः) वीर्यवर्धक बल विस्तृत हो (अस्मे) हमारे लिये (स्वानासः) अभिषूयमाण (इन्दवः) सोमरस विस्तृत हों ॥ ऋ० ८ । ५१ । १० का पाठान्तर संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृचस्य चतुर्थसूक्तस्य पर्वतनारदावृषी । सोमो देवता । उष्णिक् छन्दः ॥

तत्रप्रथमा—

१ २ ३ १ २ ३१ २
गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिवः ।
१ २ ३ २ ३ २ ३ १ २
शुचिं च वर्णमधि गोषु धारय ॥ १ ॥ (१६०९)

व्याख्याता (५७१)

अथ द्वितीया—

१ २ ३ १ २ ३१ २
स नो हरीणां पत इन्दो देव प्सरस्तमः ।
१ २ ३ २ ३ १ २ ३१ २
सखेव सख्ये नर्योरुचे भव ॥ २ ॥ (१६१०)

पदपाठः-सः १ । नः ४ । हरीणाम् ६ । पते, इन्दो, देव सं० । प्सरस्तमः १ । सखा १ । इव अ० । सख्ये ४ । नर्यः १ । रुचे ४ । भव क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(हरीणां) हरणशीलानां रश्मीनां, वा जीवात्मनां (पते) स्वामिन् ! (इन्दो) आर्द्र ! सोम ! वा परमेश्वर ! (देव) ! (प्सरस्तमः) अतिशयेन दीप्तस्वरूपोपेतः (नर्यः) नृभ्यो हितः (सः) स त्वं (नः) अस्मभ्यम् (रुचे) दीप्त्यै प्रकाशाय (भव) एधि (इव) यथा (सख्ये) सुहृदे (सखा) सुहृद् भवति तद्वत् ॥ ऋग्वेदे ९ । १०५ । ५ ऽपि ॥ २ ॥

भाषार्थः-(हरीणाम्) हरने ले चलने वाली किरणों वा आत्माओं के (पते) स्वामिन् ! (इन्दो) गीले सोम ! वा परमेश्वर ! (देव) देव ! (प्सरस्तमः) अत्यन्त प्रकाशमान (नर्यः) नरों के हितकारी (सः) सो आप (नः) हमारे लिये (रुचे) प्रकाशार्थ (भव) हों । (इव) जैसे (सख्ये) मित्र के लिये (सखा) मित्र होता है तद्वत् ॥ ऋ० ९ । १०५ । ५ में भी ॥२॥

अथ तृतीया—

१ २ ३ २ ३ १२ २१३ १ २ ३ १ २
सनेमि त्वमस्मदा अदेवं कंचिदत्रिणम् ।
३ १ २ ३ २ ३२ ३ १२३२
साह्वाँ इन्दो परिबाधो अपद्वयुम् ॥३॥ [२०] (१६११)

पदपाठः-सनेमि २ । त्वम् १ । अस्मत् ५ । आ अ० । अदेवम् , कंचित् , अत्रिणम् २ । साह्वान् १ । इन्दो सं० । परि अ० । बाधः २ । अप अ० । द्वयुम् २ ॥

अन्वितपदार्थः-(इन्दो) हे सोम ! वा परमेश्वर ! (त्वम्), (सनेमि) पुरातनं सख्यम् (आ) कुरु (अदेवम्) देवेभ्यो विरुद्धं (कंचित्), (अत्रिणम्) भक्षकं राक्षसम् (अस्मत्) अस्मत्तो याज्ञिकेभ्यः (अप) अपगमय (बाधः) बाधकान् (साह्वान्) अभिभवन् सन् त्वं (परि) वर्जय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(द्वयुम्) अन्तर्बहिश्च द्विधा वर्त्तमानं कपटकरं स्वार्थिनम् वर्जय ॥

ईश्वरोपासनेन सोमयागेन वा मनुष्येषु तादृशं बलं जायते यतस्ते सर्वाऽनिष्टनिवारणक्षमा भवन्तीति भावः ॥ ऋग्वेदे ९ । १०५ । ६ ऽपि ॥ ३ ॥

भाषार्थः—(इन्दो) हे सोम ! वा परमेश्वर ! (त्वम्) तू (सनेमि) सनातन पुरानी मित्रता को (आ) कर और (अदेवम्) देवविरोधी (कञ्चित्) किसी (अत्रिणम्) भक्षक राक्षस को (अस्मत्) हम से (अप) दूर कर (बाधः) बाधकों को (साह्वान्) तिरस्कृत करता हुआ तू (परि) हटा और (द्वयुम्) भीतर बाहर २ भेद रखने वाले कपटी को वर्जित कर ॥

परमेश्वर की उपासना वा सोमयाग करने वाले मनुष्यों में इस प्रकार का बल उत्पन्न होता है जिस से वे अपने विरोधी सब अनिष्टों के निवारण में समर्थ होते हैं ॥ ऋ० ९ । १०५ । ६ में भी ॥ ३ ॥

अथ पञ्चमस्य तृचसूक्तस्य—अत्रिर्ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ २३क २र ३ १ २ ३ १२ ३ २३क ९र

अञ्जते व्यञ्जते समञ्जते क्रतुꣳ रिहन्ति मध्वाऽभ्यञ्जते ।

१ २ ३ २ ३१२ ३१२ ३ २ ३२

सिन्धोरुच्छ्वासे पतयन्तमुक्षणꣳ हिरण्यपावाः पशु-

३ १ २

मप्सु गृभ्णते ॥ १ ॥ (१६१२) व्याख्याता (५६४)

अथ द्वितीया—

३ २३ १२ ३१र २र

विपश्चिते पवमानाय गायत महीं न धाराऽत्यऽन्धो अर्षति ।

२३ २ ३ १ ९र ३ २३ २३ १र २र ३ २३ १२

अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः ॥

॥ २ ॥ (१६१३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–विपश्चिते, पवमानाय ५। गायत क्रि०। महीं १। न अ०। धारा १। अति अ०। अन्धः २। अर्षति क्रि०। अहिः १। न। जूर्णाम् २। अति सर्पति क्रि०। त्वचम् २। अत्यः १। न। क्रीडन् १। असरत् क्रि०। वृषा, हरिः १॥

अन्वितपदार्थः–हे मनुष्याः ! (विपश्चिते) मेधाविने (पवमानाय) शुद्धिं कुर्वाणाय (गायत) तद्गुणकीर्त्तनं कुरुत, सः पवमानः (महीं) महतीं (धारा) वर्षधारा (न) इव (अन्धः) अन्नम् (अति) अतिशयेन (अर्षति) वर्षयति (अहिः) सर्पः (न) इव (जूर्णाम्) जीर्णां (त्वचम्), (अतिसर्पति) त्यक्त्वा गच्छति नूतनतां सम्पादयति । (वृषा) वृष्टिकर्त्ता (हरिः) " हरितवर्णः सोमः" इत्येव सायणः (अत्यः) अश्वः (न) इव त्वरागामी (असरत्) प्रचलति=वेगमुत्पादयति ॥

यतः सोमोमहती वृष्टिधारेव अन्नस्य वर्षकः, शुद्धिकारकः, सर्वत्र यौवनोत्पादकः, स्फूर्त्तिप्रसारकश्चास्ति अतः स इत्थंभूतैर्गुणैः स्तोतव्योगेय इति भावः ॥ ऋग्वेदे ९। ८६। ४४ ऽपि ॥ २ ॥

भाषार्थः–हे मनुष्यो ! (विपश्चिते) मेधा तत्त्व वाले (पवमानाय) शुद्धिकारक सोम के लिये (गायत) गान करो=उस के गुणों का कीर्त्तन करो । वह सोम (महीं) बड़ी (धारा) वृष्टिधारा के (इव) समान (अन्धः) अन्न को (अति) बहुत (अर्षति) बर्षाता है । (अहिः) सर्प (न) सा (जूर्णाम्) पुरानी (त्वचम्) कांचली को (अतिसर्पति) त्याग जाता है (वृषा) वृष्टिकारक (हरिः) हरा सोम (अत्यः) अश्व (न) सा शीघ्रगामी (असरत्) दौड़ता=वेगवान् होता और वेग उत्पन्न करता है ॥

भारी वृष्टि जैसे अन्न उत्पन्न करती है, तद्वत् सोम भी वर्षा द्वारा अन्न

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

को उत्पन्न करता है, शुद्धिकारक है, सर्वत्र जीर्णता को नष्ट कर यौवन उत्पन्न करता है, फुरती को फैलाता है, इस प्रकार के गुणोंसे सोम की प्रशंसा वा कीर्तन करना चाहिये ॥ ऋ० ९ । ८६ । ४४ में भी ॥ २ ॥

अथ तृतीया—

३ १र २र ३ २ ३ २३ १२३१ २
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
१२३१ २ ३१२ ३ २ ३१२ ३ २ ३क २र
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः॥

॥ ३ ॥ [२१] (१६१४)

इति सप्तमः प्रपाठकः ॥ ७ ॥

पदपाठः—अग्रेगः, राजा, आप्यः १ । तविष्यते क्रि० । विमानः १ । अह्नाम् ६ । भुवनेषु ७ । अर्पितः, हरिः, घृतस्नुः, सुदृशीकः, अर्णवः, ज्योतीरथः १ । पवते क्रि० । रायः २ । ओक्यः १ ॥

अन्वितपदार्थः—(अग्रेगः) नवसु ग्रहेषु अग्रगन्ता (राजा) प्रकाशमानः (आप्यः) अम्मयः सोमश्चन्द्रः (तविष्यते) स्तूयते (अह्नाम्) तिथीनां (विमानः) निर्माता । चन्द्रकलाह्रासवृद्ध्यधीनत्वात्तिथीनाम् । (भुवनेषु) जगतीषु (अर्पितः) परमेश्वरेण रक्षितः (घृतस्नुः) घृतस्योदकस्य च्यावयिता (हरिः) हरणशीलः (सुदृशीकः) शोभनदर्शनः, दर्शनीयानि मुखानि चन्द्रेणोपमीयन्ते लोकेऽपि । (अर्णवः) आर्द्रकिरणत्वाज्जलवान् (ज्योतीरथः) ज्योतिः सूर्यकिरणजनितः प्रकाशो रथो रमणीयो मार्गो यस्य तादृशः (रायः) धनानि (पवते) क्षरति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(ओक्यः) निवासाय हितः ॥ ऋग्वेदे ९ । ८६ । ४५ ऽपि॥३॥

इति षोडशाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

इति

श्रीमत्कण्ववंशावतंस-पण्डित-हज़ारीलाल स्वामिसूनुना,
हस्तिनापुर पार्श्ववर्त्ति-परीक्षितगढ़ निवासिना
तुलसीरामस्वामिना कृते सामवेदभाष्योत्तरार्चिके
षोडशोऽध्यायः समाप्तः ॥ १६ ॥

भाषार्थः-(अग्रेगः) नव ग्रहों में सब से अग्रगामी (राजा) प्रकाशमान (आप्यः) जलमय सोम चन्द्रलोक (तविष्यते) वर्णित किया जाता है (अन्हाम्) तिथियों का (विमानः) बनाने वाला है क्योंकि चन्द्रमा की कलाओं के घटने बढ़ने के अधीन सब तिथि हैं। (भुवनेषु) लोकों में (अर्पितः) परमेश्वर ने रक्खा है (घृतस्नुः) जल का टपकाने वाला है (हरिः) हरने वाला है (बभ्रुशीकः) उत्तम दर्शनीय है इसी से लोक में भी दर्शनीय मुखों को चन्द्रमा की उपमा दी जाती है। (अर्णवः । गीली किरणों वाला होने से जलवान् है (ज्योतीरथः) सूर्य की ज्योति जिस का रमणीय रथ वा मार्ग है। (रायः) धनों को (पवते) वर्षाता है (ओक्यः) रहने योग्य है ॥ ऋ० ९। ८६। ४५ में भी ॥ ३ ॥

यह

षोडशाऽध्याय का चौथा खण्ड पूर्ण हुआ ॥ ४ ॥ तथा-

यह

श्रीमान् कण्ववंशाऽवतंस पं० हज़ारीलाल स्वामी के पुत्र,
परीक्षितगढ़ ज़िला-मेरठ-निवासी, तुलसीरामस्वामिकृत
सामवेदभाष्य के उत्तरार्चिक में १६ सोलहवां अध्याय
समाप्त हुवा ॥ १६ ॥

—*—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ सप्तदशोऽध्यायः

तत्र प्रथमे खण्डे प्रथमतृचस्य-शुनःशेप ऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ २ ३ २ ३ १र २र

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः ।

१ २

चनो धाः सहसो यहो ॥ १ ॥ (१६१५)

पदपाठः—विश्वेभिः ३ । अग्ने सं० । अग्निभिः ३ । इमम्, यज्ञम् २ । इदम्, वचः, चनः २ । धाः क्रि० । सहसः ६ । यहो सं० ॥

अन्वितपदार्थः-(सहसः) बलस्य (यहो) पुत्र ! (अग्ने) पावक ! (विश्वेभिः) सर्वैः (अग्निभिः) आहवनीयादिभिः सह (इमम्) अस्माभिरनुष्ठीयमानं (यज्ञम्), (इदम्) अस्माभिरुदीर्यमाणं (वचः) वचनं मन्त्रपाठं स्वीकुरु इति शेषः । (चनः) अन्नं (धाः) धेहि ॥ ऋग्वेदे १ । २६ । १० ऽपि ॥ १ ॥

भाषार्थः-(सहसः) बल के (यहो) पुत्र ! (अग्ने) अग्ने ! (विश्वेभिः) सब (अग्निभिः) आहवनीयादि अग्नियों के साथ (इमम्) इस (यज्ञम्) यज्ञ को (इदम्) और इस (वचः) वेदपाठ को सङ्गत वा स्वीकृत कर और (चनः) अन्न को (धाः) धारित करा ॥ ऋ० १ । २६ । १० में भी ॥१॥

अथ द्वितीया-

२ ३ १र २र ३ १ २ ३ १ २ ३ १ २

यञ्चिद्धि शश्वता तना देवं देवं यजामहे ।

१र २र ३ २

त्वे इद्धूयते हविः ॥ २ ॥ (१६१६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—यत्, चित्, हि अ० । शश्वता, तना ३ । देवम्, देवम् २ । यजामहे क्रि० । त्वे ७ । इत् अ० । हूयते क्रि० । हविः १ ॥

अन्वितपदार्थः—पूर्वमन्त्रात् हे अग्ने ! इत्यनुवर्त्त्य—(यत् चित् हि) यद्यपि (शश्वता) सनातनेन (तना) विस्तृतेन यज्ञेन (देवं देवम्) इन्द्रवरुणादिबहून्देवान् (यजामहे), परन्तु (हविः) हव्यं (त्वे) त्वयि अग्नौ (इत्) एव (हूयते) ॥

अग्निद्वारैव सर्वदेवयजनमनुतिष्ठाम इति भावः ॥ तना—तनु विस्तारे, पचाद्यच्, तृतीयाया आकारः ॥ ऋग्वेदे १ । २६ । ६ ऽपि ॥ २ ॥

भाषार्थः—पूर्व मन्त्र से अनुवृत्ति लेकर—अग्ने ! (यत् चित् हि) यद्यपि (शश्वता) सनातन (तना) विस्तृत यज्ञ से, हम (देवम् देवम्) प्रत्येक देवता का (यजामहे) यजन करते हैं, परन्तु (हविः) हव्य को (त्वे) तुझ में (इत्) ही (हूयते) होमाजाता है । अर्थात् अग्नि देवता में ही होम करके सब देवों का यजन होता है ॥ ऋ० १ । २६ । ६ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ २ ३ १ २ ३ १ २ २ २
प्रियो नो अस्तु विशपतिर्होता मन्द्रो वरेण्यः ।
३ २ ३ १ २ ३ २
प्रियाः स्वग्नयो वयम् ॥ ३ ॥ [१] (१६१७)

पदपाठः—प्रियः १ । नः ६ । अस्तु क्रि० । विशपतिः, होता, मन्द्रः, वरेण्यः १ । प्रियाः, स्वग्नयः, वयम् १ ॥

अन्वितपदार्थः—(विशपतिः) प्रजानां पालकः (होता) होमसाधनः (मन्द्रः) दीप्रः (वरेण्यः) वरणीयः अग्निः (नः) अस्माकं (प्रियः) प्रीतिपात्रम् (अस्तु) भवतु, तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(वयम्) याज्ञिका अपि (स्वग्नयः) शोभनाग्नयः (प्रियाः) परस्परस्य हिते रताः भवेम ॥ ऋग्वेदे १ । २६ । ७ ऽपि ॥३॥

भावार्थः-(विश्पतिः) प्रजापालक (होता) होम का साधक (मन्द्रः) दीप्त (वरेण्यः) वरणीय अग्नि (नः) हमारा (प्रियः) प्यारा (अस्तु) हो, तथा (वयम्) हम याज्ञिक लोग भी (स्वग्नयः) उत्तम अग्नि के आधान करने वाले (प्रियाः) परस्पर प्यार करने वाले हों ॥

ऋ० १ । २६ । ७ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-मधुच्छन्दा ऋषिः । इन्द्रोदेवता। गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ २३ २३१२ ३ १ २
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
३ १ २ ३ १ २
अस्माकमस्तु केवलः ॥ १ ॥ (१६१८)

पदपाठः-इन्द्रम् २। वः ४। विश्वतः, परि अ०। हवामहे क्रि०। जनेभ्य ४। अस्माकम् ६। अस्तु क्रि०। केवलः १॥

अन्वितपदार्थः-(जनेभ्यः), (वः) युष्मभ्यं (विश्वतः) सर्वतः (परि) उपरि वर्त्तमानम् (इन्द्रम्) देवम् (हवामहे) आह्वयामहे (अस्माकं) याज्ञिकानां (केवलः) असाधारणः स इन्द्रः (अस्तु) भवतु ॥ ऋग्वेदे १ । ७ । १० ऽपि ॥ १ ॥

भाषार्थः-(जनेभ्यः) मनुष्योपलक्षित प्राणिमात्र के लिये (वः) तुम्हारे लिये (विश्वतः) सब से (परि) ऊपर विराजमान (इन्द्रम्) इन्द्र देव को (हवामहे) हम याज्ञिक लोग अग्नि दूत द्वारा बुलाते हैं जिस से (अस्माकम्) हमारा (केवल) असाधारण वह इन्द्र (अस्तु) हो जावे ॥

ऋ० १ । ७ । १० में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ २ ३।२ २२ ३१ २
स नो वृषन्नमुं चरुꣳ सत्रादावन्नपावृधि ।
३ २ ३ १ २
अस्मभ्यमऽप्रतिष्कुतः ॥ २ ॥ (१६१९)

पदपाठः—सः १ । नः ६ । वृषन् सं० । अमुम् , चरुम् २ । सत्रादावन् सं० । अपावृधि क्रि० । अस्मभ्यम् ४ । अप्रतिष्कुतः १ ॥

अन्वितपदार्थः—(सत्रादावन्) सहैव बहुदानकर्त्तः ! (वृषन्) वृष्टिकर्त्तः ! इन्द्र ! (अप्रतिष्कुतः) परैरप्रतिशब्दितः अप्रधृष्यः (सः) उक्तगुणस्त्वम् (नः) अस्माकम् (अमुं चरुम्) एतदन्नम् (अस्मभ्यं) याज्ञिकेभ्यः (अपावृधि) उद्घाटय ॥ ऋग्वेदे १ । ७ । ६ ऽपि ॥ २ ॥

भाषार्थः—(सत्रादावन्) हे एक साथ दान करने वाले ! (वृषन्) वृष्टि करने वाले ! इन्द्र ! (अप्रतिष्कुतः) अप्रधृष्य (सः) वह तू (नः) हमारे (अमुम्) इस (चरुम्) अन्न को (अस्मभ्यम्) हम याज्ञिकों के लिये (अपावृधि) उघाड़ ॥ ऋ० १ । ७ । ६ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३२३ १ २ ३ १ २३ १ २
वृषा यूथेव वꣳसगः कृष्टीरियर्त्योजसा ।
१२ ३ १ २
ईशानो अप्रतिष्कुतः ॥३॥ [२](१६२०)

पदपाठः—वृषा १ । यूथा २ । इव अ० । वंसगः १ । कृष्टीः २ । इयर्त्ति क्रि० । ओजसा ३ । ईशानः, अप्रतिष्कुतः १ ॥

अन्वितपदार्थः—(ईशानः) शक्तिमान् (अप्रतिष्कुतः) परैरप्रतिशब्दितोऽप्रधृष्यः (वृषा) वृष्टिद्वारा सेचक इन्द्रः (कृष्टीः) मनुष्यादीन्प्राणिनः (ओजसा) बलेन विद्युद्रूपेण

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(इयर्त्ति) प्राप्नोति (इव) यथा (वंसगः) वननीय-गतिर्वृषभः (यूथा) गोयूथानि प्राप्नोति तद्वत् ॥

गवां प्रकर्षेण वीर्यप्रदोवृषइवेन्द्रोऽपि मनुष्यादिप्राणिषु बलत्वेन वीर्यत्वेन चान्तस्तिष्ठति ॥ ऋग्वेदे १ । ७ । ८ ऽपि ॥ ३ ॥

भाषार्थः-(ईशानः) शक्तिमान् (अप्रतिष्कुतः) जिस को रोकने को कोई बोल नहीं सकता (वृषा) वृष्टि करने वाला इन्द्र (कृष्टीः) मनुष्यों और तदुपलक्षित अन्य प्राणियों को (ओजसा) बल वा विद्युत्रूप से (इयर्त्ति) प्राप्त होता है (इव) जैसे (वंसगः) उत्तम गति वाला साण्ड (यूथा) गौवों के यूथों को प्राप्त होता है तद्वत् ॥

जैसे गौवों को बिजार अत्यन्त वीर्यप्रद है, वैसे इन्द्रदेव भी मनुष्यादि प्राणियों में बलवीर्यरूप से भीतर विराजमान रहता है ॥ ऋ० १ । ७ । ८ में भी ॥ ३ ॥

अथ प्रगाथस्य तृतीयसूक्तस्य-तृणपाणिर्ऋषिः । अग्निर्देवता । बृहती छन्दः ॥

तत्र प्रथमा—

१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
त्वं नश्चित्र ऊत्या वसो राधाꣳसि चोदय । अस्य राय-
१ २ ३ १ २ ३ २ ३ २ ३ १ २ २
स्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥१॥ (१६२१)

व्याख्याता (४१)

अथ द्वितीया-

१ २ ३ १ २ २ ३ २ ३ १ २ २ ३ १ २ २ ३
पार्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः । अग्ने
१ २ ३ १ २ ३ १ २ ३ १ २
हेडाꣳसि दैव्या युयोधि नोऽदेवानि ह्वराꣳसि च ॥

॥ २ ॥ [३] (१६२२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–पर्षि क्रि० । तोकम्, तनयम् २। पर्तृभिः ३ । त्वम् १ । अदब्धैः, अप्रयुत्वभिः ३ । अग्ने सं० । हेडांसि, दैव्या २ । युयोधि क्रि० । नः ६ । अदेवानि, हुरांसि २ । च अ० ॥

अन्वितपदार्थः–(अग्ने) हे प्रकाशस्वरूप ! परमेश्वर! वा पावक ! (त्वम्) , (अदब्धैः) केनाऽप्यहिंसितैरनिवार्यैः (अप्रयुत्वभिः) अपृथग्भूतैर्मिश्रितैः सहवर्त्तमानैः (पर्तृभिः) पालनसाधनैः (नः) अस्माकं (तोकं) पुत्रं (तनयं) पौत्रं च (पर्षि) पालयसि (दैव्या) दैव्यानि (पडांसि) क्रोधजातानि (च) पुनः (अदेवानि) आसुराणि (हुरांसि) कौटिल्यानि (युयोधि) वर्जयसि ॥ ऋग्वेदे ६ । ४८ । १० ऽपि ॥ २ ॥

भाषार्थः–(अग्ने) हे प्रकाशात्मक ! परमेश्वर ! वा अग्ने ! (त्वम्) तू (अदब्धैः) अनिवार्य (अप्रयुत्वभिः) अनेक साथ साथ वर्त्तमान (पर्तृभिः) पालन के साधनों से (नः) हमारे (तोकम्) पुत्र (तनयम्) पौत्र को (पर्षि) पालित करता है (दैव्या) दैवी (हेडांसि) कोपों (च) और (अदेवानि) आसुरी (हुरांसि) कुटिलताओं को (युयोधि) हम से वर्जता है॥ ऋ० ६ । ४८ । १० में भी ॥ २ ॥

अथ चतुर्थस्य तृचसूक्तस्य–वसिष्ठऋषिः । विष्णुर्देवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा—

१र २र ३ २ ३ २ ३ १र २र ३ १ २ ३ १ २

किमित्ते विष्णो परिचक्षि नाम प्रयद्वक्षे शिपिविष्टो अस्मि ।

१र २र ३ १र २र ३२ब ३ १ २ ३ २ ३ १ २

मा वर्पो अस्मदपगूह एतद् यदन्यरूपः समिथे बभूथ ॥१॥(१६२३)

पदपाठः–किम्, इत् अ० । ते ६ । विष्णो सं० । परिचक्षि, नाम १ । प्र अ० । यत् १ । वक्षे क्रि० । शिपिविष्टः १। अस्मि क्रि० । मा अ० । वर्पः २ । अस्मत् ५ । अपगूह क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(विष्णो) यज्ञदेव ! (ते) त्वदीयं (परिचक्षि) सर्वतो विख्यातं (नाम) नाम (किम्, इत्) किं वर्णनीयं, वर्णनात्परं प्रशस्तमित्यर्थः । (यत्) यद्धि (शिपिविष्टः) किरणेषु निविष्टः (अस्मि) भवामि इति (प्रवक्षे) प्रकर्षेण वक्षि (एतत्) किरणगतं (वर्पः) रूपम् (अस्मत्) याज्ञिकेभ्यः (मा अपगूह) निरोहितं न कुरु (यत्) यद्धि (समिथे) दुष्टशत्रुसमदुष्टरोगनिवारणार्थे संग्रामे (अन्यरूपः) भिन्नरूपः (बभूथ) भवसि ॥

विष्णुरिति यज्ञनाम निघं ३।१७॥ शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति—निरु० ५ । ८॥ वर्प इति रूपनाम निघं० ३ । ७ ॥ समिथे=संग्रामे निघं० २ । १७ ॥ बभूथातन्थजमृभ्मववर्थेति निगमे, अष्टा० ७।२ । ६४ निपातनात् अभूथ ॥ ऋग्वेदे ७ । १०० । ६ ऽपि १ ॥

भाषार्थः—(विष्णो) हे यज्ञ ! (ते) तेरा (परिचक्षि) सर्वत्र विख्यात (नाम) नाम (किम्) क्या (इत्) ही कहा जावे, वह तो वर्णन से बाहर है । (यत्) जो कि तू (प्रवक्षे) कहता है कि मैं (शिपिविष्टः) किरणों में प्रविष्ट (अस्मि) हूं । (एतत्) इस किरणगत (वर्पः) रूप को (अस्मत) हम याज्ञिकों से (मा) मत (अपगूह) छिपा (यत्) जोकि तू (समिथे) दुष्टशत्रुसमान नाना रोगों के साथ संग्राम में (अन्यरूपः) विलक्षण रूप वाला (बभूथ) होता है ॥

यज्ञ जब सूर्यकिरणों में जाता है तो शत्रुतुल्य नाना रोगों से संग्राम करता है और ऐसा भिन्न विलक्षण रूप धारण करता है जो छिप नहीं सक्ता और मानो यज्ञ कहने लगता है कि मैं सूर्यकिरणों में प्रविष्ट हूं । ऐसे यज्ञ के स्वरूप और फल का क्या वर्णन किया जावे ॥ निघण्टु ३ । १७ ॥ ३ । ७ ॥ २ । १७ निरुक्त ५ । ८ अष्टाध्यायी ७ । २ । ६४ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० ७ । १०० । ६ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१२२ ३ १ २ ३२३१ २ ३१२ ३ २

प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शंसामि वयुनानि विद्वान् ।

१ २ ३२३१२ ३ १२ ३ १२ ३२२ ३ २

तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके २(१६२४)

पदपाठः-प्र अ० । तत् अ० । ते ६ । शिपिविष्ट सं० । हव्यम् २। अर्यः १। शंसामि क्रि० । वयुनानि २ । विद्वान् १ । तम् , त्वा २ । गृणामि क्रि० । तवसम् २ । अतव्यान् १ । क्षयन्तम् २ । अस्य, रजसः ६ । पराके ७ ॥

अन्वितपदार्थः (तत्) तस्मात्कारणात् (शिपिविष्ट) हे किरणगत यज्ञ ! (वयुनानि) प्रशस्यानि (ते) तव गुणजातानि (विद्वान्) जानन्नहम् (अर्यः) हव्यानां स्वामी यजमानः (अद्य) यज्ञदिने (हव्यम्) होतव्यं घृतादिकं (प्र शंसामि) प्रशंसन्ददामि (तं) प्रसिद्धं (तवसं) बलिनम् (अस्य) एतस्य (रजसः) भूलोकस्य (पराके) दूरे (क्षयन्तं) निवसन्तं (त्वा) त्वाम् (अतव्यान्) निर्बलोऽहं कृशोऽवृद्धतरोऽहं (गृणामि) स्तौमि ॥ ऋग्वेदे तु ७ । १०० । ५ हव्यम्=नाम इति पाठभेदः ॥ २ ॥

भाषार्थः-(तत्) इस कारण (शिपिविष्ट) हे किरणव्याप्त यज्ञ ! (ते) तेरे (वयुनानि) प्रशंसनीय गुणों को (विद्वान्) जानता हुवा मैं (अर्यः) हव्यों का स्वामी यजमान (अद्य) आज यज्ञ के दिन (हव्यम्) हव्य पदार्थ को (प्र-शंसामि) प्रशंसापूर्वक होमता हूं (तम्) उस प्रसिद्ध (तवसम्) बलवान् (अस्य) इस (रजसः) लोक=पृथिवी के (पराके) दूर (क्षयन्तम्) रहते हुवे (त्वा) तुझ यज्ञ को (अतव्यान्) निर्बल वा कृश मैं (गृणामि) प्रशंसा करता हूं ॥ ऋ० ७ । १०० । ५ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१२ ३१२ २२ ३ १ २

वषट् ते विष्णवास आकृणोमि-तन्मे जुषस्व शिपि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २ १ २ ३ २ ३ १ २ ३ १ २
विष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे—यूयं पात
३ २ ३ १ २
स्वस्तिभिः सदा नः ॥ ३ ॥ [४] (१६२५)

पदपाठः—वषट् अ० । ते ६ । विष्णो सं० । आस ७। आकृणोमि क्रि० । तत् २ । मे ६ । जुषस्व क्रि० । शिपिविष्ट सं० । हव्यम् २ । वर्धन्तु क्रि० । सुष्टुतयः, गिरः १ । मे ६ । यूयम् १ । पात क्रि० । स्वस्तिभिः ३ । सदा अ० । नः २ ॥

अन्वितपदार्थः—(शिपिविष्ट) हे किरणव्यापिन् ! (विष्णो) यज्ञ ! (ते) तव (आस) आसनि मुखे (वषट्) वषट्कारपूर्वामाहुतिम् (आकृणोमि) जुहोमि (तत्) वषट्कृतं (मे) मम (हव्यम्) आज्यादिकं (जुषस्व) सेवस्व स्वीकुरु (मे) मम (सुष्टुतयः) शोभनस्तुतिमत्यः (गिरः) वाचः (त्वा) त्वां यज्ञं (वर्धन्तु) वर्धयन्तु (यूयम्) आदरार्थे बहुवचनं, त्वं (नः) अस्मान् याज्ञिकान् (स्वस्तिभिः) कल्याणैः (सदा) सर्वदा (पात) रक्ष ॥

ये मनुष्याः यज्ञमनुतिष्ठन्ति, स्वाहा स्वधा वषट् ओषट् वौषट् इत्यादिशब्दप्रयोगपूर्वकं तं यज्ञं प्रचारयन्ति लोके प्रचारेणाऽनुष्ठानेन च वर्धयन्ति च तत्कृतं तदनुष्ठानं स्वीकुर्वाणो यज्ञः सदा तान् रक्षति इति भावः ॥ ऋग्वेदे ७ । १०० । ७ ऽपि ॥ ३ ॥

भाषार्थः—(शिपिविष्ट) हे सूर्यकिरणों में व्याप्त ! (विष्णो) यज्ञ ! (ते) तेरे (आस) मुख में (वषट्) वषट्कारपूर्विका आहुति (आकृणोमि) करता हूं (तत्) उस वषट्पूर्वक (मे) मेरे (हव्यम्) घृतादि को (जुषस्व) तू सेवित=स्वीकृत कर (मे) मेरी (सुष्टुतयः) सुन्दर स्तुतियुक्त (वाचः) वाणियें (त्वा) तुझ यज्ञ को (वर्धन्तु) बढ़ावें (यूयम्) तू (स्व-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तिभिः) कल्याणों भलाइयों से (सदा) सर्वदा (नः) हमारी (पात) रक्षा कर ॥

जो लोग यज्ञानुष्ठान करते, स्वाहा स्वधा वषट् ओषट् वौषट् इत्यादि यथाविनियोग शब्दों के द्वारा उस यज्ञ के प्रचार तथा अनुष्ठान से लोक में यज्ञ को बढ़ाते हैं, यज्ञदेव सदा सब भलाइयों द्वारा उन की रक्षा करता है। यह भाव है ॥ ऋ० ७ । १०१ । ७ में भी ॥ ३ ॥

इति उत्तरार्चिके सप्तदशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

उक्तो वाजपेयः । इदानीं राजसूय उच्यते इति विष०

अथ द्वितीये खण्डे

प्रथमतृचस्य—वामदेवऋषिः । इन्द्रवायू देवते । अनुष्टुप्छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ २ ३ १ २

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।

१ २ ३ १ २ ३ १ २ ३ १ २

आयाहि सोमपीतये स्पार्हो देव नियुत्वता ॥१॥ (१६२६)

पदपाठः—वायो सं० । शुक्रः १ । अयामि क्रि० । ते ४ । मध्वः ६=२ । अग्रम् २ । दिविष्टिषु ७ । आयाहि क्रि० । सोमपीतये ४ । स्पार्हः १ । देव सं० । नियुत्वता ३ ॥

अन्वितपदार्थः—(देव) दिव्यगुणयुक्त ! (वायो) पवन ! (दिविष्टिषु) देवयजनेषु (अग्रम्) मुख्यं (मध्वः) मधुरं हव्यम् (ते) तुभ्यम् (अयामि) प्रापयामि (शुक्रः) वीर्यवान् (स्पार्हः) सर्वैः स्पृहणीयः त्वं (सोमपीतये) सोमपानाय (नियुत्वता) वेगरूपेणाऽश्वेन (आयाहि) ॥ ऋग्वेदे ४ । ४७ । १ ऽपि ॥ १ ॥

भाषार्थः—(देव) दिव्यगुणयुक्त ! (वायो) पवन ! (दिविष्टिषु) देव यजनों में (अग्रम्) मुख्य (मध्वः) मधुर हव्य को (ते) तेरे लिये (अयामि) पहुंचाता हूं (शुक्रः) वीर्यवान् (स्पार्हः) स्पृहणीय तू (सोमपीतये)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोमपानार्थं (नियुत्वता) वेगरूपी अश्व से (आयाहि) आ ॥ ऋ० ४ । ४७ । १ ऽपि ॥ १ ॥ अथ द्वितीया–

१ २ ३ १ २ ३ १

इन्द्रश्च वायवेषाꣳ सोमानां पीतिमर्हथः ।

३ १र २र ३ २उ ३ २ ३ २

युवाꣳ हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥२॥ (१६२७)

पदपाठः–इन्द्रः १ । च अ० । वायो सं० । एषाम्, सोमानाम् ६ । पीतिम् २ । अर्हथः क्रि० । युवाम् २ । हि अ० । यन्ति क्रि० । इन्दवः १ । निम्नम् २ । आपः १ । न अ० । सध्र्यक् १ ॥

अन्वितपदार्थः–(वायो) पवन ! त्वं (च) तथा (इन्द्रः) विद्युत्, युवाम् (एषां) हूयमानानां (सोमानां) सोमरसानां (पीतिम्) पानम् (अर्हथः) योग्यौ भवथः (इन्दवः) सोमाश्च (युवाम्) इन्द्रवायू प्रति (हि) निश्चयेन (यन्ति) प्राप्नुवन्ति (न) यथा (आपः) जलानि (निम्नम्) नीचैर्देशम् (सध्र्यक्) सह गच्छन्ति तद्वत् ॥ ऋग्वेदे ४ । ४७ । २ ऽपि ॥ २ ॥

भाषार्थः–(वायो) हे वायु ! तू (च) और (इन्द्रः) बिजुली, दोनों (एषाम्) इन (सोमानाम्) सोमरसों के (पीतिम्) पान का (अर्हथः) योग्य हो (इन्दवः) सोम (युवाम्) तुम दोनों को (यन्ति) प्राप्त होते हैं (हि) निश्चय (न) जैसे (निम्नम्) नीचे स्थान को (आपः) जल (सध्र्यक्) साथ जाते हैं ॥ ऋ० ४ । ४७ । २ में भी ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३ १ २ ३ १ २

वायविन्द्रश्च शुष्मिणा सरथꣳ शवसस्पती ।

३ १ २ ३ २ ३ १ २ ३ १ २

नियुत्वन्ता न ऊतय आयातꣳ सोमपीतये ॥३॥ [५](१६२८)

पदपाठः–वायो सं० । इन्द्रः १ । च अ० । शुष्मिणा १ । सरथम् २ । शवसः ६ । पती १ । नियुत्वन्ता १ । नः ६ । ऊतये ४ । आयातम् क्रि० । सोमपीतये ४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(वायो) पवन ! त्वम् (इन्द्रः च), युवाम् (शवसः) बलस्य (पती) पालयितारौ (शुष्मिणा) बलवन्तौ (नियुत्वन्ता) नियुत्वत्संज्ञकाश्ववन्तौ वेगवन्तौ (सरथम्) समानमेव रथं वेगरूपमारुह्येति शेषः । (नः) अस्माकम् (ऊतये) रक्षणाय (सोमपीतये) सोमपानाय (आयातम्) आगच्छतम् ॥ ऋग्वेदे ४ । ४७ । ३ ऽपि ॥ ३ ॥

भावार्थः-(वायो) हे वायु ! तू (च) और (इन्द्रः) इन्द्र=बिजुली दोनों (शवसः) बल के (पती) २ पति (शुष्मिणा) २ बलवान् (नियुत्वन्ता) अपने नियुत्वत् संज्ञक वेगरूप अश्व वाले दोनों (सरथम्) समान= एक ही वेगरूप रथ पर [चढ़ कर] (नः) हमारी (ऊतये) रक्षार्थ (सोमपीतये) सोमपानार्थ (आयातम्) आओ ॥ ऋ० ४ । ४ ७ । ३ में भी ॥३॥

अथ द्वितीयतृचस्य-सूनुर्भो वा ऋषिः । सोमोदेवता । अनुष्टुप्छन्दः ॥

तत्र प्रथमा-

१ २ ३ १र २र ३ १ २ ३ १र २र

अध क्षपा परिष्कृतो वाजाँ अभि प्रगाहसे ।

१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २

यदी विवस्वतो धियो हरिꣳ हिन्वन्ति यातवे ॥१॥(१६२१)

पदपाठः-अध अ० । क्षपा ५ । परिष्कृतः १ । वाजान् २ । अभि-प्र-गाहसे क्रि० । यदि अ० । विवस्वतः ६ । धियः १ । हरिम् २ । हिन्वन्ति क्रि० । यातवे अ० ॥

अन्वितपदार्थः (क्षपा) क्षपायाः (अध) अथ अनन्तरं प्रातः सवने (परिष्कृतः) अभिषुतः सोमः (वाजान्) बलानि (अभि-प्र-गाहसे) पुरुषव्यत्ययः अभिप्रगच्छति. व्याप्नोति (यदि) यदा (विवस्वतः) सूर्यस्य (धियः) कर्माणि प्रेरणादीनि कर्तृभूतानि (हरिं) हरितं सोमं (यातवे)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गमनाय (हिन्वन्ति) प्रेरयन्ति तदेति शेषः ॥ ऋग्वेदे ९ । ९९ । २ ऽपि ॥ १ ॥

भाषार्थः—(अपा) रात्रि के (अध) पश्चात् प्रातःसवन में (परिष्कृतः) अभिषुत सोम (वाजान्) बलों को (अक्षि—प्र—गाहते) व्यापता है (यदि) जब कि (विवस्वतः) सूर्य की (धियः) प्रेरणादि क्रियार्थ (हरिम्) हरे सोम को (यातवे) जाने को (हिन्वन्ति) प्रेरित करती हैं तब ॥ ऋ० ९ । ९९ । २ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ २ ३ १ २ ३ १ २

तमस्य मर्जयामसि मदोय इन्द्रपातमः ।

१२ २२ ३ १ १ ३ २ ३२ ३१ २ ३१२

यं गाव आसाभिर्दधुः पुरा नूनं च सूरयः ॥२॥ (१६३०)

पदपाठः—तम् २ । अस्य ६ । मर्जयामसि क्रि० । मदः, यः, इन्द्रपातमः १ । यम् २ । गावः १ । आसभिः ३ । दधुः क्रि० । पुरा, नूनं, च अ० । सूरयः १ ॥

अन्वितपदार्थः—(अस्य) सोमस्य (तम्) मदं हर्षकरंरसं (मर्जयामसि) शोधयामः (यः),(मदः) हृष्टिकरोरसः (इन्द्रपातमः) इन्द्रेणात्यन्तं पीतो भवति। किञ्च (गावः) सूर्यकिरणाः (नूनं) निश्चयेन (पुरा च) इदानीं पूर्वं च (यं), रसम् (आसभिः) मुखैः (दधुः) धारयन्ति (सूरयः) विद्वांस ऋत्विजश्च ॥ ऋग्वेदे ९ । ९९ । ३ ऽपि ॥ २ ॥

भाषार्थः(अस्य) इस सोम के (तम्) उस रस को (मर्जयामसि) हम शोधते हैं (यः) जो रस (मदः) हृष्टिपुष्टिकारक (इन्द्रपातमः) इन्द्र से अत्यन्त पिया जाता है । और (गावः) सूर्य किरणें (च) और (सूरयः) विद्वान् ऋत्विज् लोग (यम्) जिस रस को (नूनम्) निश्चय (पुरा) पूर्व काल में और अब भी (आसभिः) मुखों से (दधुः) धारते हैं=पीते हैं ॥ ऋ० ९ । ९९ । ३ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

१र २र ३ १ २३ २३क २र
तं गाथया पुराण्या पुनानमभ्यनूषत ।
३१२ ३१२३२ ३ २३ १ २
उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥३॥[६](१६३१)

पदपाठः-तम् २ । गाथया, पुराण्या ३ । पुनानम् २ । अभि अनूषत क्रि० । उतो अ० । कृपन्ति क्रि० । धीतयः १ । देवानाम् ६ । नाम २ । बिभ्रतीः १ ॥

अन्वितपदार्थः-(पुनानं) पूयमानं (तं) सोमरसं (पुराण्या) पुराणी सनातनी तया (गाथया) गाथा रूपया वेदवाचा (अभि-अनूषत) अभितः स्थिता ऋत्विजः स्तुवन्ति प्रशंसन्ति (उतो) तथा (देवानां) वायु सूर्य-पूषाऽर्यमादीनां (नाम) नामानि (बिभ्रतीः) बिभ्रत्योधारयन्त्यः (धीतयः) ऋत्विग्घस्ताङ्गुलयः (कृपन्त) समर्थयन्ति ॥ ऋग्वेदे ९ । ९९ । ४ ऽपि ॥ ३ ॥

भावार्थः-(पुनानम्) शोधेगये हुवे (तम्) उस सोमरस को (पुराण्या) पुराणी सनातनी (गाथया) गीतरूप वेदवाणी से (अभि-अनूषत) चारों ओर बैठे ऋत्विज् स्तुत वा प्रशंसित करते हैं (उतो) और (देवानाम्) वायु. सूर्य, पूषा, अर्यमा आदि देवतों के (नाम) नामों को (बिभ्रतीः) धारती हुई (धीतयः) ऋत्विजों के हाथों की अङ्गुलियें (कृपन्त) समर्थ करती हैं ॥ ऋ० ९ । ९९ । ४ में भी ॥ ३ ॥

अथ तृतीयर्चस्य-शुनःशेपऋषिः । अग्निर्देवता । गायत्रीछन्दः ॥ तत्र प्रथमा-

२ ३ २ ३ २१ ३१ २ १ १र २र
अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
३१२ ३१ २
सम्राजन्तमध्वराणाम् ॥१॥ (१६३२) व्याख्याता (१७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

१ २ ३१२ २२ ३१२ ३१२

स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।

३ २ ३ १ २

मीढ्वाँ अस्माकं बभूयात् ॥ २ ॥ (१६३३)

पदपाठः-सः १ । घ अ० । नः ४ । सूनुः १ । शवसा ३ । पृथुप्रगामा, सुशेवः, मीढ्वान् १ । अस्माकम् ६ । बभूयात् क्रि० ॥

अन्वितपदार्थः-(शवसा) बलेन वेगेन (पृथुप्रगामा) विस्तीर्णप्रकृष्टगतिशीलः, (मीढ्वान्) सेचको वृष्टिकरः, (अस्माकं), (सूनुः) पुत्र इवारण्योरुत्पादितः (सः घ) सएव हुतोऽग्निः (नः) अस्मभ्यं (सुशेवः) सुमुखः (बभूयात्) भवेत् ॥ ऋग्वेदे १ । २७ । २ ऽपि ॥ २ ॥

भाषार्थः-(शवसा) बल वेग से (पृथुप्रगामा) विस्तृत और उत्कृष्ट गति वाला, (मीढ्वान्) वृष्टिकारक (अस्माकं सूनुः) हमारा पुत्र तुल्य अरणियों में उत्पादित (सः घ) वही होम किया हुआ अग्नि (नः) हमारे लिये (सुशेवः) सुमुख (बभूयात्) होवे ॥ ऋ० १ । २७ । २ में भी ॥ २ ॥

अथ तृतीया-

१ २ ३ २ ३ २ ३ १ २२ ३ २

स नो दूराच्चासाच्च नि मर्त्यादघायोः ।

३ २७ ३ २ ३ १ २

पाहि सदमिद्विश्वायुः ॥ ३ ॥ [७] (१६३४)

पदपाठः-सः १ । नः २ । दूरात् ५ । च अ० । आसात् ५ । च । नि अ० । मर्त्यात्, अघायोः ५ । पाहि क्रि० । सदम्, इत् अ० । विश्वायुः १ ॥

अन्वितपदार्थः-(विश्वायुः) सर्वत्रगतिः (सः) अग्निर्हुतः सन् (दूरात्) दूरस्थात् (च), (आसात्) आसन्नात्समीपस्थात् (च), (अघायोः) पापात् वैरिणः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(मर्त्यात्) प्राणिनः सकाशात् (नः) अस्मान् (सद-मित्) सदैव (नि पाहि) नितरां रक्षति ॥ ऋग्वेदे १ । २७ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(विश्वायुः) सर्वत्र गमन वाला (सः) वह होम किया हुवा अग्नि (आसात्) समीपस्थ (च) और (दूरात् च) दूरस्थ भी (अघायोः) पापी दुष्ट शत्रु (मर्त्यात्) मनुष्यादि प्राणी से (नः) हम को (सदम्, इत्) सदैव (नि पाहि) नितरां रक्षा करता है ॥ ऋ० १ । २७ । ३ में भी ॥ ३ ॥

अथ प्रगाथात्मक तृतीयसूक्तस्य-नृमेध ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ १र २र ३ १ २

त्वमिन्द्र प्रतूर्त्तिष्वभि विश्वा असि स्पृधः ।

३ १ २३ १ २३१२३ १ २ ३ २

अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः

॥ १ ॥ (१६३५) व्याख्याता (३११)

अथ द्वितीया-

१ २ ३ १ २ ३१२ ३ २ ३ २

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न

३ १२ १ २ ३ १२ ३ १२

मातरा । विश्वास्ते स्पृधः श्नथयन्त मन्यवे

३ १र २ ३ १२

वृत्रं यदिन्द्र तूर्वसि ॥ २ ॥ [८] (१६३६)

पदपाठः-अनु अ० । ते ६ । शुष्मम्, तुरयन्तम् २ । ईयतुः क्रि० । क्षोणी १ । शिशुम् २ । न अ० । मातरा १ । विश्वाः १ । श्नथयन्त क्रि० । मन्यवे ४ । वृत्रम् २ । यत् अ० । इन्द्र सं० । तूर्वसि क्रि० ॥

अन्वितपदार्थः-(इन्द्र) विद्युद्विशेष! वा वायुविशेष! (क्षोणी) द्यावाभूमी (ते) तव (तुरयन्तं) शीघ्रगामिनं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(शुष्मं) बलम् (अनु-ईयतुः) अनुगच्छतः (न) यथा (मातरा) मातरौ (शिशुं) वत्सं पुत्रमनुगच्छतस्तद्वत् । (यत्) यस्मात् त्वं (वृत्रं) मेघं (तूर्वसि) हंसि तस्मात् (ते) तव (मन्यवे) मन्युं क्रोधं प्रति (विश्वाः) समस्ताः (स्पृधः) सेनाः मेघबलानि (श्रथयन्त) शिथिली भवन्ति ॥ ऋग्वेदे ८ । ९९ । ६ ऽपि ॥ २ ॥

भाषार्थः-(इन्द्र) विद्युत् वा वायु विशेष ! (क्षोणी) द्युलोक और पृथिवी (ते) तेरे (तुरयन्तम्) वेगवान् (शुष्मम्) बल को (अनु-ईयतुः) अनुकूल चलती हैं, (न) जैसे (मातरा) २ माताऐं (शिशुम्) बच्चे का अनुगमन करती हैं । (यत्) जिस कारण (वृत्रम्) मेघ को (तूर्वसि) तू मार गिराता है इस कारण (ते) तेरे (मन्यवे) क्रोध के सामने (विश्वाः) सब (स्पृधः) स्पर्धा करने वाली मेघसेनायें (श्रथयन्त) शिथिल पड़जाती हैं ॥ ऋ० ८ । ९९ । ६ में भी ॥ २ ॥

इति सप्तदशाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे-

प्रथम सूक्तस्य-गोसूक्तिरश्वसूक्तिर्वा ऋषिः । इन्द्रोदेवता । गायत्रीछन्दः ॥

तत्र प्रथमा-

३ १र २र ३ २च ३ १ २
यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्त्तयत् ।
३ १ २ ३ २ ३ २
चक्राण ओपशं दिवि ॥१॥ (१६३७) व्याख्याता (१२१)

अथ द्वितीया-

२ १ २ ३ २ १ १ २ १ २
व्या३न्तरिक्षमतिरन् मदे सोमस्य रोचना ।
२ ३ १ २र ३ २
इन्द्रो यदभिनद्बलम् ॥ २ ॥ (१६३८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–वि अ० । अन्तरिक्षम् २ । अतिरत् क्रि० । मदे ७ । सोमस्य ६ । रोचना २ । इन्द्रः १ । यत् अ० । अभिनत् क्रि० । बलम् २ ॥

अन्वितपदार्थः–(यत्) यदा (इन्द्रः) वृष्टिदेवः (सोमस्य) सोमरसस्य (मदे) हर्षे सति (रोचना) रोचमानम् (अन्तरिक्षम्) आकाशम् (अतिरत्) अवतरति, तदा (बलम्) मेघसैन्यम् (अभिनत्) भिनत्ति ॥ ऋग्वेदे ८ । १४ । ७ अपि ॥ २ ॥

भावार्थः–(यत्) जब कि (इन्द्रः) इन्द्र (सोमस्य) सोमरस के (मदे) हर्ष में (रोचना) प्रकाशमान (अन्तरिक्षम्) आकाश को (वि–अतिरत्) पतरता है, तब (बलम्) मेघसैन्य को (अभिनत्) भिन्न करता है ॥ ऋ० ८ । १४ । ७ में भी ॥ २ ॥

अथ तृतीया–

१र २र ३ १ २ ३ २ ३ १र २र १ २

उद्गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः ।

३ १ २ ३ २

अर्वाञ्चं नुनुदे बलम् ॥३॥ [१] (१६३९)

पदपाठः–उद् अ० । गाः २ । आजत् क्रि० । अङ्गिरोभ्यः ५ । आविष्कृणवन् १ । गुहा ७ । सतीः २ । अर्वाञ्चम् २ । नुनुदे क्रि० । बलम् २ ॥

अन्वितपदार्थः–इन्द्रः इत्यनुवर्त्त्य–इन्द्रः (अङ्गिरोभ्यः) अङ्गाराकारेभ्यः पिण्डेभ्यः सूर्यादिभ्यः (गुहा) गुहायां (सतीः) विद्यमानाः (गाः) गभस्तीः (आविष्कृणवन्) प्रकटयन्सन् (उद्–आजत्) उद्गमयति, तथा (बलम्) मेघसैन्यम् (अर्वाञ्चम्) अधोमुखं (नुनुदे) प्रेरयति ॥ ऋ० ८ । १४ । ८ ऽपि ॥ ३ ॥

भावार्थः–पूर्व से अनुवृत्ति लाकर–इन्द्र (अङ्गिरोभ्यः) अङ्गाराकार सूर्यादि पिण्डों से (गुहा) छिपी (सतीः) हुई (गाः) किरणों को (आविष्कृणवन्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकट करता हुवा (उद्-आजत्) उन्नत करता है और (बलम्) मेघ की सेना को (अर्वाञ्चम्) नीचे (नुनुदे) गिराता है ॥

मध्यस्थान इन्द्रदेव वायु विशेष के सहारे सूर्यादि उत्तम पिण्डों से हम तक प्रकाश और किरणें आती हैं और इन्द्र से ही मेघ वर्षता है ॥ ऋ० ८ । १४ । ८ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-श्रुतकक्षः सुकक्षोवा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ २ ३ १ २ ३ १ २

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।

१ २ ३ १ २

आच्यावयस्यूतये ॥१॥ (१६४०) (व्याख्याता) (१७०)

अथ द्वितीया-

१ १ २ ६ २ ३ १ २ ३ १ २ २ २

युध्मꣳसन्तमनर्वाणꣳ सोमपामनपच्युतम् ।

१ २ ३ १ २

नरमवार्यक्रतुम् ॥ २ ॥ (१६४१)

पदपाठः-युध्मम्, सन्तम्, अनर्वाणम्, सोमपाम्, अनपच्युतम्, नरम्, अवार्यक्रतुम् २ ॥

अन्वितपदार्थः-(युध्मम्) योद्धारं युद्धकुशलं (अनर्वाणम्) अन्यैरप्रतिगतं (सोमपाम्) सोमस्य पातारं (सन्तं) भवन्तं, तस्माच्च (अनपच्युतं) शत्रुभिरजितं (नरं) सैन्यस्य नेतारम् (अवार्यक्रतुम्) अनिवार्यकर्माणम् [इन्द्रमाच्यावयेति पूर्वत्राऽन्वयः] ॥ ऋग्वेदे ८।९२।८ऽपि ॥२॥

भाषार्थः-(युध्मम्) युद्धकुशल, (अनर्वाणम्) जिस के सामने कोई न चढ़े, (सोमपाम्) सोम पीने वाले, (सन्तम्) होते हुवे, अतएव (अनपच्युतम्) शत्रुओं से अजित, (नरम्) सेना के नेता, (अवार्यक्रतुम्) जिस का कर्म रोका न जासके, ऐसे [इन्द्र=राजा का आह्वान करो] इतना पूर्व मन्त्रों से अन्वय है ॥ ऋ० ८ । ९२ । ८ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

१ २ ३२७ ३२३ १ २
शिक्षा ण इन्द्र राय आ पुरुविद्वाँ ऋचीषम।
१२ ३ २३ १२
अवा नः पार्ये धने ॥३॥ [१०] (१६४२)

पदपाठः-शिक्ष क्रि० । नः ४ । इन्द्र सं० । रायः २ । आ अ० । पुरु २ । विद्वान् १ । ऋचीषम सं० । अव क्रि० । नः २ । पार्ये, धने ७ ॥

अन्वितपदार्थः-(ऋचीषम) ऋक्तुल्य ! स्तुत्यनुरूप ! (इन्द्र) राजन् ! (नः) अस्मभ्यम् (रायः) धनानि (आ) आहृत्य (पुरु) बहु यथा स्यात्तथा (शिक्ष) प्रयच्छ ! (पार्ये) परेभ्यआहृते (धने) रत्नादौ (नः) अस्मान् (अव) रक्ष ॥ ऋग्वेदे ८ । ९२ । ९ऽपि ॥ ३ ॥

भाषार्थः-(ऋचीषम) हे ऋचा में वर्णित स्तुति के अनुरूप ! (इन्द्र) राजन् ! (नः) हमारे लिये (रायः) धनों को (आ) लाकर (पुरु) बहुत (शिक्ष) दो तथा (पार्ये) शत्रुओं से लाये (धने) रत्नादि धन में (नः) हमें (अव) रक्षित करो ॥ ऋ० ८ । ९२ । ९ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-गोषूक्तिरश्वसूक्तिर्वा ऋषिः। इन्द्रोदेवता। उष्णिक्छन्दः॥

तत्र प्रथमा-

२३ १ २ ३ २ ३२७ ३ १२३१८ २८
तव त्यदिन्द्रियं बृहत् तव दक्षमुत क्रतुम्।
१२ ३२३ १२
वज्रꣳशिशाति धिषणा वरेण्यम् ॥१॥ (१६४३)

पदपाठः-तव ६ । त्यत् , इन्द्रियम् , बृहत् २ । तव । दक्षम् २ । उत अ० । क्रतुम् , वज्रम् २ । शिशाति क्रि० । धिषणा १ । वरेण्यम् २ ॥

अन्वितपदार्थः-हे इन्द्र ! ईश्वर ! वा राजन् ! वा भौतिकेन्द्र ! (धिषणा) धारणावती मतिः (तव) त्वदीयं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(त्यत्) तत् प्रसिद्धं (बृहत्) महत् (इन्द्रियम्) त्वयेन्द्रेण जुष्टं तवेन्द्रस्य लिङ्गं त्वयेन्द्रेण दत्तमिति वा (दक्षम्) बलं (क्रतुं) कर्म (उत) च, (तव) त्वदीयं (वरेण्यं) श्रेष्ठं (वज्रं) प्रहरणं (शिशाति) तीक्ष्णीकरोति ॥

ईश्वरपक्षे धारणावत्या धिया तत्तदीश्वरशक्तिज्ञानात्तत्तत्तीक्ष्णीकरणं योज्यं, राजपक्षेऽपि तथा । भौतिकपक्षे भौतिकधीतत्त्वेन तत्तद्गुणप्राशस्त्यात्सर्वं सुवचम् ॥ ऋग्वेदे ८ । १५ । ७ ऽपि ॥ १ ॥

भाषार्थः—हे इन्द्र ! ईश्वर ! वा राजन् ! वा भौतिकेन्द्र देव ! (तव) तेरा (त्यत्) वह प्रसिद्ध (बृहत्) भारी (इन्द्रियम्) तुझ ईश्वर से सेवित, वा तुझ राजा के चिन्ह, वा तुझ इन्द्रदेव के दिये (दक्षम्) बल (उत) और (क्रतुम्) कर्म वा पुरुषार्थ को और (तव) तेरे (वरेण्यम्) उत्तम (वज्रम्) प्रहरणसाधन शस्त्रास्त्रादि को (धिषणा) धारणावती बुद्धि (शिशाति) पैनाती है ॥

ईश्वर पक्ष और राजा पक्ष में उस ईश्वरीय वा राजकीय शक्ति के बुद्धिपूर्वक ज्ञान से पैनाना संगत है और भौतिक पक्ष में बुद्धितत्त्व से बल पौरुष आदि की विवक्षा ठीक है ॥ ऋ० ८ । १५ । ७ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ १२

तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः ।

२उ ३ १२

त्वामापः पर्वतासश्च हिन्विरे ॥ २ ॥ (१६४४)

पदपाठः—तव ६ । द्यौः १ । इन्द्र सं० । पौंस्यम् २ । पृथिवी १ । वर्धति क्रि० । श्रवः २ । त्वाम् २ । आपः, पर्वतासः १ । च अ० । हिन्विरे क्रि० ॥

अन्वितपदार्थः—(इन्द्र) हे राजन् ! , वा ईश्वर ! वा भौतिकेन्द्रदेव ! (तव) त्वदीयं (पौंस्यं) पुरुषार्थं (श्रवः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यशश्च (द्यौः) द्युलोकः (पृथिवी) भूमिलोकश्च (वर्धति) वर्धयति (त्वाम्) इन्द्रम् (आपः) नदीसमुद्रादिस्थाः (पर्वतासः) पर्वताः (च) (हिन्विरे) प्रीणयन्ति स्वामित्वेन प्राप्नुवन्ति ॥ ऋग्वेदे ८ । १५ । ८ ऽपि ॥ २ ॥

भाषार्थः-हे (इन्द्र) राजन् ! वा ईश्वर ! वा भौतिकेन्द्रदेव ! (तव) तेरे (पौंस्यम्) पुरुषार्थ और (अवः) यश को (द्यौः) द्युलोक और (पृथिवी) पृथिवी लोक (वर्धति) बढ़ाता है (त्वाम्) तुझ को (आपः) नदी समुद्रादि के जल (च) और (पर्वतासः) पर्वत (हिन्विरे) प्रसन्न करते हैं=स्वामिभाव से प्राप्त होते हैं ॥ ऋ० ८ । १५ । ८ में भी ॥ २ ॥

अथ तृतीया-

१र २र ३ १र २र ३ १ २ ३ १ २
त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
१र २र ३ २ ३ १ २
त्वां शर्धो मदत्यनु मारुतम् ॥३॥ [११] (१६४५)

पदपाठः-त्वाम् २ । विष्णुः, बृहन्, क्षयः, मित्रः १ । गृणाति क्रि० । वरुणः १ । त्वाम् । शर्धः १ । मदति क्रि० । अनु अ० । मारुतम् १ ॥

अन्वितपदार्थः-हे इन्द्रेत्यनुवर्त्य-(विष्णुः) एतन्नामको वायुविशेषो देवः, (मित्रः) एतन्नामकः, (वरुणः) वरुणसंज्ञकश्च वायुः (बृहन्) महान् (क्षयः) प्राणिनां निवासहेतुश्च (त्वाम्) इन्द्रं (गृणाति) प्रशंसति (मारुतं) मरुतामिदं (शर्धः) बलं (त्वाम्) त्वामेव (अनुमदति) अनुमादयति ॥ ऋग्वेदे ८ । १५ । ९ ऽपि ॥३॥

भाषार्थः-पूर्व मन्त्र से अनुवृत्ति लाकर-हे इन्द्र ! (विष्णुः, मित्रः, वरुणः) विष्णुनामक, मित्रसंज्ञक और वरुणाख्य देव जो वायुभेद है (बृहत्) महान् (क्षयः) प्राणियों के निवास का हेतु (त्वाम्) तुझ इन्द्र की (गृणाति)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रशंसा करता है (मारुतम्) मरुद्गणों का (शर्धः) बल भी (त्वाम्) तेरे (अनु) पीछे (मदति) हृष्टि करता है ॥ ऋ० ८ । १५ । ९ में भी ॥३॥

इति सप्तदशाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ

चतुर्थे खण्डे प्रथम तृचस्य-विरूपऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।

१ २ ३ १ २

अमैरमित्रमर्दय ॥१॥ (१६४६) व्याख्याता (११)

अथ द्वितीया-

३ २ ३ ३ १ २ ३ १ २ ३ १ २ ३ २

कुवित्सु नो गविष्टयेऽग्ने संवेषिषोरयिम् ।

१ २ ३ १ २

उरुकृदुरु णस्कृधि ॥ २ ॥ (१६४७)

पदपाठः-कुवित्, सु अ० । नः ४ । गविष्टये ४ । अग्ने सं० । संवेषिषः क्रि० । रयिम् २ । उरुकृत् १ । उरु २ । नः ४ । कृधि क्रि० ॥

अन्वितपदार्थः-(अग्ने) हे अग्ने ! (नः) अस्मभ्यं (गविष्टये) गवामेषणाय (कुवित्) बहु (रयिं) धनं (सु-सं-वेषिषः) सुसंप्रापयसि (उरुकृत्) बहुकृत् त्वं (नः) अस्मभ्यम् (उरु) बहु (कृधि) कुरु ॥ यजुर्वेदे ५ । ४१ ऽपि ऋग्वेदे ८ । ७५ । ११ ऽपि ॥ २ ॥

भाषार्थः-(अग्ने) हे अग्ने ! (नः) हमारे लिये (गविष्टये) गौवें ढूंढने को (कुवित्) बहुत (रयिम्) धन को (सु-सं-वेषिषः) भले प्रकार परोक्ष से पहुंचाते हो सो तुम (उरुकृत्) बाहुल्य करने वाले (नः) हमारे लिये भी (उरु) बाहुल्य (कृधि) करो ॥ यजुः ५ । ४१ तथा ऋ० ८ । ७५ । ११ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया-

१ २ ३१२ २२ ३१२
मा नो अग्ने महाधने परावर्भारिभृद्यथा।
३ २३ २ ३१२
सं वर्गꣳ स ꣳ रयिं जय ॥ ३ ॥[१२](१६४८)

पदपाठः-मा अ० । नः २ । महाधने ७ । परावर्क् क्रि० । भारभृत १ । यथा अ० । सम् अ० । वर्गम् २ । सम् । रयिम् २ । जय क्रि० ॥

अन्वितपदार्थः-(अग्ने) अग्ने ! (नः) अस्मान् (महाधने) संग्रामे (मा) न (परावर्क्) परित्यज (यथा) येन प्रकारेण (भारभृत्) भारवाट् मध्ये भारं न परित्यजति, तद्वत् (वर्गम्) शत्रुसमूहं (सं-जय) सम्यक् जित्वा प्रापय (रयिं) धनं च (सं) जित्वा प्रापय ॥ ऋग्वेदे ८ । ७५ । १२ ऽपि ॥ ३ ॥

भाषार्थः-(अग्ने) हे अग्ने ! (नः) हम को (महाधने) संग्राम के बीच में (मा) मत (परावर्क्) छोड़ें (यथा) जैसे (भारभृत्) भार ले चलने वाला भार को निर्दिष्ट स्थान से बीच में ही नहीं छोड़ देता तद्वत् । (वर्गम्) शत्रुसमूह को (सं-जय) भले प्रकार जीत और (रयिम्) धन को (सम्) भले प्रकार जीत ॥ ऋ० ८ । ७५ । १२ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-वत्सऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥ तत्र प्रथमा-

१२ ३ २३ २ ३ १ २ ३१२
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
३ १२३ १ २
समुद्रायेव सिन्धवः ॥१॥ (१६४९) व्याख्याता (१३७)

अथ द्वितीया-

१ २ ३२ ३ १२३ १ २ ३ १ २
वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना ।
१२ ३१२
वज्रेण शतपर्वणा ॥२॥ (१६५०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–वि, चित् अ० । वृत्रस्य, दोधतः ६ । शिरः २ । बिभेद क्रि० । वृष्णिना, वज्रेण, शतपर्वणा ३ ॥

अन्वितपदार्थः–प्रकरणात् इन्द्रः विद्युद्देवः (दोधतः) गर्जनेन जगत् कम्पयतः (वृत्रस्य) आच्छादकस्य मेघस्य (शिरः) उच्चभागं (वृष्णिना) वृष्टिकरेण (शतपर्वणः) असंख्यधारेण (वज्रेण) प्रहरणेन (वि-चित्-बिभेद) विविधमपि भिनत्ति ॥ ऋग्वेदे ८ । ६ । ६ ऽपि ॥ २ ॥

भाषार्थः–प्रकरण से इन्द्र=विद्युत् रूप वृष्टिदेव (दोधतः) गर्जने से जगत् को कम्पाने वाले (वृत्रस्य) मेघमण्डल के (शिरः) उच्चभागरूप शिर को (वृष्णिना) वृष्टिकारक (शतपर्वणा) बहुत धार वाले (वज्रेण) प्रहार से (वि-चित्-बिभेद) अनेक प्रकार भी छिन्न भिन्न करता है ॥ ऋ० ८ । ६ । ६ में भी ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३ २ ३ ३ १ २

ओजस्तदस्य तित्विष उभे यत्समवर्त्तयत् ।

२ १ १ २ ३ १ २

इन्द्रश्चर्मेव रोदसी ॥ ३ ॥ [१३] (१६५१)

पदपाठः–ओजः, तत् १ । अस्य ६ । तित्विषे क्रि० । उभे २ । यत् अ० । समवर्त्तयत् क्रि० । इन्द्रः १ । चर्म २ । इव अ० । रोदसी २ ॥

अन्वितपदार्थः–(इन्द्रः) देवविशेषः (यत्) येन ओजसा (उभे रोदसी) द्यावाभूमी (चर्म इव) चर्मवत् (समवर्त्तयत्) संमर्दयति (तत्), (अस्य) इन्द्रस्य (ओजः) बलं (तित्विषे) दिदीपे ॥ ऋग्वेदे ८ । ६ । ५ ऽपि ॥३॥

भाषार्थः–(इन्द्रः) इन्द्रदेव (यत्) जिस बल से (उभे) दोनों लोक (रोदसी) द्यौ और पृथिवी को (समवर्त्तयत्) मसलता है, (चर्मइव) जैसे चमड़े को मसलते हैं, (तत्) वह (अस्य) इस इन्द्र का (ओजः) बल (तित्विषे) चमक रहा है ॥ ऋ० ८ । ६ । ५ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीय तृचस्य-शुनः शेपऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

तत्र प्रथमा-

३ २ ३ २ ३ १ २ ३ १ २

सुमन्मा वस्वी रन्ती सूनरी ॥१॥ (१६५२)

पदपाठः-सुमन्मा, वस्वी, रन्ती, सूनरी १ ॥

अन्वितपदार्थः-(सुमन्मा) शोभनज्ञानवती (वस्वी) धनवती (रन्ती) रमणीया (सूनरी) सूनृता वाक्प्रवृत्तेति शेषः ॥ एकपदा गायत्रीयम् ॥ १ ॥

भाषार्थः-(सुमन्मा) सुन्दर ज्ञानवती (वस्वी) धनवती (रन्ती) रमणीय (सूनरी) सूनृता सच्ची वाणी प्रवृत्त हुई यह अध्याहार शेष है ॥ यह एकपदा गायत्री छन्द है ॥ १ ॥

अथ द्वितीया-

१ २ ३ १ २ ३ २ ३ १ २ २ २ ३ २

सरूप वृषन्नागहीमौ भद्रौ धुर्यावभि ।

२ ३ १ २ २ २

ताविमाउपसर्पतः ॥२॥ (१६५३)

पदपाठः-सरूप, वृषन् सं० । आगहि क्रि० । इमौ, भद्रौ, धुर्यौ २ । अभि अ० । तौ, इमौ १ । उपसर्पतः क्रि० ॥

अन्वितपदार्थः-(सरूप) तत्तद्वस्तुषु समानरूपेण वर्त्तमान ! (वृषन्) वृष्टिकर्त्तरिन्द्र ! (इमौ) निर्दिश्यमानौ (भद्रौ) सुखदौ (धुर्यौ) धुरि साधू अश्वाविव समीचीन-तिरश्चीनभेदभिन्नौ किरणौ (अभि) व्याप्य (आगहि) प्राप्नुहि (तौ इमौ) किरणौ (उपसर्पतः) समीपं ते प्राप्नुतः॥

समीचीनतिरश्चीनभेदभिन्नौ किरणौ सूर्येण सङ्गतौ वर्त्तेते, ताभ्यामिन्द्रः सूर्योऽस्मान्प्राप्नोतु इति भावः ॥ २ ॥

भाषार्थः-(सरूप) हे प्रत्येक वस्तु में समानरूप से वर्त्तमान ! (वृषन्) वर्षाकारक ! सूर्य ! (इमौ) इन (भद्रौ) सुखदायक (धुर्यौ) धुरे में जुड़ने

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योग्य घोड़ों के समान सीधी और तिरछी किरणों को (अभि) व्यापकर, (आगहि) प्राप्त हो (तौ) वे (इमौ) ये दोनों प्रकार की किरणें (उप सर्पतः) पास जाती हैं ॥

सीधी तिरछी के भेद से दो प्रकार की किरणें सूर्य से सङ्गत हैं, उन दोनों से सूर्य की धूप हमें प्राप्त होती रहे, यह भाव है ॥ २ ॥

अथ तृतीया—

१ २र ३ १ २ ३ २ ३ १ २

नीव शीर्षाणि मृदूवं मध्ये आपस्य तिष्ठति ।

१ २ ३ १ २ ३ २

शृङ्गेभिर्दशभिर्दिशन् ॥३॥ [१४] ((१६५४)

इति अष्टमप्रपाठकस्य-पथमाऽर्धः ॥

पदपाठः—नि, इव अ० । शीर्षाणि २ । मृदूवम् क्रि० । मध्ये ७ । आपस्य ६ । तिष्ठति क्रि० । शृङ्गेभिः, दशभिः ३ । दिशन् १ ॥

अन्वितपदार्थः—हे मनुष्याः ! (दशभिः) दशसंख्याकैः (शृङ्गेभिः) अङ्गुल्यग्रैः (इव), (दिशन्) निर्दिशन् सूर्य इन्द्रः (आपस्य) अम्मयस्यान्तरिक्षस्य (मध्ये तिष्ठति), (शीर्षाणि) शीर्षाच्छादनानि छत्राणि (नि मृदूवम्) निर्मिमीध्वम् ॥ ३ ॥

भाषार्थः—हे मनुष्यो ! (दशभिः) दश (शृङ्गेभिः) अङ्गुलियों से (दिशन्) बताता हुवा (इव) सा, सूर्य इन्द्र (आपस्य) जल भरे आकाश के (मध्ये) बीच में (तिष्ठति) स्थित है, सो तुम (शीर्षाणि) शिर ढकने के छत्रों को (निमृदूवम्) रचलो ॥ ३ ॥

इति सप्तदशाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

इति

श्रीमत्कण्ववंशाऽवतंस पण्डित श्रीहज़ारीलाल स्वामिसूनुना,
हस्तिनापुर पार्श्ववर्त्ति परीक्षितगढ़ निवासिना,
तुलसीरामस्वामिना कृते सामवेदभाष्य उत्तरार्चिके
सप्तदशोऽध्यायः ॥ १७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथाऽष्टादशोऽध्यायः

तत्र प्रथमे खण्डे

प्रथमर्चस्य-मेधातिथिरांङ्गिरस ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २

पन्यं पन्यमित्स्तोतार आधावत मद्याय ।

१ २ ३ २ ३ १ २

सोमं वीराय शूराय ॥ १ ॥ (१६५५)

व्याख्याता (१२३)

अथ द्वितीया-

१ २र ३ १र २ ३ १ २ ३ १ २

एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् ।

१ २ ३ १र २र

इन्द्रं गीर्भिर्गिर्वणसम् ॥२॥ [१] (१६५६)

पदपाठः—आ, इह अ० । हरी, ब्रह्मयुजा, शग्मा १ । वक्षतः क्रि० । सखायम्, इन्द्रम् २ । गीर्भिः ३ । गिर्वणसम् २ ॥

अन्वितपदार्थः-(ब्रह्मयुजा) ब्रह्मणा परमेश्वरेण योजितौ (शग्मा) सुखकरौ (हरी) हरणशीलौ किरणाश्वौ (गिर्वणसम्) गिरां संभक्तारम् (सखायम्) हितैषिणम् (इन्द्रम्) देवराजम् (गीर्भिः) वेदमन्त्रैः सह (इह) यज्ञे (आ-वक्षत) आवहताम् ॥ ऋग्वेदे ८ । २ । २७ ऽपि ॥२॥

भाषार्थः-(ब्रह्मयुजा) परमेश्वर के जोते हुवे (शग्मा) सुखदायक (हरी) दो घोड़ों के समान दो प्रकार के सूर्यकिरण (गिर्वणसम्) वेदमन्त्रप्रतिपादनानुकूलवर्त्ती (सखायम्) हितकारी (इन्द्रम्) देवराज इन्द्र को (गीर्भिः) वेदमन्त्रों से (इह) यहां यज्ञ में (आ-वक्षत) बुलावें ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सूर्य की सीधी तिरछी दो प्रकार की किरणें जो सूर्य के घोड़े हैं सूर्य को हमारे किये यज्ञ तक पहुंचाती हैं जो कि वेदमन्त्रों में वैसा वर्णन है, अतः उन मन्त्रों को यज्ञ में उस समय पढ़ा जाता है और इन्द्र=सूर्य उन वेदवाणियों का संविभागपूर्वक सेवक=अनुकूलवर्त्ती है। ऋ० ८। २। २७ में भी ॥ २ ॥

अथ द्वितीया—

१ २ ३ २ ३ १र २र ३ २र ३ २

पाता वृत्रहा सुतमा घागमन्नारे अस्मत्।

१ २ ३ १ २

नियमते शतमूतिः ॥ ३ ॥ (१६५७)

पदपाठः—पाता, वृत्रहा १। सुतम् २। आ, घ अ०। अगमत् क्रि०। न अ०। आरे अ०। अस्मत् ५। नियमते क्रि०। शतमूतिः १॥

अन्वितपदार्थः—(सुतम्) अभिषुतम् सोमम् (पाता) पानशीलः (वृत्रहा) मेघस्य हन्ता (शतमूतिः) असंख्य रक्षणः इन्द्रः (अस्मत्) अस्मत्तः (आरे) दूरे (घ) एव (न) न (आ—गमत्) आगच्छेत् (नियमते) नियच्छेत् च ॥

शतम् असंख्याताः ऊतयो रक्षाः यस्य सोयं "शतमूतिः" अलुक् समासः ॥ ऋग्वेदे ८। २। २६ ऽपि ॥ ३ ॥

भाषार्थः—(सुतम्) अभिषुत सोम को (पाता) पीने वाला (वृत्रहा) मेघ का मारने गिराने वाला (शतमूतिः) असंख्य प्रकार रक्षा वाला इन्द्र (अस्मत्) हम से (आरे) दूर (घ) ही (न) न (आ गमत्) आवे किन्तु समीप आवे (नियमते) और नियम में रक्खे ॥ ऋ० ८। २। २६ में भी ॥३॥

अथ द्वितीय तृचस्य—सुकक्षः श्रुतकक्षोवर्षिः। इन्द्रो देवता। गायत्री छन्दः॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२३ ३ १ २

न त्वामिन्द्राऽतिरिच्यते ॥ १ ॥ (१६५८)

व्याख्याता (११७)

अथ द्वितीया–

३ १ २ ३ १ २ ३१र २र

विव्यक्थ महिना वृषन् भक्षꣳ सोमस्य जागृवे ।

१ २ ३१२

य इन्द्र जठरेषु ते ॥ २ ॥ (१६५९)

पदपाठः–विव्यक्थ क्रि० । महिना ३ । वृषन् सं० । भक्षम् २ । सोमस्य ६ । जागृवे सं० । यः १ । इन्द्र सं० । जठरेषु ७ । ते ६ ॥

अन्वितपदार्थः–(वृषन्) वर्षाकृत् ! (जागृवे) तैजसत्वाज्जागरूक ! (इन्द्र) हे विद्युद्विशेष ! देव ! (महिना) महत्त्वेन (सोमस्य) ओषधिराजस्य (भक्षम्) भोजनं (विव्यक्थ) सर्वतो व्याप्नुवानसि (यः) सोमः (ते) तव (जठरेषु) उदरेषु वर्त्तते इति शेषः ॥ ऋग्वेदे ८ । ९२ । २३ ऽपि ॥ २ ॥

भाषार्थः–(वृषन्) हे वृष्टिकर ! (जागृवे) जागरूक ! (इन्द्र) इन्द्र ! तू (महिना) बड़प्पन से (सोमस्य) सोम के (भक्षम्) भोजन को (विव्यक्थ) सर्वतः व्याप कर वर्त्तमान है (यः) जो सोम (ते) तेरे (जठरेषु) उदरों में है ॥ ऋ० ८ । ९२ । २३ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ १ १ २ ३१ २

अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।

२ ३ १ २ ३ १ २

अरं धामस्य इन्दवः ॥३॥ [२] (१६६०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—अरम् अ० । ते ६ । इन्द्र सं० । कुक्षये ४ । सोमः १ । भवतु क्रि० । वृत्रहन् सं० । अरम् । धामभ्यः ४ । इन्दवः १ ॥

अन्वितपदार्थः—(इन्द्र) हे इन्द्र ! (ते) तव (कुक्षये) उदराय (सोमः) ओषधिराजः (अरम्) अलं (भवतु) अस्तु (वृत्रहन्) हे मेघहन्तः ! (इन्दवः) सोमाः (धामभ्यः) त्रिभ्योलोकेभ्यः (अरं) पर्याप्ताः भवन्तु ॥ ऋग्वेदे ८ । ९२ । २४ । ऽपि ॥ ३ ॥

भाषार्थः—(इन्द्र) हे इन्द्र ! (ते) तेरी (कुक्षये) कुक्षिवा पेट के लिये (सोमः) सोमरस (अरम्) पर्याप्त (भवतु) हो, (वृत्रहन्) हे मेघनाशक ! (इन्दवः) सोम (धामभ्यः) तीनों लोकों के लिये (अरम्) पर्याप्त हों ॥ ऋ० ८ । ९२ । २४ में भी ॥ ३ ॥

अथ तृतीयतृचस्य—शुनःशेपऋषिः । अग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ १ २ १ २

जराबोध तद्विविड्ढि विशे विशे यज्ञियाय ।

१ २ ३ १ २ ३ २

स्तोमꣳरुद्राय दृशीकम् ॥ १ ॥ (१६६१) व्याख्याता (१५)

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ १ २ ३ २

स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।

३ १ २ २

धिये वाजाय हिन्वतु ॥ २ ॥ (१६६२)

पदपाठः—सः १ । नः २ । महान्, अनिमानः, धूमकेतुः, पुरुश्चन्द्रः १ । धिये, वाजाय ४ । हिन्वतु क्रि० ॥

अन्वितपदार्थः—(महान्) गुणाधिकः (अनिमानः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निमानवर्जितः अतुलः (धूमकेतुः) धूमप्रज्ञानः (पुरुश्चन्द्रः) बहुआह्लादकरः (सः) अग्निः (धिये) बुद्धिवृद्धौ (वाजाय) बलाय च (नः) अस्मान् (हिन्वतु) प्रेरयेत् ॥

पुरुश्चन्द्रइत्यत्र-ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ६ । १ । १५१ इति सुट् ॥ ऋग्वेदे १ । २७ । ११ ऽपि ॥ २ ॥

भाषार्थः-(महान्) गुणों में बड़ा (अनिमानः) जो तोला नहीं जा सक्ता (धूमकेतुः) धुवां जिस की ध्वजा है (पुरुश्चन्द्रः) बहुत आह्लादकारक (सः) वह अग्नि (धिये) बुद्धि और (वाजाय) बल के लिये (नः) हम को (हिन्वतु) उभारे=प्रेरित करे ॥ ऋ० १ । २७ । ११ में भी ॥ २ ॥

अथ तृतीया—

२ ३१ २ ३ १ ३ १ २ ३ १ २
स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः ।
३ २ ३ २ ३ १ २
उक्थैरग्निर्बृहद्भानुः ॥ ३ ॥ [३] (१६६३)

पदपाठः-सः १ । रेवान् १ । इव अ० । विश्पतिः, दैव्यः, केतुः १ । शृणोतु क्रि० । नः ६ । उक्थैः ३=२ । अग्निः, बृहद्भानुः १ ॥

अन्वितपदार्थः-(रेवान्) रैवान् धनी (इव), (विश्पतिः) प्रजापालकः (दैव्यः केतुः) देवानामयं दूतोज्ञापकः (बृहद्भानुः) बृहद्रश्मिः (सः) प्रसिद्धः (अग्निः) पावकः (नः) अस्माकम् (उक्थैः) उक्थानि (शृणोतु) स्वीकरोतु ॥

जड़ेऽप्यग्नौ वैदिकस्तोत्रानुकूलवृत्तित्वं श्रवणं बोध्यम् ॥ ऋग्वेदे १ । २७ । १२ ऽपि ॥ ३ ॥

भाषार्थः-(रेवान्) धनवान् (इव) सा (विश्पतिः) प्रजापालक (दैव्यः केतुः) देवतों का ध्वजा या दूत के समान ज्ञापक (बृहद्भानुः) बड़ी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारी तेज किरणों वाला (सः) वह (अग्निः) अग्नि (नः) हमारे (उक्थैः) स्तोत्रों को (शृणोतु) सुने=स्वीकारे ॥

यद्यपि जड़ अग्नि में श्रवण नहीं हो सक्ता, परन्तु वैदिक गुणवर्णन (स्तुति) के समान अग्नि की अनुकूलता होना ही श्रवण समझना चाहिये ॥ ऋ० १ । २७ । १२ में भी ॥ ३ ॥

अथ चतुर्थं तृचस्य-शंयुर्ऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१ २ ३ १र २र ३ २ ३ १ २
तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
२उ ३ २ ३ १ २
शं यद् गवे न शाकिने ॥ १ ॥ (१६६४) व्याख्याता (११५)

अथ द्वितीया-

२ ३ २ ३ १ २ ३ १र २र ३ १ २
न घा वसुर्नियमते दानं वाजस्य गोमतः ।
२ ३ २ ३ २ ३ १ २
यत्सीमुपश्रवद्गिरः ॥ २ ॥ (१६६५)

पदपाठः-न, घ अ० । वसुः १ । नियमते क्रि० । दानम् २ । वाजस्य, गोमतः ६ । यत् , सीम् अ० । उपश्रवत् क्रि० । गिरः २ ॥

अन्वितपदार्थः-(वसुः) अष्टसु वसुष्वन्यतमः सूर्यइन्द्रः (गोमतः, वाजस्य) इन्द्रियोद्बोधनशक्तिमतो बलस्य (दानम्) प्रदानं (न घ) नैव (नियमते) नियच्छति उपरतं करोति (यत् सीम्) यदैव (गिरः) वेदमन्त्रोक्ताः स्तुतीः (उप श्रवत्) अङ्गीकुर्यात् तदा ॥

यदा इन्द्रः सूर्योऽस्मत्प्रार्थितानुकूलवर्त्ती स्यात् तदा सर्वेन्द्रियक्षमताशक्तिप्रदानं न संकुचितं करोति ॥ ऋग्वेदे ६ । ४५ । २३ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(वसुः) ८ वसुओं में एक इन्द्र=सूर्य (गोमतः) इन्द्रियों को जगाने की शक्ति वाले (वाजस्य) बल के (दानम्) दान को (न घ) नहीं (नियमते) रोकता (यत् सीम्) जब कि (गिरः) वेदमन्त्रोक्त स्तुतियों को (उपश्रवत्) स्वीकार करे ॥

जब कि सूर्य हमारी चाही बातों के अनुकूलवर्ती हो तो वह सब इन्द्रियों की शक्ति रूप बल प्रदान में कमी नहीं करता ॥ ऋ० ६ । ४५ । २३ में भी ॥२॥

अथ तृतीया-

३ १ २ ३ २उ ३१र २र ३ १र २र

कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहाऽगमत् ।

१ २ ३ १२

शचीभिरप नो वरत् ॥३॥ [४] (१६६६)

पदपाठः-कुवित्सस्य ६ । प्र, हि अ० । व्रजम्, गोमन्तम् २ । दस्युहा १ । अगमत् क्रि० । शचीभिः ३ । अप अ० । नः ६ । वरत् क्रि० ॥

अन्वितपदार्थः-(नः) अस्माकं (कुवित्सस्य) बहुशोहिंसकस्य (गोमन्तं व्रजं) बहुगोयुक्तं गोष्ठम् (हि) निश्चयेन (दस्युहा) शत्रुहा इन्द्रः (प्राऽगमत्) प्रकर्षेण गच्छेत् तथा (शचीभिः) इन्द्राणीभिः प्रज्ञाभिः (अप वरत्) निरोधं कुर्यात् ॥

ये पौराणिकाः खलु इन्द्राणां चतुर्दशानामेकामिन्द्राणीं शचीं मन्यन्ते तेऽत्र, शचीभिरिति एकस्यैवेन्द्रस्य बह्वीः शचीर्बहुवचनप्रयोगयुक्तेन मन्त्रेण सूचयता वेदेन प्रत्युक्ता बोध्याः ॥ ऋग्वेदे ६ । ४५ । २४ ऽपि ॥ ३ ॥

भाषार्थः-(कुवित्सस्य) बहुत हिंसा करने वाले अयाज्ञिक पुरुष के (गोमन्तम्) गौवों भरे (व्रजम्) खरक को (दस्युहा) दुष्टशत्रुविनाशक इन्द्र (हि) निश्चय (प्राऽगमत्) प्रकर्ष से जावे और (शचीभिः) प्रज्ञा वा बुद्धियों को (अप वरत्) रोक देवे ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जो पौराणिक मानते हैं कि १४ इन्द्र के समय तक एक इन्द्राणी रहती है, उन को इस मन्त्र के शचीभिः इस बहुवचन से विरोध आता है ॥ ऋ० ६ । ४५ । २४ में भी ॥ ३ ॥

इत्यष्टादशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे

षड्ऋचस्य प्रथम सूक्तस्य-मेधातिथिः काण्वऋषिः । विष्णुर्देवता । गायत्रीछन्दः॥

तत्र प्रथमा-

३ २उ ३ २ ३ १र २र ३ २

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।

१ २ ३ २

समूढमस्य पाꣳसुले ॥१॥ (१६६७) व्याख्याता (२२२)

अथ द्वितीया-

१ २ ३ १र २र ३ १ २ ३ १र २र

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।

२ ३ १ २ ३ १ २

अतो धर्माणि धारयन् ॥२॥ (१६६८)

पदपाठः-त्रीणि, पदा २ । विचक्रमे क्रि० । विष्णुः, गोपाः, अदाभ्यः १। अतः अ० । धर्माणि २ । धारयन् १ ॥

अन्वितपदार्थः-(अदाभ्यः) केनापि अहिंस्यः (गोपाः) गवां लोकलोकान्तराणां रक्षकः, "सर्वस्य जगतो रक्षकः" इति सायणाचार्यः (विष्णुः) व्यापकः परमेश्वरः (त्रीणि) लोकत्रये त्रीणि (पदा) पदानि व्याप्तिस्थानानि (विचक्रमे) विक्रान्तवानस्ति (अतः) अस्मात्कारणादेव (धर्माणि) अग्निहोत्रादिकानि (धारयन्) वेदोपदेशेन पोषयन्नास्ते इति शेषः ॥ ऋग्वेदे १।२२ । १८ऽपि, यजुषि ३४ । ४३ च ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(अदाभ्यः) जो किसी से मारा नहीं जा सकता, (गोपाः) जो सब लोक लोकान्तरों का रक्षक है, उस (विष्णुः) व्यापक ईश्वर ने (त्रीणि) तीन (पदा) स्थानों=तीनों लोकों को (विचक्रमे) विक्रान्त किया हुवा है (अतः) इस कारण (धर्माणि) अग्निहोत्रादि धर्मकर्मों को वेद द्वारा (धारयन्) पोषण करा रहा है ॥ ऋ० १ । २२ । १८ में तथा यजुः ३४ । ४३ में भी ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ १ २ ३ १ २ ३ २
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
१ २ ३ २ ३ १ २
इन्द्रस्य युज्यः सखा ॥ ३ ॥ (१६६९)

पदपाठः—विष्णोः ६ । कर्माणि २ । पश्यत क्रि० । यतः अ० । व्रतानि २ । पस्पशे क्रि० । इन्द्रस्य ६ । युज्यः, सखा १ ॥

अन्वितपदार्थः—हे मनुष्याः ! (विष्णोः) व्यापकस्याऽदृश्यस्याऽपि (कर्माणि, पश्यत) , (यतः) यैः कर्मभिः (व्रतानि) धर्म्यकर्माणि (पस्पशे) यजमानोधर्मात्माऽनुतिष्ठति । तादृशो विष्णुः (इन्द्रस्य) जीवात्मनः (युज्यः) योग्यः (सखा) सुहृद् अस्तीति शेषः ॥ ऋग्वेदे १ । २२ । १९ ऽपि तथा यजुषि ६—४ च ॥ ३ ॥

भाषार्थः—हे मनुष्यो ! (विष्णोः) व्यापक अदृश्य भी परमेश्वर के (कर्माणि) कर्मों को (पश्यत) देखो (यतः) जिन कर्मों की सहायता से (व्रतानि) मनुष्य धर्मकर्मों को (पस्पशे) अनुष्ठान की रीति से करता है वह विष्णु (इन्द्रस्य) जीवात्मा का (युज्यः) योग्य (सखा) हितकारी मित्र है ॥ ऋ० १ । २२ । १९ में और यजुः ६—४ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी—

१२ २२ ३२३१२ ३२ ३ १२
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
३२३ २३१२
दिवीव चक्षुराततम् ॥ ४ ॥ (१६७०)

पदपाठः—तत् २ । विष्णोः ६ । परमम् , पदम् २ । सदा अ० । पश्यन्ति क्रि० । सूरयः १ । दिवि ७ । इव अ० । चक्षुः, आततम् १ ॥

अन्वितपदार्थः—(सूरयः) विद्वांसः (विष्णोः) व्यापकस्याऽदृश्यस्याऽपि (तत्) प्रसिद्धं (परमम्) सूक्ष्मादपि सूक्ष्मतमं (पदम्) स्वरूपं (सदा) सर्वदा (पश्यन्ति) ज्ञानदृशोगोचरीकुर्वन्ति। तत्र दृष्टान्तः—(इव) यथा (दिवि) आकाशे (आततं) प्रसृतम् (चक्षुः) नेत्रं [कर्तृ] पश्यति तद्वत् ॥

यथा मनुष्याणां चक्षुरिन्द्रियं पश्यति दृश्यम् , तथा सूरयो ज्ञानिनो ज्ञानचक्षुषा सदेश्वरं पश्यन्ति। अत्र दृष्टान्त एव स्पष्टयति विष्णोः पदस्याऽतीन्द्रियत्वं चक्षुरिन्द्रियागोचरत्वं, तथासति कथं वामनाऽवतारशङ्काऽप्यवकाशं लभेत ॥ ऋग्वेदे १ । २२ । २० तथा यजुषि ६—५ ऽपि ॥ ४ ॥

भाषार्थः—(सूरयः) विद्वान् ज्ञानी लोग (विष्णोः) विष्णु व्यापक अदृश्य परमात्मा के भी (तत्) उस (परमम्) अति सूक्ष्मतम (पदम्) स्वरूप को [जिस स्वरूप से उस ने तीनों लोकों को व्याप रक्खा है] (सदा) सदा (पश्यन्ति) देखते हैं अनुभव करते हैं (इव) जैसे (आततम्) पसारी हुई (चक्षुः) आंख (दिवि) आकाश में सब कुछ देखने योग्य दृश्य को देखती है तद्वत् ॥

अर्थात् जैसे हमारी आंख दृश्य पदार्थों को साक्षात् देखती हैं वैसे ही ज्ञानियों के आत्मा अदृश्य परमात्मा के स्वरूप का भी साक्षात् अनुभव करते हैं। इस में आंख का दृष्टान्त ही दार्ष्टान्त की भिन्नता प्रतिपादन करके परमेश्वर के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वरूप की अतीन्द्रियता वा अदृश्यता का बोध कराता है। इस दशा में वाङ्मनाऽगोचर की शङ्का मात्र को भी अवकाश नहीं है ॥ ऋ० १ । २२ । २० में तथा यजुः ६-५ में भी ॥ ४ ॥

अथ पञ्चमी—

१र २र ३ १ २ ३ २ ३ १ २
तद्विप्रासो विपन्यवोजागृवाꣳसः समिन्धते ॥
२ ३ १ २ ३ २ ३ २
विष्णोर्यत्परमं पदम् ॥ ५ ॥ (१६७१)

पदपाठः-तत् २ । विप्रासः, विपन्यवः, जागृवांसः १ । समिन्धते क्रि० । विष्णोः ६ । यत्, परमम्, पदम् १ ॥

अन्वितपदार्थः-पूर्वोक्तं (यत्), (विष्णोः) परमेश्वरस्य (परमम्) सर्वतः सूक्ष्मतमं (पदम्) स्वरूपमस्ति (तत्), (विप्रासः) मेधाविनः ऋतंभराप्रज्ञावन्तः (विपन्यवः) विशेषेण स्तोतारोभजनतत्पराः (जागृवांसः) शब्दार्थयोः प्रमादराहित्येन जागरूकाः योगिन इतियावत् (समिन्धते) सम्यक् प्रकाशयन्ति, नान्ये बहिर्मुखाः ॥

एतेनाऽपि अयोगिनामऽविषयतयाऽसाक्षाद्भावेन, योगिनामेवाऽनुभवगम्यत्वप्रतिपादनेन चाऽवतारवादो निरस्तएव ॥ ऋग्वेदे १ । २२ । २१ यजुर्वेदे ३४ । ४४ चाऽपि ॥५॥

भाषार्थः-(यत्) जो पूर्वोक्त (विष्णोः) विष्णु का (परमम्) सूक्ष्मतम (पदम्) स्वरूप है (तत्) उस को (विप्रासः) ऋतंभरा प्रज्ञा वाले (विपन्यवः) विशेष करके स्तुतिपूर्वक भजन में तत्पर (जागृवांसः) स्तुति के शब्द और अर्थ ज्ञान में प्रमाद न करके जागने वाले योगी जन (समिन्धते) दूसरों के लिये प्रकाश करते=उपदेश द्वारा जताते हैं ॥

इस में भी अयोगिगम्य न होने, योगिगम्य होने और योगियों द्वारा अन्यों के प्रति जताने योग्य विष्णुपद का वर्णन अवतारवाद का विरोध

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करता है। अवतारवादानुसार तो विष्णुपद आंख का विषय ही कहा जाता, जिस का मन्त्र से विरोध है ॥ ऋ० १। २२। २१ यजुः ३४। ४४ में भी ॥ ५ ॥

अथ षष्ठी—

१ २ ३ १ २ ३ २ ३ १ २ ३ २
अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
३ २ ३ १ २
पृथिव्या अधि सानवि ॥ ६ ॥ [५] (१६७२)

पदपाठः—अतः अ० । देवाः १। अवन्तु क्रि० । नः २। यतः अ० । विष्णुः १। विचक्रमे क्रि० । पृथिव्याः ६ । अधि अ० । सानवि ७ ॥

अन्वितपदार्थः—(विष्णुः) परमेश्वरः [इत्येष सायणोऽपि] (यतः) यस्मात् कारणात् (पृथिव्याः) भूमेः (अधि) उपरि (सानवि) उच्चप्रदेशेऽपि (विचक्रमे) विशेषेण क्रान्तवान् (अतः) अस्मात् हेतोः (देवाः) पृथिवीप्रभृतयः (नः) अस्मान् (अवन्तु) रक्षन्तु, परमेश्वराधिष्ठितत्वात् ॥

ऋग्वेदे तु १। २२। १६ पृथिव्याः सप्त धामभिरिति तृतीयपादपाठे भेदः ॥ ६ ॥

भाषार्थः—(विष्णुः) परमेश्वर ने (यत्) जिस कारण (पृथिव्याः) पृथिवी के (अधि) ऊपर (सानवि) उच्च प्रदेश में भी (विचक्रमे) विशेष करके व्याप्त किया हुवा है (अतः) इस कारण परमेश्वराऽधिष्ठितता से (देवाः) पृथिवी आदि लोकलोकान्तर (नः) हमारी (अवन्तु) रक्षा करें ॥

ऋ० १। २२। १६ का पाठभेद संस्कृत भाष्य में देखिये ॥ ६ ॥

अथ प्रगाथस्य द्वितीय सूक्तस्य—वसिष्ठ ऋषिः। इन्द्रोदेवता। बृहती छन्दः॥

तत्र प्रथमा—

१ २ ३ १ २ ३ २ ३ १ २ ३ २
मो षु त्वा वाघतश्चनारे अस्मन्निरीरमन् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १र २र
आरात्ताद्वा सधमादं न आगहीह वा सन्नुप श्रुधि ॥१॥
(१६७३) व्याख्याता (२८४)

अथ द्वितीया–

३ १र २र ३ १ २ ३ २उ ३ २ ३ २उ ३ १ २
इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
२ ३ १ २ ३ १ २ ३ २ ३ २ ३ २उ ३ १ २
इन्द्रे कामं जरितारो वसूयवो रथे न पादमादधुः॥२॥ [६](१६७४)

पदपाठः–इमे १ । हि अ० । ते ४ । ब्रह्मकृतः १ । सुते ७ । सचा अ० । मधौ ७ । न अ० । मक्षः १ । आसते क्रि० । इन्द्रे ७ । कामम् २ । जरितारः, वसूयवः १ । रथे ७ । न । पादम् २ । आदधुः क्रि० ॥

अन्वितपदार्थः–हे इन्द्र ! (इमे) एते (ब्रह्मकृतः) वैदिकर्मानुष्ठानकृतः (जरितारः) स्तोतारः स्तोत्रादय ऋत्विजः (वसूयवः) धान्यादिधनकामाः सन्तः (ते) त्वदर्थं (सुते) सोमेऽभिषुते सति (हि) निश्चयेन (सचा) सह (आसते) उपविशन्ति (मधौ मक्षः न) मधुनि निमित्ते मक्षिकाः इव । (इन्द्रे) त्वयि आश्रये (कामम्) इष्टम् (आदधुः) आदधते समर्पयन्ति (न) यथा (रथे) रमणीये याने (पादम्), समर्पयन्ति तद्वत् ॥ ऋग्वेदे ७ । ३२ । २ऽपि ॥ २ ॥

भाषार्थः–हे इन्द्र ! (इमे) ये (ब्रह्मकृतः) वेदोक्त कर्मकाण्डी (जरितारः) स्तोता आदि ऋत्विज् लोग (वसूयवः) धान्यादि धन चाहते हुवे (ते) तेरे लिये (सुते) सोम अभिषुत होजाने पर (हि) ही (सचा) साथ (आसते) बैठते हैं (न) जैसे (मधौ) शहद के निमित्त (मक्षः) मक्खियें। (इन्द्रे) तुझ इन्द्र आश्रय में (कामम्) अपनी कामना को (आदधुः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समर्पित कर देते हैं (न) जैसे (रथे) रथ में (पादम्) पांव रखते हैं॥ ऋ०७। ३२। २ में भी ॥ २ ॥

अथ प्रगाथस्य तृतीयसूक्तस्य–आयुः काण्वऋषिः। इन्द्रो देवता। विराड्बृहती, निचृत्पङ्क्तिश्चेति क्रमेण छन्दसी॥

तत्र प्रथमा–

१ २ ३ १ २ ३ १र २र
अस्ताव्यि मन्म पूर्व्यं, ब्रह्मेन्द्राय वोचत।
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
पूर्वीर्ऋतस्य बृहतीरनूषत, स्तोतुर्मेधा असृक्षत ॥ १॥(१६७५)

पदपाठः-अस्ताव्यि क्रि०। मन्म, पूर्व्यम्, ब्रह्म २। इन्द्राय ४। वोचत क्रि०। पूर्वीः २। ऋतस्य ६। बृहतीः२। अनूषत क्रि०। स्तोतुः६। मेधाः१। असृक्षत क्रि०॥

अन्वितपदार्थः–हे मनुष्याः! (इन्द्राय) वृष्टिकृते वायवे (पूर्व्यं) पूर्वं भवं सनातनं (मन्म) मननीयं (ब्रह्म) वेदमन्त्रं (वोचत) उच्चारयत (अस्ताव्यि) एवमिन्द्रः स्तूयेत (ऋतस्य) सत्यस्य (पूर्वीः) सनातनीः (बृहतीः) बृहतीछन्दस्का ऋचः (अनूषत) स्तुवत पठतेत्यर्थः। एवं हि (स्तोतुः) स्तुतिकर्त्तुर्यजमानस्य ऋत्विजो वा (मेधाः) बुद्धयः (असृक्षत) इन्द्रेण सृज्यन्ते ॥ ऋग्वेदे ८। ५२। ९ ऽपि ॥ १ ॥

भाषार्थः–हे मनुष्यो! (इन्द्राय) वृष्टिकारक वायुभेद के लिये (पूर्व्यम्) सनातन (मन्म) मननयोग्य (ब्रह्म) वेदमन्त्र को (वोचत) बोलो (अस्ताव्यि) इस से उस की स्तुति होती है (ऋतस्य) सत्य वेद की (पूर्वीः) सनातन (बृहतीः) बृहतीछन्द की ऋचाओं को (अनूषत) स्तुत करो=पढ़ो। इससे (स्तोतुः) तुम में से स्तुति करने वाले की (मेधाः) धारणावती बुद्धियें (असृक्षत) इन्द्र से रची जाती हैं॥ ऋ० ८। ५२। ९ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

२उ ३ १ २ ३१२ ३ २ ३ २उ ३ १ २
समिन्द्रो रायो बृहतीरधूनुत—सं क्षोणीः समु सूर्यम् ।
२ ३२३ १२३ १ २र ३ २३१२
सꣳ शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥
॥ २ ॥ [७] (१६७६)

पदपाठः—सम् अ० । इन्द्रः १ । रायः, बृहतीः २ । अधूनुत क्रि० । सम् । क्षोणीः २ । सम् । उ अ० । सूर्यम् २ । सम् । शुक्रासः, शुचयः १ । सम् । गवाशिरः, सोमाः १ । इन्द्रम् २ । अमन्दिषुः क्रि० ॥

अन्वितपदार्थः—(इन्द्रः) वृष्टिकृद्देवः (बृहतीः) बहूनि (रायः) धान्यादिधनानि (सम्—अधूनुत) सम्यक् प्रापयतु । धूञ्कम्पने धातूनामनेकार्थत्वम् । (क्षोणीः) भूमीः क्षेत्राणि वा (सम्) संप्रापयतु । (उ) तथा (सूर्यम्) सूर्यप्रकाशं (सम्) संप्रापयतु । (शुचयः) पवित्रस्वरूपाः निर्मलाः (शुक्रासः) वीर्यवन्तःपदार्थाः (सम्) संप्रापयन्तु (गवाशिरः) गोदुग्धघृतादिसहिताः (सोमाः) सोमरसाः (इन्द्रम्) वृष्टिकृतम् (सम् अमन्दिषुः) सम्यक् हृष्टिं पुष्टिं च गमयन्ति ॥ ऋग्वेदे ८ । ५२ । १० ऽपि ॥ २ ॥

भाषार्थः—(इन्द्रः) वृष्टि का हेतु वायुदेव (बृहतीः) बहुत (रायः) धान्यादि धनों को (सम्—अधूनुत) भले प्रकार प्राप्त करावे (क्षोणीः) भूमियों वा खेतों को (सम्) भले प्रकार प्राप्त करावे (उ) और (सूर्यम्) सूर्य के प्रकाश को (सम्) भले प्रकार प्राप्त करावे (शुचयः) पवित्र निर्मल (शुक्रासः) वीर्यकारक पदार्थ (सम्) भले प्रकार प्राप्त करावें (गवाशिरः) दुग्ध घृतादि गौ के पदार्थों सहित (सोमाः) सोमरस (इन्द्रम्) इन्द्रदेव को (सम्—अमन्दिषुः) भले प्रकार हृष्ट पुष्ट करते हैं ॥ ऋ० ८ । ५२ । १० में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीय तृचसूक्तस्य—अम्बरीष ऋजिश्वा वा ऋषिः । सोमो देवता । अनुष्टुप्छन्दः ॥ तत्र प्रथमा—

१ २ ३ १ २१ ३ १२ २२ १२ ३ १ २
इन्द्राय सोम पातवे वृत्रघ्ने परिषिच्यसे । नरे च दक्षिणावते
३ १ २ ३ १ २
वीराय सदनासदे ॥१॥ (१६७७) व्याख्याता (१३३१)

अथ द्वितीया—

१ २ ३१२ ३ २ ३१ २ ३१ २
तꣳ सखायः पुरूरुचं वयं यूयं च सूरयः ।
३ २ ३ १ २ ३ २३ १ २
अश्याम वाजगन्ध्यꣳ सनेम वाजपस्त्यम् ॥२॥ (१६७८)

पदपाठः—तम् २ । सखायः सं० । पुरूरुचम् २ । वयम्, यूयम् १ । च अ० । सूरयः सं० । अश्याम क्रि० । वाजगन्ध्यम् २ । सनेम क्रि० । वाजपस्त्यम् २ ॥

अन्वितपदार्थः—(सूरयः) हे विद्वांसः ! (सखायः) हे सुहृदः ! (पुरूरुचम्) बहुदीप्तिम् (वाजगन्ध्यम्) बलकरसाधुगन्धोपेतम् तत्र भवं (तं) सोमम् (यूयं वयं च), (अश्याम) अश्नीम पिबेम तथा (वाजपस्त्यम्) बलकरं सोमं (सनेम) संभजेमहि ॥ सोमसेवनेन होमेन च अन्नबलगृहादिकानि भवन्ति इति भावः ॥ ऋग्वेदे तु ९ । ९८ । १२ पुरोरुचम् इति भेदः ॥ २ ॥

भाषार्थः—(सूरयः) हे विद्वानो ! (सखायः) मित्रो ! (पुरूरुचम्) बहुत दीप्तिमान् (वाजगन्ध्यम्) बलदायक सुगन्धयुक्त (वाजपस्त्यम्) बलदायक गृहयुक्त (तम्) उस सोम को (यूयम्) तुम (च) और (वयम्) हम सब (अश्याम) पीवें (सनेम) संभजन करें ॥ भाव यह है कि सोम के होम और पीने से बल अन्न गृहादि सुख होते हैं ॥ ऋ० ९ । ९८ । १२ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

२ ३ १ २ ३१ २२ ३१ २ ३ १२ २ ३२३ ३
परि त्यꣳ हर्यतꣳ हरिं बभ्रुं पुनन्ति वारेण । यो देवान् विश्वाँ
२३ ३ १२ ३१ २२
इत्परि मदेन सह गच्छति ॥ ३ ॥ [८] (१६७९)

व्याख्याता (५५२)

अथ प्रगाथस्य–पञ्चमसूक्तस्य–वसिष्ठ ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा–

१ २२ ३ १ २२ ३ १ २२ ३ १ २
कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति । श्रद्धा हि ते मघवन् पार्ये
३ २ ३ १ २२
दिवि वाजी वाजꣳ सिषासति ॥ १ ॥ (१६८०) व्याख्याता (२८०)

अथ द्वितीया–

३ १ २ ३ १ २ ३ १२ २ ३ १२ २२ २३ १ २
मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु । तव प्रणीती
३ २ ३ १ २ ३ २
हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥ २ ॥ [९] (१६८१)

पदपाठः–मघोनः २ । स्म अ० । वृत्रहत्येषु ७ । चोदय क्रि० । ये १ । ददति क्रि० । प्रिया, वसु २ । तव ६ । प्रणीती ३ । हर्यश्व सं० । सूरिभिः ३ । विश्वा २ । तरेम क्रि० । दुरिता २ ॥

अन्वितपदार्थः–(हर्यश्व) हे हरणशीलव्याप्तिमन् इन्द्र परमेश्वर ! (ये) जनाः (प्रिया) प्रियाणि (वसु) वसूनि धनानि (ददति) प्रयच्छन्ति यज्ञे विनियुञ्जते (मघोनः) तान्यज्ञवतो यजमानान् (वृत्रहत्येषु) शत्रुनाशकेतु दुष्टजन्तुनिवारकेषु यज्ञेषु (चोदय) प्रेरय (तव)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परमेश्वरस्य (प्रणीती) प्रणीत्या वेदशिक्षया (सूरिभिः) विद्वद्भिः सह, वयं (विश्वा) सर्वाणि (दुरिता) दुरितानि पापानि (तरेम, स्म) उत्तीर्णाभवेम ॥ ऋग्वेदे ७ । ३२ । १५ ऽपि ॥ २ ॥

भाषार्थः—(हर्यश्व) हे हरणशीलव्याप्ति वाले इन्द्र परमेश्वर ! (ये) जो लोग (प्रिया) प्यारे (वसु) धनों को (ददति) दान करते हैं, उन (मघोनः) धनवान् यजमानों को (वृत्रहत्येषु) दुष्टजन्तुविनाशक यज्ञों में (चोदय) प्रेरित करो, और हम (तव) तुम्हारे (प्रणीती) प्रणीत वेद से (सूरिभिः) विद्वानों के संगपूर्वक उन के साथ (विश्वा) सब (दुरिता) पापों को (तरेम स्म) पार हो जावें ॥ ऋ० ७ । ३२ । १५ में भी ॥ २ ॥

इत्यऽष्टादशाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे

प्रथम ऋचस्य—विश्वमना ऋषिः । इन्द्रो देवता । उष्णिक्छन्दः ॥

तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३
एदुमघोर्मदिन्तरꣳ सिञ्चाऽध्वर्यो अन्धसः । एवा हि वीरः
२ ३ १ २
स्तवते सदावृधः ॥१॥ (१६८२) व्याख्याता (३८५)

अथ द्वितीया—

१ २ ३ १ २ ३ १ २
इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम् ।
१ २ ३ १ २ ३ २ ३ १ २
उदानꣳश शवसा न भन्दना ॥ २ ॥ (१६८३)

पदपाठः—इन्द्र, स्थातः सं० । हरीणाम् ६ । नकिः अ० । ते ६ । पूर्व्यस्तुतिम् २ । उदानंश क्रि० । शवसा ३ । न अ० । भन्दना ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—हे (हरीणां) सूर्यकिरणानां (स्थातः) स्थापयितः ! (इन्द्र) परमेश्वर ! (ते) तव (पूर्व्यस्तुतिं) सनातनीं वैदिकीं स्तुतिं, कश्चिदपि (नकिः) नैव (उदानंश) व्याप्नोति (शवसा) बलेन (भन्दना) तेजसा च (न) न तुल्योऽस्ति ॥

भन्दते इति ज्वलतिकर्मा निघं० १ । १६ तस्मात् भन्दनं तेजस्तेन भन्दना भन्दनेन, विभक्तेर्डाऽऽदेशे रूपम्॥ ऋग्वेदे ८ । २४ । १७ ऽपि ॥ २ ॥

भाषार्थः—हे (हरीणाम् स्थातः) सूर्यकिरणादि तेजों को स्थापक ! (इन्द्र) परमेश्वर ! (ते) तुम्हारी (पूर्व्यस्तुतिम्) सनातन वेदोक्त स्तुति को, कोई (नकिः) नहीं (उदानंश) पाता (शवसा) न तो बल से और (न) न (भन्दना) तेज से ॥

निघं० १ । १६ का प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० ८ । २४ । १७ में भी ॥ २ ॥

अथ तृतीया—

२ ३ १ २ ३ २३ १२ ३ १ २

तं वो वाजानां पतिमहूमहि श्रवस्यवः ।

१ २ ३१ २ ३१ २

अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥ ३ ॥ [१०] (१६८४)

पदपाठः—तम् २ । वः २ । वाजानाम् ६ । पतिम् २ । अहूमहि क्रि० । श्रवस्यवः १ । अप्रायुभिः, यज्ञेभिः ३ । वावृधेन्यम् २ ॥

अन्वितपदार्थः—(श्रवस्यवः) आत्मनो यशइच्छन्तः वयम् (वाजानां पतिं) बलानां पालकं स्वामिनं वा (अप्रायुभिः) अविच्छिन्नैर्निरन्तरैः (यज्ञेभिः) यज्ञैः (वावृधेन्यम्) अतिशयेन वर्धकं (तं), (वः) त्वाम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परमेश्वरमिन्द्रम् (अहूमहि) आह्वयामहे ॥ ऋग्वेदे ८ । २४ । १८ ऽपि ॥ ३ ॥

भाषार्थः-(अवस्यवः) यश वा अन्न चाहने वाले हम (वाजानाम्) बलों वा अन्नों के (पतिम्) पालक वा स्वामी, (अप्रायुभिः) निरन्तर होने वाले (यज्ञेभिः) यज्ञों से (वावृधेन्यम्) हम को बहुत बढ़ाने वाले (तम्) उस (वः) तुम परमेश्वर इन्द्र को (अहूमहि) पुकारते हैं ॥ ऋ० ८ । २४ । १८ में भी ॥ ३ ॥

अथ प्रगाथस्य द्वितीयसूक्तस्य-सौभरिर्ऋषिः । अग्निर्देवता । निचृदुष्णिक्, विराट् पङ्क्तिश्च छन्दसी ॥ तत्र प्रथमा—

१ २ ३क ३१ २ ३१२३१ २ ३ २
तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा
३ १ २
हव्यमूहिषे ॥ १ ॥ (१६८५) व्याख्याता (१०९)

अथ द्वितीया-

१ २ ३१ २ ३ १ २ ३ १ २
विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरम् ।
३ १र २र ३ १ २ ३ १२ ३१२ ३ २
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥
॥ २ ॥ [११] (१६८६)

पदपाठः-विभूतरातिम् २ । विप्र सं० । चित्रशोचिषम् , अग्निम् २ । ईडिष्व क्रि० । यन्तुरम् २ । अस्य, मेधस्य, सोम्यस्य ६ । सोभरे सं० । प्र, ईम् अ० । अध्वराय ४ । पूर्व्यम् २ ॥

अन्वितपदार्थः-(सोभरे) हे सुष्ठु भरणकर्त्तः ! (विप्र) मेधाविन् ! त्वम् (अस्य) अनुष्ठीयमानस्य (सोम्यस्य) सोमरससाध्यस्य (मेधस्य) यज्ञस्य (यन्तुरम्) नेतारम्, (विभूतरातिम्) प्रभूतदानम्, (चित्रशोचिषम्) विचित्र-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दीप्तिमन्तम् (पूर्व्यम्) सनातनम् (ईम्) एतम् (अग्निम्) पावकं परमेश्वरं वा (अध्वराय) यज्ञाय (प्र ईडिष्व) प्रकर्षेण स्तुहि ॥ ऋग्वेदे ८ । १९ । २ ऽपि ॥ २ ॥

भाषार्थः-(सोभरे) हे भले प्रकार से भरण करने वाले (विप्र) ब्राह्मण ! विद्वन् ! तू (अस्य) इस (सोम्यस्य) सोमरस से साध्य (मेधस्य) यज्ञ के (यन्तुरम्) ले जाने वाले, (विभूतरातिम्) बड़े दाता (चित्रशोचिषम्) विचित्रप्रकाशवान्, (पूर्व्यम्) सनातन (ईम्) इस (अग्निम्) अग्नि वा परमेश्वर की (अध्वराय) यज्ञ के लिये (प्र ईडिष्व) प्रकर्ष से स्तुत कर ॥ ऋ० ८ । १९ । २ में भी ॥ २ ॥

अथ प्रगाथस्य तृतीयसूक्तस्य-अग्निर्ऋषिः । सोमो देवता । उष्णिक् छन्दः ॥

तत्र प्रथमा—

१ २ ३ १र २र ३ १र २र ३ १ २ २ ३ २ ३ २
आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया जनो न पुरि
३क २र ३ २ ३ २ ३ १ २
चम्वोर्विशद्धरिः सदो वनेषु दधिषे॥२॥(१६८७)व्याख्याता(५१३)

अथ द्वितीया—

१ २ ३ १र २र ३क २र ३ २उ ३ १ २ ३ २ ३ २ ३
स मामृजे तिरो अण्वानि मेष्यो मीढ्वान्त्सप्तिर्न वाजयुः। अनुमाद्यः
१२ ३ २ ३ २ ३ १ २ ३ १ २
पवमानो मनीषिभिः सोमोविप्रेभिर्ऋक्वभिः॥२॥[१२](१६८८)

पदपाठः-सः १ । मामृजे क्रि० । तिरः अ० । अण्वानि २ । मेष्यः २। मीढ्वान्, सप्तिः १ । न अ० । वाजयुः, अनुमाद्यः, पवमानः १ । मनीषिभिः ३ । सोमः १ । विप्रेभिः, ऋक्वभिः ३ ॥

अन्वितपदार्थः-(वाजयुः) बलकामः (मीढ्वान्) सेचनसमर्थः (सप्तिः) अश्वः (न) इव (अनुमाद्यः) हर्षकरः (सः), (पवमानः) सोमः (मनीषिभिः) वि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वद्भिः (विप्रेभिः) विप्रैर्ब्राह्मणैः (ऋक्वभिः) ऋत्विग्भिः (अण्वानि) सूक्ष्माणि (मेष्यः) मेष्याणि मेषरोमाणि दशापवित्राणि (तिरः) तिरः कुर्वन् (मामृजे) परि शोध्यते ॥ ऋग्वेदे तु ९ । १०६ । ११ मीढ्वान्=मीळे इति पाठः ॥ २ ॥

भाषार्थः-(वाजयुः) बल चाहने वाले (मीढ्वान्) सांड (वह्निः) घोड़े के (न) समान वीर्यवान् (अनुमाद्यः) हर्षकारक (सः) वह (पवमानः) सोमरस, (मनीषिभिः) मेधावी (विप्रेभिः) ब्राह्मण (ऋक्वभिः) ऋत्विजों से, (अण्वानि) सूक्ष्म=बारीक (मेष्यः) मेषरोम से बने दशापवित्रों को (तिरः) तिरछा करता हुवा (मामृजे) शोधा=छाना जाता है ॥ ऋ० ९ । १०६ । ११ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ प्रगाथस्य चतुर्थसूक्तस्य-कलिर्ऋषिः । इन्द्रो देवता । पादनिचृद् बृहती, निचृत्पङ्क्तिश्च क्रमेण छन्दसी ॥

तत्रप्रथमा-

३ १ २ ३ १र २र ३२ ३ १ २ १ २ ३ १र २र
वयमेनमिदाह्योऽपीपेमेह वज्रिणम् । तस्मा उ अद्य सवने
३२ ३२ ३ १ २ ३२
सुतं भरा नूनं भूषत श्रुते ॥१॥ (१६८९) व्याख्याता (२७२)

अथ द्वितीया-

१ २ ३ १ २ ३ २ ३ ९ ३ १ २ २उ ३ १ २
वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति । सेमं नः स्तोमं
३२उ ३ २ ३ २ ३ १ २ ३ २
जुजुषाण आगहीन्द्र प्र चित्रया धिया ॥२॥ [१३] (१६९०)

पदपाठः-वृकः १ । चित् अ० । अस्य ६ । वारणः, उरामथिः १ । आ अ० । वयुनेषु ७ । भूषति क्रि० । सः १ । इमम् २ । नः ६ । स्तोमम् २ । जुजुषाणः १ । आगहि क्रि० । इन्द्र सं० । प्र अ० । चित्रया, धिया ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(अस्य) इन्द्रस्य परमेश्वरस्य (वयुनेषु) प्रज्ञानेषु (उरामथिः) हृदयदुःखदः (वारणः) मार्गलुण्ठकः (वृकः) स्तेनः (चित्) अपि (आ भूषति) आनुकूल्येन वर्त्तते (सः) उक्तसर्वशक्तिमान् (इन्द्र) परमेश्वर! (नः) अस्माकं भक्तानाम् (इमं स्तोमं) पठ्यमानं स्तोत्रं (जुजुषाणः) सेवमानः स्वीकुर्वाणः (चित्रया) विचित्रया (धिया) बुद्ध्या कर्मणा वा (आगहि) प्रामुहि ॥

क्रूरकर्मा मार्गलुण्ठकचौरादिरपि यस्य परमेश्वरस्य ज्ञानविषये स्वकृतकर्मफलभोगपरतन्त्रः सन् कौटिल्यं त्यक्त्वाऽऽनुकूल्येन वर्त्तते स परमेश्वरोऽस्माकं प्रार्थनां स्तुतिं च स्वीकरोतु, विचित्रबुद्धिप्रदानं कुर्याच्चेति भावः ॥ ऋग्वेदे ८ । ६६ । ८ ऽपि ॥ २ ॥

भाषार्थः—(अस्य) इस परमेश्वर के (वयुनेषु) प्रज्ञानों में (उरामथिः) हृदयदुःखदायक (वारणः) मार्ग रोकने वाला लुटेरा (वृकः) चोर (चित्) भी (आ-भूषति) सीधा हो जाता है (सः) वह सर्वशक्तिमान् (इन्द्र परमेश्वर! तू (नः) हमारे (इमम्) इस (स्तोमम्) स्तोत्र को (जुजुषाणः) स्वीकृत करता हुआ (चित्रया) विचित्र (धिया) बुद्धि वा कर्म से (आगहि) प्राप्त हो ॥

क्रूरकर्मी चोर डाकू लुटेरे भी जिस परमेश्वर के सामने सीधे होकर निजकर्मफल भोग में परतन्त्र हो जाते हैं, वह सर्वशक्तिमान् जगदीश्वर हमारी पुकार सुने और हम को विचित्र बुद्धि वा कर्म करने का पुरुषार्थ देवे ॥ ऋ० ८ । ६६ । ८ में भी ॥ २ ॥

अथ पञ्चमस्य तृचसूक्तस्य—विश्वामित्र ऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ २ ३ २उ ३ १ २

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३क २र
तद्वां चेति प्र वीर्यम् ॥ १ ॥ (१६९१)

पदपाठः-इन्द्राग्नी, रोचना सं० । दिवः ६ । परि अ० । वाजेषु ७ । भूषथः क्रि० । तत् २ । वाम् ६ । चेति क्रि० । प्र अ० । वीर्यम् १ ॥

अन्वितपदार्थः-(दिवः) आकाशस्य (रोचना) रोचनौ प्रकाशकौ ! (इन्द्राग्नी) विद्युदग्नी ! (वाजेषु) बलेषु संग्रामेषु वा (परिभूषथः) परिभवथस्तिरस्कुरुथः सर्वम् । (वाम्) युवयोः (वीर्यम्) बलम् [कर्तृ] (तत्) सर्वस्याभिभावुकत्वं (प्र-चेति) प्रज्ञापयति ॥ ऋग्वेदे ३। १२ । ९ ऽपि ॥ १ ॥

भाषार्थः-(दिवः) आकाश के (रोचना) प्रकाशक (इन्द्राग्नी) बिजुली और अग्नि ! (वाजेषु) बलों वा संग्रामों में (परिभूषथः) सब को हरा रक्खे हो और पराजित करते हो, (तत्) इस बात को (वाम्) तुम्हारा (वीर्यम्) बल वीर्य (प्र-चेति) उत्कृष्टता से बतलाता है ॥ ऋ० ३ । १२ । ९ में भी ॥१॥

अथ द्वितीया-

१ २ ३ १ २३ २उ ३ १ २ ३१२
इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः ।
३१२ ३ २ १ २
ऋतस्य पथ्या अनु ॥२॥ (१६१२) व्याख्याता (१५७५)

अथ तृतीया—

१ २ ३१ २ ३१२ ३ १२
इन्द्राग्नी तविषाणि वाꣳसघस्थानि प्रयाꣳसि च ।
३२३१२ ३ २
युवोरप्तूर्यꣳहितम् ॥३॥ [१४] (१६९३) व्याख्याता (१५७६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ षष्ठर्चस्य-मेधातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा-

१ २ ३ २३ ३ १ २ ३ १र २र ३ १र २र
कई वेद सुते सचा पिबन्तं कद्वयोदधे । अयं यः पुरो
३ १र २र ३ २ ३ १ २
विभिनत्त्योजसा मन्दानः शिप्रयन्धसः ॥ १ ॥

(१६९४) व्याख्याता (२९७)

अथ द्वितीया—

३ २ ३ १र २र३ १ २३ २ ३१ २ १ २ ३
दाना मृगो न वारणः पुरुत्रा चरथं दधे । नकिष्ट्वा
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
नियमदासुते गमो महाँश्चरस्योजसा ॥ २ ॥ (१६९५)

पदपाठः-दाना २ । मृगः १ । न अ० । वारणः १ । पुरुत्रा अ० । चरथम् २ । दधे क्रि० । नकिः अ० । त्वा २ । नियमत् क्रि० । आ अ० । सुते ७ । गमः क्रि० । महान् १ । चरसि क्रि० । ओजसा ३ ॥

अन्वितपदार्थः-प्रकरणात् इन्द्रः (वारणः मृगः न) हस्ती वनेचर इव (चरथं) चरणशीलं (दाना) दानं मदं (पुरुत्रा) बहुषु स्थलेषु (दधे) दधाति (त्वा) तम् (नकिः) न कोऽपि (नियमत्) नियच्छति, किन्तु (ओजसा) बलेन (महान्) प्रबलइन्द्रः (चरसि) स्वातन्त्र्येण विचरति । स इन्द्रः (सुते) सोमेऽभिषुते सति (आगमः) आगच्छेत् इति वाञ्छामहे ॥

यथा वनेचरो हस्ती निरङ्कुशो भूत्वा इतस्ततो मदस्रावं कुर्वन् स्वतन्त्रोऽनियमितो विचरति, तथा ह्येव बलेन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महान् इन्द्रो वायुविशेषो वृष्टिमितस्ततः कुर्वन् भ्रमति, सहि सोमयज्ञेऽस्माकं सन्निहितः स्यात् ॥ ऋग्वेदे ८।३३।८ ऽपि ॥२॥

भाषार्थः—(न) जैसे (मृगः) वनचर (वारणः) हाथी (पुरुत्रा) बहुत स्थलों पर (चरथम्) चरणशील (दाना) निज मद को (दधे) धारण करता फिरता है, वैसे ही (ओजसा) बल से (महान्) महान् इन्द्र भी (चरसि) विचरता है (त्वा) उस को (न किः) कोई नहीं (नियमत्) निगृहीत करता, वह (सुते) सोम अभिषुत होने पर (आगमः) हमें प्राप्त होवे ॥

जैसे जङ्गली हाथी मदमाता निरङ्कुश स्वेच्छाचारी मद चुआता घूमता है, उसे कोई निगृहीत नहीं करता, इसी प्रकार बल से अति बली इन्द्र जो वायु विशेष वर्षा करता हुवा स्वतन्त्र घूमता है, हम चाहते हैं कि हमारे सोमयज्ञ में प्राप्त होकर वह सोमाहुति ग्रहण करे ॥ ऋ० ८ । ३३ । ८ में भी ॥ २ ॥

अथ तृतीया—

२ ३१२ २२ ३१२ २२३ १ २ १२ ३ २३१२

य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः । यदि स्तोतुर्मघवा

३ २३२३ १ २ ३ १ २

शृणवद्धवं नेन्द्रो योषत्यागमत् ॥ ३ ॥ [१५] (१६९६)

पदपाठः—यः, उग्रः, सन्, अनिष्टृतः, स्थिरः १ । रणाय ४ । संस्कृतः १। यदि अ० । स्तोतुः ६ । मघवा १ । शृणवत् क्रि० । हवम् २ । न अ० । इन्द्रः १। योषति, आगमत् क्रि० ॥

अन्वितपदार्थः—(यः) प्रसिद्धः इन्द्रः (उग्रः) उद्गीर्ण बलः (अनिष्टृतः) वृत्रैर्मर्मघैरनिस्तीर्णः (सन्) भवन् (रणाय) वृत्रसंग्रामाय (संस्कृतः) सन्नद्धः (स्थिरः) दृढश्च भवति, सः (यदि), (स्तोतुः) प्रशंसाकर्त्तुः (हवम्) आह्वानं (शृणवत्) शृणुयात् स्तुत्यनुकूलो भवेत् तर्हि (मघवा) मखवान्यज्ञभागवान् (इन्द्रः) वृष्टिकृत् देवः (न) नैव (योषति) गच्छति, किन्तु (आगमत्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आगच्छेदेव ॥ ऋग्वेदे ८ । ३३ । ९ऽपि ॥ परन्त्वार्ष्यं, यद्भाष्यकारेण ज्वालाप्रसादेन कलिकातामुद्रितपुस्तकस्थ सायणभाष्ये (शृणवत्) इति अङ्कयितव्ये (शृण्वत्) इत्यऽशुद्धाङ्कनगतानुगतिकतया तदेव स्वभाष्येऽप्युद्धृतं,मूले स्पष्टं (शृणवत्) इति नालोचितम् ॥ ३ ॥

भावार्थः-(यः) जो (उग्रः) उद्दीर्ण बल वाला (अनिष्टृतः) मेघरूपी शत्रुओं से न पार पाया (सन्) हुवा (रथाय) मेघों से युद्ध के लिये (संस्कृतः) सन्नद्ध और (स्थिरः) दृढ होता है, वह (मघवा) यज्ञभागग्राही (इन्द्रः) इन्द्र (यदि) यदि (स्तोतुः) स्तुति प्रशंसा करने वाले की (हवम्) पुकार को (शृणवत्) सुने अर्थात् स्तुति के अनुकूलवर्ती हो जावे तो (न) नहीं (योषति) जावे, किन्तु (आगमत्) आवे ॥

ऋ० ८ । ३३ । ९ में भी यही पाठ है, परन्तु मूल में स्पष्ट शृणवत् पाठ देखते लिखते हुवे भी पं० ज्वालाप्रसाद भाष्यकार ने कलकत्ता एसियाटिक सोसाइटी के छापे पुस्तकस्थ सायणभाष्य में अशुद्ध छपे शृण्वन् पाठ को ही उद्धृत कर लिया है ॥ ३ ॥

इत्यष्टादशाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थे खण्डे प्रथमर्चस्य-निध्रुविर्ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

१२ ३ १२ ३२३ १ २

पवमाना असृक्षत सोमाः शुक्रास इन्दवः ।

३ १२ २२ ३ १ २

अभि विश्वानि काव्या ॥ १ ॥ (१६९७)

पदपाठः-पवमानाः १ । असृक्षत क्रि० । सोमाः, शुक्रासः, इन्दवः १ । अभि अ० । विश्वानि, काव्या २ ॥

अन्वितपदार्थः-(शुक्रासः) वीर्यवन्तः (इन्दवः) आर्द्राः (पवमानाः) पूयमानाः (सोमाः), (विश्वानि)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वाणि (काव्या) काव्यानि वेदवचनानि (अभि) अभि व्याप्य तदनुकूला भूत्वा (असृक्षत) सृज्यन्तेऽग्नौ इति शेषः॥ ऋग्वेदे ९ । ६३ । २५ ऽपि ॥ १ ॥

भाषार्थः-(शुक्रासः) शुक्र=वीर्य वाले (इन्दवः) गीले वा तर (पवमानाः) शोधे हुवे (सोमाः) सोम (विश्वानि) सब (काव्या) काव्यों=वेदवचनों को (अभि) आनुकूल्य करके (असृक्षत) अग्नि में छोड़े जाते हैं ॥ ऋ० ९ । ६३ । २५ में भी ॥ १ ॥ अथ द्वितीया-

१ २ ३ २उ ३ १ २
पवमाना दिवस्पर्य्यन्तरिक्षादसृक्षत ।
३ २उ ३ १ २
पृथिव्या अधि सानवि ॥२॥ (१६९८)

पदपाठः-पवमानाः १ । दिवः ५ । परि अ० । अन्तरिक्षात् ५ । असृक्षत क्रि० । पृथिव्याः ५ । अधि अ० । सानवि ७ ॥

अन्वितपदार्थः-(पवमानाः) सोमाः (दिवः) प्रकाशमानात् (अन्तरिक्षात्) अन्तरिक्षलोकात् (परि) सर्वतः (पृथिव्याः) भूमेः (अधि) उपरि (सानवि) पर्वतशिखरे (असृक्षत) वर्षन्ति मेघेन साकमिति शेषः॥ ऋग्वेदे ९ । ६३ । २६ ऽपि ॥ २ ॥

भाषार्थः-(पवमानाः) सोम (दिवः) प्रकाशमान (अन्तरिक्षात्) अन्तरिक्ष से (परि) सब ओर (पृथिव्याः) भूमि से (अधि) ऊपर (सानवि) पर्वतों के शिखर पर (असृक्षत) वर्षते हैं, मेघ के साथ ॥ ऋ० ९ । ६३ । २६ में भी ॥२॥

अथ तृतीया-

१२ ३ १ २ २ ३ २ ३ १ २
पवमानास आशवः शुभ्रा असृग्रमिन्दवः ।
२ ३ २ ३ २ ३ १ २
घ्नन्तो विश्वा अप द्विषः ॥ ३ ॥ [१६] (१६९९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-पवमानासः, आशवः, शुभ्राः १ । अस्रग्रम् क्रि० । इन्दवः, घ्नन्तः १ । अप अ० । द्विषः २ ॥

अन्वितपदार्थः-(आशवः) वेगवन्तः (शुभ्राः) श्वेतवर्णा उज्ज्वलाः (पवमानासः) पूयमानाः (इन्दवः) सोमाः (विश्वाः) समस्तान् (द्विषः) द्वेष्टॄन् (अप-घ्नन्तः) नाशयन्तः सन्तः (अस्रग्रम्) सृज्यन्ते हूयन्तेऽग्नौ ॥ ऋग्वेदे ९ । ६३ । २७ ऽपि ॥ ३ ॥

भाषार्थः-(आशवः) वेगवान् (शुभ्राः) श्वेतवर्ण शुभ्र उज्ज्वल (पवमानासः) शोध्यमान (इन्दवः) सोम (विश्वाः) सब (द्विषः) हानिकारकों को (अप-घ्नन्तः) नाशते हुवे (अस्रग्रम्) अग्नि में छोड़े होमे जाते हैं ॥ ऋ० ९ । ६३ । २७ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य-विश्वामित्रऋषिः । इन्द्राग्नी देवते । गायत्री छन्दः ॥

तत्र प्रथमा-

३ १ २३१२ ३ २ ३ १ २
तोशा वृत्रहणा हुवे सजित्वानाऽपराजिता ।
३ १ २३१२
इन्द्राग्नी वाजसातमा ॥ १ ॥ (१७००)

पदपाठः-तोशा, वृत्रहणा २ । हुवे क्रि० । सजित्वाना, अपराजिता, इन्द्राग्नी, वाजसातमा २ ॥

अन्वितपदार्थः-(तोशा) दुष्टजन्तूनां बाधकौ (वृत्रहणा) वृत्रस्य पापस्य नाशकौ (सजित्वाना) समानं जेतारौ (अपराजिता) अन्यैरपराजितौ (वाजसातमा) अन्नस्य बलस्य वा अतिशयेन दातारौ (इन्द्राग्नी), (हुवे) जुहोमि आहूतौ करोमि वा ॥ ऋग्वेदे ३ । १२ । ४ ऽपि ॥१॥

भाषार्थः-(तोशा) दुष्टों के बाधक (वृत्रहणा) पाप के नाशक (सजि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्त्राना) समान जयशील (अपराजिता) न हारने वाले (वाजसातमा) अन्न वा बल के अत्यन्त देने वाले (इन्द्राग्नी) इन्द्र और अग्नि को (हुवे) होम वा तदर्थ आह्वान करता हूं ॥ ऋ० ३ । १२ । ४ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १ २ ३ १ २ ३ १ २

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।

१ २ ३ २३ १ २

इन्द्राग्नी इष आवृणे ॥२॥ (१७०१) व्याख्याता (१५७३)

अथ द्वितीया—

१ २ ३ १ २र ३ १ २

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।

३ १ २र३ १ २

साकमेकेन कर्मणा ॥३॥ [१७] (१७०२) व्याख्याता (१५७४)

अथ तृतीयतृचस्य—भरद्वाजऋषिः । इन्द्रोदेवता । गायत्री छन्दः ॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २

उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत ।

१ २ ३ २ ३ १ २

अग्ने ससृज्महे गिरः ॥ १ ॥ (१७०३)

पदपाठः—उप अ० । त्वा, रण्वसंदृशम् २ । प्रयस्वन्तः १ । सहस्कृत, अग्ने सं० । ससृज्महे क्रि० । गिरः २ ॥

अन्वितपदार्थः—(सहस्कृत) हे बलेन उत्पन्न ! (अग्ने) पावक ! (रण्य-संदृशं) रमणीयसंदर्शनं (त्वा) त्वाम् (प्रयस्वन्तः) हविर्लक्षणाऽन्नवन्तोवयम् (गिरः) वेदवाणीः (उप ससृज्महे) प्रति विसृजामः उच्चारयामः ॥ ऋग्वेदे ६ । १६ । ३७ ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(सहस्कृत) बल से नमस्कार उत्पन्न किये हुये (अग्ने) हे अग्ने! (रण्व-संदृशम्) रमणीय दर्शनीय (त्वा) तेरे प्रति (प्रयस्वन्तः) हवनरूप अन्न वाले हम यजमान (गिरः) वेदमन्त्रों को (उप सचन्ते) वेदी के समीप बैठ कर उच्चारण करते हैं ॥ ऋ० ६ । १६ । ३७ में भी ॥ १ ॥

अथ द्वितीया-

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २

उप छायामिव घृणेरगन्म शर्म ते वयम् ।

२ ३ १ २

अग्ने हिरण्यसंदृशः ॥ २ ॥ (१७०४)

पदपाठः-उप अ० । छायाम् २ । इव अ० । घृणेः ६ । अगन्म क्रि० । ते ६ । शर्म २ । अग्ने सं० । हिरण्यसंदृशः ६ ॥

अन्वितपदार्थः-(अग्ने) पावक ! (हिरण्यसंदृशः) हिरण्यवद्रमणीयतेजसः (घृणेः) दीप्तस्य (ते) तव (शर्म) सुखम् (वयम्) यजमानाः (उप अगन्म) उपगच्छाम। दृष्टान्तः-(छायामिव) यथा सन्तप्ताश्छायामुपगच्छन्ति तद्वत् ॥ ऋग्वेदे ६ । १६ । ३८ ऽपि ॥ २ ॥

भाषार्थः-(अग्ने) हे पावक ! (हिरण्यसंदृशः) सुवर्णतुल्य तेज वाले (घृणेः) प्रदीप्त (ते) तेरे (शर्म) सुख को (वयम्) हम यजमान लोग (उप-अगन्म) उपासित करें=भोगें । दृष्टान्त-(छायामिव) जैसे सन्तप्त लोग छाया के पास जाते हैं, तद्वत् ॥ ऋ० ६ । १६ । ३८ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ २ ३ १ २ ३ १ २ २

य उग्र इव शर्य्यहा तिग्मशृङ्गो न वꣳसगः ।

२ ३ १ २ ३ १ २

अग्ने पुरो रुरोजिथ ॥ ३ ॥ [१८] (१७०५)

पदपाठः-यः, उग्रः, १ । इव अ० । शर्यहा, तिग्मशृङ्गः १ । न अ० । वंसगः १ । अग्ने सं० । पुरः अ० । रुरोजिथ क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(अग्ने) पावक ! (पुरः) पुरो वर्त्तमानान् दुष्टजन्तूनन्यान्वा (रुरोजिथ) भग्नान्करोषि दहसि । तत्र दृष्टान्तः-(उग्रः) उद्गीर्णबलः (शर्यहा) बलहन्ता (इव) । तथा (यः) यस्त्वमग्निः (तिग्मशृङ्गः) तीक्ष्णशृङ्गः (वंसगः) वननीयगतिर्वृषभः (न) इव, वर्त्तसे ॥ ऋग्वेदे ६ । १६ । ३९ ऽपि ॥ ३ ॥

भाषार्थः-(अग्ने) पावक ! तू (पुरः) आगे आये हुवे दुष्ट जन्तु वा अन्य जो हो उस को (रुरोजिथ) भग्न और भस्म कर देता है । (यः) जो तू (शर्यहा) बलों के नाशक (उग्रः) उद्गीर्णबल धनुर्धारी (इव) सा, और (तिग्मशृङ्गः) तीक्ष्णशृङ्ग वाले (वंसगः) बैल (न) सा, वर्त्तमान है, कि जिस के सामने कोई ठहर नहीं सकता ॥ ऋ० ६ । १६ । ३९ में भी ॥ ३ ॥

अथ पञ्चमर्चस्य-भरद्वाजऋषिः । वैश्वानरोऽग्निर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

३ १ २ ३२३२३ १ २३१२

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ।

१२ ३१२

अजस्रं घर्ममीमहे ॥ १ ॥ (१७०६)

पदपाठः-ऋतावानं, वैश्वानरम् २ । ऋतस्य, ज्योतिषः ६ । पतिम् २ । अजस्रम् अ० । घर्मम् २ । ईमहे क्रि० ॥

अन्वितपदार्थः-(ऋतावानम्) ऋतवन्तम् यज्ञवन्तम् (वैश्वानरं) विश्वेषां नेतारं (ऋतस्य) सत्यस्य (ज्योतिषः) तेजसः (पतिं) स्वामिनम् (अजस्रम्) निरन्तरं (घर्मम्) उष्णमग्निम् (ईमहे) वाञ्छामहे ॥ १ ॥

भाषार्थः-(ऋतावानम्) यज्ञवान् (वैश्वानरम्) सब के नेता (ऋतस्य) सच्चे (ज्योतिषः) तेज के (पतिम्) स्वामी (अजस्रम्) निरन्तर (घर्मम्) गर्म अग्नि को (ईमहे) हम चाहते हैं ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

२ ३१ २ ३ २ ३ २ ३क २र ३ २
य इदं प्रति पप्रथे यज्ञस्य स्वरुत्तिरन् ।
३ २ १ २र ३ २
ऋतूनुत्सृजते वशी ॥ २ ॥ (१७०७)

पदपाठः- यः १ । इदम् २ । प्रति अ० । पप्रथे क्रि० । यज्ञस्य ६ । स्वः अ० । उत्तिरन् १ । ऋतून् २ । उत्सृजते क्रि० । वशी १ ॥

अन्वितपदार्थः-(यः) योग्निः (इदं स्वः) एतदाकाशम् (उत्तिरन्) सन् (प्रति पप्रथे) सर्वतो विस्तीर्णो भवति (वशी) बलेन वशकृत् (यज्ञस्य) अग्निष्टोमादेः (ऋतून्) समयान् (उत्सृजते) अनुष्ठानार्थं सम्यक् सृजति=ऋतुष्वाधीयमानो वसन्तादीन् ऋतूनुत्तमान्कुरुते इत्यभिप्रायं सायणोऽपि संमनुते ॥ २ ॥

भाषार्थः-(यः) जो अग्नि (इदम्) इस (स्वः) आकाश को (उत्तिरन्) तिरता हुवा (प्रति पप्रथे) सब ओर फैलता है और (वशी) बल से वश करने वाला (ऋतून्) वसन्तादि ऋतुओं को (उत्सृजते) उत्तम बनाता है। अर्थात् उस २ ऋतु में अग्न्याधान करने से अग्नि उस २ ऋतु को सुधारता है। यही अभिप्राय सायणाचार्य निकालते हैं ॥ २ ॥

अथ तृतीया-

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य ।
३ २ ३ ३ १ २
सम्राडेको वि राजति ॥ ३ ॥ [१९] (१७०८)

पदपाठः-अग्निः १ । प्रियेषु, धामसु ७ । कामः १ । भूतस्य, भव्यस्य ६ । सम्राट्, एकः १ । विराजति क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—(भूतस्य) पूर्वकालीनस्य (भव्यस्य) उत्तरकालीनस्य च प्राण्यऽप्राणिजातस्य (कामः) कमनीयः (सम्राट्) सम्यग्विराजमानः (एकः) असहायः अद्वितीयः (अग्निः), (प्रियेषु धामसु) प्रीतिकरेषु त्रिषु लोकेषु (वि राजति) विराजते ॥ ३ ॥

भाषार्थः—(भूतस्य) पूर्वकालस्थ और (भव्यस्य) भविष्यत् प्राणी अप्राणियों का (कामः) चाहा हुवा (सम्राट्) सम्यक् प्रकाशमान (एकः) अद्वितीय (अग्निः) अग्नि (प्रियेषु) प्यारे (धामसु) तीनों लोकों में (वि राजति) विराजता है ॥ ३ ॥

इत्यष्टादशाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

इत्यष्टमस्य द्वितीयोऽर्धप्रपाठकः

इति श्रीमत्कण्ववंशाऽवतंस पण्डित श्री हज़ारीलाल स्वामि सूनुना,
हस्तिनापुर पार्श्ववर्त्ति—परीक्षितगढ निवासिना,
तुलसीराम स्वामिना
कृते सामवेदभाष्ये उत्तरार्चिकेऽष्टादशोऽध्यायः ॥ १८ ॥



CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथैकोनविंशोऽध्यायः

तत्र प्रथमे खण्डे

प्रथम तृचस्य–विरूपऋषिः । अग्निर्देवता । गायत्री छन्दः ।

तत्र प्रथमा–

३ २ ३२३ १ २ ३ १ २ ३ २ २

अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वा३ऽ३स्वाम् ।

३ १र २र

कविर्विप्रेण वावृधे ॥ १ ॥ (१७०९)

पदपाठः–अग्निः १। प्रत्नेन, जन्मना ३ । शुम्भानः १ । तन्वम्, स्वाम् २। कविः १ । विप्रेण ३ । वावृधे क्रि० ॥

अन्वितपदार्थः–(कविः) क्रान्तकर्मा (अग्निः) पावकः (प्रत्नेन) पुराणेन (जन्मना) प्रादुर्भावेन (स्वां) स्वकीयां (तन्वम्) तनूं (शुम्भानः) शुम्भयन्सन् (विप्रेण) ब्राह्मणेन ऋत्विजा (वावृधे) प्रवृद्धः प्रदीप्तः क्रियते ॥ ऋग्वेदे तु ८ । ४४ । १२ जन्मना=मन्मना इति पाठः ॥ १ ॥

भाषार्थः–(कविः) क्रान्तकर्मा (अग्निः) अग्नि (प्रत्नेन) पुराणे (जन्मना) जन्म से=सनातन स्वरूप से (स्वाम्) अपने (तन्वम्) तेजःस्वरूप को (शुम्भानः) शोभित करता हुआ (विप्रेण) ब्राह्मण ऋत्विज् से (वावृधे) बढ़ाया जाता है ॥ ऋ० ८ । ४४ । १२ का पाठभेद संस्कृतभाष्य में देखिये ॥१॥

अथ द्वितीया–

३ १र २र ३ १ २ ३ १ २ ३ १ ३

ऊर्जो नपातमाहुवेऽग्निं पावकशोचिषम् ।

३ २ ३ १ २ ३ २

अस्मिन्यज्ञे स्वध्वरे ॥ २ ॥ (१७१०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–ऊर्जोनपातम् २ । आहुवे क्रि० । अग्निम्, पावकशोचिषम् २ । अस्मिन्, यज्ञे, स्वध्वरे ७ ॥

अन्वितपदार्थः–(ऊर्जोनपातम्) बलस्य न यातयितारं बलवर्धकम् (पावकशोचिषं) शोधकतेजस्कम् (अग्निं) वैश्वानरम् (अस्मिन्) अनुष्ठीयमाने (स्वध्वरे) शोभने हिंसारहिते (यज्ञे) यागे (आहुवे) आह्वये आदधे ॥ ऋग्वेदे ८ । ४४ । १३ ऽपि ॥ २ ॥

भाषार्थः–(ऊर्जोनपातम्) बल को न गिराने वाले बलरक्षक बलवर्धक बलवान् (पावकशोचिषम्) शुद्धिकारक लपटों वा तेजों वाले (अग्निम्) अग्नि को (अस्मिन्) इस (स्वध्वरे) शोभन और हिंसारहित (यज्ञे) यज्ञ में (आहुवे) बुलाता=आधान करता हूं ॥ ऋ० ८ । ४४ । १३ में भी ॥ २ ॥

अथ तृतीया–

१ २ ३।१र २र ३ १ २ ३ १ २
स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा ।
३।१र २र ३ १ २
देवैरासत्सि बर्हिषि ॥ ३ ॥ [१] (१७११)

पदपाठः–सः १ । नः ६ । मित्रमहः १ । त्वम् १ । अग्ने सं० । शुक्रेण, शोचिषा ३ । देवैः ३ । आसत्सि क्रि० । बर्हिषि ७ ॥

अन्वितपदार्थः–(अग्ने) पावक ! (सः त्वम्) उक्तगुणविशिष्टस्त्वं (मित्रमहः) मित्रैः पूजनीयः (शुक्रेण) शुद्धेन (तेजसा) प्रकाशेन सह वर्त्तमानः (नः) अस्माकं (बर्हिषि) यज्ञे (देवैः) वाय्वादिभिः सह (आसत्सि) आसीदसि ॥ ऋग्वेदे ८ । ४४ । १४ ऽपि ॥ ३ ॥

भाषार्थः–(अग्ने) हे अग्ने ! (सः) वह (त्वम्) तू (मित्रमहः) मित्रों से सत्कार पाने योग्य (शुक्रेण) शुद्ध (तेजसा) तेज से (नः) हमारे (बर्हिषि) यज्ञ में (देवैः) अन्य देवों वायु आदि के सहित (आसत्सि) विराजमान होता है ॥ ऋ० ८ । ४४ । १४ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीयसूक्तस्य चतुर्ऋचस्य-अवत्सारऋषिः। सोमोदेवता। गायत्री छन्दः॥

तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २
उत्ते शुष्मासो अस्थू रक्षोभिन्दन्तो अद्रिवः।
३ २ ३ १ २ ३ १ २
नुदस्व याः परिस्पृधः॥ १॥ (१७१२)

पदपाठः-उत् अ०। ते ६। शुष्मासः १। अस्थुः क्रि०। रक्षः २। भिन्दन्तः १। अद्रिवः सं०। नुदस्व क्रि०। याः १। परि अ०। स्पृधः १॥

अन्वितपदार्थः-(अद्रिवः) हे मेघवन्! सोम! (ते) तव (शुष्मासः) वेगाः (रक्षः) दुष्टजन्तुं (भिन्दन्तः) विदारयन्तो नाशयन्तः (उत् अस्थुः) उत्तिष्ठन्ति (याः), (स्पृधः) स्पर्धमानाः शत्रुसेनाः अस्मान् प्रति बाधन्ते ताः (परि नुदस्व) बाधस्व॥ ऋग्वेदे ९। ५३। १ऽपि॥१॥

भाषार्थः-(अद्रिवः) हे मेघ वाले! सोम! (ते) तेरे (शुष्मासः) वेग (रक्षः) दुष्ट प्राणी को (भिन्दन्तः) नष्ट करते हुवे (उत् अस्थुः) उठते हैं और (याः) जो (स्पृधः) स्पर्धा करने वाली शत्रुसेना हम से द्वेषपूर्वक बाधा करती हैं उन को (परि नुदस्व) बाधा करके हटा॥ ऋ० ९। ५३। १ में भी॥ १॥

अथ द्वितीया—

३ १ २ ३ १र २र ३ १र २र ३ २
अया निजाघ्निरोजसा रथसंगे धने हिते।
२ ३ १ २ ३ २
स्तवा अबिभ्युषा हृदा॥ २॥ (१७१३)

पदपाठः-अया ३। निजघ्निः १। ओजसा ३। रथसंगे, धने, हिते ७। स्तवै क्रि०। अबिभ्युषा, हृदा ३॥

अन्वितपदार्थः-(अया) अनेन (ओजसा) ओ-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जस्विना (अबिभ्युषा) निर्भयेन (हृदा) हृदयेन (निजघ्निः) नितरां शत्रून्हन्तुं शीलं यस्य तादृशोऽहं (रथसंगे) संग्रामे (धने) द्रव्ये च (हिते) निहिते प्राप्तेऽवसरे सति (स्तवै) त्वां प्रशंसामि ॥ ऋग्वेदे ९ । ५३ । २ ऽपि ॥ २ ॥

भाषार्थः—(अया) इस तेरे सेवन से आप्यायित (ओजसा) बलवान् (अबिभ्युषा) निर्भय (हृदा) हृदय से (निजघ्निः) निरा शत्रुसंहारी मैं (रथसंगे) रथ फंसने वाले संग्राम में और (धने) धन (हिते) जहां निहित हो वहां (स्तवै) तेरी प्रशंसा करता हूं ॥ ऋ० ९ । ५३ । २ में भी ॥२॥

अथ तृतीया—

१ २ ३ २ ३ २उ ३ १ २ ३क २र
अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।
३ १र २र ३ १ २
रुज यस्त्वा पृतन्यति ॥ ३ ॥ (१७१४)

पदपाठः—अस्य ६ । व्रतानि १ । नाधृषे १ । पवमानस्य ६ । दूढ्या ३ । रुज क्रि० । यः १ । त्वा २ । पृतन्यति क्रि० ॥

अन्वितपदार्थः—(अस्य) अस्माभिरुपयुज्यमानस्य (पवमानस्य) सोमस्य (व्रतानि) कर्माणि (दूढ्या) दुर्बुद्धिना पुरुषेण (नाधृषे) अनाधृष्याणि सन्ति, अतः (यः) दुर्बुद्धिः (त्वा) तं सोमं (पृतन्यति) द्वेष्टि तं (रुज) बाधते ॥ ऋग्वेदे ९ । ५३ । ३ ऽपि ॥ ३ ॥

भाषार्थः—(अस्य) इस हमारे वर्त्ताव में आने वाले (पवमानस्य) सोम के (व्रतानि) कर्म (दूढ्या) दुर्बुद्धि दुष्ट मनुष्य से (नाधृषे) धर्षणा नहीं किये जा सकते, अतः (यः) जो दुर्बुद्धि (त्वा) उस सोम को (पृतन्यति) द्वेष करता है, उस को (रुज) बाधता है ॥ ऋ० ९ । ५३ । ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी-

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
तꣳ हिन्वन्ति मदच्युतꣳ हरिं नदीषु वाजिनम् ॥
२ ३ १ २ ३ २
इन्दुमिन्द्राय मत्सरम् ॥ ४ ॥ [२] (१७१५)

पदपाठः- तम् २ । हिन्वन्ति क्रि० । मदच्युतम्, हरिम् २ । नदीषु ७ । वाजिनम्, इन्दुम् २ । इन्द्राय ४ । मत्सरम् २ ॥

अन्वितपदार्थः-(तं), (मत्सरं) हर्षकरं (मदच्युतम्) मदस्य हर्षस्य च्यावयितारम् (हरिं) हरितं (वाजिनं) बलिनम् (इन्दुं) सोमं (नदीषु) प्रवाहेषु निमित्तेषु (इन्द्राय) वृष्टिकृते देवाय (हिन्वन्ति) होमद्वारा प्रेरयन्ति ॥ ऋग्वेदे ९ । ५३ । ४ ऽपि ॥ ४ ॥

भाषार्थः-(तम्) उस (मत्सरम्) हर्षकारक (मदच्युतम्) हर्ष के वर्षाने वाले (हरिम्) हरे (वाजिनम्) बलवान् (इन्दुम्) सोम को (नदीषु) प्रवाहों के निमित्त (इन्द्राय) वर्षा करने वाले वायुविशेष=इन्द्र के लिये (हिन्वन्ति) होमद्वारा भेजते हैं ॥ ऋ० ९ । ५३ । ४ में भी ॥ ४ ॥

अथ तृचस्य तृतीयसूक्तस्य-विश्वामित्र ऋषिः । इन्द्रोदेवता । बृहती छन्दः ॥

तत्र प्रथमा-

२ ३ १ २ ३ १ २ ३ २ ३ १ २ २ ३ २ ३
आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । मा त्वा केचि
१ २ ३ २उ ३ २उ ३ १ २ ३ १ २
न्नियेमु रिन्न पाशिनोऽतिधन्वेव ताँ इहि ॥ १ ॥ (१७१६)

व्याख्याता (२४६)

अथ द्वितीया—

३ १ २ ३ २ ३ २ ३ २ ३ २ ३ २ २ ३
वृत्रखादो बलꣳ रुजः पुरां दर्मो अपामजः । स्थाता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २ ३ १र २र ३ १ २ ३ २
रथस्य हर्यो रभिस्वर इन्द्रो दृढा चिदारुजः ॥२॥ (१७१७)

पदपाठः—वृत्रखादः, बलंरुजः, पुरांदर्मः, अपामजः १। स्थाता १। रथस्य ६। हर्योः ६। अभिस्वरे ७। इन्द्रः १। दृढा २। चित् अ०। आरुजः क्रि०॥

अन्वितपदार्थः—इन्द्रस्य सूर्यस्य शक्तिमाह—(वृत्रखादः) वृत्रं मेघं खादति हिनस्ति सः, (बलं रुजः) चराचरस्य यद्बलं तस्य भञ्जकः, (पुरां दर्मः) देहानां ग्रामनगरादिकानां च दारकः, (अपामजः) अपां मेघस्थानां प्रेरकः (हर्योः) समीचीनतिरश्चीनभेदभिन्नयोः किरणयोः (रथस्य) रमणीयस्य गोलस्य (स्थाता) अधिष्ठाता (इन्द्रः), (दृढा) दृढानि (चित्) अपि (अभिस्वरे) सर्वतउपतापे (आरुजः) भनक्ति ॥ ऋग्वेदे ३ । ४५ । २ ऽपि ॥ २ ॥

भाषार्थः—सूर्य की शक्ति का वर्णन करते हैं कि—(वृत्रखादः) मेघ का भक्षक हिंसक है, (बलंरुजः) चराचर के बल का भङ्ग करने वाला है, (पुरां दर्मः) ग्रामनगरादि और देहों को पुराना करने वाला विदीर्ण करने वाला है, (अपामजः) आकाशमण्डल में मेघस्थ जलों का प्रेरक है (हर्योः) सीधी तिरछी दो प्रकार की किरणों रूपी घोड़ों के (रथस्य) रथ का (स्थाता) बैठने वाला है, (इन्द्रः) सो इन्द्र (अभिस्वरे) अपने सर्वतोव्यापी उपताप वा गरमी में (दृढा) दृढ पदार्थों को (चित्) भी (आरुजः) भग्नकर देता है ॥ ऋ० ३ । ४५ । २ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १र २र
गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गाइव । प्र सुगोपा यवसं

३ १ २ ३ २ ३ १ २
धेनवो यथा ह्रदं कुल्या इवाशत ॥ ३ ॥ [३] (१७१८)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः- गम्भीरान्, उदधीन् २ । इव अ० । क्रतुम् २ । पुष्यसि क्रि० । गाः २ । इव । प्र अ० । सुगोपाः १ । यवसम् २ । धेनवः १ । यथा अ० । ह्रदम् २ । कुल्याः १ । इव । आशत क्रि० ॥

अन्वितपदार्थः-पुनस्तमेव वर्णयति-सूर्यः (इव) यथा (गम्भीरान्), (उदधीन्) समुद्रान् (पुष्यसि) पुष्णाति तथैव (क्रतुम्) यज्ञमपि पुष्णाति (सुगोपाः) शोभनोगोपालः (इव) यथा (गाः) धेनूः पोषयति तद्वत् सूर्यो भूमीः पोषयति (यथा), (धेनवः) गावः (यवसम्) तृणादिकं भक्षं (प्र) प्राप्नुवन्ति तथा यज्ञेन सूर्यो भागं गृह्णाति, (इव) यथा च (कुल्याः) अल्पाः सरितः (ह्रदम्) जलाशयं गभीरम् (आशत) प्राप्नुवन्ति, तथा सूर्यकिरणगताः सोमाद्योषधिरसाः अन्तरिक्षसमुद्रं प्राप्नुवन्ति ॥ इत्थं मन्त्रद्वयेन सूर्यस्य स्थितिकारकत्वं=पुष्टिकारकत्वं, संहारकारकत्वं=विदारकत्वंचाभिहितम् ॥ ऋग्वेदे ३ । ४५ । ३ ऽपि ॥ ३ ॥

भाषार्थः-फिर सूर्य की ही शक्ति कहते हैं-सूर्य (इव) जैसे (गम्भीरान्) गहरे (समुद्रान्) समुद्रों को (पुष्यसि) पुष्ट करता अरता है, वैसे ही (क्रतुम्) यज्ञ को पुष्ट करता है (सुगोपाः) अच्छा गोपालक (इव) जैसे (गाः) गौवों को पुष्ट करता है, वैसे सूर्य भूमियों का पोषण करता है, (यथा) जैसे (धेनवः) गौवें (यवसम्) तृणादि भक्ष वा चारे को (प्र) प्राप्त होती हैं, वैसे सूर्यकिरणें यज्ञ से भाग लेती हैं, (इव) और जैसे (कुल्याः) छोटी नदियें (ह्रदम्) गहरे जलाशय को (आशत) प्राप्त होती हैं, वैसे सूर्यकिरणगत सोमादि ओषधियों के रस आकाश समुद्र को व्यापते हैं ॥ ऋ० ३ । ४५ । ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ प्रगाथस्य चतुर्थे सूक्तस्य—देवातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा—

१ २ ३ २ ३ २ ३ २उ ३ १र २र

यथा गौरो अपाकृतं तृष्यन्नेत्यवेरिणम् ।

३ १ २ ३ २उ ३ १ २ ३ १ २ ३ २उ ३ २

आपित्वे नः प्रपित्वे तूयमागहि कण्वेषु सु सचा पिब ॥१॥

(१७१९) व्याख्याता (२५२)

अथ द्वितीया—

१ २ ३ १ २ ३ १ २ ३ २

मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।

३ २ ३ १ २ ३ २ ३ २उ ३ १ २ ३ १ २

आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥ २ ॥

[४] (१७२०)

पदपाठः—मन्दन्तु क्रि० । त्वा २ । मघवन्, इन्द्र सं० । इन्दवः १ । राधः ६ । देयाय ४ । सुन्वते ४ । आ अ० । अमुष्य ६ । सोमम् २ । अपिबः क्रि० । चमू ७ । सुतम्, ज्येष्ठम्, तद् २ । दधिषे क्रि० । सहः २ ॥

अन्वितपदार्थः—(मघवन्) हे मखवन् यज्ञवन्! (इन्द्र) जीवात्मन् ! (सुन्वते) सोमाभिषवपूर्वकं यज्ञं कुर्वते पुरुषाय (राधः) राधसोधनस्य बलस्य वा (देयाय) दानाय (त्वा) त्वाम् (इन्दवः) सोमरसाः (मन्दन्तु) हर्षयन्तु (अमुष्य) अस्य सुन्वतो यजमानस्य (चमू) चम्वोरधिषवणयोः फलकयोः चमसयोर्वा (सुतम्) अभिषुतं (सोमं) सोमरसम् (आ—अपिबः) आपिबसि (तद्) सोमरसोद्भवं (ज्येष्ठं) महत् (सहः) बलं (दधिषे) दधासि ॥ ऋग्वेदे ८। ४ । ४ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(मघवन्) हे यज्ञ वाले कर्मकर्त्ता ! (इन्द्र) इन्द्रियाधिष्ठातः जीवात्मन् ! (सुन्वते) सोम अभिषुत करके सोमयाग करने वाले यजमान के लिये (राधः) धन के (देयाय) देने को (त्वा) तुझे (इन्दवः) सोमरस (मन्दन्तु) हृष्ट करें (अमुष्य) इस यजमान के (चमू) अधिषवण फलकों या चमसों में (सुतम्) अभिषुत किये हुवे (सोमम्) सोमरस को (आ अपिबः) तू पीता है और (तत्) उस सोमरसोत्पन्न (ज्येष्ठम्) बड़े (सहः) बल को (दधिषे) धारता है ॥ ऋ० ८ । ४ । ४ में भी ॥ २ ॥

अथ प्रगाथात्मकपञ्चमसूक्तस्य-गोतम ऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा—

२ ३ १२ २२ ३१ २ ३ १ २
त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम् ।
२उ ३ १ २ ३ २ ३ १ २ ३ १ २
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥१॥
(१७२१) व्याख्याता (२४७)

अथ द्वितीया-

२ ३ १ २ ३ १ २ ३ १ २ ३ १२ २२३१ २
मा ते राधांसि मा त ऊतयो वसोऽस्मान् कदाचना दभन् ।
१ २ ३ १ २ ३ १२ ३२ ३ २
विश्वा च न उप मिमीहि मानुष वसूनि चर्षणिभ्य आ ॥२॥
[५] (१७२२)

पदपाठः-मा अ० । ते ६ । राधांसि १ । मा । ते । ऊतयः १ । वसो सं० । अस्मान् २ । कदाचन अ० । आदभन् क्रि० । विश्वा २ । च अ० । नः ४ । उपमिमीहि क्रि० । मानुष सं० । वसूनि २ । चर्षणिभ्यः ४ । आ अ० ॥

अन्वितपदार्थः-(मानुष) हे मनुष्याणां हितकर ! (वसो) वासयितरिन्द्र ! परमेश्वर ! (ते) तव (राधांसि) अन्नानि (अस्मान्) भवद्भक्तान् (कदाचन) कदापि (मा) न (आदभन्) हिंस्युः (ते) तव (ऊतयः) रक्षाः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(मा) न हिंस्युः । (च) तथा (विश्वा) सर्वाणि विद्यादीनि (वसूनि) धनानि (चर्षणिभ्यः) मनुष्येभ्यः (नः) अस्मभ्यम् (आ-उप-मिमीहि) सर्वतः आहृत्य देहि ॥ ऋग्वेदे १ । ८४ । २० ऽपि ॥ २ ॥

भाषार्थः-(मानुष) हे मनुष्यमात्र के हितकारी ! (वसो) वसाने वाले ! इन्द्र=परमेश्वर ! (ते) तेरे (राधांसि) उत्पन्न किये अन्न गेहूं आदि (अस्मान्) हम को (कदाचन) कभी (मा आदभन्) दुःख न दें न मारें (ते) तेरी की हुई (ऊतयः) रक्षायें (मा) दुःख न दें (च) और (विश्वा) सब (वसूनि) विद्यादिधन (नः) हम (चर्षणिभ्यः) मनुष्यों के लिये (आ-उप-मिमीहि) सर्वतः दीजिये ॥ ऋ० १ । ८४ । २० में भी ॥ २ ॥

इत्यूनविंशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे-

प्रथम तृचस्य-पुरुमीढोऽजमीढो वा ऋषिः । उषा देवता । गायत्री छन्दः ॥

तत्र प्रथमा-

२ ३ २ ३१३ १ २ ३ २ ३ २ ३ १ २

प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः ।

३ १ २ ३ २

दिवो अदर्शि दुहिता ॥ १ ॥ (१७२३)

पदपाठः-प्रति अ० । स्या १ । सूनरी, जनी, व्युच्छन्ती १ । स्वसुः, दिवः ६ । अदर्शि क्रि० । दुहिता १ ॥

अन्वितपदार्थः-(स्या) सा प्रसूयमाना, (सूनरी) सुष्ठु प्राणिनां नेत्री, (जनी) फलानां जनयित्री, (स्वसुः) स्वसृस्थानीयायाः रात्रेः (परि) अन्ते रात्रिपर्यवसाने (व्युच्छन्ती) तमो निवारयन्ती दीप्तिं कुर्वन्ती (दिवः) सूर्यस्य द्युलोकस्य वा (दुहिता) पुत्रीस्थानीया=उषा (प्रति-अदर्शि), जनैरिति शेषः ॥ ऋग्वेदे ४ । ५२ । १ ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(एषा) वह प्रकट होती हुई, (सूनरी) मनुष्यों को सुमार्ग पर ले चलने वाली, (जनी) फलों की जनने वाली, (स्वसुः) अपनी बहिन रात्रि के (परि) अन्त में (व्युच्छन्ती) अन्धकार को निवारती और प्रकाश को फैलाती हुई, (दिवः) सूर्य वा द्युलोक की (दुहिता) पुत्री के तुल्य उषा (अदर्शि) दीख रही है ॥ ऋ० ४ । ५२ । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १ २ ३ १र २र ३ १ २

अश्वेव चित्राऽरुषी माता गवामृतावरी ।

१ २ ३ १ २ ३ २

सखाऽभूदश्विनोरुषा ॥ २ ॥ (१७२४)

पदपाठः—अश्वा १ । इव अ० । चित्रा, अरुषी, माता १ । गवाम् ६ । ऋतावरी, सखा १ । अभूत् क्रि० । अश्विनोः ६ । उषा १ ॥

अन्वितपदार्थः—(उषा), (अश्वा) विद्युत् (इव), (चित्रा) चमत्कारवती, (अरुषी) अरुणोदया, (गवां माता) रश्मीनां निर्मात्री, (ऋतावरी) हितकरी (अश्विनोः) प्राणाऽपानयोः (सखा) सखी सहचरी (अभूत्) भवति ॥ ऋग्वेदे ४ । ५२ । २ ऽपि ॥ २ ॥

भाषार्थः—(उषा) प्रातर्वेला, (अश्वा इव) बिजली सी (चित्रा) चमत्कार वाली, (अरुषी) अरुण वर्ण से उदय होने वाली, (गवां माता) किरणों की जननी, (ऋतावरी) हितकारिणी, (अश्विनोः सखा) प्राण अपान की सखी (अभूत्) है ॥ ऋ० ४ । ५२ । २ में भी ॥ २ ॥

अथ तृतीया—

३ १र २र ३ १ २ ३ २ ३ १र २र

उत सखाऽस्यश्विनोरुत माता गवामसि ।

३ २ ३ १ २

उतोषो वस्व ईशिषे ॥ ३ ॥ [६] (१७२५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–उत अ० । सखा १ । असि क्रि० । अश्विनोः ६ । उत । माता १ । गवाम् ६ । असि । उत । उषः सं० । वस्वः ६ । ईशिषे क्रि० ॥

अन्वितपदार्थः–(उत) अपि च (अश्विनोः) प्राणाऽपानयोः (सखा) सखी (असि) भवसि (उत) तथा (गवाम्) किरणानां (माता) निर्मात्री जननी (असि) भवसि (उत) तथा च (उषः) हे उषस्तम् (वस्वः) विद्यादेर्धनस्य (ईशिषे) स्वामिन्यसि ॥ ऋग्वेदे ४ । ५२ । ३ ऽपि ॥ ३ ॥

भाषार्थः–हे (उषः) उषा ! तू (उत) और भी (अश्विनोः) प्राणाऽपानों की (सखा) सहचरी (असि) है, (उत) और (गवाम्) किरणों की (माता) जननी (असि) है (उत) और (वस्वः) विद्यादि धन की (ईशिषे) स्वामिनी है ॥ ऋ० ४ । ५२ । ३ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य–प्रस्कण्वऋषिः । अश्विनौ देवते । गायत्री छन्दः ॥

तत्र प्रथमा–

३ २ ३ १र २र ३क २र ३ २ ३ २

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।

३ १ २ ३ २

स्तुषे वामश्विना बृहत् ॥१॥ (१७२६) व्याख्याता (१७८)

अथ द्वितीया–

२ ३ १र २र ३ १ २ ३ २

या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।

३ २ ३ १ २३१ २

धिया देवा वसुविदा ॥ २ ॥ (१७२७)

पदपाठः–या, दस्रा, सिन्धुमातरा, मनोतरा १ । रयीणाम् ६ । धिया ३ । देवा, वसुविदा १ ॥

अन्वितपदार्थः–(या) यौ , (सिन्धुमातरा) सिन्धु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

माता ययोस्तौ, (रयीणां मनोतरा) धनानां मनसा तारयितारौ (धिया वसुविदा) बुद्ध्या धनस्य लम्भयितारौ (दस्रा) दस्रौ अश्विनौ प्राणाऽपानौ सूर्याचन्द्रमसौ वा (देवा) देवौ स्तस्तौ [स्तुषे] स्तौमीति पूर्वेणान्वयः ॥ ऋग्वेदे १ । ४६ । २ ऽपि ॥ २ ॥

भाषार्थः-(या) जो, (सिन्धुमातरा) जिन की माता समुद्र है वे, (रयीणाम्) धनों के (मनोतरा) मन से तिराने वाले (धिया) कर्म से (वसुविदा) धन के लभाने वाले (दस्रा) प्राण अपान वा सूर्य चन्द्रमा (देवा) दो देवता हैं [उन की स्तुति=प्रशंसा करता हूं-] यह पूर्व मन्त्र से अन्वय है ॥ ऋ० १ । ४६ । २ में भी ॥ २ ॥

अथ तृतीया-

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २

वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि ।

२ ३ २ ३ २ ३ १ २

यद्वाꣳ रथो विभिष्पतात् ॥ ३ ॥ [७] (१७२८)

पदपाठः-वच्यन्ते क्रि० । वाम् ६ । ककुहासः १ । जूर्णायाम् ७ । अधि अ० । विष्टपि ७ । यत् अ० । वाम् ६ । रथः १ । विभिः ३ । पतात् क्रि० ॥

अन्वितपदार्थः-(वाम्) युवयोः प्राणापानयोरश्विनोः (रथः) रमणीयो वेगः (यत्) यस्मात् कारणात् (जूर्णीयाम्) ज्वरितायामुपतप्तायाम् (विष्टपि) दिवि (अधि) उपरि (विभिः) पक्षिगणैः सह (पतात्) पतन्ति गच्छति, तस्मात् (वाम्) युवयोः (ककुहासः) महत्त्वानि (वच्यन्ते) उच्यन्ते मन्त्रैः ॥ ऋग्वेदे १ । ४६ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(वाम्) तुम दोनों प्राणाऽपानों का (रथः) रमणीय वेग (यत्) जिस कारण (जूर्णायाम्) गर्म (विष्टपि) आकाश में (अधि)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऊपर (विभिः) पक्षिगणों के साथ (पतात्) जाता है अतः (वाम्) तुम्हारे (ककुहासः) महत्त्व (वद्यन्ते) मन्त्रों द्वारा कहे जाते हैं ॥ ऋ० १।४६।३ में भी ॥३॥

अथ तृतीयतृचस्य-गोतमऋषिः । उषा देवता । उष्णिक् छन्दः ॥

तत्र प्रथमा-

२ ३ २ ३१२ २२३ १ २
उषस्तच्चित्रमाभराऽस्मभ्यं वाजिनीवति ।
१ २ ३ २ ३ १२ ३ १ २
येन तोकं च तनयं च धामहे ॥ १ ॥ (१७२९)

पदपाठः-उषः सं० । तत्, चित्रम् २ । आभर क्रि० । अस्मभ्यम् ४ । वाजिनीवति सं० । येन ३ । तोकम् २ । च अ० । तनयम् २ । च । धामहे क्रि० ॥

अन्वितपदार्थः-(वाजिनीवति) हे अन्नवति ! हव्यसमूहयुक्ते ! (उषः) प्रातर्वेले ! (अस्मभ्यम्) प्रातरुत्थाय त्वदुपासकेभ्यः (चित्रं) चायनीयं (तत्) धनम् विद्यादि (आभर) आहर प्रयच्छ (येन), (तोकं) पुत्रं (च) तथा (तनयं च) तत्पुत्रं च (धामहे) धारयाम ॥ ऋग्वेदे १ । ९२ । १३ ऽपि ॥ तथा च निरुक्तकृतं व्याख्यानम्- " उषस्तच्चित्रं चायनीयं मंहनीयं धनमाहरास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि " इति निरु० १२ । ६ । ॥ १ ॥

भाषार्थः-(वाजिनीवति) हे हव्यान्नयुक्ते ! (उषः) उषा ! (अस्मभ्यम्) प्रातः उठकर तेरा सेवन और याग करने वाले हम लोगों के लिये (चित्रम्) आदरणीय (तत्) उस धन को (आभर) ला (येन) जिससे हम (तोकं च) पुत्र और (तनयं च) पौत्र का (धामहे) धारण करें ॥ निरुक्तकृत व्याख्यान संस्कृत भाष्य में देखिये ॥ ऋ० १ । ९२ । १३ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ १र २र ३ १ २
उषो अद्येह गोमत्यश्वावति विभावरि ।
३ २३ १ २
रेवदस्मे व्युच्छ सूनृतावति ॥ २ ॥ (१७३०)

पदपाठः—उषः सं० । अद्य, इह अ० । गोमति, अश्वावति, विभावरि सं० । रेवत् २ । अस्मे ४ । व्युच्छ क्रि० । सूनृतावति सं० ॥

अन्वितपदार्थः—(गोमति) किरणवति । धेनुमति ! वा (अश्वावति) प्राणवायुवति ! तुरगवति ! वा (विभावरि) प्रकाशमाने ! (सूनृतावति) प्रियवाणीवति ! (उषः) प्रातर्वेले ! (अस्मे) अस्मभ्यं त्वद्यजनपरेभ्यः (अद्य) वर्त्तमानसमये (इह) अस्मिन् देशे (रेवत्) धनवत् यथा स्यात्तथा (व्युच्छ) अन्धकारं नाशय विवासय ॥

उषसि शोभनाः किरणाः शोभना धेनवो वा भवन्ति, शोभना अश्वाः प्राणा वा भवन्ति, प्रकाशोजायते, प्रिया सत्या च वाक् प्रयुज्यते, अतस्तद्याजिनां धनधान्यादि लाभपूर्वकं सा उषा तमो विवासयति ॥ ऋग्वेदे १ । ९२ । १४ ऽपि ॥२॥

भाषार्थः—(गोमति) हे गौवों वा किरणों वाली ! (अश्वावति) घोड़ों वा प्राणों वाली ! (विभावरि) प्रकाश वाली ! (सूनृतावति) प्रिय सत्य वाणी वाली ! (उषः) प्रभातबेला ! तू (अस्मे) हम तेरे यजन करने वालों के लिये (अद्य) अब (इह) यहां (रेवत्) धनयुक्त अन्य भोग्य पदार्थ हों, ऐसा (व्युच्छ) अन्धकार को निवृत्त कर ॥

उषः काल में उत्तमसुन्दर गौवें वा किरणें हों, उत्तम घोड़े वा प्राण हों, सुन्दर प्रकाश हो, प्यारीवाणी को मनुष्य पशु पक्षी आदि बोल रहे हों, उषा का यज्ञ हो रहा हो, ऐसी उषा=प्रभात बेला हम को हो, जिस से धान्य धन आदि सुखवृद्धिपूर्वक अन्धकार का निवारण नित्य हुवा करे ॥ ऋ० १ । ९२ । १४ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत तृतीया—

३ १र २र ३ १ २ ३ २ ३ १ २
युङ्क्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
१ २ ३ २ ३ १ २ ३ १ २
अथा नो विश्वा सौभगान्यावह ॥३॥ [८] (१७३१)

पदपाठः—युङ्क्ष्व क्रि० । हि अ० । वाजिनिवति सं० । अश्वान् २ । अद्य अ० । अरुणान् २ । उषः सं० । अथ अ० । नः ४ । विश्वा, सौभगानि २ । आवह क्रि० ॥

अन्वितपदार्थः—(वाजिनीवति) हे हव्यान्नवति ! (उषः) प्रभातवेले ! (अरुणान्) रक्तवर्णान् (अश्वान्) तुरगा निव किरणान् (हि) निश्चयेन (युङ्क्ष्व) योजय (अथ) अनन्तरं (नः) अस्मभ्यं (विश्वा) सर्वाणि (सौभगा) सौभाग्यानि (आवह) प्रापय ॥

ये उषस्युत्थाय यज्ञं कुर्वन्ति तद् द्वारोषसमन्नवतीं संपादयन्ति ते सर्वसौभाग्ययुक्ता जायन्ते इति भावः ॥ ऋग्वेदे १ । ९२ । १५ ऽपि ॥ ३ ॥

भाषार्थः—(वाजिनीवति) हे हव्य अन्न पाई हुई ! (उषः) प्रातर्वेला ! तू अपने (अरुणान्) लाल (अश्वान्) घोड़ों=किरणों को (हि) निश्चय (युङ्क्ष्व) जोत (अथ) फिर (नः) हमारे लिये (विश्वा) सब (सौभगा) सौभाग्यों को (आवह) पहुंचा ॥

जो लोग उषः काल में उठकर यज्ञ करते हैं और उस यज्ञ द्वारा उषा को हव्याऽन्नवती बनाते हैं, वे अरुणोदय के उस उत्तम प्रभाव से सब सौभाग्य पाते हैं ॥ ऋ० १ । ९२ । १५ में भी ॥ ३ ॥

अथ तृतीय तृचस्य—गोतमऋषिः । अश्विनौ देवते । उष्णिक्छन्दः ॥

तत्र प्रथमा—

१ २ ३ २ ३ १र २र ३ १ २
अश्विना वर्त्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ २र ३ १२ ३ १ २
अर्वाग्रथꣳसमनसा नियच्छतम् ॥ १ ॥ (१७३२)

पदपाठः–अश्विना सं० । वर्त्तिः १=२ । अस्मत् ५ । आ अ० । गोमत् २ । दस्रा सं० । हिरण्यवत् २ । अर्वाक् अ० । रथम् २ । समनसा सं० । नियच्छतम् क्रि० ॥

अन्वितपदार्थः–हे (अश्विनौ) व्यापनशीलौ ! (दस्रा) दोषाणामुपक्षपयितारौ ! (समनसा) समानमनस्कौ ! प्राणाऽपानौ ! युवां (गोमत्) इन्द्रियवत् (हिरण्यवत्) तेजस्वि (वर्त्तिः) वर्त्ति वर्त्तनशीलं (रथम्) रमणीयं स्वगमनागमनम् (अस्मत्) अस्मत्तोनियताऽऽहारविहारवद्भ्यः (अर्वाक्) अर्वाचीनं सम्मुखमनुकूलम् (आ–नि–यच्छतम्) प्रवर्त्तयतम् ॥ ऋग्वेदे १ । ९२ । १६ ऽपि ॥ १ ॥

भाषार्थः–(अश्विनौ) व्यापनशील (दस्रा) वातपित्तादि दोषों के नाशक (समनसा) समान मन रखने वाले प्राणाऽपान ! दोनों (गोमत्) इन्द्रिय सामर्थ्यसहित (हिरण्यवत्) तेजोयुक्त (वर्त्तिः) परिवर्त्ती (रथम्) अपने गमनागमन को (अस्मत्) हम युक्ताऽऽहार विहार वालों से (अर्वाक्) अनुकूल (आ–नि–यच्छतम्) वर्त्ताओ ॥ ऋ० १ । ९२ । १६ में भी ॥ १ ॥

अथ द्वितीया–

२उ ३१ २१ १२ ३१र २र
एह देवा मयोभुवा दस्रा हिरण्यवर्त्तनी ।
३ १२ १ १२
उषर्बुधो वहन्तु सोमपीतये ॥ २ ॥ (१७३३)

पदपाठः–आ, इह अ० । देवा, मयोभुवा, दस्रा, हिरण्यवर्त्तनी २ । उषर्बुधः १ । वहन्तु क्रि० । सोमपीतये ४ ॥

अन्वितपदार्थः–(उषर्बुधः) प्रातरुषसि उत्थातारः निरलसा मनुष्याः (इह) लोके (मयोभुवा) मयोभुवौ सुखस्य भावयितारौ (दस्रा) दोषाणामुपक्षयकरौ (हिरण्य-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्त्तनी) तेजोमार्गौ (देवा) देवौ प्राणाऽपानौ प्राणोदानौ वा (सोमपीतये) सोमाद्युत्तमरसपानाय (आ-वहन्तु) आवाह्य सेवन्ताम् ॥ ऋग्वेदे १ । ९२ । १८ ऽपि ॥ २ ॥

भाषार्थः-(उषर्बुधः) प्रभात समय जाग उठने वाले मनुष्य (इह) इस लोक में (मयोभुवा) सुखदायी (दस्रा) दोष शमन करने वाले (हिरण्य वर्त्तनी) तेजस्वि मार्ग वाले (देवा) प्राण अपान वा प्राण उदान वायु देवों को (सोमपीतये) सोमादि उत्तम ओषधिरस पानार्थ (आ-वहन्तु) आवाहन करके सेवन करें ॥ ऋ० १ । ९२ । १८ में भी ॥ २ ॥

अथ तृतीया-

२ ३ २उ ३ २ ३ २उ ३ १ २ ३ १ २

यावित्था द्युलोकमादिवो ज्योतिर्जनाय चक्रथुः ।

२ ३ १ २ ३ २

आ न ऊर्जं वहतमश्विना युवम् ॥ ३ ॥ [९] (१७३४)

पदपाठः-यौ १ । इत्था अ० । द्युलोकम् २ । आ अ० । दिवः ५ । ज्योतिः २ । जनाय ४ । चक्रथुः क्रि० । आ अ० । नः ४ । ऊर्जम् २ । वहतम् क्रि० । अश्विना सं० । युवम् १ ॥

अन्वितपदार्थः-(अश्विना) अश्विनौ ! देवौ ! (यौ), युवाम् (दिवः आ) द्युलोकादारभ्य (जनाय) मनुष्यादि प्राणिवर्गाय (ज्योतिः) प्रकाशम् (इत्था) इत्थमस्माभिरनुभूयमानेन प्रकारेण (चक्रथुः) कुरुथः, तौ (युवम्) युवाम् (द्युलोकम्) प्रशंसनीयम् (ऊर्जम्) बलप्रदमन्नरसम् (नः) अस्मभ्यम् (आ-वहतम्) प्रापयथः ॥ " तत्कावश्विनौ ? द्यावापृथिव्यावित्येके, ऽहोरात्रावित्येके, सूर्याचन्द्रमसावित्येके " इति निरुक्ते १२ । १ ॥ ऋग्वेदे १ । ९२ । १७ ऽपि ॥ ३ ॥

भाषार्थः-(अश्विना) हे अश्विनौ देवौ ! (यौ) जो तुम दोनों (दिवः आ) द्युलोक से आरम्भ करके (जनाय) मनुष्यादि प्राणिवर्ग के लिये

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(ज्योतिः) प्रकाश को (इत्था) इस प्रकार हमारे अनुभव में आई रीति से (ऊऋथुः) करते हो, वे (युवम्) तुम दोनों (श्लोकम्) प्रशंसनीय (ऊर्जम्) बलदायक अन्नरस को (नः) हमारे लिये (आ-वहतम्) लाते हो ॥

अश्विनौ का अर्थ निरुक्त १२ । १ में बहुत प्रकार से किया है । यथा— कोई द्युलोक पृथिवी लोक को, कोई दिन रात्रि को, कोई सूर्य चन्द्रमा को अश्विनौ कहते हैं इत्यादि संस्कृत भाष्य में निरुक्त प्रमाण उद्धृत है ॥ ऋ० १ । ९२ । १७ में भी ॥ ३ ॥

इत्येकोनविंशाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे—

प्रथम तृचस्य— वसुश्रुत ऋषिः । अग्निर्देवता । पङ्क्तिश्छन्दः ॥ तत्र प्रथमा—

३ १र २र ३ २ ३ १र २र ३ १ २
अग्निं तं मन्ये योवसुरस्तं यं यन्ति धेनवः ।
२ ३ १ २ ३ २उ ३ १ २ ३ २ ३
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन
१ २ ३ २ ३ १ २
इषꣳ स्तोतृभ्य आभर ॥१॥(१७३५) व्याख्याता (४२५)

अथ द्वितीया—

३ २उ ३ १ २ ३ १र २र ३ १ २
अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
३ २र ३ २ ३ २ ३ २ ३ १ २ ३ २ ३
अग्नीराये स्वाभुवꣳ सुप्रीतो याति वार्य
१ २ ३ २ ३ १ २
मिषꣳ स्तोतृभ्य आभर ॥ २ ॥ (१७३६)

पदपाठः—अग्निः १ । हि अ० । वाजिनम् २ । विशे ४ । ददाति क्रि० । विश्वचर्षणिः, अग्निः १ । राये ४ । स्वाभुवम् २ । सुप्रीतः १ । याति क्रि० । वार्यम् २ । इषम् २ । स्तोतृभ्यः ४ । आभर क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः- (अग्निः) पावकः (हि) खलु (विशे) प्रजायै (वाजिनं) बलवन्तमन्नादिकं (ददाति) प्रयच्छति (विश्वचर्षणिः) सर्वस्य दर्शकः दृष्टिसाहाय्यप्रदः- (अग्निः) पावकः (स्वाभुवम्) सुष्ठु आ सर्वतो व्याप्तम् (वार्यम्) वरणीयं तेजः (याति) प्रापयति (सुप्रीतः) सुष्ठु होमेन प्रसादितः सोऽग्निः (राये) धनादिकायैश्वर्याय (स्तोतृभ्यः) ऋत्विगादिभ्यः (इषम्) अन्नम् (आभर) अन्नोत्पादेनाहरति ॥ ऋग्वेदे ५ । ६ । ३ ऽपि ॥ २ ॥

भाषार्थः-(अग्निः) अग्नि (हि) ही (विशे) प्रजा के लिये (वाजिनम्) बलयुक्त अन्नादि (ददाति) देता है, (विश्वचर्षणिः) सब को देखने का सामर्थ्य देने वाला (अग्निः) अग्नि (स्वाभुवम्) सुन्दर सर्वतोव्याप्त (वार्यम्) वरणीय तेज को (याति) प्राप्त कराता है (सुप्रीतः) शोभन होम से प्रसन्न किया हुवा अग्नि (राये) धनादि ऐश्वर्य के लिये (स्तोतृभ्यः) ऋत्विज् आदि को (इषम्) अन्न (आभर) लाकर देता है ॥ ऋ० ५ । ६ । ३ में भी ॥२॥

अथ तृतीया—

२ १२ २२३ २३ ३ १ २ ३ १ २
सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
१२ २२ ३ २ ३ १ २ १ २ ३ २ ३
समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय
१२ ३ २ ३ १ २
इषꣳ स्तोतृभ्य आभर ॥ ३ ॥ [१०] (१७३७)

पदपाठः-सः, अग्निः, यः, वसुः १ । गृणे क्रि० । सम् अ० । यम् २ । आयन्ति क्रि० । धेनवः १ । सम् । अर्वन्तः, रघुद्रुवः १ । सम् । सुजातासः, सूरयः १ । इषम् । स्तोतृभ्यः । आभर ॥

अन्वितपदार्थः-(सः) उक्तगुणः (अग्निः) पावकः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(यः) यो हि (वसुः) अष्टवस्वन्तर्गतः (यम्) अग्निम् (धेनवः) वाचः (सम्-आ-यन्ति) समागच्छन्ति (रघु-द्रुवः) क्षिप्रगमनाः (अर्वन्तः) अश्वाः प्राणाश्च [श० ५।२।४।९] (सम्) समागच्छन्ति, (सुजातासः) शोभन जन्मानः (सूरयः) विद्वांसः (सम्) समागच्छन्ति, तं (गृणे) स्तौमि प्रशंसामि, सर्हि (स्तोतृभ्यः इषम् आभर) ॥ ऋग्वेदे ५ । ६ । ४ यजुर्वेदे १५ । ४३ ऽपि च ॥ ३ ॥

भाषार्थः-(यः) वह (अग्निः) अग्नि (यः) जो (वसुः) वसु है (यम्) जिस का (धेनवः) वाणीयें (सम्-आ-यन्ति) समागम करती हैं, (रघुद्रुवः) शीघ्रगामी (अर्वन्तः) घोड़े वा प्राण [श० ५ । २ । ४ । ९] (सम्) समागम करते हैं, (सुजातासः) सुष्ठु शोभन जन्म वाले (सूरयः) विद्वान् (सम्) समागम करते हैं, उस को (गृणे) मैं प्रशंसित करता हूं, वह (स्तोतृभ्यः इषम् आभर) ऋत्विज् आदि को अन्न प्राप्त कराता है ॥ ऋ० ५ । ६ । ४ यजुः १५ । ४३ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य-सत्यश्रवा वत्सो बर्हिः । उषा देवता । पङ्क्तिश्छन्दः ॥

तत्र प्रथमा-

३१ २ ३ १ २ ३१ २ ३२ ३१ २
महे नो अद्य बोधयोषो राये दिवित्मती ।
१ २ ३ १ २ ३ १ २ ३ १र
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये
२र ३ १ २
सुजातेअश्वसूनृते ॥ १ ॥ (१७३८) व्याख्याता (४२१)

अथ द्वितीया—

१ २ ३१ २ ३१र २र १र २ ३
या सुनीथे शोचद्रथे व्यौच्छो दुहितर्दिवः । सा व्युच्छ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ ३१२ ३१२ २३१२

सहीयसि सत्यश्रवसि वाय्ये, सुजाते अश्वसूनृते ॥२॥(१७३१)

पदपाठः– या १। सुनीथे, शोचद्रथे सं० । व्यौच्छः क्रि० । दुहितः सं० । दिवः ६ । सा १ । व्युच्छ क्रि० । सहीयसि, सत्यश्रवसि, वाय्ये, सुजाते, अश्वसूनृते सं० ॥

अन्वितपदार्थः–(सुनीथे) सुप्राप्ते ! (शोचद्रथे) दीप्तिमद्रथे ! (सहीयसि) अतिशयितबलवति ! (सत्यश्रवसि) सत्ययशस्के ! (वाय्ये) विस्तृते ! (सुजाते) सु=शोभनं जन्म यस्यास्तादृशे ! (अश्वसूनृते) अश्वो व्यापनः प्रियशब्दो यस्यां तथाभूते (दिवः दुहितः) द्युलोकस्य सूर्यस्य वा पुत्रि ! उषर्देवि ! (या) या त्वम् (व्यौच्छः) तमोविवासनं पूर्वं कृतवती, (सा) सैव त्वम् (व्युच्छ) अद्यापि तमो विवासय ॥

उषःस्तुतिव्याजेन परमात्मोपदिशति–ये मनुष्या उषसि प्रबोधमाप्नुवन्ति ते महद्धनधान्याद्यैश्वर्यमाप्नुवन्ति, उषर्वद्वर्त्तमाना स्त्री च यत्र गृहे भवति तत्रापि धनधान्यादयो वर्धन्ते। यथोषसः शोभनं जन्म सर्वाह्लादकं, यथोषसि सर्वजन्तवः प्रियं सूनृतं शब्दं कुर्वन्ति, यथा चोषाः सर्वतो विस्तीर्णा, यथा च प्रकाशवती वर्त्तते तथैव तत्तद्गुणविशिष्टयोत्तमस्त्रियाऽपि भवितव्यम् इति भावः ॥ ऋग्वेदे ५। ७९। २ ऽपि ॥ २ ॥

भाषार्थः–(सुनीथे) सुन्दर प्राप्ति वाली ! (शोचद्रथे) प्रकाशक रथ=रमणीय स्वरूप वाली ! (सहीयसि) अत्यन्त बलवति ! (सत्यश्रवसि) सच्चे यश वाली ! (अश्वसूनृते) व्यापक प्यारे शब्द वाली ! (दिवः दुहितः) द्युलोक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वा सूर्य की पुत्रि। उषाः! देवि! (या) जो तू (व्यौच्छः) पूर्व अन्धकार का नाश करती थी (सा) वही तू (व्युच्छ) अब भी अन्धकार को निवारक।

उषा=प्रभातबेला की स्तुति के बहाने मनुष्यों और स्त्रियों को परमात्मा का उपदेश है कि जो लोग उषःकाल में उठते हैं वे बड़े धन धान्यादि ऐश्वर्य को प्राप्त होते हैं, और जिन घरों में उषा के तुल्य गुणवती स्त्रियें होती हैं वहां भी धनधान्यादि की वृद्धि होती है। जैसे उषा का सुन्दर दर्शनीय जन्म सब को आह्लाद उत्पन्न करता है, जैसे उषःकाल में सब जन्तु प्यारा शब्द करते हैं, जैसे उषा सब ओर विस्तृत होती है, और जैसे प्रकाशमान है, वैसे ही उत्तम स्त्रियों को भी बनना चाहिये॥ ऋ० ५। ७९। २ में भी॥

इस मन्त्र में सुजाते अश्वसूनृते शब्दों पर जो महाभाष्यकार पतञ्जलि मुनि ने अर्धएकार, अर्धओकार की आशङ्का और समाधान किया है उस को यहां सत्यव्रत सामश्रमी जी इस प्रकार टिप्पणी में अङ्कित करते हैं कि:—

उदाहृतं चैतत्पदद्वयं महर्षि पतञ्जलिना द्वितीयाह्निके, तथाहि-" ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते। 'सजाते अश्वसूनृते' इत्यादिना आशङ्क्य, समाहितं-" पारिषत्कृतिरेषा, तत्र भवतां नैव हि लोके न च वेदेऽर्धएकारोऽर्ध ओकारोवास्तीति "। अत्र च नागेशः-" शास्त्रविशेषाध्यायिनां समवायः परिषत् पर्षद्वा, तत्र भवा कृतिरित्यर्थः"-इति॥ २॥

अथ तृतीया-

१ २ ३ २ ३ १ २ ३ २र २उ ३ १ २
सा नो अद्याभरद्वसुर्व्युच्छादुहितर्दिवः। यो व्यौच्छः सहीयसि
३ १ २ ३ १र २र ३ १ २
सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥ ३॥ [११] (१७४०)

पदपाठः-सा १। नः ६। अद्य अ०। आभरद्वसुः १। व्युच्छ क्रि०। दुहितः सं०। दिवः ६। या १। उ अ०। व्यौच्छः क्रि०। सहीयसि, सत्यश्रवसि, वाय्ये, सुजाते, अश्वसूनृते सं०॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(दिवः) द्युलोकस्य सूर्यस्य वा (दुहितः) पुत्रि ! उषर्देवि ! (या) या (आभरद्वसुः) समन्ततो धनादि भरन्ती सती त्वम् (व्यौच्छः) पूर्वं तमोविवासितवती, (सा उ) सैव त्वम् (नः) अस्माकम् (अद्य) अद्यापि तमो विवासय ॥ शिष्टं पूर्ववत् ॥ ऋग्वेदे ५ । ७९ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(दिवः) द्युलोक वा सूर्य की (दुहितः) बेटी ! उषा ! (या) जो तू (आभरद्वसुः) धनादि धारण करती हुई (व्यौच्छः) अब से पहले अन्धकार को हटाती थी, (सा उ) वही तू (अद्य) आज भी (नः) हमारे (व्युच्छ) अन्धकार को मिटा ॥ ऋ० ५ । ७९ । ३ में भी ॥ ३ ॥

अथ तृतीय तृचस्य-अवस्युरात्रेयः । अश्विनौ देवते । पङ्क्तिश्छन्दः ॥

तत्र प्रथमा—

१ २ ३१२३ २३ १ २ ३ १ २
प्रति प्रियतमꣳरथं वृषणं वसुवाहनम् ।

३ १ २ ३ २ ३ १ २ ३ २ ३
स्तोता वामश्विनावृषिः स्तोमेभिर्भूषति प्रति

२ ३ १ २ ३ १ २
माध्वी मम श्रुतꣳहवम् ॥ १ ॥ (१७११) व्याख्याता (४१८)

अथ द्वितीया-

३ १ २ ३१र २र ३१र २र २ ३
अत्यायातमश्विना तिरो विश्वा अहꣳ सना । दस्रा

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
हिरण्यवर्त्तनी सुषुम्णा सिन्धुवाहसा, माध्वी मम

३ १ २
श्रुतꣳहवम् ॥ २ ॥ (१७१२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-अति अ० । आयातम् क्रि० । अश्विना सं० । तिरः अ० । विश्वाः २ । अहम् १ । सना अ० । दस्रा, हिरण्यवर्त्तनी, सुषुम्णा, सिन्धुवाहसा, माध्वी सं० । मम ६ । श्रुतम् क्रि० । हवम् २ ॥

अन्वितपदार्थः-हे (दस्रा) दोषाणामुपक्षपयितारौ ! (हिरण्यवर्त्तनी) तेजोमार्गौ ! (सुषुम्णा) शोभनसुखदौ ! (सिन्धुवाहसा) नदीनां प्रवाहयितारौ ! [वर्षप्रेरणेन] (माध्वी) मधुरौ मनोहरौ ! (अश्विना) अश्विनौ सूर्याचन्द्रमसौ प्राणोदानौ प्राणाऽपानौ ! वा (आयातं) युवां मां प्राप्नुतम् तथा (मम) यजमानस्य (हवम्) आवाहनम् (श्रुतम्) शृणुतं स्वीकुरुतम् (अहम्) यजमानः (विश्वाः) सर्वा मद्विरोधिप्रजाः (सना) सदा (अति) उल्लङ्घ्य (तिरः) तिरस्कुर्याम् ॥ ऋग्वेदे ५ । ७५ । २ऽपि ॥ २ ॥

भाषार्थः-(दस्रा) दोषों के उपक्षय करने वालो ! (हिरण्यवर्त्तनी) तेजयुक्तमार्ग वालो ! (सुषुम्णा) सुन्दर सुख देने वालो ! (सिन्धुवाहसा) वर्षा से नदियों के प्रवाह चलाने वालो ! (माध्वी) मधुर मनोहरो ! (अश्विना) सूर्यचन्द्रो ! वा प्राण उदानो ! वा प्राण अपानो ! तुम दोनों (आयातम्) मुझे प्राप्त होओ और (मम) मुझ यजमान के (हवम्) आवाहन को (श्रुतम्) सुनो=स्वीकार करो (अहम्) मैं यजमान (विश्वाः) सब अपनी विरोधी प्रजाओं को (अति) पार करके (तिरः) तिरस्कृत कर सकूं ॥ ऋ० ५ । ७५ । २ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ २ ३ १ २

आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम्। रुद्रा हिरण्यवर्त्तनी

३ १ २ ३ २ ३ १ २ ३ १ २

जुषाणा वाजिनी वसू, माध्वी मम श्रुतꣳहवम्।३।[१२](१७४३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–आ अ० । नः २ । रत्नानि २ । बिभ्रतौ १ । अश्विना सं० । गच्छतम् क्रि० । युवम् १ । रुद्रा, हिरण्यवर्त्तनी, जुषाणा, वाजिनी, वसू, माध्वी १ । मम । श्रुतम् । हवम् ॥

अन्वितपदार्थः–(रत्नानि) रमणीयानि पदार्थजातानि (बिभ्रतौ) धारयन्तौ (अश्विना) अश्विनौ ! (युवं) युवाम् (नः) अस्मान्यजमानान् (आ–गच्छतम्) आयातम् (रुद्रा) भयंकरौ (हिरण्यवर्त्तनी) तेजोमार्गौ (जुषाणा) यज्ञं सेवमानौ (वाजिनी) बलवन्तौ (वसू) अष्टवस्वन्तर्गतौ (माध्वी) मनोहरौ (मम हवं श्रुतम्) पूर्ववत् ॥ ऋग्वेदे ५ । ७५ । ३ ऽपि ॥ ३ ॥

भाषार्थः–(रत्नानि) रमणीय पदार्थों को (बिभ्रतौ) धारण करते हुवे (अश्विना) सूर्यचन्द्रो ! वा प्राणोदानो ! (युवम्) तुम दोनों (नः) हम यजमानों को (आ–गच्छतम्) प्राप्त होओ (रुद्रा) भयोत्पादको ! (हिरण्यवर्त्तनी) तेजयुक्तमार्ग वालो ! (जुषाणा) यज्ञ का सेवन करते हुवो ! (वाजिनी) बलवानो ! (वसू) आठ ८ वसुओं के अन्तर्गतो ! (माध्वी) मनोहरो ! (मम हवं श्रुतम्) मेरे आवाहन को स्वीकारो ॥ ऋ० ५ । ७५ । ३ में भी ॥ ३ ॥

इत्येकोनविंशाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थे खण्डे–

प्रथम तृचस्य-बुधो गविष्ठिरो वा ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥

तत्र प्रथमा–

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।

३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २

यद्वाइव प्रवयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥

॥ १ ॥ (१७४४) व्याख्याता (७३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २
अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ र ३ १ २
समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥

॥ २ ॥ (१७४५)

पदपाठः-अबोधि क्रि० । होता १ । यजथाय ४ । देवान् २ । ऊर्ध्वः, अग्निः, सुमनाः १ । प्रातः अ० । अस्थात् क्रि० । समिद्धस्य ६ । रुशत् १ । अदर्शि क्रि० । पाजः १ । महान्, देवः १ । तमसः ५ । निरमोचि क्रि० ॥

अन्वितपदार्थः-(होता) होमनिष्पादकः (अग्निः) पावकः (देवान्) वाय्वादीन् (यजथाय) यष्टुम् (अबोधि) प्रबुद्धो दीप्तो भवति (प्रातः) प्रभाते (सुमनाः) मनःसौष्ठवकरः (ऊर्ध्वः अस्थात्) ज्वालारूपेणोत्तिष्ठति (समिद्धस्य) प्रज्वलितस्याऽग्नेः (रुशत्) रोचमानं (पाजः) बलं ज्वालारूपम् (अदर्शि) दृश्यते । सोयं (महान् देवः), अग्निः (तमसः) अन्धकारात् (निरमोचि) जगत् निर्मोचयति ॥ ऋग्वेदे ५ । १ । २ ऽपि ॥ २ ॥

भाषार्थः-(होता) होम का सिद्ध करने वाला (अग्निः) अग्नि (देवान्) वायु आदि देवों को (यजथाय) यजन करने के लिये (अबोधि) प्रदीप्त किया जाता=जगाया जाता है, (प्रातः) प्रातःकाल में (सुमनाः) मन को प्रसन्न करने वाला मनभावना अग्नि (ऊर्ध्वः अस्थात्) लपटरूप से उठता है, (समिद्धस्य) प्रदीप्त अग्नि का (रुशत्) प्रकाशमान (पाजः) बल=ज्वालारूपी (अदर्शि) दीखता है, सो यह (महान्) बड़ा (देवः) देव=अग्नि (तमसः) अन्धकार से (निरमोचि) जगत् को छुड़ाता है ॥ ऋ० ५ । १ । २ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया—

१ २ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २ १ १ २ १ २
यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
१ २ २ ३ १ २ ३ २ ३ १ २ ३ १ २
आदक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥३॥

[१३](१७४६)

पदपाठः-यत्, ईम् अ०। गणस्य ६। रशनाम् २। अजीगः क्रि०। शुचिः १। अङ्क्ते क्रि०। शुचिभिः, गोभिः ३। अग्निः १। आत् अ०। दक्षिणा १। युज्यते क्रि०। वाजयन्ती १। उत्तानाम् २। ऊर्ध्वः १। अधयत् क्रि०। जुहूभिः ३॥

अन्वितपदार्थः-(यत्) यदा (ईम्) अयम् (अग्निः) पावकः (गणस्य) संघातात्मकस्य जगतः (रशनां) रज्जुमिव व्यापारप्रतिबन्धकं तमः (अजीगः) गिलति प्रदीप्तो जायते (शुचिः) पूतः शुद्धोऽग्निः (शुचिभिः) पूतैः (गोभिः) किरणैः (अङ्क्ते) व्यक्तोभवति (आत्) अनन्तरमेव (दक्षिणा) दक्षिणहस्तप्रयुक्ताऽऽज्यधारा (वाजयन्ती) बलमिच्छन्ती सती (युज्यते) युक्ता क्रियते हूयते इति यावत् (उत्तानाम्) उपरि विस्तृतां तां धाराम् (ऊर्ध्वः) ऊर्ध्वगामी अग्निः (जुहूभिः) जुहूसंज्ञकैः पात्रैः (अधयत्) पिबति ॥ ऋग्वेदे ५ । १ । ३ ऽपि ॥ ३ ॥

भावार्थः-(यत्) जब कि (ईम्) यह (अग्निः) अग्नि (गणस्य) समूहात्मक जगत् के (रशनाम्) रस्सीरूप से व्यापार के बांधने=रोकने वाले अन्धकार को (अजीगः) निगलता है, खा जाता है, प्रकाश फैला देता है, (शुचिः) शुद्ध अग्नि (शुचिभिः गोभिः) शुद्ध किरणों से (अङ्क्ते) प्रकट होता है (आत्) तभी (दक्षिणा) दक्षिण हाथ से दक्षिणा के समान दान की हुई घृत की धारा (वाजयन्ती) बल चाहती हुई (युज्यते) युक्त की जाती

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

है=छोड़ी जाती है (उत्तानाम्) ऊपर फैली हुई उस धारा को (ऊर्ध्वः) ऊपर को उठता हुआ अग्नि (जुहूभिः) जुहू नामक पात्रों से (अघयत्) पीता है ॥ ऋ० ५ । १ । ३ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य कुत्स ऋषिः । उषा देवता । त्रिष्टुप् छन्दः ।

तत्र प्रथमा—

१२३ ३ १ २ ३ २ ३१२ ३ १ २३१ २ ३ १ २

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा।

२ ३ १२ ३२ ३२३२३ ३२३ १ २

यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक्॥१॥(१७४७)

पदपाठः-इदम्, श्रेष्ठम् १ । ज्योतिषाम् ६ । ज्योतिः १ । आगात् क्रि० । चित्रः, प्रकेतः १ । अजनिष्ट क्रि० । विभ्वा ३ । यथा अ० । प्रसूता १ । सवितुः ५ । सवाय ४ । एवा अ० । रात्री १ । उषसे ४ । योनिम् २ । आरैक् क्रि० ॥

अन्वितपदार्थः-(ज्योतिषां) ग्रहनक्षत्रादीनां मध्ये (इदम्) उषोरूपं (ज्योतिः), (श्रेष्ठं) प्रशंसनीयतमम् (आगात्) उदेति । (विभ्वा) व्याप्त्या (चित्रः) विचित्रः (प्रकेतः) प्रज्ञानः (अजनिष्ट) जायते (यथा), (सवितुः) सूर्यात् (प्रसूता) प्राप्तगर्भा सती भूमिः प्रसवं प्राप्ता (सवाय) जन्मने ओषधिप्रसवाय (योनिम् आरैक्) गर्भाशयमारेचितवती (एवा) एवं हि (रात्री) रजनी (उषसे) उषसउत्पादनाय योनिमारैक् ॥

अत्र निरुक्तम्-इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानम् स्त्रीयोनिरभियुत एनां गर्भः ॥ २ । १९ ॥ ऋग्वेदे १ । ११३ । १ ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः (ज्योतिषाम्) ग्रहनक्षत्रादि ज्योतियों में (इदम्) यह उषा रूप (ज्योतिः) ज्योति (श्रेष्ठम्) श्रेष्ठ (आगात्) उदय होती है (विभ्वा) व्याप्ति से, यह (चित्रः) विचित्र (प्रकेतः) प्रज्ञान (अजनिष्ट) उत्पन्न होता है (यथा) जैसे (सवितुः) सूर्य से (प्रसूता) उत्पन्न गर्भवाली भूमि प्रसव को प्राप्त हुई (सवाय) ओषधि आदि के जनने को (योनिम् , आरैक्) गर्भाशय को रिक्त करती है (एवा) ऐसे ही (रात्री) रात्रि भी (उषसे) उषा के उत्पादनार्थ स्थान को रिक्त करती है । इस का निरुक्तकृत व्याख्यान निरु० २ । १९ के अनुसार संस्कृत भाष्य में देखिये । ऋ० १ । ११३ । १ में भी ॥१॥

अथ द्वितीया–

१ २ ३ १ २ ३ २ ३ १ २ ३ १२ २२

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।

३ १२ ३ १ २ ३ २३ ३ १ २ ३ २

समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ।२। (१७४८)

पदपाठः–रुशद्वत्सा, रुशती, श्वेत्या १ । आगात्, आरैक् क्रि० । उ अ० । कृष्णा १ । सदनानि २ । अस्याः ६ । समानबन्धू, अमृते, अनूची १ । द्यावा ३ । वर्णम् २ । चरतः क्रि० । आमिनाने १ ॥

अन्वितपदार्थः–(रुशती) रोचमाना (श्वेत्या) उज्ज्वला उषाः (रुशद्वत्सा) रुशन् दीप्तो वत्सः सूर्यो दिवसो वा यस्याः सा (आगात्) उदेति (कृष्णा) रात्रिः (अस्याः) आगतायाः उदितायाः उषसः (सदनानि) स्थानानि अर्धप्रहरलक्षणानि (उ) अनन्तरमेव (आरैक्) रिक्तानि करोति । एते रात्र्युषसौ (समानबन्धू) समाननियमबन्धनवत्यौ (अमृते) कालात्मकतया नित्यत्वादमरणधर्माणौ (अनूची) इतरेतरमनुगच्छन्त्यौ (वर्णम् आमिनाने) इतरेतरस्य स्वरूपं नाशयन्त्यौ (द्यावा) आकाश

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मार्गेण (चरतः) प्रतिक्षणं गच्छतः ॥ " रुशद्वत्सा सूर्य-वत्सा । रुशदिति वर्णनाम, रोचतेर्ज्वलतिकर्मणः । सूर्य-मस्यावत्समाह साहचर्याद्रसहरणद्वा । रुशती श्वेत्यागात् । श्वेत्या श्वेततेः । अरिचत्कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः । कृष्णं कृष्यतेर्निकृष्टो वर्णः । अथैने संस्तौति-समानबन्धू समानबन्धने । अमृते अमरणधर्माणौ । अनूची अनूच्यावितरेतरमभिप्रेत्य । द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनात् । अपिवा-द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे" इति निरु० २ । २० ॥ ऋग्वेदे १ । ११३ । २ ऽपि ॥ २ ॥

भाषार्थः-(रुशती) प्रकाशमाना (रुशद्वत्सा) प्रकाशमान सूर्य वा दिन वत्सवाली (श्वेत्या) उषा (आगात्) आती उदय होती है (च) और (कृष्णा) रात्रि (अस्याः) इस उषा के (सदनानि) स्थानों को (आरैक्) रिक्त कर देती है । (समानबन्धू) ये दोनों रात्रि और उषा समान नियम रूपी बन्धन से बन्धी हैं (अमृते) अमर हैं काल रूप से नित्य होने से (अनूची) एक दूसरे के पश्चात् चलने वाली हैं (वर्णम्) एक दूसरे के रङ्ग को (आमिनाने) नष्ट करती हैं और (द्यावा) आकाश मार्ग से सदा (चरतः) चलती हैं ॥

निरुक्त २ । २० का व्याख्यान ऊपर संस्कृत भाष्य में देखिये॥ भाव यह है कि जब चमकते हुए सूर्य वा दिन को उत्पन्न करने वाली चमकती हुई उषा आती है तो रात्रि उस आती हुई उषा के स्थानों को अपने शेष आधे प्रहर में खाली कर देती है, इस प्रकार सूर्य के उदय अस्त के पीछे २ ये रात्रि और उषा घूमती रहती हैं, जब एक देश में दिन होता है तो उस से पश्चिम में उषा और उषा से पश्चिम में रात्रि, इसी प्रकार आगे पीछे चक्र चलता रहता है । सूर्य को उषा का वत्स (पुत्र वा बछड़ा) इस लिये कहा है कि गौ के पीछे बछड़े के समान आगे २ उषा और उस के पीछे २ सूर्य चलता जान पड़ता है। अथवा रस खींचने से दूध खींचने=चूंसने वाले बछड़े की उपमा है ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृष्णा शब्द कृष धातु से बना है उस का अर्थ=निकृष्ट रंग है॥ ऋ० १। ११३। २ में भी ॥ २ ॥

अथ तृतीया-

३ २उ ३ १ २ ३ २उ ३ १ २ ३ १ २

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे।

१ २ ३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २

न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे

॥ ३ ॥ [१४] (१७४९)

पदपाठः-समानः, अध्वा १। स्वस्रोः ६। अनन्तः १। तम् २। अन्या, अन्या १। चरतः क्रि०। देवशिष्टे १। न अ०। मेथेते क्रि०। न। तस्थतुः क्रि०। सुमेके, नक्तोषासा, समनसा, विरूपे १॥

अन्वितपदार्थः-(स्वस्रोः) भगिन्योरात्र्युषसोः (समानः) एकरसः (अनन्तः) अन्तवर्जितः (अध्वा) मार्गोस्ति (तम्) मार्गम् (अन्या अन्या) एकैका पृथक् पृथक् (देवशिष्टे) परमेश्वराज्ञानुवर्त्तिन्यौ (चरतः) गच्छतः (समनसा) समनस्कौ (विरूपे) परस्परविरुद्धतमःप्रकाश लक्षणरूपवत्यौ (सुमेके) सुमेहने व्यत्ययेन ह्रस्व कः ३। १। ८५ (नक्तोषासा) रात्र्युषसौ (न) नैव (मेथेते) परस्परं हिंस्तः (न) न च (तस्थतुः) तिष्ठतः निरन्तरं गच्छत एव ॥ ऋग्वेदे १। ११३। ३ ऽपि ॥ ३ ॥

भाषार्थः-(स्वस्रोः) रात्रि और उषा दोनों बहिनों का (समानः) एकसा (अनन्तः) अनन्त (अध्वा) मार्ग है (तम्) उस मार्ग को (देवशिष्टे) परमेश्वर की आज्ञा पालने वाली (अन्या अन्या) एक एक पृथक् पृथक् (चरतः) दोनों चलती हैं। (समनसा) मन को समान रखने वाली (विरूपे) एक का रूप अन्धकार, दूसरी का प्रकाश इस प्रकार परस्पर विरुद्ध रूप वाली (सुमेके) भले प्रकार सींचने वाली (नक्तोषासा) रात्रि और उषा दोनों (न मेथेते)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न तो लड़ती हैं, और (न तस्थतुः) न ठहरती हैं, किन्तु निरन्तर चलती रहती हैं ॥ ऋ० १ । ११३ । ३ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-अत्रिर्ऋषिः । अश्विनौ देवते । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा-

१ २ ३ २ ३ २ ३ १ २ ३

आभात्यग्निरुषसामनीक-

१र २र ३ १र २र

मुद्विप्राणां देवया वाचो अस्थुः ।

३ १ २ ३ १ २ ३ १ २

अर्वाञ्चा नूनꣳ रथ्येह यातं

३ १ २ १ ३ १र २र

पीपिवाꣳसमश्विना घर्ममच्छ ॥ १ ॥ (१७५०)

पदपाठः-आभाति क्रि० । अग्निः १ । उषसाम् ६ । अनीकम् १ । उत् अ० । विप्राणाम् ६ । देवयाः, वाचः १ । अस्थुः क्रि० । अर्वाञ्चा १ । नूनम् अ० । रथ्या १ । इह अ० । यातम् क्रि० । पीपिवांसम् २ । अश्विना १ । घर्मम् २ । अच्छ अ० ॥

अन्वितपदार्थः-(उषसाम्) प्रभातवेलानाम् (अनीकम्) मुखम् (अग्निः) होमाग्निः (आभाति) चकास्ति (विप्राणां) याज्ञिकानां मेधाविब्राह्मणानां (देवयाः) देवकामाः (वाचः) मन्त्ररूपाः (उत् अस्थुः) उच्चैरुच्चारिता भवन्ति (अर्वाञ्चा) अभिमुखगामिनौ (रथ्या) रम्यरूपौ (अश्विना) प्राणोदानौ (नूनं), (पीपिवांसं) पुष्टिकरं (घर्मं) शोधकं यज्ञम् (इह) अस्मिन् देशे यज्ञभूमौ (अच्छ) सुष्ठु (यातम्) प्राप्नुतः ॥ ऋग्वेदे ५ । ७६ । १ ऽपि ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(उषसाम्) प्रातः समयों का (अनीकम्) मुखरूप (अग्निः) अग्नि (आक्रमीत्) प्रज्वलित होकर चमकता है, (विप्राणाम्) यज्ञ करने वाले मेधावी ब्राह्मणों की (देवयाः वाचः) देवकामा वाणी [वेद मन्त्र] (उत् अस्थुः) उच्चारित होती हैं, (अर्वाञ्चा) सम्मुख आने वाले (रथ्या) रम्य गति वाले (अश्विना) प्राण और उदान वायु (नूनम्) निश्चय (पीपिवांसम्) पुष्टिकारक (धर्मम्) शुद्धिकारक यज्ञ को (इह) इस यज्ञदेश में (अरुह) भले प्रकार (यातम्) प्राप्त होते हैं ॥ ऋ० ५ । ७६ । १ में भी ॥ १ ॥

अथ द्वितीया—

१ २ ३ १र २र ३ २ ३ १ २ ३ २ ३ १र २र ३ २
न संꣳस्कृतं प्रमिमीतो गविष्ठाऽन्ति नूनमश्विनोपस्तुतेह ।

१ २ ३ २ ३ १ २ ३ १र २र ३ २ ३ १ २
दिवाभिपित्वेऽवसा गमिष्ठा प्रत्यवर्तिं दाशुषे शं भविष्ठा ॥ २ ॥

(१७५१)

पदपाठः-न अ० । संस्कृतम् २ । प्रमिमीतः क्रि० । गविष्ठा १ । अन्ति, नूनम् अ० । अश्विना, उपस्तुता १ । इह अ० । दिवाभिपित्वे ७ । अवसा ३ । गमिष्ठा १ । प्रति अ० । अवर्त्तिम् २ । दाशुषे ४ । शम् अ० । भविष्ठा १ ॥

अन्वितपदार्थः-(इह) यज्ञे (उपस्तुता) उपस्तुतौ (अश्विना) अश्विनौ (संस्कृतं) कृतसंस्कारं याज्ञिकं पुरुषं (न) नैव (प्रमिमीतः) हिंस्तः किन्तु रक्षतः (नूनं) निश्चयेन (अन्ति) समीपे (गमिष्ठा) गन्तृतमौ (दिवाभिपित्वे) दिनोदये प्रातःकाले (अवसा) रक्षणेन स्वधर्मेण (आगमिष्ठा) अस्मान् प्रति आगन्तृतमौ (अवर्त्तिं प्रति) अमार्गमन्धकारापन्नं पुरुषं प्रति (दाशुषे) ज्ञानदात्रे (शं) सुखं (भविष्ठा) भावयितृतमौ स्तः ॥ ऋग्वेदे ५ । ७६ । २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(इह) इस यज्ञ में (उपस्तुता) प्रशंसित (अश्विना) प्राणोदान वा सूर्य चन्द्र (संस्कृतम्) यज्ञ संस्कार से संस्कृत पुरुष को (न) नहीं (प्रमिमीतः) मारते किन्तु रक्षा करते हैं (नूनम्) निश्चय (अन्ति) समीप में (गमिष्ठा) अति शीघ्रगामी वे दोनों अश्विनौ (दिवाऽभिपित्वे) दिन निकलते ही (अवसा) अपने धर्म=रक्षण के साथ (आगमिष्ठा) अत्यन्त आने वाले हैं और (अक्तिम्) अमार्ग=अन्धे के प्रति) प्रति(दाशुषे) ज्ञानादि देने वाले के लिये (शम्) सुख को (भविष्ठा) अत्यन्त हुवाने वाले हैं ॥ ऋ० ५ । ७६ । २ में भी ॥ २ ॥

अथ तृतीया-

१ १ २ ३ २ ३ १ २ २
उतायातꣳ संगवे प्रातरह्नो
३ १ २ ३ १ २ ३ १ २
मध्यंदिन उदिता सूर्यस्य ।
२ ३ २ ३ १ २ ३ १ २ ३
दिवा नक्तमवसा शन्तमेन
१ २ २ ३ २ ३ १ २ १ २
नेदानीं पीतिरश्विना ततान ॥३॥ [१५] (१७५२)

पदपाठः-उत अ० । आयातम् क्रि० । संगवे ७ । प्रातः अ० । अह्नः ६ । मध्यंदिने ७ । उदिता ७ । सूर्यस्य ६ । दिवा, नक्तम् अ० । अवसा, शंतमेन ३ । न, इदानीम् अ० । पीतिः १ । अश्विना १ । ततान क्रि० ॥

अन्वितपदार्थः-(अश्विना) अश्विनौ (इदानीं) यज्ञकाल एव (न) न, (उत) किन्तु (संगवे) सायंकाले संगच्छन्ते गावो दोहभूमिं यस्मिन्समये सायं स संगवः प्रातर्गावो वने तृणानि चरन्ति, सायं संगवे प्रतिनिवर्त्तन्ते (अह्नः) दिवसस्य (मध्यंदिने) मध्याह्नकाले (प्रातः) प्रातःकाले (सूर्यस्य उदिता दिवा) सूर्यस्य उदितौ उदय-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पर्यन्तं सर्वस्मिन्दिने (नक्तम्) रात्रौ च (शंतमेन) सुखदेन (अवसा) रक्षणेन (आयातम्) अस्मान् प्रा-प्नुताम् (पीतिः) पानं सोमादिपानं (ततान) तन्यते सदा इति शेषः ॥ ऋग्वेदे ५ । ७६ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(अश्विना) दोनों अश्विनौ (इदानीम्) अब यज्ञ समय में (न) नहीं (उत) किन्तु (संगवे) सायंकाल में (प्रातः) प्रातःकाल में (अह्नः मध्यन्दिने) दिन के मध्याह्न काल में और कहां तक कहें (सूर्यस्य उदिता दिवा) सूर्य के उदय में दिन भर और (नक्तम्) रात्रि में भी (आ-यातम्) हमें प्राप्त हों (पीतिः) सोमादिपान (ततान) विस्तृत है ॥ ऋ० ५ । ७६ । ३ में भी ॥ ३ ॥

इत्येकोनविंशाऽध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमे खण्डे-

प्रथम तृचस्य-गोतमऋषिः । उषादेवता । जगती छन्दः ॥ तत्र प्रथमा-

३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १
एता उ त्या उषसः केतुमक्रत, पूर्वे अर्धे रजसो भानु-
२ ३ १र २र ३ २ ३ २ ३
मञ्जते । निष्कृण्वाना आयुधानीव धृष्णवः, प्रति
१र २र ३ १ २
गावोऽरुषीर्यन्ति मातरः ॥ १ ॥ (१७५३)

पदपाठः-एताः १ । उ अ० । त्याः, उषसः १ । केतुम् २ । अक्रत क्रि० । पूर्वे, अर्धे ७ । रजसः ६ । भानुम् २ । अञ्जते क्रि० । निष्कृण्वानाः १ । आयुधानि २ । इव अ० । धृष्णवः १ । प्रति अ० । गावः, अरुषीः १ । यन्ति क्रि० । मातरः १ ॥

अन्वितपदार्थः-(गावः) गमनशीलाः (अरुषीः) अरुणवर्णा आरोचमानाः (मातरः) प्रकाशजनन्यः (उ) हि (एताः) दृश्यमानाः (त्याः) उक्तलक्षणाः (उषसः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रभातवेलाः उषर्देव्यः (केतुम्) अन्धकारावृतस्य जगतः प्रज्ञापकं प्रकाशम् (अक्रत) अकृषत सूर्यादाकर्षन्ति (रजसः) अन्तरिक्षस्य (पूर्वे अर्धे) सूर्यदिशि अर्धभागे (भानुम्) सूर्यम् (अञ्जते) व्यञ्जयन्ति, पश्चिमार्धे भूमेः स्वच्छायाऽऽवृतत्वात् (धृष्णवः) धर्षकायोद्धारः (इव) यथा (आयुधानि) असिप्रभृतीनि (निष्कृण्वानाः) संस्कुर्वाणा भवन्ति तथैवोषसोऽपि (प्रति) प्रतिदिनं नित्यं (यन्ति) गच्छन्ति ॥ ऋग्वेदे १ । ९२ । १ ऽपि ॥

अत्र निरुक्तम् १२ । ७—" एतास्ता उषसः केतुमकृषतः प्रज्ञानम् । एकस्या एव पूजनार्थं बहुवचनम् स्यात् । पूर्वेर्धेन्तरिक्षलोकस्य समञ्जते भानुना । निष्कृण्वाना आयुधानीव धृष्णवः । निरित्येष समित्येतस्य स्थाने । एमीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति । प्रतियन्ति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः" ॥ १ ॥

भाषार्थः—(गावः) चलने वाली (अरुषीः) अरुणवर्णा प्रकाशमाना (मातरः) प्रकाश की जननी (उ) ही (एताः) ये (त्याः) उक्त लक्षणों वाली (उषसः) उषा देवियें (केतुम्) प्रकाश को (अक्रत) सूर्य से खींचती हैं और (रजसः) अन्तरिक्ष के (पूर्वे) पूर्व की ओर वाले (अर्धे) अर्ध भाग में (भानुम्) सूर्य को (अञ्जते) प्रकट करती है, पश्चिमार्ध में पृथिवी के अपनी छाया का अन्धेरा रहता है (इव) जैसे (धृष्णवः) विजयी योद्धा लोग (आयुधानि) असि=तलवार आदि शस्त्रों को (निष्कृण्वानाः) सैकल करके पैनाते हुवे हों वैसे शस्त्रसे चमकाती हुई उषायें (प्रति) नित्य (यन्ति) घूमती हैं ॥ निरुक्त १२ । ७ का व्याख्यान ऊपर संस्कृत भाष्य में देखिये ॥ ऋ० १ । ९२ । १ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

१२ ३ २ ३ २ ३ १ २ ३ २ ३ १२३ १ २

उदपप्तन्नरुणा भानवो वृथा, स्वायुजो अरुषीर्गा अयुक्षत ।

१ २ ३ १ २ ३१ २ ३ २ ३ १ २ ३ १र २र

अक्रन्नुषासो वयुनानि पूर्वथा, रुशन्तं भानुमरुषीरशिश्रयुः२(१७५४)

पदपाठः-उदपप्तन् क्रि० । अरुणाः, भानवः १ । वृथा अ० । स्वायुजः, अरुषीः गाः २ । अयुक्षत, अक्रन् क्रि० । उषासः १ । वयुनानि २ । पूर्वथा अ० । रुशन्तं, भानुम् २ । अरुषीः १ । अशिश्रयुः क्रि० ॥

अन्वितपदार्थः-(अरुणाः) रक्तवर्णाः (भानवः) उषसोदीप्तयः (वृथा) अनायासेन (उदऽपप्तन्) उद्गच्छन्ति (स्वायुजः) सुगमयोजनाः (अरुषीः) शुभ्राः (गाः) गभस्तीः (अयुक्षत) युञ्जन्ति (पूर्वथा) यथापूर्वम् (उषासः) उषर्देव्यः (वयुनानि) प्रज्ञानानि (अक्रन्) कुर्वन्ति, उषःकाले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवन्ति । तदनन्तरम्-(अरुषीः) आरोचमानास्ता गभस्तयः (रुशन्तं) प्रकाशमानं (भानुं) सूर्यम् (अशिश्रयुः) आश्रयन्ते आसेवन्ते सूर्येण सहैकीभवन्ति ॥ ऋग्वेदे १ । ९२ । २ ऽपि ॥ २ ॥

भाषार्थः-(अरुणाः) रक्तवर्ण वाली (भानवः) उषा की दीप्तियें (वृथा) यूंही स्वाभाविक रीति से (उदऽपप्तन्) उदय हो जाती हैं और (स्वायुजः) सुगमता से जुतने वाली (अरुषीः) शुभ्र उज्ज्वल (गाः) गौवों के समान किरणों को (अयुक्षत) जोतती हैं और (पूर्वथा) पूर्व के समान नियमानुसार (उषासः) उषा देवियें (वयुनानि) ज्ञानों को (अक्रन्) उत्पन्न करदेती हैं । उषःकाल में ही सब प्राणी स्वाभाविक नियम से ज्ञान को प्राप्त होते हैं । फिर-(अरुषीः) अरुण वर्ण की वे चमकती उषा की किरणें (रुशन्तम्) प्रकाशमान (भानुम्) सूर्य का (अशिश्रयुः) आश्रय करती हैं अर्थात् सूर्य के साथ मिलकर एक हो जाती हैं ॥ ऋ० १ । ९२ । २ में भी ॥२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अर्चन्ति नारीरपसो न विष्टिभिः, समानेन योजनेना परावतः ।
२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
इषं वहन्तीः सुकृते सुदानवे, विश्वेदह यजमानाय सुन्वते ॥ ३ ॥

[१६] (१७५५)

पदपाठः–अर्चन्ति क्रि० । नारीः १ । अपसः १ । न अ० । विष्टिभिः ३ । समानेन, योजनेन ३ । आ–परावतः २ । इषम् २ । वहन्तीः १ । सुकृते, सुदानवे ५ । विश्वा २ । इत्, अह अ० । यजमानाय, सुन्वते ५ ॥

अन्वितपदार्थः–(सुकृते) सुकर्म कुर्वते (सुदानवे) सुदानं ददते (सुन्वते) सोमाद्योषधिगणानभिषुण्वते (यजमानाय) यज्ञं कुर्वाणाय पुरुषाय (विश्वा इत् अह) सर्वमेव (इषम्) अन्नादिकं (वहन्तीः) वहन्त्यः प्रापयन्त्यः (नारीः) नेत्र्यः उषसः (विष्टिभिः) निवेशकैः स्वतेजोभिः (समानेन योजनेन) एकेनैवोद्योगेन (आपरावतः) दूरस्थानपि (अर्चन्ति) पूजयन्ति प्रकाशयन्ति (अपसः न) यथोदकानि दूराद्दिवि प्रकाशयन्ति तद्वत् ॥ ऋग्वेदे १ । ९२ । ३ ऽपि ॥ ३ ॥

भाषार्थः–(सुकृते) सुकर्मी (सुदानवे) सुदानी (सुन्वते) सोमाभिषवी (यजमानाय) यजमान के लिये (विश्वा इत् अह) सब ही (इषम्) अन्नादि को (वहन्तीः) पहुंचाती हुईं (नारीः) ज्ञानप्रकाश से नेता का काम करने वाली उषायें (विष्टिभिः) निवेश कराने वाले अपने तेजों से (समानेन योजनेन) एक ही उद्योग से (आ परावतः) दूरस्थों को भी (अर्चन्ति) सत्कृत करती हैं । (अपसः न) जैसे जलों को ॥ ऋ० १ । ९२ । ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीय तृचस्य–दीर्घतमा ऋषिः । अश्विनौ देवते । जगती छन्दः ॥

तत्र प्रथमा–

१ २ ३ १२ २२३ २ ३ २ २ ३ २ ३क २२ ३ १ २
अबोध्यग्निर्जम उदेति सूर्यो व्यू३षाश्चन्द्रा मह्यावो अर्चिषा ।
१ २ ३ २ ३ १ २३२३१ २ ३१ २ ३ २३ ३ १ २
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥

॥ १ ॥ (१७५६)

पदपाठः–अबोधि क्रि० । अग्निः १ । जमः ५ । उदेति क्रि० । सूर्यः १ । वि अ० । उषाः, चन्द्रा, मही १ । आवः क्रि० । अर्चिषा ३ । आयुक्षाताम् क्रि० । अश्विना १ । यातवे अ० । रथम् २ । प्रासावीत् क्रि० । देवः, सविता १ । जगत् २ । पृथक् अ० ॥

अन्वितपदार्थः–(अग्निः) पावकः (अबोधि) प्राज्ज्वालि (जमः) पृथिव्याः (सूर्यः) आदित्यः (उदेति) उदितः (चन्द्रा) आह्लादनी (मही) महती (उषाः), (अर्चिषा) तेजसा (वि आवः) तेमो विवासितवती (अश्विना) अश्विनौ प्राणापानौ (यातवे) यातुं (रथं) यानम् (आयुक्षाताम्), (देवः सविता जगत् पृथक् प्रासावीत्) ॥ ऋग्वेदे १ । १५७ । १ ऽपि ॥ १ ॥

भाषार्थः–(अग्निः) अग्नि (अबोधि) होमार्थ प्रदीप्त किया गया और (जमः) पृथिवी से (सूर्यः) सूर्य (उदेति) उदय हुवा । (चन्द्रा मही उषाः) आह्लादनी बड़ी उषा ने (अर्चिषा) तेज से (वि आवः) अन्धेरा मिटाया और (अश्विना) प्राण अपानों ने (रथम्) रथ को (यातवे) यानार्थ (आयुक्षाताम्) जोता । इतने ही (देवः) दिव्य (सविता) जगत् के प्रेरक सविता देव ने (पृथक्) भिन्न २ (जगत्) जगत् को (प्रासावीत्) प्रवृत्त किया ॥ कैसा चमत्कार है । देखिये और लाभ उठाइये ॥ ऋ० १ । १५७ । १ में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

२ ३ २ ३ १ २ ३ १ २ ३१२ ३ १ २
यद्युञ्जाथे वृषणमश्विना रथं, घृतेन नो मधुना
३१२ ३ २ ३ २ ३ १ २
क्षत्रमुक्षतम्। अस्माकं ब्रह्म पृतनासु जिन्वतं
३ २ ३ ३ १ २
वयं धना शूरसाता भजेमहि॥२॥ (१७५७)

पदपाठः–यत् अ० । युञ्जाथे क्रि० । वृषणम् २ । अश्विना सं० । रथम् २ । घृतेन ३ । नः ६ । मधुना ३ । क्षत्रम् २ । उक्षतम् क्रि० । अस्माकम् ६ । ब्रह्म २ । पृतनासु ७ । जिन्वतम् क्रि० । वयम् १ । धना, शूरसाता २ । भजेमहि ॥

अन्वितपदार्थः–(अश्विना) अश्विनौ ! प्राणोदानौ ! सूर्याचन्द्रमसौ ! द्यावापृथिव्यौ ! वा (यत्) यदा (वृषणं) वृष्टिकरं (रथम्) रमणीयं यानं (युञ्जाथे) योजयथः, तदा (नः) अस्माकं (क्षत्रं) बाहुबलं (मधुना) मधुरेण (घृतेन) उदकेन आज्येन वा (उक्षतम्) सेचयथो वर्द्धयथः (अस्माकं) याज्ञिकानां (ब्रह्म) तेजः (पृतनासु) सेनासु (जिन्वतं) प्रीणयतम् । (वयं) याज्ञिकाः (शूरसाता) शूरसंभजनीयानि (धना) धनानि (भजेमहि) ॥ ऋग्वेदे १ । १५७ । २ ऽपि ॥ २ ॥

भाषार्थः–(अश्विना) हे प्राणोदानो ! वा सूर्यचन्द्रो ! वा द्युलोक भूमि लोको ! (यत्) जब कि (वृषणम्) वर्षा करने वाले (रथम्) रमणीय रथ को (युञ्जाथे) तुम जोतते हो तब (नः) हमारे (क्षत्रम्) बाहुबल को (घृतेन मधुना) मधुर घृत वा जल से (उक्षतम्) सींचते हो बढ़ाते हो । (अस्माकम्) हमारे (ब्रह्म) ब्रह्मवर्चस तेज को (पृतनासु) सेनाओं में

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(जिन्वतम्) पुष्ट करो (वयम्) हम (शूरसाता) शूरों के भागधेय (धना) धनों को (भजेमहि) पावें ॥ ऋ० १ । १५७ । २ में भी ॥ २ ॥

अथ तृतीया—

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अर्वाङ् त्रिचक्रो मधुवाहनो रथो, जीराश्वो अश्विनोर्यातु सुष्टुतः।
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
त्रिबन्धुरो मघवा विश्वसौभगः, शं न आवक्षद्द्विपदे चतुष्पदे॥३॥

[१७] (१७५८)

पदपाठः—अर्वाङ्, त्रिचक्रः, मधुवाहनः, रथः, जीराश्वः १ । अश्विनोः ६ । यातु क्रि० । सुष्टुतः, त्रिबन्धुरः, मघवा, विश्वसौभगः १ । शम् अ० । नः ६ । द्विपदे, चतुष्पदे ७ ॥

अन्वितपदार्थः—(अर्वाङ्) अनुकूलगतिः (त्रिचक्रः) चक्रत्रययुक्तः (मधुवाहनः) माधुर्यं वहत्यसौ (जीराश्वः) शीघ्रगाम्यश्वोपेतः (त्रिबन्धुरः) बन्धुरत्रययुक्तः (मघवा) धनयुक्तः (विश्वसौभगः) सर्वसौभाग्यसम्पन्नः (अश्विनोः रथः), (सुष्टुतः) वेदे शोभनप्रकारेण प्रशंसितः (यातु) प्रचलतु (नः) अस्माकं (द्विपदे) मनुष्यवर्गे (चतुष्पदे) गवादिपशुवर्गे च (शं) सुखम् (आवक्षत्) आवहेत् ॥

अश्विनोः इति पदेन प्राणोदानयोर्ग्रहणे तद्रथस्य नाभौ चक्रत्रयं त्रिचक्रत्वे संख्यापूरकम् । इडा पिङ्गला सुषुम्णा संज्ञिकास्तिस्रोनाड्योबन्धुरपदे नियोज्याः ॥

सूर्याचन्द्रमसोर्ग्रहणे तु—ऋतुयुग्मत्रयं=चक्रत्रयं, याम्यौदीच्यमध्यमगतिभेदो हि त्रिबन्धुरत्वे संख्यापूरणः ॥ अन्यत् समानम् ॥ ऋग्वेदे १ । १५७ । ३ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(अर्वाङ्) अनुकूल चलने वाला (त्रिचक्रः) ३ पहिये का (मधुवाहनः) मधुर चाल का (जीराश्वः) शीघ्रगामी घोड़ों का (त्रिबन्धुरः) ३ जुवों वाला (मघवा) धनयुक्त (विश्वसौभगः) सर्वसौभाग्यसम्पन्न (अश्विनोः रथः) अश्विनों का रथ (यातु) चले और (नः) हमारे (द्विपदे) दुपाये मनुष्यवर्ग में और (चतुष्पदे) चौपाये गौ आदि पशुवर्ग में (शम्) सुख को (आवक्षत) लावे ॥

अश्विनोः पद से प्राण और उदान वायुओं के ग्रहण करने में नाभि के ३ चक्र रथ के ३ पहिये समझो । इडा पिङ्गला सुषुम्णा ३ नाड़ी ३ जुवे जानो ॥

और सूर्य चन्द्र का ग्रहण करें तो शीतकाल, ग्रीष्म काल, वर्षा काल भेद से दो दो ऋतु के ३ तीन सौमिमों को ३ चक्र गिनो और दक्षिण उत्तर मध्यम गति भेद से ३ जुवे समझने चाहियें, शेष समान है ॥ ऋ० १ । १५७ । ३ में भी ॥३॥

अथ चतुर्ऋचस्य तृतीय सूक्तस्य-अवत्सार ऋषिः । सोमो देवता । गायत्रीछन्दः ॥

तत्र प्रथमा-

२ ३ १ २ ३ १ २ ३ १२ २२ ३ १ २

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।

२ ३ १ २ ३ १ २

अच्छा वाजꣳ सहस्रिणम् ॥ १ ॥ (१७५९)

पदपाठः-प्र अ० । ते ६ । धाराः, असश्चतः १ । दिवः ५ । न अ० । यन्ति क्रि० । वृष्टयः १ । अच्छ अ० । वाजम्, सहस्रिणम् २ ॥

अन्वितपदार्थः-अग्निममन्त्रे हरिपददर्शनप्रकरणात् सोम ! (असश्चतः) सङ्गरहिताः (ते) तव (धाराः) प्रवाहाः (सहस्रिणं वाजम्) अपरिमितसंख्याकमन्नं (प्र यन्ति) प्रयच्छन्ति (न) यथा (दिवः) आकाशात् (वृष्टयः) (अच्छ) सुष्ठु, भवन्ति ॥ ऋग्वेदे ९ । ५७ । १ ऽपि ॥ १ ॥

भाषार्थः-अगले मन्त्र में हरि पद देखने के प्रकरण से-हे सोम ! (असश्चतः) सङ्गरहित (ते) तेरी (धाराः) धारें (सहस्रिणं वाजम्) अतुल अन्न को

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(प्र यन्ति) देती हैं (न) जैसे (वृष्टयः) वर्षायें (दिवः) आकाश से (अञ्छ) अच्छे प्रकार होती हैं, तद्वत् ॥ ऋ० ९ । ५७ । १ में भी ॥ १ ॥

अथ द्वितीया—

३ २ ३ २ ३ २ ३ १ २
अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
१ २ ३ १र २र
हरिस्तुञ्जान आयुधा ॥ २ ॥ (१७६०)

पदपाठः—अभि अ० । प्रियाणि, काव्या, विश्वा २ । चक्षाणः १ । अर्षति क्रि० । हरिः, तुञ्जानः १ । आयुधा २ ॥

अन्वितपदार्थः—(हरिः) हरितवर्णः सोमः (विश्वा) सर्वाणि (प्रियाणि) मधुराणि (काव्या) कवित्वोपेतानि वेदवचांसि (चक्षाणः) समक्षे भावयन् (आयुधा) होमपात्राणि स्रुवप्रभृतीनि (तुञ्जानः) निशातानि कुर्वन् (अभि अर्षति) सर्वतो गच्छति धूमरूपेण ॥ ऋग्वेदे ९ । ५७ । २ ऽषि ॥ २ ॥

भावार्थः—(हरिः) हरा सोमरस (विश्वा) सब (प्रियाणि) प्यारे (काव्या) कवितायुक्त वेदवचनों को (चक्षाणः) सामने करता हुवा (आयुधा) स्रुवादि होमपात्रों को (तुञ्जानः) चमकाता हुवा (अभि अर्षति) धूमरूप से सब ओर फैलता है ॥ ऋ० ९ । ५७ । २ में भी ॥ २ ॥

अथ तृतीया—

१ २ ३ २ ३ २ ३ २ ३ २ ३ २
स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।
३ १र २र
श्येनो न वꣳसु षीदति ॥ ३ ॥ (१७६१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—सः, मर्मृजानः १। आयुभिः ३। इभः, राजा १। इव अ०। सुव्रतः, श्येनः १। न अ०। वंसु ७। सीदति क्रि०॥

अन्वितपदार्थः—(सुव्रतः) सुकर्मा (सः) सोमः (आयुभिः) मनुष्यैर्ऋत्विग्भिः (मर्मृजानः) मर्मृज्यमानः अतिशयेन शोध्यमानः सन् (वंसु) वनेषु उदकेषु वसतीवरीषु (सीदति) तिष्ठति (राजा) तेजस्वी (इभः) हस्ती (इव) इव, मदस्रवणः (श्येनः) श्येनः पक्षी (न) इव बलवान् भवति॥ ऋग्वेदे ९। ५७। ३ ऽपि॥ ३॥

भाषार्थः—(सुव्रतः) सुकर्मा (सः) वह सोम (आयुभिः) ऋत्विज् मनुष्यों से (मर्मृजानः) अत्यन्त शोधा जाता हुवा (वंसु) वसतीवरी संज्ञक जलों में (सीदति) रहता है। (राजा) प्रकाशमान तेजस्वी (इभः) हस्ती (इव) सा, मदपूरित है और (श्येनः) शिखरे पक्षी (न) सा बली है॥ ऋ० ९। ५७। ३ में भी॥ ३॥

अथ चतुर्थी—

२ ३ १ २ ३ २उ ३ १ २ ३ १र २र
स नो विश्वा दिवो वसूतो पृथिव्या अधि।
३ १ २ ३ १ २
पुनान इन्दवाभर॥४॥ (१७६२)

पदपाठः—सः १। नः ४। विश्वा २। दिवः ६। वसु २। उतो अ०। पृथिव्याः ६। अधि अ०। पुनानः १। इन्दो सं०। आभर क्रि०॥

अन्वितपदार्थः—(इन्दो) सोम! (पुनानः सः) अभिषूयमाणस्त्वं (नः) अस्मभ्यं (दिवः) द्युलोकस्य (उतो) च (पृथिव्याः) भूमेः (विश्वा) सर्वाणि (वसु)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वसूनि धनानि (अधि आभर) अधिकमाहर॥ ऋग्वेदे ९। ५७। ४ऽपि ॥ ४ ॥

भाषार्थः—(इन्दो) सोम! (पुनानः) अभिषुत कियाजाता हुवा (सः) वह तू (नः) हमारे लिये (दिवः) आकाश के (उतो) और (पृथिव्याः) पृथिवी के (विश्वा) सब (वसु) धन (अधि) अधिकता से (आभर) लादे॥ ऋ० ९। ५७। ४ में भी ॥ ४ ॥

इत्यष्टमः प्रपाठकः ॥ ८ ॥

—:※:—

इति

श्रीमत्कण्ववंशावतंस—पण्डित—हज़ारीलाल स्वामिसूनुना,

हस्तिनापुर—पार्श्ववर्त्ति—परीक्षितगढ़ निवासिना,

तुलसीराम स्वामिना कृते

सामवेदभाष्ये उत्तरार्चिके एकोनविंशोऽध्यायः ॥

॥ १९ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ विंशोऽध्यायः

तत्र

प्रथमे खण्डे–

प्रथम ऋचस्य–मृमेध ऋषिः । सोमो देवता । गायत्री छन्दः ॥

तत्र प्रथमा–

२ ३ १ २ ३ १ २ ३१र २र

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसः ।

३१र २र ३१२

देवाँ अनुप्रभूषतः ॥ १ ॥ (१७६३)

पदपाठः–प्र अ० । अस्य ६ । धाराः १ । अक्षरन् क्रि० । वृष्णः, सुतस्य, ओजसः ६ । देवान् २ । अनुप्रभूषतः ६ ॥

अन्वितपदार्थः–(वृष्णः) वृष्टिकरस्य (ओजसः) ओजस्विनः (देवान् अनु-प्र-भूषतः) देवान्तोषयतः (सुतस्य) अभिषुतस्य (अस्य) सोमस्य (धाराः), (प्र-अक्षरन्) सिञ्चन्ति गगनमण्डलम् ॥ ऋग्वेदे ९ । २९ । १ ऽपि ॥ १ ॥

भाषार्थः–(वृष्णः) वृष्टिकारक (ओजसः) बलवान् (देवान् अनु प्र भूषतः) देवों को तुष्टि देने वाले (सुतस्य) अभिषुत (अस्य) इस सोम की (धाराः) धारें (प्र-अक्षरन्) गगनमण्डल को सींचती हैं ॥ ऋ० ९ । २९ । १ में भी ॥१॥

अथ द्वितीया–

१ २ ३१२ ३१२ ३१२ ३ २

सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा ।

१ २ ३ २ ३क २र

ज्योतिर्जज्ञानमुक्थ्यम् ॥ २ ॥ (१७६४)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–सप्तिम् २। मृजन्ति क्रि०। वेधसः, गृणन्तः, कारवः १। गिरा ३। ज्योतिः २। जज्ञानम्, उक्थ्यम् २॥

अन्वितपदार्थः–(वेधसः) मेधाविनः (कारवः) कर्मकर्त्तारोऽध्वर्य्वादयो ब्राह्मणाः (गिरा) वेदमन्त्रवाचा (गृणन्तः) प्रशंसन्तः सन्तः (जज्ञानं) जायमानमभिषूयमाणं (ज्योतिः) प्रकाशकम् (उक्थ्यं) प्रशंसनीयं (सप्तिं) सर्पणशीलं सोमं (मृजन्ति) शोधयन्ति ॥ ऋग्वेदे ९। २९। २ ऽपि ॥ २ ॥

भाषार्थः–(वेधसः) बुद्धिमान् विद्वान् (कारवः) कर्मकर्त्ता अध्वर्यु आदि ब्राह्मण लोग (गिरा) वेदमन्त्रों से (गृणन्तः) वर्णन करते हुवे (जज्ञानम्) अभिषूयमाण (ज्योतिः) ज्योति (उक्थ्यम्) प्रशंसनीय (सप्तिम्) रपटने चलने वाले सोम को (मृजन्ति) शोधते हैं ॥ ऋ० ९। २९। २ में भी ॥ २ ॥

अथ तृतीया–

३ १ २ ३ १ २ ३ १ २
सुषहा सोम तानि ते पुनानाय प्रभूवसो।
१ २ ३ १ २
वर्द्धा समुद्रमुक्थ्य॥ ३ ॥ [१] (१७६५)

पदपाठः–सुषहा १। सोम सं०। तानि १। ते ६। पुनानाय ४=६। प्रभूवसो सं०। वर्ध क्रि०। समुद्रम् २। उक्थ्य सं०॥

अन्वितपदार्थः–(प्रभूवसो) प्रभूतधन ! (उक्थ्य) प्रशंसनीय ! (सोम) ओषधिराज ! (पुनानाय) पूयमानस्य (ते) तव (तानि) तेजांसि (सुषहा) सुसोढव्यानि सन्ति अतएव (समुद्रम्) अन्तरिक्षं (वर्ध) रसेन पूरय ॥ ऋग्वेदे ९। २९। ३ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(प्रभूवसो) हे पुष्कलधन ! (उक्थ्य) प्रशंसनीय (सोम) सोम ! (पुनानाय) अभिषुत किये जाते हुवे (ते) तेरे (तानि) वे तेज (सुषहा) भले प्रकार सहनयोग्य हैं, अतः (समुद्रम्) आकाश को (वर्ध) रस से पूर्ण करदे ॥ ऋ० ९ । २९ । ३ में भी ॥ १ ॥

अथ द्वितीयस्य तृचस्य-नृमेधो वामदेवो वा ऋषिः । इन्द्रो देवता । द्विपदा पांक्तश्छन्दः ॥ तत्र प्रथमा-

३ २ १ २७ ३ २ ३२ ३ १ २ ३ १ २ १

एष ब्रह्मा य ऋत्वियइन्द्रोनाम श्रुतोगृणे ॥ १ ॥ (१७६६)

व्याख्याता (४३८)

अथ द्वितीया-

१२ २२ ३ २ १ २ ३ २ ३ १ १

त्वामिच्छवस्पते यन्ति गिरोन संयतः ॥ २ ॥ (१७६७)

पदपाठः त्वाम् २ । इत् अ० । शवसस्पते सं० । यन्ति क्रि० । गिरः १ । न अ० । संयतः ६ ॥

अन्वितपदार्थः-(शवसस्पते) हे बलपते ! इन्द्र ! (संयतः) सम्यक् यत्नं कुर्वतः पुरुषस्य (न) इव (गिरः) वेदवाचः (त्वाम् इत्) त्वामेव (यन्ति) गच्छन्ति ॥ इन्द्रे एव मन्त्रवाचः संगच्छन्ते इति भावः ॥ २ ॥

भाषार्थः-(शवसस्पते) हे बलपते ! इन्द्र ! (संयतः) भले प्रकार यत्न करके बोलने वाले की (न) सी (गिरः) वेदोक्त वाणियें (त्वाम्) तुझ को (इत्) ही (यन्ति) जाती हैं ॥ अर्थात् इन्द्रसूक्तों की प्रशंसा तुझ में ही चरितार्थ होती हैं ॥ २ ॥

अथ तृतीया-

२ १ २ ३ १ २ ३२७ १ १ २ ३ १ २

विश्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः ॥३॥ [२] (१७६८)

व्याख्याता (४५३)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीय तृचस्य-प्रियमेधऋषिः। इन्द्रोदेवता। १ अनुष्टुप् २ ३ गायत्री च छन्दः॥

तत्र प्रथमा-

२ ३ २ १ २ ३ १ २ ३ १ २
आ त्वा रथं यथोतये सुम्नाय वर्त्तयामसि।
३ १ २ १ २ ३ १ २ ३ १ २
तुविकूर्मिमृतीषहमिन्द्रꣳशविष्ठ सत्पतिम् ॥१॥ (१७६९)

व्याख्याता (३५४)

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ १ २
तुविशुष्म तुविक्रतो शचीवो विश्वया मते।
१ २ ३ २
आपप्राथ महित्वना ॥ २ ॥ (१७७०)

पदपाठः-तुविशुष्म, तुविक्रतो, शचीवः सं०। विश्वया ३। मते सं०। आपप्राथ क्रि०। महित्वना ३॥

अन्वितपदार्थः-आत्मिकबलवन्तं महात्मानमाह- हे (तुविशुष्म) प्रभूतबल! (तुविक्रतो) अतएव बहुकर्मन् पुरुषार्थिन्! (शचीवः) वाग्मिन्! (मते) मतिमन्! त्वं (विश्वया) समस्तेन (महित्वना) महत्त्वेन (आपप्राथ) विस्तीर्णो भवसि॥ ऋग्वेदे ८। ६८। २ऽपि॥ २॥

भाषार्थः-आत्मिक बल वाले महात्मा का वर्णन करते हैं:-(तुविशुष्म) हे महाबल! (तुविक्रतो) अतएव बहुपुरुषार्थयुक्त! (शचीवः) वाग्बलवन्! भाषणशक्तिमन्! (मते) बुद्धिमन्! तू (विश्वया) सारे (महित्वना) बड़प्पन से (आपप्राथ) सर्वतः विस्तार को प्राप्त होता है॥ ऋ० ८। ६८। २ में भी॥२॥

अथ तृतीया-

१ २ ३ २ ३ १ २ २ ३ १ २ ३ १ २
यस्य ते महिना महः परि ज्मायन्तमीयतुः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १२ ३ १ २

हस्ता वज्रꣳ हिरण्ययम् ॥ ३ ॥ [३] (१७७१)

पदपाठः—यस्य, ते ६ । महिना ३ । महः ६ । परि अ० । ज्मायन्तम् २ । ईयतुः क्रि० । हस्ता १ । वज्रम्, हिरण्ययम् २ ॥

अन्वितपदार्थः—(महिना) महत्त्वेन (महः) महतः (यस्य) तुविशुष्मादिपूर्वमन्त्रोक्तलक्षणस्य (ते) तव (हस्ता) हस्तौ (ज्मायन्तं) पृथिवीं यन्तं (हिरण्ययं) तेजस्विनं (वज्रं) शस्त्रास्त्रादिकम् (परि-ईयतुः) परिगृह्णीतः। स त्वमापप्रायेति पूर्वेण सम्बन्धः ॥ ऋग्वेदे ८ । ६८ । ३ ऽपि ॥३॥

भाषार्थः—(महिना) बड़प्पन से (महः) बड़े (यस्य) जिस पूर्वमन्त्रोक्त महाबलादि लक्षण वाले (ते) तेरे (हस्ता) दोनों हाथ (ज्मायन्तं) पृथिवी भर पर जाने वाले (हिरण्ययम्) तेजस्वी (वज्रम्) शस्त्रास्त्रसमूह को (परि ईयतुः) सर्वतः ग्रहण करते हैं [सो तू सर्वत्र विस्तार को प्राप्त होता है] यह पूर्व मन्त्र से अन्वय है ॥ ऋ० ८ । ६८ । ३ में भी ॥ ३ ॥

अथ चतुर्थ तृचस्य—दीर्घतमा ऋषिः । अग्निर्देवता । विराट्छन्दः ॥

तत्र प्रथमा—

२३ ३ १ २ ३ १ २ ३ १ २ ३ २ १ २

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो ३ नार्वा ।

२ ३ १ २ ३ २ ३ १ २

सूरो न रुरुक्वाञ्छतात्मा ॥ १ ॥ (१७७२)

पदपाठः—आ अ० । यः १ । पुरम्, नार्मिणीम् २ । अदीदेत् क्रि० । अत्यः, कविः, नभन्यः १ । न अ० । अर्वा, सूरः १ । न । रुरुक्वान्, शतात्मा १ ॥

अन्वितपदार्थः—(यः) योऽग्निः (अत्यः) सततगमनशीलः (कविः) क्रान्तदर्शी (नभन्यः) आकाशीयः (अर्वा) अश्वः (न) इव (शतात्मा) बह्वात्मा (रुरुक्वान्) प्रकाशमानः (सूरः) सूर्यः (न) इव वर्त्तते, सोऽयम् (नार्मिणीं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुरं) नृणां मनसः प्रियां यज्ञभूमिम् (अदीदेत्) दीपयेत् ॥ ऋग्वेदे १ । १४९ । ३ ऽपि ॥ १ ॥

भाषार्थः-(यः) जो अग्नि (अत्यः) निरन्तर चलने वाला (कविः) क्रान्तदर्शी (नभन्यः) आकाशीय (अर्वा) अश्व (न) सा और (शतात्मा) बहुत रूप वाला (रुरुक्वान्) प्रकाशमान (सूरः) सूर्य (न) सा है, वह (नार्मिणीम्) मनुष्यों के मनभावनी (पुरम्) यज्ञभूमि को (अदीदेत्) प्रकाशमान करे ॥ ऋ० १ । १४९ । ३ में भी ॥ १ ॥

अथ द्वितीया-

३ २ ३ २ ३ १ २३ २ ३ २३ १२ ३ १ २

अभि द्विजन्मा त्री रोचनानि विश्वा रजाꣳसि शुशुचानो अस्थात्।

२३ १२ ३२ ३१२

होता यजिष्ठो अपाꣳ सधस्थे ॥ २ ॥ (१७७३)

पदपाठः-अभि अ० । द्विजन्मा १ । त्री, रोचनानि, विश्वा, रजांसि २ । शुशुचानः १ । अस्थात् क्रि० । होता, यजिष्ठः १ । अपाम् ६ । सधस्थे ७ ॥

अन्वितपदार्थः-(द्विजन्मा) द्वाभ्यामरणिभ्यां जायमानः अथवा-मन्थनात्प्रथमं जन्म, उत्पत्त्यनन्तरमाधानपवमानेष्ट्यादिसंस्काररूपं द्वितीयं जन्म एवं द्विजन्मा, अथवा-द्यावाभूमिभ्यां जन्मतो द्विजन्माऽग्निः (त्री) त्रीणि (रोचनानि) रोचमानानि पृथिव्यादिस्थानानि, अथवा गार्हपत्यादीनि, अपि च-(विश्वा) सर्वाणि (रजांसि) लोकजातानि (शुशुचानः) प्रकाशयन् (होता) देवानामाह्वाता (यजिष्ठः) यष्टृतमः सन् (अभि) सर्वतो म्रियमाणानाम् (अपां) प्रोक्षण्यादिस्थानां जलानां (सधस्थे) सहस्थाने यज्ञदेशे (अस्थात्) तिष्ठेत् ॥ ऋग्वेदे १ । १४९ । ४ ऽपि ॥२॥

भाषार्थः-(द्विजन्मा) दो अरणियों से उत्पन्न होने से द्विजन्मा, वा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एक बार मन्थन से और दूसरी बार आधान पवमान इष्टि आदि संस्कार से जन्म होने कारण से द्विजन्मा, अथवा-द्युलोक भूलोक से उत्पत्ति के कारण से द्विजन्मा अग्नि (त्री) तीन (रोचमानि) प्रकाशमान पृथिव्यादि ३ लोकों वा गार्हपत्यादि ३ अपने भेदों को और (विश्वा) सब (रजांसि) लोकान्तरों को (शुशुचानः) प्रकाशता हुवा (होता) देवों का आवाहन करने वाला (यजिष्ठः) उन का अत्यन्त यजन करने वाला अग्नि (अग्निं) चारों ओर (अपाम्) प्रोक्षणीपात्रादिस्थ जलों के (सधस्थे) सहवर्त्ती यज्ञदेश में (अस्थात्) स्थित हो=स्थापित किया जावे ॥ ऋ० १ । १४९ । ४ में भी ॥ २ ॥

अथ द्वितीया-

३ २ ३ २ ३ २ ३ १ २ ३१२ २२ ३ २

अयꣳस होता यो द्विजन्मा, विश्वा दधे वार्याणि श्रवस्या ।

२ ३ १ २ ३ १ २ १ १ २

मर्त्तोयो अस्मै सुतुको ददाश ॥ ३ ॥ [४] (१७७४)

पदपाठः-अयम्, सः, होता, यः, द्विजन्मा १ । विश्वा २ । दधे क्रि० । वार्याणि २ । श्रवस्या ३ । मर्त्तः, यः १ । अस्मै ४ । सुतुकः १ । ददाश क्रि० ॥

अन्वितपदार्थः-(यः, अयम्, द्विजन्मा, सः, होता), अग्निः (श्रवस्या) यशसइच्छया (विश्वा) सर्वाणि (वार्याणि) "वार्यं वृणोतेरथापि वरतमम्" इति निरु० ५ । १ तानि श्रेष्ठपदार्थजातानि (दधे) धारयति (यः मर्त्त्यः) यजमानः (अस्मै) अग्नये (ददाश) ददाति हविः, सः (सुतुकः) शोभनपुरो भवति ॥ ऋग्वेदे १ । १४९ । ५ ऽपि ॥ ३ ॥

भाषार्थः-(यः) जो (अयम्) यह (द्विजन्मा) द्विजन्मा है (सः) वह (होता) होमसाधक अग्नि (श्रवस्या) यश की इच्छा से (विश्वा) सब (वार्याणि) वरणीय श्रेष्ठ पदार्थों को (दधे) धारण करता है (यः) जो (मर्त्तः) यजमान पुरुष (अस्मै) इस अग्नि के लिये (ददाश) हव्य देता है, वह (सुतुकः) सुन्दर पुर वाला होता है ॥ ऋ० १ । १४९ । ५ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ पञ्चम तृचस्य–वामदेव ऋषिः । अग्निर्देवता । पदपङ्क्तिश्छन्दः ॥

तत्र प्रथमा–

२ ३ २ ३ २ ३ २उ ३ २ ३ २ ३ १ २ ३ १ २

अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳहृदिस्पृशम् ।

३ १ २ ३ १ २

ऋध्यामा त ओहैः ॥ १ ॥ (१७७५) व्याख्याता (४३४)

अथ द्वितीया–

२ ३क २र ३ १ २ ३ २ ३ १ २ ३ २

अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः ।

३ २ ३ १ २ ३ २ ३ १ २

रथीर्ऋतस्य बृहतो बभूथ ॥ २ ॥ (१७७६)

पदपाठः–अध, हि अ० । अग्ने सं० । क्रतोः, भद्रस्य, दक्षस्य, साधोः ६ । रथीः १ । ऋतस्य, बृहतः ६ । बभूथः क्रि० ॥

अन्वितपदार्थः–(अध, हि) अनन्तरमेव (अग्ने) पावक ! त्वं (भद्रस्य, दक्षस्य, साधोः) भद्रपुरुषस्य, चतुरस्य, परोपकारिणोयजमानस्य, (ऋतस्य, बृहतः, क्रतोः) सत्यस्य, महतः, यज्ञस्य (रथीः) नेता (बभूथ) भवसि ॥ ऋग्वेदे ४ । १० । २ तथा यजुर्वेदे १५ । ४५ ऽपि ॥ २ ॥

भावार्थः–(अध हि) फिर (अग्ने) अग्ने ! तू (भद्रस्य, दक्षस्य, साधोः) भद्रपुरुष, चतुर और परोपकारी यजमान के (ऋतस्य, बृहतः, क्रतोः) सच्चे, बड़े, यज्ञ का (रथीः) नेता (बभूथ) होजाता है ॥ ऋ० ४ । १० । २ में, तथा यजुः १५ । ४५ में भी ॥ २ ॥

अथ तृतीया–

३ १ २ ३ १र २र ३ २ १र २र

एभिर्नो अर्कैर्भवानो अर्वाङ् स्वा३र्ण ज्योतिः ।

२ ३ १ २ ३ २ ३ १ २

अग्ने विश्वेभिः सुमना अनीकैः ॥ ३ ॥ [५](१७७७)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–एभिः ३ । नः ४ । अर्कैः ३ । भव क्रि० । नः ६ । अर्वाक् १ । स्वः, न अ० । ज्योतिः १ । अग्ने सं० । विश्वेभिः ३ । सुमनाः १ । अनीकैः ३ ॥

अन्वितपदार्थः–(स्वः) सूर्यः (न) इव (ज्योतिः) ज्योतिष्मान् त्वं (नः) अस्माकम् (एभिः अर्कैः) एभिर्मन्त्रैः (विश्वेभिः) सर्वैः (अनीकैः) तेजोभिः (नः) अस्मभ्यं (सुमनाः) मनःसौष्ठवकरः (अर्वाक्) अनुकूलः संमुखः (भव) एधि ॥ ऋग्वेदे ४ । १० । ३ तथा यजुर्वेदे १५ । ४६ ऽपि ॥ ३ ॥

भाषार्थः–(स्वः) सूर्य (न) सा (ज्योतिः) ज्योति वाला तू (नः) हमारे (एभिः) इन (अर्कैः) मन्त्रों से वा हव्यों से (विश्वेभिः) अपने सब (अर्नकैः) तेजों से (नः) हमारे लिये (सुमनाः) मनभावना और (अर्वाक्) अनुकूल सम्मुख (भव) हो ॥ ऋ० ४ । १० । ३ तथा यजुः १५ । ४६ में भी ॥ ३ ॥

इति उत्तरार्चिके विंशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे–

प्रगाथात्मकस्य प्रथम सूक्तस्य–प्रस्कण्वऋषिः । अग्निर्देवता । जगती छन्दः ॥

तत्र प्रथमा—

२ ३ १ २ ३ १ २ ३ १ २ २ २ ३ १ २

अग्ने विवस्वदुषसश्चित्रꣳ राधो अमर्त्य । आ दाशुषे जातवेदो

३ २ ३ २ ३ १ २ ३ १ २

वहा त्वमद्या देवाँ उषर्बुधः ॥ १ ॥ (१७७८) व्याख्याता (४०)

अथ द्वितीया–

२ ३ २ ३ १ २ २ २ ३ १ ३ १ २ ३ १ २ ३ १ २

जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् ।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २

सजूरश्विभ्यामुषसा सुवीर्य,-मस्मे धेहि श्रवो बृहत् २ [६](१७७९)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—जुष्टः १। हि अ०। दूतः १। असि क्रि०। हव्यवाहनः १। अग्ने सं०। रथीः १। अध्वराणाम् ६। सजूः १। अश्विभ्याम् ३। उषसा ३। सुवीर्यम् २। अस्मे ७। धेहि क्रि०। श्रवः, बृहत् २॥

अन्वितपदार्थः—(अग्ने) पावक ! त्वं (हि) निश्चयेन (हव्यवाहनः) हव्यानां वोढा (दूतः) देवदूतः (अध्वराणां) यज्ञानां (रथीः) नेता (असि) भवसि। स त्वं (जुष्टः) अस्माभिः सेवितः सन् (अश्विभ्यां) प्राणोदानाभ्यां सूर्य चन्द्राभ्यां द्यावापृथिवीभ्यामहोरात्राभ्यां वा (उषसा) उषोदेवतया च (सजूः) सह वर्त्तमानः (अस्मे) अस्मासु यजमानेषु (सुवीर्यं) शोभनवर्योपेतं (बृहत्) महत् (श्रवः) अन्नं यशोवा (धेहि) धारय॥ ऋग्वेदे १।४४।२ऽपि॥२॥

भाषार्थः—(अग्ने) अग्ने ! तू (हि) ही (हव्यवाहनः) हव्य पहुंचाने वाला (दूतः) देवतों का दूत (अध्वराणाम्) यज्ञों का (रथीः) नेता (असि) है। सो तू (जुष्टः) हमसे सेवित हुवा (अश्विभ्याम्) प्राणोदानों, वा सूर्य चन्द्रों, वा द्युलोक पृथिवी लोकों, वा दिन रात्रियों और (उषसा) उषा देवी के साथ (सजूः) मिला हुवा (अस्मे) हम यजमानों में (सुवीर्यम्) सुन्दर वीर्ययुक्त (बृहत्) बड़े भारी (श्रवः) अन्न वा यश को (धेहि) धारण करावे॥ ऋ० १।४४।२ में भी॥ २॥

अथ तृचस्य द्वितीयसूक्तस्य—बृहदुक्थ ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः॥

तत्र प्रथमा—

३ १ २ ३ १र २र ३ १र २र ३ १ २ ३ १ २

विधुं दद्राणꣳ समने बहूनां, युवानꣳ सन्तं पलितोजगार।

३ १ २ ३ १ २ ३ २उ ३ २ ३ १र २र

देवस्य पश्य काव्यं महित्वा, ऽद्या ममार स ह्यः समान॥ १॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २ ३ १ २३१ २३२उ ३१र २र ३१र २र

शाक्मना शाको अरुणः सुपर्ण, आ यो महः शूरः सनादनीडः ।

२३१२३२उ ३१२३ २३२उ ३१ २र

याच्चिकेत सत्यमित्तन्न मोघं, वसुस्पार्हमुत जेतोतदाता २ (१७८१)

पदपाठः–शाक्मना ३। शाकः, अरुणः, सुपर्णः १। आ अ०। यः, महः, शूरः १। सनात् अ०। अनीडः १। यत् २। चिकेत क्रि०। सत्यम् १। इत् अ०। तत् १। न अ०। मोघम् १। वसु, स्पार्हम् २। उत अ०। जेता क्रि०। उत। दाता क्रि० ॥

अन्वितपदार्थः–(यः), (शाक्मना) शक्मना बलेन (शाकः) शक्तिमान् (अरुणः) रक्तवर्णः (सुपर्णः) सुपक्षः सहायवान् (महः) विशालदेहः (शूरः) शौर्योपेतः (सनात्) सनातनः पुराणः अनुभवी (अनीडः) गृहत्यागी गृहे निस्पृहः स इत्थंभूतइन्द्रो राजा (यत्), (आ चिकेत) प्रतिजानीयात् (तत् , सत्यं), (मोघम्) असत्यं (न) न स्यात् (उत) तथा (स्पार्हं) स्पृहणीयं (वसु) धनं (जेता) जेष्यति (उत) तथा (दाता) दास्यति ॥ ऋग्वेदे १० । ५५ । ६ ऽपि ॥ २ ॥

भावार्थः–(यः) जो (शाक्मना) बल से (शाकः) शक्तिमान् (अरुणः) रक्तवर्ण (सुपर्णः) उत्तम पक्ष वाला=सहायवान् (महः) विशाल देह वाला (शूरः) शूरवीर (सनात्) पुराणा अनुभवी (अनीडः) दुर्ग वा क़िले से बाहर निर्भय रहने वाला हो, वह इन्द्र=राजा (यत्) जो (आचिकेत) प्रतिज्ञा करे (तत्) वह (सत्यम्) सच हो (मोघम्) झूंठ (न) न हो (उत) और (स्पार्हम्) चाहने योग्य (वसु) धन को (जेता) जीतेगा (उत) और (दाता) देवेगा ॥ ऋ० १० । ५५ । ६ में भी ॥ २ ॥

अथ तृतीया–

१ २ ३ २ ३ १ २ ३ २३१२ ३१२ ३२

ऐभिर्ददे वृष्ण्या पौंस्यानि, येभिरौक्षद्वृत्रहत्याय वज्री ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१र २र ३ १ २ ३१ २ ३२३१२ ३ २
ये कर्मणः क्रियमाणस्य मह्ना-ऋतेकर्ममुदजायन्त देवाः ॥
॥ ३ ॥ [७] (१७८२)

पदपाठः—मा अ० । एभिः ३ । ददे क्रि० । वृष्ण्या, पौंस्यानि २ । येभिः ३ । औक्षत् क्रि० । वृत्रहत्याय४ । वज्री १ । ये १ । कर्मणः, क्रियमाणस्य ६ । मह्ना ३ । ऋतेकर्मम् २ । उदजायन्त क्रि० । देवाः १ ॥

अन्वितपदार्थः—(ये देवाः) शूराः (क्रियमाणस्य कर्मणः), (मह्ना) महत्त्वेन (उदऽजायन्त) उन्नतिं प्राप्नुवन्ति, (येभिः) यैः शूरैः (वज्री) वज्रधरइन्द्रः सेनापतिः राजा वा (वृत्रहत्याय) दुष्टशत्रुहननाय (औक्षत्) बाणादि वृष्टिं करोति, (एभिः) एतैरेव शूरैः (वृष्ण्या) वृष्ण्यानि वीर्यवन्ति (पौंस्यानि) पौरुषाणि (ऋतेकर्मम्) सत्य-व्यवहारे (आ-ददे) गृह्णाति ॥

ऋतेकर्मम् इति विलक्षणं वैदिकपदम् । यद्धि सप्तसु भिन्नस्थानिकपुस्तकेषु, सायणभाष्ये, पदपाठपुस्तके चेत्थ-मेवोपलभ्यते ॥ ऋग्वेदे १० । ५५ । ७ ऽपि ॥ ३ ॥

भाषार्थः—(ये) जो (देवाः) दिव्य बलशाली शूर लोग (क्रियमानस्य) किये जाते हुवे (कर्मणः) कर्म के (मह्ना) महत्त्व से=पुरुषार्थ से, न कि प्रारब्ध के भरोसे (उदऽजायन्त) उन्नति को प्राप्त करते हैं, (येभिः) और जिन शूरों से (वज्री) वज्रवान् सेनापति वा राजा (वृत्रहत्याय) दुष्ट शत्रुगण के हननार्थ (औक्षत्) बाणादिवृष्टि करता है (एभिः) इन्हीं वीरों से (वृष्ण्या) वीर्ययुक्त (पौंस्यानि) पौरुषों को (ऋतेकर्मम्) सत्यव्यवहार में (आददे) ग्रहण करता है ॥ ऋ० १० । ५५ । ७ में भी ॥ "ऋतेकर्मम्" यह एक विलक्षण समास किया हुआ वैदिकपद है जो ७ भिन्न २ स्थान के पुस्तकों में, सायणभाष्य और पदपाठ में भी ऐसा ही मिलता है ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ पञ्चम तृचस्य–बिन्दुः पूतदक्षो वा ऋषिः । मरुतो देवताः । गायत्री छन्दः ॥

तत्र प्रथमा–

२ ३ १ २ ३२ ३१२ २२ ३१२

अस्ति सोमो अयꣳ सुतः पिबन्त्यस्य मरुतः ।

३२ ३१२ ३१३

उत स्वराजो अश्विना ॥ १ ॥ (१७८३) व्याख्याता (१७४)

अथ द्वितीया–

१२ ३१ २३१२ २२ ३२३ १२

पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः ।

३ २ ३ १२

त्रिषधस्थस्य जावतः ॥ २ ॥ (१७८४)

पदपाठः–पिबन्ति क्रि० । मित्रः, अर्यमा १ । तना ३ । पूतस्य ६ । वरुणः १ । त्रिषधस्थस्य, जावतः ६ ॥

अन्वितपदार्थः–(मित्रः, अर्यमा, वरुणः) एतन्नामका मरुतो वायुभेदाः (तना) तनेन ऊर्णास्तुकनिर्मितेन दशापवित्रेण (पूतस्य) पूतं (त्रिषधस्थस्य) त्रिषधस्थं द्रोणकलशा-ऽऽधवनीय-पूतभृताख्येषु त्रिषु स्थानेषु तिष्ठन्तं (जावतः) जन्मवन्तं जायमानमभिषूयमाणं सोमं(पिबन्ति)॥ ऋग्वेदे ८ । ९४ । ५ ऽपि ॥ २ ॥

भाषार्थः–(मित्रः) मित्र (अर्यमा) अर्यमा (वरुणः) वरुण इन नामों वाले वायुभेद मरुत्, (तना) दशापवित्र से (पूतस्य) शोधे हुवे (त्रिषधस्थस्य) १–द्रोणकलश २–आधवनीय ३–पूतभृत इन ३ स्थानों में रक्खे जाने वाले (जावतः) ताज़े अभिषुत सोम को (पिबन्ति) पीते हैं ॥ ऋ० ८ । ९४ । ५ में भी ॥ २ ॥

अथ तृतीया–

३१ २ ३ २३१२ २२ ३२३ १ २

उतोन्वस्य जोषमा इन्द्रः सुतस्य गोमतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १र २र
प्रातर्होतेव मत्सति ॥ ३ ॥ [८] (१७८५)

पदपाठः–उतो, नु अ० । अस्य ६ । जोषम् २ । आ अ० । इन्द्रः १ । सु-तस्य, गोमतः ६ । प्रातः अ० । होता १ । इव अ० । मत्सति क्रि० ॥

अन्वितपदार्थः–(इन्द्रः) इन्द्रो देवः (अस्य) पूर्वोक्तस्य (सुतस्य) अभिषुतस्य (गोमतः) इन्द्रियाणां सामर्थ्यं वर्धयतः सोमस्य (जोषं) सेवनम् (आ–मत्सति) अभिवाञ्छति (उतो नु) पादपूरणौ (प्रातः) प्रातःसवने (इव) यथा (होता) एतत्संज्ञकऋत्विक् आ मत्सति, तद्वत् ॥ ऋग्वेदे ८ । ९४ । ६ ऽपि ॥ ३ ॥

भाषार्थः–(इन्द्रः) इन्द्रदेव (अस्य) इस (सुतस्य) अभिषुत (गोमतः) इन्द्रियों को शक्ति देने वाले सोम के (जोषम्) सेवन को (आ-मत्सति) चाहता है (इव) जैसे (होता) होता नाम वाला ऋत्विज् (प्रातः) प्रातःसवन में सोम सेवन चाहता है, तद्वत् । (उतो, नु) पाद पूरणार्थ अव्यय हैं ॥ ऋ० ८ । ९४ । ६ में भी ॥ ३ ॥

अथ प्रगाथात्मकस्य चतुर्थसूक्तस्य–जमदग्निर्ऋषिः । सूर्यो देवता । जगती छन्दः ॥ तत्र प्रथमा—

२ ३ १ २ ३ १२ ३ १ २
बण्महाँ असि सूर्य, बडादित्य महाँ असि ।
३१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥ १ ॥

(१७८६) व्याख्याता (२७६)

अथ द्वितीया–

१ २३ १ २ ३ १ २ ३ १ २ ३ १ २
बट् सूर्य श्रवसा महाँ असि, सत्रा देव महाँ असि ।
३ २ ३ १ २ ३क २र १ २ १ ३ २उ ३ १ २
मह्ना देवानामसुर्यः पुरोहितो, विभु ज्योतिरदाभ्यम् २ [९](१७८७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-बट् अ०। सूर्य सं०। अवसा ३। महान् १। असि क्रि०। सत्रा अ०। देव सं०। महान्। असि। महा ३। देवानाम् ६। असुर्यः, पुरोहितः १। विभु, ज्योतिः, अदाभ्यम् १॥

अन्वितपदार्थः-सूर्यदृष्टान्तेन राजानं स्तौति-(सूर्य) आदित्य! (बट्) सत्यं (अवसा) यशसा (महान् असि), (सत्रा) सत्यमेव (देव) दिव्यगुण! (महान्) पृथिव्यादिलोकापेक्षया महापिण्डः (असि) भवसि (महा) महत्त्वेन (देवानां) भूम्यादीनां (पुरोहितः) मुख्यः (असुर्यः) असुराणां हन्ता (अदाभ्यम्) केनाप्यहिंस्यं (विभु) सर्वत्र व्याप्तं (ज्योतिः), असि॥ ऋग्वेदे ८। १०१। १२ऽपि॥२॥

भाषार्थः-सूर्य के दृष्टान्त से राजा की प्रशंसा कहते हैं-(सूर्य) सूर्य! तू (बट्) सचमुच (अवसा) यश से (महान्) बड़ा (असि) है (सत्रा) सचमुच ही (देव) देव सूर्य! तू (महान्) अन्य लोकों से बड़ा (असि) है (महा) बड़ा होने से तू (देवानाम्) पृथिवी आदि लोकों का (पुरोहितः) पुरोहित है (असुर्यः) असुरों का नाशक है और (अदाभ्यम्) किसी से न नष्ट की जाने वाली (विभु) सर्वत्र फैली (ज्योतिः) ज्योति है॥ ऋ० ८। १०१। १२ में भी॥ २॥

इति उत्तरार्चिके विंशाऽध्यायस्य द्वितीयः खण्डः॥२॥

—०:*:०—

अथ तृतीये खण्डे-

प्रथम तृचस्य-सुकक्षऋषिः। इन्द्रो देवता। गायत्री छन्दः॥ तत्र प्रथमा-

१२ १ १२ ३२ ३ १ २
उप नो हरिभिः सुतं याहि मदाना पते।
१२ ३ १२ ३२
उप नो हरिभिः सुतम्॥१॥ (१७८८) व्याख्याता (१५०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

३ १र २र३१२ ३१र २र ३ १ २
द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः ।
१२ ३ १२ ३२
उप नो हरिभिः सुतम् ॥ २ ॥ (१७८१)

पदपाठः-द्विता अ०। यः, वृत्रहन्तमः १। विदे क्रि०। इन्द्रः, शतक्रतुः १। उप अ०। नः ६। हरिभिः ३। सुतम् २॥

अन्वितपदार्थः-(यः), (इन्द्रः) वायुविशेष ईश्वरो वा (वृत्रहन्तमः) अतिशयेन वृत्रस्य मेघस्य हन्ता, पापनाशको वा (शतक्रतुः) नानाविधकर्मास्ति, सः (द्विता) द्विधा वृत्रनाशादिकस्योग्रस्य, जगद्रक्षादेः शान्तस्य कर्मणश्च कर्त्तृत्वात् (विदे) ज्ञायते (हरिभिः) हरणैः व्यापकैः किरणैः (नः) अस्माकं (सुतम्) अभिषुतं सोमम् (उप) उप-याहि इति पूर्वत्रान्वयः । ईश्वरपक्षे (नः) अस्माकं मध्ये (सुतम्) स्तोतारं (हरिभिः) व्यापकैर्गुणैः (उप) उपयाहि प्राप्नुहि ॥ ऋग्वेदे ८ । ९३ । ३२ ऽपि ॥ २ ॥

भाषार्थः-(यः) जो (इन्द्रः) इन्द्र वा परमेश्वर (वृत्रहन्तमः) मेघ वा पाप का अत्यन्त नाशक (शतक्रतुः) असंख्य कर्मों वाला है वह (द्विता) दो प्रकार का (विदे) जाना जाता है। वृत्रनाशादि उग्र कर्मों से उग्र और जगद्रक्षादि शान्तकर्मों से शान्त । (हरिभिः) व्यापक किरणों से (नः) हमारे (सुतम्) अभिषुत सोम को (उप) प्राप्त हो । ईश्वरपक्ष में-(नः) हम में से (सुतम्) स्तुतिकर्त्ता भक्त उपासक को (हरिभिः) व्यापक गुणों से (उप) प्राप्त हो [याहि] क्रियापद पूर्व मन्त्र में आया है, उसी से अन्वय है ॥ ऋ० ८। ९३ । ३२ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

१र २र ३र १र २र ३ १ २

त्वꣳ हि वृत्रहन्नेषां पाता सोमानामसि ।

१ २ ३ १ २ ३ २

उप नो हरिभिः सुतम् ॥३॥ [१०] (१७९०)

पदपाठः–त्वम् १ । हि अ० । वृत्रहन् सं० । एषाम् ६ । पाता १ । सोमानाम् ६ । असि क्रि० । उप । नः । हरिभिः । सुतम् ॥

अन्वितपदार्थः–भौतिकपक्षे–(वृत्रहन्) मेघहन्तः ! (त्वं हि) त्वमेव (एषां सोमानां पाता असि) । ईश्वरपक्षे–(वृत्रहन्) हे पापनाशन ! (त्वं हि), (एषाम्) अस्माभिः संस्कृतानां (सोमानां) सौम्यचित्तभावानां (पाता) ग्राहकः (असि) । शिष्टं पूर्ववत् ॥ ऋग्वेदे ८ । ९३ । ३३ ऽपि ॥ ३ ॥

भाषार्थः–भौतिकपक्ष में–(वृत्रहन्) मेघहन्ता ! (त्वम्) तू (हि) ही (एषाम्) इन अभिषूयमाण (सोमानाम्) सोमों का (पाता) पीने वाला (असि) है । ईश्वरपक्ष में–(वृत्रहन्) पापनाशक ! (त्वं हि) तू ही (एषाम्) इन हमारे संस्कार किये हुवे (सोमानाम्) सौम्य चित्त के भावों का (पाता) ग्राहक (असि) है । शेष पूर्व मन्त्र के समान है ॥ ऋ० ८ । ९३ । ३३ में भी ॥३॥

अथ द्वितीय तृचस्य–वसिष्ठऋषिः । इन्द्रोदेवता । त्रिपदा विराट् छन्दः ॥

तत्र प्रथमा–

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

प्र वो महे महे वृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।

१ २ ३ १र २र ३ २

विशः पूर्वीः प्रचर चर्षणिप्राः ॥६॥ (१७९१) व्याख्याता (३२८)

अथ द्वितीया–

३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २

उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ २ ३ १ २ ३ १ २
तस्य व्रतानि न मिनन्ति धीराः ॥ २ ॥ (१७९२)

पदपाठः--उरुव्यचसे, महिने ४ । सुवृक्तिम् २ । इन्द्राय ४ । ब्रह्म २=३ । जनयन्त क्रि० । विप्राः १ । तस्य ६ । व्रतानि २ । न अ० । मिनन्ति क्रि० । धीराः १ ॥

अन्वितपदार्थः--(विप्राः) मेधाविनः (उरुव्यचसे) बहुविस्तृताय (महिने) महते (इन्द्राय) ऐश्वर्यवते परमेश्वराय, राज्ञे वा (सुवृक्तिं) शोभनां स्तुतिं (ब्रह्म) ब्रह्मणा वेदमन्त्रेण (जनयन्त) प्रकटयन्ति (धीराः) धीमन्तः (तस्य) परमेश्वरस्य राज्ञोवा (व्रतानि) नियमान् (न) नैव (मिनन्ति) हिंसन्ति ॥ ऋग्वेदे ७ । ३१ । ११ऽपि ॥२॥

भाषार्थः--(विप्राः) विद्वान् ब्राह्मण (उरुव्यचसे) बहुत विस्तृत (महते) बड़े (इन्द्राय) परमेश्वर वा राजा के लिये (सुवृक्तिम्) सुन्दर प्रशस्ति को (ब्रह्म) वेद द्वारा (जनयन्त) प्रकट करते हैं (धीराः) बुद्धिमान् जन (तस्य) उस परमेश्वर वा राजा के (व्रतानि) नियमों को (न) नहीं (मिनन्ति) तोड़ते ॥ ऋ० ७ । ३१ । ११ में भी ॥ २ ॥

अथ तृतीया--

२ ३ २ ३ १ २ ३ २ ३ १ २ २ ३ १ २
इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
१ २ ३ २ ३ १
हर्यश्वाय वर्धया समापीन् ॥ ३ ॥ [११] (१७९३)

पदपाठः--इन्द्रम् २ । वाणीः १ । अनुत्तमन्युम् २ । एव, सत्रा अ० । राजानम् २ । दधिरे क्रि० । सहध्यै अ० । हर्यश्वाय ४ । वर्धय क्रि० । सम् अ० । आपीन् २ ॥

अन्वितपदार्थः--(हर्यश्वाय) हरणोऽश्वोयस्य तस्मै राज्ञे, हरणोश्वोव्याप्तिर्यस्य तस्मै परमेश्वराय वा (आपीन्) बन्धून्भ्रातॄन् (सं-बर्हय) संवर्धय । यतः (सत्रा) सर्वस्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(राजानम्) ईशितारम् (अनुत्तमन्युम्) केनाऽप्यऽनिवार्योमन्युः क्रोधो यस्य तं सर्वाऽप्रधृष्यम् (इन्द्रं) राजानं परमेश्वरं वा (एव) निश्चयेन (वाणीः) वाचः प्रशस्तिमन्त्ररूपाः (सहध्यै) शत्रूनभिभवितुं (दधिरे) धारयन्ति, तदनुकूलाः प्रवर्त्तन्ते ॥ ऋग्वेदे ७ । ३१ । १२ ऽपि ॥ ३ ॥

भाषार्थः-हे मनुष्य ! (हर्यश्वाय) तुरगादि बल वाले राजा वा सब को प्राप्त होने वाली है व्याप्ति जिस की उस परमेश्वर के लिये (आपीन्) सब भाइयों को (संबर्हय) भले प्रकार सुशीलतादि सदाचार से बढ़ा । क्योंकि (सत्रा) सब के (राजानम्) राजा (अनुत्तमन्युम्) जिस का क्रोध किसी से न सहारा जाय वा न हटाया जाय उस (इन्द्रम्) राजा वा ईश्वर को (एव) निश्चय करके (वाणीः) प्रशंसारूप वेदवचन (सहध्यै) शत्रुओं के तिरस्कार करने को (दधिरे) धारित करते हैं अर्थात् तदनुकूलतया प्रवृत्त होते हैं ॥ ऋ० ७ । ३१ । १२ में भी ॥ ३ ॥

अथ तृतीयस्य प्रगाथस्य-वसिष्ठऋषिः । इन्द्रो देवता । बृहती छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ २ ३ १ २ ३ १२ २२ ३ २ ३

यदिन्द्र यावतस्त्वमेतावदहमीशीय । स्तोतार-

१ २ ३ १ २ ३ १ २

मिद्दधिषे रदावसो न पापत्वाय रꣳसिषम् ॥ १ ॥

(१७९४) व्याख्याता (३१०)

अथ द्वितीया-

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २२ ३ १ २

शिक्षेयमिन्महयते दिवे दिवे राय आ कुह चिद्विदे ।

२३ ३ १ २ ३ २ ३ २ ३ १ २ ३ २

न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता

३ २

च न ॥ २ ॥ [१२] (१७९५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–शिक्षेयम् क्रि० । इत् अ० । महयते ४ । दिवे दिवे अ० । रायः २ । आ, कुह, चित् अ० । विदे ४ । न, हि अ० । त्वत् ५ । अन्यत् १ । मघवन् सं० । नः ६ । आप्यम् १ । वस्यः १ । अस्ति क्रि० । पिता १ । च, न अ० ॥

अन्वितपदार्थः–(मघवन्) हे इन्द्र ! परमेश्वर ! अहं (दिवे दिवे) प्रतिदिनं (महयते) पूजयते देवानां यजनकर्त्रे (कुह चिद्विदे) कुत्रापि उपलभ्यमानाय जनाय (रायः) धनानि (आ, शिक्षेयम्, इत्) सर्वतो दद्यामेव । इति कृपया विधेहि । (त्वत् अन्यत्) त्वत्तोऽन्यः (नः) अस्माकम् (वस्यः) प्रशस्तः (आप्यम्) आप्यो बन्धुः (न हि अस्ति) नैव भवति (पिता च न) पालयिता च नास्ति ॥ ऋग्वेदे ७ । ३२ । १९ ऽपि ॥ २ ॥

भाषार्थः–(मघवन्) हे सर्वधनपते ! परमेश्वर ! इन्द्र ! मैं (दिवे दिवे) प्रतिदिन (महयते) यज्ञादि परोपकार करने वाले (कुह चिद्विदे) कहीं भी मिलने वाले जन के लिये (रायः) धनों को (आ) सर्वतः (शिक्षेयम्) देऊं (इत्) ही । ऐसी बुद्धि करदो क्योंकि (त्वत्) आप के (अन्यत्) अतिरिक्त कोई (नः) हमारा (वस्यः) उत्तम (आप्यम्) बन्धु (न हि) नहीं (अस्ति) है (च) और (पिता) पालक भी (न) नहीं है ॥ ऋ० ७ । ३२ । १९ में भी ॥ २ ॥

अथ चतुर्थ तृचसूक्तस्य–वसिष्ठ ऋषिः । इन्द्रो देवता । विराट् छन्दः ॥

तत्र प्रथमा–

३ १ २र ३ २उ ३ २ ३ २ ३ १ २ ३ २

श्रुधी हवं विपिपानस्यार्द्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।

३ २उ ३ १ २ ३ २ ३ २

कृष्वा दुवाꣳस्यन्तमा सचेमा ॥ १ ॥ (१७९६)

पदपाठः–श्रुधि क्रि० । हवम् २ । विपिपानस्य, अर्द्रेः ६ । बोध क्रि० । विप्रस्य, अर्चतः ६ । मनीषाम् २ । कृष्व क्रि० । दुवांसि, अन्तमा २ । सचा अ० । इमा २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः—हे इन्द्र ! परमेश्वर ! (विपिपानस्य) जलं पीतवतः (अद्रेः) मेघस्य (हवम्) गर्जनं शब्दं (श्रुधि) श्रावय=सुष्ठु वर्षाः कारयेति भावः । (अर्चतः) तव स्तुतिं कुर्वतः (विप्रस्य) मेधाविनः (मनीषां) धारणावतीं बुद्धिं (बोध) बोधय प्रेरय (इमा) इमानि (दुवांसि) अस्मत्कृतानि परिचरणानि (अन्तमा) बुद्धिस्थानि (सचा) सहायभूतः सन् (कृण्व) कुरु ॥ ऋग्वेदे ७ । २२ । ४ ऽपि ॥ १ ॥

भाषार्थः—हे परमेश्वर ! इन्द्र ! (विपिपानस्य) जल भरे (अद्रेः) मेघ की (हवम्) ध्वनि गर्जना को (श्रुधि) सुनवाइये अर्थात् भले प्रकार वर्षा कराइये और (अर्चतः) आप की स्तुति करते हुवे (विप्रस्य) मेधावी ब्राह्मण की (मनीषाम्) मति को (बोध) चेताइये (इमा) इन (दुवांसि) हम से की हुई सेवाओं को (अन्तमा) बुद्धिस्थ (सचा) सहायक होते हुवे (कृण्व) कीजिये ॥ ऋ० ७ । २२ । ४ में भी ॥ १ ॥

अथ द्वितीया—

२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ क=२

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य

३ २ १ २ ३ १ २

विद्वान् । सदा ते नाम स्वयशो विवक्मि ॥ २ ॥ (१७१७)

पदपाठः—न अ० । ते ६ । गिरः २ । अपि अ० । मृष्ये क्रि० । तुरस्य ६ । न । सुष्टुतिम् २ । असुर्यस्य ६ । विद्वान् १ । सदा अ० । ते । नाम, स्वयशः २ । विवक्मि क्रि० ॥

अन्वितपदार्थः—हे परमेश्वर ! अहं भक्तः (तुरस्य) दुष्टनिबर्हणस्य (ते) तव (गिरः) वेदवाचः (मृष्ये अपि न) नैव सोढुं शक्नोमि । वेदोक्तदण्डभयाद्बिभेमि । (असुर्यस्य)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

असुषु प्राणेषु रमन्ते ते योगिनोऽसुराः तद्विनकरस्य, असुरो मेघो वा तद्विकरस्य तव (सुष्टुतिम्) शोभनां स्तुतिं (न) नैव (विद्वान्) जानन्नस्मि । किन्तु (ते) तव (स्वयशः) असाधारणयशोयुक्तं (नाम) नामैव (विवक्मि) विविधं वच्मि ॥ परमेश्वरनामसंकीर्त्तनमाहात्म्यमनेन बोध्यते ॥ ऋग्वेदे ७ । २२ । ५ ऽपि ॥ २ ॥

भाषार्थः—हे परमेश्वर! मैं सेवक (तुरस्य) दुष्टों के नाशक (ते) तुम्हारी (गिरः) वेदोक्त दण्डाज्ञाओं को (मृष्ये अपि न) सह भी नहीं सक्ता और (असुर्यस्य) योगिगम्य वा मेघसहायक आप की (सुष्टुतिम्) उत्तम स्तुति को (न) नहीं (विद्वान्) जानता । किन्तु (ते) तुम्हारे (स्वयशः) असाधारण यश वाले (नाम) नाम को (विवक्मि) अनेक प्रकार से कीर्त्तन करता हूं ॥ वेदादि न पढ़े हुवे प्राणियों को परमेश्वर के नामस्मरण का माहात्म्य इस में कहा गया है ॥ ऋ० ७ । २२ । ५ में भी ॥ २ ॥

अथ तृतीया—

२३ २ ३ १२ ३ १ २ ३ १२ ३ १ २ ३ २
भूरि हि ते सवना मानुषेषु, भूरि मनीषी हवते त्वामित्।
२उ ३ १ २ ३ १ २
मारे अस्मन्मघवञ्ज्योक्कः ॥ ३ ॥[१३](१७१८)

पदपाठः—भूरि अ० । ते ६ । सवना १ । मानुषेषु ७ । भूरि । मनीषी १ । हवते क्रि० । त्वाम् २ । इत्, मा, आरे अ० । अस्मत् ५ । मघवन् सं० । ज्योक् अ० । कः क्रि० ॥

अन्वितपदार्थः—(मघवन्) हे सर्वधनवन्! इन्द्र! परमेश्वर! (मानुषेषु) मनुष्यलोकेषु (ते) तव (सवना) सवनानि उत्पादनानि (भूरि) बहूनि सन्तु । (इत्) यतः (त्वाम्) ईश्वरं (मनीषी) विद्वान् पुरुषः (भूरि) बहु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(हवसे) स्तौति (अस्मत्) अस्मत्तः (आरे) समीपे वर्त्तमानस्त्वं (ज्योक्) अस्मद्रक्षणे चिरं (मा कः) मा कुरु ॥ ऋग्वेदे ७ । २२ । ६ ऽपि ॥ ३ ॥

भाषार्थः-(मघवन्) हे सर्वधनवन्! इन्द्र! परमेश्वर! (मानुषेषु) मनुष्यलोकों में (ते) तेरे (सवना) उत्पादन (भूरि) बहुत हों, (इत्) क्योंकि (त्वाम्) तुझ को (मनोषी) विद्वान् उपासक (भूरि) बहुत (हवसे) स्तुति पूर्वक भजता है पुकारता है (अस्मत्) हम से (आरे) समीप में वर्त्तमान तू (ज्योक्) देरी (मा) न (कः) कर । शीघ्र हमारी पुकार सुन ॥ ऋ० ७ । २२ । ६ में भी ॥ ३ ॥

इति विंशोऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थे खण्डे-

प्रथम तृचस्य-सुदास ऋषिः । इन्द्रोदेवता । महापङ्क्तिश्छन्दः ।

तत्र प्रथमा-

१ २ ३१र २र ३१२
प्रोष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।
३१२ ३२ ३२ ३१२ ३२
अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रहा ।
३१२ ३१र २र ३१२
अस्माकं बोधि चोदिता नभन्तामन्यकेषां
३२उ ३ १२
ज्याका अधि धन्वसु ॥ १ ॥ (१७१९)

पदपाठः-प्र, उ, सु अ० । अस्मै ४ । पुरः, रथम् २ । इन्द्राय ४ । शूषम् २ । अर्चत क्रि० । अभीके ७ । चित्, उ अ० । लोककृत् १ । सङ्गे ७ । समत्सु ७ । वृत्रहा १ । अस्माकम् ६ । बोधि क्रि० । चोदिता १ । नभन्ताम् क्रि० । अन्यकेषाम् ६ । ज्याकाः १ । अधि अ० । धन्वसु ७ ॥

अन्वितपदार्थः-(अस्मै) प्रसिद्धाय (इन्द्राय)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परमेश्वराय वा राज्ञे अर्थात् तस्य प्रसन्नतार्थं (पुरः) नगराणि (रथं) रथादियानानि (शूषं) बलं सैन्यं (उ) च (सु-प्र-अर्चत) संस्कुरुत । स हि (वृत्रहा) पापानां घातकः (लोककृत्) लोकानां कर्त्ता वर्धको वा (समत्सु) संग्रामेषु (अभीके चित् उ) समीपं प्राप्तेष्वपि कामादिशत्रुषु परराष्ट्रवीरेषु (सङ्गे) संगमनीये शत्रुबले (अस्माकं) प्रजाजनानां (चोदिता) वीरोचितकार्येषु प्रेरकः (बोधि) बोधयति। येन (अन्यकेषाम्) कुत्सितानामन्येषां परेषां शत्रूणां (ज्य काः) कुत्सिताः ज्याः (अधि धन्वसु) धनुष्षु आरोपिता अपि (नभन्ताम्) नश्यन्तु॥

शूषमिति बलनाम निघं० २। ९ ॥ अभीके इति दिश उत्तरं नाम ३। २९ ॥ समत्सु इति संग्रामनाम २। १७ ॥ नभते इति बधकर्मा २। १९ ॥ समानं माद्यन्त्यस्मिन्निति समत् संग्रामः, " समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु ६। ३। ८४ इति समानशब्दस्य सः ॥ सङ्गे इत्यत्र " डोन्यत्रापि दृश्यते " [३। २। ४८ वा०] इति गमेर्डः ॥ अन्यकेषाम्-कुत्सिता अन्ये=अन्यके, तेषाम्, " अव्ययसर्वनाम्नामकच् प्राक् टेः " ५। ३। ७१ इति कुत्सार्थेऽकच्, तन्मध्यपतितास्तद्ग्रहणेन गृह्यन्त इति सर्वनामत्वात्सुट् ॥ कुत्सिताः ज्याः=ज्याकाः " कुत्सिते " ५। ३। ७४ इति कः ॥ ऋग्वेदे १०। १३३। १ ऽपि ॥ १ ॥

भाषार्थः-(अस्मै) इस (इन्द्राय) परमेश्वर वा राजा के लिये अर्थात् उस की प्रसन्नार्थ (पुरः) नगरों (रथम्) सवारियों (उ) और (शूषम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बल सेना आदि को (सु-प्र-अर्षत) संस्कृत करो । वह (वृत्रहा) पापियों का नाशक (लोककृत्) लोकों को उत्पादक वा वर्धक (समत्सु) संग्रामों में (अमीके चित् उ) कामादि वा पर वीरों के सामीप्य में भी (सङ्के) मिले हुवे शत्रुबल पर (अस्माकम्) हमारा (चोदिता) प्रेरक (बोधि) हम को चेताता है । जिस से (अन्येषाम्) अन्य दुष्टों की (ज्याकाः) बुरी प्रत्यञ्चायें (अधि धन्वसु) धनुषों पर चढी हुई भी (नशन्ताम्) नष्ट होजावें ॥

निघण्टु २ । ९, ३ । २९, २ । १७ २ । १९ और अष्टाध्यायी ६ । ३ । ८४, ३ । २ । ४८ वा०, ५ । ३ । ७१, ५ । ३ । ७४ के प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १० । १३३ । १ में भी ॥ १ ॥

अथ द्वितीया-

२उ ३ १२ ३२३ २३१२

त्व ꣳ सिन्धू ँ रवासृजोऽधराचो अहन्नहिम् ।

३ १२ ३ १२ ३ १२

अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।

२ ३ १२ ३ १२ ३१२

तं त्वा परिष्वजामहे । नशन्तामन्यकेषां

३ २उ ३ १२

ज्याका अधि धन्वसु ॥ २ ॥ (१८००)

पदपाठः--त्वम् १ । सिन्धून् २ । अवासृजः क्रि० । अधराचः २ । अहन् क्रि० । अहिम् २ । अशत्रुः १ । इन्द्र सं० । जज्ञिषे क्रि० । विश्वम् २ । पुष्यसि क्रि० । वार्यम्, तम् , त्वा २ । परिष्वजामहे, नशन्ताम् क्रि० । अन्यकेषाम् । ज्याकाः । अधि । धन्वसु ॥

अन्वितपदार्थः-(इन्द्र) हे परमेश्वर ! वा राजन् ! वा वायुविशेष ! (त्वम्), (अधराचः) अधःप्रवाहान् (सिन्धून्) स्यन्दनशीलान् नदान् वा कुल्याः (अवासृजः) उत्पादितवानसि, यतः (अहिम्) मेघम् (अहन्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हतवानसि (अशत्रुः) नष्टत्वान्नास्ति शत्रुर्यस्य सत्वम् (जज्ञिषे) प्रकटो भवसि (वार्यम्) जलेन जीवन्तं (विश्वं) समस्तं जगत् प्रजावर्गं वा (पुष्यसि) पालयसि (तं त्वा) पूर्वोक्तगुणं त्वां (परिष्वजामहे) परित उपास्महे ॥ (नभन्तामन्यकेषां ज्याका अधि धन्वसु) पूर्ववत् ॥ ऋग्वेदे १० । १३३ । २ ऽपि ॥ २ ॥

भाषार्थः—(इन्द्र) हे परमेश्वर ! वा राजन् ! वा वायुविशेष ! (त्वम्) तू (अधराचः) नीचे को प्रवाहित होने वाले (सिन्धून्) नदी नदों वा नहरों को (अवासृजः) उत्पन्न करने वाला है क्योंकि (अहिम्) मेघ को (अहन्) हनन करने वर्षाने वाला है इस से (वार्यम्) जलोपजीवी (विश्वम्) जगत् वा प्रजावर्ग का (पुष्यसि) पालन करता है (अशत्रुः) शत्रुरहित तू (जज्ञिषे) प्रकट होता है (तम्) उक्तगुणविशिष्ट (त्वा) तुझ को (परिष्वजामहे) हम उपासित करते हैं (नभन्तामन्यकेषां ज्याका अधि धन्वसु) पूर्व मन्त्र के समान है ॥ ऋ० १० । १३३ । २ में भी ॥ ३ ॥

अथ तृतीया—

२उ ३ १ २ ३ १ २ ३ १ २
वि षु विश्वा अरातयोर्यो नशन्त नो धियः ।
१ २ ३ १ २ ३१र २र ३ १ २
अस्तासि शत्रवे वधं यो न इन्द्र जिघाꣳसति ।
१ २ ३ २ ३ २उ ३ १ २ ३ १ २
या ते रातिर्ददिर्वसु नभन्तामन्यकेषां
३ २उ ३ १ २
ज्याका अधि धन्वसु ॥ ३ ॥ [१४] (१८०१)

पदपाठः—वि, षु अ० । विश्वाः, अरातयः, अर्यः १ । नशन्त क्रि० । नः ६ । धियः १ । अस्ता १ । असि क्रि० । शत्रवे ४ । वधम् २ । यः १ । नः २ । इन्द्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सं० । जिघांसति क्रि० । या १ । ते ६ । रातिः, ददिः १ । वसु २ । मन्यन्ताम् । अन्यकेषाम् । उपाकाः । अधि । धन्वसु ॥

अन्वितपदार्थः–(इन्द्र) हे परमेश्वर ! वा राजन् ! वा वायुविशेष ! (यः), (नः) अस्मान् (जिघांसति) हन्तुमिच्छति (शत्रवे) तस्मा अस्मद्रिपवे (वधं) नाशनमस्त्रम् (अस्ताअसि) क्षेप्ता भवसि (नः) अस्माकं (विश्वाः) समस्ताः (अर्यः) अभिगन्त्र्यः (अरातयः) अदात्र्यः शत्रुभूताः प्रजाः (वि नशन्त) विनश्यन्तु (धियः) बुद्धयः (सु) शोभना भवन्तु (या), (ते) तव (रातिः) दान क्रियासित सा (वसु) धनं (ददिः) दात्री भवतु । शिष्टं समानम् ॥ ऋग्वेदे १० । १३३ । ३ ऽपि ॥ ३ ॥

भाषार्थः–(इन्द्र) हे परमेश्वर ! वा राजन् ! वा वायुविशेष ! (यः) जो नः) हम को (जिघांसति) मारना चाहता है उस (शत्रवे) हमारे शत्रु के लिये (वधम्) अस्त्र को (अस्ता) फेंकने वाला (असि) है तू । (नः) हमारी (विश्वाः) सब (अर्यः) सामना करने वाली (अरातयः) अदाता शत्रुभूत प्रजायें (वि नशन्त) नष्ट हों और (धियः) बुद्धियें (सु) अच्छी हों (या) जो (ते) तेरी (रातिः) दात है वह (वसु) धन को (ददिः) देने वाली हो । अन्य समान है ॥ ऋ० १० । १३३ । ३ में भी ॥ ३ ॥

अथ द्वितीयतृचस्य–मेधातिथिः प्रियमेधा वा ऋषिः। इन्द्रो देवता गायत्री छन्दः॥

तत्र प्रथमा–

१ २७ ३ १ २ ३ १२ २२ ३ १ २
रेवाँ इद्रेवतः स्तोता स्यात्त्वावतोमघोनः ।
१ २ ३ १ २
प्रेदु हरिवः सुतस्य ॥ १ ॥ (१८०२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-रेवान् १ । इत् अ० । रेवतः ६ । स्तोता १ । स्यात् क्रि० । त्वावतः, मघोनः ६ । प्र, इत्, उ अ० । हरिवः सं० । सुतस्य ६ ॥

अन्वितपदार्थः-(हरिवः) हरणकिरणाऽश्ववन् ! इन्द्र ! (रेवतः) धनवतः तव (स्तोता) प्रशंसकः उपासकः (रेवान्) धनवान् (स्यात्) भवेत् (इत्) एव । नतु दारिद्र्यं प्राप्नोति । उक्तमर्थं कैमुतिकन्यायेन द्रढयति (त्वावतः) त्वत्सदृशस्य [युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ५ । १ । ६१ वा०] इति मतुप् । (मघोनः) धनवतः (सुतस्य) "षु" प्रसवैश्वर्ययोः भ्वा० प० ऐश्वर्योपेतस्याऽन्यस्याऽपि स्तोता (प्र, इत्, उ) धनवान् स्यादेव, तदा तव स्तोता धनाढ्योभवेदेवेति किमु वक्तव्यम् ॥ ऋग्वेदे ८ । २ । १३ ऽपि ॥ १ ॥

भाषार्थः-(हरिवः) हे हरणशील किरणरूप, वा बाणरूप, वा व्याप्तिरूप वा प्राणरूप अश्वों वाले ! इन्द्र ! (रेवतः) तुझ धनी का (स्तोता) स्तुति करने वाला उपासक (रेवान्) धनवान् (स्यात्) होगा, क्यों कि (त्वावतः) तुझसे (मघोनः) धनवान् (सुतस्य) ऐश्वर्यवान् का किसी अन्य का भी स्तोता (प्र, इत्, उ) अवश्य धनी हो जाता है तब तेरे स्तोताओं का तो कहना ही क्या है ॥ ऋ० ८ । २ । १३ में भी ॥ १ ॥

अथ द्वितीया-

३ २ ३ २ ३ १ २ ३ १ २ ३ १र २र
उक्थं च न शस्यमानं नागोरयिराचिकेत ।
१ २ ३र ३ १ २
न गायत्रं गीयमानम् ॥२॥ (१८०३) व्याख्याता (२२५)

अथ तृतीया-

१ २ ३ २ ३ १र २र ३ १ २
मा न इन्द्र पीयत्नवे मा शर्धते परादाः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २
शिक्षा शचीवः शचीभिः ॥ ३ ॥ (१८०४)

पदपाठः-मा अ० । नः २ । इन्द्र सं० । पीयत्नवे ४ । मा । शर्धते ४ । परादाः, शिक्ष क्रि० । शचीवः सं० । शचीभिः ३ ॥

अन्वितपदार्थः-(इन्द्र) हे इन्द्र ! त्वं (पीयत्नवे) पीयतिर्हिंसाकर्मा निरु० ४ । २५ हिंसाकारिणे दुष्टप्राणिने (नः) अस्मान् (मा) न (परादाः) परित्यज (मा) न च (शर्धते) अभिभवित्रे परादाः । अपि तु (शचीवः) हे बुद्धि भाण्डागार ! (शचीभिः) प्रज्ञाभिः (शिक्ष) अस्माननुशाधि ॥ ऋग्वेदे ८ । २ । १५ ऽपि ॥ ३ ॥

भाषार्थः-(इन्द्र) हे इन्द्र ! तू (पीयत्नवे) हिंसक दुष्ट प्राणी के लिये (नः) हम को (मा) मत (परादाः) छोड़ (मा) और मत (शर्धते) तिरस्कार करते हुवे के लिये छोड़, किन्तु (शचीवः) हे बुद्धिभाण्डागार ! (शचीभिः) बुद्धियों से (शिक्ष) हम को शिक्षा दे ॥ ऋ० ८ । २ । १५ में भी ॥ ३ ॥

अथ तृतीयतृचस्य-काण्वो नीपातिथिर्ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः ॥

तत्र प्रथमा-

१ २ ३ १ २ ३ २ ३ १ २ ३ २
एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
३ १ ३ १ ३ १ २ ३ १ २ ३ १ २
दिवो अमुष्य शासतो दिवं यय दिवावसो
॥ १ ॥ (१८०५) व्याख्याता (३४८)

अथ द्वितीया-

२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥२॥ (१८०६)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः–अत्र, वि अ०। नेमिः १। एषाम् ६। उराम् २। न अ०। धूनुते क्रि०। वृकः १। दिवः, अमुष्य शासतः ६। दिवम् २। यय क्रि०। दिवावसो सं०॥

अन्वितपदार्थः–(अत्र) यज्ञे (एषां) अभिषवग्रावणां (नेमिः) प्रान्तदेशः, (वृकः), (उरां) मेषीं (न) इव (विधूनुते) पिंषति। अतः (दिवावसो) दिवि स्वर्गे सुखे वासयितः ! इन्द्र ! परमेश्वर ! (दिवः) स्वर्गस्य सुखस्थानस्य (शासतः) शासनं कुर्वतः (अमुष्य) अस्य तव परमेश्वरस्य (दिवं) सुखं (यय) प्रापय॥ सोमेन यष्टारो दिवं यान्ति इति भावः॥ ऋग्वेदे ८। ३४। ३ ऽपि॥२॥

भाषार्थः–(अत्र) यहां यज्ञदेश में (एषाम्) इन अभिषवग्रावों की (नेमिः) कोर (वृकः) भेड़िया (उराम्) मेंढी को (न) जैसे (वि धूनुते) पीसता है। अतः (दिवावसो) हे स्वर्ग में बसाने वाले ! इन्द्र ! परमेश्वर ! (दिवः) सुखदायी स्थान के (शासतः) राजा (अमुष्य) आप के (दिवम्) सुख को (यय) प्राप्त करावो॥ सोमयाजी स्वर्ग पाते हैं, यह भाव है॥ ऋ०८। ३४। ३ में भी॥ २॥

अथ तृतीया–

२ ३ २ ३ १ २ ३ २ ३ १ २ २ २

आ त्वा ग्रावा वदन्निह सोमी घोषेण वक्षतु।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २

दिवो अमुष्य शासतो दिवं यय दिवावसो॥३॥[१६](१८०७)

पदपाठः–आ अ०। त्वा २। ग्रावा १। वदन् १। इह अ०। सोमी १। घोषेण ३। वक्षतु क्रि०। दिवः, अमुष्य, शासतः ६। दिवम्। यय। दिवोवसो॥

अन्वितपदार्थः–प्रकरणात् इन्द्र ! (सोमी) सोमवान् (ग्रावा) अभिषवपाषाणः (वदन्) शब्दायमानः (घोषेण), (त्वा) त्वामिन्द्रम् (इह) यज्ञे (आ वक्षतु) आ वहतु।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिष्टं पूर्ववत् ॥ ऋग्वेदे तु ८ । ३४ । २–वक्षतु=यच्छतु इति पाठः ॥ ३ ॥

भाषार्थः–प्रकरण से–हे इन्द्र ! (सोमी) सोमरस वाला (ग्रावा) सोमाऽभिषवसाधन बट्टा (वदन्) शब्द करता हुवा (घोषेण) अभिषव शब्द से (त्वा) तुझ को (इह) यहां यज्ञ में (आ वक्षतु) बुलावे । शेष पूर्ववत् ॥ ऋ० ८ । ३४ । २ का पाठभेद संस्कृतभाष्य में देखिये ॥ ३ ॥

अथ चतुर्थ तृचस्य–जमदग्निर्ऋषिः । पवमानः सोमो देवता । भुरिगार्ची द्विपदा विराड् गायत्री छन्दः ॥ तत्र प्रथमा–

१२ ३२३१ २३ १२

पवस्व सोम मन्दयान्निन्द्राय मधुमत्तमः ॥१॥ (१८०८)

पदपाठः-पवस्व क्रि० । सोम सं० । मन्दयन् १ । इन्द्राय ४। मधुमत्तमः १ ॥

अन्वितपदार्थः–(सोम) सोमलते ! (मधुमत्तमः) मधुमिश्रिततमा (मन्दयन्) हर्षयन्ती सती त्वम् (इन्द्राय) वायुविशेषाय राज्ञे वा (पवस्व) शुद्धिं कुरु ॥ ऋग्वेदे ९ । ६७ । १६ ऽपि ॥ १ ॥

भाषार्थः–(सोम) सोमरस ! (मधुमत्तमः) अतिशय मधुररस माक्षिकादिमिश्रित तू (मन्दयन्) हर्ष उत्पन्न करता हुवा (इन्द्राय) वायुविशेष वा राजा वा सूर्य के लिये (पवस्व) शुद्धि कर ॥ ऋ० ९ । ६७ । १६ में भी ॥१॥

अथ द्वितीया–

२ ३१२ ३ १२ ३२ ३१२

ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत ॥२॥ (१८०९)

पदपाठः–ते, सुतासः, विपश्चितः, शुक्राः १ । वायुम् २ । असृक्षत क्रि० ॥

अन्वितपदार्थः–(सुतासः) सुता अभिषुताः सन्तः (विपश्चितः) बुद्धितत्त्ववन्तो बुद्धिवर्धकाः (शुक्राः) वीर्यवन्तोवीर्यप्रदाः (ते) सोमाः (वायुम्) इन्द्रसंज्ञकं वायु-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विशेषम् (असृक्षत) जनयन्ति वर्धयन्ति ॥ ऋग्वेदे तु ९ । ६७ । १८ विपश्चितः=मदिन्तमाः इति पाठभेदः ॥ २ ॥

भाषार्थः—(सुतासः) अभिषुत किये हुवे (विपश्चितः) बुद्धितत्त्वयुक्त बुद्धिवर्धक (शुक्राः) वीर्यवान् वीर्यवर्धक (ते) वे सोम (वायुम्) इन्द्रनामक वायुविशेष को (असृक्षत) उत्पन्न करते बढ़ाते हैं ॥ ऋ० ९ । ६७ । १८ का पाठभेद संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया—

१२ ३१२ ३२ ३१ २

असृग्रन्देववीतये वाजयन्तो रथा इव ॥३॥ [१७] (१८१०)

पदपाठः—असृग्रन् क्रि० । देववीतये ४ । वाजयन्तः, रथाः १ । इव अ० ॥

अन्वितपदार्थः—(रथा इव) वेगवन्तः (वाजयन्तः) बलं यजमानस्येच्छन्तः सोमाः (देववीतये) देवानां भक्षणाय (असृग्रन्) अग्नौ हूयन्ते ॥ ऋग्वेदे ९ । ६७ । १७ ऽपि ॥३॥

भाषार्थः—(रथा इव) रथों के समान वेगवान् (वाजयन्तः) यजमान के बल को चाहते हुवे सोम (देववीतये) देवों के भक्षणार्थ (असृग्रन्) अग्नि में छोड़े=होमे जाते हैं ॥ ऋ० ९ । ६७ । १७ में भी ॥ ३ ॥

इति विंशाऽध्याये चतुर्थः खण्डः ॥ ४ ॥

—(*)—

अथ पञ्चमे खण्डे—

प्रथम ऋचस्य-परुच्छेप ऋषिः । अग्निर्देवता । अत्यष्टिश्छन्दः ॥ तत्र प्रथमा—

३ १र २र ३ १ २ ३ १ २ ३ १र २र ३ १ २ ३

अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुꣳ सहसो जातवेदसं

२ ३ ३१ २ २ ३ १ २ ३ २ ३१ २ ३ २

विप्रं न जातवेदसम् । य ऊर्ध्वया स्वध्वरो देवाञ्या कृपा ।

३२ ३ १ २ ३१२ ३१ २ ३ १ २ ३१२

घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥

॥ १ ॥ (१८११) व्याख्याता (४६५)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया—

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभि-
१ २ ३ १ २ १ २ ३ १२ १२
र्विप्रभिः शुक्र मन्मभिः। परि ज्मानमिव द्याꣳ होतारं चर्ष-
३ २ ३ १ २ ३ १ २ ३ २ ३ ३ १ २ ३ २ ३
णीनाम्। शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये
१ २
विशः ॥ २ ॥ (१८१२ ॥

पदपाठः—यजिष्ठम्, त्वा २। यजमानाः १। हुवेम क्रि० ज्येष्ठम् २। अङ्गिरसाम् ६। विप्र सं०। मन्मभिः, विप्रेभिः ३। शुक्र सं०। मन्मभिः ३। परि अ०। ज्मानम् २। इव अ०। द्याम् २। होतारम् २। चर्षणीनाम् ६। शोचिष्केशम्, वृषणम्, यम् २। इमाः, विशः १। प्रावन्तु क्रि०। जूतये ४। विशः १॥

अन्वितपदार्थः—(शुक्र) हे शुक्र ! उज्ज्वल ! (विप्र) बुद्धितत्त्वोद्बोधक ! अग्ने ! (यजमानाः) वयं (यजिष्ठम्) अतिशयेन यजनीयम् (अङ्गिरसाम्) अङ्गाराणां (ज्येष्ठं) वृद्धतमं (त्वा) त्वां (मन्मभिः) ज्ञानिभिः (विप्रेभिः) विप्रैर्ब्राह्मणैर्ऋत्विग्भिः सह (मन्मभिः) मन्त्रैः (हुवेम) जुहुमः। (विशः) निविशमानाः (विशः) प्रजाः (चर्षणीनां होतारं) मनुष्याणां होमसाधनं (परि) परितः (ज्मानं) गतिमन्तं (द्याम्) सूर्यम् (इव), (शोचिष्केशं) दीप्तकेशसमकिरणजालं (वृषणं) वृष्टिकरं (यम्) यमग्निं (जूतये) स्वर्गादभिमतफलप्राप्तये (प्रावन्तु) प्रकर्षेण रक्षन्तु ॥ "अङ्गिरा अङ्गारतः" निरु० ३। १७ इति सायणः ॥ ऋग्वेदे १। १२७। २ ऽपि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(शुक्र) श्वेत ! उज्ज्वल ! (विप्र) बुद्धि तत्त्व के जगाने वाले ! अग्ने ! (यजमानाः) हम यजमान लोग, (यजिष्ठम्) अत्यन्त यजनीय-(अङ्गिरसाम्) दहकने वाले अङ्गारे वालों में (ज्येष्ठम्) बड़े (त्वा) तुझ को (मन्मभिः) मननशील (विप्रेभिः) ब्राह्मण ऋत्विजों के साथ (उक्थभिः) मन्त्रों से (हुवेम) हवन करते हैं। (विशः) बैठने वाली (विशः) प्रजायें (चर्षणीनाम्) मनुष्यों के (होतारम्) होता-(परि) सर्वतः (उक्थानम्) गतिमान् (द्याम्) द्युलोक वा सूर्य (न) के समान (शोचिष्केशम्) चमकीले केशों सी किरणों वाले-(वृषणम्) वर्षा करने वाले (यम्) जिस अग्नि को (जूतये) स्वर्गादि अभिमत फलप्राप्ति के लिये (प्राऽवन्तु) बाहुल्य से रक्षा करें ॥ निरुक्त० ३ । १७ का सायणोद्धृत प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १ । १२७ । २ में भी ॥ २ ॥

अथ तृतीया-

२७ ३२ ३१२ ३१२ ३ १ २ ३ १२
स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति
३१ २३१२ २२ ३२ ३२ ३२ ३ १२३
द्रुहन्तरः परशुर्न द्रुहन्तरः । वीडु चिद्यस्य समृतौ
२३१२३ २ ३२ ३१२ ३ १२
श्रुवद्वनेव यत्स्थिरम् । निष्षहमाणो यमते नायते
३२३ १२
धन्वासहा नायते ॥ ३ ॥ [१८] (१८१३)

* इति नवमस्य प्रथमोऽर्धप्रपाठकः

* "सर्वमूलग्रन्थ-संमतोऽयं पाठः । तथा च यथावत् रीत्याऽत्रैव सायणीय विंशाऽध्यायस्य विरामः प्रतिपद्येत, स्याच्चैवमस्य द्वाविंशाऽध्यायसमाप्तिता, परं नेदमाचार्येण तेन भाष्यकृता विवरणकृता च नयनाञ्जलेनैकवारमप्यवलोकित मिति हतीयम्" इति सत्यव्रतः सामश्रमी ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—सः १। हि अ०। पुरूचित् अ०। ओजसा, विरुक्मता ३। दीद्यानः १। भवति क्रि०। द्रुहन्तरः, परशुः १। न अ०। द्रुहन्तरः १। वीडु १। चित् अ०। यस्य ६। समृतौ ७। श्रुवत् क्रि०। वनेव अ०। यत्, स्थिरम् १। निष्षहमाणः १। यमते क्रि०। न अ०। अयते क्रि०। धन्वासहाः १। न। अयते॥

अन्वितपदार्थः—(सः) अग्निः (हि) एव (विरुक्मता) विशेषेण रोचनवता (ओजसा) बलेन (पुरूचित्) बाहुल्येनैव (दीद्यानः) दीप्यमानः सन् (द्रुहन्तरः) द्रोग्धृणां पारयिता (भवति)। (न) यथा (द्रुहन्तरः) शत्रुपारयिता (परशुः) वृश्चनायुधम् तद्वत्। (यस्य) अग्नेः (समृतौ) संगमे (वीडु) दृढम् (यत्), (स्थिरम्) अचलं (चित्) अपि, स्यात्तदपि (वनेव) जलमिव (श्रुवत्) श्रूयेत, नश्यमानम्। योऽग्निः (निष्षहमाणः) निःशेषेणाऽभिभवन्सन् (यमते) उपरमते। (न), (अयते) पलायते, (धन्वासहाः) धनुषा शत्रूनभिभवन्वीरः (न) इव (अयते) गच्छति॥ ऋग्वेदे १। १२७। ३ऽपि॥ ३॥

भाषार्थः—(सः) वह अग्नि (हि) ही (विरुक्मता) विशेष प्रकाश वाले (ओजसा) बल से (दीद्यानः) प्रकाशमान हुवा (पुरूचित्) बहुत ही (द्रुहन्तरः) द्रोह करने वाले प्राणियों को पार करने वाला (भवति) है (न) जैसे (परशुः) फरसा (द्रुहन्तरः) शत्रुओं को पार करने वाला होता है, तद्वत्। (यस्य) जिस अग्नि के (समृतौ) संयम होते ही (वीडु) दृढ (चित्) भी (यत्) जो (स्थिरम्) स्थिर पदार्थ हो वह भी (वनेव) पानी सा (श्रुवत्) सुन पड़ेगा, नष्ट होता हुवा। (निष्षहमाणः) शत्रुओं के निःशेष करके तिरस्कार करता हुवा अग्नि (यमते) उपरत होता है (न

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अयते) नहीं हटता (धन्वासहाः) धनुर्धारी शत्रु के अभिभव करने वाला (न) सा (अयते) चलता है ॥ ऋ० १ । १२७ । ३ में भी ॥ ३ ॥

—*—

इति श्रीमत्कण्ववंशावतंस पण्डित हज़ारीलाल स्वामि-
सूनुना हस्तिनापुरपार्श्ववर्त्ति परीक्षितगढ निवासिना
तुलसीरामस्वामिना कृते सामवेदभाष्ये
उत्तरार्च्चिके विंशोऽध्यायः ॥ २० ॥

—:०*०:—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथैकविंशाऽध्यायः

तत्र

षड्चात्मक प्रथमसूक्तस्य—अग्निर्ऋषिः । अग्निर्देवता । १, ३, ४ पङ्क्तिः, २ भुरिक् पङ्क्तिः, ५ संस्तारपङ्क्तिः, ६ विराट् त्रिष्टुप् च छन्दः ॥ तत्र प्रथमा—

२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २

अग्ने तव श्रवो वयोमहि भ्राजन्ते अर्चयो विभावसो ।

१२ ३ १ २ ३ १ २ ३ २ १ २ ३ १ २

बृहद्भानो शवसा वाजमुक्थां ३ दधासि दाशुषे कवे ॥ १ ॥ (१८१४)

पदपाठः—अग्ने सं० । तव ६ । श्रवः, वयः १ । महि २ । भ्राजन्ते क्रि० । अर्चयः १ । विभावसो, बृहद्भानो सं० । शवसा ३ । वाजम्, उक्थम् २ । दधासि क्रि० । दाशुषे ४ । कवे सं० ॥

अन्वितपदार्थः—(अग्ने) पावक ! (तव) त्वदीयं (वयः) हव्यमन्नं (श्रवः) यशस्यं प्रशस्तमस्ति (विभावसो) विशिष्टा भा दीप्तिः सैव वसु धनं यस्य तादृश ! अग्ने ! (कवे) क्रान्तदर्शिन् ! दृष्टिसहायक ! तव (अर्चयः) अर्चिषो दीप्तयः (महि) महत् यथा स्यात्तथा (भ्राजन्ते) प्रकाशन्ते (बृहद्भानो) प्रौढदीप्ते ! (शवसा) बलेन सह वर्त्तमानम् (उक्थ्यं) प्रशस्यं (वाजम्) अन्नं (दाशुषे) दानशीलाय यजमानाय (दधासि) प्रयच्छसि ॥ ऋग्वेदे १० । १४० । १ ऽपि । यजुर्वेदे १२ । १०६ च ॥ १ ॥

भाषार्थः—(अग्ने) अग्ने ! (तव) तेरा (वयः) हव्य अन्न (श्रवः) कीर्त्तनीय है (विभावसो) विशेष प्रकाशरूप धन वाले अग्ने ! (कवे) दृष्टि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सहायक ! तेरी (अर्चयः) ज्वालायें (महि) बहुत (भ्राजन्ते) प्रकाशती हैं (बृहद्भानो) हे प्रौढदीप्ते ! (शवसा) बल के सहित वर्त्तमान (उक्थ्यम्) प्रशंसनीय (वाजम्) अन्न को (दाशुषे) देने वाले यजमान के लिये (दधासि) तू धारण करता=देता है ॥ ऋ० १० । १४० । १ यजुः १२ । १०६ में भी ॥ ॥

अथ द्वितीया–

३ १२ ३ १२ ३ १२ ३ १२ ३ १२
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
३ २ ३ १२ ३ २ ३ १ २ ३ २ ३ १२ ३२
पुत्रो मातरा विचरन्नु पावसि पृणक्षि रोदसी उभे ॥२॥ (१८१५)

पदपाठः–पावकवर्चाः, शुक्रवर्चाः, अनूनवर्चाः १। उद्–इयर्षि क्रि० । भानुना ३ । पुत्रः १ । मातरा २ । विचरन् १ । उपाऽवसि, पृणक्षि क्रि० । रोदसी, उभे २ ॥

अन्वितपदार्थः–(पावकवर्चाः) शोधकदीप्तिः (शुक्रवर्चाः) निर्मलतेजस्कः (अनूनवर्चाः) संपूर्णतेजस्कः अग्निः (भानुना) ज्वालासमूहेन (उदियर्षि) उद्गच्छति । पुरुषव्यत्ययः (मातरा) मातृभूतयोररण्योर्द्यावाभूम्योर्वा (पुत्रः) पुत्रइव वर्त्तमानः (विचरन्) विविधं चरन् (उपावसि) उपगतान्यजमानान् रक्षति (उभे रोदसी) द्यावाभूमी (पृणक्षि) पूरयति ॥ हविषा द्याम्, वर्षाभिः पृथिवीं चेति तात्पर्यम् ॥ ऋग्वेदे १० । १४० । २ यजुर्वेदे १२ । १०७ ऽपि ॥२॥

भाषार्थः–(पावकवर्चाः) शोधक किरणों वाला (शुक्रवर्चाः) निर्मल श्वेत किरणों वाला (अनूनवर्चाः) पूरे तेज वाला अग्नि (भानुना) लपट से (उदियर्षि) ऊपर को जाता है और (मातरा) मातृतुल्य दो अरणियों वा द्युलोक भूलोकों में (पुत्रः) पुत्र के समान (विचरन्) विचरता हुवा (उपाऽवसि) उपगत यजमानों की रक्षा करता और (उभे) दोनों (रोदसी, द्यावाभूमी को (पृणक्षि) भरता है=हव्य से द्युलोक और वर्षा से भूलोक को ॥ ऋ० १० । १४० । २ यजुः १२ । १०७ में भी ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीया–

१ २ ३ २ ३ १ २ ३ १ २ ३ २
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
२उ ३ १२३१२ ३ १ २ ३ १ २
त्वे इषः संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥३॥ (१८१६)

पदपाठः- ऊर्जः ६ । नपात्, जातवेदः सं० । सुशस्तिभिः ३ । मन्दस्व क्रि० । धीतिभिः ३ । हितः १ । त्वे १ । इषः २ । संदधुः क्रि० । भूरिवर्पसः, चित्रोतयः, वामजाताः १ ॥

अन्वितपदार्थः–(ऊर्जः) बलस्य (नपात्) न पातयितः ! रक्षितः ! (जातवेदः) ज्ञानप्रसारक ! अग्ने ! (सुशस्तिभिः) शोभनाभिः प्रशस्तिभिः सह (धीतिभिः) अङ्गुलिभिः (हितः) आहितः स्थापितस्त्वं (मन्दस्व) हृष्य प्रज्वलितः प्रदीप्तः स्याः (भूरिवर्पसः) अनेकरूपाः (चित्रोतयः) विचित्ररक्षाकाः (वामजाताः) वामं वननीयं जातं जन्म येषां ते यजमानाः (त्वे) त्वयि (इषः) अन्नानि हवींषि (संदधुः) संहितानि कुर्युः जुहुयुरित्यर्थः॥ ऋग्वेदे १० । १४० । ३ ऽपि ॥ ३ ॥

भाषार्थः–(ऊर्जः) बल के (नपात्) न गिराने वाले ! रक्षक ! (जातवेदः) ज्ञान=प्रकाश के उत्पन्न करने और फैलाने वाले ! अग्ने ! (सुशस्तिभिः) उत्तम स्तुतिमन्त्रों के साथ (धीतिभिः) अङ्गुलियों से (हितः) आधान किया हुवा=स्थापित किया हुवा तू (मन्दस्व) प्रदीप्त हो (भूरिवर्पसः) अनेक देशोत्पन्न होने से अनेकरूपों वाले (चित्रोतयः) विचित्र रक्षा वाले (वामजाताः) कमनीय जन्म वाले यजमान लोग (त्वे) तुझ में (इषः) हव्यों को (संदधुः) होमें ॥ ऋ० १० । १४० । ३ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ चतुर्थी-

३ १ २ ३ १ २३ १र २
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
१ २३२ ३१ २३ १२ ३१ २ ३१र २र
स दर्शतस्य वपुषो विराजसि पृणक्षि दर्शतं क्रतुम् ॥४॥ (१८१७)

पदपाठः-इरज्यन् १ । अग्ने सं० । प्रथयस्व क्रि० । जन्तुभिः ३ । अस्मे ६ । रायः २ । अमर्त्य सं० । सः १ । दर्शतस्य, वपुषः ६ । विराजसि, पृणक्षि क्रि० । दर्शतम्, क्रतुम् २ ॥

अन्वितपदार्थः-(अमर्त्य) देव ! (अग्ने) पावक ! (इरज्यन्) ऐश्वर्यं कुर्वन् (जन्तुभिः) जायमानैरात्मीयै स्तेजोभिरित्येव सायणः (अस्मे) अस्माकं (रायः) धनानि धान्यादिकानि (प्रथयस्व) वर्धयस्व (सः) स त्वं (दर्शतस्य) दर्शनीयस्य (वपुषः) तेजोमयस्यात्मस्वरूपस्य [मध्ये] (विराजसि), (दर्शतं) दर्शनीयं कमनीयं (क्रतुं) यज्ञं (पृणक्षि) अस्मान् संपर्चयसि फलेन संयोजयसीति तात्पर्यम् ॥

इरज्यतिरैश्वर्यकर्मा निघं० २ । २१ ॥ सुपां सुलुक् ७ । १ । ३९ इत्यादिना षष्ठ्याः शे आदेशेऽस्मे इति रूपम् ॥ राय इत्यत्र व्यत्ययेन "ऊडिदंपदा०" ६ । १ । १७१ इत्यादि-नाऽऽद्युदात्तत्वं न क्रियते ॥ राजतिरैश्वर्यकर्मा, निघं० २ । २१ ॥ वपुरिति रूपनाम, निघं० ३ । ७ ॥ ऋग्वेदे १० । १४० । ४ तु-दर्शतं=सानसिम् इति पाठः ॥ ४ ॥

भाषार्थः-(अमर्त्य) देव ! (अग्ने) अग्ने ! (इरज्यन्) ऐश्वर्य करता हुवा तू (जन्तुभिः) अपने जायमान तेजों से (अस्मे) हमारे (रायः) धन धान्यादि को (प्रथयस्व) बढ़ा । (सः) वह तू (दर्शतस्य) दर्शनीय (वपुषः) रूप के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

[मध्य में] (विराजसि) अपना ऐश्वर्य करता है और (दर्शतम्) दर्शनीय कमनीय (क्रतुम्) यज्ञ को (पृणक्षि) संपृक्त करता=फल से संयुक्त करता है ॥

निघण्टु २ । २१, ३ । ७ अष्टाध्यायी ७ । १ । ३९, ६ । १ । १७१ के प्रमाण और ऋ० १० । १४० । ४ का पाठभेद संस्कृतभाष्य में देखिये ॥ ४ ॥

अथ पञ्चमी–

३ १२ ३२३१२ ३१२३ १२ ३२ ३२३१२
इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तꣳराधसो महः । रातिं वामस्य
३१२ ३२उ ३१२ ३२ ३२
सुभगां महीमिषं दधासि सानसिꣳरयिम् ॥ ५ ॥ (१८१८)

पदपाठः–इष्कर्त्तारम् २। अध्वरस्य ६ । प्रचेतसम्, क्षयन्तम् २ । राधसः, महः ६ । रातिम् २ । वामस्य ६ । सुभगाम्, महीम्, इषम् २ । दधासि क्रि० । सानसिम्, रयिम् २ ॥

अन्वितपदार्थः–(अध्वरस्य) हिंसारहितस्य यज्ञस्य (इष्कर्त्तारं) संस्कर्त्तारं (प्रचेतसं) प्रकर्षेण चेतयितारं (महः) महतः (राधसः) धनस्य धान्यादिकस्य (क्षयन्तम्) ऐश्वर्यकर्त्तारम् (वामस्य) वननीयस्य कमनीयस्य पदार्थजातस्य (रातिम्) दातारमग्निं प्रशंसामीति वाक्यशेषः । स त्वं (सुभगां) शोभनैश्वर्योपेतां (महीं) महतीम् (इषम्), तथा (सानसिं) संभजनीयं (रयिं) धनं च (दधासि) धारयसि ॥

निष्कर्त्तारमित्यत्र–व्यत्ययो बहुलम् ३ । १ । ८५ इति छान्दसवर्णलोपेन नकारलोपे "इष्कर्त्तारम्" इति सिद्धम् ॥ क्षयतिरैश्वर्यकर्मा, निघं० २ । २१ ॥ रातिमित्यत्र व्यत्ययेन कर्त्तरि क्तिन् ॥ ऋग्वेदे १० । १४० । ५ ऽपि ॥ ५ ॥

भाषार्थः–(अध्वरस्य) हिंसारहित यज्ञ के (इष्कर्त्तारम्) संस्कार करने वाले, (प्रचेतसम्) बहुत चेताने वाले, (महः) बड़े (राधसः) धन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धान्यादि के (क्षयन्तम्) ऐश्वर्य करने वाले, (वामस्य) कमनीय पदार्थ के (रातिम्) दाता [अग्नि की प्रशंसा करता हूं । वह तू अग्नि] (सुम्नगाम्) ऐश्वर्यशालि (महीम्) बड़े (इषम्) अन्न को तथा (सानसिम्) भजनीय (रयिम्) धन को (दधासि) धारण करता है ॥

अष्टाध्यायी ३ । १ । ८५ निघण्टु २ । २१ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १० । १४० । ५ में भी ॥ ५ ॥

अथ षष्ठी–

३ १ २ ३ २ ३ १ २ ३ २ ३ १ २

ऋतावानं महिषं विश्वदर्शत–मग्नि ꣳ सुम्नाय

३ १ २ २ २ १ २ ३ १ २ ३ २ ३

दधिरे पुरो जनाः । श्रुत्कर्ण ꣳ सप्रथस्तमं त्वा गिरा

३ १ २ ३ २

दैव्यं मानुषा युगा ॥ ६ ॥ [१] (१८१९)

पदपाठः–ऋतावानम्, महिषम्, विश्वदर्शतम्, अग्निम् २ । सुम्नाय ४ । दधिरे क्रि० । पुरः अ० । जनाः १ । श्रुत्कर्णम्, सप्रथस्तमम्, त्वा २ । गिरा ३ । दैव्यम् २ । मानुषा, युगा १ ॥

अन्वितपदार्थः–अग्ने ! (जनाः) यजमानाः (ऋतावानं) यज्ञवन्तं सत्यवन्तं (महिषं) महान्तमर्चनीयं वा (विश्वदर्शतं) सर्वस्य दर्शकं (त्वा) त्वाम् (अग्निं) पावकम् (सुम्नाय) सुखाय (पुरः) अग्रे (दधिरे) आदधते यद्वा आहवनीयरूपेण पुरः पूर्वस्यां दिशि आहितं कुर्वन्ति (श्रुत्कर्णं) श्रुण्वन्कर्णौ यस्य तं (सप्रथस्तमं) अतिशयेन विस्तार्यमाणं (दैव्यं) देवानां हविषो वोढृत्वेन संबन्धिनं त्वां (गिरा) वाचा मन्त्रपूर्वकं (मानुषा) मानुषाणि मनोरपत्यानि (युगा) युगानि युगलानि पत्नीयजमानरूपाणि [पुरोदधिरे] ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋतावानमित्यत्र–बहुलं छन्दसि ५।२।१२२ इति सूत्रोपरिस्थेन–छन्दसीवनिपौ च वक्तव्यौ इति वार्त्तिकेन वनिप् मत्वर्थीयः ॥ विश्वदर्शतमित्यत्र–बहुव्रीहौ विश्वं संज्ञायाम् ६।२।१०६ इति पूर्वपदान्तोदात्तत्वम् ॥ श्रुत्कर्णमिति अग्नेः कर्णवत्त्वकथनमलंकाररूपेण, यजमानेष्टसाधनाय श्रुत्वैव प्रवर्त्तमानत्वादग्नेः ॥ ऋग्वेदे १०।१४०।६ ऽपि ॥६॥

भाषार्थः–अग्ने ! (जनाः) यजमान लोग (ऋतावानम्) यज्ञ वाले (महिषम्) बड़े वा अर्चनीय (विश्वदर्शतम्) सब को दिखाने वाले (त्वा) तुझ (अग्निम्) अग्नि को (सुम्नाय) सुखप्राप्ति के लिये (पुरः) आगे (दधिरे) आधान की रीति से रखते हैं वा आहवनीय रूप से पूर्व दिशा में आधान करते हैं (श्रुत्कर्णम्) सुनने वाले हैं कान जिस के उस (सप्रथस्तमम्) अति विस्तार्यमाण (दैव्यम्) हवि पहुंचाने वाला होने से देवों के संबन्धी तुझ को (गिरा) मन्त्रपूर्वक (मानुषा युगा) मनुष्यों के जोड़े पत्नी और यजमान मिलकर आधान करते हैं ॥

अष्टाध्यायी ५।२।१२२, ६।२।१०६ के प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १०।१४०।६ में भी ॥ ६ ॥

इति एकविंशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीये खण्डे–प्रगाथस्य प्रथम सूक्तस्य–सौभरिर्ऋषिः। अग्निर्देवता। ककुप्छन्दः ॥ तत्र प्रथमा–

१२ २२ ३ २ ३ १ २ ३ १ २ ३ १ २
प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः।
२ ३ २ २ १२ १२
यस्य त्वꣳसख्यमाविथ ॥१॥ (१८२०) व्याख्याता (१०८)

अथ द्वितीया–

१२ ३ १२ २२ ३ २ ३ २ ३ १ २ ३ १ २
तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवाददे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ३ १ २ ३ १ २ ३ २ ३ १र २र

त्वं महीनामुषसामसि प्रियः क्षपोवस्तुषु राजसि ॥ २ ॥

[२] (१८२१)

पदपाठः—तव ६ । द्रप्सः, नीलवान्, वाशः, ऋत्वियः, इन्धानः १। सिष्णो सं० । आददे क्रि० । त्वम् १ । महीनाम्, उषसाम् ६। असि क्रि० । प्रियः १। क्षपः ६ । वस्तुषु ७ । राजसि क्रि० ॥

अन्वितपदार्थः—(सिष्णो) [सिषिः सेचनार्थः] हे सोमेनाऽऽसिच्यमानाऽग्ने ! (तव), (द्रप्सः) द्रवः (नीलवान्) नीलवर्णोपेतः (वाशः) कमनीयः (ऋत्वियः) ऋतौ भवः (इन्धानः) संदीपयन्सोमः (आददे) आदीयते । अपि च (त्वम्), (महीनां) महतीनाम् (उषसां) प्रभातवेलानां (प्रियः) प्रीतिकरः (असि) भवसि । "उषसि हि अग्नयो होमार्थं प्रज्वाल्यन्ते" इति सायणाचार्यः । (क्षपः) क्षपाया रात्रेः (वस्तुषु) घटपटादिषु (राजसि) प्रकाशं करोषि ॥ ऋग्वेदे ८ । १९ । ३१ ऽपि ॥२॥

भाषार्थः—(सिष्णो) हे सोम से हूयमान अग्ने ! (तव) तेरा (द्रप्सः) द्रवीभूत (नीलवान्) नीलधूम में परिणत (वाशः) कमनीय (ऋत्वियः) वसन्तादि ऋतु का उपजा हुवा (इन्धानः) प्रदीप्त करता हुवा (आददे) होमार्थ जुहू आदि पात्रों में ग्रहण किया जाता है । (त्वम्) तू (महीनाम्) विस्तृत (उषसाम्) उषाओं का (प्रियः) प्यारा (असि) है "उषः काल में होमार्थ अग्नि प्रज्वलित किये जाते हैं" सायणाचार्य । (क्षपः) रात्रि के (वस्तुषु) घटपटादि वस्तुओं पर (राजसि) प्रकाश करता है ॥ ऋ० ८। १९ । ३१ में भी ॥ २ ॥

अथैकर्चद्वितीयसूक्तस्य—अरुणऋषिः । अग्निर्देवता । त्रिष्टुप्छन्दः ॥ सेयम्—

१र २र ३ १ २ ३ २ ३ १र २र ३ १ २ ३ १ २

तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१र २र ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥ १ ॥

[३] (१८२२)

पदपाठः—तम् २ । ओषधीः १ । दधिरे क्रि० । गर्भम्, ऋत्वियम्, तम् २ । आपः १ । अग्निम् २ । जनयन्त क्रि० । मातरः १ । तम् । इत् अ० । समानम् २ । वनिनः १ । च अ० । वीरुधः, अन्तर्वतीः १ । च । सुवते क्रि० । च । विश्वहा १ ॥

अन्वितपदार्थः—(ओषधीः) ओषधयो यवादिकाः (तम्) पूर्वोक्तम् (ऋत्वियम्) ऋतौ भवं (गर्भम्), (दधिरे) धारयन्ति (तम् अग्निं) तमेव पावकम् (मातरः) मातृस्थानीयाः (आपः), (जनयन्त) वाडवाऽनलरूपेण जनयन्ति (समानम्) तथैव (तम् इत्) तमेवाग्निं (वनिनः) वने भवाः (वीरुधः) वनस्पतयः (च), (विश्वहा) सर्वेष्वहस्सु । अह्नोऽह्नोपः । (अन्तर्वतीः) गर्भधारिण्यः (च), (सुवते) जनयन्ति (च) ॥ ऋग्वेदे १० । ९१ । ६ ऽपि ॥ १ ॥

भाषार्थः—(ओषधीः) यवादि ओषधियें (तम्) उस (ऋत्वियम्) अपने ऋतुसमयी (गर्भम्) गर्भ को (दधिरे) धारण करती हैं (तम् अग्निम्) उस अग्नि को (मातरः) माता रूप (आपः) जल [वाडवाऽनलरूप से] (जनयन्त) उत्पन्न करते हैं (समानम्) ऐसे ही (तम्) उस को (इत्) ही (वनिनः) वन की (वीरुधः) वनस्पतियें (च) भी (विश्वहा) सब दिनों (अन्तर्वतीः) गर्भ में धारण करतीं (च) और (सुवते च) जनती भी हैं ॥ ऋ० १० । ९१ । ६ में भी ॥ १ ॥

अथैकर्चस्य चतुर्थसूक्तस्य—अग्निः प्रजापतिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥ सेयम्—

३ १र २र ३ २ ३ १र २र
अग्निरिन्द्राय पवते दिवि शुक्रो विराजति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ २ ३ १ २
महिषीव विजायते ॥ १ ॥ [४] (१८२३)

पदपाठः-अग्निः १ । इन्द्राय ४ । पवते क्रि० । दिवि ७ । शुक्रः १ । विराजति क्रि० । महिषीव अ० । विजायते क्रि० ॥

अन्वितपदार्थः-(अग्निः) यज्ञेष्वग्रणीः पावकः (इन्द्राय) इन्द्रादिदेवेभ्यः (पवते) अस्मद्दत्तेन हविषाऽधिकं क्षरति (शुक्रः) बलवीर्यवान् अग्निः (दिवि) अन्तरिक्षे (विराजति) विराजते । दृष्टान्तः-(महिषीव) यथा तृणादिना विविधानि दुग्धघृतादीनि जनयति, तद्वत् (विजायते) देवोपभोगार्थमनेकविधान्यन्नानि जनयति ॥ १ ॥

भाषार्थः-(अग्निः) यज्ञों में अग्रणी होने वाला अग्नि (इन्द्राय) देवों के लिये (पवते) हमारे दिये हव्य से अधिकाऽधिक क्षेचन करता है (शुक्रः) बलवीर्यवान् अग्नि (दिवि) आकाश में (विराजति) विराजता है और दृष्टान्त-(महिषीव) भैंस के समान=जैसे भैंस तृणादि पाकर अनेक प्रकार के दुग्ध घृतादि पदार्थ उत्पन्न करती है, वैसे अग्नि हव्य पाकर देवों के निमित्त अनेक प्रकार के अन्नादि उत्पन्न करता है ॥ १ ॥

अथैकर्चस्य पञ्चमसूक्तस्य-अवत्सार ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ॥ सेयम्-

२ ३ २३ १र २र ३ २ ३ २ ३ २ ३ १ २
यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
२ ३ २३ २३१र २र ३ २११ २ ३ १ २
यो जागार तमयꣳसोम आह तवाहमस्मि सख्ये न्योकाः
॥ १ ॥ [५] (१८२४)

पदपाठः-यः १ । जागार क्रि० । तम् २ । ऋचः १ । कामयन्ते क्रि० । यः । जागार । तम् । उ अ० । सामानि १ । यन्ति क्रि० । यः । जागार । तम् । अयम्, सोमः १ । आह क्रि० । तव ६ । अहम् १ । अस्मि क्रि० । सख्ये ७ । न्योकाः १ ॥

अन्वितपदार्थः (यः) योमनुष्यः (जागार) जागरूको

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्त्तते (तम्) तं संयमिनं पुरुषसिंहम् (ऋचः) ऋग्वेद मन्त्राः (कामयन्ते) फलदानायेच्छन्ति (यः जागार तम्), (उ) एव (सामानि) सामवेदवचनानि (यन्ति) साफल्याय प्राप्नुवन्ति (यः जागार तम्), (अयं सोमः) एष सोमाद्योषधिगणः (आह) वक्ति । किम् ? (अहम्) सोमादिः (न्योकाः) नियतस्थानः सन् (तव) तव (सख्ये) हिते (अस्मि) भवामि ॥

येऽलसा निद्रालवः पुरुषार्थरहिताः मनुष्याः सन्ति, न तान् ऋग्वेदादयो ज्ञानदानाय सफला भवन्ति, नाऽपि सोमादयः कर्मणे साफल्यकराभवन्ति किन्तु जागरूका निरलसाः पुरुषार्थिनोजना एव सुफलवेदपाठाः सुफलसोमाद्योषधिगणाश्च कृतकृत्या भवन्ति, तस्माद्वेदोपदेशेन मनुष्यैर्जागरूकैः प्रातरुषस्युत्थाय सन्ध्याहोमादि विधिवदनुष्ठाय निरलसैस्तत्तद्व्यापारेषु धर्मानुकूलाचरणैर्भवितव्यम् इत्याशयः ॥ ऋग्वेदे ५ । ४४ । १४ ऽपि ॥ १ ॥

भाषार्थः—(यः) जो मनुष्य (जागार) जागता है (तम्) उस को (ऋचः) ऋग्वेदमन्त्र (कामयन्ते) चाहते हैं (यः) जो (जागार) जागता है (तम्) उस को (उ) ही (सामानि) सामवेदवचन (यन्ति) प्राप्त होते हैं (यः) जो (जागार) जागता है (तम्) उस को (अयम्) यह (सोमः) सोमादि ओषधिगण (आह) कहता है कि (अहम्) मैं (न्योकाः) नियत स्थान वाला (तव) तेरी (सख्ये) मैत्री में (अस्मि) हूं ॥

जो पुरुष आलसी निद्रालु बहुत सोने वाले पुरुषार्थरहित हैं उन को न तो ऋग्वेदादि से ज्ञान प्राप्त होता है, न सोमादि ओषधियें काम देती हैं, परन्तु जो निरालस्य पुरुषार्थी जागरूक पुरुष हैं उन को वेद फलीभूत होते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हैं और सोमादि ओषधिगण हितार्थ सामने हाथ जोड़े खड़े रहते हैं कि हम तुम्हारे ही लिये हैं और तुम्हारे ही हैं। इस वेदाज्ञा के पालनार्थ मनुष्य मात्र को पुरुषार्थी आलस्यरहित होना योग्य है॥ ऋ० ५। ४४। १४ में भी॥१॥

अथैकर्चस्य षष्ठसूक्तस्य-ऋष्यादयः पूर्ववत् ज्ञेयाः॥ सेयम्-

३ १ २ ३ १र २र ३ १ २ ३ १ ३ १ २

अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति।

३ १ २ ३ २ ३ १र २र ३ २ ३ १ २ ३ १ २

अग्निर्जागार तमयꣳ सोम आह तवाहमस्मि सख्ये न्योकाः॥

॥ १ ॥ [६] (१८२५)

पदपाठः-अग्निः १। अन्यत्पूर्वमन्त्रवत्॥

अन्वितपदार्थः-(अग्निः) अग्नितत्त्वम् (जागार) जागर्त्ति। अन्यत्पूर्ववत्॥

भावार्थः-अग्निः प्रकाशहेतुरन्धकारनाशकः क्लैब्याऽपहारक आलस्योच्छेदकः इत्यादिविशेषणविशिष्टः, स च होमे औषधोपचारे कलाकौशले च प्रयोक्तव्यो जागरूकैः पुरुषैः॥ ऋग्वेदे ५। ४४। १५ ऽपि॥ १॥

भाषार्थः-(अग्निः) अग्नि (जागार) जागता है (तम्) उस को (ऋचः) ऋचायें (कामयन्ते) चाहती हैं (अग्निः) अग्नि (जागार) जागता है (तम्) उस को (उ) ही (सामानि) साम (यन्ति) प्राप्त होते हैं (अग्निः) अग्नि (जागार) जागता है (तम्) उस को (अयम्) यह (सोमः) ओषधिगण (आह) कहता है कि (अहम्) मैं (न्योकाः) नियतस्थानस्थित (तव) तेरी (सख्ये) मित्रता में (अस्मि) हूं॥

भाव यह है कि पूर्वमन्त्र में जो जागरणशील होने की महिमा कही थी, अब इस मन्त्र में यह बताया है कि जो जागरूक रहना चाहते हैं और ज्ञान तथा कर्म से अपना और संसार का भला करना चाहते हैं, उन को अग्नितत्व का बाहुल्य से सेवन और प्रयोग समझ कर करना चाहिये क्योंकि अग्नि ही प्रकाश का हेतु, अन्धकार आलस्य नपुंसकता=पुरुषार्थहीनता का नाशक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इत्यादि विशेषणविशिष्ट होने से सर्व होमादि और औषधप्रयोग तथा शिल्प कलाकौशल में प्रयुक्त होकर मनुष्यों को आगरण का फल देता है॥ ऋ० ५। ४४। १५ में भी॥ १॥

अथ सप्तमस्य तृचसूक्तस्य–मृग ऋषिः *। अग्निर्देवता। गायत्री छन्दः॥

तत्र प्रथमा–

१ १ ३ १ २ ३ २ ३ १ २ ३ २ ३

नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः।

३ १ र २ र ३ १ २

युञ्जे वाचꣳ शतपदीम्॥ १॥ (१८२६)

पदपाठः–नमः अ०। सखिभ्यः, पूर्वसद्भ्यः ४। नमः। साकंनिषेभ्यः ४। युञ्जे क्रि०। वाचम्, शतपदीम् २॥

अन्वितपदार्थः–(पूर्वसद्भ्यः) पूर्वतोनिषण्णेभ्यः (सखिभ्यः) मित्रेभ्यः (नमः) नमस्करोमि (साकंनिषेभ्यः) सहैव निषण्णेभ्यः सखिभ्यश्च (नमः), (शतपदीम्) बहुपदीं (वाचम्) प्रशस्तिं (युञ्जे) युनज्मि॥ १॥

भाषार्थः–(पूर्वसद्भ्यः) पहले से विराजमान (सखिभ्यः) मित्रोंको (नमः) नमस्कार करता हूं (साकंनिषेभ्यः) साथ २ आकर बैठे मित्रों को भी (नमः) नमस्कार। (शतपदीम्) असंख्य पदों की (वाचम्) प्रशस्ति वाणी का (युञ्जे) प्रयोग करता हूं॥

सभा आदि वा यज्ञ में सदस्यों को नमस्कार करने का क्या उत्तम उपदेश मधुर शब्दों में वेद में दिया है॥ १॥

अथ द्वितीया–

३ १ र २ र ३ १ २ ३ १ २ ३ १ २

युञ्जे वाचꣳ शतपदीं गाये सहस्रवर्त्तनि।

* जीवानन्दविद्यासागरमुद्रापितपुस्तकभिन्नेषु न केष्वपि मूलसप्ताध्यपुस्तकेषु दृश्यते ऋषिदैवतं, तत एव यथायथमस्माभिरुद्धृतं, परं न देवताया व्याख्यानं मन्त्रे दृष्टचरम्॥ तु० रा०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३ १र २र ३ १ २
गायत्रं त्रैष्टुभं जगत् ॥ २ ॥ (१८२७)

पदपाठः-युञ्जे क्रि० । वाचम्, शतपदीम् २ । गाये क्रि० । सहस्रवर्त्तनि १ । गायत्रम्, त्रैष्टुभम्, जगत् २ ॥

अन्वितपदार्थः-(शतपदीम्) अनेकपदविलक्षणां (वाचम्) वाणीं (युञ्जे) प्रयुक्तां करोमि (सहस्रवर्त्तनि) सहस्रवर्त्मनि असंख्यमार्गेषु (गायत्रं) गायत्रीछन्दस्कं (त्रैष्टुभं) त्रिष्टुप्छन्दोयुक्तं (जगत्) जगतीछन्दोविशिष्टं च साम (गाये) गायामि ॥ २ ॥

भाषार्थः-(शतपदीम्) अनेक पदों वाली मनोहर श्रवणप्रिय (वाचम्) वाणी को (युञ्जे) बोलता प्रयुक्त करता हूं, (सहस्रवर्त्तनि) अनेक प्रकार के रागों में (गायत्रम्) गायत्री छन्द के (त्रैष्टुभम्) त्रिष्टप् छन्द के और (जगत्) जगती छन्द के सामों को (गाये) गाता हूं ॥ २ ॥

अथ तृतीया-

३ १र २र ३ २ ३ १ २ ३ २ ३ १ २
गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि संभृता ।
३ १र २र ३ २
देवा ओकाꣳसि चक्रिरे ॥ ३ ॥ [७] (१८२८)

पदपाठः-गायत्रम्, त्रैष्टुभम्, जगत् १ । विश्वा, रूपाणि, संभृता २ । देवाः १ । ओकांसि २ । चक्रिरे क्रि० ॥

अन्वितपदार्थः-(विश्वा) विश्वानि (रूपाणि), (संभृता) संभृतानि (गायत्रं त्रैष्टुभं जगत्) गायत्र-त्रैष्टुभ-जागतच्छन्दांसि (देवाः) देवताः (ओकांसि) निवासस्थानानि (चक्रिरे) कुर्वन्ति ॥ ३ ॥

भाषार्थः-(विश्वा) सब (रूपाणि) रूपों को (संभृता) धारण करने

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वाले (गायत्रं त्रैष्टुभं जगत्) गायत्री त्रिष्टुप् जगती छन्दों को (देवाः) देवों ने (ओकांसि) निवासस्थान (चक्रिरे) कर लिया है ॥ ३ ॥

इदानीं ज्योतींषि ज्योतिष्टोमे इति विवरणकारः ॥

अथाष्टमस्य तृचसूक्तस्य प्रजापतिर्ऋषिः । अग्निर्देवता। गायत्री छन्दः।

तत्र प्रथमा—

३ २उ ३ १ २ ३ २उ ३ २ ३ १ २
अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः।

२ ३ २ ३ २ ३ १ २
सूर्योज्योतिर्ज्योतिः सूर्यः ॥ १ ॥ (१८२९)

पदपाठः—अग्निः, ज्योतिः, ज्योतिः, अग्निः, इन्द्रः, ज्योतिः, ज्योतिः, इन्द्रः, सूर्यः, ज्योतिः, ज्योतिः, सूर्यः १ ॥

अन्वितपदार्थः—(अग्निः ज्योतिः) पावको ज्योतिः-स्वरूपः (ज्योतिः अग्निः) ज्योतिः पावकस्वरूपोस्ति । तथैव (इन्द्रः) अन्तरिक्षस्थानो वायुविशेषो विद्युद्विशेषोवा (ज्योतिः) ज्योतिःस्वरूपः (ज्योतिः) प्रकाशः (इन्द्रः) इन्द्रस्वरूपः। तथा च (सूर्यः ज्योतिः) आदित्यो ज्योतीरूपः (ज्योतिः सूर्यः) ज्योतिरादित्यरूपमस्ति ॥

अत्र इन्द्रसूर्यज्योतिषां समानधर्मत्वमुच्यते ॥

पाठभेदेनेयम् यजुर्वेदे ३।९ऽपि आगता तत्रेयं महीधरेणेत्थं व्याख्याता—"अथाऽग्निहोत्रहोममन्त्राः अग्निर्ज्योतिरित्यारभ्य—उपप्रयन्त इत्यतः प्राक् तन्मन्त्राणां प्रजापतिर्ऋषिः सामान्यतः। यत्र ऋषिविशेषोऽभिधीयतेऽनुक्रमणीकारैस्तत्र द्वावप्यृषी । " इत्यादि ॥ १ ॥

भाषार्थः—(अग्निः) अग्नि (ज्योतिः) ज्योतिरूप है, काष्ठादि रूप नहीं । (ज्योतिः) ज्योति (अग्निः) अग्निरूप है, तद्भिन्न नहीं। (इन्द्रः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्तरिक्षस्थान देवगणान्तर्गत वायुविशेष वा विद्युद्विशेष इन्द्र (ज्योतिः) एक प्रकार का प्रकाश है (ज्योतिः) वह ज्योति (इन्द्रः) इन्द्र कहाता है। (सूर्यः) सूर्यलोक (ज्योतिः) प्रत्यक्ष ज्योतिरूप है (ज्योतिः) वह ज्योति (सूर्यः) सूर्य कहाता है ॥ इस मन्त्र में इन्द्र सूर्य और ज्योति की एकात्मता बताई गई है ॥

यजुर्वेद ३ । ९ में भी पाठभेद से यह ऋचा पाई जाती है, वहां भाष्यकार महीधर कहते हैं कि " यहां से आरम्भ करके ' उपप्रयन्तः ' से पूर्व अग्निहोत्र होम के मन्त्र हैं । सामान्य से इन मन्त्रों का प्रजापति ऋषि है परन्तु जहां अनुक्रमणीकारों ने ऋषिविशेष कहा है वहां दोनों भी ऋषि समझने चाहियें (एक अनुक्रमणीकारोक्त, दूसरा प्रजापति सामान्य से) " इत्यादि ॥१॥

अथ द्वितीया—

१ २ ३ १र २र ३ १२ ३१ २
पुनरूर्जा निवर्त्तस्व पुनरग्न इषायुषा ।
१२ ३ १ २
पुनर्नः पाह्यꣳहसः ॥ २ ॥ (१८३०)

पदपाठः—पुनः अ० । ऊर्जा ३ । निवर्तस्व क्रि० । पुनः । अग्ने सं० । इषा, आयुषा ३ । पुनः । नः २ । पाहि क्रि० । अंहसः ५ ॥

अन्वितपदार्थः—अग्निहोत्रफलम्—(अग्ने) स्वाहुत ! पावक ! (ऊर्जा) रसेन दुग्धघृतादिना (पुनः) वारं वारं (निवर्त्तस्व) अस्मान्प्रत्यागच्छ । (इषा) अन्नेन (आयुषा) आयुषोरक्षकेण प्राणाधारेण सह (पुनः) वारं वारम् अस्मान्प्रत्यागच्छ । (नः) अस्मान् (अंहसः) रोगादि रूपात्पापाच्छत्रोः (पुनः) पुनः पुनः (पाहि) रक्ष ॥ यजुर्वेदे १२ । ९ ऽपि ॥ २ ॥

भाषार्थः—अग्निहोत्र नित्य करने का फल—(अग्ने) अग्नि ! (पुनः) वारं वार (ऊर्जा) दुग्ध घृतादि रस के साथ (निवर्त्तस्व) हम को अग्नि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुख करके आवे (इषा) अन्न यव गोधूमादि (आयुषा) आयु के रक्षक वा प्राणों के रक्षक के साथ (पुनः) बारं बार प्राप्त होवे । (पुनः) बारं बार (नः) हम यजमानों को (अंहसः) पाप रोगादि शत्रु से (पाहि) बचावे ॥ यजुर्वेद १२ । ९ में ऋ० ॥ २ ॥

अथ तृतीया—

३ २ ३ १र २ १र३ २ ३ १ २ ३ १ २

सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया ।

३ १ २ ३ २ ३ १ २

विश्वप्स्न्या विश्वतस्परि ॥ ३ ॥ [८] (१८३१)

पदपाठः—सह अ० । रय्या ३ । निवर्त्तस्व क्रि० । अग्ने सं० । पिन्वस्व क्रि० । धारया ३ । विश्वप्स्न्या ३ । विश्वतः, परि अ० ॥

अन्वितपदार्थः—(अग्ने) पावक ! त्वं (रय्या) रमणीयेन धनेन (सह) साकं (निवर्त्तस्व) अस्मान्प्रत्यागच्छ (विश्वतः) सर्वतः (परि) उपरि (विश्वप्स्न्या) विश्वोपभोक्त्र्या (धारया) अस्माभिर्हूयमानया घृतादिधारया (पिन्वस्व) पुष्य ॥ यजुर्वेदे १२ । १० ऽपि ॥ ३ ॥

भाषार्थः—(अग्ने) अग्नि ! तू (रय्या) रमणीय धन के (सह) साथ (निवर्त्तस्व) हमारे पास लौटआ, और (विश्वतः) सब से (परि) उपरि वर्त्तमान (विश्वप्स्न्या) अपनी विश्वव्यापिनी (धारया) घृतादि की धार से (पिन्वस्व) पुष्ट हो ॥ यजुर्वेद १२ । १० में ऋ० ॥ ३ ॥

इति एकविंशाऽध्यायस्य द्वितीयः खण्डः ॥ २ ॥

अथ तृतीये खण्डे प्रथम तृचस्य—गोषूक्तिरश्वसूक्तिर्वा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥ तत्र प्रथमा—

१ २ ३ २उ ३ १र २र ३ २ ३ २ ३ २

यदिन्द्राऽहं यथा त्वमीशीय वस्व एक इत् ।

३ २ ३ १ २

स्तोता मे गोसखा स्यात् ॥ १ ॥ (१८३२) व्याख्याता (१२२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया-

१ २ ३ १ २ ३ १ २ ३ १ २
शिक्षेयमस्मै दित्सेयꣳ शचीपते मनीषिणे ।
२३१२ २२ ३ २
यदहं गोपतिः स्याम् ॥ २ ॥ (१८३३)

पदपाठः-शिक्षेयम् क्रि० । अस्मै ४ । दित्सेयम् क्रि० । शचीपते सं० । मनीषिणे ४ । यत् अ० । अहम् १ । गोपतिः १ । स्याम् क्रि० ॥

अन्वितपदार्थः-(शचीपते) हे बुद्धिपते! इन्द्र ! (यद्) यदि (अहं) प्रज्ञोपासकः (गोपतिः) इन्द्रियाणां पतिर्जितेन्द्रियः (स्यां) भवेयं, तर्हि (अस्मै) उपस्थिताय (मनीषिणे) बुद्धिमते छात्राय (शिक्षेयं) शिक्षां दद्यां (दित्सेयं) दातुमिच्छां च कुर्यामिति त्वत्प्रसादाद्भवतु ॥ ऋग्वेदे ८ । १४ । २ ऽपि ॥ २ ॥

भाषार्थः-(शचीपते) हे बुद्धि के स्वामी ! इन्द्र ! (यद्) यदि (अहम्) मैं (गोपतिः) जितेन्द्रिय वाणी का पति (स्याम्) हो जाऊं तो (अस्मै) इस उपस्थित (मनीषिणे) बुद्धिमान् जिज्ञासु को (शिक्षेयम्) शिक्षा दूं और (दित्सेयम्) दान की इच्छा करूं ॥ ऋ० ८ । १४ । २ में भी ॥ २ ॥

३ १ २ ३ २ ३ १ २ ३ २
धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते ।
१२ २२ ३ १ २
गामश्वं पिप्युषी दुहे ॥ ३ ॥ [९] (१८३४)

पदपाठः-धेनुः १ । ते ६ । इन्द्र सं० । सूनृता १ । यजमानाय, सुन्वते ४ । गाम्, अश्वम् २ । पिप्युषी १ । दुहे क्रि० ॥

अन्वितपदार्थः-(इन्द्र) हे ऐश्वर्यवन्परमेश्वर ! (ते) त्वदीया वेदवाणीरूपा (धेनुः) गौः (सूनृता) सत्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(पिप्युषी) प्रवर्धयित्री (सुन्वते) सोमेनेष्टवते (यजमानाय), (गाम् अश्वम्) उपलक्षणमेतत् गवाश्वादिधनं (दुहे) दुग्धे प्रपूरयति ॥ ऋग्वेदे ८ । १४ । ३ ऽपि ॥ ३ ॥

भावार्थः—(इन्द्र) हे परमेश्वर ! (ते) आप की (धेनुः) वेदवाणी रूपिणी गौ (सूनृता) सच्ची (पिप्युषी) वृद्धि करने वाली (सुन्वते) सोमयाजी (यजमानाय) यजमान के लिये (गाम्) गौ (अश्वम्) घोड़े इत्यादि धन को (दुहे) दुहती=भरपूर करती है ॥ ऋ० ८ । १४ । ३ में भी ॥ ३ ॥

अथ द्वितीय तृचस्य—त्रिशिराः सिन्धुद्वीपो वा ऋषिः । आपो देवताः । गायत्री छन्दः ॥ तत्र प्रथमा—

३ १र २र ३ २ ३ १ २ ३ १ २
आपो हि ष्ठा मयोभुवस्तानऊर्जे दधातन ।
३ १र २र ३ १ २
महे रणाय चक्षसे ॥ १ ॥ (१८३५)

पदपाठः—आपः १ । हि अ० । स्थ क्रि० । मयोभुवः, ताः १ । नः २ । ऊर्जे ४ । दधातन क्रि० । महे, रणाय, चक्षसे ४ ॥

अन्वितपदार्थः—(आपः), (हि) निश्चयेन (मयोभुवः) सुखस्य भावयित्र्यः (स्थ) सन्ति (ताः) आपः (नः) अस्मान् (ऊर्जे) रसाय (महे) महते (रणाय) रमणीयाय (चक्षसे) दर्शनाय च (दधातन) धारयन्तु ॥ ऋग्वेदे १० । ९ । १ ऽपि, तत्र च "आपो हि स्थ सुखभुवस्तानो ऽन्नाय धत्त महते च नो रणाय रमणीयाय च दर्शनाय" इति निरुक्तम् ९ । २७ ॥ यजुर्वेदे ११ । ५० चाऽपि ॥ १ ॥

भावार्थः—(आपः) जल (हि) निश्चय (मयोभुवः) सुखदायक (स्थ) हैं (ताः) वे (नः) हम को (ऊर्जे) रस के लिये (महे) और बड़े (रणाय) रमणीय (चक्षसे) दर्शन के लिये (दधातन) धारण करें ॥ निरुक्त ९ । २७ का प्रमाण संस्कृत भाष्य में देखिये ॥ ऋ० १० । ९ । १ यजुः ११ । ५० में भी ॥ १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ द्वितीया–

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
योवः शिवतमोरसस्तस्य भाजयतेह नः ।
३ १ २ ३ १ २
उशतीरिव मातरः ॥ २ ॥ (१८३६)

पदपाठः–यः १ । वः ६ । शिवतमः, रसः १ । तस्य ६ । भाजयत क्रि० । इह अ० । नः २ । उशतीरिव अ० । मातरः १ ॥

अन्वितपदार्थः–(वः) युष्माकं जलानां (यः), (शिवतमः) अतिसुखदः (रसः), अस्ति (नः) अस्मान् (तस्य) रसस्य (भाजयत) सेवनं कारयत (इह) लोके (उशतीरिव) उशन्त्यइव (मातरः) जनन्योदुग्धं पाययन्ति तद्वत् ॥ ऋग्वेदे १० । ९ । २ यजुर्वेदे ११ । ५१ ऽपि ॥ २ ॥

भाषार्थः–(वः) तुम जलों का (यः) जो (शिवतमः) अति सुखदायी (रसः) रस है (अस्मान्) हम को (तस्य) उस रस का (भाजयत) सेवन करावो (इह) जैसे (उशतीः) पुत्र की भलाई चाहती हुई (मातरः) मातायें पुत्रों को दुग्ध का सेवन कराती हैं तद्वत् ॥ ऋ० १० । ९ । २ में तथा यजुः ११ । ५१ में भी ॥ २ ॥

अथ तृतीया–

२ ३ १ २ ३ २ ३ १ २ ३ १ २
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
१ २ ३ १ २
आपो जनयथा च नः ॥ ३ ॥ [१०] (१८३७)

पदपाठः–तस्मै ४ । अरम् अ० । गमाम क्रि० । वः २ । यस्य ६ । क्षयाय ४ । जिन्वथ क्रि० । आपः सं० । जनयथ क्रि० । च अ० । नः २ ॥

अन्वितपदार्थः–(आपः) जलानि ! (यस्य) अशुद्धि प्रभृतेः (क्षयाय) विनाशाय (वः) युष्मान् (अरं) पर्याप्तं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा स्यात्तथा (गमाम) प्राप्नुयाम शिरःप्रभृतिषु प्रक्षिपाम (तस्मै) अशुद्ध्यादिक्षयाय (जिन्वथ) अस्मान्प्रीणयत तर्पयत (च) तथा (नः) अस्मान् विधिपूर्वकं जलसेविनः (जनयथ) उत्पादयत पुत्रादिना वर्धयत ॥

ये मनुष्या जलसेवनं विधिवत्कुर्वन्ति ते सर्वाङ्गशुद्धाः सन्तो जलोद्भवैरसैः पुष्टाङ्गास्सन्तानवन्तो भवन्तीति भावः ॥ ऋग्वेदे १० । ९ । ३ यजुर्वेदे ११ । ५२ ऽपि च ॥ ३ ॥

भाषार्थः—(आपः) जलो ! तुम (यस्य) जिस अशुद्ध्यादि पाप के (क्षयाय) नाशार्थ (वः) तुम को, हम (अरम्) पूर्णतया (गमाम) प्राप्त करते हैं (तस्मै) उस अशुद्ध्यादि नाश के लिये (जिन्वथ) प्रसन्न तृप्त करो (च) और (नः) हम विधिपूर्वक जल का सेवन करने वालों को (जनयथ) उत्पन्न करो सन्तानों से बढ़ावो ॥

जो मनुष्य विधिपूर्वक जल का सेवन करते हैं, वे सर्वाङ्गशुद्ध नीरोग होते हुवे पुत्रादि सन्तति से बढ़ते हैं ॥ ऋ० १० । ९ । ३ तथा यजुर्वेद ११ । ५२ में भी ॥३॥

अथ तृतीय तृचस्य—वातायन ऊल ऋषिः । वायुर्देवता । गायत्री छन्दः ॥

तत्र प्रथमा—

२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
वात आ वातु भेषजꣳ शंभु मयोभु नो हृदे ।
२ ३ १ २
प्र न आयूꣳषि तारिषत् ॥ १ ॥ (१८३८) व्याख्याता (१८४)

अथ द्वितीया—

३ १ २ ३ १ २ ३ २ उ ३ २ ३ १ २
उत वात पिताऽसि न उत भ्रातोत नः सखा ।
१ २ ३ १ २
स नो जीवातवे कृधि ॥ २ ॥ (१८३९)

पदपाठः—उत अ० । वात सं० । पिता १ । असि क्रि० । नः ६ । उत । भ्राता १ । उत । नः । सखा १ । सः १ । नः २ । जीवातवे अ० । कृधि क्रि० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(उत) अपि च (वात) वायो! त्वं (नः) अस्माकं (पिता) पितृवत्पालकः, (उत) तथा च (नः) अस्माकं विधिद्वायुसेविनां (भ्राता) भ्रातृवत्सहायः, (उत) तथा (सखा) मित्रवद्धितकरः (असि) भवसि (सः) तादृशस्त्वं (नः) अस्मान् (जीवातवे) जीवनाय (कृधि) समर्थान्कुरु ॥

यथाविधि वायुसेविनां मनुष्याणां पितृभ्रातृमित्रवत् सुखदोवायुर्जीवनं वर्धयति ॥ ऋग्वेदे १०। १८६। २ ऽपि ॥ २॥

भाषार्थः-(उत) और (वात) हे वायो! तू (नः) हमारा (पिता) पालक (उत) और (भ्राता) सहायक (उत) और (नः) हमारा (सखा) मित्र हितकर (असि) है (सः) वह तू (नः) हम को (जीवातवे) जीवन के लिये (कृधि) समर्थ कर ॥

यथाविधि वायु का सेवन करने वालों का वायु ही पिता भ्राता और मित्र के समान गुणकारी उपकारी होकर उन को दीर्घजीवन देता है। वायु जीवन है। इस में सन्देह नहीं ॥ ऋ० १०। १८६। २ में भी ॥ २ ॥

अथ तृतीया-

२ ३ १ २ ३ २ ३ १ २ ३ १ २
यददो वात ते गृहेऽ३ऽमृतं निहितं गुहा।
१ २ ३ १ २
तस्य नो धेहि जीवसे ॥ ३ ॥ [११] (१८४०)

पदपाठः-यत्, अदः १। वात सं०। ते ६। गृहे ७। अमृतम्, निहितम् १। गुहा ७। तस्य ६। नः २। धेहि क्रि०। जीवसे अ० ॥

अन्वितपदार्थः-(वात) वायो! (यत अदः) यदिदं (गुहा निहितं) गुप्तमिव स्थितं (ते) तव (गृहे) वक्षसि (अमृतं) जीवनमस्ति (तस्य) अमृतस्य जीवनस्य (नः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्मान् (जीवसे) जीवनाय (धेहि) धारणं कारय ॥ ऋग्वेदे १० । १८६ । ३ ऽपि ॥ ३ ॥

भाषार्थः-(वात) वायो ! (यत्) जो (अदः) यह (गुहा) छिपी जगह में (निहितम्) रक्खा हुवा (ते) तेरे (गृहे) घर=फेफड़ों में (अमृतम्) जीवन है, (तस्य) उस अमृत=जीवन का (नः) हम को (जीवसे) जीवित रहने के लिये (धेहि) धारण कराव ॥ ऋ० १० । १८६ । ३ में भी ॥३॥

अथ चतुर्थतृचस्य-सुपर्णऋषिः । * सूर्योदेवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा-

३ २ ३ २ ३ १ १ ३ १ २ ३ २ ३ २ ३ १ २ ३ २

अभि वाजी विश्वरूपो जनित्रꣳहिरण्ययं बिभ्रदत्कꣳसुपर्णः ।

१ २ ३ १ २ ३ १र २र ३ १ २ ३ १र २र ३ १ २

सूर्यस्य भानुमृतुथा वसानः परि स्वयंमेधमृज्रो जजान ।१। (१८४१)

पदपाठः-अभि अ० । वाजी, विश्वरूपः १ । जनित्रम्, हिरण्ययम् २ । बिभ्रत् १ । अत्कम् २ । सुपर्णः १ । सूर्यस्य ६ । भानुम् २ । ऋतुथा अ० । वसानः १ । परि, स्वयम् अ० । मेधम् २ । ऋज्रः १ । जजान क्रि० ॥

अन्वितपदार्थः-(वाजी) बलवान्, (विश्वरूपः) विश्वं रूपयति सः, अग्निना हि वर्णा उत्पद्यन्ते (सुपर्णः) शोभनज्वालः, (ऋतुथा) अन्वृतु (सूर्यस्य) आदित्यस्य (भानुं) प्रकाशं (वसानः) वस्त्रमिव धारयन् (हिरण्ययं) तेजोमयम् (अत्कं) स्वतेजसा व्याप्तं (जनित्रं) जनन-स्थानमग्निबिलं (बिभ्रत्) पुष्यन्सन् (ऋज्रः) ऋजति भृज्जति पचतीत्यग्निर्ऋज्रः (स्वयम्), (मेधं) यज्ञं (परि अभि जजान) सर्वतोलक्षीकृत्योत्पद्यते ॥ १ ॥

भाषार्थः-(वाजी) बलवान्, (विश्वरूपः) सब को रूपवान् करने वाला,

* ऋषिछन्दोदैवतं, जीवानन्दमुद्रापितपुस्तके यथादृष्टमेव विन्यस्तं, नान्यद्बीजमुपलभे (तु० रा०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(सुपर्णः) सुन्दर ज्वालारूप परों वाला, (ऋतुथा) प्रत्येक ऋतु में (सूर्यस्य भानुम्) सूर्य की किरणों को (वसानः) वस्त्र के समान परिधान करता हुवा, (हिरण्ययम्) तेजोमय (अत्कम्) अपने तेज से भरपूर (जनित्रम्) उत्पत्ति के स्थान अरणि रूप बिल को (बिभ्रत्) पुष्ट करता हुवा, (ऋज्रः) दाहक पाचक अग्नि (स्वयम्) अपने आप (मेधम्) यज्ञ को (परि) सर्वतः (अभि) लक्ष्य करके (जनान) उत्पन्न होता है ॥ १ ॥

अथ द्वितीया-

३ १र २र ३ १ २ ३ १ २ ३ २ ३ ३ १ २ ३ १ २

अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यत्संबभूव ।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १र २ ३ २ ३ १ २ ३ १ २

अन्तरिक्षे स्वं महिमानं मिमानः कनिक्रन्ति वृष्णो अश्वस्य रेतः

॥ २ ॥ (१८४२)

पदपाठः—अप्सु ७ । रेतः १। शिश्रिये क्रि० । विश्वरूपम्, तेजः १ । पृथिव्याम् ७ । अधि अ० । यत् १ । संबभूव क्रि० । अन्तरिक्षे ७ । स्वम्, महिमानम् २ । मिमानः १ । कनिक्रन्ति क्रि० । वृष्णः, अश्वस्य ६ । रेतः २ ॥

अन्वितपदार्थः—(यत्), (अप्सु) उदकेषु (रेतः) बीजरूपं (शिश्रिये) आश्रितं वर्त्तते, यच्च (पृथिव्याम्) भूमौ क्षेत्रे (अधि संबभूव) आधिक्येनोत्पद्यते तत् (विश्वरूपं) नानारूपं (तेजः) अग्नितत्त्वप्रधानं (वृष्णः) वर्षकस्य (अश्वस्य) विद्युत्तत्त्वस्य (रेतः) वीर्यरूपं सोमसंज्ञं वस्तु (अन्तरिक्षे) आकाशे (स्वं महिमानं) स्वकीयं महत्त्वं (मिमानः) व्यापारयत् (कनिक्रन्ति) शब्दायते ॥

सोमस्याऽप्सु वीर्यरूपेण लीनत्वं श्रुत्याऽऽह सायणः "स निलीयते सोमः प्राविशत्—इति श्रुतेः"। तथा "सोमो वृष्णो अश्वस्य रेतः"—इति श्रुतेरित्यपि सायणाचार्यः ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(यत्) जो (अप्सु) जलों में (रेतः) बीजरूप (शिश्रिये) आश्रित है और जो (पृथिव्याम्) पृथिवी में (अधि) आधिक्य से (संबभूव) उत्पन्न होता है वह (विश्वरूपम्) अनेक [२४] रूपों वाला (तेजः) तेजस्वी, (वृष्णः अश्वस्य रेतः) वर्षा करने वाली बिजुली का वीर्य सोम (अन्तरिक्षे) अन्तरिक्ष में (स्वम्) अपने (महिमानम्) महत्त्व को (बिभानः) फैलाता हुवा (कनिक्रन्त) अग्नि में हुत होता हुवा शब्द करता है ॥

सायणाचार्य ने सोम के जलों में लीन रहने और बिजुली का वीर्य होने में दो श्रुतियें प्रमाण में प्रस्तुत की हैं उन को संस्कृत भाष्य में देखिये ॥२॥

अथ तृतीया-

३२ ३२३ १२ ३१२ २२३ १२ ३२ ३१ २

अयꣳ सहस्रा परि युक्ता वसानः सूर्यस्य भानुं यज्ञो दधार ।

३ १ २३१ २३१२ ३२ ३१२ २२ ३१ २

सहस्रदाः शतदा भूरिदावा, धर्त्ता दिवो भुवनस्य विश्पतिः ॥३॥

[१२] (१८४३)

पदपाठः—अयम् १ । सहस्रा २ । परि अ० । युक्ता २ । वसानः १ । सूर्यस्य ६ । भानुम् २ । यज्ञः १ । दधार क्रि० । सहस्रदाः, शतदाः, भूरिदावा, धर्त्ता १ । दिवः, भुवनस्य ६ । विश्पतिः १ ॥

अन्वितपदार्थः—(अयम्) एषः (यज्ञः) ज्योतिष्टोमादिरग्निर्वा (युक्ता) युक्तानि स्वेन संबद्धानि (सहस्रा) सहस्राणि असंख्यानि किरणजालानि (परि-वसानः) परितआच्छादयन् (सूर्यस्य) आदित्यस्य (भानुं) प्रकाशं (दधार) धत्ते (सहस्रदाः) सहस्रस्य दाता (शतदाः) शतस्य दाता (भूरिदावा) अपरिमितस्य दाता (दिवः) अन्तरिक्षस्य (धर्त्ता) धारकः (भुवनस्य) जगतः (विश्पतिः) प्रजायाः पालकोऽस्ति ॥ ३ ॥

भाषार्थः-(अयम्) यह (यज्ञः) यज्ञ वा अग्नि (युक्ता) अपने साथ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जुड़े हुवे (सहस्रा) सहस्रों किरण जालों को (परि) सब ओर (वसानः) पहरे हुवे (सूर्यस्य) सूर्य के (नानुम्) प्रकाश को (दधार) धारण करता है (सहस्रदाः) सहस्रों का दाता (शतदाः) सैकड़ों का दाता (भूरिदावत्र) कहां तक कहें अपरिमित फलों का दाता (दिवः धर्त्ता) अन्तरिक्षस्थ मेघ मण्डलादि का धर्त्ता (भुवनस्य) जगत् की (विश्पतिः) प्रजाओं का पालक है ॥३॥

"इदानीं परिमदोऽहर्गणेषु यदेतेषु क्षिप्रेषु यज्ञपात्रेषु त्रिः छन्दोगः परिगायेत् 'नाके सुपर्णम्' इति" इति विव०॥

अथ पञ्चमर्चस्य–वेनोभार्गव ऋषिः । इन्द्रोदेवता । त्रिष्टुप्छन्दः ॥

तत्र प्रथमा–

१ २ ३ २ उ ३ १ र २ र ३ १ र २ र ३ १ २

नाके सुपर्णमुप यत्पतन्तꣳ हृदा वेनन्ता अभ्यचक्षत त्वा।

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २

हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥१॥

(१८४४) व्याख्याता (३२०)

अथ द्वितीया–

३ १ २ ३ २ उ ३ १ २ ३ २ ३ २ ३ १ र

ऊर्ध्वो गन्धर्वो अधि नाके अस्थात् प्रत्यङ् चित्रा

२ र ३ १ २ १ २ ३ १ २ ३ २ ३ २

बिभ्रदस्यायुधानि। वसानो अत्कꣳ सुरभिं दृशे

१ र २ र ३ १ २

कꣳ स्वाऽ३र्ण नाम जनत प्रियाणि ॥२॥ (१८४५)

पदपाठः–ऊर्ध्वः, गन्धर्वः १। अधि अ० । नाके ७ । अस्थात् क्रि० । प्रत्यङ् १ । चित्रा २ । बिभ्रत् १ । अस्य ६ । आयुधानि २ । वसानः १ । अत्कम् सुरभिम् २ । दृशे ४। कम् २ । स्वः, न अ० । नाम २ । जनत क्रि० । प्रियाणि २ ।

अन्वितपदार्थः–(नाके अधि) द्युलोके (गन्धर्वः) गवां किरणानां धर्त्ता सूर्यः (ऊर्ध्वः) उपरि (अस्थात्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तिष्ठति (चित्रा) विचित्राणि सप्तवर्णानि (अस्य) स्वस्य (आयुधानि) खड्गवत्प्रहरणसाधनानि तेजस्वीनि किरण-जालानि (बिभ्रत्) धारयन् (प्रत्यङ्) अभिमुखो वर्त्तते। (दृशे) दर्शनाय (सुरभिं) शोभनम् (कं) सुखदम् (अत्कम्) व्याप्तं स्वरूपं (वसानः) परिदधान आस्ते। (नाम) नामानि नम्राणि जलानि (प्रियाणि) लोकस्य प्रियकराणि (जनत) जनयति, वृष्ट्येति शेषः। तत्र दृष्टान्तः–(न) यथा (स्वः) स्वर्गेऽन्तरिक्षे वर्त्तन्ते तथा ॥ ऋग्वेदे १० । १२३ । ७ ऽपि ॥

"गन्धर्वः गवामुदकानां धर्त्ता। गवि धृञोवः इति गोशब्दो-पपदात् धृञ् धारणे (भ्वा० उ०) इत्यस्मात् व प्रत्ययः उपपदस्य गमभावश्च" इति "दृशे विख्ये च" ३।४।११ इति च सायणः ॥२॥

भाषार्थः– (नाके अधि) द्युलोक में (ऊर्ध्वः) ऊपर (गन्धर्वः) सूर्य (अस्थात्) स्थित है, जो (चित्रा) सात रंग के विचित्र (अस्य) इस के (आयुधानि) शस्त्रास्त्रवत् प्रहार के साधन किरणों को (बिभ्रत्) धारण कर रहा है और (दृशे) संसार को दिखाने के लिये (सुरभिम्) सुन्दर (कम्) सुखद (अत्कम्) व्यापने वाले स्वरूप को (वसानः) धारण कर रहा है तथा (नाम) नम्र (प्रियाणि) प्यारे जलों को (जनत) उत्पन्न करता है वर्षा द्वारा (न) जैसे (स्वः) अन्तरिक्ष में हैं वैसे ॥ ऋ० १० । १२३ । ७ में भी ॥ सायणाचार्य के दिये प्रमाण संस्कृत भाष्य में देखिये ॥ २ ॥

अथ तृतीया–

३ १ २ ३ २ ३ १ २ १ २ ३ १ २ ३ १ २

द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।

३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २

भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥३॥

इति नवमस्य द्वितीयोऽर्धप्रपाठकः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः- द्रप्सः १ । समुद्रम् २ । अभि अ० । यत् अ० । जिगाति क्रि० । पश्यन् १ । गृध्रस्य ६ । चक्षसा ३ । विधर्मन् ७ । भानुः १ । शुक्रेण, शोचिषा ३ । चकानः १ । तृतीये, चक्रे, रजसि ७ । प्रियाणि २ ॥

अन्वितपदार्थः-(भानुः) सूर्यः (द्रप्सः) वेगेन स्व-कक्षायां भ्राम्यन् (विधर्मन्) विधारकेऽन्तरिक्षे (गृध्रस्य) गृध्रस्येव दूरस्थपदार्थदर्शनवतः (चक्षसा) चक्षुषा (पश्यन्) दर्शयन् (शुक्रेण) शुक्लेन (शोचिषा) तेजसा (चकानः) दीप्यमानः (यत्) यतः (तृतीये रजसि) लोकत्रयान्तःपातिनि तृतीये दिवि लोके (समुद्रम् अभि) अन्तरिक्षमभितः कृत्वा (जिगाति) गच्छति भ्रमन्नास्तेऽतः (प्रियाणि) लोकहितानि कार्याणि (चक्रे) करोति ॥ ऋग्वेदे १०।१२३। ८ऽपि ॥ ३ ॥

भाषार्थः-(भानुः) सूर्य (द्रप्सः) अपनी कक्षा में वेग से दौड़ने घूमने वाला (विधर्मन्) विधारक अन्तरिक्ष में (गृध्रस्य) गीध के सी दूर का देखने वाली (चक्षसा) दृष्टि से (पश्यन्) दिखाता हुवा (शुक्रेण शोचिषा) उज्ज्वल ज्योति से (चकानः) चमकता हुवा (यत्) जिस कारण से (तृतीये) तीसरे (रजसि) द्युलोक में (समुद्रम्) अन्तरिक्ष को चारों ओर करके (जिगाति) घूमता है इस कारण से (प्रियाणि) लोक के हितकारी कामों को (चक्रे) करता रहता है ॥ ऋ० १० । १२३ । ८ में भी ॥ ३ ॥

इति एकविंशाऽध्यायस्य तृतीयः खण्डः ॥ ३ ॥

" समाप्तानि एकाहाऽहीनसत्रप्रायश्चित्तक्षुद्रक्लृप्तेषु सामानि छन्दोगानां मन्त्रभूतानि०" इत्यादि विवरणकारः ॥

इति श्रीमत्कण्ववंशाऽवतंस पण्डित श्री हज़ारीलाल स्वामिसूनुना, हस्तिनापुरपार्श्ववर्त्ति परीक्षितगढ़ निवासिना, तुलसीरामस्वामिना, कृते सामवेद-भाष्ये उत्तरार्चिके एकविंशोऽध्यायः ॥२१॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म्

अथ द्वाविंशाऽध्यायः

तत्र

प्रथमे खण्डे प्रथन्तृचस्य - प्रजापतिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

तत्र प्रथमा—

३ १र २र ३ २ग ३ १ २ ३ १र २र ३ २

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।

३ १ २ ३ १ २ ३ २ ३ १र २र ३ १र २र

संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥

॥ १ ॥ (१८४७)

पदपाठः—आशुः, शिशानः, वृषभः १ । न अ० । भीमः, घनाघनः, क्षोभणः १ । चर्षणीनाम् ६ । संक्रन्दनः, अनिमिषः, एकवीरः १ । शतम् २ । सेनाः २ । अजयत् क्रि० । साकम् अ० । इन्द्रः १ ॥

अन्वितपदार्थः—इन्द्रं राजानं विशिनष्टि— (इन्द्रः) इन्द्रो देवः (आशुः) शीघ्रकारी स्फूर्त्तिमान् (शिशानः) तीक्ष्णः (वृषभः) वृषः (न) इव (भीमः) भयावहः (घनाघनः) घातकुशलः (चर्षणीनां) मनुष्याणां मध्ये (क्षोभणः) क्षोभवान् (संक्रन्दनः) सम्यक् प्रहर्त्ता (अनिमिषः) अनलसः (एकवीरः) अद्वितीयो वीरः (शतं सेनाः) असंख्यातं शत्रुबलं (साकं) सहैव (अजयत्) जयति ॥

मध्यस्थानदेवगणे इन्द्रः सर्वदेवराजः स च राजसशक्तिप्रधानः। मनुष्येषु चापि येषु येषु मन्त्रनिर्दिष्टागुणा भवन्ति ते सर्वेऽपि इन्द्रतत्त्वप्रसादत एव भवन्ति, तैरेव गुणैराजा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजकीयः सेनापतिः शूरः पुरुषश्चेन्द्रपदवाच्यः कस्मिंश्चिदंशे भवति ॥

"इदानीं साग्निचित्ये क्रतौ 'ब्रह्माऽप्रतिरथं जपेत्' इत्युक्तं, तच्च ब्रह्मत्वं त्रय्या विद्यया क्रियते। एतस्मात् कारणादुद्गात्राणामपि ब्रह्मत्वमाम्नातं मासस्य परिसमाप्तेः; एतस्मात्कारणात्सर्वासु शाखास्वप्रतिरथः पठ्यते। इन्द्रः सर्वस्य देवता। हिरण्यगर्भ ऋषिः=प्रजापतेरार्षम्। त्रिष्टुप् छन्दः" इति विव० ॥

"अत्रैन्द्रोऽप्रतिरथ ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता साग्निचित्ये क्रतौ अग्नौ प्रणीयमानेऽयमध्यायो ब्राह्मणेन जाप्यः" इति सायणाचार्यः ॥

"अथ सेनापतिकृत्यमुपदिश्यते" इति श्रीमान् स्वामी दयानन्दः ॥ ऋग्वेदे १० । १०३ । १ यजुर्वेदे १७ । ३३ऽपि ॥१॥

भाषार्थः-इन्द्र=राजा का वर्णन करते हैं-(इन्द्रः) इन्द्रदेव (आशुः) शीघ्रकारी फुरतीला (शिशानः) तीक्ष्ण (वृषभः न भीमः) सांड के समान डरावना (घनाघनः) प्रहार करने में चतुर (चर्षणीनां क्षोभणः) मनुष्यों के मध्य में क्षोभ वाला (संक्रन्दनः) विधिपूर्वक शत्रु पर प्रहार करने वाला (अनिमिषः) आलस्य प्रमादरहित (एकवीरः) अद्वितीय शूरवीर (शतं सेनाः) असंख्य सेनाओं को (साकम्) एक साथ (अजयत्) जीतता है ॥

मध्य स्थान देवगणान्तर्गत इन्द्र सब देवों का राजा है, वह राजसी शक्ति वाला है, मनुष्यों में भी जिन २ में ऊपर कहे मन्त्र के गुण हुंते हैं वे सब भी इन्द्रतत्त्व की प्रधान सहायता और प्रसाद से होते हैं, उन्हीं गुणों से राजा, राजा का सेनापति और शूरवीर राजपुरुष इन्द्रपदवाच्य होता है, जहां तक उस में इन्द्रत्व हो उतने अंश में यह बात चरितार्थ होती है ॥

कर्मकाण्ड विषय में विवरणकार कहते हैं कि "अब साग्निचित्य क्रतु में ब्रह्मा अप्रतिरथ का जप करे। इस कथन वाला ब्रह्मापन त्रयी विद्या से किया

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जाता है। इस कारण से उद्गात्रों को भी मास की परिसमाप्ति से ब्रह्मापन माना गया है। इस कारण सब शाखाओं में अप्रतिरथ पढ़ा जाता है। सब (अप्रतिरथ) का इन्द्र देवता, प्रजापति ऋषि और त्रिष्टुप् छन्द है" ॥

सायणाचार्य कहते हैं कि "यहां ऐन्द्र अप्रतिरथ ऋषि, त्रिष्टुप् छन्द और इन्द्रदेवता है। साग्निचित्यक्रतु में अग्निप्रणयन के समय ब्राह्मण को यह अध्याय जपना चाहिये" ॥

श्रीमान् स्वामी दयानन्दसरस्वती जी यजुर्वेदभाष्य में कहते हैं कि "अब सेनापति के कृत्य बताते हैं" ॥ ऋ० १० । १०३ । १ यजुर्वेद १७ । ३३ में भी है ॥१॥

अथ द्वितीया-

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३
संक्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
१ २ ३ १ २ ३ १ २ ३ १ २
तदिन्द्रेण जयत तत्सहध्वं युधोनर इषुहस्तेन वृष्णा ॥२॥(१८४८)

पदपाठः-संक्रन्दनेन, अनिमिषेण, जिष्णुना, युत्कारेण, दुश्च्यवनेन, धृष्णुना ३। तत् २। इन्द्रेण ३। जयत क्रि०। तत्। सहध्वम् क्रि०। युधः, नरः सं०। इषुहस्तेन, वृष्णा ३ ॥

अन्वितपदार्थः-(युधः नरः) हे योद्धारोनायकाः ! (संक्रन्दनेन) सम्यक् प्रहरणचतुरेण (अनिमिषेण) अनलसेन (जिष्णुना) विजयिना (युत्कारेण) युद्धकर्त्रा (दुश्च्यवनेन) दुर्निवार्येण (धृष्णुना) धर्षकेण (इषुहस्तेन) बाणहस्तेन (वृष्णा) वृष्टिवत् बाणवर्षकेण (इन्द्रेण) राज्ञा सेनापतिना वा सह (तत्) समक्षमागतं शत्रुबलं (जयत) जितं कुरुत (तत्) शत्रुबलम् (सहध्वं) अभिभवत ॥ ऋग्वेदे १० । १०३ । २ यजुर्वेदे १७ । ३४ ऽपि च ॥२॥

भाषार्थः-(युधः) हे युद्ध करने वाले (नरः) नायको ! तुम (संक्रन्दनेन) भले प्रकार विधिपूर्वक प्रहार करने में चतुर (अनिमिषेण) आलस्यवर्जित

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(जिष्णुना) जयशील (युत्कारेण) युद्ध करने वाले (दुश्च्यवनेन) न हटने वाले (धृष्णुना) दूसरों को धमका सकने वाले (इषुहस्तेन) बाण हाथ में लेने वाले (वृष्णा) बाण वृष्टि करने वाले (इन्द्रेण) इन्द्र के साहाय्य से (तत्) उस सामने आये शत्रुसैन्य को (जयत) जीतो और (तत्) उस को (सहध्वम्) अभिभूत=तिरस्कृत करो ॥ ऋ० १०।१०३।२ यजुः १७।३५ में भी है ॥२॥

अथ तृतीया-

१र २र ३ १ २ ३ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २

स इषुहस्तैः स निषङ्गिभिर्वशी स ꣳ स्रष्टा स युध इन्द्रो गणेन।

३ १ २ ३ १ २ ३ २ १ २ ३ १ २ ३ १ २

स ꣳसृष्टजित्सोमपा बाहुशर्ध्यू ३ ग्रधन्वा प्रतिहिताभिरस्ता ॥३॥

[१] (१८४९)

पदपाठः-सः १ । इषुहस्तैः ३ । सः । निषङ्गिभिः ३। वशी १ । संस्रष्टा, सः, युधः, इन्द्रः १ । गणेन ३ । संसृष्टजित्, सोमपाः, बाहुशर्धी, उग्रधन्वा १। प्रतिहिताभिः ३ । अस्ता १ ॥

अन्वितपदार्थः-पूर्वमन्त्रे इन्द्रेण जयतेत्युक्तं, जयसाधन सामर्थ्यमन्त्राह-(सः) पूर्वोक्तः (इन्द्रः) राजा (इषुहस्तै) बाणहस्तैर्भटैः सहवर्त्तमानः (सः) इन्द्रः (निषङ्गिभिः) खड्गवद्भिर्भटैः सहवर्त्तमानः (वशी) वश्यैर्भटैस्तद्वान् (गणेन संस्रष्टा) स्वेन बलसमूहेन संसर्गयुक्तः (सः) इन्द्रः (युधः) योद्धा (संसृष्टजित्) संसृष्टानां शत्रुगणानां जेता (सोमपाः) सोमपानशीलः (बाहुशर्धी) बाहुबलविशिष्टः (उग्रधन्वा) उग्रमुद्यतं धनुर्यस्य सः (प्रतिहिताभिः) शत्रुषु प्रेरिताभिः शक्त्यादिभिः (अस्ता) प्रक्षेप्ताऽस्ति, तेन जयतेति पूर्वेणाऽन्वयः ॥ ऋग्वेदे १०। १०३। ३ यजुर्वेदे १७। ३५ ऽपि ॥३॥

भाषार्थः-पूर्वमन्त्र में इन्द्र से जय करना कहा था, इस मन्त्र में इन्द्र के जयसाधनों का सामर्थ्य कहते हैं:-(सः) वह (इन्द्रः) राजा (इषुहस्तैः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बाण हाथ में रखने वाले भटों सहित (सः) वह (निषङ्गिभिः) खड्गधारियों सहित (वशी) वशवर्ती भटों सहित (गणेन) समूह से (संसृष्टा) संसर्ग रखने वाला (सः) वह (युधः) युद्ध करने वाला इन्द्र (संसृष्टजित्) संसर्ग युक्तों को जीतने वाला (सोमपाः) सोमपान करने वाला (बाहुशर्धी) बाहुबल वाला (उग्रधन्वा) धनुष् को उद्यत रखने वाला (प्रतिहिताभिः) शत्रुओं पर फेंकी हुई शक्ति इत्यादिकों से (अस्ता) फेंक करने वाला है। इस प्रकार के इन्द्र राजा के साहाय्य से जय करो यह पूर्व मन्त्र से अन्वय है॥ ऋ० १०। १०३। ३ यजुः १७। ३५ में भी है॥ ३॥

अथ द्वितीय तृचस्य-ऋष्यादिकं पूर्ववत्॥

तत्र प्रथमा—

१ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २

बृहस्पते परिदीया रथेन रक्षोहाऽमित्राँ अपबाधमानः।

३ १ २ २ ३ २ ३ १ २ ३ १ २ ३ १ २ २

प्रभञ्जन्त्सेनाः प्रमृणोयुधाजयन् नस्माकमेध्यविता रथानाम्॥

॥ १॥ (१८५०)

पदपाठः-बृहस्पते सं०। परिदीय क्रि०। रथेन ३। रक्षोहा १। अमित्रान् २। अपबाधमानः, प्रभञ्जन् १। सेनाः २। प्रमृण क्रि०। युधा ३। जयन् १। अस्माकम् ६। एधि क्रि०। अविता १। रथानाम् ६॥

अन्वितपदार्थः-(बृहस्पते) हे बृहतां पते! इन्द्र! राजन्! (रथेन) युद्धार्हरथेन (परिदीय) परिगच्छ शत्रुम्। (रक्षोहा) रक्षसामन्यायकारिणां हन्ता (अमित्रान्) द्वेग्धॄन् (अपबाधमानः) नाशयन् (सेनाः) शत्रुबलानि (प्रभञ्जन्) प्रणाशयन् (प्रमृणः) प्रकर्षेण हिन्धि (युधा) युद्धेन (जयन्) सन् (अस्माकं) रथिनां भटानां (रथानां) युद्धरथानाम् (अविता) रक्षकः (एधि) भव॥ ऋग्वेदे १०। १०३। ४ यजुर्वेदे १७। ३६ चापि॥ १॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(बृहस्पते) हे बड़ों के पति ! इन्द्र ! राजन् ! आप (रथेन) संग्रामसंबन्धी रथ से (परिदीय) शत्रु पर चढ़िये (रक्षोहा) राक्षसों=भन्याथियों के हन्ता (अमित्रान् अपबाधमानः) शत्रुओं के बाधक (सेनाः) शत्रु सेनाओं को (प्रभञ्जन्) नष्ट करते हुवे (प्रमृणः) उग्रता से मारिये और (युधा) युद्धद्वारा (जयन्) जीतते हुवे (अस्माकम्) हम रथी वा अतिरथी वा महारथियों के (रथानाम्) रथों के (अवता) रक्षक (एधि) हूजिये ॥ ऋ० १० । १०३ । ४ तथा यजुः १७ । ३६ में भी है ॥ १ ॥

अथ द्वितीया—

२ १र २र३ १ २ ३ १२ ३ १र २र ३ २

बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।

३ १ २ ३ १ २ ३ १र २र ३ २३१ २ ३ २

अभिवीरो अभिसत्वा सहौजा जैत्रमिन्द्र रथमातिष्ठ गोवित्

॥ २ ॥ (१८५१)

पदपाठः—बलविज्ञायः, स्थविरः, प्रवीरः, सहस्वान्, वाजी, सहमानः, उग्रः, अभिवीरः, अभिसत्वा, सहौजाः १ । जैत्रम् २ । इन्द्र सं० । रथम् २ । आतिष्ठ क्रि० । गोवित् १ ॥

अन्वितपदार्थः—(इन्द्र) हे इन्द्र ! राजन् ! (बलविज्ञायः) बलज्ञः (स्थविरः) हृष्टपुष्टाङ्गः (प्रवीरः) प्रकृष्टोवीरः (सहस्वान्) पराभिभवसामर्थ्यवान् (वाजी) बलवान् अन्नवान् वा (सहमानः) शत्रूणामभिभविता (उग्रः) उद्गीर्णबलः (अभिवीरः) अभिगता वीरा वीर्यवन्तोऽनुचरा यस्य सः (अभिसत्वा) अभिगताः सत्त्वानोयुद्धविद्वांसो यस्य सः (सहौजाः) ओजसा सह वर्तमानः (गोवित्) गवामिन्द्रियाणां लब्धा, एतद्विशेषणविशिष्टस्त्वं (जैत्रं) विजयकरं (रथं) वाहनम् (आतिष्ठ) आरूढोभव ॥ ऋग्वेदे १० । १०३ । ५ यजुर्वेदे १७ । ३७ चापि ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(इन्द्र) हे इन्द्र ! राजन् ! (बलविज्ञायः) बल का जानने वाला (स्थविरः) पूर्ण हृष्ट पुष्टाङ्ग (प्रवीरः) उत्तम कक्षा का वीर (सहस्वान्) शत्रुओं के तिरस्कार का सामर्थ्य रखने वाला (वाजी) बलवान् या अन्नादि सामग्री स थ रखने वाला (सहमानः) शत्रुओं पर प्रभाव डालने वाला (उग्रः) बल को उगलने वाला (अभिवीरः) अपने सब ओर वीरों का रखने वाला (अभिसत्वा) अपने सब ओर युद्धविद्याचतुर रक्षकों का रखने वाला (सहौजाः) ओजस्वी (गोवित्) इन्द्रियों के सामर्थ्य को पाने वाला तू (जैत्रं रथम्) विजयी रथ पर (आतिष्ठ) सवार हो ॥ ऋ० १० । १०३ । ३ यजुः १७ । ३१ में भी है ॥ २ ॥

अथ तृतीया-

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
इमꣳ सजाता अनुवीरयध्वमिन्द्रꣳ सखायो अनुसꣳ रभध्वम्
॥ ३ ॥ [२] (१८५२)

पदपाठः-गोत्रभिदम्, गोविदम्, वज्रबाहुम्, जयन्तम्, अज्म, प्रमृणन्तम् २ । ओजसा ३ । इमम् २ । सजाताः सं० । अनुवीरयध्वम् क्रि० । इन्द्रम् २ । सखायः सं० । अनु संरभध्वम् क्रि० ॥

अन्वितपदार्थः-(सजाताः) हे समानवयस्का युवानः ! (सखायः) हे सुहृदः ! यूयम् (गोत्रभिदं) पर्वतभेत्तारं (गोविदम्) इन्द्रियैर्बलिष्ठम् (वज्रबाहुं) वज्रादिर्बाहौ यस्य तं (जयन्तं) जयं कुर्वाणम् (अज्म ओजसा प्रमृणन्तम्) अभिगतं शत्रुबलं बलेन नाशयन्तम् (इमम् इन्द्रम्) राजानं (अनुवीरयध्वम्) अनुसृत्य वीर्यं प्रकटयत (अनुसंरभध्वम्) आनुकूल्येन धावत ॥ ऋग्वेदे १० । १०३ । ६ यजुर्वेदे १७ । ३८ ऽपि ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः—(सजाताः) हे समान आयु के वीरो ! (सखायः) मित्रो ! योद्धाओ ! तुम (गोत्रभिदम्) पहाड़ों के तोड़ने वाले (गोविदम्) इन्द्रियों की शक्ति से सम्पन्न (वज्रबाहुम्) वज्रादि हाथ में धारण करने वाले (जयन्तम्) जय करते हुवे (अजम) सामने आते शत्रुबल को (ओजसा) बल से (प्रमृणन्तम्) अत्यन्त नष्ट करते हुवे (इमम्) इस (इन्द्रम्) इन्द्र राजा के (अनुवीरयध्वम्) अनुसारी होकर वीरता दिखाओ (अनुसंरभध्वम्) अनुकूल होकर दौड़ो ॥ ऋ० १० । १०३ । ६ यजुः १७ । ३८ में भी ॥ ६ ॥

अथ तृतीयतृचस्य-ऋष्यादिकं पूर्ववत् ॥ तत्र प्रथमा—

३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।

३ १ २ ३ १ २ ३ २ २ ३ १ २ ३ २ ३ २

दुश्च्यवनः पृतनाषाडयुध्योऽ३ऽस्माकꣳ सेना अवतु प्रयुत्सु ॥

॥ १ ॥ (१८५३)

पदपाठः—अभि अ० । गोत्राणि २। सहसा ३। गाहमानः, अदयः, वीरः, शतमन्युः, इन्द्रः, दुश्च्यवनः, पृतनाषाड्, अयुध्यः १। अस्माकम् ६। सेनाः २। अवतु क्रि० । प्रयुत्सु ७ ॥

अन्वितपदार्थः—(गोत्राणि) पर्वतान् (सहसा) बलेन (अभिगाहमानः) आभिमुख्येन प्रविशन्सन् (अदयः) शत्रुषु दयारहितः (वीरः) वीर्यवान् (शतमन्युः) बहुक्रोधः (दुश्च्यवनः) निवारणाऽनर्हः (पृतनाषाड्) शत्रुसेनाया अभिभावुकः (अयुध्यः) परैर्योद्धुमशक्यः (इन्द्रः) पर्वत-योद्धा योधयिता च सेनेशः (अस्माकं) युध्यमानानां (सेनाः) सैन्यानि (प्रयुत्सु) संग्रामेषु (अवतु) रक्षतु॥ ऋग्वेदे १० । १०३ । ७ यजुर्वेदे १७ । ३९ चापि ॥ १ ॥

भाषार्थः—(गोत्राणि) पर्वतवृन्दों में (सहसा) बल से (अभि) सम्मुख (गाहमानः) घुस जाता हुआ (अदयः) शत्रुओं पर दया न करने वाला

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(वीरः) वीर (शतमन्युः) अत्यन्त क्रोध वाला (दुश्च्यवनः) न हटने वाला (पृतनाषाड्) शत्रुसेनाओं का तिरस्कार करने वाला (अयुध्यः) शत्रु जिस से न लड़ सकें (इन्द्रः) ऐसा सेनापति (अस्माकम्) हमारी (सेनाः) सेनाओं को (प्रयुत्सु) संग्रामों में (अवतु) रक्षित करे ॥ ऋ० १० । १०३ । ७ यजुः १७ । ३९ में भी ॥ १ ॥

अथ द्वितीया–

१ २ ३ २३ ३ २ ३१ २ ३ २ ३१ २३ १ २
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
३ १ २ ३ १ २ २ ३ १ २ ३ १ २
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

॥ २ ॥ (१८५१)

पदपाठः–इन्द्रः १ । आसाम् ६ । नेता, बृहस्पतिः १ । दक्षिणा ७ । यज्ञः १ । पुरः अ० । एतु क्रि० । सोमः १ । देवसेनानाम्, अभिभञ्जतीनाम्, जयन्तीनाम् ६ । मरुतः १ । यन्तु क्रि० । अग्रम् २ ॥

अन्वितपदार्थः–(अभिभञ्जतीनाम्) अभितो मारयन्तीनां (जयन्तीनां) विजयं कुर्वन्तीनाम् (आसाम्) एतासां (देवसेनानां) विदुषां धार्मिकाणां पुरुषाणां सेनानां (नेता) नायकः (इन्द्रः) इन्द्रसंज्ञः (पुरः) अग्रे (एतु) गच्छतु (बृहस्पतिः) बृहतः समूहस्य पतिरेतत्संज्ञः (दक्षिणा) दक्षिणस्यां दिशि गच्छतु (यज्ञः) एतत्संज्ञः संगमनीयः सेनारक्षकः उत्तरस्यां गच्छतु (सोमः) सेनाप्रेरकः सोमसंज्ञः पश्चाद्गच्छतु (मरुतः) मरणायोद्यताः शूराश्च (अग्रम्) अग्रदेशं (यन्तु) गच्छन्तु ॥

अत्र प्राकृतदेवासुरसंग्रामदृष्टान्तेन युद्धविद्योपदेशोऽस्ति । यथाऽऽकाशेऽन्धकारमेघादिदुष्टाऽसुरघातार्थं देव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सेनयेन्द्रो युद्धं करोति, तत्र मरुतो वायुविशेषाः सोमो बृहस्पतिरिन्द्रश्च यथोचितस्थानभाजोयुध्यन्ति, तथैव मनुष्यैर्व्यूहरचनापूर्वकं युद्धं विधेयमिति॥ ऋग्वेदे १०। १०३। ८ यजुर्वेदे १७। ४० ऽपि॥ २॥

भाषार्थः–(अभिमज्जतीनाम्) सामने मारती हुई (जयन्तीनाम्) विजय करती हुई (आसाम्) इन (देवसेनानाम्) धर्मात्मा देवों की सेनाओं का (नेता) सेनापति=नायक (इन्द्रः) इन्द्र (पुरः) आगे (एतु) जावे (बृहस्पतिः) समूह का पति बृहस्पतिसंज्ञक (दक्षिणा) दाहिनी ओर जावे (यज्ञः) संगमनीय यज्ञसंज्ञक सेनानी उत्तर में जावे (सोमः) सेना का प्रेरक सोम संज्ञक पीछे की ओर जावे (मरुतः) मरने से न डरने वाले मरुद्गण शूर वीर (अग्रम्) आगे (यन्तु) जावें॥

इस में प्राकृत देवाऽसुरसंग्राम के दृष्टान्त से युद्धविद्या का उपदेश है। जैसे आकाश में अन्धकार मेघ आदि दुष्ट असुरों के विनाशार्थ इन्द्र देवसेना के सहित युद्ध करता है, उस में मरुत्=वायुविशेष और सोम बृहस्पति तथा इन्द्र उचित स्थान पर युद्ध करते हैं, वैसे ही मनुष्यों के युद्धों में भी व्यूहरचना करके विधिबद्ध युद्ध होना चाहिये॥ ऋ० १०। १०३। ८ यजुः १७। ४० में भी॥२॥

अथ तृतीया–

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २

इन्द्रस्य वृष्णोवरुणस्य राज्ञ आदित्यानां मरुताञ्शर्ध उग्रम्।

३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २

महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥३॥

[३] (१८५५)

पदपाठः–इन्द्रस्य, वृष्णः, वरुणस्य, राज्ञः ६। आदित्यानाम्, मरुताम् ६। शर्धः, उग्रम् १। महामनसाम्, भुवनच्यवानाम् ६। घोषः १। देवानाम्, जयताम् ६। उद्–अस्थात् क्रि०॥

अन्वितपदार्थः–(इन्द्रस्य) ऐश्वर्यवतः (वृष्णः) कामवर्षितुर्बाणवर्षितुर्जलवर्षितुर्वा (वरुणस्य) वरणीयस्य (राज्ञः)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नृपस्य, तथा (आदित्यानां) सूर्यवत्प्रकाशमानानां तेजस्विनां वीराणां (मरुतां) मरणोद्यतानां धीराणां योद्धृणां (शर्धः) बलम् (उग्रम्) उद्गीर्णं भवतु इति शेषः (महामनसां) मनस्विनां (भुवनच्यवानां) भुवनानां च्यावयितॄणां (देवानां) युद्धविद्याप्रकाशकानां (जयतां) विजयं कुर्वाणानां (घोषः) उच्चैर्जयशब्दः (उदऽस्थात्) उत्तिष्ठतु ॥ ऋग्वेदे १० । १०३ । ९ यजुर्वेदे १७ । ४१ चाऽपि ॥ ३ ॥

भाषार्थः—(इन्द्रस्य) ऐश्वर्यवान् (वृष्णः) कामनापूरक वा बाणवर्षक वा मेघवर्षक (वरुणस्य) वरणीय (राज्ञः) राजा का और (आदित्यानाम्) सूर्यवत्प्रकाशमान तेजस्वी वीरों (मरुताम्) मरणार्थ उद्यत धीर योद्धाओं का (शर्धः) बल (उग्रम्) उग्र होवे । (महामनसाम्) बड़े मन वाले (भुवनच्यवानाम्) भुवनों को भगा देने वाले (देवानाम्) युद्धविद्याप्रकाशक (जयताम्) जीतते हुवों का (घोषः) जयघोष (उदऽस्थात्) उठे ॥

जिस प्रकार आकाश में लोक लोकान्तर परस्पर अपनी मर्यादा की रक्षा में जुटे हुवे युद्धार्थ उद्यत रहते हैं इसी प्रकार वीर राजवर्ग को दैवयुद्ध, विजय और रक्षा की शिक्षा ग्रहण करके वर्त्तना चाहिये ॥ ऋ० १० । १०३ । ९ यजः १७ । ४१ में भी ॥ ३ ॥

अथ चतुर्थसूक्तस्य—ऋष्यादिकमुक्तवत् ॥ तत्र प्रथमा—

१ २ ३ १ २ ३ १र २र ३ २ ३ १ २

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाꣳसि ।

१ २ ३ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २

उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥

॥ १ ॥ (१८५६)

पदपाठः—उद्-हर्षय क्रि० । मघवन् सं० । आयुधानि २ । उत् अ० । सत्वनाम्, मामकानाम् ६ । मनांसि २ । उत् । वृत्रहन् सं० । वाजिनाम् ६ । वाजिनानि २ । उत् । रथानाम्, जयताम् ६ । यन्तु क्रि० । घोषाः १ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वितपदार्थः-(मघवन्) हे धनवन् ! (मामकानां) मदीयानां भटानां (आयुधानि) असिप्रभृतीनि (उद् हर्षय) हर्षेणोद्यतानि कारय (सत्वनां) वीरपुरुषाणां (मनांसि) चेतांसि (उत्) उद्धर्षय (वृत्रहन्) दुष्टदस्यु घातक ! (वाजिनां) तुरङ्गानां (वाजिनानि) वेगान् (उत्) उद्धर्षय (जयतां) विजयं कुर्वाणानां (रथानां) सैनिकरथानां (घोषाः) शब्दाः (उत् यन्तु) उच्चैर्गच्छन्तु ॥ ऋग्वेदे १० । १०३ । १० यजुर्वेदे १७ । ४२ चाऽपि ॥ १ ॥

भाषार्थः-(मघवन्) हे धनवन् ! (मामकानाम्) मेरे (सत्वनाम्) वीर प्राणियों के (आयुधानि) तलवार आदि शस्त्रों को (उद्हर्षय) हर्ष पूर्वक उद्यत करावे (मनांसि) उन के चित्तों को (उत्) हर्ष से उभार (वृत्रहन्) हे दुष्टदस्युनाशन ! (वाजिनाम्) घोड़ों के (वाजिनानि) वेगों को (उत्) हर्ष से उभार (जयताम्) जीतते हुवे (रथानाम्) संग्रामस्थ रथों के (घोषाः) घोष (उद् यन्तु) ऊपर को उठें ॥ ऋ० १० । १०३ । १० यजुः १७ । ४२ में भी ॥ १ ॥

अथ द्वितीया-

३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १र २र३ १ २
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
३ १ २ ३ १र २र ३ १ २ ३ १ २
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवताहवेषु ॥ २ ॥

(१८५७)

पदपाठः-अस्माकम् ६ । इन्द्रः १ । समृतेषु, ध्वजेषु ७ । अस्माकम् । याः, इषवः, ताः १ । जयन्तु क्रि० । अस्माकम् । वीराः, उत्तरे १ । भवन्तु क्रि० । अस्मान् २ । उ अ० । देवाः १ । अवत क्रि० । आहवेषु ७ ॥

अन्वितपदार्थः-(इन्द्रः) राजा (अस्माकं) यजमानानां धार्मिकाणां (समृतेषु) शत्रुसैन्यप्राप्तेषु (ध्वजेषु) पता-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कादिकेषु सत्सु अविता भवत्विति शेषः। (याः अस्माकम् इषवः ताः जयन्तु, अस्माकं वीराः उत्तरे भवन्तु), (उ) तथा (देवाः) देवताः (आहवेषु) संग्रामेषु (अस्मान्) धार्मिकान् (अवत) रक्षन्तु ॥ ऋग्वेदे १० । १०३ । ११ यजुर्वेदे १७ । ४३ ऽपि ॥ २ ॥

भाषार्थः—(इन्द्रः) इन्द्र राजा (अस्माकम्) हम धार्मिक पुरुषों की (समृतेषु ध्वजेषु) शत्रुसैन्य में ध्वजायें पहुंचने पर रक्षक हो। (याः) जो (अस्माकम्) हमारे (इषवः) बाण हैं (ताः) वे (जयन्तु) जीतें (अस्माकम्) हमारे (वीराः) वीर (उत्तरे) अगुवा (भवन्तु) होवें (उ) और (देवाः) देवता (आहवेषु) संग्रामों में (अस्मान्) हमारी (अवत) रक्षा करें ॥ ऋ० १० । १०३ । ११ यजुः १७ । ४३ में भी ॥ २ ॥

अथ तृतीया—

३ १२ २२ ३ १ २ ३ १ २ ३ १ २

असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।

१ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २ ३ २

तां गहत तमसाऽपव्रतेन यथैतेषामन्यो अन्यं न जानात्

॥ ३ ॥ [४] (१८५८)

पदपाठः—असौ, या, सेना १ । मरुतः सं० । परेषाम् ६ । अभ्येति क्रि० । नः २ । ओजसा ३ । स्पर्धमाना १ । ताम् २ । गूहत क्रि० । तमसा, अपव्रतेन ३ । यथा अ० । एतेषाम् ६ । अन्यः १ । अन्यम् २ । न अ० । जानात् क्रि० ॥

अन्वितपदार्थः—(मरुतः) हे मरणनिर्भयाः ! वीराः ! (असौ) एषा (या) या कापि (परेषां) शत्रूणां (सेना), (नः) अस्मान् प्रति (ओजसा) बलेन (स्पर्धमाना) स्पर्धां कुर्वाणा (अभ्येति) अभिगच्छति (तां) सेनाम् (अपव्रतेन) कर्माऽपवारकेण (तमसा) अन्धकारेण (गूहत)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संवृतां कुरुत (यथा) येन प्रकारेण (एतेषां) शत्रुपक्षयोर्द्वयोः मध्ये (अन्यः अन्यम्) इतरेतरं (न) नैव (जानात्) जानीयात्॥ स्ववीरैस्तथाऽस्त्रप्रयोगेण परवीरेषु अन्धकारप्रवृत्तिः कार्या, यथा ते परस्परं न जानीयुः ॥ यजुर्वेदे १७।४७ऽपि ॥ २ ॥

भाषार्थः—(मरुतः) हे मरुतो ! वीरो ! (अमी) यह (या) जो (परेषाम्) शत्रुओं की (सेना) सेना (ओजसा) बल से (स्पर्धमाना) स्पर्धा करती हुई (नः) हमारे (अभ्येति) संमुख आरही है (ताम्) उस को (अपव्रतेन) काम बन्द करने वाले (तमसा) अन्धकार से (गूहत) ढकदो (यथा) जैसे (एतेषाम्) इन शत्रुओं में (अन्यः अन्यम्) एक दूसरे को (न) नहीं (जानात्) जान पावे ॥

अपने वीरों को चाहिये कि जब शत्रुसैन्य सामने बढा आता हो तो अस्त्रों के प्रयोग से ऐसा घना अन्धकार शत्रुसेना में फैलादें कि वे परस्पर एक दूसरे को देख न सकें, अन्धे से होजावें ॥ यजुः १७ । ४७ में भी ॥ ३ ॥

अथ पञ्चमर्चस्य—ऋष्यादिकं पूर्वसूक्ततुल्यम् । तत्रप्रथमा—

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभिप्रेहि
१ २ ३ १ २ ३ २ ३ २ ३ १ २
निर्दह हृत्सु शोकैरन्धेनाऽमित्रास्तमसा सचन्ताम् ॥ १ ॥ (१८५९)

पदपाठः—अमीषाम् ६ । चित्तम् २ । प्रतिलोभयन्ती १ । गृहाण क्रि० । अङ्गानि २ । अप्वे सं० । परेहि, अभिप्रेहि, निर्दह क्रि० । हृत्सु ७=२ । शोकैः ३ । अन्धेन ३ । अमित्राः १ । तमसा ३ । सचन्ताम् क्रि० ॥

अन्वितपदार्थः—(अप्वे) भीः ! त्वम् (अमीषाम्) उपस्थितानां शत्रूणां (चित्तं) चित्तानि (प्रति लोभयन्ती) विमोहयन्ती सती (अङ्गानि) शत्रुगात्राणि (गृहाण) वशीकुरु (हृत्सु) हृदयानि (शोकैः) संतापैः (निर्दह)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निःशेषेण दह (परेहि) परागच्छ (अभि प्रेहि) व्याप्नुहि (अमित्राः) शत्रवः (अन्धेन) निबिडेन (तमसा) अन्धकारेण (रुचन्ताम्) समवेता भवन्तु ॥

" अप्वा यदेनया विद्धोऽपवीयते व्याधिर्वा भयं वा " निरु० ६ । १२ " अमीषां चित्तानि प्रज्ञानानि प्रतिलोभयमाना गृहाणाङ्गान्यप्वे परेह्यभिप्रेहि निर्दहैषां हृदयानि शोकैरन्धेनामित्रास्तमसा संसेव्यन्ताम् ॥ " निरु० ९ । ३३ ॥ "अप्वा देवता सा व्याधिर्वा भयं वा यस्मादेतया विद्धोऽपवीयते तस्मादप्वा । अपपूर्वाद्वातेरन्तर्भूतण्यर्थात् अन्येष्वपि दृश्यत इति उ प्रत्ययः अपशब्दान्त्याकारलोपश्छान्दसः ततष्टाप् अपवाति अपगमयति सुखं प्राणांश्चेत्यप्वा । " इति महीधरो यजुर्वेदे १७ । ४४ ॥ ऋग्वेदे १० । १०३ । १२ऽपि ॥१॥

भाषार्थः—(अप्वे) भय ! तू (अमीषाम्) इन हमारे उपस्थित शत्रुओं के (चित्तम्) चित्तों को (प्रतिलोभयन्ती) मुग्ध करता हुआ (अङ्गानि) इन के देहों को (गृहाण) जकड़ कर पकड़ ले (हृत्सु) हृदयों को (शोकैः) शोकों से (निर्दह) निरा फूंक दे (परेहि) दूर भाग (अभिप्रेहि) व्याप जा, (अमित्राः) शत्रु लोग (अन्धेन) गहरे (तमसा) अन्धकार से (सचन्ताम्) संयुक्त हों ॥

निरुक्त ६ । १२, ९ । ३३ महीधरभाष्य इत्यादि प्रमाण संस्कृतभाष्य में देखिये ॥ ऋ० १० । १०३ । १२ यजुर्वेद १७ । ४४ में भी ॥ १ ॥

अथ द्वितीया—अनुष्टुप्छन्दः ॥

२ ३ १ २ ३ १ २ ३ १ २
प्रेता जयता नर इन्द्रोवः शर्म यच्छतु ।
३ १ २ ३ १ २ ३ १ २ २ २
उग्रा वः सन्तु बाहवोऽनाधृष्या यथाऽसथ ॥२॥ (१८६०)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः प्रेत, जयत क्रि०। नरः सं०। इन्द्रः १। वः ४। शर्म २। यच्छतु क्रि०। उग्राः १। वः ६। सन्तु क्रि०। बाहवः १। अनाधृष्याः १। यथा अ०। असथ क्रि०॥

अन्वितपदार्थः-(नरः) हे नरोवीराः ! (प्रेत) प्रकर्षेण गच्छत (जयत) शत्रुभटान् जयत (इन्द्रः) सेनापतिः (वः) युष्मभ्यं (शर्म) सुखं (यच्छतु) ददातु (यथा) येन प्रकारेण (अनाधृष्याः) परैरतिरस्कार्याः (असथ) भवेत, तथा (वः) युष्माकं (बाहवः) बाहुदण्डाः (उग्राः) उद्भीर्णबलाः (सन्तु) भवन्तु ॥ ऋग्वेदे १०।१०३।१३ यजुर्वेदे १७। ४६ ऽपि ॥ २ ॥

भाषार्थः-(नरः) हे वीर पुरुषो ! (प्रेत) उत्कृष्टता से बढ़ते से जाओ और (जयत) जीतो शत्रुओं को (इन्द्रः) सेनापति (वः) तुम को (शर्म) सुख (यच्छतु) देवे (यथा) जिस प्रकार (अनाधृष्याः) दूसरों से न दबने वाले (असथ) होओ, उस प्रकार (वः) तुम्हारी (बाहवः) भुजाएँ (उग्राः) उग्र (सन्तु) होवें ॥ ऋ० १०। १०३। १३ यजुः १७। ४६ में भी ॥ २ ॥

अथ तृतीया-इषुर्देवता। अनुष्टुप्छन्दः ॥

१ २ ३ १ २ ३ १ २ ३ १ २ २ ३

अवसृष्टा परापत शरव्ये ब्रह्मसंशिते। गच्छा

२ ३ १ २ ३ २उ ३ २ ३ १ २

ऽमित्रान्प्रपद्यस्व माऽमीषां कंचनोच्छिषः ॥३॥ [५] (१८६१)

पदपाठः-अवसृष्टा १। परापत क्रि०। शरव्ये, ब्रह्मसंशिते सं०। गच्छ क्रि०। अमित्रान् २। प्रपद्यस्व क्रि०। मा अ०। अमीषाम् ६। कंचन अ०। उच्छिषः क्रि०॥

अन्वितपदार्थः-(ब्रह्मसंशिते) ब्रह्मणा वेदज्ञेन धनुर्वेद विदा तीक्ष्णीकृते (शरव्ये) हिंसनेऽकुण्ठिते इषो ! (अवसृष्टा) क्षिप्रा सती त्वं (परापत) शत्रुषु पत (अमित्रान्) शत्रून् (गच्छ) प्रामुहि (प्रपद्यस्व) हृदयादिषु विद्धा भव (अमीषां)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शत्रूणां मध्ये (कंचन) कमपि शत्रुं (मा उच्छिषः) अवशिष्टं माकार्षीः=निःशेषेण सर्वान्नाशय ॥ ऋग्वेदे ६ । ७५ । १६ यजुर्वेदे १७ । ४५ ऽपि ॥ ३ ॥

भाषार्थः-(ब्रह्मसंशिते) धनुर्वेदज्ञ ब्रह्मा से तीक्ष्ण किये हुवे (शरव्ये) हिंसा में अकुण्ठित बाण ! तू (अवसृष्टा) फेंका वा चलाया हुवा (परापत) शत्रुओं पर गिर (अमित्रान्) शत्रुओं को (गच्छ) प्राप्त हो (प्रपद्यस्व) उन के हृदय आदि को बींध (अमीषाम्) इन शत्रुओं में से (कंचन) किसी को (मा) मत (उच्छिषः) शेष छोड़=निःशेष करके नष्ट कर ॥ ऋ० ६ । ७५ । १६ यजुः १७ । ४५ में भी ॥ ३ ॥

अथ षष्ठसूक्ते प्रथमायाः-प्रजापतिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप्छन्दः ॥

३ १ २३१२ २२ ३ १ २ ३ १२३१ २ ३ १ २

कङ्काः सुपर्णा अनुयन्त्वेनान् गृध्राणामन्नमसावस्तु सेना ।

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २

मैषां मोच्यघहारश्चनेन्द्र वयाꣳस्येनाननु संयन्तु सर्वान् ॥

॥ १ ॥ (१८६२)

पदपाठः-कङ्काः, सुपर्णाः १ । अनुयन्तु क्रि० । एनान् २ । गृध्राणाम् ६ । अन्नम्, असौ १ । अस्तु क्रि० । सेना १ । मा अ० । एषाम् ६ । मोचि क्रि० । अघ-हारः १ । चन अ० । इन्द्र सं० । वयांसि १ । एनान् २ । अनुसंयन्तु क्रि० । सर्वान् २ ॥

अन्वितपदार्थः-(कङ्काः) क्रव्यादाः (सुपर्णाः) शोभनपतनाः पक्षिणः (एनान्) अस्माभिर्निहतान् शत्रून् (अनुयन्तु) अनुगच्छन्तु (असौ) समक्षे वर्त्तमाना (सेना) शत्रुसेना (गृध्राणाम् अन्नम् अस्तु), (इन्द्र) सेनापते ! (एषां) शत्रुसैन्यानां मध्ये (अघहारः) पापी (चन) कश्चिदपि (मा) न (मोचि) मुक्तः स्यात्, किन्तु (एनान् सर्वान्), प्रति (वयांसि) मांसाशिनः पक्षिणः (अनुसं-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यन्तु) सम्यक् अनुप्राप्नुवन्तु ॥ वीररसोपदेशः खलु दर्शनीयोऽत्र वेदे ॥ १ ॥

भाषार्थः-(कङ्काः) कच्चा मांस खाने वाले (सुपर्णाः) पक्षिगण (एनान्) इन शत्रुओं को जो हमने मारे हैं, (अनुयन्तु) प्राप्त होजावें (अयं) यह (सेना) शत्रु की सेना (गृध्राणाम्) गिद्धों का (अन्नम्) अन्न (अस्तु) हो जावे (इन्द्र) हे सेनापते ! (एषाम्) इन शत्रुओं में (कश्चन) कोई भी (अघहारः) पापी (मा) न (मोचि) छूटने पावे, किन्तु (एनान्) इन (सर्वान्) सब को (वयांसि) मांसभक्षी पक्षी (अनु संयन्तु) पूर्ण प्रकार से प्राप्त होजावें ॥ १ ॥

अथ द्वितीयायाः-अप्रतिरथोऽग्निर्वार्क्षिः । इन्द्राग्नी देवते । अनुष्टुप्छन्दः ॥

३ १ २ ३ १ ३ २ ३ २ ३ २

अमित्रसेनां मघवन्नस्माञ्छत्रूयतीमभि ।

३ १ २ २ ३ १ २ ३ १ २

उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥ २ ॥ (१८६३)

पदपाठः-अमित्रसेनाम् २ । मघवन् सं० । अस्मान्, शत्रूयतीम् २ । अभि अ० । उभौ १ । ताम् २ । इन्द्र ! वृत्रहन् सं० । अग्निः १ । च अ० । दहतम् क्रि० । प्रति अ० ॥

अन्वितपदार्थः-(वृत्रहन्) दस्युनाशन ! (मघवन्) यज्ञादिपरोपकारवन् ! (इन्द्र) इन्द्र ! राजन् ! वा सेनापते ! त्वम् (अग्निः च) पावकश्च (उभौ) द्वौ हि (ताम्) समक्षमागताम् (अस्मान् अभि) अस्मानभिलक्ष्य (शत्रूयतीम्) शत्रुतां कुर्वन्तीम् (अमित्रसेनां) शत्रुसेनां (प्रति दहतम्) आभिमुख्येन दग्धां कुरुतम् ॥ २ ॥

भाषार्थः-(वृत्रहन्) दुष्टदस्युनाशक ! (मघवन्) यज्ञादि परोपकार वाले ! (इन्द्र) राजन् ! वा सेनापते ! आप (च) और (अग्निः) अग्नि (उभौ) दोनों (ताम्) उस (अस्मान् अभि शत्रूयतीम्) हमारे सामने शत्रुता करती हुई (अमित्रसेनाम्) शत्रु की सेना को (प्रति) सामना करके (दहतम्) फूंक दो ॥ २ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तृतीयायाः—अप्रतिरथः पायुर्भारद्वाज ऋषिः। ब्रह्मणस्पतिरदितिश्च देवते। पङ्क्तिश्छन्दः॥

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २

यत्र बाणाः संपतन्ति कुमाराविशिखाइव।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २

तत्र नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु।

३ २ ३ १ २

विश्वाहा शर्म यच्छतु ॥३॥ [६] (१८६१)

पदपाठः—यत्र अ० । बाणाः १ । संपतन्ति क्रि० । कुमाराः, विशिखाः १। इव, तत्र अ० । नः ४ । ब्रह्मणस्पतिः, अदितिः १ । शर्म २ । यच्छतु क्रि० । विश्वाहा १ । शर्म । यच्छतु ॥

अन्वितपदार्थः—(यत्र) यस्मिन् संग्रामे (विशिखाः) मुण्डिताः (कुमाराइव) अतिबालाइव (बाणाः) बाणाः (संपतन्ति) परस्परेरिताः परितः पतन्ति (तत्र) संग्रामे (ब्रह्मणस्पतिः) बृहतां पतिः सेनानीः (अदितिः) अन्यैरखण्डितः सन् (नः) अस्मभ्यं (शं) सुखं (यच्छतु) ददातु (विश्वाहा) सर्वदा (शर्म) सुखं (यच्छतु) ददातु ॥

बृहस्पतिरदितिश्चेति द्वेअपि इन्द्रविशेषणपदे महीधरेण यजुर्वेदे १७ । ४८ व्याख्याते ॥ ऋग्वेदे ६ । ७५ । १७ ऽपि ॥३॥

भाषार्थः—(यत्र) जिस संग्राम में (विशिखाः) मुण्डित (कुमाराः) बालक (इव) से (बाणाः) बाण (संपतन्ति) एक पर दूसरे के फेंके सर्वतः गिरते हैं (तत्र) उस संग्राम में (ब्रह्मणस्पतिः) बड़ों का बड़ा पालक (अदितिः) अन्यों से न चोट पाया हुवा इन्द्र सेनानी (नः) हमारे लिये (शर्म) सुख को (यच्छतु) देवे (विश्वाहा) जिस से सब दिन (शर्म) सुख को (यच्छतु) देवे ॥

महीधर ने भी यजुः १७ । ४८ में इस मन्त्र के ब्रह्मणस्पतिः और अदितिः पदों को इन्द्र का विशेषण ही माना है ॥ ऋ० ६ । ७५ । १७ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ सप्तमर्चे प्रथमाद्वितीययोः अप्रतिरथः ऋषिः शासो भारद्वाजो वा । इन्द्रो देवता । अनुष्टुप्छन्दः ॥

२उ ३ १र २र ३ २ ३२ ३ १२
वि रक्षो वि मृधोजहि वि वृत्रस्य हनू रुज ।
२ ३ १ २ ३ १ २ ३ १ २
वि मन्युमिन्द्र वृत्रहन्नमित्रस्याऽभिदासतः ॥१॥ (१८६५)

पदपाठः–वि अ० । रक्षः २ । वि । मृधः २ । जहि क्रि० । वि । वृत्रस्य ६ । हनू २ । रुज क्रि० । वि । मन्युम् २ । इन्द्र ! वृत्रहन् सं० । अमित्रस्य, अभिदासतः ६ ॥

अन्वितपदार्थः–(वृत्रहन्) वृत्रस्य हन्तः ! (इन्द्र) इन्द्र ! (रक्षः) राक्षसजातं (वि–जहि) विनाशय (मृधः) शत्रून् (वि) विजहि (वृत्रस्य) आवरणकरस्य (अभिदासतः) अभिघ्नतः (अमित्रस्य) शत्रोः (हनू) कपोल प्रान्तौ (वि–रुज) विशेषेण भग्नौ कुरु (मन्युं) क्रोधं च (वि) विजहि ॥ ऋग्वेदे १० । १५२ । ३ ऽपि ॥ १ ॥

भावार्थः–(वृत्रहन्) हे शत्रुनाशन ! (इन्द्र) इन्द्र ! (रक्षः) राक्षसगण को (वि-जहि) नष्ट कर (मृधः) शत्रुओं को (वि) नष्ट कर (वृत्रस्य) रोकने वाले (अभिदासतः) सामना करने और हिंसा करने वाले (अमित्रस्य) शत्रु की (हनू) दोनों गलाफुवों को (वि-रुज) फाड़ डाल और (मन्युम्) उस के क्रोध को (वि) नष्ट कर ॥ ऋ० १० । १५२ । ३ में भी ॥ १ ॥

अथ द्वितीया–

१ २ ३ १ २ ३ १ २ ३ २
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
२ ३ १ २ ३ २ ३ १ २ ३ १ २
यो अस्माँ अभिदास-त्यधरं गमया तमः ॥२॥ (१८६६)

पदपाठः–वि अ० । नः ६ । इन्द्र सं० । मृधः २ । जहि क्रि० । नीचा अ० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यच्छ क्रि० । पृतन्यतः २ । यः १ । अस्मान् २ । अभिदासति क्रि० । अधः म् २ । गमय क्रि० । तमः २ ॥

अन्वितपदार्थः—(इन्द्र) हे इन्द्र ! (नः) अस्माकं (मृधः) शत्रून् (वि-जहि) विनाशय (पृतन्यतः) पृतनां सेनामात्मन इच्छतः=युयुत्समानानऽपि(नीचा यच्छ)अधः पातय (यः) शत्रुः (अस्मान्) धार्मिकान् (अभिदासति) हिनस्ति तम् (अधरं तमः गमय) नीचैस्तरमन्धकारं मृत्युं प्रापय॥ ऋग्वेदे १० । १५२ । ४ यजुर्वेदे ८ । ४४ तथा १८ । ७० ऽपि ॥ २ ॥

भाषार्थः—(इन्द्र) हे इन्द्र ! (नः) हमारे (मृधः) शत्रुओं को (वि-जहि) विनष्ट कर (पृतन्यतः) युद्ध चाहने वालों को भी (नीचा यच्छ) नीचे गिरा (यः) जो (अस्मान्) हम को (अभिदासति) मारता है उस को (अधरम्) नीचे (तमः) अन्धेरे=मृत्यु को (गमय) पहुंचा॥ ऋ० १० । १५२ । ४ यजुः ८ । ४४ तथा १८ । ७० में भी ॥ २ ॥

अथ तृतीयायाः—विराड्जगती छन्दः ॥

१ २ ३ १ २ २ २ ३ १ २ ३ १ २ ३ १ २ ३ २

इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।

१ २ ३ २ ३ १ २ १ २ ३ १ २ ३ १ २ २ ३

तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणाꣳ

१ २ ३ २

सहो महत् ॥ ३ ॥ [७] (१८६७)

पदपाठः—इन्द्रस्य ६ । बाहू, स्थविरौ, युवानौ, अनाधृष्यौ, सुप्रतीकौ, असह्यौ १ । तौ २ । युञ्जीत क्रि० । प्रथमौ २ । योगे, आगते ७ । याभ्याम् ३ । जितम् १ । असुराणाम् ६ । सहः, महत् १ ॥

अन्वितपदार्थः—(इन्द्रस्य) वीरस्य (बाहू) भुजौ (स्थविरौ) स्थूलौ (युवानौ) अजरौ (अनाधृष्यौ)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धर्षितुमशक्यौ (सुप्रतीकौ) शोभनाकारौ (असह्यौ) शत्रुभिः सोढुमशक्यौ भवतः (याभ्यां) बाहुभ्याम् (असुराणां) दुष्टदस्यूनां (महत्) प्रभूतं (सहः) बलं (जितं) जितं भवति (तौ) बाहू (योगे) संग्रामे (आगते) प्राप्ताऽवसरे सति (प्रथमौ) पूर्वौ (युञ्जीत) प्रयुक्तौ कुर्वीत ॥ ३ ॥

भाषार्थः-(इन्द्रस्य) वीर पुरुष की (बाहू) दो भुजाएं (स्थविरौ) मोटी (युवानौ) जवान (अनाधृष्यौ) शत्रुओं से न धसकाई जाने वाली (सुप्रतीकौ) देखने में सुन्दर (असह्यौ) शत्रु से न सही जाने वाली होती हैं (याभ्याम्) जिन बाहुओं से (असुराणाम्) दुष्ट दस्यु राक्षसों का (महत्) बड़ा (सहः) बल (जितम्) जीता जाता है (योगे) अवसर [संग्राम] (आगते) आने पर (तौ प्रथमौ) उन भुजाओं को पहले (युञ्जीत) काम में लावे ॥ ३ ॥

अथाऽष्टमसूक्तस्य प्रथमायाः-अप्रतिरथः पायुर्वा भारद्वाज ऋषिः । सोमो वरुणश्च देवते । त्रिष्टुप्छन्दः ॥

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजाऽमृतेनानुवस्ताम् ।

३ १ २ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

उरोर्वरीयोवरुणस्ते कृणोतु जयन्तं त्वाऽनु देवामदन्तु॥१॥(१८६८)

पदपाठः-मर्माणि २ । ते ६ । वर्मणा ३ । छादयामि क्रि० । सोमः १ । त्वा २ । राजा १ । अमृतेन ३ । अनुवस्ताम् क्रि० । उरोः ५ । वरीयः २ । वरुणः १ । ते ६ । कृणोतु क्रि० । जयन्तम्, त्वा २ । अनु अ० । देवाः १ । मदन्तु क्रि० ।

अन्वितपदार्थः-(ते) त्वदीयानि (मर्माणि) मर्मस्थानानि, हे राजन् ! (वर्मणा) कवचेन (छादयामि) आवृणोमि (राजा सोमः) ओषधिराजः (त्वा) त्वाम् (अमृतेन) मृत्युनिवारकेण स्वप्रभावेन (अनुवस्ताम्) अन्वाच्छादयतु (वरुणः) देवः (ते) तव (उरोः) महतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(वरीयः) महत्तरं सुखं (कृणोतु) करोतु (जयन्तं) विजयं कुर्वन्तं (त्वा) त्वाम् (देवाः) देवताः (अनुमदन्तु) अनुहृष्यन्तु उत्साहयन्तु वा॥ ऋग्वेदे ६। ७५। १८ यजुर्वेदे १७। ४९ चाऽपि ॥ १ ॥

भाषार्थः-हे राजन्! (ते) तेरे (मर्माणि) जिन स्थानों में चोट आने से मर जावे उन मर्म स्थलों को (वर्मणा कवच से (छादयामि) छादन करता हूं (सोमः) सोम (राजा) ओषधिराज (त्वा) तुझको (अमृतेन) अमृत से (अनुवस्ताम्) बसावे (वरुणः) वरुण देव (ते) तेरे (उरोः) बहुत से (वरीयः) बहुत सुख को (कृणोतु) करे (जयन्तम्) जीतते हुवे (त्वा) तुझ को (देवाः) देवता (अनुमदन्तु) उत्साहित करें॥ ऋ० ६। ७५। १८ यजुः १७। ४९ में भी ॥ १ ॥

अथ द्वितीयायाः-ऋषिः देवता चोक्ते एव। अनुष्टुप्छन्दः ॥

३ १ २ ३ १ २

अन्धा अमित्रा भवताऽशीर्षाणोऽहय इव।

१ २ ३ १ २ ३ १ २ ३ १ २

तेषां वो अग्निनुन्नानामिन्द्रो हन्तु वरं वरम् ॥२॥ (१८६९)

पदपाठः-अन्धाः १। अमित्राः सं०। भवत क्रि०। अशीर्षाणः १। अहयः १। इव अ०। तेषां, वः, अग्निनुन्नानाम् ६। इन्द्रः १। हन्तु क्रि०। वरम्, वरम् २॥

अन्वितपदार्थः-(अमित्राः) हे शत्रवो दुष्टा दस्यवः! यूयम् (अशीर्षाणः) शीर्षच्छिन्नाः (अहयइव) सर्पाइव (अन्धाः) मृताः (भवत) स्त (तेषां) तथाभूतानां (अग्निनुन्नानां) पावकेनाऽस्त्रप्रयुक्तेन दग्धानां (वः) युष्माकम् मध्ये (वरं वरम्) उत्कृष्टमुत्कृष्टम् (इन्द्रः) राजा (हन्तु) नाशयतु ॥ २ ॥

भाषार्थः-(अमित्राः) हे दुष्ट दस्यु शत्रुओ! तुम (अशीर्षाणः) शिर कटे वा फणकटे (अहयइव) सांप से (अन्धाः) अन्धे वा मरे (भवत)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हाजावो (तेषाम्) उन (अग्निनुन्नानाम्) अस्त्रप्रयुक्त अग्नि से फुंके हुवे (वः) तुम में से (वरम्, वरम्) अच्छे अच्छे को छांट छांट कर (इन्द्रः) राजा (हन्तु) मारे ॥ २ ॥

अथ तृतीयायाः—अप्रतिरथः ऋषिः । विश्वेदेवा देवताः । पङ्क्तिश्छन्दः ॥

२ ३ १ २ ३ २ ३ २ ३ १ २

यो नः स्वोरणो यश्च निष्ट्यो जिघाꣳसति ।

३ १ २ २ ३ २ ३ १ २ २ ३

देवास्तꣳसर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरꣳ

२ ३ २ ३ १ २ २

शर्म वर्म ममान्तरम् ॥ ३ ॥ [८] (१८७०)

पदपाठः—यः १ । नः २ । स्वः, अरणः, यः १ । च अ० । निष्ट्यः १ । जिघांसति क्रि० । देवाः १ । तम् २ । सर्वे १ । धूर्वन्तु क्रि० । ब्रह्म, वर्म १ । मम ६ । अन्तरम्, शर्म, वर्म १ । मम । अन्तरम् ॥

अन्वितपदार्थः—(स्वः) अस्मदीयः (यः) योवै (अरणः) अदाताऽयाज्ञिकोवेदविरोधी (यः च) यश्च (निष्ट्यः) तिरोभूतोगुप्तरूपेण (नः) अस्मान् (जिघांसति) हन्तुमिच्छति (सर्वे देवाः) अखिलादेवताः (तम्) शत्रुं (धूर्वन्तु) हिंसन्तु (ब्रह्म) धनुर्वेदज्ञानं (मम) वेदविदः (वर्म) कवचम् (अन्तरम्) व्यवधायकं (शर्म) सुखदं (वर्म) कवचं (मम) मे (अन्तरम्) व्यवधायकं भवतु ॥ ऋग्वेदे ६ । ७५ । १९ ऽपि ॥ ३ ॥

भाषार्थः—(स्वः) अपना=हमारा (यः) जो (अरणः) अधर्मी (च) और (यः) जो (निष्ट्यः) दूरस्थ गुप्तरूप से (नः) हम को (जिघांसति) मारना चाहता है (तम्) उस को (सर्वे) सब (देवाः) देवता (धूर्वन्तु) मारें और (मम) मेरा (ब्रह्म) धनुर्वेद (वर्म) कवच (अन्तरम्) बचाव हो, (शर्म) सुखदायी (वर्म) कवच (मम) मेरा (अन्तरम्) बचाव हो ॥ ऋ० ६ । ७५ । १९ में भी ॥ ३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ नवमसूक्तस्य प्रथमायाः—अप्रतिरथ ऐन्द्रावायव ऋषिः। इन्द्रो देवता। त्रिष्टुप्छन्दः॥

३२७ ३१ २३१ २३१ २३२३ १२ ३१२
मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्था परस्याः।
३२ ३ १२३१२ ३ १ २र ३१र २र
सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रूँस्ताढि वि मृधो नुदस्व
॥ १ ॥ (१८७१)

पदपाठः—मृगः १। न अ०। भीमः, कुचरः, गिरिष्ठाः १। परावतः ५। आजगन्थ क्रि०। परस्याः ५। सृकम् २। संशाय क्रि०। पविम् २। इन्द्र सं०। तिग्मम् २। वि अ०। शत्रून् २। ताढि क्रि०। वि। मृधः २। नुदस्व क्रि०॥

अन्वितपदार्थः—(इन्द्र) राजन्! त्वम् (मृगः न) सिंहइव (भीमः) शत्रोर्भयङ्करः (कुचरः) पृथिवीविचरणः (गिरिष्ठाः) पर्वतस्थोदुर्गस्थोवा सन् (परस्याः) अन्यस्याः दिशः (परावतः) दूरात् (आजगन्थ) आगच्छसि, आगत्य च (सृकं) सरणशीलं (तिग्मं) तीक्ष्णं (पविं) वज्रं (संशाय) सम्यक् तीक्ष्णीकृत्य (शत्रून्) अधार्मिकान्दस्यून् (वि-ताढि) विशेषेण ताडय (मृधः) युध्यमानान् (वि-नुदस्व) विशेषतो दूराहतान् कुरु॥

अहो! भाष्यकृतो ज्वालाप्रसादस्य धाष्टर्यं, यत् मूलविरुद्धं नृसिंहाद्यवतारजातमत्र वर्णितवान्॥

"मृगो न भीमः कुचरो गिरिष्ठाः। मृगइव भीमः कुचरो गिरिष्ठाः। मृगो मार्ष्टेर्गतिकर्मणो, भीमो बिभ्यत्यस्माद् भीष्मोऽप्येतस्मादेव। कुचर इति चरति कर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति। गिरिष्ठा गिरिस्थायी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गिरिः पर्वतः" इत्यादि निरु० १ । २० अत्राऽपि नाऽवतार कथा दृश्यते ॥

नाऽपि सायणाचार्येण ऋग्वेदे १० । १८० । २ ऽपि अवतारकथाऽवतारिता ॥

न च महीधरेण यजुर्वेदे १८ । ७१ ऽवतारनिरूपणं कृतम् ॥

नैव सायणेनाऽथर्ववेदे ७ । ८ । ८४ ऽपि नृसिंहाद्यवतार चर्चाऽपि कृता ॥ १ ॥

भाषार्थः—(इन्द्र) राजन् ! आप (मृगः न) सिंह के समान (भीमः) शत्रु को भयदायक (कुचरः) पृथिवी पर विचरने वाले (गिरिष्ठाः) पर्वतस्थ वा दुर्ग=क़िले में स्थित (परस्याः) अन्य दिशा से (परावतः) दूर से (आजगन्थ) आते हो और आकर (सृकम्) चलाऊ (तिग्मम्) तीक्ष्ण (पविम्) वज्र को (संशाय) भले प्रकार से पैना कर तेज करके (शत्रून्) अधर्मी दुष्ट दस्युओं को (वि-तादि) विशेष करके ताडित करो और (मृधः) युद्ध करते हुवे दुष्टों को (वि-नुदस्व) विशेष करके दूर भगाओ ॥

ज्वालाप्रसाद भार्गव भाष्यकार की धृष्टता पर आश्चर्य होता है कि उन्हों ने इस मन्त्र के व्याख्यान में मूलविरुद्ध निर्मूल नृसिंहादि अवतारों का वर्णन कर डाला ॥

न तो ऊपर संस्कृतभाष्य में लिखे निरुक्त १ । २० में अवतार का वर्णन है । न ऋग्वेद १० । १८० । २ में सायणाचार्य ने अवतार बताये । न महीधर ने यजुर्वेद १८ । ७१ में अवतारपरक व्याख्या की और नहीं अथर्ववेद ७ । ८ । ८४ में आये इस मन्त्र पर सायणाचार्य ने अवतार की चर्चा तक की है ॥ १ ॥

अथ द्वितीयायाः—अप्रतिरथ ऋषिः राहूगणो गोतमो वा ।
विश्वे देवा देवताः । त्रिष्टुप्छन्दः ॥

३ १र २र ३ १ २ ३ १ २ ३ १र २र
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गै
३ १ २ ३ २ ३क २र ३ १ २ ३ १ २र
स्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २ ॥ (१८७२)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः-भद्रम् २। कर्णेभिः ३। शृणुयाम क्रि०। देवाः सं०। भद्रम्। पश्येम क्रि०। अक्षभिः ३। यजत्राः सं०। स्थिरैः, अङ्गैः ३। तुष्टुवांसः १। तनूभिः ३। व्यशेमहि क्रि०। देवहितं, यत् आयुः १॥

अन्वितपदार्थः-(यजत्राः) हे यजनीयाः ! (देवाः) देवताः ! भवत्प्रसादेन वयं (कर्णेभिः) कर्णैः (भद्रं) कल्याणकरं वचः (शृणुयाम), (अक्षभिः) नेत्रैः (भद्रं पश्येम), (तनूभिः) देहैः (स्थिरैः) दृढैः (अङ्गैः) हस्तपादादिभिः सह वर्त्तमाना वयं (तुष्टुवांसः) युष्माकं देवानां स्तुतिं कुर्वन्तः (यत्) यावत् (देवहितं) देवेनेश्वरेण स्थापितं " षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा " (आयुः) जीवनं, तद् (व्यशेमहि) विशेषेण प्राप्नुयाम ॥ ऋग्वेदे १। ८९। ८ऽपि, यजुर्वेदे २५। २१ चापि ॥२॥

भाषार्थः-(यजत्राः) हे यजनीय ! (देवाः) देवो ! हम आप के प्रसाद से (कर्णेभिः) कानों से (भद्रम्) अच्छा वचन (शृणुयाम) सुने (अक्षभिः) आंखों से (भद्रम्) अच्छा दृश्य (पश्येम) देखें (स्थिरैः) दृढ (अङ्गैः) हस्त चरणादि अङ्गों से और (तनूभिः) देहों से (यत्) जितनी (देवहितम्) ईश्वरस्थापित ११६ व १२० वर्ष की (आयुः) आयु है, उस को (व्यशेमहि) विशेष करके भोगें वा पावें ॥ ऋ० १। ८९। ८ यजुः २५। २१ में भी ॥ २ ॥

अथ तृतीयायाः-ऋषिर्देवते उक्ते। स्वराट् त्रिष्टुप्छन्दः ॥

३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

३ २ ३ १ ३ १ २ ३ २ ३ २ ३ १ २

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु

३ २ ३ २ ३ १ २

स्वस्ति नो बृहस्पतिर्दधातु ॥ ३ ॥ [९] (१८७३)

इति नवमः प्रपाठकः ॥ ९ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदपाठः—स्वस्ति अ० । नः ४ । इन्द्रः, वृद्धश्रवाः १ । स्वस्ति । नः । पूषा, विश्ववेदाः १ । स्वस्ति । नः । तार्क्ष्यः, अरिष्टनेमिः १ । स्वस्ति । नः । बृहस्पतिः १ । दधातु क्रि० । स्वस्ति । नः । बृहस्पतिः । दधातु ॥

अन्वितपदार्थः—(वृद्धश्रवाः) वृद्धं श्रवो यशो वैदिकं श्रवणं वा यस्य सः (इन्द्रः) देवराट् (नः) अस्मभ्यं (स्वस्ति) सुखं (दधातु) धारयतु । (विश्ववेदाः) विश्वं वेदयति लम्भयति सः (पूषा) पोषको देवः (नः) अस्मभ्यं (स्वस्ति) सुखं धारयतु । (अरिष्टनेमिः) अरिष्टा नीरोगा नेमि र्नीतिर्यस्य सः (तार्क्ष्यः) अश्वोविद्युद्विशेषः (नः) अस्मभ्यं (स्वस्ति) सुखं कल्याणमनामयमविनाशं धारयतु । (बृहस्पतिः) बृहतां पतिरेतत्संज्ञो देवः (नः) अस्मभ्यं (स्वस्ति) सुखं दधातु । (स्वस्ति नो बृहस्पतिर्दधातु) इति द्विरुक्ति र्ग्रन्थसमाप्तिसूचनार्था ॥

यद्वा—ईश्वरपक्षे—(इन्द्रः) परमैश्वर्यवान् (पूषा) सर्वपोषकः (तार्क्ष्यः) अश्वोव्यापकः (बृहस्पतिः) बृहतां सूर्यादीनां पालक इति योज्यम् ॥

तार्क्ष्यइति अश्वनाम निघं० १ । १४ ॥ ऋग्वेदे १ । ८९ । ६ यजुर्वेदे २५ । १९ चाऽपि ॥ ३ ॥

इति

द्वाविंशाऽध्यायस्य प्रथमः खण्डः ॥ १ ॥

इति

श्रीमत्कण्ववंशाऽवतंस—पण्डित हज़ारीलाल स्वामि सूनुना,
हस्तिनापुर पार्श्ववर्त्ति परीक्षितगढ़ निवासिना,
तुलसीराम स्वामिना कृते सामवेदभाष्ये
उत्तरार्चिके द्वाविंशोऽध्यायः ॥ २२ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भाषार्थः-(वृद्धश्रवाः) जिस का सब से बढ़कर यश है वा सब से अधिक वेदमन्त्रों में श्रवण है वह (इन्द्रः) इन्द्र देवराज (नः) हमारे लिये (स्वस्ति) सुख कल्याण वा अविनाश को (दधातु) धारण करे। (विश्ववेदाः) सब का लाभ कराने वा ज्ञान कराने वाला वा जानने वाला (पूषा) पोषण करने वाला पूषा देव (नः) हमारे लिये (स्वस्ति) सुख कल्याण वा अविनाश को धारण करे। (अरिष्टनेमिः) जिस की नेमि=नीति वा चाल रोगरहित है वह (तार्क्ष्यः) विद्युद्विशेष देव (नः) हमारे लिये (स्वस्ति) सुख कल्याण वा अविनाश को धारण करे (बृहस्पतिः) बृहस्पतिसंज्ञक, बड़े २ सूर्यादि का भी धारक पालक पोषक देवविशेष (नः) हमारे लिये (स्वस्ति) सुख कल्याण वा अविनाश को परमेश्वर की कृपा से धारण करे॥

ईश्वरपक्ष में-इन्द्र पूषा तार्क्ष्य और बृहस्पति सब उसी के गुणकृत नाम हैं॥ (स्वस्ति नो बृहस्पतिर्दधातु) इतना पाठ दोबार ग्रन्थ समाप्तिसूचनार्थ है॥

यह

श्रीमत्कण्ववंशाऽवतंस-पण्डित हज़ारीलाल स्वामी के पुत्र, परीक्षितगढ़ ज़िला-मेरठ निवासी, तुलसीराम स्वामिकृत सामवेदभाष्य के उत्तरार्चिक में बाईसवां अध्याय समाप्त हुवा॥२२॥

—:*ॐ*:—

यस्य निश्वसितं वेदा यो वेदाञ्जगतेऽखिलान्।
निर्ममे तमहं वन्दे परमात्मानमव्ययम्॥ १॥
आगमप्रवणश्चाहं नाऽपवाद्यः स्खलन्नपि।
नहि सद्वर्त्मना गच्छन्स्खलितेष्वप्यपोद्यते॥ २॥

अर्थ-जिस के निश्वास वेद हैं, जो जगत् के हितार्थ सब (चारों) वेदों को रचता है, उस अविनाशी परमात्मा को प्रणाम करता हूं॥ १॥ और वेद के आगे झुकता हुवा कहीं मैं गिर पड़ूं (कोई भूल भाष्य में कर पाऊं) तौ भी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुछ निन्दनीय नहीं, क्योंकि उत्तम मार्ग पर चलता हुवा पुरुष यदि कहीं रपट कर गिर पड़ता है, तो उस की निन्दा वा अपवाद नहीं किया जाता है ॥२॥

—: ∓*∓ :—

उत्तरार्चिकं समाप्तम्

समाप्ता चैषा सामवेदसंहिता ॥

ओं शम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२१८
५ II (८)

सन्दर्भ ग्रन्थ
REFRENCE BOOK
यह पुस्तक वितरित न की जाय
NOT TO BE ISSUED

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

1907I
146

Diamond Book Binding House
Mob Karachi B.H.E.L. Road Jamalapur

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA